3/1942
(674)
140763

॥ कालतत्वविवेचनप्रारंभः १२५०० संख्या ॥

33a25

कालतत्त्व
१

श्रीगणेशायनमः॥ पितरंमाधवमंबांललितांनारायणंपितृव्यंच सहजमथविश्वनाथंगणपतिमीशांचशारदांनत्वा १ रामंचसीता
येपितंरघुनाथेनरच्यते सम्राट्स्थपतिनासम्यक्कालतत्वविवेचनं २ तत्रादौबहुवाच्यत्वात्तिथितत्वंविविच्यते पश्चान्मा
साधिमासादियथामतिविवेक्ष्यते ३ तत्रतिथिर्नामामासंज्ञकसर्वानुस्यूतनित्यकलाद्यतिरिक्तानांप्रतिपद्द्वितीयादिसंज्ञा
नांपंचदशचंद्रकलानांमध्येएकैकस्याःकलायाश्चंद्रमसःसूर्यमंडलेनसहपरमसन्निकर्षानंतरंविप्रकर्षःपरमविप्रकर्षानंत
रंवासन्निकर्षोयावताकालेनभवतितावत्कालोयथाक्रमंशुक्लकृष्णगतोलक्षणयाप्रतिपद्द्वितीयादिशब्दैःप्रतिपाद्यः यथो
क्तंस्कांदेप्रभासखंडे अमाषोडशभागेनदेविप्रोक्तामहाकला संस्थितापरमामायादेहिनांदेहधारिणी अमादिपौर्णमा
स्यंतायाएवशशिनःकलाः तिथयस्ताःसमाख्याताःषोडशैववरानने इति षट्त्रिंशन्मतेपि तत्रपक्षावुभौमासेशुक्लकृष्णौ
क्रमेणहि चंद्रवृद्धिकरःशुक्लःकृष्णश्चंद्रक्षयात्मकः पक्षस्याद्यास्तुतिथयःक्रमात्पंचदशस्मृताः दर्शांताःकृष्णपक्षेताःपूर्णि
मांताश्चशुक्लकइति तासांचतिथीनांविधिनिषेधांगत्वंसप्तम्यातत्रतत्रप्रसिद्धमेवनिमित्तंकालमादायवृत्तिर्विधिनिषेध
योरितिवचनाद्वसंतेवसंतेज्योतिषेतिवत्स सप्तमीनिमित्ते नत्वधिकरणेइतिवाच्यं उपपदविभक्तितःकारकविभक्तेर्बलीय
स्त्वात् वसंतेवसंतइत्यत्रवीप्साबलात्तांपरित्यज्यनिमित्तसप्तम्याश्रिता निमित्तत्वोक्तिस्तु अनुपादेयत्वसाम्यान्नकालो
गुणोनिमित्तंत्वेतदितिशाबरोक्तिवत् यस्यतर्हितिथ्यादेर्वीप्सायोगस्तस्यवसंतवन्निमित्तत्वमेवस्यान्नत्वंगत्वं सिध्यति
तस्याप्यंगत्वं तथाहितस्मिन्कालेनिमित्तेविहितस्यप्रयोगस्यकालाकांक्षायामुपस्थितत्वात्तस्यैवांगत्वेनाप्यन्वयः नचवा
क्यभेदः यत्रतावन्निमित्तसंबंधेनापूर्वकर्मोत्पत्तिस्तत्रसम्यगेव यत्रापिविध्यंतरेणोत्पन्नस्यनिमित्तमात्रसंबंधस्तत्रापि
प्रयोगस्यापूर्वस्यैवविधानात्तदनुसंबंधस्यविशेषणस्यैकस्यानेकस्यापिसिध्यतिआवृत्तिंविनैवविशिष्टविधिन्यायेन
विधिः राजाराजसूयेनेत्यत्रराजाइव अतएवज्योतिष्टोमस्यनैमित्तिकप्रयोगविधायित्वेनसर्वेषांसंमतंवीप्सायुक्तवसंत
वाक्यमेवतस्यवसंतकालकत्वेप्रमाणत्वेनयज्ञसूत्रभाष्यकाराणांनिबंधॄणांचसंमतं यस्यतुसंक्रांत्यादिकालस्यसूक्ष्म १

5
1942

त्वाद्दीर्घकालश्राद्धादिकर्मांगत्वासंभवस्तत्संभवेपिवायत्रचनादिनिमित्तभूतकालपूर्वोत्तरान्यतरकालस्यांगत्वंकर्मणिरविवार
निमित्तस्नानादाविवसूर्योदयपूर्वकालस्यतत्रतस्यनिमित्तत्वमेवेतिदिक् साचतिथिर्द्विविधासंपूर्णाखंडाच तत्रसंपूर्णोक्ता
नारदीये आदित्योदयवेलाया आरभ्यषष्टिनाडिका संपूर्णाइतिविख्याताहरिवासरवर्जिताइति सूर्योदयास्तमयव्यापित्वेना
पितिथेःसंपूर्णत्वं रात्रिमात्राहोरात्रान्यतरसाध्यकर्मव्यतिरिक्तकर्मसुभवति तदुक्तं अहःसुतिथयःपुण्याःकर्मानुष्ठानतो
दिवा नक्तादिव्रतयोगेषुरात्रियोगोविशिष्यतइति दिवैवकर्मणामनुष्ठानमित्युत्सर्गोयतः अतोहेतोरहःसुयास्तिथयस्ताः
पुण्याइत्यर्थः त्रिसंध्यव्यापिनीयत्रसैवपूज्यासदातिथिरितिच प्रातमर्ध्याह्नसायंसंध्याव्यापिनीत्यर्थः ननुप्रातःसंध्याद्वयं
सायंसंध्येतिच संध्यात्रयं संख्यायाःपृथक्निवेशित्वात् दिवैवप्रायःकर्मणामनुष्ठानंपूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणा
मपराह्णःपितॄणामित्यहर्भागेष्वेवंदेवादिकर्मविधानात् स्नानंदानंतपःश्राद्धमनंतंराहुदर्शने आसुरीरात्रिरन्यत्रतस्मात्तांपरिवरी
वर्जयेदितिसूर्योदयंविनानैवस्नानदानादिकंक्रमइत्यादिभिःसामान्येनसकलकर्मसुरात्रिनिषेधाच्च प्रातःसंध्यांबुधःकृत्वा
संकल्प्यंततआरभेदितिसामान्यतःसर्वकर्मणांदिनोपक्रमेणसंकल्पविधानाच्च जैमिनिनाप्युदगयनपूर्वपक्षाहःपुण्याहेषुदै
वानिस्मृतिरूपान्यार्थदर्शनादित्युदगयनादिसाधारण्येमाह्नः सर्वकर्मकालत्वमुक्त्वाह्नि विशेषोपपत्तिरुक्ता अहनिचकर्म
साकल्यमिति तस्माद्धस्तनाहर्मात्रव्यापिन्यपितिथिःकेषुचित्संपूर्णैव अतएवतिथ्यंतरवेधोप्युदयास्तमयांतरालएवप्रा
योव्यवह्रियतेनतूदयात्पूर्वमस्तमयोत्तरंवा संपूर्णेतराखंडा तत्रचसंदिग्धत्वात्खंडैवनिर्णेतव्यानतुसंपूर्णा असंदेहात्
संदेहश्चगुणारोधेनप्रधानावृत्तेरन्याय्यत्वेनकर्मणःसकृत्कर्तव्यत्वात् अतएवनिषेधेषुखंडापिननिर्णेया निवृत्तेर्यावत्ति
थिभावित्वेननिर्णीतत्वादसंदेहात् तदाहवृद्धगार्ग्यः निमित्तंकालमादायवृत्तिर्विधिनिषेधयोः विधिःपूज्यतिथौतत्रनिषे
धःकालमात्रके तिथीनांपूज्यतानामकर्मानुष्ठानयोग्यता निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षतइतिनचकेवलंवाचनि
कएवायमर्थः किंतुन्याय्योपीतिनिषेधस्त्वित्यनेनसूचयति तथाहि विधिषुविधेयानुष्ठानस्याभ्युदयेहेतुत्वंप्रमेयं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

कालतत्व
२

सकृदनुष्ठानादेवचाभ्युदयसिद्धेस्तिथिद्वैधेकुत्रानुष्ठेयमितिविधेयेजायतेसंदेहः निषेधेषुतुकालविशेषेकर्मविशेषानुष्ठानस्या
नर्थहेतुत्वंप्रमेयं यदाकदापिवत्कालेतत्कर्मानुष्ठानेऽनर्थप्रसंगात्सर्वदैवतत्कालेतद्वर्ज्यंभवतीतितत्रनास्तिसंदेहइति नन्वेवं
वनान्यायतश्च कालविशेषप्रयुक्तसर्वनिषेधानांतावत्कालिकत्वसिद्धौ अभ्यंगमैथुनदंतधावननिषेधेषुपुनस्तावत्कालिक
त्ववचनंकिमर्थं अभ्यंगेचोदधिस्नानेदंतधावनमैथुने जातेचमरणेचैवतत्कालव्यापिनीतिथिरिति नचतत्तिथ्योदयास्तमयाम
नुष्ठानस्यन्यायवचनसिद्धत्वेपिउदयास्तमयवर्त्तित्वेनसाकल्यवचनात्तद्वर्तितत्तिथिस्पृष्टायामितरतिथावपिप्रसक्तस्यत
स्यनिवृत्त्यर्थंतद्वचनमितिवाच्यं तिथिविशेषप्रयुक्तस्यनिषेधस्येतरतिथावप्रसक्तेरेव नहिसाकल्यवचनमेवप्रसंजकं॥
तत्तत्कर्मकालभूताहर्भागविशेषेतत्तत्तिथेरभावेपिन्यायाद्वचनाद्वातद्विधिविषयकर्मानुष्ठानेनिर्णयेनप्राप्तेतत्तदहर्भागेष्व
वतत्तत्कर्मानुष्ठानार्थंहितदिष्यते व्यक्तंभविष्यति नचतदर्थस्यतस्यनिषेधेषुकश्चिदुपयोगोयेनतदपवादार्थतावत्कालि
कवचनमवकाशंलभेतेति सत्यं विधेयकर्मविशेषविषयएवसाकल्यापवादार्थितस्मिन्वचनेनिषेध्यानांकेषांचिदुपादानं
दृष्टांतत्वेनजननमरणयोरिव नहिजननमरणयोरनुष्ठेययोः साकल्यवचनंप्रवर्ततेयेनतदपवादःकर्तव्यः साकल्यवचनेस्ना
नदानजपादिष्वित्यादिशब्देनतदर्थकेन चदानाध्ययनकर्मस्वितिबहुवचनेनानुष्ठेयानामेवकर्मणांग्रहणात् अतएवनिषेध्या
नामप्यसादृश्यात्तत्रानुपादानं नचजननमरणाभ्यांतन्निमित्तकस्यानुष्ठेयकर्मणएवोपादानं तन्निमित्तकश्राद्धादौसाकल्यस्ये
ष्टत्वादेवतदपवादासंभवात् तस्माज्जननमरणयोस्तद्वन्निषेध्यानामपिदृष्टांततयैवतत्रोपादानं अतएवतत्तत्तिथिविशेषा
धिकरणकोत्पातादिनिमित्तानांसकलनिषेध्यानांचोपलक्षणमेवतत्ग्रहणमिति अतोविधिविषयकर्मस्वखंडासंदेहान्निर्णे
तव्या तानिचकर्माणिदैवपित्र्यभेदेनद्विविधानिपितृदैवत्यानिपित्र्याणितद्भिन्नानिदैवानि दैवान्यप्युपवासैकभक्तनक्ता
याचितव्रतदानरूपेणषड्विधानि पित्र्याण्यपिएकोद्दिष्टपार्वणदैवरूपेणत्रिविधानि तानिचसर्वाणियथातत्रतिथ्यादि २

7/19

षुविहितानितथोपवासातिरिक्तानिप्रातरादिष्वहोरात्रभागेष्वपिविहितानि अह्नश्चपंचदशमुहूर्तात्मकस्यभागाद्वेधात्रिधा
चतुर्धापंचधाचश्रुतिस्मृतिपुराणेषूक्तास्तथापिबहुसंमतत्वात्बहुव्यवहारानुगुणत्वाच्चप्रातःसंगवमध्याह्नापराह्णसा
याह्नात्मकः पंचधाविभागएवत्रित्रिमुहूर्तात्मकउत्सर्गतोग्राह्यतिसचवृद्धपराशरेणोक्तः लेखाप्रभृत्यथादित्यान्मुहूर्तास्त्रय
एवच प्रातस्तुसंस्मृतःकालोभागश्चाह्नःसपंचमः संगवस्त्रिमुहूर्तोथमध्याह्नस्तत्समस्मृतः ततस्त्रयोमुहूर्ताश्चअपरा
ह्णोविधीयते पंचमोथदिनांशोयःससायाह्नइतिस्मृतः यद्यदेतेषुविहितंतत्तत्कुर्याद्विचक्षणइति द्वेधाविभागादयस्तुय
त्रक्वचिद्योतकंतत्रैवग्रहीतव्याः एतत्सर्वंतत्तत्कर्मविशेषस्यतत्तद्रागकालकत्वंचतत्तत्कर्मविशेषेणतिथिनिर्णयेवक्ष्यते
उपवासश्चाहोरात्राभोजनसंकल्पपरिपालनरूपोऽहोरात्रऽसाध्यः एकभक्तनक्तायाचितेष्वपिविशेष्यमात्रंमध्याह्नादिसा
ध्यंविशेषणांशस्त्वहोरात्रसाध्यएव तदहोरात्रावच्छिन्नद्वितीयभोजनाभावविशिष्टंहिमध्याह्नभोजनमेकभक्तं तादृशमे
वप्रदोषभोजनंनक्तं अयाचितलब्धस्यतादृशमेवसत्भोजनंअयाचितं तत्रकालस्यानुपादेयत्वाद्यथातत्रतिथिपरित्यागेनक
र्मकर्तुंनशक्यतेथातत्तदहर्भागपरित्यागेनापीतितत्तत्व्यापिनीतिथिस्तत्रतत्रकर्मणिग्राह्येत्युत्सर्गः कर्मणोयस्ययःकालस्त
त्कालव्यापिनीतिथिः तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणमितिवृद्धयाज्ञवल्क्यवचनात् नचान्यान्यपिखंडतिथिनिर्ण
यकानिवचनानिदृश्यंते तत्रविष्णुधर्मोत्तरेतावत् नक्षत्रंदेवदेवेशतिथिंचार्द्धविनिर्गतां दृष्ट्वोपवासःकर्तव्यःकथंशंक
रजानता ईश्वरउवाच सातिथिस्तदहोरात्रंयस्यामभ्युदितोरविः तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणं सातिथिस्तदहो
रात्रंयस्यामस्तमितोरविः तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणं शुक्लपक्षेतिथिर्ग्राह्यायस्यामभ्युदितोरविः कृष्णपक्षे
तिथिर्ग्राह्यायस्यामस्तमितोरविरितिदेवलोपि यांतिथिंसमनुप्राप्यउदयंयातिभास्करः सातिथिःसकलाज्ञेयास्नान
दानव्रतादिषु यांतिथिंसमनुप्राप्यअस्तंयातिचभास्करः सातिथिःसकलाज्ञेयास्नानदानजपादिष्विति क्वचिदुदयवा
क्येदानाध्ययनकर्मस्विति अतएवविष्णुधर्मोत्तरगतप्रश्नवाक्येउपवासग्रहणमुपलक्षणं अतएवदैवेकर्मणिसं

का॰ न॰ ३

प्रासेयस्यामभ्युदितोरविः सातिथिःसकलाज्ञेयापित्र्यर्थेचापराह्निकीति मार्कंडेयपुराणवचनात् यथास्तंमवितायातिपितरस्ता
मुपासते तिथिं स्तेभ्योयतोदत्तोह्यपराह्णःस्वयंभुवेति परिशिष्टवचनाच्च प्रतीयमाना उदयास्तमयगततिथ्योर्दैवपित्र्यविषयत्वे
नव्यवस्थाप्ययुक्तापूर्ववचनेदैवे पित्र्ये कर्मण्यस्तमयतिथेर्ग्राह्यत्वाभिधानात् किंतुशुक्लकृष्णपक्षविषयत्वेनैव अनयोस्तु
वचनयोः पित्र्यस्तमयव्यापितिथिविधानएवतात्पर्यं तत्रोवित्येनस्तुत्यर्थं दैवेउदयव्यापितिथेर्ग्राह्यत्वं पूर्ववचनसिद्धमनू
द्यते वैखानसविधिपरेवैखानसंपूर्वेहन् साभवतीस्यत्र षोडश्युत्तरइतिवत् तथायुग्मवाक्यात्तिथिग्राह्यत्वस्यव्यवस्थाप्र
तीयतेतथाचनिगमसंज्ञकेपरिशिष्टे युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः रुद्रेणद्वादशीयुक्ताचतुर्दश्याचपूर्णिमा
प्रतिपद्यप्यमावास्यातिथ्योर्युग्मंमहाफलं एतव्यस्तंमहादोषंहंतिपुण्यंपुराकृतमिति युग्मंद्वितीया अग्निस्तृतीया युगं
चतुर्थी भूतंपंचमी षट्षष्ठी मुनीःसप्तमी वसुरष्टमी रध्रंनवमी रुद्रएकादशी एवंवचनार्थः युग्माग्न्योर्युगभूतयोःष
ण्मुन्योर्वसुरंध्रयोस्तिथ्योर्युग्मंस्तयारुद्रेणयुक्तासहिताद्वादशीरुद्रश्चद्वादशीचेत्यर्थः एवमग्रेपिचतुर्दशीपूर्णिमाच प्रति
पच्चामावास्याच अनयोरनयोश्चतिथ्योर्युग्मंकृतं पूर्वातिथिरुत्तरविद्धाउत्तराचपूर्वविद्धाकृतातत्तत्कर्मणीत्यर्थः महाफलंत
त्तत्तिथ्यधिकरणकतत्तत्कर्मविधिशिरस्कफलदायीतिस्तुत्युन्नीतोविधिर्युग्मगतापूर्वातिथिरुत्तरविद्धाउदयव्यापिनीग्रा
ह्या उत्तरातिथिः पूर्वविद्धाअस्तमयव्यापिनीग्राह्येति एतद्युग्मंव्यस्तंविपर्यस्तमन्यथाभूतंकृतंएतद्युग्मताः पूर्वास्तिथ
यस्तत्पूर्वतिथिभिरुत्तराश्चोत्तरतिथिभियुग्मीकृताइत्यर्थः महादोषंकर्मवैगुण्यापादकं पुराकृतंचपुण्यंहंतीतिनिंदा नहि
निंदान्यायेनपूर्वविधेस्तुतिः नतुनिंदयास्वतंत्रनिषेधोन्नयनं अर्धविनिर्गतांखंडांतिथिंनक्षत्रंवदृष्ट्वातदधिकरणमुपवा
सादिकर्मविदुषाकथंकार्यमितिप्रश्नवाक्यन्यायाच्चखंडतिथेःपूर्वदिनगतायाःउत्तरदिनगतायावा अनियमेनप्राप्त्यलेप्रसक्ते
कासांचिदुत्तरदिनगतानांकासांचित्पूर्वदिनगतानां तस्मिन्नियमितेवैपरीत्यस्यासक्तेः एतत्संवादीन्येवकिंचित्तिथिवि ३
षाण्यन्यान्यपियुग्मवाक्यानि पञ्चष्टम्यप्यमावास्याकृष्णपक्षेत्रयोदशी एताःपरयुताःपूज्याःपराःपूर्वेणसंयुताः एका

9/194

दशीतथाषष्ठीअमावास्याचतुर्थिका उपोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुताइति एकादश्यष्टमीषष्ठीशुक्लपक्षेचतुर्दशी ए
ताःपरयुताःकार्याःपराःपूर्वेणसंयुताइति षष्ठीचसप्तमीतातते अन्योन्यंसमाश्रिते इतिचेत्येवमादीनितथैतद्विरुद्धान्यपिप्राति
पत्तद्वितीयास्यात्तद्वितीयाप्रतिपद्युता चतुर्थ्यासंयुतायाचसातृतीयाफलप्रदा चतुर्थीचतृतीयायांमहापुण्यफलप्रदेति
चेत्येवमादीनि तथाखर्वदर्पवाक्यमपिसर्वसाधारण्येनार्थनिर्णायकं खर्वोदर्पस्तथाहिंसात्रिविधंतिथिलक्षणं खर्वद
र्पौपरौपूज्यौहिंसास्यात्पूर्वकालिकीति खर्वःसाम्यंदर्पोवृद्धिः हिंसाक्षयः एतेचक्षयादयोयदिग्राह्यतिथेस्तदापूर्वतिथ्य
पेक्षयाग्राह्यतिथ्यपेक्षयातदुत्तरतिथेर्वा एतच्चाग्रेस्पष्टनीयं तथातत्तत्तिथिगोचराःसामान्येनतत्तदुपवासादिकर्म
विशेषविषयत्वेनचपूर्वोत्तरविद्धाविधिनिषेधाबहवः तत्कथंकर्मकालव्याप्त्यैवखंडानिर्णयइति अत्रोच्यतेसर्वाणियु
ग्मखर्वादिशुक्लादिशास्त्राणितत्तत्कर्मविशेषुतत्तत्तिथ्यादिरूपेकालेविहितेतस्मिन्खंडेसंदेहेनिर्णयार्थंप्रवर्तंते यदा
चतिथ्यादिविधयःप्रवर्तंते तदैवप्रातराद्यहर्भागविधयोपितेनतेषांप्रथमावगतत्वात्तत्तत्कालीनतत्तत्तिथिलाभेसंदेहा
भावाच्चयत्रकर्मकालानुरोधेननिर्णयःकर्तुंनशक्यते तत्रैवविषयेसंदेहादितरशास्त्राणिनिर्णायकानीत्युत्सर्गः तथाहि
त्रिमुहूर्तानांततोन्यूनानांवाकर्मकालानांव्याप्तौपंचपक्षाःसंभवंति पूर्वेद्युरेवसाकल्येनैकदेशेनवासा परेद्युरेवसाउ
भयेद्युःकार्त्स्न्येनसा उभयेद्युरेकदेशेपिनसा उभयेद्युरेकदेशेनैवसेति अंत्यापिद्विविधा साम्येनवैषम्येन वेतितत्र
याताबदेकस्मिन्नेवदिनेकार्त्स्न्येनैकदेशेनवाकर्मकालव्यापिनीसान्याबात्कर्मणइतिप्रागुदाहृतवचनाच्चसैवग्राह्येति
कविरोरीत्तृतीयादावेतस्यापिवलवतावचनेनापवादोवक्ष्यते अनेनैवन्यायेनयदातिथिरेकस्मिन्दिनेहोरात्रयोगिनी
अपरस्मिंश्चाहर्मात्रयोगिनीरात्रिमात्रयोगिनीवा तदोपवासादावहोरात्रसाध्येउभययोगिन्येवग्राह्यानान्यतरमात्रयो
गिनी कर्मकालव्यापित्वात् दिवारात्रौव्रतंयच्चएकमेकतिथौगतं तस्यामुभययोगिन्यामाचरेत्तद्व्रतंव्रतीतिइतिशेषवच
नाच्च उत्तरस्यामुभययोगिन्यांत्रिसंध्यव्यापिनीत्यस्याप्युपोद्बलकत्वाच्च एतस्याप्यवादएकादश्युपवासादौभवि

प्यति वैषम्येण कर्मकालैकदेशव्याप्त्यावधिकैकदेशयोगिनी ग्राह्या साम्येन तु तस्यां यत्कर्म मध्याह्नादावेवोपक्रम्य समाप्यते तत्
त्र प्रधानोपक्रमकालद्वयैकदेशयोगिनी ग्राह्या योयस्य विहीनतः कालः कर्मणस्तदुपक्रमे तिथिर्याभिमता सा तु कार्या नोप
क्रमोज्झितेति बौधायनवचनात् दिनद्वयेपि कर्मकालव्याप्तौ तदस्पर्शे वा पूर्वमेवोपक्रम्य मध्याह्नादावनुष्ठीयमाने कर्मणि सा
म्येन तदेकदेशस्पर्शेपि युग्मवाक्यात् खर्वादिवाक्याद्वा निर्णयः तत्र कर्मकालशास्त्रेण निर्णयाशक्तेः अतएवोक्तं ह्रासवृद्धी
नकारणमिति तयोश्चदैवपित्र्यभेदेन व्यवस्थितं निर्णायकत्वं द्वितीयादिकयुग्मानां पूज्यता नियमादिषु एकोद्दिष्टादिवृध्यादौ
ह्रासवृध्यादि चोदनेति व्यास निगमवचनात् अतएव व्रतवाचिनियमपदासरेणादिशब्देन सकलदैवकर्मणामुपादानं सा
दृश्यात् एकोद्दिष्टादीत्यादिशब्देन प्राचीनावीतित्वादि धर्मवंत पित्र्याणां पार्वणादीनां वृध्यादिशब्देन चातद्गुणसंविज्ञान
बहुव्रीहिणा वृद्धिः पुत्रजन्मादिनांदीमुखश्राद्धनिमित्तं तल्लक्षितं तत् श्राद्धमादिः प्रकृतिर्यस्येति व्युत्पत्त्यैन वा यज्ञोपवीति
त्वादि दैवधर्मवतां दैवश्राद्धादीनां पित्र्याणां मुख्यवृद्धिश्राद्धस्य तिथिप्रयुक्तत्वाभावेन तत्र तन्निर्णायकानुपयोगात् हेमा
द्यादिग्रंथेषु मांगलिकामांगलिकपदाभ्यामिदमेव विवक्षितं ह्रासवृद्धीतिथेः आदिशब्देन सत्साम्यं तच्चोदना तत्प्रयुक्तो
निर्णयस्तत्प्रतिपादकं खर्वादिवाक्यं चेत्यर्थः अत्राचार्यचूडामणिना ह्रासवृध्यादिशब्दस्य चंद्रह्रासवृध्युपलक्षित शुक्ल
शुक्लपक्षपरत्वात् शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति वचनाभ्यां
शुक्लपक्षगता तिथिरुत्तरा कृष्णपक्षगता पूर्वेति पक्षद्वयप्रयुक्तो यो निर्णयः क्रियते स एकोद्दिष्टादिमाध्याह्निकवृध्यादि दै
वाह्निकपित्र्यविषय इत्येतस्य वचनस्यार्थः अपराह्णिके तु पार्वणादिपित्र्ये अस्तमयव्यापिन्येव पक्षद्वयेपि यथास्तं सवि
ता याति पितरस्तामुपासते तिथिं तेभ्योपराह्णो हि स्वयं दत्तः स्वयंभुवेति विशेषवचनात् अपराह्णिकविषयत्वं चास्य हेतु
वल्लिगदर्शवाक्यविशेषात् यद्यपि च शुक्लकृष्णपक्षप्रयुक्तो निर्णयो दैवकर्मविषयोपि भवत्येव तथापि तत्र युग्मव ४
चनादेव प्राप्तो निर्णयः तदनिश्चयभूतास्वेव कासुचित्तिथिषु तस्यावकाशः पित्र्येषु चापराह्णिकेतरेषु कर्मकालव्याप्ति

शास्त्रेण निर्णये शुक्लकृष्णपक्षप्रयुक्त एव निर्णय इत्यस्य तद्विषयत्वमुच्यत इत्युक्तं तिथितत्वेप्येवमेव एकोद्दिष्टादिवृध्यादावित्य
स्य त्वित्यं व्याख्यानमधिकं एकोद्दिष्टादिशब्देन तन्निमित्तभूततिथिविशेषाणां ग्रहणं आदिशब्देन पार्वणस्यापि वृध्यादावित्यादिश
ब्देन क्षयसंनिततयोः ह्रासवृध्यादीत्यादिशब्देन यथास्तमिति चोदनायाः ततश्चायमर्थः एकोद्दिष्टादिनिमित्तभूततिथेर्द्वित्वसं
साम्येषु तत्प्रयुक्ते संशये आपराह्णिकेतरपित्र्ये चंद्रवृद्धिह्रासोपलक्षितशुक्लकृष्णपक्षचोदनानियामिका आपराह्णिके
तु तत्र यथास्तमिति चोदनेति तिथिविवेकेप्येवं खर्वदर्पवाक्यं त्वितरैर्नोद्भावितमेव आचार्यचूडामणिना तु दर्शश्राद्धविषयं व्या
ख्यातं यदा चतुर्दशी यामं तुरीयमनुपूरयेत् अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यत इत्यादि परिशिष्टवचनैकवाक्यत्वा
त् अतएव दर्शोपवासः कर्तव्यः कथं शंक जानंतेति विष्णुधर्मोत्तरेप्युपक्रमे उपवासग्रहणं न दैवकर्मणामेवोपलक्षकं किं त्वाप
राह्णिकेतरपित्र्याणामपि यां तिथिं समनुप्राप्येति देवलवचनद्वये त्वादिपदेन सादृश्याद्दैवकर्मणामेव ग्रहणं पित्र्यव्यावृत्त्येव त
स्य सार्थक्यात् तेन दैवकर्मविषयस्य युग्मवाक्यस्यैव तदुपोद्बलकमिति एवं ह्रासवृद्धी नकारणमित्यत्रापि ह्रासवृद्धिशब्दाभ्यां
शुक्लकृष्णपक्षयोरेवोपादानमिति अत्र ब्रूमः निगमवचनस्य लक्षणां विना पूर्वार्धोपस्थिततिथिगतह्रासवृद्धीविषय खर्वा
दिवाक्यव्यवस्थापकत्वे संभवति सति अत्यंतानुपस्थितचंद्रवृद्धिह्रासांगीकारेण लक्षणया च शुक्लकृष्णपक्षशास्त्रविषयत्वं
तावदत्यंतायुक्तं किंच तद्विषयत्वे व्यवस्थाप्यशक्या तथाहि पूर्वार्धे तावन्नेदृशी व्यवस्था क्रियते दैवेषु युग्मवचनमेव नि
र्णायकमिति युग्मवचनाविषयतिथिषु विरुद्धयुग्मवचनविषयतिथिषु च दैवकर्मस्वपि शुक्लकृष्णपक्षवाक्यस्य सर्वैरपि नि
यामकत्वस्याभ्युपगतत्वायुक्तत्वाच्च तस्मादीदृशी तत्र व्यवस्था युग्मवचनानि नियमादिविषयाण्येवेति तथा चोत्तरार्धेपि
शुक्लकृष्णवाक्यं पित्र्यविषयमेवेत्येवं व्यवस्था वक्तव्या न च सा युक्ता तस्य दैवेष्वपि व्यवस्थापकत्वाभ्युपगमात् पूर्वाह्णिक
नां च दैवामादिश्राद्धानां वृध्यादावित्यनेनैव ग्रहणादेकोद्दिष्टातिरिक्तस्य च माध्याह्निकश्राद्धस्याभावादेकोद्दिष्टादीत्यादि
शब्दसंग्राह्यमपि न लभ्यते पार्वणसंग्रहानंगीकारात् यत्तु तिथितत्वे एकोद्दिष्टादिवृध्यादावित्यस्य व्याख्यानं तदत्यंतायुक्तं

तथाहि संदेहप्रतिपादनमेवतावन्नोपयुज्यते। सर्वतिथिनिर्णयवाक्यानांसंदेहएवप्रवृत्ते:किंतुतद्व्यापनाय वृध्यादिप्रतिपादने
नसंदेहोत्पादकतापिवृध्यादीनांनैकांतिकी अष्टपंचाशत्षष्टिद्वाषष्ट्यन्यतरनाडीमितत्वेतिथे:सत्यपिक्षयादौसंदेहाभावात् किं
तुतिथिखंडत्वस्यैवसा नांतरीयकंतुतदास्यवृध्यादिकं लक्षणाचएकोद्दिष्टादिशब्देनतदंगतिथिर्निर्हेतुकी किंच शुक्लकृष्णवा
क्ययो:पित्र्यविषयत्वमयुक्तमेव तथाहिवचनांतरैरव्यवस्थयाप्राप्तयो:पूर्वोत्तरतिथ्योर्व्यवस्थामात्रमेवताभ्यांक्रियतेलाघवा
त्दशम्यादाविव नचकुत्रापिपित्र्ये:व्यवस्थयापूर्वोत्तरतिथ्यो:प्राप्तिर्येनतत्रानयोरवकाश:स्यात् एकैकदिनेकर्मकालव्याप्तौ
तथैव वैषम्येनैकदेशस्पर्शेआधिक्येन साम्येनतस्मिन्खर्वादिनातदनंगीकारेउभयत्रतत्व्याप्तौतदस्पर्शेवा अस्तमयापरा
ह्णव्याप्तिभ्यांपार्वणैकोद्दिष्टयोर्व्यवस्थासिद्धे: नचास्तमयादिवाक्यान्यापराह्णिकपित्र्यविषयाण्येवनतुतदितरपित्र्यविष
याणीतियुक्तंदेवकार्येतिथिर्ज्ञेयायस्यामभ्युदितोरवि: पितृकार्येतिथिर्ज्ञेयायस्यामस्तमितोरवि: उदितेदैवतंभानोपित्र्यं
चास्तमितेरवौ द्विमुहूर्तंत्रिरह्नश्चसातिथिर्हव्यकव्ययोरित्यादिवचनानांसामान्यविषयत्वात् ययास्तंसवितायातीत्या
दावपिसत्यप्यपराह्णसमभिव्याहारेपूर्वाह्णेदैविकंकार्यमपराह्णेतुपैतृकं तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यतइत्या
दिवाक्यपर्यालोचनयाद्विधाविभक्तदिनापराह्णविषयत्वात्तस्यैकोद्दिष्टविषयत्वेपितदुपपत्ते:सर्वपित्र्यविषयत्वमेव एकोद्दि
ष्टस्यापिकुतपपूर्वाह्णउपक्रमेपितादृशापराह्णएवसमाप्यमानत्वात् उपक्रमस्यच शुक्लपक्षेपार्वणसंबंधिनोपिकुतपपू
र्वार्धरूपपूर्वाह्णागतत्वात् शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षण: कृष्णपक्षेपराह्णेतु रौहिणंतुनलंघयेदितिवचनात्
नचरौहिणंतुनलंघयेदित्येतत्समभिव्याहारादारभ्यकुतपेश्राद्धंकुर्यादारौहिणाद्बुध इतिवदेकोद्दिष्टविषयमेवेदमितिवाच्यं
अतोपक्रमेरौहिणलंघननिषेधात् पूर्वाह्णेउपक्रमस्यैवकालविधानात् तस्मात्पित्र्येषुसर्वत्रान्यतएवव्यवस्थासिद्धेर्व्य
वस्थापकांतरानपेक्षणाद्देवेष्वेवव्यवस्थापकंशुक्लकृष्णपक्षवाक्यं तत्राहियुग्मवचनाविषयतिथिषुभूयत्रकर्मकाल ५
व्याप्त्यादौविरुद्धयुग्मवचनविषयतिथीषुचास्तिव्यवस्थापेक्षा एवंसतिविष्णुधर्मोत्तरवचनोपक्रमगतमुपवासग्र

13
194

हणमपिसादृश्याद्दैवकर्मणामेवोपलक्षणेनपित्र्याणांतस्मादेकोद्दिष्टादीत्यस्यकुत्स्थस्यखर्वादिवाक्यानांसर्वतिथिविषयाणांदर्श
मात्रविषयतयातिसंकोचिनव्याख्यानमयुक्तमेवेतिपूर्वोक्तमेवद्वितीयादिकयुग्मानामित्यस्यदैवपित्र्यकर्मविषयत्वेनयुग्मखर्वा
दिवाक्यव्यवस्थाप्रतिपादकतयाव्याख्यानंयुक्तं युग्मवचनानांमिथोविरोधेशुक्लकृष्णवाक्यात्व्यवस्थाक्वचित्कर्मविशेषेणापि
तच्चाग्रेवक्ष्यतेभविष्यति एवंसतियतविष्णुधर्मोत्तरेआद्यवाक्याभ्यामुदयास्तमयान्यतरगतत्वेनाहोरात्रसाध्येष्वप्युपवासा
दिकर्मसुतिथिग्राह्यत्वमुक्तंतदेवोत्तरवचनेनशुक्लकृष्णविषयतयाव्यवस्थाप्यते देवलवचनाभ्यांयदुदयास्तमयगततिथे:
साकल्यप्रतिपादनेतत्प्रमाणांतरेणपूर्वस्याउत्तरस्यावातिथेर्ग्राह्यत्वेसिद्धेतदहर्भागतिथेरभावेपितत्रैवतत्तत्कर्मानुष्ठाना
र्थमुपोद्बलकंच यच्चेदंसूर्योदयादूर्ध्वमस्तमयात्पूर्वंवावर्तमानायास्तिथे:शुक्लकृष्णवाक्यात्युग्मवाक्यात्खर्वादिवचना
द्वाग्राह्यत्वंसाकल्यज्ञानंचतत्तत्रत्रिमुहूर्तावसरत्वेनतुततोन्यूनसत्वे उदितेदैवतंभानोपित्र्यंचास्तमितेरवौ द्विमुहूर्तंत्रि
रह्नश्चसातिथिर्हव्यकव्ययोरितिविष्णुधर्मोत्तरवचनात् भानावुदितेसातियाद्विमुहूर्तंमुहूर्तद्वयंतदैवतंदैवकर्मयोग्यं एवंरवा
वस्तमितेअस्तंगंतुमारब्धेअस्तमयात्पूर्वंयदह्न:संबंधित्रिमुहूर्तत्रयंतत्पित्र्यंपित्र्यकर्मयोग्यं तत्तद्वर्तिनीतिथिर्हव्यकव्ययो
र्ग्राह्येत्यर्थ: अह्नइतिवचनादादिकर्मण्यस्तमितइतिक्त: अत्रयद्यप्युदयेद्विमुहूर्तसत्त्वाप्युक्तातथापिसोनुकल्प: त्रिमुहू
र्तानकर्तव्यायातिथि:क्षयभामिनी द्विमुहूर्तापिकर्तव्यायातिथिर्वृद्धिगामिनीतिदक्षवचने अपिशब्देनतद्द्योतनात् त्रि
मुहूर्तग्राह्यतानिषेधश्चक्षयगामित्यामन्यदातत्ग्राह्यताया:साधकएव प्राप्तिपूर्वकत्वात्प्रतिषेधस्य वस्तुतस्तुपूर्वार्धे
प्यपिशब्दान्वयात्तस्यप्रतिषेधेतात्पर्यं किंतूत्तरार्धगतानुकल्पविधावेव पौर्वाह्णिकास्तुतिथयोदैवकार्या:प्रयत्नत:॥
इतिवृद्धयाज्ञवल्क्यवचनाच्चत्रिमुहूर्तसत्वं पूर्वाह्णशब्दोह्ययमह्न:पूर्वोभागइतियोगेनपंचधाविभक्तदिनाद्यभागवचन:
प्रात:संकल्पयेद्विद्वानुपवासव्रतादिकमितिचत्रिमुहूर्तात्मकस्यप्रात:कालस्यकर्मोपक्रमरूपसंकल्पकालत्वाद्योयस्य
विहित:काल:कर्मणस्तदुपक्रमे विद्यमानोभवेदंगंनोपक्रमेपालितिचोपक्रमकालीनातिथिर्ग्राह्यत्वाभिधानादप्यु

का॰नि॰
६

दये त्रिमुहूर्तसत्वमावश्यकं द्विमुहूर्तसत्वं त्वनुकल्पः स्नानदानादिविषयः अस्तमयात्पूर्वं तु त्रिमुहूर्तसत्वमेवापेक्षितं यां प्राप्यास्तमुपै
त्यर्कः सा चेत्स्यात्त्रिमुहूर्तगा धर्मकृत्येषु संपूर्णां तां विदुर्बुधा इति शिवरहस्यादिवचनात् एवं बोधिकाया अपि पूर्वोत्तरतिथिर्दिने
त्रिमुहूर्तापरसत्वमपेक्षितं पक्षद्वयेपि तिथयस्तिथिं पूर्वां तथोत्तरां त्रिमुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति पैठीनसिवच
नात् एकादश्यां विशेषो वक्ष्यते एवं सर्वत्र दिवाविधय एवोत्सर्ग इति स्थिते जन्माष्टमी शिवरात्र्यादौ रात्रियोगेपि वेधव्यवहारो विशे
षतः यानि तु व्रतोपवासस्नानादौ घटिकैका यदा भवेत् आदित्योदयवेलायां या स्तोकापि तिथिर्भवेदित्यादीनि मुहूर्तत्रयन्यू
नाया अपि संपूर्णत्वप्रतिपादकानि वचनानि तानि किमुत न्यायेन त्रिमुहूर्तसत्वप्रशंसापराण्येव इदं च साकल्यवचनात्
न तत्काल एव तिथ्यभावकर्मानुष्ठानं मन्वाद्यादिकर्तव्यस्नानश्राद्धादिव्यतिरिक्तविषयं तेषां तु तत्कालवर्तिन्यामपि तिथ्यो वि
र्णयेन प्राप्तानां तत्तिथिमध्य एवानुष्ठानं तत्तत्कालप्रतीक्षया अभ्यंगे चोदधिस्नाने दंतधावने मैथुने जाते च मरणे चैव तत्का
लव्यापिनी तिथिः मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रियेति स्कंदपुराणात् ये
त्वैकैकतिथिविषयाः सामान्येन कर्मविशेषपुरस्कारेण च विधिप्रतिषेधास्ते तिथिविशेषनिर्णये उद्भाव्य व्यवस्थापयि
ष्यंते यश्चायं युग्मवाक्योद्दिष्टकर्मविषयो निर्णयः सामान्येकभक्तनक्तादीनि त्रिमुहूर्तेन तन्न्यूनेन वा कालेन शास्त्रतः
साध्यानि तेषु कालव्याप्तिनिर्णयाविषयेषु पक्षेषु कर्तव्य इत्युक्तं उपवासे तु शुद्धत्रिमुहूर्तन्यूनाधिकायामिव स्फुटत्रिमु
हूर्ताधिकायामपि सत्यप्युत्तरस्या युग्मत्वे कालव्याप्तिवशात्पूर्वैव यापि पूर्वतिथ्या विद्धाप्युत्तरदिने नास्त्येव त्रिमुहूर्तन्यू
ना वा अस्ति सा प्युग्मापि पूर्वैव द्वितीयपक्षेपि युग्मवचनोदयवचनाप्रवृत्तेः उभयत्रापि त्रिमुहूर्तसत्वावश्यकत्वस्योक्त
त्वात् प्रायः प्रांत उपोष्या हि तिथिर्दैवफलेप्सुभिरित्यस्य च प्रायः पदेनैवानित्यत्वद्योतनात् ननु द्वितीया पंचमी वेधा
दशमी च त्रयोदशी चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इत्यादिवचनैर्या पूर्वतिथिविद्धोत्तरा निषिद्धा त्रिमुहूर्तन्यून
यापि पूर्वतिथ्या युक्ता यद्युत्तरदिने किंचिल्लभ्यते तदा पूर्वां विहायोत्तरैवोपोष्या भवति घटिका द्वा त्रिभागं वा स्वल्पं वा ६

15/1942

दूषयेत्तिथिः पंचगव्यघटं पूर्णं सुराया बिंदुको यथेति षट्त्रिंशन्मत इति वचनात्सर्वप्रकारवेधोयमुपवासस्य दूषक इति निगम
वचनाच्चोपवासे वक्रतिथियोगस्याल्पस्यापि त्याज्यत्वप्रतीतेः उदये तूपवासस्य नक्तस्यास्तमिते तिथिः व्रतोपवासनि
यमे घटिकैका यदा भवेत् उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके तथा आदित्योदयवेलायां याल्पापि च तिथिर्भवेत् पू
र्णा इत्येव मंतव्याः प्रभूता नोदयं विनेत्यादिभिरल्पाया अपि परादिनगतायाः ग्राह्यत्वप्रतीतेश्चेति हेमाद्रिः अत्रोच्यते न ता
वत् घटिकाई त्रिभागं वेति वचनं सर्वोपोष्यतिथिविषयं सामान्यविषयेण युग्मवचनेन उपोष्याः परसंयुक्ताः पराः पूर्वेण सं
युता इत्यादिविशेषवचनेन च पूर्वयुक्तानामपि कासांचिदुपोष्यत्वात् अत एव प्रायः प्रांत इति प्रायो ग्रहणं नापि याः पूर्वति
थियुक्ता अनुपोष्यत्वेनोक्तास्तद्विषयं हन्युः पूर्वोत्तरे तिथी इत्यादि हि तदर्थप्रतिपादकं वचनं तद्ध्युत्तरतिथेरस्तमयव
र्तिन्यास्त्रिमुहूर्ताया एव पूर्वतिथिदूषकत्वं वदति तथा तस्या एवोदयवर्तिन्यास्तादृश्या एवोत्तरतिथिदूषकत्वं एकत्वात्
अन्यथा वैरूप्यापत्तेः तथा एतध्वस्तं महादोषमिति निंदा च सकलदेवसाधारणी उपवासे ऽल्पयोगेपि इतरेषु त्रिमुहूर्त
सत्वेन एव प्रवर्तमाना विरूपा स्यात् न च घटिकाद्यादिवचनान्यगतिकानि येन तदपि सत्येत तेषां निंदातिशयपरत्वेनो
पपत्तेः वस्तुतस्तानि सर्वाण्येकादशीविषयाण्येव वेधातिवेधादिवचनात् एकमूलकल्पनालाघवात् यान्यपि घटिका
दिमात्राया अप्युपवासे ग्राह्यत्वप्रतिपादकानि तान्यपि शब्दादियोगात्किमुत न्यायेन त्रिमुहूर्तप्रशंसापराण्येव यद्वा तान्य
प्येकादशीविषयाण्येव एवं च प्रायः प्रांत उपोष्या हीत्यपि वचनमेकादशीमात्रविषयमेव प्रायो ग्रहणं च क्वचिद्विद्धाया
अपि ग्राह्यत्वात् यत्तु अविद्धानि निषिद्धैश्चेन्न लभ्यंते दिनानि तु मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः तदर्ध
विद्धान्यन्यानि दिनान्युपवसेन्नरः अविद्धानामलाभे तु पयो दधि फलानि वा सकृदेवाल्पमश्नीयादुपवासस्ततो भवे
दित्यृष्यशृंगवचनं तदपि निषिद्धैरविद्धानि उत्तरदिने त्रिमुहूर्तानि ततोधिकानि वा न लभ्यंत इत्येव व्याख्येयं त्रिमुहूर्त
न्यूनलाभस्याकिंचित्करत्वात् त्रिमुहूर्तसत्व एवायुग्मवचनस्य तदनुग्राहकस्य चोदयसाकल्यवचनस्य प्रवृत्तेः एका

का०त०
७
दशीत्वल्यापिपरदिनगतायाग्राह्येतिवक्ष्यते दशमीमुहूर्तपंचकवेधवत्याश्चतस्याः परदिनेवर्तमानत्वेआवश्यकेपितादृशवेध
वत्यायाग्राह्यत्वंतत्परदिनेद्वादश्यभावेगृहिणःप्रति तदभावश्चैवंतिथिक्रमेसंभाव्यते दशघटिकादशमीचतुर्घटिकाल्पका
दशीतदुत्तरंतस्मिन्नेवदिनेचतुःपंचाशत्घटिकाद्वादशीति यदाल्पत्वभागगतायाएवैकादश्याउपोष्यत्वात्ताद्दश्याअप्यु
त्तरस्याएवोपोष्यत्वमितिहेमाद्र्यादिसंमतःपक्षः तदाअरुणोदयमारभ्यमुहूर्तपंचकंदशम्याद्रष्टव्यं तदाहिसूर्योद
र्त यो‌त्तरंत्रिमुहूर्तंदशमीविद्धायाअपिग्राह्यत्वंत्रिमुहूर्तक्षयेणोत्तरदिनेतदभावेतदुत्तरदिनेचद्वादश्यभावेसर्वेषांमतेना
स्येव अन्यतिथिविषयः सार्द्धमुहूर्तद्वयवेधस्तुसूर्योदयमारभ्येव अरुणोदयवेधस्यैकादशीमात्रविषयत्वात्
तदधिकवेधवत्याअपिचपरदिनेसर्वथाअसत्वेत्रिमुहूर्तन्यूनसत्वेवान्यतिथेरुपोष्यत्वेपिअविद्धानामलाभेष्विति वि
शेषंतस्यांविधातुंस्वाभाविकशुद्धोपवासाभिप्रायेणसार्द्धमुहूर्तद्वयवेधवत्वास्तस्याःग्राह्यत्वाभिधानं मुहूर्तशब्दो
घटिकाभिप्रायइतिगौडाः तस्माद्यात्रिमुहूर्तन्यूनयात्रिमुहूर्तयापिवानिषिद्धयापूर्वयातिथ्यायुक्तोत्तरदिनेत्रिमु
हूर्तन्यूनास्तिसापूर्वैवोपोष्यायुक्तेति हेमाद्र्यादयस्तुकेचिदल्पायाअपिपूर्वतिथेर्दूषकत्ववचनान्युत्तरस्याश्चतादृ
श्याश्चतादृश्याअपिग्राह्यत्ववचनानियथाश्रुतान्येवगृहीत्वातथैवोपवासेनिर्णयंमन्यंते यातुत्रिमुहूर्तयापूर्वतिथ्या
विद्धासत्युत्तरदिनेत्रिमुहूर्तातततोधिकावासोत्तरयायुग्मवाक्यत्वेसत्युत्तरेथाहर्मात्रस्पर्शिन्यपि सत्यपिपूर्वस्याअहोरात्रो
भयस्पर्शित्वेयुग्मत्वेनोपक्रमकालगतत्वेनचतस्याएवप्राबल्याव् प्रातःसंकल्पयेद्विद्वानुपवासव्रतादिकमित्युक्तत्वात्
उपवासेचोत्पत्तिफलविद्धिषुपर्युदासलक्षणयाप्रजापतिव्रतसंकल्पस्यैवविधेयत्वेनप्राधान्यात् अग्रेतत्परिपालनमात्र
कारणात् सातिथिर्हव्यकव्ययोः सातिथिःसकलाज्ञेयायस्यामुदयतेरविरित्यादीनिवचनानियदामध्याह्नादिमात्रानुष्ठे
यप्रधानैकभक्तादितिथेस्तत्कालास्पर्शिन्याअपितस्मिन्नेवकालेअनुष्ठेयंतत्प्रसंगत्वयोग्यत्वरूपमोपचारिकंसाकल्यं
प्रतिपादयंतितदास्वरूपतःप्रातःकालमात्रसाध्यंविषयतःकेवलमहोरात्रसाध्यंसंकल्पमात्ररूपमुपवासंप्रतिसुतरांत ७

17/194
त्कालवर्तिन्यास्तस्याः यत्वेतादृशेविषयेविहितकालेप्रक्रांतंकालांतरेपिसमाप्यतइतिन्यायमूलत्वेनोपन्यस्यतस्याभ्युदिते
ष्वधिकरणव्यवस्थापितत्वंवर्द्धमानेनोक्तंतत्भ्रांत्या तत्राकालेपिप्रक्रांतस्यसमाप्यत्वव्यवस्थापनात्सांतपनीयाधिकरणंत्व
पन्यसितव्यं कस्तुतस्तु नतस्याप्ययंविषयः स्वकालएवेहसंकल्परूपप्रधानानुष्ठानात् व्रतशब्दोपिनियमपर्यायःसंकल्पवा
चकएव अतएवाविधिप्रतिषेधात्मकमानससंकल्परूपाणिस्मातकव्रतान्याहित्यवतारयताविज्ञानेश्वरेणनकेवलंनञ्युक्तेष्वेववि
धिवाक्येष्वपिसंकल्पलक्षणाभ्युपगमात् नचातिप्रसंगः अभियुक्तव्रतप्रसिद्धिविषयसंकल्पविशेषस्यैवव्रतत्वात् मंत्रत्ववत्
स्वकर्तव्यविषयोनियमःसंकल्पोव्रतमितिश्रीदत्तः नत्वग्निहोत्रसंध्यावंदनादिविषयेपिसंकल्पेऽतिप्रसक्तं नचसंकल्पस्यव्रत
त्वेव्रतंसंकल्पयेदित्यनान्वयइतिवाच्यं पाकंपचतिदानंददातीतिवत्प्रत्ययानुग्रहार्थंप्रयोगोपपत्तेः यातुतादृशीपूर्वतिऽ
थ्यायुग्मासापूर्वा युग्मत्वादहोरात्रोभयस्पर्शित्वात्च उपवासस्यचाहोरात्राभोजनविषयसंकल्परूपस्यविषयांशेनाहोरा
त्रसाध्यत्वात् अस्तमयवर्तिन्याअपितिथेःसाकल्यवचनाच्चसंकल्परूपोपक्रमक्रमकालेपिसत्वात् एकभक्तादितिथिर्म
ध्याह्नादाविवस्वरूपेणतत्रासत्याअपि सातिथिर्मध्याह्नादाविवस्वरूपेणतत्रासत्याअपि सातिथिःसकलाज्ञेयायस्याम
स्तमितोरविरितिवचनंचैदैवकर्मविषयमपीत्युक्तं ईदृशविषयएवचोपोद्बलकंवृद्धयाज्ञवल्क्यवचनमपि दिवारात्रौव्र
तंयच्चएकमेकतिथौगतं तस्यामुभययोगिन्यामाचरेत्तद्व्रतंव्रतीति संकल्पश्चप्रातःकालवर्तमानतिथिमेवकर्मतिथि
युक्तत्वेनरूपेणाधिकरणतयोल्लिख्यामुकतिथ्युपवासमहंकरिष्यइत्येवंकर्तव्यः तत्कालवर्तितिथेःसंकल्पाधिकरणत्व
स्यतत्तिथियोगप्रयुक्तत्वात् यत्त्वनेकदिनसाध्यंकर्मतत्राद्यप्रभृतिकरिष्यइतिसंकल्पइतिप्रसंगादत्रोक्तं एवंचदिनद्वयेपि
खंडायास्तिथेःस्वरूपेणप्रातर्मात्रसाध्येपिपरिपाल्यत्वेनाहोरात्रसाध्येउपवासेकर्मकालव्याप्तिशास्त्रेणान्यतरदिनग
तायांनिर्णयस्यकर्तुमशक्यत्वात्युग्मवाक्यादेवप्रायोनिर्णयइत्युपवासएवयुग्मशास्त्रस्यपरभागइत्यभिप्रेत्यकेचिद्विदुप
वासविषयतातस्योच्यते कस्तुतस्त्वेकभक्तादिष्वपिकालव्याप्तिशास्त्रान्निर्णयेषुपक्षेषुयुग्मशास्त्रंनिर्णायकंभवत्ये

का॰त॰
८

वेत्युक्तं येषुतूपोष्याइत्येवश्रूयतेतान्युपवासमात्रविषयाण्येव उपवासोत्तरदिनेचभोजनात्मकंपारणमवश्यंकर्तव्यं उपवा
सेषुसर्वेषुपूर्वाह्णेपारणंभवेत् अन्यथातुफलस्यार्धधर्ममेवोपसर्पतीतिदेवलवचनेनोपवासांगत्वेनतद्विधानात् नचराग
प्राप्तभोजनानुवादेनपूर्वाह्णमात्रविधिरेवायमस्त्विति वाच्यंपारणशब्दस्यधर्मसमाप्तिवचनत्वाच्छास्त्रीयकर्मसमाप्तेश्चशा
स्त्रीयतावश्यंभावात् उद्यापनादिवत् भोक्ष्येहंपुंडरीकाक्षस्येति संकल्पविषयत्वात् अप्राशनरूपप्रतिनिधि
विधानाच्चतन्नियमानंगत्वेतदनुपपत्तेः तस्यचभोजनरूपता अभोजननियमात्मकस्योपवासस्यभोजनेनैव
समाप्तेर्भोक्ष्येहमितिसंकल्पमंत्रलिंगात्तत्रैवप्राचुर्येणप्रयोगात्तद्विषययोगरूढेरपिपारणशब्दस्यवक्तुंशक्तित्वाद्भा
वगम्यते अतएवतिथ्यंते चोत्सवांतेवाव्रतीकुर्वीतपारणमिति पारणांतंव्रतंज्ञेयमिति चव्रतशब्दः सामान्यवचनो
प्युपवासविषयएव तथाचोपवासेषुसर्वेष्वित्युक्तं निगमेचपूर्वविद्धासुतिथिषुभेषुचश्रवणंविना। उपोष्यविधि
वत्कुर्याततत्तदंतेचपारणमिति माधवस्तुतिथीनामिवसर्वासामुपवासव्रतादिषु तिथ्यंतेपारणंकुर्यात्विनाशिव
चतुर्दशीमितिस्कंदपुराणगतमादिशब्दमेवभक्तादिसंग्रहार्थत्वेनव्याख्यायतिथिमुद्दिश्येतानिपूर्वेद्युर्विहितानि
परेद्युस्तत्रतिथ्यंतेपश्चाद्भोजनंकार्यमिह तच्चपारणंतद्दिने उपोष्यतिथ्यनुवृत्तौयदि दिवातिथ्यंतप्रतीक्षयाभोज
नकालोलभ्यतेतदातिथ्यंतेकर्तव्यं तिथिनक्षत्रनियमे तिथिभांतेचपारणं अतोन्यथापारणायांव्रतभंगमवाप्नुया
दितिस्कंदपुराणात् तिथिनक्षत्रेतितिथिभेति चेतरेतरयोगेनविवक्षितः अनुवाद्यगतत्वात् पूर्वविद्धासुतिथि
षुभेषुचश्रवणंविना उपोष्यविधिवत्कुर्यात्तत्तदंतेचपारणमिति निगमवचनेतिथीनामेवेत्यादिस्कंदपुराणवचनेवा
समासनिर्देशाच्च तेनतिथिनियमेतिथ्यंतेनक्षत्रनियमेनक्षत्रांतेउभयनियमेउभयांतइत्यर्थः यदातुदिवातादृशः
पारणकालोनलभ्यतेतदातिथ्यंतोनप्रतीक्षणीयः किंतुदिवैवपारणंकर्तव्यं सर्वेष्वेवोपवासेषुदिवापारणमिष्यते ८
अन्यथापुण्यहानिःस्याद्दतेधारणपारणमितिब्रह्मवैवर्तात् धारणमाहारंविनाशरीरस्योपवासइतियावत्॥

19/194

तदुत्तरदिनेचपारणंचतुर्थकालभोजनविधिनाविहितंतद्विहायेत्यर्थः धारणनक्तभोजननियमग्रहणमितिकश्चित् अन्य
तिथ्यागमेगात्रौतामसंत्तेजसीदिवातामसेपारणंकुर्वंस्तामसीगतिमश्नुतइतिगरुडपुराणे नरात्रौपारणंकुर्यादृतेवैरो
हिणीव्रतात् तत्रनिश्यपितत्कुर्याद्वर्जयित्वामहानिशामितिभविष्योत्तरेचरात्रिपारणानिषेधाच्च महानिशासार्धयामादु
परितमोयामःयामत्रयोर्धगामिन्यांप्रातरेवहिपारणमितिमाधवोदाहृतंतुवचनंतेनापितुमुलालिखनाद्ध्यांतरासंवा
दोच्चनाद्दत एवंकेवलतिथिनिमित्तेउपवासेनक्षत्रादियुक्ततिथिनिमित्तेतुजन्माष्टमीप्रकरणेवक्ष्यते तदयमुपवासे
सामान्यतिथिनिर्णयसंक्षेपः याशुद्धात्रिमुहूर्तांतमपिवृद्धापरेहनियुग्माप्युत्तरतिथ्यासैवोपोष्याकेवलायथा॥
यापूर्वतिथिविद्धापिपरेहनिनविद्यते न्यूनावात्रिमुहूर्तेषुसापिपूर्वैवसंमतात्रिमुहूर्ताधिकावापिपूर्वविद्धोत्तरेह्निया पू
र्वयापरयावासायुग्मोपोष्येतिनिर्णयः उपोष्यतिथ्यभावेपिसंकल्पःप्रातरेवहि परेन्द्युपोष्यतिथ्यंतेकालश्चेल्लभ्य
तेदिवा पारणस्यतदांतेस्यान्नचेत्पूर्वाह्णएवतदिति एवंसामान्यतिथिविषयसकलनिर्णयवाक्यैकवाक्यतयोपवासेए
वसकलतिथिनिर्णयेसिद्धेप्रतिपदादितिथिषुअयमेवोपवासविषयोनिर्णयः क्रमेणयोज्यतेक्वचिद्विशेषोप्युच्यतेत
त्रप्रतिपदुपवासेशुक्लाकृष्णावापूर्वैवग्राह्या प्रतिपत्पंचमीचैवउपोष्यापूर्वसंयुतेतिजाबालिवचनात् सप्तमीपं
चमीचैवदशमीचत्रयोदशी प्रतिपन्नवमीचैवकर्तव्यासंमुखीतिथिरितिपैठीनसिवचनाच्च प्रतिपत्पंचमीभूतासा
वित्रीवटपूर्णिमा नवमीदशमीचैवनोपोष्यापरसंयुतेतिब्रह्मवैवर्ते द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी चतुर्दशी
चोपवासेहन्युःपूर्वोत्तरेतिथी उपवासेसप्तमीतुवेधाद्दुत्तरांदिनमिति वृद्धवसिष्ठवाक्येचोपवासेउत्तरविद्धायानि
षेधाच्च यद्यपिचसूर्यास्तपूर्वभाविविमुहूर्तात्मकसायाह्नमात्रव्याप्तापिपूर्व दाभवतितथापितत्पूर्वत्रिमुहूर्तात्म
कापराह्णेपियदिवर्ततेतदैवपूर्वाग्राह्या अन्यथोत्तरैव संमुखीनामसायाह्नव्यापिनीदृश्यतेयदा प्रतिपत्संमुखीका
र्यायाभवेदापराह्णिकीतिस्कंदपुराणेविशेषाभिधानात् इदंहिवचनंप्राप्तपूर्वविद्धत्वाख्येसांमुख्येविशेषमात्रवि

का॰त॰
९

धानकं प्रातःकालिकप्रधानांगनिर्वापे प्राप्ते प्रातःकालसामान्ये पुरावाचः प्रवदतोर्निर्वपेदिति तद्विशेषविधिवत् नत्वापरा
ह्णिक्याः सांमुख्यविधायकं गौरवात् तद्वच यथा देवांतरेष्वपि युग्माग्निवचनात् प्राप्ते शुक्लप्रतिपदः पूर्वविद्धायाः प्राप्त्यत्वे
आपराह्णिकत्वं विशेषं विदधाति तथोपवासेपि तत्रापि पूर्वविद्धाप्राप्त्यविशेषात् यत्वापराह्णिकवचनस्यानाकरत्वमभि
धायसाकरत्वेपि आपराह्णिकपित्र्यविषयत्वं गौडैरुक्तं तद्विशेषवचनस्यानर्थक्यापत्तेः प्रतिपत्सैव विज्ञेया या भवेदापरा
ह्णिकी दैवं कर्म तया ज्ञेयं पित्र्यं च मनुरब्रवीदिति माधवोदाहृतव्यासवचनविरोधाच्च यदुक्तं प्रतिपत्सद्वितीया स्यात् द्विती
या प्रतिपदा युता इति तस्यापरत्वं बवचनं तूपवासेतरदैवकर्मविषयं सामान्यवचनस्यास्योपवासमात्रविषयैः पूर्ववचनैः संकोचना
त् उपवासेप्यनापराह्णिकप्रतिपद्विषयं च यच्च देवांतरेष्वनेन वचनेन द्वितीयाविद्धायाः प्रतिपदो विधानं तदपि कृष्णाया
नतु शुक्लायाः तस्याः प्रतिपद्यप्यमावास्येति पूर्वविद्धाया विधानात् न चेदं पूर्वविद्धत्वमुपवासमात्रविषयं अन्येषु तु अ
परत्वं बवचनाच्छुक्लाप्युत्तरैवास्त्विति वाच्यं युग्मवचनस्योपवासमात्रविषयत्वे प्रमाणाभावात् प्रत्युत सकलदेवविषययु
ग्मांतरसाहचर्यात्सर्वविषयत्वस्यैवोचितत्वात् न च पूर्वविद्धोपोष्यत्वविधायकपूर्वोदाहृतवचनवशाद्युग्मवचनस्या
पि पूर्वविद्धाविधायकस्य प्रतिपदंशे उपवास एवोपसंहारो युक्तः तेषामुभयप्रतिपद्विषयत्वेन युग्मवचनस्य च शुक्लप्र
तिपन्मात्रविषयत्वेन भिन्नविषयत्वात् कृष्णप्रतिपदर्थमावश्यकैस्तैरेव वचनैरर्थसिद्धावेतस्यानर्थक्यापत्तेश्च न च
पूर्वविद्धोपोष्यत्वप्रतिपादकान्यपि युग्मवचनवशात् एकादशी तथा षष्ठी अमावास्या चतुर्थिका उपोष्याः परसंयु
ताः पराः पूर्वेण संयुता इति वचनवशाच्च शुक्लप्रतिपद्विषयाण्येव कृष्णा तूपवासेप्युत्तरैव प्रतिपत्सद्वितीया स्यादि
ति वचनादिति माधवमतमपि युक्तं सर्वदैवविषयाद्युग्मवाक्याद्दैवोपवासेपि पूर्वविद्धासिद्धौ तन्मात्रविषयाणाम
न्वयतो व्यतिरेकतश्च प्रवृत्तानां तेषां सर्वेषामानर्थक्यप्रसंगात् उपवासग्रहणस्यैवोपलक्षणत्वप्रसंगाद्वा अस्मन्म
ते तु सर्वाणि सार्थकानि पूर्ववचनैरुपवासे पूर्वविद्धायां उभय्यां विहितायां युग्मापरत्वं बवचनयोर्दैवांतरेषु शुक्लकृ ९

2
194

ष्णभेदेन पूर्वोत्तरविद्धाविधानेनार्थवत्वात् आपराह्णिकत्वं च दैवांतरेष्वपि शुक्लायाः पूर्वविद्धायाः अपेक्षितमेव प्रतिपत्सं
मुखीति वचनेन पूर्वविद्धामात्रे तद्विधानादित्युक्तं तदभावे तु दैवांतरेष्वपि सोत्तरैव प्रतिपत्सद्वितीया स्यादिति सामान्यवच
नात् अत एव सायाह्नमात्रव्यापिन्या अपि पूर्वस्या अनुकल्पत्वेन ग्राह्यत्वं माधवोक्तमुपेक्षितं पूर्वोदाहृतवचनेनोत्तरा
र्धे प्रतिपद आपराह्णिकत्वविधानेन पूर्वार्धोक्तस्य सायाह्नमात्रव्यापित्वेन संमुखत्वस्य तिथ्यंतरविषयत्वप्रतीतेः यद
यं संक्षेपः उपोष्या प्रतिपत्पूर्वा शुक्ला कृष्णा तथैव च यद्यसावपराह्णे स्यात् कात्स्न्येनैकदेशापि वा दैवांतरेषु शुक्लैव
पूर्वा साथापराह्णिकी चेन्नापराह्णिकी सर्वा या पूर्वोक्ता परैव सा दैवांतरेषु कृष्णा तु परैवेति निर्णयः द्वितीया कृष्णा पू
र्वा शुक्ला परोपोष्या तृतीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः वेधादधस्तादृश्युस्ता उपवासे तिथिस्त्विमा इति
नारदीयवचने तृतीयास्ववेधेन पूर्वा द्वितीयां तत्प्रयुक्तोपवासे दूषयतीत्युक्त्या प्रतीयमानस्य तृतीयाविद्धद्वितीया
निषेधस्यैकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी त्रयोदशी अमावास्या उपोष्याः स्युः परान्विता इति विष्णुधर्मोत्तर
गतस्य च तद्विधेर्विरोधे शुक्लकृष्णवाक्याभ्यां व्यवस्थाश्रवणात् इदं हि वचद्वयमेतदर्थमेवेत्युक्तं सामान्यतिथिनिर्ण
ये दैवांतरेष्वप्येषैव व्यवस्था युग्माग्निवाक्यस्य प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युता इत्यस्य च पूर्ववदेव व्यवस्था
पनात् केचिद्युग्मवाक्यस्य स्वत एव शुक्लपक्षविषयत्वं मन्यंते चतुर्दशीपौर्णमासीयुग्मसाहचर्यात्सर्वेषामपि युग्मा
नां शुक्लपक्षगतत्वप्रतीतेः तदयुक्तं सामान्यविषययुग्मादिश्रुतेः संनिधिरूपेण साहचर्येण संकोचयितुमशक्यत्वात्
पक्षद्वयवर्तिप्रतिपदमावास्यायुग्मसाहचर्याविशेषाच्च तस्मादुभयपक्षतिथिगतमेव युग्मवाक्यं वाक्यांतरविरोधे शु
क्लकृष्णवाक्यांतरविरोधे शुक्लकृष्णवाक्याभ्यां व्यवस्थाप्यते परं न तु सामान्यविधिनैवोपवासेपि परविद्धासिद्धौ पुनस्त
त्र तस्या विधिरनर्थकः सामान्यविधिद्वयेन पूर्वविद्धायां परविद्धायां च सर्वत्र प्राप्तायां उपवासे वचनांतरेण परवि
द्धानिषेधकृते तत्रैव कदाचित्तस्या अपि प्राप्त्यर्थं तस्यापेक्षितत्वात् अन्यथोपवासे सामान्यवचनं बाधित्वापरवि

द्वानकर्तव्यैवस्यादिति सामान्यवचसंवादिनांतद्विरुद्धानांच विधिरूपाणांनिषेधरूपाणांचैकतिथिविषयाणांविशेषवच
नानामियमेवगतिः याचकृष्णाद्वितीयाउपवासेन्यत्रवापूर्वाग्राह्यासायदिपूर्वाह्णे प्रविष्टाभवतितदैवतादृशीग्राह्यानो
चेत्सापिपरैव प्रतिपत्संमुखीकार्यायाभवेदापराह्णिकी पौर्वाह्णिकीचकर्तव्याद्वितीयातादृशीविभोइतिस्कंदपुराणात्
तादृशीसंमुखीपूर्वविद्धेत्यर्थः इदंचवचनंकृष्णाद्वितीयाविषयमेव तत्रप्राप्तेपूर्वविद्धत्वेपौर्वाह्णिकत्वविशेषमात्रविधाने
लाघवात् शुक्लायांपूर्वविद्धत्वस्यापिविधेयत्वेनगौरवात् अत्रचवाक्येद्वयोरेवोपादानाद्वेधाविभक्तदिनभागावेवपू
र्वाह्णापराह्णौयद्यपिभासेतेतथापिसायाह्नमात्रव्यापिन्यामविद्यमानस्यापराह्णिकत्वस्यद्वेधाविभागेनासंभवादपरा
ह्णस्यपंचधाविभागेनैवग्राह्यत्वात्पूर्वाह्णोप्यह्नः पूर्वभागइतियोगेनपंचधाविभागेनैवप्रातरात्मकोग्राह्यः तत्रप्रविष्टापू
र्वाग्राह्या तेनयापूर्वेद्युः प्रातःकालंसर्वंपरित्यज्यप्रवृत्तापरेद्युस्त्रिमुहूर्तातततोधिकावाभवतिसाकृष्णापिपरैवपूर्वेद्युः
पौर्वाह्णिकत्वाभावात् त्रिमुहूर्तसत्वेनचपरविद्धवचनानांप्रवृत्तेरितिपौर्वाह्णिकवचनस्यव्यतिरेकतःफलं नतुयापूर्वे
द्युः सर्वंप्रातःकालंपरित्यज्यप्रवृत्ताप्युत्तरदिनेनास्त्येवत्रिमुहूर्तन्यूनावासाप्युत्तरेति तत्रपरविद्धवचनानामप्रव
त्तेःपरिशेषात्पूर्वस्याएवग्राह्यत्वात् इदंचवचनंप्राच्यांनालिखंति तदयंनिर्णयः शुक्लाद्वितीयासर्वदैवेषुपरयुक्कैव
वेत कृष्णातुपूर्वतिथिवपूर्वाह्णेयदिसाभवेत् तृतीयातुरंभाव्रतातिरिक्तेषुउपवासादिसकलदैवकार्येषुचतुर्थीयुतैव
ग्राह्यारंभाख्यांवर्जयित्वातुतृतीयाद्विजसत्तम अन्येषुसर्वकार्येषुगणयुक्ताप्रशस्यतइतिब्रह्मवैवर्तवचनात्॥
गणोगणेशस्तेनतद्देवत्याचतुर्थीसर्वग्रहणादेकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी अमावास्यातृतीयाचताउपो
ष्याःपरान्विताइतिबृहस्पतिवचनेउपवासग्रहणंतृतीयांशेसकलदैवकार्योपलक्षणं एतस्यैवचतुर्थीयुक्तातृती
याविधेरुपोद्बलिका चतुर्थीसंयुतायाचसातृतीयाफलप्रदा अवैधव्यकरीस्त्रीणांपुत्रपौत्रप्रदायिनीतिप्रशंसाआ
पस्तंबायुक्ता तृतीयातुनकर्तव्याद्वितीयासंयुतातिथिः याकरोतिविमूढास्त्रीपुरुषोवाशिखिध्वज द्वितीयासंयुता १०

नातत्पूर्वधर्माद्विलुप्यते विधवात्वंदुर्भगत्वंभवेन्नास्त्यत्रसंशयइतिस्कंदपुराणाद्युक्तोनिंदासहितोनिषेधश्च निषेधस्या
पिरंभाव्रतव्यतिरिक्तविषयत्वंस्कंदपुराणएवदर्शितं द्वितीययातुयाविद्धातृतीयातुनकदाचन कर्तव्याव्रतिभिस्तातधर्म
कामार्थतत्परैः विहायकांतुरंभाख्यांतृतीयांपुण्यवर्धिनीमितिनिषेधप्रयोजकश्चात्रद्वितीयावेधोनसामान्यरूपस्त्रि
मुहूर्तात्मकएवकिंतुदशम्यादिवकलाकाष्ठादिरूपोपि अतएवतृतीयापिचतुर्थीयुताअल्पाप्येकादशीवद्ग्राह्या नतु
त्रिमुहूर्तत्वरूपकर्मकालव्याप्त्याद्यादरस्तस्यां कलाकाष्ठादिवाचैवद्वितीयासंप्रदृश्यते सातृतीयानकर्तव्याकर्तव्याग
णसंयुतेतिस्कांदात् द्वितीयाशेषसंयुक्तांतृतीयांकुरुतेतुयः सयातिनरकंघोरंकालसूत्रभयंकरं द्वितीयाशेषसंयुक्तांयाक
रोतिविमोहिता सावैधव्यमवाप्नोतिप्रवदंतिमनीषिणः इतिनिंदार्थवादेशेषशब्दमात्रश्रवणाच्च अन्यथाद्वितीयासंयुक्ता
मित्येवावक्ष्यत् अयंचाल्पवेधप्रयुक्तोपिनिषेधस्तत्प्रयुक्तश्चाल्पायाअप्युत्तरस्याःपरिग्रहोगौरीदैवत्यव्रतविषयएव विहाय
कांतुरंभाख्यामितिपर्युदासेतत्सदृशानामेवव्रतांतराणांप्रतीतेः न वयुक्तमन्यसदृशार्थइतिन्यायात् तत्रैवतथाशिष्टसमा
चाराच्च व्रतांतरेषुतुसामान्यनिषेधात्सामान्यविधेश्चब्रह्मवैवर्तगतात्त्रिमुहूर्तद्वितीयाविद्धायाएववर्जनंत्रिमुहूर्ता
याएवचतुर्थीयुक्तायाग्रहणंयुक्तं नचब्रह्मवैवर्तेपिरंभाख्यांवर्जयित्वेतिपर्युदासाद्गौरीव्रतानामेवग्रहणंस्यादितिवाच्यं
तत्रासदृशानामपिग्रहणार्थमेवसर्वकार्येष्वित्युक्तत्वात् अतएववैशाखशुक्लतृतीयाख्याक्षयतृतीयाव्रतमप्युत्तरविद्धाया
मेवकर्तव्यंविशेषतोपितत्रतद्विधिःपूर्वानिषेधश्चनारदीये वैशाखेसितपक्षेतुतृतीयारोहिणीयुता दुर्लभाबुधवारेण
सोमेनापियुतातथा रोहिणीबुधयुक्तापिपूर्वविद्धाविवर्जिता भक्त्याकृतापिमांधातःपुण्यंहंतिपुराकृतं गौरीविनाय
कोपेतारोहिणीबुधसंयुता विनापिरोहिणीयोगात्पुण्यकोटिप्रदासदेति यदातुचतुर्थीयुक्ताकिंचिदपिनलभ्यतेतदागौ
रीव्रतेष्वपित्रिमुहूर्तालाभेचेतरेष्वपिद्वितीयायुतापिग्राह्या एकादशीतृतीयाचषष्ठीचैवत्रयोदशी पूर्वाविद्धापिकर्तव्या
यदिनस्यात्परेहनीतिवृद्धवसिष्ठवचनात् रंभाव्रतेतूपवासरूपे अनूपवासरूपेचद्वितीयाविद्धैवग्राह्या कृष्णाष्टमी

बृहत्तपासावित्रीवटपैतृकी अनंगत्रयोदशीरंभाउपोष्याः पूर्वसंयुताः इतिनिगमात् बृहत्तपातथारंभासावित्रीवटपैतृ
की कृष्णाष्टमीचभूतावकर्तव्यासंमुखीतिथिरितिस्कंदपुराणाच्च एवंसतियुग्माग्नीतियुग्मवचनमपिवचनांतरवशाद्रंभा
व्रतविषयमेव यत्तुतृतीयायाः शुद्धाया आधिक्येपिशुद्धामपिहित्वा अधिकाचतुर्थीयुक्तैवगौरीव्रतेषुग्राह्येत्येतावत्पर्यंतं
माधवेनोक्तं तत्रपूर्वस्यांनिषेधाप्रवृत्तेर्विधेश्चेदृग्विषयस्यादर्शनाच्चैतावत्पर्यंतंशिष्टाचारस्तदासएवमूलं तदयंसंक्षेपः
रंभाभिन्नेषुसर्वेष्वप्युपवासादिकर्मसु तृतीयागणविद्धास्यान्नतुविद्धाद्वितीयया गौरीव्रतेषुतुस्याद्यावल्पयापिद्वितीय
या युक्तामुहूर्तमात्रापिचतुर्थीयुक्तैवशस्यते यदाचतुर्थ्यांस्वल्पापित्रिमुहूर्ताथवानसा गौरीव्रतेन्यदैवेचतदापूर्वापि
गृह्यते रंभाव्रतेतुपूर्वैवतदलाभेपराभवेत् चतुर्थीतुविनायकनागगौरीव्रतान्युपवासपूज्यादिनुपाणिविहायान्यदेवता
प्रीत्यर्थमुपवासेव्रतांतरेवापंचमीयुताग्राह्या युगभूतानामितियुग्मवाक्यात् एकादशीतथाषष्ठीअमावास्याचतुर्थि
का उपोष्याः परसंयुक्ताः पराः पूर्वेणसंयुताइतिवृद्धवसिष्ठवचनाच्च विनायकनागव्रतयोस्तुमध्याह्नव्यापिनीग्राह्या
तत्रमध्याह्नस्यकर्मकालत्वात् प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृपेतिगणपतिकल्पे युगंमध्यंदिनेयत्रतत्रोपोष्य
फणीश्वरान् क्षीरेणाप्याय्यपंचम्यांपारयेत्प्रयतोनरः विषाणितस्यनश्यंतिनतंहिंसंतिपन्नगाइतिपुराणवचनेन
माधवोदाहृतेमध्याह्नेविनायकनागपूजाविधानात् युगंचतुर्थी अतएवचतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते म
ध्याह्नव्यापिनीसातुपरतश्चेत्परेहनीतिबृहस्पतिवचनेस्पष्टमेवमध्याह्नव्यापिन्याविनायकव्रतेग्राह्यत्वमुक्तं अत्रच
परतश्चेत्परेहनीतिपरेद्युरेवमध्याह्नव्यापिपक्षएवपराविद्धाविधानादितरेषुसर्वेष्वपिपक्षेषुतृतीयायुक्तैवविनायकव्र
तेग्राह्या एवंचतुर्थीसंयुताकार्यातृतीयाचचतुर्थिका तृतीययायुतानैवपंचम्याकारयेत्क्वचित्इतिब्रह्मवैवर्ततृ
तीयायुक्तचतुर्थीविधिः द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी चतुर्दशीचोपवासेहन्युः पूर्वोत्तरेतिथीइतिपंचम्याः ११
पूर्वतिथिदूषकत्ववचनात्तद्युक्तचतुर्थीनिषेधश्चविनायकव्रतविषयएव अतएवब्रह्मवैवर्तएववचनांतरं चतु

25
19

र्थीसंयुतायाचसातृतीयाफलप्रदा चतुर्थीचतृतीयायांमहापुण्यफलप्रदा कर्तव्याव्रतिभिर्वत्सगणनाथस्तोषिणी
ति गणनाथंस्तरांतोषयतीतितद्दिवसोपवासाद्यंगभूतेत्यर्थः नागव्रतेतुपूर्वेद्युरेवमध्याह्नव्याप्तौपूर्वाकर्मकालव्या
प्तिप्राबल्यात् अन्येषुसर्वपक्षेषूत्तरा पंचम्यानागतिथित्वेनतद्योगस्यतद्व्रतेप्रशस्तत्वात्युग्मादिसामान्यवचनाच्च
तृतीयायुक्तसामान्यवचनानांब्रह्मवैवर्तवचनेनविनायकव्रतविषयेव्यवस्थापनात् गौरीव्रतेतुगौरीदैवत्यतृतीया
योगस्यप्रशस्तत्वात्तृतीयायुक्तैवग्राह्या जयाचयदिसंपूर्णाचतुर्थीह्रसतेपुनः जयांसैवहिकर्तव्यानागविद्धानकार
येदितिद्वितीयदिनेह्रासेनचतुर्थ्याःपंचमीविद्धत्वेसंपूर्णदिनव्याप्तित्वेनसंपूर्णातृतीयापिचतुर्थीव्रतेग्राह्या नत्वति
दुष्टापंचमीयुक्ताचतुर्थीतिकैमुत्यन्यायेनतृतीयायुक्तचतुर्थीविधानस्यगौरीव्रतविषयत्वस्यैवोचितत्वाच्च अतएवग
णेशगौरीबहुलाव्यतिरिक्ताःप्रकीर्तिताः चतुर्थ्यःपंचमीविद्धादेवतांतरयोगतइत्यपिबहुवचनंब्रह्मवैवर्तगतत्वे
नमदनरत्नादिषुलिखितं गौर्याश्चतुर्थीवटधेनुपूजादुर्गार्चनंदुर्भरहोलिकेच वत्सस्यपूजाशिवरात्रिरेताःपराविनि
घ्नंतिनृपंसराष्ट्रमितिपुराणसमुच्चयवचनंचगौर्यागौरीव्रतस्यसंबंधिनीचतुर्थी धेनुपूजातत्संबंधिनी बहुलाचतु
र्थी वत्सस्यपूजावत्सद्वादशी तदयंनिर्णयः गणेशनागव्रतयोरुपवासादिरूपयोःमध्याह्नव्यापिनीग्राह्या चतुर्थीतत्र
तादृशी परेद्युश्चेत्परानोचेत्पूर्वासर्वत्रगाणपे नागव्रतेतादृशीचेत्पूर्वैवतदियंतथा अन्यथासर्वपक्षेषुपरागौरीव्रते
ष्वपि तृतीययायुताग्राह्याचतुर्थीह्रासतोयदि परेद्युःपंचमीविद्धापूर्वेद्युःसकलंदिनं तृतीयैवतदातस्यामप्युत्त
रतिथिव्रतं गौर्याःकार्यंसर्वथात्रनागविद्धानिषिध्यते एतद्व्रतातिरिक्तेषुतूपवासादिकर्मसु नाविद्धैवपूर्वापितदलाभे
चतुर्थिका पंचमीतूपवासादिसर्वकर्मसुचतुर्थीविद्धैवग्राह्या युगभूतानामितिवचनात् पंचमीसप्तमीचैवेतिपूर्वो
दाहृतपैठीनसिवचनाच्च प्रतिपत्पंचमीचैवउपोष्यपूर्वसंयुतेइतिजाबालिवचनेन एकादशीतथाषष्ठीतिपूर्वोदाहृत
गार्ग्यवचनेनचोपवासेविशेषतःपूर्वविधानात् प्रतिपत्पंचमीभूतेतिब्रह्मवैवर्तवचनेनतृतीयैकादशीषष्ठीतिना

रदीयवचनेनचतथैवपरविद्धानिषेधाच्च यत्तुपंचमीतुप्रकर्तव्यांषष्ठ्यायुक्तातुनारदेतिब्रह्मवैवर्तवचनंपरविद्धाविधायकं
तत्स्कंदोपवासेस्त्रीकार्यापरसंयुतेतितत्रत्यादेववचनाद्वाक्यशेषरूपनीयात्स्कंदव्रतविषयं नागव्रतविषयंच श्रावणे
पंचमीशुक्लासंप्रोक्तानागपंचमीतांपरित्यज्यपंचम्यश्चतुर्थीसहिताइतिमदनरत्नलिखिताचारसंग्रहवचनात् अत
एवनागपंचमीमात्रोपलक्षणमितत् सर्वत्रतथाचारात् तत्रतांपरित्यज्यचतुर्थीविद्धाग्राह्याइत्युक्त्यातस्याश्चतुर्थी
विद्धायानिषेधावगमात्त्रिमुहूर्तचतुर्थीयुक्तापूर्वेद्युःपरेद्युश्चत्रिमुहूर्तानागपंचमीपरा अन्यथापूर्वैवेतिद्रष्टव्यं॥
हेमाद्रिगौडाश्चकेचित्पंचमीविषयंविरुद्धमिदंवचनद्वयंशुक्लकृष्णभेदेनव्यवस्थापयंति केचित्तुपित्र्यदैवविषयत्वेनत
द्द्वयमपिचतुर्थीसंयुताकार्यापंचमीपरयानतु दैवेकर्मणिपित्र्येचशुक्लपक्षेतथासितइतिहारीतवचनेनमाधवाद्युक्तरा
त्यातेनविरुद्धं अत्रापित्र्यग्रहणंदृष्टांतत्वेन याप्युपवासतदितरकर्मविषयत्वेनपूर्वोत्तरविद्धयोर्व्यवस्थाद्वितीयाहेमाद्रि
णोक्तासापियापंचमीपरसंयुतास्त्रीकार्यासास्कंदोपवासइतिवचनेनैवपरविद्धायाविषयविशेषेव्यवस्थापनात्व्य
वस्थापकांतरानपेक्षणादयुक्ता अतएवचोपवासेपूर्वविद्धाविधायकैःसामान्यविषयस्ययुग्म वचनस्यतत्रैवोप
संहारइत्यपिनयुक्तं पूर्वविद्धायाउपवासविषयत्वेउत्तरविद्धायाश्चस्कंदव्रतमात्रविषयत्वेइतरेषुनकोपीतिसंदेहप्र
संगात् युग्मवाक्यस्याप्युपवासविषयएवपरभागस्योक्तत्वाच्च वचनांतरेष्वप्युपलक्षणत्वेनोपवासग्रहणोपपत्तेरुप
संहारकत्वासामर्थ्यात् तस्मादेवंनिर्णयः सर्वस्मिन्नुपवासादौपक्षयोःशुक्लकृष्णयोः पंचमीपूर्वविद्धैवस्कंदनाग
व्रतेपरा षष्ठीतुस्कंदव्रतातिरिक्तेसर्वत्रोपवासादौसप्तमीविद्धाग्राह्या षण्मुन्योरितियुग्मवाक्यात् एकादश्यष्टमी
षष्ठीपौर्णमासीचतुर्दशी अमावास्यातृतीयाचताउपोष्याःपरान्विताइतिविष्णुधर्मोत्तरवचनाच्च उपवासग्रहणंपू
र्ववत् नागविद्धाचयाषष्ठीशिवविद्धाचसप्तमी दशम्येकादशीविद्धानोपोष्याःस्युःकथंचनेतिशिवरहस्यसौरपुरा
णयोर्नागविद्धातुयाषष्ठीरुद्रविद्धोदिवाकरः कामविद्धोभवेद्विष्णुर्नग्राह्यस्तेतुवासराइतिनिगमेपूर्वविद्धानिषे १२

धात् नागःपंचमीशिवोरुद्रश्चाष्टमी दिवाकरःसप्तमी कामस्त्रयोदशीविष्णुर्द्वादशीनिषेधप्रयोजकश्चात्रपंचमीवेधोनस
मान्यइपरित्रिमुहूर्तात्मकः किंतुषण्मुहूर्तात्मकः नागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा भूतोष्टादशनाडीभिर्दूषयत्यु
त्तरांतिथिमितिस्कंदपुराणवचनात् स्कंदषष्ठीतुपंचमीयुतैवोपोष्या कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्व
युताःकार्यास्तिथ्यंतेपारणाभवेदितिब्रह्मवैवर्तवचनात् कृष्णाष्टमीकृष्णपक्षगताष्टमी व्रतकांडगतरुद्रदैवत्यकृष्णाष्ट
मीसमाख्यातव्रतसंबंधिनीवा जन्माष्टमीत्यपिकश्चित् नतुषण्मुहूर्तमितपंचमीवेधवत्यांस्कंदव्रतमपिनकर्तुमर्हति
नागोद्वादशनाडीभिरितिवचनात् इदंहिवचनंपूर्वविद्धाकर्तव्यविषयमेवयुक्तं नतूत्तरविद्धावर्तव्यविषयं तदाहिषण्मुहू
र्तात्मकपंचमीयुक्तायामेवपूर्वस्यांतेषामकर्तव्यत्वेत्रिमुहूर्ताधिकक्षयासंभवेनोत्तरदिनेतादृश्यास्त्रिमुहूर्तसत्वावश्यं
भावेनएकादशीतृतीयाचषष्ठीचैवत्रयोदशी पूर्वविद्धापिकर्तव्यायादिनस्यात्परेहनीत्युत्तरविद्धाकर्तव्यविषयवसिष्ठ
वचनानुपपत्तेः तिथिक्षयवशादुत्तरविद्धालाभेस्कंदव्रतवदन्यान्यपिव्रतानिपूर्वविद्धायामेवकर्तव्यानीत्यर्थेप्रमाण
त्वेनेदंवचनमुदाहरतोमाधवस्याप्ययमेवाभिप्रायोलक्ष्यते अत्रोच्यते नागोद्वादशनाडीभिरित्येतत्तावद्दूषकता
नुवादेननाडीविशेषविधायकं यत्रपंचमीविद्धाषष्ठीनिषिद्धातद्विषयमेवैयुक्तं वसिष्ठवचनंतुयदिपरेहन्येकमुहूर्ता
दिकालेमध्याह्नादौषष्ठीनस्यात्किंतुपूर्वेहन्येवस्यादितिव्याख्यानेनसमान्यतः सर्वत्रानिषिद्धायानागविद्धायाःष
ण्मुहूर्तवेधवत्या अपिएकभक्तादौप्रतिप्रसवार्थंयुक्तंचैतत्कालशास्त्रस्यप्रबलत्वात् अतएवहेमाद्रिणापिद्वादशना
ड्यादिवेधस्यनक्तैकभुक्तादिव्यतिरिक्तविषयत्वमुक्तमिति तस्मादेवंनिर्णयः स्कांदीयान्येषुसर्वेष्वप्युपवासादिकर्म
स्तु परविद्धैवषष्ठीस्यान्नागविद्धानकर्हिचित् दूषकोनागवेधश्च षण्मुहूर्तात्मकोमतः षण्मुहूर्तमितेनापियुता
नागेनयाभवेत् स्कंदोपवासेस्त्रीकार्यासैवषष्ठीतिनिर्णयः सप्तमीतूपवासेन्यत्रचपूर्वाविद्धैवग्राह्या षण्मुन्योरि
त्यादियुग्मशास्त्रात् पंचमीसप्तमीचेत्यादिपैठीनसिवचनाच्च षष्ठेकादश्यमावास्यापूर्वविद्धातथाष्टमी सप्त

मीपरविद्धावैनोपोष्यंतिथिपंचकमितिस्कंदपुराणेपरविद्धानिषेधाच्च नववष्ठ्यायुतासप्तमीकर्तव्याताततसर्वदा षष्ठी
चसप्तमीयत्रतत्रसन्निहितोरविरितिस्कंदपुराणात्षष्ठीसमेताकर्तव्यासप्तमीचाष्टमीयुता पतंगोपासनायेह षष्ठ्यामाकुरुपोष
णामितिभविष्यपुराणवचनाच्च सौरोपवासएवसप्तमीपूर्वविद्धायुक्तानान्यत्रेतिशंकनीयं सप्तमीनाष्टमीयुक्तानसप्तम्यायुता
ष्टमी सर्वेषुव्रतकल्पेष्वितिब्रह्मवैवर्तवचनात् यदापूर्वेद्युरस्तमयपर्यंताषष्ठीपरेद्युस्तुक्षयवशादष्टम्याविद्धासप्तमीतदायु
णारोधेनप्रधानलोपस्यान्याय्यत्वान्निषेधमतिक्रम्याप्युत्तरविद्धांगौणकालत्वेनस्वीकृत्यतत्रैवोपवासादिसर्वंकार्यं तस्मा
त्सर्वत्राप्युपवासादौपूर्वविद्धैवसप्तमीग्राह्या तस्यालाभेतुपरविद्धापिगृह्यतां अष्टमीचशुक्लोत्तराकृष्णाचपूर्वा उपवा
सादिसर्वकर्मसुग्राह्या शुक्लपक्षेऽष्टमीचैवशुक्लपक्षेचतुर्दशी पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुता उपवासादिकार्येषु
एषधर्मःसनातनः कृष्णपक्षेऽष्टमीचैवकृष्णपक्षेचतुर्दशी पूर्वविद्धातुकर्तव्यापरविद्धातुकर्हिचित् उपवासादिकार्येषुए
षधर्मःसनातनइतिनिगमवचनात् एवंसतिवस्तुतःअयोरितियुग्मवचनं नाष्टमीसप्तमीयुक्तासप्तमीनाष्टमीयुता नवम्यास
णा हकार्यास्यादष्टमीनात्रसंशयइत्यादीतिपद्मपुराणादिवचनानिचशुक्लपक्षाष्टमीविषयाणि दूर्वाष्टमीतुशुक्लापिपूर्वविद्धै
वग्राह्या श्रावणीदुर्गानवमीदूर्वाचैवहुताशनी पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमितिबृहस्पतिवचनात् हुताश
नीहोलिकावह्निव्रततिथिर्वारंभात्तृतीयेतिकश्चित् शुक्लामीतिथिर्यातुमासिभाद्रपदेभवेत् दूर्वाष्टमीतुसाज्ञेयानोत्त
रासाविधीयतइतिहेमाद्रिमदनरत्नधृतपुराणसमुच्चयवचनाच्च इदंचदूर्वाव्रतंज्येष्ठामूलयोगरहितायांभाद्रपदशु
क्लाष्टम्यांसिंहस्थेसूर्ये अगस्त्येऽनुदितेमध्याह्नगतरोहिणमुहूर्तव्यापिन्यांकर्तव्यं नित्यंच शुक्लेभाद्रपदेमासिदूर्वासं
ज्ञातुयाष्टमी सिंहार्केएकर्तव्या नकन्यार्केकदाचन सिंहस्थेसोत्तमासूर्येऽनुदितेमुनिसत्तमइतिस्कंदपुराणात् मुहूर्ते
रोहिणेष्टम्यांपूर्वावायदिवापरा दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेत् यानपूजयतेदूर्वांमोहादिहयथाविधि त्री १३
णितस्मानिवैधव्यंलभतेनात्रसंशयः तस्मात्संपूजनीयासाप्रतिवर्षंवधूजनैः सुखसंतानजननीभर्तुःसौख्यकरी

संदेतिपुराणसमुच्चयवचनाच्च तेनपूर्वस्याःकर्मकालस्पर्शेसत्यपिवातन्यतरयोगेउत्तरापितद्रहिताकर्मकालस्पर्शिनीदूर्वाव्रतेग्राह्याभ
वतिनित्यत्वाच्चज्येष्ठामूलास्पर्शेज्येष्ठामूलात्तद्योगरहितायाःयस्मिन्वर्षेऽलाभस्तत्राप्यनुकल्पेनानुष्ठानंनतुसर्वथात्यागःस
चकर्तव्यात्वेकभुक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्चयेद्भक्त्यानवंध्यंदिवसंनयेदितितत्रैवोक्तेः निषिद्धयोगाभावेस्त्रीभिः
स्वयंसंपूज्यदूर्वामनग्निपक्वभक्षणादियथाविधिकर्तव्यं निषिद्धयोगेतुब्राह्मणेनपूजांकारयित्वैकभुक्तंकर्तव्यमित्यर्थः ज्येष्ठा
मूलग्रहणंनिषिद्धकालमात्रोपलक्षणं तत्राप्यपेक्षासत्वात् यच्चभाद्रपदशुक्लाष्टमीमारभ्याग्रिमकृष्णाष्टमीपर्यंतंकर्तव्यंमहा
लक्ष्मीव्रतंस्कंदपुराणेउक्तंतस्योपक्रमइतरव्रतवन्नवमीयुक्तायामेवज्येष्ठानक्षत्रयुक्तायां असंभवेकेवलायामपि समापनंतु
यत्कृष्णाष्टम्यांतत्चंद्रोदयव्यापिन्यांकर्तव्यं तत्कालेचंद्रार्घ्यदानविधानाच्चंद्रोदयव्रतत्वेनचंद्रोदयव्रतेचैवतिथिस्तात्कालि
कीस्मृतेतिविशेषवचनात्सामान्यवचनाच्च उभयत्रचंद्रोदयसत्वेकृष्णात्वात्पूर्वा यद्युत्तरदिनेचंद्रोदयोत्तरंत्रिमुहूर्तातदो
त्तरैव पूर्वावापरविद्धावाग्राह्याचंद्रोदयेतुया त्रिमुहूर्तातुसापूज्यापरतश्चोर्ध्वगामिनी इतिपुराणसमुच्चयवचनात् यच्च
भाद्रपदशुक्लाष्टम्यामेवज्येष्ठायुक्तायामेवलिंगपुराणेउक्तं तत्रैवेतिहासपूर्वं अलक्ष्मीविनिवृत्तयेस्त्रीणांपूज्यत्वेनोक्तायाःल
क्ष्म्याःपूर्वंसमुद्रमथनादुत्पन्नत्वेन ज्येष्ठासमाख्यायाअलक्ष्म्याज्येष्ठाशब्देनपूजनंतत्रतथैवज्येष्ठायुक्तासैवग्राह्यापूर्वापरा
वा कन्यास्थार्काष्टमीशुक्लाज्येष्ठर्क्षेमहतीस्मृता अलक्ष्मीपरिहारायज्येष्ठांतत्रप्रपूजयेदितिलिंगपुराणात् अत्रकन्यास्थार्क
योगेनप्राशस्त्यमात्रंमासस्तुभाद्रपदःचांद्रएवग्राह्यः मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुते यस्मिन्कस्मिन्दिनेवापिज्येष्ठा
देवींप्रपूजयेदिति पुराणसमुच्चयादितिहेमाद्रिः यस्मिन्कस्मिन्दिनेनक्षत्रयुक्तायांपूर्वस्यांपरस्यांवाअष्टम्यामित्यर्थः वस्तु
तस्तुयस्मिन्कस्मिन्दिनेयस्यांकस्यांचित्तिथावितितिथिव्रतात्भिन्नंनक्षत्रमात्रापेक्षंव्रतंयत्स्कंदपुराणे मासिभाद्रपदेशुक्ले
पक्षेज्येष्ठर्क्षसंयुते यस्मिन्कस्मिन्दिनेकुर्यात्ज्येष्ठायाःपरिपूजनमित्युपक्रम्योक्तं तद्विषयमिदंवचनं अतएवनक्षत्रमात्र
निर्णयार्थंस्कंदपुराणवचनं यस्मिन्कस्मिन्दिनेभवेत्ज्येष्ठामध्याह्नादूर्ध्वमप्यणुः तस्मिन्हविष्यंपूजाचन्यूनाचेत्पूर्ववा

सरइति अतएवहेमाद्रिणैवव्रतखंडेनक्षत्रव्रतप्रकरणेषोडशदिनसाध्यान्महालक्ष्मीव्रतात्ज्येष्ठायुक्ताष्टमीमात्रसाध्याज्येष्ठा
पूजाव्रतात्र भिन्नत्वेन प्रतिपत्तंवत्सरं कर्तव्यं विद्यास्त्रीलाभादिसर्वफलसाधनं सोद्यापनं सविस्तरपूजाप्रकारमुक्तं स्कंदपुराणगतं
अन्यपुराणगतंचज्येष्ठाव्रतमुदाहृतं मदनरत्नादौच नीलज्येष्ठेत्यपियोगविशेषेणोत्तरपदार्थप्रधानंज्येष्ठानक्षत्रस्यैवनाम यद्य
पिचतत्राष्टम्यांयदावारोभानोर्ज्येष्ठर्क्षमेव चनीलज्येष्ठेतिसाप्रोक्तादुर्लभाबहुकालिकेतितल्लक्षणाभिधानार्थेस्कंदपुराणव
चनेसप्तमीनिर्दिष्टायाअष्टम्या आधेयव्याप्तत्वेन प्राधान्यावगमात्सेतितस्याएवप्रतिनिर्देशस्तत्समानाधिकरणंनामापितस्या
एवेतिप्रतिभाति तत्तिपयस्सिदध्यानयतिवैश्वदेव्यामिक्षेत्यत्र सइव तथापिवैश्वदेवीशब्दान्वयलभ्यदेवतान्वये नयाग
विनियोगलाभेनपयसः प्राधान्यसंभवात्सर्वंयुक्तं नतुतथाष्टम्याः प्राधान्यंसंभवतियेनरू लक्षणयावातन्नामधेयनील
ज्येष्ठेतिकल्प्येत नचात्रापिकृतस्नानोनरः कुर्यात्तस्यामन्यत्रवादिने भक्तियुक्तः शुचिर्भूत्वाज्येष्ठायाः परिपूजनमित्युक्त
स्ववचनेतस्यामित्यष्टम्याएवविनियोगात्संभवत्येवतदितिवाच्यं उपक्रमेज्येष्ठायुक्तस्ययस्यकस्यापिदिनस्यकर्मकालत्वाव
गमेतद्विरुद्धस्याष्टम्यास्तत्रविनियोगस्यासंभवात् नचैतदनुरोधादुपक्रमवचनमेवयस्मिन्कस्मिन्दिनेपूर्वस्यामुत्तरस्यां
वाष्टम्यामित्येवंव्याख्येयमितिवाच्यं उत्पत्तिविधावेवखंडतिथिविनियोगस्य क्वाप्यदर्शनात् तेनोपक्रमानुरोधान्नक्षत्र
मेवनीलज्येष्ठालक्षणवाक्येसेतिपरामृश्यते स्त्रीलिंगंचसावैश्वदेव्यामिक्षेतिवत् माधवस्यतुतिथाविवंसर्वमिदंयोजय
तोभिप्रायंनविद्मः नभोष्टम्यामितितुतेनोदाहृतः पाठः प्रामादिकएव तेननक्षत्रमात्रापेक्षेव्रतेज्येष्ठानक्षत्रस्यखंडत्वे
अष्टमीभानुवारयुक्तम्यतरयुग्वानक्षत्रंग्राह्यं अन्यतरयोगस्याप्यभावेमध्याह्नादूर्ध्वमनुवर्तमानं ग्राह्यमिति यत्तुमि
लितशिवशक्तिदैवत्यः पूजोपवासादिरूत्सवोव्रतपर्यायः सपक्षद्वयगतोपिनवमीयुक्तायामेवाष्टम्यांकार्यः अष्टम्यान १४
वमीविद्धानवम्याचाष्टमीयुता अर्धनारीश्वरप्रायाउमामाहेश्वरीतिथिः अष्टमीनवमीयुग्मे महोत्साहे महोत्सवः
शिवशक्त्योः शिवक्षेत्रेपक्षयोरुभयोरपीतिपद्मपुराणात् अत्रशिवस्यसशक्तेर्यः उत्सवः पक्षद्वयगतायामष्टम्यां

31/19

नवम्यांवाविहितः सनवमीयुतायामष्टम्यामष्टमीयुतायांचनवम्यांकर्तव्यइत्येतावद्विवक्षितं शिवक्षेत्रइतित्वनुवादः शिवो
त्सवस्यतत्रैवकरणात् अन्यथार्थवादः एवंसत्युपवासेसप्तमीतुवेधाद्धंत्युत्तरंदिनंपक्षयोरुभयोरेषउपवासविधिस्मृतइति
नारदीयवचनमपिशिवशक्तिप्रीत्यर्थोपवासाभिप्रायमेव एकमूलकल्पनालाघवात् एकादश्यष्टमीतिपूर्वोदाहृतवचनमप्ये
तद्विषयमेवशुक्लपक्षविषयंवा नन्विदंवचनद्वयमुपवासेकृष्णपक्षगतायाः सामान्यवचनप्राप्तंपूर्वविद्धत्वमपोह्यपक्षद्वयग
तायाअप्युत्तरस्याः ग्राह्यत्वंप्रतिपादयतीतियुक्तं कृष्णाष्टम्याः पूर्वविद्धत्वप्रतिपादकेनिगमवचने आहत्योपवासग्रहणा
त् नचैतस्यरुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिः अन्येषुव्रतकल्पेषुयथोद्दिष्टामुपावसेदित्येतद्वचनवशाद्रुद्रोपवासविषय
त्वेनोपसंहारोयुक्तः उपवासादिकार्येषुएषधर्मः सनातनइतिसर्वविषयत्वस्यस्पष्टत्वात् रुद्रव्रतेष्वित्यस्यचरुद्रव्रतमा
त्रविषयतोपवासमात्रविषयत्वाभावात्समानविषयत्वाभावात् तस्मात् शुक्लाष्टमीपराग्राह्यापूर्वाकृष्णाष्टमीमता
कृष्णापिचमहालक्ष्मीव्रतस्यतुसमापने चंद्रोदयगताग्राह्यातादृशीचेद्दिनद्वये ग्राह्यापूर्वैवकृष्णात्वात्तादृश्यपि
परेहनि चंद्रोदयान्मुहूर्तेषुत्रिषुव्याप्यासतीपरा ज्येष्ठाव्रतेतुज्येष्ठायुक्तपूर्वावायदिवापरा नक्षत्रमात्रापेक्षंयद्व्रतंज्ये
ष्ठात्रसामता अष्टमीभानुवाराभ्यांयुतायान्यतरेणवा अतथात्वेतुसोक्तायामध्याह्नादूर्ध्वमप्यणुः पूर्वाशुक्लापिपूर्वै
वकर्मकालंनसास्पृशेत् ज्येष्ठामूलयुतावाचेतग्राह्यातद्विहितापरा कर्मकालेयदिभवेच्छिवशक्तिमहोत्सवे पक्षद्वये
प्युत्तरैवपूर्वारुद्रव्रतेतथा श्रीकृष्णजन्माष्टमीविशेषतोनिर्णेष्यते महाष्टमीचनवरात्रनिर्णये नवमीत्वष्टमी
त्वष्टमीयुताग्राह्यासर्वकार्येषु वसुरंध्रयोरितियुग्मवचनात् दशमीविद्धायानवम्याः पद्मपुराणादौनिषेधाच्च नव
म्येकादशीचैवदशाविद्धायदाभवेत् तदावर्ज्याविशेषेणगंगांभः स्मरयायथेति श्रीरामनवमीव्रतेतुमध्याह्नव्या
पिनीग्राह्या मेषेपूषणिसंप्राप्तेलग्नेकर्कटकाह्वये आविरासीत्सकलयाकौशल्यायांपरः पुमानित्यगस्त्यसंहि
तावचनेमध्याह्नस्यजन्मकालत्वाभिधानात् जयंतीषुजन्मकालस्यैवपूजाद्यपकर्मकालत्वात् जन्माष्टम्यांतथा

दर्शनात् अतएवस्पष्टमुक्तं सैवमध्याह्नयोगेन महापुण्यतमा भवेदिति यदा दिनद्वयेपि मध्याह्नव्यापिनी तदस्पर्शिनी तदेकदेशस्पर्शिनी
वा तदा या पुनर्वसुयुक्ता ग्राह्या सौ पुनर्वस्वृक्षसंयोगः स्वल्पोपि यदि दृश्यते चैत्रशुक्लनवम्यां तु सा पुण्या सर्वकामदेत्यगस्त्यसंहिता
वचनात् यदा तादृश्या दिनद्वयेपि पुनर्वसुयोगस्तदा मध्याह्ने तद्योगवती सा ग्राह्या जन्मकाले तद्योगस्य रोहिणीयोगवत्प्रशस्तत्वा
त् यदा दिनद्वयेपि मध्याह्ने वर्तमानायास्तत्रैव पुनर्वसुयोगोपि यदा वा दिनद्वयेपि मध्याह्ने तं विहाय वा वर्तमानायाः पुनर्वसु
योगस्तं विहायैव यदा वा त्रिविधाया अपि पूर्वोक्तायाः सर्वथा पुनर्वसुयोगाभावस्तदोत्तरैव सर्वैर्ग्राह्या नवमी चाष्टमी विद्धा
त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै दशम्यामेव पारणमित्यगस्त्यसंहितावचनात् अत्र च विष्णुपरायणैरित्युक्तत्वा
द्वैष्णवैरष्टमीविद्धां त्यक्त्वा दशमीविद्धोपोष्या अवैष्णवैस्त्वष्टमीविद्धेति केचिन्मन्यंते तदयुक्तं विष्णुपरायणैः सद्भिरिदं स
र्वं कर्तव्यमित्युपदेशपरत्वेनाप्येतस्य विशेषणस्योपपत्तावैष्णवानामष्टमीविद्धाविद्धाविध्यापादकत्वेविशेषणत्वांगी
कारस्यानुचितत्वात् वस्तुतस्तु विष्णुपरायणैरित्यत्र हि विष्णुपदस्य प्रकृततदात्मकविष्णुपरत्वात्तन्मंत्रदीक्षितपरं संकुणविधावपि
श्रुतं तस्मिन् दिने तु कर्तव्यमुपवासव्रतं सदेति सदाशब्दस्कृतेनित्यप्रयोगविधावाकांक्षितत्वादन्वेति प्रकृते तेन सदाशब्द
योगात्प्रतीयमानं नित्यत्वमस्य श्रीराममंत्रदीक्षितान् प्रत्येव भवती नतु प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः उपोषणं न
कुरुते कुंभीपाकेषु पच्यते अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमं व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् इत्यादिप्रकरणे
दोषप्रतिपादनेन नित्यत्वविदकेषु तत्रत्यवचनेषु मर्त्यादिसामान्यशब्दश्रवणेपि सर्वान्प्रति प्रभवती अतएव शिष्टाचारोपि
तथा नहि श्रीरामदीक्षाहीना अतिशिष्टा अपि सर्वे श्रीरामनवम्यामुपवासमाचरंति सूर्यग्रहे कुरुक्षेत्रे महादानैः कृतैर्मुहुः
यत्फलं तदवाप्नोति श्रीरामनवमीव्रतादित्यादिवाक्यविहितः काम्यप्रयोगस्तु सर्वेषां भवति न चानित्याधिकारविधाविव १५
कामाधिकारविधावपि विष्णुपरायणैरित्यस्यान्वयोस्त्विति वाच्यं काम्यप्रयोगस्य खंडतिथौ निषेधेन खंडतिथिनिर्णय
वाक्यानां नित्यप्रयोगविधिमात्रविशेषत्वात्तदंतर्गतस्य तस्य पदस्य तन्मात्रान्वयस्यैवोचितत्वात् पारणं तु यदा पूर्वविद्धा

द्धायामुपवासस्तदा नवमीमतिक्रम्यैव कर्तव्यं सामान्यवचनाद्दशम्यामेव पारणमिति विशेषवचनाच्च न चात्र रात्रिपा
रणादिप्रसक्तिरिति तत्त्वं निर्णयः नवमी पूर्वविद्धैव सर्वकार्येषु शस्यते अलाभे परविद्धापि श्रीरामनवमीव्रते मध्या
ह्नव्यापिनी पूज्या तत्स्वव्याप्तिश्चेद्दिनद्वये एकदेशेपि वा व्याप्तिः सर्वथा सत्वमेव वा पुनर्वसुयुता ग्राह्या तद्योगेपि दिनद्व
ये मध्याह्नतद्योगवती ग्राह्या तस्य प्रशस्तितः दिनद्वये च तादृक्ते मध्याह्नं परित्यज्य वा सत्क्षयोगे सर्वथा वा तदसत्वे परा
मता पूर्वविद्धोपवासेपि दशम्यामेव पारणं नित्यं चैतद्दीक्षितानां श्रीरामनवमीव्रतं दशमी तु दिनद्वयेपि कर्मकालव्यापि
नी पूर्वापरा वेच्छया ग्राह्या संपूर्णा दशमी कार्या परया पूर्वयाथवा युक्ता न दूषणं तस्यां यतः सा सर्वतोमुखीति स्कंदपुराण
वचनात् संपूर्णा कर्मकाले विशेषाश्रवणाद्दिनद्वयेपि अन्येषु पक्षेषु पूर्वा दशमी चैव कर्तव्या सद्गर्गा द्विजसत्तमेति स्कंदपु
राण एवोक्तत्वादिति हेमाद्रिप्रभृतयः चेन्नं दिनद्वये कालव्याप्तौ शुक्लकृष्णवाक्याभ्यां व्यवस्थाकुतो नाभ्युपगम्यत इति वा
च्यं तथा सति पूर्वया परयाथवेति वचनस्यानर्थक्यात् कर्मकालव्याप्तिशुक्लकृष्णवाक्यैरेवास्यार्थस्य सिद्धेः ऐच्छिकवि
कल्पविधानार्थमेवास्तितद्वचनं अस्तु संपूर्णा इति विरुध्याता इत्युक्तं पूर्णत्वस्यैव कार्यकालसंज्ञापरिभाषयोरुपस्थान
मिति न्यायेन गृहीतुं युक्तत्वात्कर्मकालविषयं तच्चेत्यं। तस्मान्माधवाद्युक्ता शुक्लकृष्णभेदेनैव व्यवस्था कालव्याप्त्या
निर्णयपक्षे तु ज्यायसी संपूर्णेति वाक्यं त्वेवं व्याख्येयं दशमी संपूर्णा कार्या अथ या पूर्वया परया वा तिथ्या युक्ता का
र्या सर्वकार्येषु तस्यां कस्यांचिदपि गृहीतायां न दूषणं यतः सा सर्वतोमुखी अन्यासां हि तिथीनां सामान्यवचनात्त
द्विशेषवचनाद्वा मूलं पित्र्यादिकर्मयोग्यं तथैवाग्रमुपवासादिदैवकर्मयोग्यमस्यास्तु सर्वं सर्वत्र योग्यमिति पूंपूर्णा
ग्रहणं दृष्टांतत्वेन सर्वतोमुखीत्यर्थवादोपपत्तये एवमुक्ते शुक्लकृष्णवाक्याभ्यां व्यवस्था एतादृशविषय एव हित
योर्व्यवस्थापकत्वेनार्थवत्ता एवं सति नंदाविद्धा तु या पूर्णा द्वादशीमकरोसिता भृगुणा नष्टा चंद्रा च एतावेनिः फलाः
स्मृता इति कूर्मपुराणगत उत्तरविद्धानिषेधः पूर्वोक्तश्च नवमीयुक्तविधिः कृष्णपक्षविषयो द्रष्टव्यः यश्च नागवि

का०त०
१६
द्वातुयाषष्ठीशिवविद्धाचसप्तमी दशम्येकादशीविद्धानोपोष्याःस्युः कथंचनेत्यादिविशेषतउपवासेपरविद्धानिषेधःशि
वरहस्यसौरपुराणादिषुसोपितथाउपवासेपूर्वविद्धायाएवनियमेसर्वतोमुखत्वोक्तिविरोधापत्तेः उपवासग्रहणंतुमुख्यत
यासर्वकर्मोपलक्षणमेवयुक्तं इतरतिथ्यनुरोधेनतस्मिंस्तस्यावश्यकत्वात् तस्मात् सर्वकार्येषुदशमीकृष्णापूर्वोत्त
रासिता एकादशीतुसर्वकार्येषुद्वादशीयुताग्राह्या रुद्रेणद्वादशीयुक्तेतियुग्मवचनात् एकादशीनकर्तव्यादशमीसंयु
ताविभोइतिस्कंदपुराणवचनेन पूर्वविद्धानकर्तव्यात्तृतीयाषष्ठिरेवच अष्टम्येकादशीभूताधर्मकामार्थवांछिभिरिति
भविष्यत्पुराणवचनेनचपूर्वविद्धानिषेधाच्च उपवासेत्वेकादशीविशेषतोनिर्णेष्यते एकादशीपरयुतासर्वकार्येषुसंमता
द्वादश्यप्येकादशीयुतैवग्राह्यासर्वकार्येषु युग्मवचनात् द्वादशीचप्रकर्तव्याएकादश्यायुताप्रभोइतिस्कंदपुराणवचना
च्च उपवासेषुविशेषतःएकादशीतथाषष्ठीअमावास्याचतुर्थिका उपोष्याःपरसंयुक्ताःपराःपूर्वेणसंयुताइतिगार्ग्यप्रोक्त
विधिवचनात् द्वितीयापंचमीवेधाद्दशमीचत्रयोदशी चतुर्दशीचोपवासेहन्युःपूर्वोत्तरेतिथी इतिवसिष्ठेनोत्तरविद्धा
निषेधाच्च एवंसतियदाखंडतिथित्वादेकादशीद्वादश्युपवासावेकस्मिन्दिने प्राप्नुतस्तदोपक्रमप्रभृतितंत्रेणैवकर्तव्यौ
यदात्वखंडतिथित्वाद्दिनद्वयेनैरंतर्येण प्राप्नुतस्तदाप्रक्रांतद्वादश्युपवासेनप्रधानभूतद्वादश्युपवासानुरोधेनैकादश्युप
वासांगंपारणंबाधित्वानैरंतर्येणोपवासद्वयमपिकर्तव्यं एकादशीमुपोष्यैवद्वादशींसमुपोषयेत् नतत्रविधिलोपःस्यादु
भयोर्दैवतंहरिरितिपुलस्त्यस्मृत्यंतरवचनाच्च अनुपक्रांतद्वादश्युपवासेनतुसावकाशत्वात्तादृशेविषयेद्वादश्युपवा
सोनोपक्रमितव्यएव माधवस्तुअपोश्नातितंनेवाशितंनेवाशितमितिदर्शपौर्णमासप्रकरणगतार्थवादवशादप्राशन
स्याशितत्वरूपत्वेनपूर्वोपवाससमापकत्वादनशितत्वरूपत्वेनचोत्तरोपवासाविघातकत्वादुदकपारणांकृत्वानुपक्रांतउपक्रां
तोवाद्वादश्युपवासःसकर्तव्यइत्याह अन्यतिथिष्वप्युपवासद्वयस्यनैरंतर्येणप्राप्तावयमेवनिर्णयः श्रवणद्वादशी १६
निर्णेष्यते तस्मात् उपवासादिकार्येषुद्वादश्येकादशीयुता उपवासद्वयप्राप्तावेकस्मिन्नंह्नितंत्रतोनैरंतर्येणतत्साम

35
१७

नुपवासद्वयंभवेत् अह्नस्त्वेवचपूर्वस्यप्रारणांप्राश्यचोदकं त्रयोदशीतुकृष्णोत्तराग्राह्या षष्ठ्यष्टमीत्वमावास्याकृष्णपक्षेत्र
योदशी एताःपरयुताःपूज्याःपराःपूर्वयुतास्तथेतिनिगमवचनात् एवंसतित्रयोदशीप्रकर्तव्याद्वादशीसहितामुनेइतिब्रह्म
वैवर्तवचनस्यसामान्यविशेषन्यायेनशुक्लत्रयोदशीविषयत्वाच्छुक्लापूर्वा उपवासेप्येवमेव तत्रैकादश्यष्टमीषष्ठीद्विती
याचचतुर्दशी त्रयोदशीअमावास्या उपोष्याःस्युःपरान्विताइतिविष्णुधर्मोत्तरवचनादुवासेपक्षद्वयेप्युत्तरैवयुक्तेति
वाच्यं द्वितीयापंचमीवेधादितिवृद्धवसिष्ठवचनेनउपवासएवोत्तरविद्धायानिषेधादपितत्रव्यवस्थापेक्षायांकृष्णपक्षे
त्रयोदशीतिकर्मविषयेसामान्यवचनेनाप्यवगतायाःकृष्णशुक्लविषयत्वेनव्यवस्थायाःस्वीकारस्योपवासेपियुक्त
त्वात् याचशुक्लत्रयोदशीपूर्वाग्राह्या सानसायाह्नमात्रव्यापिनीकिंतुयद्यापराह्निक्यपि त्रयोदशीप्रकर्तव्याभवे
द्याचापराह्निकीतिस्कंदपुराणवचनात् अतएवमाधवेनोक्तं याशुक्लागृह्यतेपूर्वागृह्यतांसापराह्निकीति अनंगत्र
योदशीत्वनापराह्निक्यपिपूर्वाग्राह्या कृष्णाष्टमीबृहत्तपासावित्रीवटपैतृकी अनंगत्रयोदशीरंभाउपोष्यापूर्वसं
युताइतिविशेषवचनस्यैवमेवसार्थक्यात् मार्गशीर्षेमलेपक्षेइतिशुक्लपक्षगतत्वेनतस्याअपिपूर्वविद्धत्वस्यसामा
न्यवचनादेवसिद्धत्वात् केचित्तुशुक्लात्रयोदशीशुक्लपक्षेतिथिर्ग्राह्यायस्यामभ्युदितोरविरितिवचनात्तयोर्वापरा
ह्निकीउत्तरविद्धाग्राह्याकिंत्वापराह्निकीपूर्वविद्धेतिद्वेधाविभागांगीकारेणापराह्निकवचनंव्याचक्षते तेषामनंगत्र
योदशीपूर्वविद्धत्ववचनस्यप्रयोजनंचिंत्यं कृष्णापित्रयोदशीयदापरदिनेनलभ्यतेतदापूर्वापिग्राह्यासामान्यवच
नात् एकादशीतृतीयाचषष्ठीचैवत्रयोदशी पूर्वविद्धातुकर्तव्यायदिनस्यात्परेहनीतिविशेषवचनाच्च उपवासादि
कार्येषुपूर्वाशुक्लत्रयोदशी यद्यापराह्निकीस्यात्तुपराकृष्णात्रयोदशी अलाभेसापिपूर्वैवपूर्वानंगत्रयोदशी साया
ह्नमात्रसत्त्वेपिताद्दृश्यन्यापरास्मृतेतिनिर्णयः चतुर्दशीतुशुक्लापराग्राह्या चतुर्दश्याचपूर्णिमेतियुग्मवाक्यात्
सदाकार्यात्रयोदश्यानतुयुक्ताचतुर्दशी पौर्णमासीयुतासास्याच्चतुर्दश्याचपूर्णिमेतिभविष्यत्पुराणाच्च कृष्णाच

तुर्दशीतुपूर्वविद्धाग्राह्या कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी पूर्वविद्धैवकर्तव्यापरविद्धानकुत्रचित् उपवासादिकार्ये
षुएषधर्मःसनातनइत्यापस्तंबवचनात् उपवासेतुपक्षद्वयगतापिपरैवग्राह्या एकादश्यष्टमीषष्ठीउभेपक्षेचतुर्दशी॥
अमावास्यातृतीयाचताउपोष्याःपरान्विताइतिवृद्धवसिष्ठवचनात् यत्तुउपवासादिकार्येष्वित्युपवासेकृष्णचतुर्दश्याः
पूर्वविद्धत्वाभिधानंतद्रुद्रोपवासविषयं शैवव्रतेपक्षद्वयगतायाअपिचतुर्दश्याआपराह्णिक्याःपूर्वविद्धायाग्राह्यत्वा
त् चतुर्दशीतुकर्तव्यात्रयोदश्यायुताविभो ममभक्तैर्महाबाहोभवेद्याचापराह्णिकी दर्शविद्धानकर्तव्याराकाविद्धातथा
मुनेइतिस्कंदपुराणात् ममभक्तैरितिईश्वरोक्तिलिंगादस्यशिवव्रतविषयत्वं रुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिथिरिति
वचनाच्च आपराह्णिक्याअलाभेतुशिवव्रतेपिपरैव ताउपोष्याःपरान्विताइतिसामान्यवचनात् कृष्णचतुर्दश्यपिपू
र्वविद्धायाअलाभेपरैव एतद्विषयाण्येव अष्टम्येकादशीषष्ठीकृष्णपक्षेचतुर्दशी अमावास्यातृतीयाचकर्तव्यापरसं
युता चतुर्दशीदर्शयुक्तापौर्णमास्यायुतातथेत्यादीनिब्रह्मवैवर्त्तनारदीयादिवचनानिरुद्रोपवासविषयाणिवा आ
पराह्णिक्याःपूर्वस्याअलाभे दमनकपवित्रारोपणयोस्तुशुक्लेअपिचैत्रश्रावणचतुर्दश्योरात्रियोगिन्योःपूर्वैवग्रा
ह्येनतूत्तरे मधोश्श्रावणमासस्यशुक्लायातुचतुर्दशी सारात्रिव्यापिनीग्राह्यापरापूर्वाह्णगामिनीतिबोधायनवच
नात् परामासांतर्गताशुक्लचतुर्दशी पूर्वाह्णगामिनीउत्तराविद्धेत्यनुवादः भाद्रपदशुक्लचतुर्दश्यांविहितेनंतव्रते
पूजितचतुर्दशग्रंथिदोरकबंधनप्रधानकेयद्यपिमध्याह्नेभोज्यवेलायांसमुत्तीर्यसरित्तटे ददर्शलीलासास्त्रीणां
समूहंरक्तवाससां चतुर्दश्यामर्चयंतंभक्त्यादेवंपृथक्पृथक् इतिभविष्योत्तरवचनेमध्याह्नेपूर्वगृहीतव्रतानांस्त्री
णांव्रताचरणप्रतीतेःशीलायाश्चापूर्वव्रतारंभप्रतीतेस्तस्यमध्याह्नकालत्वान्मध्याह्नव्यापिनीचतुर्दशीग्राह्ये
तिप्रतिभातितथापिपूजादिविधेःस्पष्टत्वेनेतिहासरूपार्थवादोन्नेयत्वाभावात्तत्रचमध्याह्नाश्रवणात्स्वपक्षविधि ९७
विहितदेवकर्मांगपूर्वाह्णविरोधेनचार्थवादात्तन्मात्रविधेः कल्पनासंभवात्पूर्वाह्णएवतस्यापिकालइतितत्व्यापिन्यु

37
19

त्तरैवतिथिस्तत्रग्राह्या शिष्टाचारोप्येवमेव शिवरात्रिचतुर्दशीवक्ष्यते तस्मात् कृष्णाचतुर्दशीपूर्वापराशुक्लचतुर्दशी उपवा
सेव्रतेरेवपक्षद्वयगतापिसा रुद्रोपवासेपूर्वैवोभयीयद्यापराह्णिकी भताद्दशीसापिपराकृष्णाप्याद्येसतीपरा चैत्रश्रावण
गाशुक्लारात्रियोगवतीमता व्याख्यानंतव्रतेशुक्लापरैवान्यव्रतेष्विव पंचदशीतुपौर्णमासीअमावास्याचसावित्रीव्रतातिरिक्ते
सर्वत्रोपवासादौपरविद्धैवग्राह्या भूतविद्धानकर्तव्यादर्शःपूर्णाकदाचन वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममितिब्रह्मवै
वर्तवचनात् एवंसतियत्पौर्णमास्याःपूर्वविद्धायाविधायकंचतुर्दश्याचपूर्णिमेतियुग्मवचनंपरविद्धायाविधायकंच पूर्णि
मापरविद्धाचनोपोष्यातिथिपंचकमितिब्रह्मपुराणंयच्चामावास्यायाःपूर्वविद्धायाविधायकं दर्शंचपूर्णमासंचपितुःसांव
त्सरंदिनं पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइतिनारदीयपुराणंतत्सावित्रीव्रतविषयंयानिचअमावास्यायाःपरविद्धाया
विधायकानिप्रतिपद्यप्यमावास्येतियुग्मवाक्यंषष्ठ्यष्टमीतथादर्शःकृष्णपक्षेत्रयोदशी एताःपरयुताःपूज्याःपरापूर्वान्वि
तास्तथेतिपद्मपुराणंनागविद्धातुयाषष्ठीसप्तम्याचतथाष्टमी दशम्येकादशीविद्धात्रयोदश्याचतुर्दशी भूतविद्धात्वमा
वास्यानग्राह्यामुनिपुंगव उत्तरोत्तरविद्धास्ताःकर्तव्याःकाटकीश्रुतिरिति प्रचेतोवचनंयच्चोभयोरपिपौर्णमास्यमावा
स्ययोःपरविद्धयोर्विधायकं एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी अमावास्यातृतीयाचताउपोष्याःपरान्विताइतिवि
ष्णुधर्मोत्तरं तानिसावित्रीव्रतातिरिक्तविषयाणिवचनेनैवविरुद्धानांव्यवस्थाकरणात् अतएवोपवासग्रहणमपि क्वाचि
त्कमुपलक्षणमेव सावित्रीव्रतेउभयोरपिपूर्वविद्धयोर्विधायकंनिगमवाक्यमपि कृष्णाष्टमीबृहत्तपासावित्रीव्रतंपैत्की
अनंगत्रयोदशीरंभाउपोष्याःपूर्वसंयुताइति सावित्रीसावित्रीव्रतसंबंधिनीपौर्णमासी वटपैतृकीतद्व्रतसंबंधिन्यमावा
स्या तत्रैवपरविद्धयोर्निषेधकंविधायकंब्रह्मवैवर्तंच प्रतिपत्संचमीभूतासावित्रीवटपूर्णिमा नवमीदशमीचैवनोपो
ष्याःपरसंयुताइति सावित्रीतद्व्रतसंबंधिन्यमावास्या इदंचपूर्वविद्धयोःपंचविधयोः कर्तव्यत्वेनोक्तमपिसावित्रीव्रतं
नवमुहूर्तात्मकचतुर्दशीविद्धयोर्नकर्तव्यंभूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमितिविशेषवचनादितिमाधवः वस्तु

का०त०
१८

तन्नक्षयतभूतउत्तरांतिथिं दूषयतितदष्टादशनाडीभिरितियत्रभूतविद्धानिषिद्धातत्रैवायंविशेषविद्धिर्भूतविद्धानकर्तव्येत्यस्य
शेषोलाघवादितिसावित्रीव्रते एतस्यप्रवृत्तिर्नयुक्ताकिंतुइतरव्रतेष्वेवत्रिमुहूर्तात्मकसामान्यवेधबाधेन सापिकर्मकालव्या
प्तिशास्त्रोदासिन्यइति उपाकर्मणिश्राद्धेचपौर्णमास्यमावास्याचनिर्णेष्यते तस्मात् पूर्वविद्धैवसावित्रीव्रतेपंचदशीति
तिः नाड्योष्टादशभूतस्यनस्युश्चेदितिमाधवः तद्भिन्नेतूपवासादौमुहूर्तनवकेनचेत् चतुर्दश्यायुतानातुस्यकृत्वा
यात्यापगान्विता तत्रैवकालव्याप्तौतुसापिग्राह्येतिनिर्णयः एवंप्रतिपदादिपंचदश्यंतास्तिथयःसामान्यतउपवासे
प्रसंगात्तद्भिन्नेपिक्वचित्कृत्येनिर्णीता इदानींकाश्चित्तिथयोविशेषतउपवासादिषुनिर्णीयंते तत्रश्रीकृष्णजन्माष्टमी
तावद्व्रतंनिर्णीयते साचपौर्णमास्यंतमासपक्षेभाद्रपदेदर्शांतमासपक्षेश्रावणेकृष्णाष्टमी यद्यपिचतिथिकृत्येचकृष्णा
दिव्रतेशुक्लादिमेवच विवाहादौचसौरादिमासंकृत्येविनिर्दिशेदितिब्रह्मपुराणाच्चत्रतिथिकृत्यत्वात्पौर्णमास्यंतमासग्र
हणमेवोचितंतथाप्यत्रोभयमासव्यवहारदर्शनादुभयत्रापिपौर्णमास्यंतग्रहणेतिथिभेदापत्त्यामूलश्रुतिद्वयकल्पना
पत्तेः श्रावण्यनंतरायामेकस्यामेवचरोहिणीयोगसंभवात्सर्वैश्चविशिष्टैरेकस्यामेवतिथौव्रताचरणाद्द्विविधेनापिव्यव
हारेणैकैवतिथिरुपलक्ष्यतइतियुक्तं एवमेवंजातीयकेन्यत्रापिद्रष्टव्यं यत्रचैकेनैवमासेनव्यवहारस्तत्रप्रायेणतिथि
कृत्येकृष्णादिर्द्रष्टव्यः साचप्रथमंतावद्द्विविधा शुद्धाविद्धाच तत्रसप्तमीयोगरहिताशुद्धा तद्वतीविद्धा नचात्रवे
ध्यायाअष्टम्यास्तिथ्यंतरवह्निवाप्रवेशोस्त्येववेधः किंतुरात्रिमात्रसत्वेपिसप्तमीवेधोनभवत्येवपूजारूपस्यप्रधानस्या
र्धरात्रसाध्यत्वात् अहःसुतिथयःपुण्याःकर्मानुष्ठानतोदिवा नक्तादिव्रतयोगेतुरात्रियोगोविशिष्यतइतिवचनात् रा
त्रिवेधंवदतांमाधवादीनामयमेवाभिप्रायः यद्यपित्रिकालंपूजयेद्देवंदिवारात्रौविशेषतः अर्धरात्रावपितथापुष्पैर्ना
नाविधैरपीतिभविष्येअन्यकालेपिपूजोक्ताउपवासश्चाहोरात्रावच्छिन्नाभोजनरूपस्तथाप्यर्धरात्रकालावच्छिन्नैवपू १८
जाप्रधानं रोहिणीसहिताकृष्णामासिभाद्रपदेष्टमी सप्तम्यामर्धरात्राधःकलयापियदाभवेत् तत्रजातोजगन्नाथः
कौस्तुभीहरिरीश्वरः तमेवोपवसत्कालंतत्रकुर्याच्चजागरमिति अर्धरात्रेतुयोगोयंतारायस्युदयेतथा नियतात्मासु

39/19

चिस्नातःपूजांतत्रप्रवर्तयेदितिचविष्णुधर्मोत्तरात् अर्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमीभवेत् तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रि
जन्मजं सोपवासोहरेःपूजांकृत्वातत्रसीदतीतिभविष्यपुराणात्तच्च वासिष्ठेनतुस्पष्टमेवार्धरात्रस्यमुख्यकालत्वमुक्तं अ
ष्टमीरोहिणीयुक्तानिश्यर्धेदृश्यतेयदि मुख्यकालःसविज्ञेयस्तत्रजातोहरिःस्वयमिति मुख्यस्यप्रधानस्यकालोमुख्य
कालः अतएवपूजायाअपिप्राधान्यं केवलोपवासप्राधान्येतस्याहोरात्रसाध्येनार्धरात्रस्यतदपेक्षयामुख्यकालत्वा
नुपपत्तेः फलसंबंधश्रवणाच्च एवंचसति उपवासस्यनियमंगृह्णीयादित्युक्त्वावासुदेवंसमुद्दिश्यसर्वपापप्रशांतये उ
पवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहमितिभविष्योक्तेसंकल्पवाक्येयदुपवासमात्रग्रहणंतत्पूजाया अप्युपलक्षणं
विध्यनुसारित्वात्संकल्पस्य एवंसतिवासुदेवंसमुद्दिश्येत्यप्यन्वेतिपूजायांतस्योद्देशत्वात् उपवासेउद्देश्यानपेक्षणा
त् वासुदेवशब्देनतत्प्रीतिलक्षणायांचतदपेक्षयाजघन्येउपवासपदएवयथाश्रुततदन्वयार्थंपूजालक्षणायायुक्त
त्वात् उपवासोपसर्जनकपूजालक्षणायाश्चवासुदेवंसमुद्दिश्येत्यस्यविशेष्यपूजान्वयोपपत्तेः सोपवासोहरेःपूजा
मित्यत्रोपवासस्यपूजोपसर्जनत्वदर्शनात् एतादृशविशेषत्वेनप्राधान्यंनविहन्यतेयजतावुद्देशवत् अतएवद्वितीय
संकल्पवाक्येभर्चयित्वोपवासेनभोक्ष्येहमपरेहनीतिपूजाया अप्युल्लेखः तेनोपवासरूपस्यप्रधानस्याहोरात्रसाध्य
त्वेपिपूजारूपस्यप्रधानस्यार्धरात्रसाध्यत्वादितस्यरात्रिव्रतत्वमितिरात्रिमात्रसत्वेप्यष्टम्याःसप्तमीवेधोभवतीति एवं
स्पष्टेविशेषवचनेःकृष्णाष्टमीव्रतपूजायारात्रिकालत्वेसतियदैवत्वेनसामान्यतोविहितंपूजायाःपौर्वाह्णिकत्वंउपवा
सस्यचतदंगत्वमभिप्रेत्योदयकालीनायाअष्टम्याग्राह्यत्वंमैथिलैरुच्यतेतत्साहसमात्रं शुद्धविद्धभेदेनद्विविधाप्यष्ट
मीप्रत्येकंद्विविधा द्वितीयदिनेसूर्योदयमतिक्रम्यसतीअसतीचेति तादृश्यपिपुनःप्रत्येकंद्विविधा रोहिणीसहितात
द्रहिताचेति तत्रशुद्धायांविद्धायांवासूर्योदयादूर्ध्वमसत्यांरोहिणीसहितायांतद्रहितायांवाविप्रतिपत्तिरेवनास्तिद्वि
तीयदिनेष्टम्यभावात्शुद्धाधिकायाविद्धाधिकायावारोहिणीसाहित्यस्यान्यतरस्मिन्नेवदिनेद्वयोरपिद्वैविध्येसति

कृ०त०
१९

आद्यपक्षेयेवरोहिणीयुतासैवग्राह्या प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी मुहूर्तमपिलभ्येतसोपोष्यासामहाफला
मुहूर्तमप्यहोरात्रेयस्मिन्युक्तंहिलभ्यते अष्टम्यारोहिणीभक्षंतांकृष्णामुपावसेदितिविष्णुरहस्यवचनात तेनोत्तरदि
नएवरोहिणीयोगेनिशीथव्यापिनीमपिकिंबहुधाशक्ताभपिपूर्वापरित्यज्योत्तरैवजन्माष्टमीव्रतेग्राह्या यत्वेताहशेवि
षयेपूर्वेद्युरेवकेषांचिच्छिष्टानामपिव्रताचरणंतदाग्रहमात्रं वह्निपुराणेपि कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीनृप
जयंतीनामसाज्ञेयाउपोष्यासाप्रयत्नतः सप्तजन्मकृतंपापंराजन्यत्रिविधंनृणां तस्माल्लयतिगोविंदस्तिथौतस्यांस
माधितइति कृष्णाष्टम्यांकृष्णजन्माष्टम्यां द्वादशस्वपिमासेषुकृष्णपक्षाष्टम्यांरोहिणीयोगेजयंतीव्रतमितितुद्वैतनि
र्णयोक्तिर्भ्रांतिमूलकैव सिंहार्केरोहिणीयुक्तानराःकृष्णाष्टमीयदि रात्र्यर्द्धपूर्वापरगाजयंतीकलयापिचेतिवराह
संहितायांसिंहार्कग्रहणात्मासांतरेरोहिणीयोगस्यसर्वथैवासंभवाच्च अत्राष्टम्यांरोहिणीमात्रयोगेजयंतीत्वमिति
दाक्षिणात्याः अर्धरात्रएवतद्योगेजयंतीत्वमितिगौडाः जयंतीव्रतंजन्माष्टमीव्रताद्भिन्नंवातत्रैवफलविशेषायदाक्षे
ति दर्शपौर्णमासप्रकरणेश्रूयतेदाक्षायणयज्ञेनस्वर्गकामोयजेतेतिश्रुतंतत्रकर्मांतरंगुणभेदोवेतिसंशयेकर्मांतरमि
तितावत्प्राप्तं उद्भिदादिवद्यजिसामानाधिकरण्यात अथैषविश्वज्योतिरित्यादिवदपूर्वसंज्ञांतरंच राद्धांतस्तु गुण
एवदाक्षायणशब्दस्यावृत्तिवाचकत्वात्तद्योगाद्वाक्यशेषाद्वा तथाहि अयनमित्यावृत्तिरुच्यते दक्षस्येमेदाक्षाः
तेषामयनमिति दक्षतुल्साहीपुनरावृत्तावनलसइत्यर्थः तेषामावृत्तिर्दाक्षायणशब्दार्थस्तथाचप्रकृतदर्शपौर्णमा
सएवद्वैपौर्णमास्योयजेतद्वेअमावास्येइत्यादिवाक्यशेषाद्द्ध्यादिवत्स्वर्गकामस्यविधीयतइतिननामधेयमिति
गुणएवदाक्षायणयज्ञादिवत्प्रकारभेदमात्रंवेतितुनविचार्यतेअनुपयोगात भेदवाचिनोप्युभयसंनिपातेजयं
तीव्रतमात्रानुष्ठानस्यैवसंमतत्वात ननुचार्धमात्रस्यकर्मकालत्वंतावत्स्थितंकर्मकालव्याप्तिशास्त्रस्यचस
र्वपिक्षयाबलवत्वमुपपादितमेव रोहिणीयोगेतुप्राशस्त्यात्फलातिशयमात्रंनतुतस्यनिर्णयोपयोगिता नव १९

41/194

मीबुधवारादिवत अन्यथाप्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः यैःकृताःश्रावणेमासिअष्टमीरोहिणीयुता किंपुनर्बुध
वारेणसोमेनापिविशेषतः किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेतिपद्मपुराणवचनात्पूर्वेद्युरर्धरात्रेवर्तमानांरोहि
णीयुक्तामप्यष्टमींविहायबुधवारादियुक्तापराकर्तव्यास्यात अथवामुहूर्तमपिलभ्येतेतिविष्णुरहस्यवचनेनिशीथा
त्मकएवमुहूर्तोग्राह्यः निशीथस्यरात्र्यष्टममुहूर्तात्मकत्वात अतएवोक्तंमाधवोदाहृतेयोगीश्वरवचने अर्धरात्रा
दधश्चोर्ध्वमेकार्द्धघटिकान्विता रोहिणीचाष्टमीग्राह्याउपवासव्रतादिषिति एकाचार्द्धघटिकाचेकार्धघटिकेता
भ्यामन्विता अत्राद्यपक्षेक्षणात्मकार्धरात्रादधउपरिचैकैकघटिकाव्याप्त्यानिशीथव्याप्तिर्लभ्यतेवह्निपुराणवाक्येपि
कलार्धरात्रगतेवग्राह्या अर्द्धरात्रादधश्चोर्ध्वंकलयापियदाभवेत जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनीतियोगी
श्वरेणैवभिधानात तथाचार्धरात्रेमुहूर्तसत्वंमुख्यःपक्षः एकघटिकासत्वंमध्यमः कलामात्रसत्वमधमः अतए
ववचनांतरमपिरात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतामिति तारापत्युदयेतथेतिच उदयेचाष्टमीकिंचिन्नवमीसक
लायदीतिस्कंदपुराणवचनेप्युदयशब्देनचंद्रोदयएवग्राह्यः पूर्ववचनैकवाक्यत्वात तेनविद्धाधिकापूर्वेद्युरेवनिशी
थेवर्तमानाउत्तरदिनएवरोहिणीयुक्तापिपूर्वेद्युरेवग्राह्या शुद्धाधिकातुस्तरांकर्मकालव्याप्तित्वात्संपूर्णत्वादिबहु
गुणयोगाच्चेतिकथमाग्रहमात्रंतत्ग्रहणंशिष्टानामिति अत्रोच्यते कर्मकालव्याप्तिशास्त्रादेवप्रधानभूतायाअष्ट
म्याएवार्धरात्रसत्वेनप्राप्तंग्राह्यत्वं दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुता
मितिवचनेनरोहिणीयोगाभावविषयंक्रियतेएवंहितस्यार्थः दिनावच्छेदेनरात्र्यवच्छेदेनवाकलामात्रापिचेद्रोहिण्य
ष्टम्यांनास्तितदेवचंद्रोदयसंयुतामर्धरात्रव्यापिनीमितियावत प्रकुर्वीतदिनद्वयेपितादृश्याअभावेबहुरा त्रिसंयु
तामुत्तरांप्रकुर्वीतेतिविष्णुरहस्यादिगतंमुहूर्तादिपदमर्धरात्रगततत्परमितिलभ्यंताशुद्धं तथात्वेवाक्यस्यैवानर्थ
क्यप्रसंगात यदाहिशुद्धाप्यष्टमीअर्धरात्रेवर्तमानाग्राह्यातदारोहिणीसहितामुत्तरामितिकिंवचनेन मुहूर्तम

ष्वहोरात्र इतिवचनेतुस्पष्टैवाहोरात्रसंबंधियत्किंचिन्मुहूर्तप्रतीतेः उदयेचाष्टमीकिंचिन्नवमीसकलायदीत्यत्रचस्व
योदयप्रतीतिः तेनरोहिणीरहितायानिशीथव्यापिन्याअपवादेननिर्णायकएवरोहिणीयोगोनतुबुधवारादिवत्प्रा
शस्त्यमात्रहेतुरित्यपियुक्तं तदेवरात्रियुक्तांप्रकुर्वीततामुपावसेदुपोष्यासाप्रयत्नतइत्यादिषुनिर्णायकत्वस्यैव
प्रतीतेः बुधवारादियोगवाक्येषुतुप्राशस्त्यमात्रप्रतीतेएवंसतियदाचार्यचूडामणेःपरदिनएवस्वल्पाप्यष्टमीरोहि
णीयुताचेत्सर्वोपवासादिकार्यंपरेवोपोष्येत्येतत्पक्षप्रदर्शनावसरेबुधसोमयोरप्युपादानंउदयेचाष्टमीकिंचिदित्यस्य
ब्रह्मवैवर्तवाक्यस्यप्रेतयानिगतानामितिपद्मपुराणवचनस्यचतत्रप्रमाणत्वाभिधानंतदयुक्तमेव अतएवतिथितत्वकृता
पि प्रजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी मुहूर्तमपिलभ्येतसैवोपोष्यामहाफलेति वासरेवानिशायांवायत्रयुक्तातुरोहि
णी विशेषेणनभोमासिसैवोपोष्यासदातिथिः इत्यादिवचनेष्वेवकारश्रवणादेकादशीव्रतात्राजन्नाधिकंरोहिणीव्रतं त
तोहिदुर्लभंमत्वातस्यायत्नंसमाचरेदितिब्रह्मपुराणेचजन्माष्टमीव्रतस्यरोहिणीव्रतत्वेनैवश्रवणात्तिथिद्वैधेरोहिणीनिया
मकैव बुधवारादियोगेतुगुणफलमात्रमित्युक्त्वाषष्टिदंडामप्यष्टमीरोहिणीरहितांपरित्यज्यरोहिणीसहितास्वल्पाप्यष्टमीपरे
वोपोष्येतिस्पष्टमुक्तं दाक्षिणात्यनिबंधेष्वपिसर्वेष्वित्थमेवनिर्णयः यातुशुद्धाधिकापूर्वदिनेनिशीथेतद्विहायवारोहिणी
युक्ताउत्तरदिनेचतद्युक्तादिनद्वयेपिवारोहिणीरहितासापूर्वैवोपोष्या सकलाहोरात्रव्यापित्वात्प्रथमातिक्रमेकारणाभावा
च्च यातुविद्धाधिकातस्याअन्यतरस्मिन्नेवदिनेदिनद्वयेपिवानिशीथस्पर्शासंभवाद्रोहिणीसाहित्येपिपक्षत्रयंभवति अन्य
तरस्मिन्नेवदिनेनिशीथेतत्साहित्यंदिनद्वयेपितस्मिंस्तत्साहित्यंदिनद्वयेपितद्विहायतत्साहित्यमिति तत्राद्यपक्षेसैवग्राह्या
तत्रपूर्वदिनगायाग्राह्यत्वेतावद्वह्निपुराणं सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि भवितासाष्टमीपुण्यायावच्चंद्रदिवा
कराविति सप्तम्यामर्धरात्राधइतिप्राक्कलिखितंविष्णुधर्मोत्तरंच उत्तरदिनगायास्तथात्वेमासिभाद्रपदेष्टम्यांकृष्णपक्षे
र्द्धरात्रके। शशांकेवृषराशिस्थेप्राजापत्यर्क्षसंयुते उपोषितोर्चयेत्कृष्णं यशोदांदेवकींतथेतिभविष्योत्तरं अत्रस्वरसा २०

त्कृष्णोत्तराप्रतीतिः अतएवतत्रैववचनांतरं अविद्धायांचसर्क्षायांजातोदेवकीनंदनइति अत्रजन्मश्रवणादर्धरात्रेऋक्षसाहित्यं
गम्यते विद्धाविद्धयोर्जन्मश्रवणंचकल्पभेदादविरुद्धं द्वितीयपक्षेत्वुत्तरैवग्राह्या वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी सऋ
क्षापिनकर्तव्यासप्तमीसंयुताष्टमीतिब्रह्मवैवर्तवचनात् प्रातःसंकल्पयेद्विद्वानुपवासव्रतादिकमित्युपक्रमकालमा
रभ्यतिथेःसत्वाच्च योयस्यविहितःकालःकर्मणस्तदुपक्रमेतिथिर्याभिमतासातुकार्यानोपक्रमोज्झितेतिबोधायनव
चनात् अतएवबोधायनेनैवोक्तमुदयेत्वुपवासस्यनक्तस्यास्तमयेतिथिःमध्याह्नव्यापिनीग्राह्याएकभक्तेसदातिथि
रितितिथेस्त्रिसंध्यव्यापित्वाच्च त्रिसंध्यव्यापिनीयातुसैवपूज्यासदातिथिः नतत्रयुग्मादरणमन्यत्रहरिवासरादिति
पराशरवचनात् नक्षत्रस्यास्तमयनिशीथसंबंधित्वाच्च उपोषितव्यंनक्षत्रंयेनास्तंयातिभास्करः यत्रवायुज्यतेराम
निशीथेशशिनासहेतिभविष्यपुराणविष्णुधर्मोत्तरवचनात् यत्तुविष्णुधर्मोत्तरेजयंतीशिवरात्रिश्चकार्येभद्राजयान्वि
ते कृत्वोपवासंतिथ्यंतेतदाकुर्याच्चपारणमितिवचन यच्चगरुडपुराणेजयंत्यांपूर्वविद्धायामुपवासंसमाचरेत् तिथ्यंते
वोत्सवांतेवाव्रतीकुर्वीतपारणमितितदुत्तरदिनेनिशीथेरोहिणीयोगाभावेपूर्वदिनेचतत्सत्वेवर्जनीयेतिवचननिषिद्धस
प्तमीविद्धाप्रतिप्रसवार्थंबोध्यं दिनद्वयेप्यर्धरात्रंविहायरोहिणीयोगोयस्तुतृतीयःपक्षःसोनेकैःप्रकारैर्भवति पूर्वेद्युर्निशी
थादूर्ध्वंप्रवृत्तयोस्तिथिनक्षत्रयोःपरेद्युर्निशीथादर्वागेवसमाप्त्या नक्षत्रमात्रस्यपूर्वेद्युर्निशीथादर्वागेवप्रवृत्तस्योत्तरे
द्युस्तस्मादर्वागेवसमाप्त्या तिथिमात्रस्यपूर्वेद्युर्निशीथादर्वाक्प्रवृत्तस्योत्तरेद्युस्तस्मादर्वाक्समाप्ताविति सर्वथापिपरेद्यु
रेवोपवासः वर्जनीयाप्रयत्नेनेतिसप्तमीविद्धायानिषेधात् संकल्पकालमारभ्यतिथिनक्षत्रयोःसत्वात् प्रथमद्विती
यप्रकारयोःपरेद्युरात्रियोगबाहुल्याच्च रात्रियुक्तांप्रकुर्वीतेतिवचनात् यद्यपिद्वितीयेप्रकारेनक्षत्रस्यपूर्वेद्युरेवभूयस्त्वं
तथापिप्रधानभूतायाअष्टम्याःपरेद्युरेवतत् नवमीयुताष्टम्यामल्पस्यापिनक्षत्रयोगस्यसंपूर्णत्वंवाचनिकमुक्तं स्कंदपु
राणे सप्तमीसंयुताष्टम्यांभूत्वासर्क्षांद्विजोत्तम प्राजापत्यंद्वितीयेह्निमुहूर्तार्धंभवेद्यदि तदाष्टयामिकंज्ञेयंप्रोक्तंव्यासा

का०त०
२९

दिभिःपुरेतिदृतीयप्रकारेयद्यप्यष्टमी पूर्वेद्युरर्धरात्रव्यापिनी बहुरात्रियोगवतीच नक्षत्रयोगश्चस्वल्पोपिसप्तमीसंयुतायाम
पिमुहूर्तमप्यहोरात्रेयस्मिन्युक्तं हिलभ्यते वासरेवानिशायांवायत्रस्वल्पापिरोहिणीत्यादिसामान्यवचनैर्ग्राह्यत्वेनोक्तएव
तथापिसप्तमीविद्धानिषेधप्रतिप्रसवस्यविनाऋक्षंनकर्तव्यानवमीसंयुताष्टमी कार्याविद्धापिसप्तम्यारोहिणीसंयुताष्टमी
तिस्पष्टंनवमीयुतायांरोहिणीयोगाभावविषयत्वप्रतीतेः रात्रियुक्तामित्यस्यचरात्रिव्यापिन्याअर्धरात्रिव्यापिन्याश्चवि
धेर्दिवावायदिवारात्रौ नास्तिचेद्रोहिणीकलेत्येतत्समभिव्याहारात्सर्वथानक्षत्रयोगाभावविषयत्वात्सप्तमीविद्धायाव
हुभिर्वचनैर्निषेधास्यैवयुक्तेतिसर्वेषांनिबंधकाराणामभिप्रायः प्रधानभूतायाअष्टम्याअर्धरात्रव्यापिन्याः कर्मका
लव्याप्तिशास्त्रादेवसिद्धेयद्ग्राह्यत्वंतद्विषयसंकोचार्थमेवहीदंवाक्यंदिवावेत्यादियुक्तं तेनरोहिणीयोगोमुख्योनिर्णायकः
तेनद्वाविंशसंदेहेनिशीथेतद्योगः तेनापिद्वाविंशसंदेहेसप्तमीविद्धायानिषेधान्नवमीयुक्तायाश्चप्रशंसावचनाच्चनवमीयो
गःसर्वथाष्टम्यानक्षत्रयोगाभावेतस्यानिशीथयोःसर्वत्रयोगशब्देनिर्णायकइत्यनुषंगइतिसंक्षेपः यदाचरोहिणीसहिता
कृष्णामासिभाद्रपदेष्टमी अर्धरात्रादधश्चोर्ध्वंकलयापियदाभवेत् जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनीतिस्कंदाग्निं
हार्कैइत्यादिप्राक्लिखितवचनाच्चार्धरात्रेरोहिणीयोगएवाष्टमीजयंतीनतुयदाकदाचिद्योगेतदाताद्दश्यांजयंत्यामेव
जयंतीशिवरात्रिश्चैवतिजयंत्यांपूर्वविद्धायामितिविष्णुधर्मोत्तरगरुडपुराणवाक्याभ्यांसप्तमीविद्धायाःप्रतिप्रसवोन
त्वष्टमीमात्रस्यार्धरात्रसत्वेतदूर्ध्वेचरोहिणीयोगे यदापिचश्रावणस्यचमासस्यकृष्णाष्टम्यांनराधिप रोहिणीयदिल
भ्येतजयंतीनामसातिथिरित्यादिहेमाद्रिमाधवादिलिखितसनत्कुमारसंहितादिवचनेभ्यो यदाकदाचिद्रोहिणीयुक्तापि
जयंतीतदापिदिनद्वयेपरेद्युरेववाजयंत्यांवाक्यांतरैर्नवमीविद्धायाविधानात्पूर्वेद्युरेवताद्दश्यांसप्तमीविद्धायाःप्रति
प्रसवः परिशेषात् उक्तंचतथास्मिन्वचनद्वयेमाधवेन यदाप्यभिजिन्नामनक्षत्रंजयंतीनामशर्वरी मुहूर्तोविजयो
नामयत्रजातोजनार्दनइतिब्रह्मांडपुराणवचनाद्रामावतारादिप्रादुर्भावतिथिष्वपिजयंतीशब्दप्रयोगदर्शनाच्चात्र २९

45
194

प्रकरणेऽष्टमीमात्रंजयंतीशब्देनोच्यते नरापिविनाऋक्षमित्येतद्वचनैकवाक्यतयापूर्वेद्युरेवविषयोस्यसप्तमीविद्धाविधेरिति किंचास्मिन्
विषयेअष्टम्याअल्पत्वेनाग्राह्यत्वशंकानिवृत्त्यर्थंपूर्णत्वाभिधानपूर्वकंग्राह्यत्वमभिधायप्रतिप्रसवाभावसिद्धःसप्तमीयुतानिषेधो
वद्यतेपद्मपुराणे पूर्वविद्धाष्टमीयातुउदयेनवमीदिने मुहूर्तमपिसंयुक्तासंपूर्णासाष्टमीस्मृता कलाकाष्ठामुहूर्तापियदाकृष्णा
ष्टमीतिथिः नवम्यांसैवग्राह्यास्यात्सप्तमीसंयुतानहीति संयुक्तारोहिण्येतिशेषः किंचरोहिणीयोगस्यैवनवमीयोगस्यापि
फलविशेषहेतुत्वेभिहितेतद्व्याग्राह्यचाभिधानाच्च कंगतंमधुकोनामनास्वादयतीतिन्यायेनतस्यविशेषस्यनिमित्तव
शादवश्यकर्तव्यायांतावेष्टौपूतोवैश्वानरंद्वादशकपालंनिर्वपेत्पुत्रे जातइतिप्रत्यक्षश्रूयते यस्मिन्जातएतामिष्टिंनिर्वप
तिसपूतएवतेजस्व्यन्नादइंद्रियावीपशुमान्भवतीति तदिदंपूतादिकंरात्रिसत्रप्रतिष्ठावत्फलंइतिस्थितंततकिंइष्टिकर्तुःफलं
उतपुत्रस्येतिसंशयेपितुरेवेतितावत्प्राप्तंतस्यैवकर्तृत्वात्कृतिफलयोःसामानाधिकरण्यात् इतिचेन्नयस्मिन्जातेनिर्वपतिस
पूतोभवतीतिवाक्येनफलस्यपुत्रसंबंधावगमात्कृतिफलयोःसामानाधिकरण्यस्यचौत्सर्गिकत्वेनानियतत्वात्पुत्रस्यैवफलं नचात्रनि
ष्फलस्यपितुरप्रवृत्तिरितिवाच्यं पुत्रनिष्ठफलस्यपूतत्वादेस्तत्स्यकामत्वेनप्रवृत्तिसंभवादितिसिद्धांतत्वादेरिवावश्यकाम्यत्वात्तद
र्थमपिनवमीयुक्तैवकर्तव्या बुधसोमवारयोगिनतुग्राह्यत्वानभिधानाद्रोहिणीनवमीयोगेनविषयविशेषेग्राह्यत्वेनसिद्धायांफ
लातिशयमात्रहेतुत्वमात्रंतस्यैतिविशेषः तथाचस्कंदपुराणं उदयेचाष्टमीकिंचिन्नवमीसकलायदि भवेत्तुबुधवारेणप्राजाप
त्यर्क्षसंयुता अपिवर्षशतेनापिलभ्यतेवाथवानवेति प्रेतयोनिंगतानामित्यादिप्राक्लिखितंपद्मपुराणंच एवंचकिंचिद्रोहि
णीयुतायाअपिसप्तमीयुतायाअर्धरात्रिव्यापिन्यायदात्याज्यत्वंतदाकिमुवक्तव्यंशुद्धायास्ताद्दश्याःप्राक्साधितंतदितिया
तुविद्धाधिकादिनद्वयेपिरोहिणीयोगरहितासात्रिविधा अन्यतरस्मिन्नेवदिनेनिशीथेवर्तमानादिनद्वयेपिताद्दशीदिनद्वये
पितद् नीचेति तत्राद्यपक्षेयाताद्दशीसैवग्राह्यादिवावेत्यादिवाक्यात् द्वितीयतृतीयपक्षयोस्तूत्तरैव सप्तमीयुतायानि
षेधात्संकल्पादिकर्मकालव्यापित्वादिपूर्वोक्तबहुगुणलाभाच्च यत्तुअलाभेरोहिणीभस्यकार्याष्टम्यस्तगामिनी तत्रोपवा

का०त०
२२

संकल्पेवतिथ्यंतेपारणंभवेदितिगौडधृतंविष्णुरहस्यवचनंतद्रोहिणीयोगरहितायाअष्टम्याःपूर्वदिनएवनिशीथव्यापिन्याःक
दाचिदस्तमयव्याप्तेरपिसंभवाद्पोद्वलकमात्रंनतुनिर्णायकंविशेषेणेंदुसंयुतामित्यादिवचनेविरोधात् कृष्णाष्टमीस्कंदषष्ठी
त्यादिसामान्यवचनानितुविशेषवचनविरोधेअकिंचित्कराण्येव अविरोधेपरमुपोद्वलकानि एवंसतिदिनद्वयेप्यस्तमय
व्यापिन्यांजन्माष्टम्यांविष्णुरहस्यवचनेनान्यतरानिर्णयासंभवात्रिसंध्यव्यापिनीत्यादिसामान्यवचनवशाद्युत्तरस्याग्राह्य
त्वमाचार्यचूडामणिनोक्तं तदर्धरात्रस्यप्रधानकालत्वेनतद्व्यापिन्याश्चग्राह्यत्वेनसर्वसंमतनानावचनैःपूर्वोक्तोसाहसमात्रं
एवंनिर्णीतायांतिथौभविष्योत्तराद्युक्तप्रकारेणसंकल्पपूर्वकमुपवासंसपरिवारश्रीकृष्णपूजांजातकर्मनालछेदनादिमहो
त्सवंपूजापूर्वकंचंद्रार्घदानंजागरणंचपुराणश्रवणादिनाविधायद्वितीयदिनेपारणात्मकंभोजनंकर्तव्यं प्राक्लिखितसा
मान्यवचनेभ्यः अर्चयित्वोपवासेनभोक्ष्येहमपरेहनीत्यत्रसंकल्पमंत्रलिंगात्तिथ्यंतादिकालविशेषविधानाच्चतच्चपारणं
केवलाष्टम्युपवासेपारणादिनेतिथ्यनुवृत्तौतदंतेकर्तव्यं जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते कृत्वोपवासंतिथ्यंते
तथाकुर्याच्चपारणमितिविष्णुधर्मवचनात् अत्रजयंतीशब्दोजन्माष्टमीमात्रवचनस्तिथिमात्रांतेपारणविधानात् ज
न्माष्टमीरोहिणीचशिवरात्रिस्तथैवच पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणमितिभृगुवचनाच्च अत्रतिथीभयोरि
तिनरेतरयोगद्वंद्वमकृत्वैवांतशब्देनसमासस्तिथेर्भस्यांतोयस्मिन्कालेतस्मिन्नितिषड्हो बृहद्रथंतरसामाका इति
अत्रकिंद्वंद्वगर्भोबहुव्रीहिरुतात्कृत्वासइतिसंशयेद्वंद्वंकृत्वेतितावत्प्राप्तद्वंद्वतत्पुरुषयोरुत्तरपदेनित्यंद्वंद्वसमासइति
कात्यायनवचनात् तेनेतरेतरयुक्तयोःसाम्नोःषड्हसंबंधादिकंयत्रप्रयोक्तव्यंतत्रेतरदपीतिप्राप्तेब्रूमः विभाषावचनेन
द्वंद्वस्यानित्यत्वात्कात्यायनीयवचनस्यचयत्तत्ततोद्वंद्वतत्पुरुषयोरन्यत्रद्वंद्वरूपं असतोश्वान्यस्तत्रसमासकृतरूप
नियमार्थत्वात्यथावाक्चत्वक्चप्रियःपंचगवधनइत्यादौ प्रकृतेचरूपभेदाभावादनेकपदबहुव्रीह्याश्रयणंते
नक्वचित्किंचित्प्रयोक्तव्यंनप्रत्येकंद्वंद्वइतिसंक्षेपः बृहद्रथंतरसामेतिवत् पूर्वंतिथिनक्षत्रयोःपृथक्निर्देशात् २२

47
19

केवलरोहिणीव्रतस्यापिचगौडनिबंधेषुदृष्टत्वात् तेनकेवलतिथिव्रतेतिथेरंतेनक्षत्रव्रतेनक्षत्रांतइतिद्रष्टव्यं रोहिणीयुक्ताष्ट
म्युपवासेतुपारणादिनेउभयानुवृत्तौउभयांतेतत्कर्तव्यं कार्याविद्धापिसप्तम्यारोहिणीसहिताष्टमी तत्रोपवासंकुर्यात्तुतिथि
भांतेचपारणमितिपद्मपुराणात् अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचित् हन्यात्पुराकृतंकर्म उपवासार्जितंफलं तिथिर
ष्टगुणंहंतिनक्षत्रंचचतुर्गुणं तस्मात्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमितिब्रह्मवैवर्तवचनाच्च इदंचोभयांतेपारणंयदिसा
र्धयामोपरितनैकयामात्मकमहानिशातोर्वागुभयांतप्रतीक्षयाभोजनकालोलभ्यतेतदा नरात्रौपारणंकुर्यादृतेवैरोहिणीव्रता
त् तत्रनिश्यपितत्कुर्याद्वर्जयित्वामहानिशामितिगौडनिबंधोदाहृतवचनात् रोहिणीव्रतंतद्युक्ताष्टमीव्रतमेव योल्पभयो
रितिन्यायात् सर्वेष्वेवोपवासेषुदिवापारणमिष्यते अन्यथापुण्यहानिःस्याद्दृतेधारणपारणमितिब्रह्मवैवर्ते अन्यतिथ्या
गमोरात्रौनामसस्तेजसोदिवा तामसेपारणंकुर्वंस्तामसींगतिमश्नुतइतिचगरुडपुराणेयोरात्रिपारणनिषेधःसजयंतीव्रत
व्यतिरिक्तविषयइत्यर्थः यदातुतादृशेकालेउभयांतोनलभ्यतेकिंत्वेकतरांतएवतदात्रापिपारणंकर्तव्यं जयंतीप्रक्रम्य
वह्निपुराणे भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणमितिरोहिणीसंयुताचेयंविद्वद्भिःसमुपोषिता वियोगेपारणंचकुर्यु
र्नयोब्रह्मवादिनःसंयोगिकेव्रतेप्राप्तेयद्येकोपिविभुज्यते तत्रैवपारणंकुर्यादितिवेदविदोविदुरितिवचनात् तिथिनक्ष
त्रसंयोगेउपवासोयदाभवेत् पारणंतुनकर्तव्यंयावन्नैकस्यसंक्षयइतिनारदीयवचनाच्च सांयोगिकवृत्तिवचनमेतद
ग्रेवक्ष्यते यदातुमहानिशाऽव्यवहितपूर्वक्षणएवमहानिशायांवाएकतरस्याथांतस्तदामहानिशायामपिपारणंकुर्यात्
तिथ्यर्क्षयोर्यदाछेदोनक्षत्रांतमथापिवा अर्धरात्रेपिवाकुर्यात्पारणंत्वपरेहनीतिहेमाद्रिधृतवचनात् अर्द्धरात्रेमहानि
शायांतत्रैवभोजननिषेधात्प्रतिप्रसवस्योचितत्वात् अतएवचंद्रोपरागेप्युक्तं मुक्तेशशिनिभुंजीतयदिनस्यान्महानिशे
ति नक्षत्रांतग्रहणंचतिथ्यंतस्याप्युपलक्षणं प्राधान्यात्तिथिग्रहणौचित्येपियन्नक्षत्रग्रहणंतद्याःकाश्चित्तिथयःप्रो
क्ताःपुण्यानक्षत्रयोगतः सक्षांतेपारणंकुर्याद्विनाश्रवणरोहिणीमितिवचनाज्जयंतीव्रतेनक्षत्रांतोनापेक्षितस्तिथिमात्रां

तेपिमुख्यतयैवपारणंकर्तव्यमिति भमोभवेत्तन्निवृत्त्यर्थं इदंतुवचनंजयंतीव्रतेपिनक्षत्रांतप्रतीक्षायाः बहुभिर्वचनैरुक्तत्वा
दन्यत्रसांयोगिकेव्रतेइत्यादिसामान्यवचनादेकतरांतोपिमुख्यःकालइतिनक्षत्रमात्रांतेपिपारणंकर्तव्यंश्रवणद्वादशीजन्माष्ट
मीव्रतयोस्तूभयांतएवमुख्यकालइतिननक्षत्रमात्रांतेपारणंकर्तव्यमित्यत्रोभयांतस्यमुख्यपक्षत्वद्योतनार्थत्वेनव्याख्येयं
तेनान्यत्रतिथिनक्षत्रव्रतेष्वन्यतरांतोपिमुख्यःकालोत्रतूभयांतएवसः अन्यतरांतस्तुगौणः तिथिनक्षत्रनियमइतिसामान्य
वचनेतुद्वंद्वाद्यंतरसामेतिवतद्वंद्वपूर्वकउत्तरपदसमासोनभवत्येवपंचगवधनोवाकूचवकूचप्रियइत्यादिवत्तल्लिंगाभावात्
कृतेपिवाद्वंद्वेतदर्थोऽविवक्षितएवोद्देश्यविशेषणत्वादित्युक्तं गौडनिबंधेषुतुतिथ्यृक्षयोरितिवचनमर्धरात्रेततःकुर्यात्पा
रणंत्वपरेहनीतिपठित्वायद्यर्धरात्रेउभयोरन्यतरस्यवांतस्ततोऽपरेहनिदिवसएवपारणंकुर्यान्नतुकस्याप्यंतःप्रतीक्षणीयइ
तिवर्जयित्वामहानिशामित्येतदविरोधेनैवव्याख्यातं शक्यंतुहेमाद्र्युदाहृतेपादेपितदविरोधेनव्याख्यातुंव्रतांतरनिषि
द्धरात्रीपारणप्रतिप्रसवार्थत्वेन अत्रार्धरात्रेपिपारणंकर्तुमुचितंकिमुततःपूर्वरात्राविति अपिशब्दश्रवणात्स्वार्थतात्पर्य
त्यागेनान्यार्थतात्पर्यावगमात् आततायिनमायांतमपिवेदांगपारगमित्यादिवत् तेनमहानिशातःपूर्वमन्यतरांतप्रती
क्षयापिभोजनकालालाभेसामान्यरूपस्यापिरात्रिपारणनिषेधस्यातिक्रमेकारणाभावात्तिथ्यंतेचोत्सवांतेवाव्रतीकुर्वीत
पारणमितिवचनाच्चजागरांतेदिवैवपारणंकर्तव्यं महानिशातःपूर्वंमुख्यगौणान्यतरकाललाभेतुदाक्षिणात्यनिबंधेषुलि
खितान्नरात्राविति वचनेनाश्वासेपिरोहिणीव्रतशब्देनवानक्षत्रमात्रव्रतग्रहणेपितिथ्यृक्षयोरित्यादिवचनादेवैकेमुतिक
न्यायव्याख्यानान्महानिशातःपूर्वरात्रावप्यत्रपारणंसिध्यत्येवमुख्यगौणपक्षाश्रयणेन नतुव्रतांतरवद्दिवैवपारणमि
तिनियमः मदनरत्नेतुरात्रिपारणनिषेधवचनानामत्रापिप्रवृत्तिमंगीकृत्यदिवान्यतरांतालाभेदिवैव नतूभयांतप्रतीक्ष
यारात्रौदिवान्यतरांतस्याप्यलाभेतुमहानिशातःपूर्वंतल्लाभेतत्रैव महानिशायामेवतल्लाभेतत्राप्यर्धरात्रेपिवेतिवच
नात् उत्सवांतेत्यशक्तिविषयमेवेत्युक्तं अशक्तस्यतुशेषविरोधप्रसंगादुत्सवांतेवेतिवचनाच्चैकतराविगमेपिपारणंभ २३

49/194

वत्येवेति इदंजन्माष्टमीव्रतं नित्यंतावद्भवत्येव प्राजापत्यर्क्षसंयुक्ताश्रावणस्यासिताष्टमी वर्षेवर्षेतुकर्तव्यातुष्ट्यर्थंचक्र
पाणिनइतिवीप्साश्रवणात् विशेषावच्छिन्नस्यजीवस्यनिमित्तत्वेतस्यतुष्ट्यर्थमितिफलस्यचोद्देश्यद्वयस्यकथमेकस्मिन्वाक्ये
वर्षेवर्षेतुकर्तव्येतिवीप्साश्रवणात् नचवीप्सायुक्तोवसंतोहिनिमित्तत्वेनगम्यतइतिन्यायेनाष्टमीविशेषावच्छिन्नस्यजीवन
स्यनिमित्तत्वेतस्यतुष्ट्यर्थमितिफलस्यचोद्देश्यद्वयस्यकथमेकस्मिंन्वाक्येसमावेशइतिवाच्यंभिन्नरूपत्वात् एकरूपंत्वुद्दे
श्यद्वयंनिमित्तरूपंवाएकेनविधिनाचेति एकैनैवनैराकांक्षात् यस्यापितापितामहश्चेतिवत् भिन्नरूपत्वन्वेत्येवयथाजातेष्टिवि
धौजननंनिमित्तंपूतत्वादिचफलं नहिनिमित्तेनफलस्याकांक्षानिवर्त्यतेफलेनवानिमित्तस्य संभवतिह्यस्मिन्निमित्तेअनेने
दंफलंभावयेदित्येकरूपावचनव्यक्तिः तेनयदुद्देश्यद्वयान्वयनिमित्तवाक्यभेदपरिहारार्थंयच्चक्रपाणितुष्ट्यर्थंव्रतंवाक्यां
तरेणविहितंतद्वर्षेवर्षेकर्तव्यमितिवचनव्यक्त्याभिधानंहेमाद्रिस्तदयुक्तमेव निमित्तस्याविधेयत्वाच्च पूतत्वादीनांव्यर्थंवा
दकल्पनांसापेक्षाणामेवफलतेतिनफलानेकत्वं अकरणेप्रत्यवायश्रवणाच्चनित्यं तथाहिभविष्योत्तरे श्रावणेबहुलेप
क्षेकृष्णजन्माष्टमीव्रतं नकरोतिनरोयस्तु भवतिक्रूरराक्षसइति तत्रैवजन्माष्टमीप्रवृत्त्य अकुर्वन्नरकंयातियावदिंद्राश्चतु
र्दशेति स्कंदपुराणेपि शूद्रान्नेनतुयत्पापंशवहस्तस्यभोजने तत्पापंलभ्यतेपुंभिर्जयंत्यांभोजनेकृतइतितथा गृध्रमांसंख
रंकाकंश्वेनंवामुनिसत्तम मांसंवाद्विपदांभुक्तंकृष्णजन्माष्टमीदिने कृष्णाष्टमीदिनेप्राप्तेयेनभुक्तंद्विजोत्तम त्रैलोक्यसंभ
वंपापंतेनभुक्तंद्विजोत्तम ब्रह्मघ्नस्यस्कापस्यगोवधेस्त्रीवधेपिवा नलोकोमुनिशार्दूलजयंतीविमुखस्यच जयंतीवास
रेप्राप्तेकरोत्युदरपूरणं पायतेतिलमात्रंतुयमदूतैःकलेवरमित्यादि काम्यंचेदफलस्यापिश्रवणात् तथाहिस्कांदे जन्मा
ष्टमीव्रतंयेवैप्रकुर्वंतिनरोत्तमाः कारयंत्यथवालोकाल्लक्ष्मीस्तेषांसदास्थिरा स्मरणंवासुदेवस्यमृत्युकालेभवेन्मुने सिध्यंति
सर्वकार्याणिकृतेजन्माष्टमीव्रतंइतिविष्णुरहस्येपि प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी मुहूर्तमपिलभ्येतसोपोष्या
सामहाफलेत्यादि नचकादाचित्कत्वाकादाचित्कत्वयोर्विरोधात्कथमेकस्यनित्यकाम्यतेतिवाच्यं नहिकामसंयोगस्यका

दाचित्कत्वसिद्धिः फलंकिंतुकामनाप्रयुक्तमप्यनुष्ठानंतस्मिन्कृतेफललाभसिद्धिश्च तेनाग्निहोत्रदर्शपूर्णमासादिवन्नकोपि
विधः ननुयदीदंजन्माष्टमीव्रतंनित्यंतर्हितदकरणेप्रायश्चित्तश्रवणेनभाव्यं यथानित्यैकादशीव्रताकरणे अष्टम्यांचचतु
र्दश्यांदिवाभुंक्त्वैवंदवंचरेत् एकादश्यांदिवारात्रौनक्तंचैवतुपर्वणीति यद्यप्यष्टमीचतुर्दशीपर्वसमभिव्याहाराद्गताद्रि
योभोजननिषेधएकादश्यावश्यंतेतदतिक्रमइदंप्रायश्चित्तंतथापिव्रतस्याप्यभोजनसंकल्परूपस्य फलतोऽभोजनरूपत्वा
त्तदतिक्रमेपीदमेवयुक्तं अष्टम्यादौतुनित्यव्रताभावान्निषेधातिक्रमएवतत् नहिव्रतकांडेऽष्टमीचतुर्दश्योर्नक्तभोजनं
पर्वणिचदिवाभोजनंनित्यव्रतत्वेनक्वापिश्रूयते तथानित्यत्वेकदाचित्तदशक्तौप्रतिनिधिनियमेनापिभाव्यं यथैकादशी
व्रतएवएकभक्तेननक्तेनक्षीणवृद्धातुरःक्षिपेदिति अत्रोच्यते प्रायश्चित्तंतावत्प्राणायामशतंकार्यंसर्वपापापनुत्तये
उपपातकजातानामनादिष्टस्यचैवहीत्यादिभविष्यति नहिसर्वस्यविरोधनिषेधस्यकारणेप्रायश्चित्तंविशेषतउपदि
ष्टंभवतितथासत्येतद्वाक्यानर्थक्यापत्तेः प्रतिनिधिस्तुसामान्यतउक्तएवब्रह्मवैवर्ते उपवासासमर्थश्चेदेकंविप्रंतुभो
जयेत् ताव नानिवादद्याद्यद्भक्ताद्द्विगुणंभवेत् सहस्रसंमितांदेवींजपेद्वाप्राणसंयमान् कुर्याद्द्वादशसंख्याकान्यथा
शक्तिव्रतेनरइति देवींगायत्रीं तस्मान्नकोपिदोषइतिसंयोगपृथक्त्वादुभयरूपत्वंजन्माष्टमीव्रतस्य यत्तुजन्माष्टमीज
यंतीव्रतयोर्भेदसिध्यर्थंजयंतीव्रतमेवोभयरूपं जन्माष्टमीव्रतंतुकेवलंनित्यमित्युक्तंमाधवाचार्येणतज्जन्माष्टमीव्रतं
येवाइतिस्कंदपुराणेजन्माष्टमीव्रतएवफलश्रवणादयुक्तं तथाकेवलेनोपवासेनतस्मिन्जन्मदिनेमम शतजन्मकृतात्
पान्मुच्यतेनात्रसंशयइतिमाधवोदाहृतेपिवाक्येपापक्षयरूपंफलंश्रूयतएव नहिपापक्षयरूपफलश्रवणमात्रेणनि
त्यत्वंविघनानामपितदापत्तेः किंतुनिमित्तोपाधौविधानात् तदविदकंचवीप्सादि तदसमभिव्याहृतेतुपापक्षयरूपफ
लश्रवणेपिकाम्यत्वमेवविघनादिवत् नचामृतत्वंगछतीत्यवश्यापेक्षितामृतत्वंप्राप्तिलक्षणफलश्रवणात्यथा २४
पुत्रोत्पादनस्यनित्यत्वमुक्तं सोमविद्यासोमेति अत्राधिकरणेसोमविद्याप्रजनकनित्यमुतानित्यमितिसंशयस्तत्र

यावज्जीवादतुल्यनिर्देशाभावाज्ज्योतिष्टोमेनफलश्रवणाद्वसंतेवसंतेज्योतिषेतिकालविधिपरत्वादध्ययनप्रजयोस्तुविश्वजिद्व
त्स्वर्गकल्पनात् स्वर्गकामइतिसप्तमेब्रह्मवर्चसकामइत्येवमादीनांचोपनयनगतांतांफलामुपनयनस्याध्ययनांगत्वेनस्व
यंफलाजपेक्षत्वादध्ययनफलत्वमेवन्याय्यं अतःफलकामाधिकारत्वमेतेषामिति ननित्यानिकुतःवीप्सायुक्तोवसंतोहिनि
मित्तत्वंनकल्प्यंतेयावद्वसंतंनियमःसोमस्यातोवगम्यते यावद्वसंतमभ्यासकाम्यस्यैवाथनोद्यंनोद्यतेयज्ञेतेतिपदेनैवंप्रा
प्तोप्यभ्यासलक्षणातिस्माद्वयंतेतिनिमित्तविधानादागतेआगतेतस्मिन्नियमेनसोमोनुष्ठेयप्रजनयेतथापापक्षयस्यापिसर्व
दासर्वेषामपेक्षितत्वात्तत्फलत्वेननित्यत्वंस्यादेव अवश्यापेक्षितफलसाधनत्वमेवत्द्यावश्यकत्वापरपर्यायंनित्यत्वमि
तिवाच्यंयतस्तत्राप्यकरणेप्रत्यवायश्रवणादेवनित्यत्वं अमृतत्वप्राप्तिश्रवणोयन्यासस्तुफलश्रवणमपितदविरोधीत्ये
वमर्थः नतुनित्यसाधकत्वेन अतएवहेत्वंतरेणनित्यत्वेसिद्धेपापक्षयरूपफलकल्पनंतदविघातायोक्तंसर्वइतिनित्यः
अध्ययनस्यापिनस्वर्गःफलंदृष्टप्रयोजनस्यानुष्ठेयज्ञानस्यसंभवात् तत्रकृत्वनुष्ठानस्यनित्यत्वात्तद्धेतोरध्ययनस्या
पिनित्यत्वं प्रजोत्पादनमपिअमृतफलश्रवणादनुत्पाद्यताप्यास्तताअधोगछंतीतिप्रत्यवायस्मरणात्सर्वशक्तिनवइ
ति एतस्मिन्नधिकरणेयावज्जीवमग्निहोत्रंजुहोतीत्यादौनित्यकर्मणिसर्वाण्यंगान्युपसंहृत्यप्रयोगःकर्तव्यः कुतः
भावनांशस्यकथंभावस्यसर्वेरंगैःपरिपूरणेनसर्वांगोपेतस्यैवप्रधानस्यफलवत्वादितिपूर्वपक्षः सिद्धांतस्तु अग्निहो
त्रादिशब्दवाच्यंप्रधानं तस्यस्वकाक्षगतजीवननिमित्तेनान्वयात्सतिजीवनेप्रधानंतद्वत्कुमशक्यंतलोपाक्षांतरावग
तेष्वंगेष्वशक्यमंगंपरित्यज्यापिशक्यैरंगैरुपेतंप्रधानमनुष्ठेयमितिनृणांनित्यऋणश्रुतौचब्राह्मणाग्रहणस्योपलक्षण
त्वंत्रयाणांनित्याःसोमादयइतिपूर्वदृष्टोक्तिनयेनित्यकर्मणां स्वर्गकल्पनेतद्विघातप्रसंगादिति तदयंसंग्रहः
शुद्धाचसप्तमीविद्धेत्येवंजन्माष्टमीद्विधा रात्रिमात्रेपिसत्याश्चवेधोष्टम्याभवेदिह प्रत्येकंसापुनर्द्वैधापरेह्निसती
नवा तादृश्यपितथाद्वैधारोहिणीसहितानवा तत्राशुद्धाथवासिद्धापरेऽहन्यसतीयुता रोहिणीरहितावापिविम

57/19

निस्तत्वनास्तिहि यातुशुद्धाथवासिद्धापरेहनिसतीयुता रोहिण्यासाद्वियेकस्मिंस्तादृश्यथदिनद्वये आद्येपक्षेसैवयुक्तारोहिण्या
सैवसंमता यातुशुद्धाधिकासक्षयुवा तद्वियुतापिवा दिनद्वयेप्यसौपूर्वाविद्धासत्यधिकात्रिधा एकस्मिन्नह्निरोहिण्यांनिशीथेसंयु
तथवा दिनद्वयेपितस्मिन्वातद्विरुायाथतादृशी सैवग्राह्याद्यपक्षेस्यात्पक्षयोरन्ययोःपरा द्विशुद्धाधिकाहर्द्वयेपिरोहिण्यारहितात्रिधा
एकस्मिन्नह्निवर्तेतनिशीथेहर्द्वयेपिवा तत्रसत्यसतीवापिप्रथमेसैवसंमता द्वितीयेचतृतीयेचपक्षेग्राह्यापरैवसा तिथ्यंतेपा
रणंकुर्याद्दक्षश्चन्यनिथिव्रते तिथिनक्षत्रसाध्येतूभयांतेःअहानिशः भुक्तिश्चेत्संभवेद्दक्षतिथ्यंतेपारणंभवेत् उभयांतेन
लभ्यश्चेत्तस्मिन्नेकात्ययेपितत् महानिशेवसोपिस्याद्यदितत्रापिपारणा दिवैवचोत्सवांतेस्यात्तादृशेविषयेभुजिः मुख्यका
लोद्वयांतोन्यतरांतोगौणएतयोः तत्रान्यतरसंप्राप्तोतत्रैवभुजिरिष्यते दिवैकोपिनलभ्येतलभ्येतावाअहानिशः तत्राप्यन्य
तरत्तस्यान्महानिश्येवचेद्भवेत् मुख्योगौणाथतत्रापिपारयेदितिकेचन अशक्तस्तुदिवैवैकाबिगमेपिचपारयेत् जन्माष्टमी
व्रतंचेतन्नित्यंकाम्यंचसंमतं अतोशक्तःप्रतिनिधिमेकब्राह्मणभोजनं द्विगुणामादिदानंवासाविज्ञीजपमेववा सहस्रक्त्वः
प्राणस्यसंयमान्द्वादशाथवा अथनक्तैकभक्तादीन्वक्ष्यमाणान्हरेर्दिने कर्त्प्रतिनिधिंवापिकुर्यादित्येषनिश्चयः व्रतस्यसर्वथा
लोपेनादिष्टव्रतमिष्यते इयमत्रसंक्षेपतोभविष्योत्तरगरुडपुराणाद्युक्तप्रकारेणश्रीकृष्णजन्माष्टमीव्रतानुष्ठानपद्धतिः
उपवासपूर्वदिनेकृतदंतधावनोलघुभुक्रात्रौजितेंद्रियःकृत्वोपवासदिनेप्रातःस्नानादिनित्यकृत्यंवविधायसूर्यःसोमोयमः
कालःसंध्येभूतान्यहःक्षपा पवनोदिक्पतिर्भूमिराकाशंखेचरामराः ब्राह्मंशासनमास्थायकल्पध्वमिहसंनिधिमित्युक्त्वाप्रा
ङ्मुखोदर्भहस्तःफलपुष्पाक्षतयुक्तजलपूर्णमौडुंबरादिपात्रंदक्षिणहस्तेनादायमासपक्षवारनक्षत्रयुक्तांप्रातर्वर्तमानामष्टमीं
सप्तमीवातिथिमधिकरणत्वेनोल्लिख्यअमुकफलकामःपापक्षयकामोवाश्रीकृष्णप्रीतयेजन्माष्टमीव्रतमहंकरिष्ये तथा वासु
देवंसमुद्दिश्यसर्वपापप्रशांतये उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं अद्यकृष्णाष्टमींदेवीं नभश्चंद्रसरोहिणीं अर्चयि २५
त्वोपवासेनभोक्ष्येहमपरेहनि एनसोमोक्षकामोस्मियद्गोविंदत्रयोनिजं तन्मेमुंचतुमांत्राहिपतितंशोकसागरे आजन्मम

रणंयावद्यन्मयादुष्कृतंकृतं तत्प्रणाशयगोविंदप्रसीदपुरुषोत्तमेतिश्लोकचतुष्टयमुच्चार्यपात्रस्थंजलंक्षिपेत् ततःसूपलिप्तेशो
भनेविशालेप्रदेशेकदलीस्तंभनानावर्णवासःशोभितंसमंतात्स्थापितैराम्रपल्लवादियुतैर्जलपूर्णकलशैर्दीपावलिभिःपुष्पमाला
दिभिर्युतंचंदनागरुधूपितंअग्रेखड्गकृष्णछागरक्षामणिद्वारन्यस्तमुसलादियुतंगीतवादित्रनृत्यादिमांगल्योपेतंषष्ठ्यादिव्याधि
तंदेवक्याःसूतिकागृहंविधायतस्यसमंताद्भित्तिषुसकुसुमांजलीन्देवगंधर्वादीन्खड्गचर्मधरवासुदेवंदेवकीनंदयशोदा
गर्गगोपिगोपान्कंसनियुक्तान्गोधेनुकुंजरान्यक्षनांततगृहस्थंकालियंअन्यच्चसकलंतत्कालीनंगोकुलचरित्रंयथासंभवं
लिखित्वासूतिकागृहमध्येमंचकंस्थापयित्वामध्याह्नेनद्यादिजलेतिलैःस्नात्वाधरात्रेपूर्ववत्अद्यसपरिवारश्रीकृष्णपूजांक
रिष्यइतिसंकल्प्यउत्तमप्रच्छदपटावृतमंचकोपरिसमीपप्रसूप्रसुप्तनयापिश्रीकृष्णप्रतिमेपितापंकजासनयादेवक्याश्चरणौ
संवाहयंत्याश्रीप्रतिमयाचोपेतांयथाविभवंकांचनादिनिर्मितांप्रसूप्तांदेवकीप्रतिमांस्थापयेत् प्रतिमाचाष्टविधानवति
कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा वार्क्षीमणिमयीचैववर्णकैर्लिखितातथेति एवंवक्ष्यमाणाअपिप्रतिमाःतथात
त्रैवसूतिकागृहैकदेशेमंचकांतोपरिप्रसूतवरकन्यकयशोदाप्रतिमांचस्थापयेत् प्रतिमापूजनंचसर्वत्रप्राणप्रतिष्ठापु
रःसरंकर्तव्यं प्रतिमायाःकपोलौद्वौस्पृष्ट्वादक्षिणपाणिनाप्राणप्रतिष्ठांकुर्वीत तस्यांदेवस्यवाहरेःसद्भूतायांप्रतिष्ठायांप्रा
णानांप्रतिमासुच यथापूर्वंतथाभावःस्वर्णादीनांनदेवता अन्येषामपिदेवानांप्रतिमास्वपिपार्थिव प्राणप्रतिष्ठाकर्तव्यातस्यां
देवत्वसिद्धये वासुदेवस्यबीजेनतद्विष्णोरित्यनेनच तथैवहृदयेंगुष्ठंदत्त्वाशश्वच्चमंत्रवित् एभिर्मंत्रैःप्रतिष्ठांतुहृदयेपिस
माचरेत् अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच अस्यैदेवत्वमर्चायैस्वाहेतियजुरीरयन् अंगमंत्रैरंगिमंत्रैर्वैदिकैरित्यने
नच प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेत्इतिकालिकापुराणात् बीजेनमूलमंत्रेण इदंचप्रकृतविष्ण्वभिप्रायेण तेना
न्येषामपिस्वस्वमूलमंत्रोवैदिकमंत्रश्चद्रष्टव्यः बहुवचनादुभयांतेअस्याइत्यपिमंत्रः अत्रेप्युक्तंइत्यनेनचेतिशश्वद्याव
त्सकलमंत्रसमाप्तिर्हृदयेपि यदाअस्वंग्रोतहृदयेस्वर्ग्येइतिवचनाद्धृदयेदेवपूजाक्रियतेतदास्वहृदयेंगुष्ठंदत्त्वामंत्राःपठनीयाः

प्रतिमायांतुकपोलौस्पृष्ट्वेतिविशेषः अंगमंत्रैस्त्वंगदेवतास्त्रद्वावेतास्कृतस्याटः तदभावेप्रधानप्रतिमायामेवतत्स्थानिध्यार्थंप्रधा
नदेवतास्थापनानंतरं तेनात्रापिप्रतिप्रतिमंदक्षिणहस्तेनप्रतिमाकपोलौस्पृष्ट्वातत्तद्देवतानांमूलमंत्रान्वैदिकमंत्रान्वातदभा
वेप्रणवादिचतुर्थ्यंतनमोंतनामानि अस्यैइत्यस्यस्थानेत तद्देवतानामयुक्तमस्माइत्यादिस्वाहांतंचमंत्रंपठन् प्राणप्रतिष्ठां
कुर्यात् तथातत्रैवपीठाद्यपरिदेवकीसहितंवसुदेवंयशोदासहितंनंदंश्रीकृष्णसहितंबलदेवंचंडिकांचप्रतिमासुपूजयेत्
गायद्भिः किन्नराद्यैःसततपरिवृताविणुवीणानिनादैः शृंगारादर्शकुंतप्रवरकृतकरैः किंकरैःसेव्यमाना पर्यंकेस्वास्तृतेया
प्रमुदिततरमुखीपुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतिसुवदनादेवकीदिव्यरूपेतिदेवकींध्यात्वा मांचापिबालकंसुप्तं
पर्यंकेस्तनपायिनं श्रीवत्सवक्षसंशांतंनीलोत्पलदलछविमितिश्रीकृष्णंचध्यात्वाप्रणवादिनमस्यांतंपृथक्नामानुकी
र्तयन् कुर्यात्पूजांविधिज्ञश्चसर्वपापापनुत्तये देवक्यैवसुदेवायवासुदेवायचैवहि बलदेवायनंदाययशोदायैपृथक्पृ
थगितिभविष्योत्तरवचनात् ॐदेवक्यैनमइतिदेवकीं ॐवासुदेवायनमइतिश्रीकृष्णंपादावभ्यंजयंतीश्रीर्देवक्याश्च
रणांतिकानिषण्णापंकजेपूज्यानमोदेव्यैश्रियैइतिवचनात् ॐनमोदेव्यैश्रियैइतियं ॐदेवक्यैनमः ॐवासुदेवायनमः
ॐयशोदायैनमः ॐनंदायनमः ॐवासुदेवायनमः ॐबलदेवायनमः ॐचंडिकायैनमः इतितत्तन्नामभिःपीठांत
रस्थनंदेवक्यादीश्च आवाहनासनपाद्यार्घ्याचमनीयपंचगव्यस्नपनस्नानवस्त्रयज्ञोपवीतगंधपुष्पधूपदीपनैवेद्यनम
स्कारप्रदक्षिणोद्वासनाख्यैःषोडशोपचारैःपूजयेत् तत्रोद्वासनंद्वितीयदिने पूजासाकुण्यार्थंतांबूलंदक्षिणांदद्यात् भवि
ष्योत्तरएवविध्यंतरमपीछंतिकेचिदत्रैवसूरयइत्युक्त्वाकेषुचिदुपचारेषुविशेषमंत्राअप्युक्ताः यथा योगेश्वराययोगि
नांपतयेविभो योगोद्भवायनित्यायगोविंदायनमोनमः स्नाने यज्ञेश्वरायदेवायतथायज्ञोद्भवायच यज्ञानांपतयेना
थगोविंदायनमोनमः धूपादौ विश्वेश्वरायविश्वायतथाविश्वोद्भवायच विश्वस्यपतयेतुभ्यंगोविंदायनमोनमइतिनै २६

वेद्येगरुडपुराणेतु यज्ञाययज्ञेश्वराययज्ञपतयेयज्ञसंभवायगोविंदायनमोनमइत्यर्घ्ये योगाययोगेश्वरायेत्यादिस्ना

S5
19

नेविश्वायविश्वेश्वरायेत्यादिनैवेद्ये धर्मायधर्मेश्वरायेत्यादिस्वाहांतोघृताक्ततिलहोमे विश्वायविश्वेश्वरायेत्यादिशयनेसो
मायसोमेश्वरायेत्यादिचंद्रपूजायांमंत्राउक्ताः ततोगव्यघृतेनाग्नौवसोर्धाराकार्याछायाचित्तुघृतेनेति ततोजातकर्मनालछेदनं
षष्ठीपूजनंनामकर्मचसंक्षेपेणकार्यं ततश्चंद्रोदयेरोहिणीयुतंचंद्रंस्थंडिलेप्रतिमायांनाममंत्रेणसंपूज्यशंखेतोयंसमादायस
पुष्पकुशचंदनं जानुभ्यांधरणींगत्वाचंद्रायार्घ्यंनिवेदयेत् क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव गृहाणार्घ्यंशशांकेमंरोहि
ण्यासहितोममेतिमंत्रेण ततोज्योत्स्नायाःपतयेतुभ्यंज्योतिषांपतयेनमः नमस्तेरोहिणीकांतसुधामयनमोस्तुते नभोमं
डलदीपायशिरोरत्नायधूर्जटेः कलाभिर्वर्धमानायनमश्चंद्रायचारवेइतिमंत्राभ्यांप्रणमेत् ततआनघंवामनंशौरिंवैकुंठं
पुरुषोत्तमंवासुदेवंहृषीकेशंमाधवंमधुसूदनं वराहंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं दामोदरंपद्मनाभंकेशवंगरुडध्वजं
गोविंदमच्युतंकृष्णमनंतमपराजितं अधोक्षजंजगद्बीजंसर्गस्थित्यंतकारिणं अनादिनिधनंविष्णुंत्रिलोकेशंत्रिविक्रमं
नारायणंचतुर्बाहुंशंखचक्रगदाधरं पीतांबरधरंनित्यंवनमालाविभूषितं श्रीवत्सांकंजगत्सेतुंश्रीकृष्णंश्रीधरंहरिं प्र
पद्येहंसदादेवंसर्वकामप्रसिद्धये प्रणमामिसदादेवंवासुदेवंजगत्पतिमितिमंत्रैर्नामकीर्तनपूर्वकंप्रणम्यत्राहिमांसर्वलो
केशहरेसंसारसागरात् त्राहिमांसर्वदुःखघ्नरोगशोकार्णवाद्धरे दुर्गतांस्त्रायसेविष्णोयेस्मरंतिसकृत्सकृत् सोहंदेवा
तिदुर्वृत्तस्त्राहिमांशोकसागरात् पुष्कराक्षनिमग्नोहंमायाविज्ञानसागरे त्राहिमांदेवदेवेशत्वत्तोनान्योस्तिरक्षिता यद्बा
ल्येयच्चकौमारेयौवनेयच्चवार्द्धकेतत्पुण्यंवृद्धिमाप्नोतुपापंहनहलायुधेतिमंत्रैःप्रार्थयेत् ततस्तोत्रपुराणपठनश्रवणा
दिभीरात्रिशेषमतिवाह्यपरदिनेप्रातस्नानादिनित्यकृत्यंविधायपुनःसपरिवारंश्रीकृष्णंयथासंभवंसंपूज्यचंडिकायाश्च
यथासंभवंमहोत्सवंकृत्वायथाशक्तिब्राह्मणान्भोजयित्वातेभ्यःसुवर्णमेदिनीधेनुवस्त्रादियद्यदिष्टंततत्कृष्णोमेप्रीयता
मितिदत्वा यंदेवंदेवकीदेवीवसुदेवादजीजनत् भौमस्यब्रह्मणोगुप्त्यैतस्मैब्रह्मात्मनेनमः सुजन्मवासुदेवायगोब्रा
ह्मणहितायच शांतिरस्तुशिवंचास्तुइत्युक्त्वाब्राह्मणान्विसृज्यइष्टैःसहस्वयंपारणंकृत्वाव्रतंसमापयेत् क्वचित्पारणा

यांसमासेोचमंत्रावप्युक्तो सर्वायसर्वेश्वरायसर्वपतयेसर्वसंभवायगोविंदायनमोनमोइतिपारणायां भूतायभूतपतयइत्यादि
समापने प्रतिमाश्वदानानुक्तेःस्थाप्यास्ताएवचप्रतिवर्षंपूज्याः पारणातः पूर्वमुद्वासनानंतरंदेयाइतिकेचित् उद्यापनंत्वेत
स्ययावज्जीविकत्वादनुक्तत्वाच्च नास्ति उपवासदिननियमांस्तत्पूर्वोत्तरदिननियमानाशौचरजोदर्शनादिषु चानुष्ठानप्रकारा
दिएकादशीप्रकरणेवक्ष्यामः अस्यामेवाष्टम्यांरोहिणीयुतायांजयंत्याख्यायांप्रकारविशेषेणपूजायांराजसूयफलसमफ
लभोगोत्तरंविष्णुसालोक्यप्राप्तिःपुत्रधनादिसर्वकामाप्तिःसकलपातकक्षयश्चफलं प्रकारविशेषश्चवशंकद्वायांसप्तमीयु
तायांवानिशीथेरोहिणीयुतायामष्टम्यामारभ्यसंवत्सरपूर्तिंयावत्प्रतिमासंशुक्लाष्टम्यांप्रथमपूजावत्पूजा अंतेचगो
रवालंकृतसोपस्करशय्यादानंप्रतिमादानंच प्रतिमाचोत्संगावस्थितचतुर्भुजबालरूपश्रीकृष्णायादेवक्याश्चंद्रार्घ्य
दानंचसौवर्णेनराजतेनवापात्रेणशंखेनवाद्वादशांगुलविस्तारेरूप्यमयेमंडले ततःपुनःसकृष्णांदेवकींपूजयित्वा
प्रणमेद्देवजननीत्वयाजातस्तुवामनः वसुदेवात्तथाकृष्णोनमस्तुभ्यंनमोनमः सपुत्रार्घ्यप्रदत्तंमेगृहाणेमंनमोस्तुते
इत्यर्घंचतस्मैदत्वा अदितिर्देवमाताऽत्वंवसुदेवस्तुकश्यपः अजीजनत्वमीशानंवासुदेवंसनातनमितिप्रणमेत् ततोजा
गरादिस्त्रियश्चयवगोधूमांकुरगोरसादिभिर्जागरांतांपूजांकृत्वातद्रात्र्यरुणोदयेरक्तवस्त्रपरिधानाःपुष्पचंदनकुंकुमभूष
णादिभिरलंकृताःस्वांस्वांप्रतिमांगृहीत्वा मयासहनदीतीरंगच्छेयुर्महत्सरोवरे तत्रप्रतिमांस्नापयित्वास्वयंचस्नात्वा
कंचित्कालंविहृत्यप्रतिमयासहस्वंस्वंगृहंगत्वामध्वाज्यमरीचेक्षुविकारसंस्कृतंयवान्नंबंधुभिःसहभुंजीरन् एवमेवश्री
रामनवमीव्रतेश्रीरामस्यापिपूजनं मंत्रेषुअंगदेवतासुचविशेषः यथाश्रीरामचंद्रप्रीतयेश्रीरामनवमीव्रतमहंकरिष्ये
उपोष्येनवमींत्वद्ययामेष्वष्टसुराघव तेनप्रीतोभवत्वंभोसंसारात्त्राहिमांहरेइतिसंकल्प्यकोमलांगंविशालाक्षमिंद्र
नीलसमप्रभं दक्षिणांगेदशरथंपुत्रावेक्षणतत्परं पृष्ठतोलक्ष्मणंदेवंसच्छत्रंकनकप्रभं पार्श्वेभरतशत्रुघ्नौतालवृंतक २७
रावुभौ अग्रेव्यग्रंहनूमंतंरामानुग्रहकांक्षिणं इतिध्यानं श्रीरामप्रतिमासमीपेषट्कोणमध्येकौशल्यादशरथं

षट्कोणकोणेषुरांहृदयायनमः रींशिरसेस्वाहा रूंशिखायैवषट् रैंकवचायहुं रौंनेत्रत्रयायवौषट् रःअस्त्रायफट् इतिहृ
दयादीनिषट् षट्कोणबाह्याष्टदलकमलमूलेषुहनुमंतंसुग्रीवंभरतंविभीषणंलक्ष्मणमंगदंशत्रुघ्नंजांबवंतंचदलम
ध्येषुधृष्टिंजयंतंविजयंसुराष्ट्रंराष्ट्रवर्धनं अकोपंधर्मपालंसुमंत्रंचदलाग्रेषु इंद्रंअग्निंयमंनिर्ऋतिंवरुणंवायुंकुबेरंई
शानंचाष्टौलोकपालान्तदग्रेवज्रंशक्तिंदंडंखड्गंपाशमंकुशंगदांशूलंचेतितेषामायुधानिपूजयेत् श्रीरामपूजायांमूल
मंत्रः वैदिकोवावैष्णवःप्रणवादिचतुर्थ्यंतंनमोंतंनामवामंत्रः इंद्रोग्निश्चयमश्चैवनैर्ऋतोवरुणोनिलः कुबेरईशोब्र
ह्मादिर्दिक्पालास्त्रायंतुतेइतिचस्थाने रामस्यजननीचासिरामात्मकमिदंजगत् अतस्त्वांपूजयिष्यामिलोकमातर्नमो
स्तुतइतिकौशल्यापूजायां ओंनमोदशरथायेतिदशरथपूजायां इतरेषांमूलमंत्राः प्रणवादिचतुर्थ्यंतनमोंतनामा
निवा उच्चस्थेग्रहपंचकेसुरगुरौसेंदौनवम्यांतिथौलग्नेकर्कटकेपुनर्वसुदिनेमेषंगतेपूषणि निर्दग्धुंनिखिलाःपलाश
समिधोमध्वादयोध्यारयोराविर्भूतमभूतपूर्वविभवंयत्किंचिदेकंमहतिद्दैमध्याङ्क्जन्मभावना वाद्यादिवादनंच
पुष्पांजलेःपूर्वंफलपुष्पांबुसंपूर्णंगृहीत्वाशंखमुत्तमं अशोकरत्नकुसुमैर्युक्तंचतुलसीदलैः दशाननवधार्थायधर्म
संस्थापनायच दानवानांविनाशायदैत्यानांनिधनायच परित्राणायसाधूनांजातोरामःस्वयंहरिः गृहाणार्घंमया
दत्तंभ्रातृभिःसहितोममेतिमंत्रेणार्घंदद्यात् ततःपुष्पांजलिंपुनर्दत्वायामेष्वतंद्रितः पूजयन्विधिवद्भक्त्यादिवा
रात्रिंनयेद्बुधः अन्यत्सर्वंजन्माष्टमीवत् इत्थंयथामतिजन्माष्टमीनिर्णीता अथैकादशीनिर्णीयते तत्रैकाद
श्यांयेपुतादइवनेपूपवसतिश्रवणंतत्राहोरात्रावच्छिन्नाभोजनसंकल्परूपव्रतविधानंस्पष्टमेव उपवासशब्दस्यव्र
तविशेषवाचित्वात् व्रतशब्दस्यचसंकल्पविशेषवाचित्वात् यद्यपितत्रभुजिश्रवणंतानिद्विविधानि कानिचिद्व्रत
धर्मादिशब्दसमभिव्याहारवंतिकानिचित्तद्रहितानि तत्रपूर्वेषांपूर्ववत्तुल्यतैव नेक्षेतोद्यंतमादित्यमित्यादिवत्संकल्प
लक्षणया तच्छेषभूताभोजननिंदापितत्रनहिनिंदान्यायेनविधेयसत्यसंकल्परूपव्रतस्तुत्यर्थैव व्रतादिशब्द

समभिव्याहारश्चन्यानांतुस्पष्टनिषेधरूपाणांनिंदोन्नेयानिषेधानांववचनानांनिषेधपरतैव तत्रसंकल्पलक्षणायांनञः प्रधाना
ख्यातान्वयत्यागेच कारणाभावात् नचमूलांतरकल्पनागौरवपरिहारायपूर्ववचनैकवाक्यत्वार्थंतदुभयाश्रयणंयुक्तंतस्यो
त्तरभाविविनानुपस्थितत्वात् अन्यथानिषादस्थपतावपिविद्याप्रयुक्तिगौरवपरिहारायतत्पुरुषस्वीकारापत्तेः केनोपन
यनोत्तरंसर्वैरपिशक्तैः पक्षद्वयेपिपूर्वोक्तन्यायेनकालमात्रावच्छेदेनभोजनंवर्जनीयमेव भोजनशब्दश्चलोकेभ्यवहरण
विशेषेप्रसिद्धः फलादिभक्षणेभोजनशब्दप्रयोगाभावात् इतितस्यैववर्जनमितियद्यपिप्रतिभातितथापिकृष्णाविद्धैका
दश्यादिषुव्रतरूपोपवासनिषेधेभोजननिषेधवशाच्च सकलादनीयवर्जनेप्राप्तेउपवासनिषेधेतुकिंचित्भक्ष्यंप्रकल्पये
दितिवचनेनफलादिभक्षणविधानादौत्सर्गिकस्यभोजननिषेधस्यसकलादनीयाभ्यवहरणविषयताऽवसीयते एतद्व
चनवशादपिव्रतविध्यतिरिक्तः सर्वपुरुषसाधारणः सर्वैकादशीसाधारणश्चनिषेधोवश्यमंगीकरणीयः अन्यथासं
क्रांतिरविवारादिष्विव उपवासनिषेधेपि भोजनस्यैवसंभवात्किंचिद्भक्षणविधानस्यानपेक्षितत्वादनुपपत्तेः अनपे
क्षायामपिविधौसंक्रांत्यादावपितदापत्तेः सतितुनिषेधेतत्परिपालनायप्रवृत्तस्यनिवृत्तेरपिसंकल्पंविनाभावस्यप्र
जापतिव्रतनयेउक्तत्वात् इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं विशेषनियमाशक्तोऽहोरात्रंभुक्तिवर्जितइतिवच
नाद्विशेषनियमरहितभोजनद्वयवर्जनसंकल्परूपनित्यव्रतस्याप्यनुषंगात्प्रसक्तेरुपवासनिषेधातिक्रमशंकानिवृत्त
येयुक्तः किंचिद्भक्षणविधिः अतएवतस्यैवोत्तरार्द्धेनदुष्यत्युपवासेनउपवासफलंलभेदिति उपवासेननिषेधेनु
ष्ठीयमानेआनुषंगिकनित्यव्रतरूपतदनुष्ठानेननिषेधातिक्रमाद्योदोषः प्रसक्तः सनप्राप्नोति उपवासफलंभोजननिवृ
त्तिफलंनिषेधफलंचप्रत्यवायपरिहाररूपंलभेदित्यर्थः नतुविश्वजितिवत्स्वर्गः फलंकिंचिद्भक्षणेनव्रतरूपोपवासफलं
पापक्षयरूपं अकरणेप्रत्यवायपरिहाररूपंवाप्राप्नोतीति कृष्णाविद्धादावुपवासप्राप्तेरेवाभावात् प्राप्तौवानदुष्यतीत्य २८
त्येतद्विरोधात्निषिद्धत्वेहितदतिक्रमेदोषःस्यात् यद्यपिचदीक्षितोनददातीत्यत्रविधिनिषेधयोःपुरुषार्थक्रत्वर्थ

त्वेनभिन्नविषयत्वाद्वार्तिककृन्मतेतथाविकल्पाप्रसक्तिस्तथेहपुरुषार्थमात्रत्वान्नसंभवतीतिनिषेधत्वेविकल्पस्यावश्यंप्रसंगे
विद्धादिभिन्नागृहस्थादिभिन्नोवोपवासेदितिपर्युदासाएवकृष्णाविद्धादिनिषेधास्तथापितुल्यफलत्वान्निषेधोक्तिरिति तथा
चसकलादनीयादननिषेधेसतिअन्नमाश्रित्यतिष्ठंतीतिनिंदावाक्यगतोन्नशब्दोनपचेदन्नमात्मनइतिवददनीयमात्रपर
एव तत्रनिषेधः कलंजभक्षणादिनिषेधवत्स्वाभ्यन्यायेननित्यएव व्रतंतुसंयोगपृथक्त्वादुभयरूपंनित्यंकाम्यंच तस्यचोभ
यरूपस्यानिषेधस्यचैकदिनेप्राप्तौव्रतानुष्ठानेनैवनिषेधपरिपालनस्यापिसिद्धिः तथाचोक्तंकालादर्शादिषुसिद्धिस्तस्या
र्थतोव्रतइति निषेधपरिपालनस्यातिथ्युपक्रम्यअनारभ्यश्रूयतेनकलंजंभक्षयेदित्यादि तत्रनभक्षयेदित्यादिसंनि
धिवशान्नञ्धातोरन्वयेसत्यभक्षणमितिपर्युदासःसंपद्यते तथासतिनेक्षेतोद्यंतमितिवत्संकल्पोविधेयः तस्यचाभ
क्षणसंकल्पस्यविश्वजिन्यायेनस्वर्गः फलत्वेनकल्पनीयइतिचेन्मैवं पदैकदेशस्यधातोःपरेणान्वेतुमयोग्यत्वाद्विधा
यकस्यनञ्पदेनान्वयाद्रागतःप्राप्तिमनूद्यनिषेधोविधेयः नचानिषेधोव्यर्थः भक्षयेदितिचभक्षणभावनायाःप्र
वर्तनागम्यते तत्रासंबंधेनविधिनातद्विपरीतनिवर्तनाप्रतीतिनिर्वर्तनान्यथानुपपत्याचतद्विषयीभूतभक्षणव्या
पारस्यप्रत्यवायपरत्वंकल्प्यं अतस्तत्परिहारः प्रयोजनमितिसर्वैरेवंजातीयकेवर्जनीयमिति उपक्रमावसानपरिछि
न्नत्वाद्व्रतस्य चपूज्यतिथिगामित्वात्पूर्वापरादिनयोः कृष्णपक्षेचगृहस्थानांकेवलनिषेधस्यप्राप्तेपूर्वदिनेस्वतःशा
स्त्रतोवाविद्धत्वेनकृष्णपक्षेचोपवासनिषेधादुपवासनिषेधास्त्विति फलादिभक्षणेननिषेधपरिपालनंउत्तरदिनच
व्रतानुष्ठानंशक्तपक्षे अशक्तंतुप्रतिकर्तक्रियानुकल्पादिवक्ष्यते एवंनिषेधेव्रतेचपृथक्स्थितेनिषेधेतावत्पक्षद्व
येपिसर्वेषामाधिकारः अष्टवर्षाधिकोमर्त्योह्यशीतिर्नचपूर्यते योभुंक्तेमामकेराष्ट्रेविष्णोरहनिपापकृत् समेव
ध्यश्चदंड्यश्चनिर्वास्योदेशात्समइतिनारदीयवचनात् गृहस्थोब्रह्मचारीचआहिताग्निस्तथैवच एकादश्यां
नभुंजीतपक्षयोरुभयोरपीतिअग्निपुराणाच्च यत्तुगृहस्थोब्रह्मचारीचयोऽश्नंस्तपश्चरेत् प्राणाग्निहोत्रलोपे

5
19

नअवकीर्णःभवेत्तुसइति आहिताग्निरनड्वांश्चब्रह्मचारीचतेत्रयः अश्नतएवसिध्यंतिनैषांसिद्धिरनश्नतामितिवचनं तत्र
पूर्वंतावदनवच्छिन्नात्स्यानुष्ठीयमानमासोपवासादिविषयं अनश्नन्नितिवर्तमानकालवाचिप्रत्ययेनाभ्यासप्रतीतेः कौ
टसाक्ष्यंतुकुर्वाणइत्यादौतथाव्याख्यानात् अतएवचशरीरंपीड्यतेयेनशुभेनापिचकर्मणा अत्यंतंतन्नकर्तव्यमनायासः
सउच्यतेइत्येवंलक्षणकोनायासोगृहस्थगुणेषूक्तः अतएवभारतेपिभीष्मवचः मासपक्षोपवासेनमन्यंतेयत्तपो
जनाः आत्मतंत्रोपघातस्तुनतपस्तत्सतांमतमिति तत्तन्मासोपवासादिविधिविरोधात्सर्वेषांतन्निषेधायोगादत्राप्य
धिकारिविशेषापेक्षायांपूर्ववाक्यैकवाक्यत्वादात्मतंत्रोपघातइत्युक्तत्वाच्चश्रौतस्मार्ताधिकारिप्रतीतिः तंत्रशब्दस्य
प्रधानकर्मवाचित्वेनपौराणधर्मापेक्षयाबलवतांधर्माणांबाधप्रसंगस्यतादृशतपोनिषेधहेतुत्वप्रतीतेः ततश्च
ब्रह्मचारिगृहस्थाभ्यांप्राजापत्यादावपिक्रियमाणेत्र्यहंप्रातस्त्र्यहंसायंत्र्यहमयाचितं त्र्यहंपरंचनाश्नीयात्
प्राजापत्यंचरन्द्विजइतिमनूक्तःस्वस्थानवृद्धिपक्षस्थानविवृद्धिपक्षोनाश्रयणीयः संलग्नोपवासत्रयापत्तेःकिंतुदंडअ
हःप्रातरहर्नक्तमहरेकमयाचितं अहःपराकंतत्रैकमेवंचतुरहौपरौ अनुग्रहार्थंविप्राणांमनुर्धर्मभृतांवरः बालवृद्धातु
रेष्वेवंशिशुकृच्छ्रमुवाचहेति वसिष्ठोक्तोदंडकलितवदावृत्तिपक्षःकलितवत्पक्षएवेति प्राणाग्निहोत्रलोपेनेतित्वर्थ
वादमात्रं नहितद्यद्भक्तंप्रथममागच्छेत्तद्धोमीयमित्याद्युपासनाविशेषरूपप्राणाग्निहोत्रविधौपरिषेचनादिपूर्वं
प्राणायस्वाहापानायस्वाहेत्यादिभोजनांगपंचाहुत्यादिरूपप्राणाग्निहोत्रविधौवाभोजनंविधीयतेयेनतल्लोपेना
वकीर्णितावस्तुतःस्यात् किंतुरागप्राप्तभोजनाश्रितोगुणविशेषःफलार्थंतदंगंवाविधीयते तत्रविधिशान्निषेधव
शाद्वाभोजनाभावेआश्रयाभावादेवप्राणाग्निहोत्रस्याप्यननुष्ठानेनविधिविरोधःकश्चित् नचप्राणाग्निहोत्रशब्देना
श्रयीभूतभोजनमात्राभिधानात्सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमित्यस्यचतन्नियमविधित्वव्याख्यानात्तस्य २९
चोत्तराश्रमिणोश्चतुर्थकालिकैकभुक्तादिविधानेनब्रह्मचारिगृहस्थमात्रविषयत्वादस्त्येवतल्लोपेतयोर्दोषइतिवा

च्यं तस्यापिसामान्यरूपस्यनियमविधेर्विशेषविधिनिषेधाभ्यांकाम्यविधिनाबाधसंभवात् अनेनैवाभिप्रायेनैतदनंतरमेव
बौधायनेनप्रायश्चित्तादन्यत्रेत्युक्तं तस्मात्तेनशूर्पेणजुहोतितेनह्यन्नंक्रियतइत्यत्रशूर्पेणहोमेकर्तव्येऽन्नकरणताहेतुर्हिश
ब्दश्रुतेः हेतुनिर्देशश्चव्याप्तिमंतरेणानुपपद्यमानोव्याप्तिंगमयतियद्यदन्नकरणंतत्तद्धोमकरणमितितितोदर्व्यादयःशूर्पेण
सहविकल्प्यंतइतिप्राप्तिभ्रमः शूर्पस्यहोमसाधनत्वंश्रौतंतृतीयश्रुतातदवगमात् दर्व्यादीनांत्वानुमानिकमतोसमबलत्वान्न
विकल्पः नचवेदेनोच्यमानहेतुमपेक्षतेवेदस्यैवतत्रप्रमाणत्वादर्थवादस्त्वपेक्षितःप्ररोचनार्थत्वात्तस्मादर्थवादत्वमितिह्य
न्नंक्रियतइतिवद्धेत्वर्थवादएवायं हेमाद्रिस्तुमरणांतिकानशनादिरूपतपोविषयमिदं प्राणाग्निहोत्रलोपेनाग्निहो
त्रलोपिनइत्यर्थः ततश्चोत्तराश्रमिणोस्तादृशेनतपसाप्राणलोपेतद्वतेचवामनप्रस्थस्याग्निहोत्रलोपेपिनदोषः
प्राणेषुविरक्तस्यकर्माशक्तस्यैवतद्विधानात् पूर्वाश्रमिणोस्तुप्राणानामग्निहोत्रादिकर्मणांचलोपेमहान्दोषः धर्मा
र्थकाममोक्षाणांप्राणाःसंस्थितिहेतवः तन्निघ्नताकिंनहतंरक्षताकिंनरक्षितमिति कुर्वन्नेवेहकर्माणिजिजीविषे
च्छतंसमाइतिवचनाभ्यांप्राणकर्मणामबाधनीयत्वप्रतिपादनामित्याह उत्तरंतुवचनमुपवासेनाशक्तत्वाध्ययनाग्नि
होत्रादिस्वकर्मानुष्ठानस्वलोपेप्रतिनिधि एकत्वेचाप्रसक्तेकाम्योपवासस्यनित्यस्यचमुख्याहिताग्न्यादेर्निषेधार्थं यु
क्तंचश्रौतविरोधेस्मार्तस्याननुष्ठानमेवगौणपक्षेवानुष्ठानं तत्रकाम्यस्यगौणपक्षेणानुष्ठानासंभवादननुष्ठानमेव नित्य
स्यतुयथाकथंचिदनुष्ठानं अनुड्ग्रहणंचदृष्टांतत्वेनामुमेवार्थंद्योतयती यत्तुकाम्यस्यनित्याद्दुर्बलीयस्यान्नित्यस्यैव
बाधोनतुकाम्यस्येतिहेमाद्रिणोक्तं तदयुक्तं परस्परविरोधेहितत् श्रौतबाधप्रसंगेतुकाम्यस्यापिस्मार्तस्यदुर्बलत्वमे
वेति अतएवात्मनोनोपराधंकुर्याद्यथाकर्मसुसमर्थःस्यादितिप्रस्तुत्यापस्तंबेनेदमुक्तमाहिताग्निरनड्वांश्चेत्यादिय
त्तकश्चिदाहिताग्निरनड्वांश्चेत्यनशननिषेधादाहिताग्न्यादीनांसंपूर्णभोजनेप्राप्तेप्राणाग्निहोत्रलोपेनेतिप्राणाद्या
हुतिलोपएवदोषश्रवणात्तावन्मात्रंतेषामुपवासदिनेभवतीत्याह तदयुक्तं भोजनस्यैवाप्राप्तौतदंगलोपेदोषस्या

प्रामाणिकत्वात् अश्वंतएवसिध्यंतीतितत्तदसाधारणकार्यसिद्धेः पंचाङ्गुतिमात्रेणासंभवाच्च व्रतेतुपक्षद्वयगतेपिनित्येगृह
स्थव्यतिरिक्तानामाबालवृद्धातुराणामधिकारः एकादश्यांनभुंजीतपक्षयोरुभयोरपि वनस्थयतिधर्मोयंशुक्लामेवसदा
गृहीतिदेवलवचनात् यथाशुक्लातथाकृष्णाद्वादशीमेसदाप्रिया शुक्लागृहस्थैःकर्तव्याभोगसंतानवर्धिनी मुमुक्षु
भिस्तथाकृष्णातेनतेनोपदर्शितेतिभविष्यत्पुराणाच्च एवंच अष्टवर्षाधिकोमर्त्योह्यपूर्णाशीतिवत्सरः एकादशीमुप
वसेत्पक्षयोरुभयोरपीतिकात्यायनवचनमपिगृहस्थव्यतिरिक्तविषयमेव अष्टवर्षग्रहणंचविधिनिषेधगतमुपनीतो
पलक्षणं स्मार्तनियमाःप्राङ्मुखोभुंजीतउदङ्मुखोमूत्रंकुर्यादित्येवमादयःकिंजननप्रभृतिवर्तंतेजातेयदाशङ्कयात्तद
त्यर्थः उत्तोपनयनप्रभृतीतिसंशये अनग्निसाध्यत्वादमंत्रसाध्यत्वाच्च एषांशक्तमात्राधिकारित्वमितिप्राप्तेब्रूमः उप
नयनप्रभृतिस्युरिति कुतस्स्मरणात् स्मरतिउपनयनादिनियमइति प्रागुपनयनात्कामचारवादभक्षादिति च तस्मा
दुपनयनात्पूर्वंनास्तिनियमइतिउपनीतस्यैवाधिकारइति अपिवाविदतुल्यत्वादुपायेनप्रवर्तन्निति न्यायात् एतेषुच
वचनेषुधर्मोयंकर्तव्यःउपवसेदित्यादिशब्दैर्व्रतप्रतीतिः तेनयथाशुक्लातथाकृष्णाविशेषोनास्तिकश्चनेत्यादीनि
बहूनिशुक्लकृष्णोभयैकादशीविषयाणीतिवचनानिगृहस्थातिरिक्तविषयाण्येव भवंतिपूर्ववचनैस्तत्रैवोपसं
हारात् सर्वोपसंहारःसत्यपिपक्षद्वयोपादानेकृष्णायामपियउपवासःसगृहस्थव्यतिरिक्तानामित्येवंकृष्णाअधि
कारिसंकोचानर्हत्वोपिकटाक्षेणेवशुक्लामेवसदागृहीत्येतत्समभिव्याहारेणतथातात्पर्यग्रहणात् तथाहि षड्विं
शतिरित्येवब्रूयादितिवदेवकारोपनिबंधादनुवादत्वंतावदस्यप्रतीयते तद्यथाभवतितथापूर्ववाक्यार्थोवर्णनीयः
उभयैकादश्याश्चवनस्थादिविषयत्वेनोपसंहारेगृहस्थस्यशुक्लाप्राप्तेतिवाक्यमेदेवकारार्थक्यापादकंशुः
क्लामेवसदागृहीत्यस्यविधित्वमवश्यंस्यात् तेनयथाषट्त्रिंशतिरित्येवब्रूयादित्यस्यानुवादस्यसामर्थ्यान्न ३०
चतुस्त्रिंशदितिब्रूयादित्यस्यवैशेषिकसमस्तर्कप्रतिषेधत्वं यथाचनगिरागिरेदितिब्रूयादितिनिषेधस्यानु

वादत्वोपैरंकृत्वेकियमित्यस्यगिरापदकार्येइरापदविधिपरत्वंगम्यते तथैतस्याप्युपसंहारस्यशुक्लामेवेत्यनुवादबलात्कृ
ष्णाविषयत्वंएतेनोभयैकादशीविषयाणांवचनानांदेवलादिवचनैर्वनस्थादिविषयत्वेनानुपसंहारेसामान्यवचनैरेवगृ
हस्थस्यापिशुक्लाप्राप्तेःशुक्लामेवसदागृहीत्यस्यतत्प्राप्त्यर्थत्वायोगादेवकारेणकृष्णापरिसंख्यानार्थतावक्तव्या साच
त्रिदोषायुक्ता उपसंहारेतुसामान्यवचनैर्गृहस्थस्यशुक्लाप्यप्राप्तेति अश्वमेधेश्रूयते अश्वस्तूपरोगोमृगस्तेप्राजा
पत्याइति तत्राप्यश्वस्यचतुस्त्रिंशद्वंक्रयः तेचवङ्काणिपार्श्वास्थीनितत्रैवैशेषिकोमंत्रःपठितः चतुस्त्रिंशद्वाजिनोदेव
बंधोर्वंक्रीरश्वस्यस्वधितिःसमेतीति तत्रेदंप्रैषवचनंचतुस्त्रिंशद्ब्रूयात् षट्विंशतिरित्येवब्रूयादिति अत्रेदंचिंत्यते
किंनिषिद्धमपिवैशेषिकंपक्षेस्यादुतप्राकृतमेवेतितत्रवचनबलाद्वैशेषिकंनित्यवद्बाधित्वाप्राकृतमेववक्तव्यमितिप्रा
प्तेब्रूमः षट्विंशतिरित्येवब्रूयादित्येतदेवकारोपहतशक्तित्वान्नप्राकृतविधौसमर्थं अनेनचतुस्त्रिंशदित्येवप्रतिषे
धंविधत्ते तस्मिन्नप्रतिषिद्धेषड्विंशतिरित्येवब्रूयादितिचोदकप्राप्तानुवादएव प्रतिषेधश्चप्राप्तिपूर्वकःप्राप्तिश्चतत्
शास्त्रमंतरेणसंभवतीत्यवश्यंवैशेषिकवाक्यस्यप्रापकप्रकरणपाठात्तुनितरामंगीकर्तव्यं अंगीकृतेचतस्मिन्विहि
तप्रतिषिद्धत्वाद्विकल्पइतिसिद्धांतः तस्मात्स्यर्थमेवशुक्लामेवसदागृहीतिवचनंपृथग्विधिरूपमेव एवकारश्चा
योगव्यवच्छेदार्थइतियत्केश्चिदुक्तंतन्निरस्तं वेदितव्यं उपसंहरिष्यत्कयुक्त्याकृष्णाकटाक्षेणेवोपसंहारात्सामान्य
वचनंतैरेवगृहस्थस्यापिशुक्लायाःप्राप्तेः शुक्लकृष्णयोःप्राप्तिपरिसंख्यानपेक्षणात् सत्यपिचपरिसंख्यार्थत्वेए
वकारेणतस्याएवश्रुतत्वादत्रत्येवावयंत्यतएवोह्यंतीतिवत्त्रेदोष्याप्रसक्तेः वस्तुतस्त्वनुवादएवायमित्युक्त
मेवकारादेकवाक्यत्वाच्चेति अतएववनस्थयतिग्रहणमपिगृहस्थेतरमात्रस्यब्रह्मचार्यादेरप्युपलक्षणंएवंभवि
ष्योत्तरेब्रह्मचारिणोपिग्रहणंएकादश्यांनभुंजीतपक्षयोरुभयोरपि ब्रह्मचारीचनारीचशुक्लामेवसदागृहीति
नारीविधवा एकादश्यांविनारंडायतिश्चवरमहामते पच्यतेह्यंधतामिस्रेयावदाभूतसंप्लवमितिनारदीयात्॥

यतिसमभिव्याहाराद्गाङ्गेयैकादशीविषयमेतत् विधवाग्रहणाच्च सभर्तृकाया गृहस्थवच्छुक्लायामेवोपवासः तत्रविशेषोवक्ष्य
ते यानिचसंक्रान्त्यामुपवासंचकृष्णैकादशिवासरे चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृहीत्यादीनिस्वतंत्राणिबहूनिपुत्र
वद्गृहीणः कृष्णैकादश्युपवासनिषेधकानिवचनानिगृहस्थमात्रस्यकृष्णायामुपवासनिषेधेपिपुत्रिणस्तस्यप्रत्यवा
यातिशयार्थानीतिमाधवः तत्तुकृष्णैकादश्युपवासविधेर्वनस्थादिविषयत्वेनोपसंहारेगृहस्थमात्रस्यैवतदप्राप्तेरयुक्त
मिति शयनीबोधिनीमध्यवर्तिकृष्णैकादशीविषयाणीतिहेमाद्रिः तत्रहिशयनीबोधिनीमध्येयाकृष्णैकादशीभवे
त् सैवोपोष्यागृहस्थेननान्याकृष्णाकदाचनेतिस्मृत्यंतरवचनेनगृहस्थस्योपवासोविहितः पुत्रवद्गृहिणः सोपिनिषि
ध्यतइति यद्यपिचानयोपपत्त्यापुत्रवद्गृहिणंप्रतिकाम्यकृष्णैकादश्युपवासनिषेधकतापि अमीषांवचनानांप्राप्नोति
तथापिसानभवति पुत्रवांश्चसभार्यश्च बंधुयुक्तस्तथैवच उभयोः पक्षयोः काम्यंव्रतंकुर्यात्तुवैष्णवमितिहेमाद्र्युदा
हृतवचनेकाम्योपवासस्यकृष्णायामपितंप्रतिविधानात् वस्तुतस्तुनैतेनिषेधाः शास्त्रप्राप्तार्थप्रतिषेधेविकल्पप्र
संगात् सामान्यरूपोहिविधिर्विशेषरूपेणापिहिनिषेधेनोपजीव्यत्वात्तुल्यबलत्वेस्युक्तंदशमेनार्षयंवृणीतइत्यादौन
ञ्प्रतिषेधः पर्युदासोवेतिसंशयेप्रतिषेधइतितावत्प्राप्तंमुख्यार्थलाभात्पर्युदासपक्षेलक्षणापत्तेस्तथाचचोदकप्रा
प्तंवरणंअनृचप्रभृतिभिरेवप्रतिषिध्यतइतिविकल्पः ननुसामान्यविषयस्यविशेषविषयस्यप्रतिषेधस्यातुल्यबल
त्वाद्युक्तोबाधोनविकल्पइति नैवंतद्विशेषरूपंबाधकंयान्निरपेक्षं आत्मानंलभतेयथाशरपदशास्त्रंनहिशरादिविधिः
कुशादिप्राप्तिमपेक्षतइति अस्यतुप्राप्त्यपेक्षत्वात्प्राप्तेश्चशास्त्रीयत्वाद्भवत्येवविकल्पइतिप्राप्तेब्रूमः नित्यवद्भुत
योविधिप्रतिषेधयोः पक्षेप्यत्यंताविद्यमानमिथ्यात्वकल्पनादत्यंतायुक्तोविकल्पइति वरंलक्षणयापिपर्युदासाश्र
यणमित्यादिविचारितमितिततएवबोध्यंप्रतिनिषेधः प्रदेशनेत्यत्र किंतुनञः पुत्रवद्गृहिपदान्वयेनपुत्रवद्गृहिभिन्नः सं ३१
क्रांतिरविवारग्रहणकृष्णैकादश्यादिषूपवासंकुर्यादित्येवंपर्युदासाः संतोवनस्थादिवाक्यसमानार्थाएव ततश्चैतदेक

वाक्यत्वात्तद्वाक्यगतंगृहिपदंपुत्रवद्गृहिपरमेव शयन्यादिवचनंचतस्यैवकृष्णाविशेषेप्रतिप्रसवार्थं तथावक्ष्यमाणलक्ष
णानांवैष्णवानामपिपुत्रवद्गृहिणांकृष्णायाःप्रतिप्रसवोनारदीये नित्यंभक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः पक्षेपक्षेचक
र्तव्यमेकादश्यामुपोषणमिति तत्वसारेपि यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा तुल्येतिमन्यतेयस्तुसवैवैष्णवउ
च्यतेइति याचरविवारेर्कसंक्रान्त्यामेकादश्यांसितेतरे पारणंचोपवासंचनकुर्यात्पुत्रवान्गृहीत्यादिवचनैर्निषेधेनपर्यु
दासेनरविवारसंक्रान्त्यादौपुत्रवद्गृहिण उपवासस्यनिवृत्तिःक्रियतेसातन्निमित्तस्यनतुतदधिकरणकमात्रस्यैकादश्यादि
निमित्तकस्यापि तन्निमित्तोपवासस्यनिषेधोयमुदाहृतः प्रयुक्त्यंतरयुक्तस्यनविधिर्ननिषेधनमिति जैमिनिवचना
त् अतएवभृगुभानुदिनोपेतासूर्यसंक्रान्तिसंयुता एकादशीसदोपोष्यापुत्रपौत्रप्रवर्धिनीतिविष्णुधर्मोत्तरे रविवारा
दिनिमित्तोपवासविधिश्चसंवर्तेनोक्तः अमावास्याद्वादशीचसंक्रान्तिश्चविशेषतः एताःप्रशस्तास्तिथयोभानुवा
रस्तथैवच अत्रस्नानंजपोहोमोदेवतानांचपूजनं उपवासस्तथादानमेकैकंपावनंस्मृतं पारणमितितत्तन्निमित्तमेव
निषिध्यते यश्चसप्तवारानुपोष्यैवसप्तधासंयतेंद्रियः सप्तजन्मकृतात्पापात्तत्क्षणादेवनश्यतीति वचनविहितशनि
वारप्रयुक्तोपवासांगभूतंतदुत्तरदिनेप्राप्तंरविवारप्रयुक्तं नित्यंद्वयोरयनयोर्नित्यंविषुवतोर्द्वयोः चंद्रार्कयोर्ग्रहणयोः
व्यतीपातेषुपर्वसु अहोरात्रोषितःस्नानंश्राद्धदानंतथाजपं यःकरोतिप्रसन्नात्मातस्यस्यादक्षयंफलमितिसंक्रान्त्यादि
पूर्वदिनविहितोपवासांगभूतंतदुत्तरदिनेप्राप्तंसंक्रान्त्यादिनिमित्तकं तन्निषेधेनचतदंगपूर्वदिनोपवासनिषेधएवप्रदृष्टव्यः
तथाचशनौरवौचसंक्रान्तिदिनतत्पूर्वदिनयोश्चपुत्रवद्गृहिणोपवासोनकार्यइतिपर्यवस्यति यश्चव्यतीपातेकृतेश्राद्धे
पुत्रीनोपवसेद्गृही श्राद्धंकृत्वातुयोविप्रोनभुंक्तेपितृसेविते हविर्देवानगृह्णंतिकव्यानिपितरस्तथा इत्यादिवचनैः
पित्रादिसांवत्सरिकदिनेउपवासनिषेधः सोपिरविवारादिवत्तन्निमित्तोपवासविषयत्वासंभवेप्यावश्यकैकादश्याद्यु
पवासव्यतिरिक्तकाम्यादिविषयः क्रत्वर्थतयाश्राद्धशेषभोजननियमस्यविधानान्निषेधोपवासविध्योश्चरागप्राप्ता

65
1

का०त० नियतपुरुषार्थभोजनविषयत्वान्न्यायेनतत्रभोजनस्यैवोचितत्वेपिवचनवशादेवैवंतथाचवृद्धयाज्ञवल्क्यः उपवासोयदानि
३२ त्यःश्राद्धंनैमित्तिकंभवेत उपवासंतदाकुर्यादाघ्रायपितृसेवितमिति स्कंदपुराणे यस्मिन्दिनेपितुःश्राद्धंमातुर्वाथभ
वेद्गृहे तस्मिन्नेवदिनेतातभवेदेकादशीव्रतं अन्यद्वापिव्रतंस्कंदतदाकार्यंचतच्छृणु नलुप्यतेयथाश्राद्धमुपवासोथवा
गुह इतिविप्रतिपन्नेर्थेउपायःपरमोमतः दृष्टोहितार्थःसर्वेषांनराणांशिखिवाहन श्राद्धंदिनंसमासाद्यउपवासोय
दाभवेत् तदाकृत्वातुवैश्राद्धंभुक्तशेषंचयद्भवेत् तत्सर्वंदक्षिणेपाणौगृहीत्वान्नंशिखिध्वज अवजि दनेनाथते
नश्राद्धंशिखिध्वज पितॄणांतृप्तिदंज्ञातंव्रतभंगोनविद्यतइतिअतएवविधितोभोजनेपिश्राद्धशेषभोजननियम
रूपांगलोपाच्छ्राद्धस्यवैगुण्यंनास्तीत्येतमर्थंज्ञापयतिशिवरहस्यं श्राद्धंकृत्वातुयःशेषंनान्नमश्नातिमंदधीः लो
भान्मोहाद्भयाद्वापितस्यतन्निष्फलंभवेदिति अत्रलोभमोहभयानांउपादानंज्ञापकं अत्रचश्राद्धशेषभोजनविधौराग
प्राप्तंभोजनंनियम्यतेलाघवात् सतुगमनवत्नत्वपूर्वंभोजनंविधीयते सचनियमःपुरुषार्थभोजनश्रितोपिप्रकरणा
त्श्राद्धांगंस्त्र्युपगममांसभक्षणादिनिषेधवत् तस्यचोपकाराकांक्षायांशेषशब्देनप्रतिपत्त्यर्हत्वकृतार्थश्राद्धीयद्रव्यो
पस्थानात्तस्यचद्वितीयासंयोगाद्दृष्टत्वाच्चतत्प्रतिपत्तिरेवोपकारः तेनसर्वस्यश्राद्धीयद्रव्यस्यावैगुण्यायप्रतिपाद्यत्वा
त्सर्वजातीयंश्राद्धीयमन्नंयजमानेनभोक्तव्यंमांसेतुनिमंत्रितवद्यजमानस्यननियमः देवान्पितॄन्समभ्यर्च्यखाद
न्मांसंनदोषभागि त्युक्तत्वात् अमावास्यायांतुसाग्निकेनामाषमांसमित्यादिव्रताविरोधेनैवश्राद्धीयमन्नंभोक्तव्यं
इतरथाव्रतलोपेनपृस्थालीपाकवैगुण्यापत्तेः अभोजनेश्राद्धवैगुण्येपिश्रौतत्वेनतस्यबलवत्त्वात् श्राद्धानधिकारि
साग्निकविषयत्वेनैवव्रतस्यशेषभोजनस्यापिव्रताविरोधिशेषविषयत्वेनसंकोचोपपत्तेः एकाग्निसाध्यानामपिच
श्रौतत्वंवैतानोपासनाःकार्याःक्रियाश्चश्रुतिचोदनादित्यत्रोक्तं उदाहृताचमिताक्षरायांश्रुतिरहरहःस्वाहाकु ३२
र्यादन्नाभावेचकेनचिदाकाष्टादिति आश्वलायनसूत्रवृत्तिकारादिभिश्चतत्रतत्रसौत्रेणश्रुत्याकर्षेणोपपादि

नांसौत्राणांकर्मणांश्रौतत्वं पूर्वेद्युःपितृभ्योददातीतिश्रुतिस्तुपिंडपितृयज्ञाभिप्राया यद्यपिचकात्यायेनश्राद्धवि
षयत्वेनापिमासिमासिवोशनमितिश्रुतिरुकृष्टातथापिसार्थवादरूपानस्पष्टरूपा अतएवनकेषामपिश्राद्धेश्रौतत्व
व्यवहारः फलार्थेनचतत्तदस्त्यागरूपेणव्रतेनकाम्यत्वात्प्रधानत्वाच्चततृश्राद्धीयद्रव्यशेषभोजनबाधः इदंचसर्वंश्रा
द्धशेषभोजनस्यप्रतिपत्तिकर्मत्वमभ्युपेत्योक्तंवस्तुतस्तु प्रयोजनापेक्षशेषगुणकर्मार्थकर्मैवतत् आनुषंगिकात्प्रतिप
त्तिःअभिप्रतिपक्षेतदर्थत्वानुपपत्तेः इतरपक्षेष्वनुमतिर्वैय्यर्थ्यापत्तेश्च अन्यदीयस्यान्यत्रविनियोगेह्यनुमतिरपे
क्ष्यतेनतुतस्यैवविनियोगोपयोगिनिसंस्कारे इतरांगापेक्षयायजमानभोजनलोपेबहुदोषश्रवणमनुकल्पविधानं
चसाक्षादंगत्वंद्योतयति द्वितीयातुधात्वर्थकर्मत्वाभिप्राया तेनसर्वजातीयशेषभोजनेपिनकिंचित्तश्राद्धस्यवै
गुण्यमितिस्तुतरांव्रताविरोधेनतत्सिद्धं अतएवचतीर्थयात्रांगघृतश्राद्धेघृतमात्रेणापिशेषभोजनसिद्धिःशिष्टाचा
रइत्यलंप्रसंगागतेनप्रकृतमनुसरामः जीवत्पतिकास्त्रीपत्युरनुज्ञयैवनित्यंकाम्यंव्रतादिकुर्यात् भार्याभर्तुर्मतेनैवव्र
तादीन्याचरेत्सदेतिकात्यायनवचनात् तथाचपत्यौजीवतियानारीउपवासव्रतंचरेत् आयुष्यंहरतेभर्तुर्नरकंचैव
गच्छतीतिविष्णुवचनेयत्तस्याउपवासमात्रेदोषश्रवणंतत्पत्यनुज्ञाभावविषयं अतएवस्पष्टंमार्कंडेयपुराणे नारीख
ल्वननुज्ञाताभर्त्रापित्रासुतेनवा निःफलंतुभवेत्तस्यायत्करोतिव्रतादिकमिति तेनविधवापियदधीनातदनुज्ञयैव
सर्वंकुर्यात् अतएवसामान्यतएवनिषेधोनस्वातंत्र्यंक्वचित्स्त्रियाइति पुष्पालंकारादिपरित्यागश्चव्रतांगत्वेनव
क्ष्यमाणस्त्वनाश्यकोजीवत्पतिकायाः पुष्पालंकारवस्त्राणिगंधधूपानुलेपनं उपवासेनदुष्यंतिदंतधावनमंजन
मितिमनुवचनात् अत्रस्त्रियाइतिप्रकृतं तथाच रजोदर्शनेपिभोजनवर्जनंतरंगभूताश्चशारीरानियमाःस्वयमेव
कर्तव्याःदेवपूजादिकंअन्येनकारयितव्यं एकादश्यांनभुंजीतनारीदृष्टेरजस्यपीतिपुलस्त्यवचनात् अत्रचयद्यपि
निषेधमात्रोपादानंतथापिसंप्रवृत्तेपिरजसिनत्याज्यंद्वादशीव्रतमितिऋष्यशृंगवचनेव्रतमप्युपात्तं मत्स्यपुराणे

अंतरातुरजोयोगेपूजामन्येनकारयेत इति व्रतांतरेष्वपिप्रारब्धेष्वेवमेव प्रारब्धदीर्घतमसांनारीणांयद्रजोभवेत् नतत्रापि
व्रतस्य स्यादुपरोधः कदाचनेतिसत्यव्रतवचनात् यद्यपीदंदीर्घकालव्यापिमासोपवासाद्येकप्रयोगविषयमाभातितथा
पिवर्षादिपर्यंतमभ्यासेनफलसाधनेष्वपिप्रारब्धेषुशक्यतएवयोजयितुं एवमंतरेत्यपि एवमाशौचेपिसर्वैरेकादशीव्र
तमभ्यस्तप्रारब्धंपूर्ववत्कर्तव्यमेव यत्तुतदंगभूतदानहोमादिअनन्यसाध्यंतदंतेकर्तव्यं सूतकेपिनरःस्नात्वाप्रणम्य
मनसाहरिं एकादश्यांनभुंजीतव्रतमेवंनलुप्यते मृतकेपिनभुंजीतएकादश्यांसदानरः द्वादश्यांतुसमश्नीयात्स्ना
त्वाविष्णुंप्रणम्यच पूर्वसंकल्पितंयत्तुव्रतंसुनियमव्रतैः तत्कर्तव्यंनरैःश्राद्धंदानार्चनविवर्जितमिति वराहपुराणव
चनात् अत्रस्नात्वेतिशारीरनियमोपलक्षणं मनसेतिकायिकपूजामन्येनकारणीयत्वमुक्तं यद्वासापिदानादि
वदंतएवकर्तव्या तथाचमत्स्यपुराणे सूतकांतेनरःस्नात्वापूजयित्वाजनार्दनं दानंदत्वाविधानेनव्रतस्यफलमश्नुत
इतिदानग्रहणेनब्राह्मणभोजनमपिगृह्यते तस्याप्यन्नदानरूपत्वात् अन्यत्रापि सूतकात्प्राक्समारब्धमनेका
हंतुयद्व्रतं कायिकंतत्तुकुर्वीतननुदानार्चनंजपं सूतकाहेतुयत्किंचिद्दानाद्यंतरितंभवेत् सूतकानंतरंत्वद्धितत्क
र्तव्यमतंद्रितैरिति तथावैश्यानांशूद्राणांचद्विरात्राधिककालव्यापीउपवासोनभवति वैश्याःशूद्राश्चयेमोहा
दुपवासंप्रकुर्वतेत्रिरात्रंपंचरात्रंवातेषांव्युष्टिर्नविद्यते इतिप्राच्यालिखितवचनात् व्युष्टिःफलं उपवासासाम
र्थ्येत्वनुकल्पोभवति सचद्विविधः कर्तुःक्रियायाश्च क्रियायानक्तैकभक्तादिः कर्तुःपुत्रभार्यादिः तत्रक्रियांप्रति
प्रधानभूतेधिकारांशेप्रतिनिध्यभावान्कर्त्रंशस्यचतांप्रतिगुणभूतत्वात्प्रथमंकर्त्रनुकल्पस्तस्याप्यसंभवेक्रियानुक
ल्पइतिन्याय्यं तथापिसतांबूलमतांबूलंसभोजनमभोजनं साहारंचनीहारंच चतुर्विधमुपोषणं तथा एकभक्ते
नयोमर्त्यौउपवासव्रतंचरेदित्यादिषुनक्तैकभक्तपयोमूलाद्याहारादिषुलिंगेषु प्राणभृत्उपदधातीत्यत्रलिंगप्र
करणप्राप्तमंत्रानुवादेनेष्टकोपधानविधौएतस्यैवप्राणान्दधातीत्यत्रार्थवादोपपत्तयेप्राणभृच्छब्देनमंत्रानुवा

दस्तत्र अयंपुरोभुवस्तस्यप्राणोभौवायनइत्येकस्यैवमंत्रस्यप्राणभृतेपिछन्निति यायेनसर्वेमंत्राःप्राणभृच्छब्देनलक्ष्यंतेएव
यजमानोस्तूपरइतितद्धसाछयेनयजमानशेषोयूपेलाक्षणिकस्तद्वदेकभक्तादिष्वपिउपवासशब्देलाक्षणिकः अहोरात्राव
छिन्नाभोजनविशिष्टसाकल्येन्द्रढेरितिबोध्यं उपवासशब्देनतदुक्तिप्रयोजनमाह यथेतिलिंगसमवायस्ताद्दश्याभ्या
मुपवासशब्दप्रयोगोयथामुख्योपवासधर्मातिदेशार्थस्तथाउपवासासमर्थस्त्वित्यादिषूपवासशब्देनतेषामपिग्रह
णार्थोपि तेनयथापुत्रिकासुतादिषुगौणपुत्रशब्दप्रयोगवशात्तेषामप्यभाविस्वर्यालस्यत्वद्यपुत्रस्येतिविधिःप्रवर्तते
तथागौणस्याप्युपवासस्यस्वयंकर्तुमसामर्थ्येकर्त्रनुकल्पाविधिः तत्रोपवासानुकल्पः कूर्मपुराणे एकभक्तेननक्ते
नबालवृद्धातुरःक्षिपेत् पयोमूलफलैर्वापिननिर्द्वादशिकोभवेत्इति पयादीनांपश्चादभिधानेप्येकभक्ताद्यपेक्ष
यामुख्यत्वंद्रष्टव्यं अतएववायुपुराणे नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचाज्यं यत्पंचगव्यंयदि
वापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेति नक्तस्याप्यसंभवेऽयाचितमेकनक्तंवाक्रमेण तथाचमार्कंडेयं एकभक्तेन
नक्तेनतथैवायाचितेनच उपवासेनदानेननननिर्द्वादशिकोभवेदितिउपवासस्यमुख्यस्यैवात्रग्रहणमन्येषामुपवा
सतुल्यत्वप्रदर्शनार्थं दानदातयथाशक्ति अतएववायुपुराणे अथवाविप्रमुख्येभ्योदानंदद्याद्यथाशक्तितइति
ब्रह्मवैवर्तेदानेविशेषोप्युक्तः उपवासासमर्थश्चेदेकंविप्रंतुभोजयेत् तावद्धनानिवादद्याद्यद्भक्त्याद्विगुणंभवेत्
सहस्रसंमितांदेवींजपेद्वाप्राणसंयमान् कुर्याद्द्वादशसंख्याकान्यथाशक्तिव्रतेनरइति फलग्रहणंमूलादेरप्यु
पलक्षणं क्षीरग्रहणंचदध्यादेःहविष्याणिचव्रतगोचराण्युक्तानि सर्वनिबंधोदाहृतायांस्मृतौ हैमंतिकंसितास्वि
न्नंधान्यंमुद्गास्तिलायवाःकलायकंगुनीवारावास्तूकंहिलमोचिका षष्टिकाःकालशाकंचमूलकंकंबुकेतरत् ल
वणेसैंधवेसामुद्रेगव्येचदधिसर्पिषी पयोनुघृतसारंचपनसाम्रहरीतकी तिंतिडीजीरकंचैवनागरंगकपिप्पली
अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षतइति अन्यत्रापि नारिकेलफलंचैवकदलीलवलीतथा आम्रमामलकंचै

वपनसंचहरीतकीं व्रतांतरेप्रशस्तंचहविष्यंमन्यतेबुधाइति अत्रचपयोमूलाद्याहारनक्तैकभक्तादीनामुपवासासंभवेविधानेन
तत्कार्थापत्यवगमादितिदेशादेकभक्तेनयोमर्त्यउपवासव्रतंचरेत् इत्यादिनामातिदेशाद्योपवासधर्मप्राप्तेरेकादश्यांनिराहा
रइत्यादिसंकल्पवाक्येवाप्याहारःफलाहारोनक्ताहारइत्यादिरूहःकर्तव्यः एतादृशमनुकल्पमपिस्वयंकर्तुमसमर्थस्तु पुत्रा
दिनोपवासंकारयेत् असामर्थ्येशरीरस्यव्रतेचसमुपस्थिते कारयेद्धर्मपत्नींवापुत्रींवापिनयाचितां भ्रातरंभगिनींशिष्यं
ब्राह्मणंदक्षिणादिभिरितिस्कंदपुराणात् ब्राह्मणंपुरोहितं तदभावेअन्यमपि स्वयंकर्तुमशक्तश्चेत्कारयेतपुरोधसा
हिरण्यंदक्षिणांदद्यात्स्वशक्त्याचानुरूपतइतिवायुपुराणात् पुत्रादिश्चपित्राद्यर्थोपवासकर्तुरुपवासफलंभवति
नचतस्मैदक्षिणादेया तथाचकात्यायनः पितृमातृस्वसृभ्रातृगुर्वर्थेचविशेषतः उपवासंप्रकुर्वाणःपुण्यंशतगुणंभ
वेत् दक्षिणानात्रदातव्याशुश्रूषाविहिताहिसा नारीचपतिमुद्दिश्यएकादश्यामुपोषिता पुण्यंशतगुणंयायादिति
बोधायनोमुनिः उपवासफलंतस्यापतिःप्राप्नोत्यसंशयं राज्यस्थक्षत्रियार्थेवएकादश्यामुपोषितः पुरोधास्तुक्षत्रि
योवाद्वयोस्समतितीरितं उपवासफलंताभ्यांसमग्रंसमवाप्यते मातामहादीनुद्दिश्यएकादश्यामुपोषणे कृतेतेतुफलंवि
प्राःसमग्रंसमवाप्नुयुः कर्तादशगुणंपुण्यंप्राप्नोत्यत्रनसंशयः समुद्दिश्यकृतंसोपिसंपूर्णफलमाप्नुयादिति वायुपुरा
णोक्तंच पुरोधसेदक्षिणादानंतदर्थिनेद्रष्टव्यं एवमावश्यकस्यैकादशीव्रतस्यशक्तेनबुद्धिपूर्वकंमरणेप्रायश्चित्त
मुक्तं माधवाद्युदाहृतायांस्मृतौ अष्टम्यांचचतुर्दश्यांदिवाभुक्त्वैवंचरेत् एकादश्यांदिवारात्रौनक्तंचैवमुपर्वणीति
तादृशस्मृत्यंतरेपि अर्केपूर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेदिति अशक्त
स्याकामतश्चार्द्धकल्प्यं यद्यप्येवंप्रायश्चित्तंरविवाराष्टम्यादिसाहचर्यान्निषेधातिक्रमेप्रतीयते तथापिव्रतातिक्र
मेपीदमेवभवतिउभयातिक्रमस्यापिभुक्तेत्यनेनवक्तुंशक्यत्वात् नहिवायावतोश्वान्प्रतिगृह्णीयात्तावतोवारुणान्

7/19

चतुःकपालान्निर्वपेदिति प्रतिगृह्णीयाद्दद्यादित्यर्थः अत्रलौकिकेश्वदानेनिमित्तेइयमिष्टिरुतलौकिकवैदिकोभययोरुतवैदि
कएवेतिसंशये आद्यस्तावत्प्राप्तः ननकेसारिणोददातीतिस्मृत्यामित्रादिभ्यःप्रीत्यादाननिषेधात्प्रायश्चित्तेष्टिस्तदानइति
तन्न वरुणोवाएतवगृह्णातियोश्वंप्रतिगृह्णातीतिदृष्टदोषोवरुणग्रहवाक्येनोच्यते नचलौकिकस्यास्यतद्धेतुत्वंलो
वैद्यकसंहितायांप्रमितमिति अतएवनद्वितीयः किंच लौकिकेपुरुषार्थत्वंवैदिकेक्रत्वर्थत्वं नचैकस्योभयार्थत्वंवैरूप्या
दुपपद्यतेतस्माद्वैदिकेएवस्यादियं अस्तिहिवैदिकमश्वदानंवउवादक्षिणेतिश्रवणादितिवरुणेष्टेर्वैदिकलौकिकोभ
याश्वदाननिमित्तकत्वेक्रत्वर्थत्वपुरुषार्थत्ववैरूप्यवदत्रव्रतनिषेधोभयातिक्रमनिमित्तकत्वेकिंचिन्नैमित्तिकविधेर्वैरू
प्यं व्रतनिषेधयोर्द्वयोरपिपुरुषार्थत्वेननैमित्तिकस्यापिकेवलपुरुषार्थत्वात् इदंचैकादशीव्रतंकाम्यमपि यदिच्छेद्विष्णु
सायुज्यंश्रियंसंततिमात्मनः एकादश्यामुपवसेत्पक्षयोरुभयोरपि एकादशीसमंकिंचित्पापत्राणंनविद्यते स्वर्गमो
क्षप्रदाह्येषाराज्यपुत्रप्रदायिनी सुकलत्रप्रदाह्येषाशरीरारोग्यदायिनीत्यादिकूर्मनारदीयादिपुराणवचनात् अत्रचपूर्वो
क्तोद्विविधोनुकल्पः प्रारब्धेनतुनित्यवदुपक्रमेदितिन्यायात् काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेचसः काम्येष्वुपक्रमा
दूर्ध्वंकेचित्प्रतिनिधिंविदुरितिस्मृतेश्च उपवासस्वरूपंचकात्यायनवसिष्ठाभ्यांदर्शितं उपावृत्तस्यपापेभ्योयस्तुवासो
गुणैःसह उपवासःसविज्ञेयःसर्वभोगविवर्जितइति पापानिवक्ष्यमाणव्रतांगनिषेधविषयामैथुनानृतवदनादयः गु
णावक्ष्यमाणव्रतांगविधिविषयाःशौचजपध्यानादयः सर्वस्यवायुपर्यंतस्यापिभोगोभ्यवहारः ततश्चपापनिवृत्त्यागु
णाधिष्ठानेनचसहितोनिराहारस्यवासोवस्थानमुपवासइत्युक्तंभवति इदंचफलसाधनस्योपवासस्यस्वरूपं उपवासपदा
र्थस्तुस्मृतिपुराणव्यवहारेरूढ्यानिराहाराव्यवस्थानमात्रं अतएवसंकल्पवाक्येतावन्मात्रमुपात्तं एकादश्यांनिराहा
रःस्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युतेति तत्रव्रताहेवर्जनीयानितावत् हारीतः पतितपाखं
डिनास्तिकादिसंभाषणानृताश्लीलादिकमुपवासादिषुवर्जनीयमिति आदित्यदिनयत्पुरुषार्थतयासर्वदानिषिद्धंतद

पिक्रत्वर्थतयानिषेधायसंगृह्यते अतएवव्रताधिकारिस्क्रमंतुः विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः निषिद्धसेवनंनित्यंव
र्जनीयंप्रयत्नतइति विष्णुधर्मेषु असकृज्जलपानंचदिवास्वापंचमैथुनं तांबूलचर्वणंमांसंवर्जयेद्व्रतवासरइतिमांसादिनि
षेधः पारणदिनेपारणांतंव्रतंज्ञेयमितितस्यापिव्रतदिनत्वोक्तिसंभवात् नतुप्रधानदिनेतत्रप्रसक्त्यभावात् अतएववृद्धः
विष्णुवचनं वर्जयेत्पारणेमांसंव्रताहेप्यौषधंसदैति अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः हविर्ब्राह्मणकाम्याचगुरोर्वच
नमौषधमितिवचनात्प्रसक्तमौषधद्वयमपिमांसंव्रतदिनेवर्जयेदित्यर्थः अत्यशक्तौदेवलेनजलपानमभ्यनुज्ञातं उपवासः
प्रणश्येत दिवास्वापाच्चमैथुनैः अत्यये चांबुपानेननोपवासःप्रणश्यतीति अत्ययेजलपानंविनाप्राणात्यये इद्धवसि
ष्ठः उपवासेतथाश्राद्धेनकुर्याद्दंतधावनं काष्ठेनेतिशेषः अतएवतद्देवनिंदति दंतानांकाष्ठसंयोगोहंतिसप्तकुलानि
चेति वाक्यशेषाच्च विधेरिवनिषेधस्यापिविशेषपरतायुक्तैव तेनअलाभेवानिषेधेवाकाष्ठानांदंतधावनं पर्णादिना
विशुध्येतजिह्वोल्लेखःसदैवचेतिपैठीनसिवचनात्पर्णादिना अलाभेदंतकाष्ठानांनिषिद्धायांतथातिथौ अपांद्वा
दशगंडूषैर्विदध्याद्दंतधावनमितिव्यासवचनाद्द्वादशगंडूषैर्दंतशोधनंकार्यमेव कूर्मपुराणे बहिर्ग्रामांत्यजान्सूतिं
पतितंचरजस्वलां नस्पृशेन्नाभिभाषेतनेक्षेतव्रतवासरइति विष्णुरहस्ये स्मृत्यालोकनगंधादिस्वादनंपरिकीर्तनं
अन्नस्यवर्जयेत्सर्वंग्रासानांचाभिकांक्षणं गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनं व्रतस्थोवर्जयेत्सर्वंयच्चान्यद्बलराग
कृत्इति मैथुनंचात्रप्रकरणेअष्टांगमपिनिषिध्यते तथाचब्रह्मचर्यंव्रतांगंविधायाहदेवलः स्त्रीणांतुप्रेक्षणात्स्पर्शा
त्ताभिःसंकथनादपिविपद्यतेब्रह्मचर्यंनदारेष्वृतुसंगमादिति क्वचित्तुस्वदारेषुतुसंगमादितिपाठस्तत्रस्वदारेषुसंगमा
द्रेतोविसर्गादेवब्रह्मचर्यंनश्यतिनस्पर्शादिनेत्यर्थः मैथुनस्याष्टांगानिचास्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं
संकल्पोध्यवसायश्चक्रियानिर्वृत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणइत्युक्तानि गुणाश्च तज्जप्यजपनध्यान
तत्कथाश्रवणादिकं तदर्चनंचतन्नामकीर्तनश्रवणादयः उपवासकृतामेतेगुणाःप्रोक्तामनीषिभिः ब्रह्मचर्यमहिंसाच ३५

7/19

सत्यमामिषवर्जनं व्रतेष्वेतानिचत्वारिवर्जनीयानिसूरिभिरित्यादिविष्णुधर्मोक्तंदेवलादिप्रतिपादिताः आमिषंमांसं आमि
षत्वेनस्मृत्यंतरेप्रगिगणितानिवा यथा आमिषइतिपानीयंगोवर्जंक्षीरमामिषं मसूरमामिषंसस्येफलेजंबीरमामिषं अ
न्यत्रापि आमिषंशक्तिकाचूर्णमामिषंमाहिषीपयः आमिषंइतिपानीयमारकांजीनालंतथामिषमित्यादि अथदशम्यां
वर्जनीयानि स्कंदपुराणे कांस्यंमांसंमसूरंचक्षौद्रंचानृतभाषणं पुनर्भोजनमत्याशंदशम्यांपरिवर्जयेत् कूर्मपुराणे
कांस्यंमांसंमसूरंचचणकान्कोरदूषकान् शाकंमधुपरान्नंचत्यजेदुपवसन्स्त्रियं उपवसन्नितिवर्तमानसामीप्ये अनं
तरदिनेउपोष्यन्नित्यर्थः मत्स्यपुराणे कांस्यंमांसंसुरांक्षौद्रंतैलंवितथभाषणं व्यायामंचप्रवासंचदिवास्वापंचमैथु
नं तिलपिष्टंमसूरंचदशम्यादिषुवर्जयेत् दशमीप्रकृत्यनारदीये अक्षारलवणाःसर्वेहविष्यान्ननिषेविणः अवनीत
लशयनाःप्रियासंगविवर्जिताः अन्यत्रापिदशम्यामेकभक्तंतुकुर्वीतनियतेंद्रियः आचम्यदंतकाष्ठंतुखादेत्तदनंतरं
ततश्चानंतरंविप्रब्रह्मचारीजितेंद्रियः रात्रिंनयेत्ततःपश्चात्प्रातःस्नात्वासमाहितःउपवासंतुसंकल्प्यमंत्रतंजलंपि
बेत् इदंचदशम्यामेकभक्तंकाम्यैकादशीव्रतविषयं सायमाद्यंतयोरह्नोःसायंप्रातश्चमध्यमे उपवासफलंप्रेप्सुर्ज
ह्याद्भक्तचतुष्टयं अथनित्योपवासीचेत्सायंप्रातर्भुजिक्रियां वर्जयेन्मतिमान्विप्रःसंप्राप्तेहरिवासरे इतिविष्णुर
हस्यवचनात् दशम्यामेकभक्तस्तुमांसमैथुनवर्जितः एकादशीमुपवसेत्पक्षयोरुभयोरपिइति देवतास्तस्यतुष्यंति
कामितंचास्यसिध्यतीतिदेवलवचनाच्च अत्रचैकभक्तश्रवणेपिविशेषणीभूतद्वितीयभोजननिवृत्तिरेवानृतवचना
दिनिवृत्तिवदंगतयाविधीयते नतुविशेष्यरूपंभोजनमपिलाघवात्पूर्ववचनैकवाक्यत्वाच्च अन्येपिदिनत्रयनियमानि
त्यव्रतेनावश्यकाः तथाचब्रह्मवैवर्ते इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं विशेषनियमाशक्तोऽहोरात्रंभुक्तिवर्जि
तः निगृहीतेंद्रियःश्रद्धासहायोविष्णुतत्परः उपोष्यैकादशींपापान्मुच्यतेनात्रसंशयइति कात्यायनोपि शक्तिमा
न्स्तुपुनःकुर्यान्नियमंसविशेषणमिति दशम्यांचरात्रावुपवासमुद्दिश्यनियमाग्रहीतव्याः तदुक्तंब्रह्मवैवर्ते प्राप्तेह

ग्दिनेसम्यक्विधायनियमंनिशि दशम्यामुपवासस्यप्रकुर्याद्विष्णवंव्रतमिति संकल्पमंत्रश्चैकादश्यांनिराहारइत्यादिरुक्तः सं
कल्पेचविशेषोदेवलेनोक्तः गृहीत्वौडुंबरंपात्रंवारिपूर्णमुदङ्मुखः उपवासंतुगृह्णीयाद्यथासंकल्पयेद्बुधइति औडुंबरंता
म्रमयंपात्रं यथासंकल्पयेद्यत्फलंकामयेततत्फलकामइत्युल्लिखेदित्यर्थः संकल्प्यचपुष्पांजलिर्देवायार्पणीयः इत्यु
क्त्वार्यततोविद्वान्पुष्पांजलिमथार्पयेदितिवराहपुराणात् मंत्रपूतजलपानेचविशेषः कात्यायनेनोक्तः अष्टाक्षरे
णमंत्रेणत्रिर्जप्तेनाभिमंत्रितं उपवासफलंप्रेप्सुः पिबेत्पात्रगतंजलमिति संकल्पश्चार्द्धरात्रादुपर्यनुवर्तमानयाद
शम्यायुक्तायामेकादश्यांचेदुपवासस्तदैकादश्याआद्यंयामचतुष्टयंत्यक्त्वाकर्तव्यः उदयादुपर्यपिदशम्यायुक्ता
यांचेत्तदारात्रौ अर्थात्तदुत्तरंपूजादि तथाचनारदीये दशम्यासंगदोषेणपर्धरात्रात्परेणतु वर्जयित्वातुरौया
मान्संकल्पार्चनयोस्तदा विद्धोपवासेनश्चंस्त्क्त्वादिनंत्यक्त्वासमाहितः रात्रौसंपूजयेद्विष्णुंसंकल्पंचतदाचरे
दिति पूजाप्रकारश्चब्रह्मपुराणे एकादश्यामुभेपक्षेनिराहारःसमाहितः नानापुष्पैर्मुनिश्रेष्ठ विचित्रंमंडपंशुभं कृ
त्वासावरणंपश्चाज्जागरंकारयेन्निशीति तत्रैव एकादश्यामुभेपक्षेनिराहारःसमाहितः स्नात्वासम्यग्विधानेनसो
पवासोजितेंद्रियः संपूज्यविधिवद्विष्णुंश्रद्धयासुसमाहितः पुष्पैर्गंधैस्तथाधूपैर्दीपैर्नैवेद्यकैःपरैः उपचारैर्ब
हुविधैर्जपहोमैःप्रदक्षिणैः स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः दंडवत्प्रणिपातैश्चजयशब्दैस्तथोत्तमैः ए
वंसंपूज्यविधिवद्रात्रौकृत्वाप्रजागरं यातिविष्णोःपरंस्थानंनरोनास्त्यत्रसंशयइति बृहन्नारदीयेपि देवस्यपु
रतःकुर्यात्जागरंनियतोव्रती गीतैर्वाद्यैश्चनृत्यैश्चपुराणश्रवणादिभिः तत्रैव पंचामृतेनसंस्नाप्यएकादश्यां
जनार्दनं द्वादश्यांपयसास्नाप्यहरिसारूप्यमश्नुतइति अथद्वादशीकृत्यंतन्नियमाश्चकात्यायनः प्रातःस्नात्वा
हरिंपूज्यउपवासंसमर्पयेत् अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसादसुमुखोभव ज्ञानदृष्टिप्रदोभव पार
णांतुततःकुर्याद्यथासंभवमार्गतइति यथासंभवत्वंचब्राह्मणभोजनतद्दक्षिणादानबंधुसाहित्येषु तथाचबृह ३६

7/19

न्नारदीये ब्राह्मणान्भोजयेच्छक्त्यादद्याद्वैदक्षिणांतथा ततःस्वबंधुभिःसार्धंनारायणपरायणः कृतपंचमहायज्ञःस्वयं
भुंजीतवाग्यतइति शातातपोपि उपवासंद्विजःकृत्वाततोब्राह्मणभोजनं कारयेत्सगुणस्तेनउपवासोहिजायतइति पारणं
चनैवेद्यतुलसीयुक्तेनान्नेनकर्तव्यं तदुक्तंस्कंदपुराणे कृत्वाचैवोपवासंतुयोश्नातिद्वादशीदिने नैवेद्यंतुलसीमिश्रंहत्या
कोटिविनाशनमिति तत्रवर्ज्यानिब्रह्मांडपुराणे कांस्यंमांसंसुरांक्षौद्रंलोभंवितथभाषणं व्यायामंचप्रवासंचदिवास्वा
पमथांजनं तिलपिष्टंमसूरंचद्वादशैतानिवैष्णवः द्वादश्यांवर्जयेन्नित्यंसर्वपापैःप्रमुच्यते तथा कांस्यंमांसंसुरांद्यू
तंव्यायामंक्रोधमैथुने हिंसामसत्यंलौल्यंचतैलंनिर्माल्यलंघनं द्वादश्यांद्वादशैतानिवैष्णवःपरिवर्जयेत् बृहस्पतिरपि
दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् कात्यायनः द्वादश्यांपारणंकुर्याद्व
र्जयित्वाद्युपोदकामित्यादि इदंचसर्वंनियमजातंकाम्यव्रतविषयं पुनर्भोजनमध्वानंभारमायासमैथुने उपवासफ
लंहन्युर्दिवानिद्राचपंचमीति कांस्यंमांसंमसूरंचचणकंकोरदूषकाः शाकंमधुपरान्नंचहन्युरष्टाविमेफलमित्यादिव
चनेषुफलग्रहणात् पुनर्भोजनसाहचर्याच्च पुनर्भोजनस्यचाहत्यकाम्यव्रतएवसायमाद्यंतयोरह्नोरित्यादिनावर्जित
त्वात् इदंपारणंयदापारणदिनेद्वादशीभोजनपर्याप्तातदाभोजनप्राक्कालीनंसकलंकृत्यमरुणोदयेकृत्वाद्वादशीमध्य
एवकर्तव्यं तथाचस्कंदपुराणे कलाद्वयंत्रयंवापिद्वादशीयत्रदृश्यते स्नानार्चनादिकंकर्मतदारात्रौविधीयतइति रात्रा
वित्युक्तिप्यरुणोदयएवकार्यं तथाचनारदीये अल्पायामथविप्रेंद्रद्वादश्यामरुणोदये स्नानार्चनक्रियाःकार्याजप
होमादिसंयुताइति पद्मपुराणे यदाभवतिअल्पापिद्वादशीपारणादिने उषःकालेद्वयंकुर्यात्प्रातर्माध्याह्निकंतदेति एते
षुचवचनेषुहोमशब्देनादिशब्देनचौपासनवैश्वदेवादिकंस्मार्तमेवगृह्यतेसादृश्यात् नतुश्रौतंपौराणधर्मानुरोधेन
श्रौतकालबाधस्यान्याय्यत्वात् तदनधिकृतविषयत्वेनसावकाशत्वाच्च यस्यचावश्यकमरुणोदयाधिककालसा
ध्यंतेनतद्दिनेसंख्यादिसंकोचेनाप्यावश्यकंकृत्वाद्वादशीमध्येपारणंकर्तव्यं महाहानिकरीह्येषाद्वादशीलंघितान

रैः करोतिधर्महरणमस्नातिवसरस्वतीतिपद्मपुराणेद्वादशीलंघनेदोषस्मरणात् अस्नातेत्यत्राधिकरणेक्तः तेनतस्यां
स्नानमकृत्वालंघितासरस्वतीयथाधर्महरतितथाभोजनेनलंघिताद्वादश्यपीत्यर्थः तेननद्यंतरेउत्तीर्यस्नानंसरस्व
त्यांतुस्नात्वोत्तरणमितिसूचितं यत्तुतदादिवाभिसंबंधात्तदंतमपकर्षःस्यादितिजैमिनिसूत्रस्यक्रमवत्कृचकृत्येषु
यद्यंत्यमपकृष्यते तदासर्वापकर्षःस्यादन्यथाक्रमबाधनादितिकातीयवचनस्यचोपन्यासेनभोजनापकर्षेतत्पूर्वभाविनै
सर्गिकनित्यकृत्यापकर्षस्यन्यायसिद्धत्वमेवहेमाद्रिकालादर्शकालादिभिरुक्तंतदैश्वदेवादेरन्नसंस्कारत्वेनभोजनार्थ
त्वात्तदभावेपिवादर्शपौर्णमाससोमयागवद्वाचनिकपौर्वापर्यमात्रसद्भावात्तदपकर्षेकथंचिद्भवतुनामप्रातरौपासन
होमदेवपूजादेस्तुतदभावात्तदपकर्षतदयुक्तमेवेतिवाचनिकएवायमर्थइत्येवयुक्तं नहिकालपौर्वापर्यकृतस्याप्यार्थिक
पौर्वापर्यस्यानुष्ठानांगत्वं येनानपकर्षेतल्लोपनिमित्तवैगुण्यापत्त्यान्याय्योपकर्षःस्यात् प्रत्युतापकर्षएवकाललोपाद्वै
गुण्यं अतएवपशूनांसहत्वेआश्विनग्रहणोत्तरकालानुरोधेनसवनीयस्यैवप्रथममुपकारणंनतुप्रकृतिदृष्टपौर्वापर्यमा
तदादीति अग्नीषोमीयेपशौप्रकृतितोहविरासादनोत्तरंप्राप्तानांप्रयाजानामपकर्षःश्रुतः तिष्ठंतंपशुंप्रयाजैर्य
जंतीतितथोत्कर्षःसवनीयेऽनुयाजानांश्रूयते अग्निमारुतादूर्ध्वमनुयाजैश्चरंतीति तत्रकिंश्रुतमात्रानिष्ठावुत्कर्षाप
कर्षौउततदाद्युत्कर्षस्तदंतापकर्षइतिसंशयेश्रुतोत्कर्षापकर्षाभ्यांवचनोपपत्तौनतदादितदंतकल्पनंअप्रामाणिकत्वा
दितिप्राप्तेब्रूमः प्रकृतौपदार्थानुक्रमस्यक्लृप्तत्वात्तत्क्रमाणामेवपदार्थानांचोदकेनातिदेशात्व्युत्क्रमेसतिपूर्वेणयदीयार्थि
नोत्तरपदार्थस्यबुद्धावनुपस्थापितत्वादनुष्ठानमेवलुप्येततस्मात्प्रयाजांतस्यांगसमूहस्यापकर्षः अनुयाजादेरंगसमू
हस्योत्कर्षइत्यधिकरणार्थसंक्षेपेणाग्नीषोमीयस्य यत्त्वग्नीषोमीयानुबंध्ययोरग्नीषोमीयस्यतत्रप्राथम्यंतदन्यसति
कस्यापिवैगुण्यअणुरपीसौचित्यमात्रात् तस्माद्वाचनिकएवायमर्थः यतएववाचनिकोवचनंच प्रातर्मध्याह्नकर्त
व्यस्यनित्यस्यैवापकर्षंकरोति अतएवयदामृततिथिनिमित्तकंगजच्छायावारुण्याद्यलभ्ययोगनिमित्तकंश्राद्धस्नाना ३७

77/190

दिकंत्रयोदश्यांकर्तव्यंभवति संकटांतरंशास्त्रीयंतदाल्पद्वादशीमध्येअद्भिःपारणांकृत्वापश्चाच्छ्राद्धादिविधायभोक्तव्यं य
दाहदेवलः संकटेविषमेप्राप्तेद्वादश्यांपारयेत्कथं अद्भिस्तुपारणांकुर्यात्पुनर्भुक्तंनदोषकृदिति अत्रचाद्भिःपारणमात्रं
विधीयतेश्राद्धाद्यनपकर्षस्तुवचनाभावादेवसिद्धः माध्याह्निकापकर्षस्तुभूयस्यामपिद्वादश्यांभवत्येवसर्वेषामुपवा
सानांप्रातरेवहिपारणेतिमाधवाद्युदाहृतवचनात् यदातुप्रातःकालोद्वादशीप्रथमपादंव्याप्नोतितदातमतिलंघ्यैव
पारणंकर्तव्यं द्वादश्याःप्रथमःपादोहरिवासरसंज्ञितः तमतिक्रम्यकुर्वीतपारणंविष्णुतत्परइतिविष्णुधर्मोत्तरात्
द्वादश्यभावेत्रयोदश्यांपारणस्याथपशूनांसहत्वइतिसाद्यस्केसहपशूनालभतइतिश्रुतंतत्रप्रकृतावग्नीषोमीयपशु
रौपवसथ्येपूर्वदिनेआलभ्यतेसवनीयपशुःसुत्यादिनेप्रातःसवनेआश्विनग्रहादूर्ध्वमालभ्यते अनुबंध्यपशुरव
भृथादूर्ध्वमालभ्यतेइहतुत्रयोपिपशवःसहालब्धव्याः सोयंसहोपालंभःसुत्यादिनआश्विनग्रहादूर्ध्वंसवनीयस्था
नेभवतीतितदंगीकरणीयंतथासतिप्रधानसोमप्रत्यासत्तिलाभात् तत्रोपाकरणादीनांप्रतिपशुभेदेकिमनियमःक्र
मस्यउतनियमःप्रकृताविवतत्रस्वस्थानत्यागादनियमइतिप्राप्तेब्रूमः सवनीयोहिस्वस्थानएववर्तते आश्विनग्रह
सामीप्यस्यसवनीयस्थानीयत्वात् आश्विनेगृहीतेसवनीयएवबुद्धिस्थेभवतिप्रकृतौतदानंतर्यस्यक्लृप्तत्वात् तत्रस
वनीयप्राथम्येनिश्चितेस्थानेनसातिस्थानभ्रष्टयोरग्नीषोमीयानुबंध्ययोःप्रकृताविवपूर्वोत्तराभावोद्रष्टव्यः सिद्धस्यैव
प्रशंसानारदीये त्रयोदश्यांतुशुद्धायांपारणेपृथिवीफलं शतयज्ञाधिकंवापिनरःप्राप्नोत्यसंशयमिति एतेषांचद
शम्यादिनियमानामंगभूतानांलोपेप्रायश्चित्तंकर्तव्यं तत्रमानसनियमलोपेयमःमानसेनियमेलुप्तेस्मरेद्विष्णुमना
मयमिति वाचनिकनियमलोपेसामान्यतोयोगियाज्ञवल्क्याः यदिवाग्यमलोपःस्यात्स्नानदानादिकर्मसु
व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययमिति असंभाष्यपाखंड्यादिसंभाषणेविष्णुधर्मोत्तरे असंभाष्यान्हिसं
भाष्यतुलस्यसितकादलं आमलक्याःफलंवापिपारणेप्राश्यशुध्यतीति अत्रैवान्यदपिप्रायश्चित्तंतत्रैव संभाषे

ताशुचिषदंचिंतयेदच्युतंबुधः इदंचोदाहरेत्सम्यक्कृत्वातत्प्रवणंमनः शारीरमंतःकरणोपघातंवाचश्चविष्णुर्भगवा
नशेषं शमंनयत्वस्तुममेहशर्मपापादनंतेत्हृदिसंनिविष्टे अंतःशुद्धिर्बहिःशुद्धिःशुद्धोधर्ममयोच्युतः सकरोतिम
मैतस्मिनशुचिरेवास्मिसर्वदा बाह्योपघातीननघोबोद्धांश्चभगवानजः शमंनयत्वनंतात्माविष्णुश्चेतसिसंस्थि
तः एतत्संभाव्यजप्तव्यंपाखंडिभिरतंद्रितैरिति एतस्यचजपस्यमंत्रलिंगात्संसर्गोपघातविषयत्वप्रतीतावपिसंभा
षणविषयतेव एतत्संभाष्यजप्तव्यमितिप्रत्यक्षवचनात् पाखंड्याद्यवलोकनेविष्णुपरायणेतस्यावलोकनात्सू
र्यंपश्येतमतिमान्नरइति तत्रैवविशेषोविष्णुधर्मोत्तरेनमःशुचिषदेत्युक्त्वासूर्यंपश्येतदीक्षितइति दीक्षितःस्वीकृ
तनियमः तत्स्पर्शेपितत्रैव संस्पर्शेतुबुधःस्नात्वाशुचिरादित्यदर्शनादिति दंतधावनेप्रायश्चित्तंविष्णुरहस्ये
श्राद्धोपवासदिवसेखादित्वादंतधावनं गायत्र्याःशतसंपूतमंबुप्राश्यविशुध्यतीति चांडालादिशब्दश्रवणेबृह
न्नारदीयेरजस्वलांचचंडालंमहापातकिनंतथा सूतिकांपतितंचैवउच्छिष्टंरजकादिकमित्युपक्रम्यव्रतादिमध्ये
शृणुयाद्यद्येषांध्वनिमुत्तमः अष्टोत्तरसहस्रंतुजपेद्वेदमातरंवेदमातरंगायत्रीं अनृतभाषणादौकात्यायनः
मिथ्यावादेदिवास्वापेबहुशोंबुनिषेवणे अष्टाक्षरंव्रतीजप्त्वाशतमष्टोत्तरंशुचिरिति अष्टाक्षरं ॐ नमोनारायणा
येतिहिंसास्तेययोःशंखः कृत्वास्तेयंप्राणिहिंसांयथार्हंशास्त्रचोदितं प्रायश्चित्तंव्रतीकुर्याज्जपेन्नामशतत्रय
मिति नाम्नांशतत्रयंनत्वेकंनामशतत्रयवारमिति संख्यायाःपृथक्निवेशित्वात्संख्ययाकर्मभेदःस्यादित्यधिक
रणं तत्रोदाहरणंसप्तदशप्राजापत्यान्पशूनालभतइति अत्रतद्धितार्थस्यपशोःप्रथमंबहुत्वेनान्वयेपश्चात्प्रा
जापतिनादेवतयासंबंधेबहुभिःपशुभिर्व्यासज्येकादेवतासंबध्यतइतिद्रव्यदेवतासंबंधादनेकद्रव्यकएकोयोगो
भवतीतिएकंकर्मेतिपूर्वपक्षः प्रकृतिप्रत्ययार्थयोरन्वयस्यप्रथमंव्युत्पत्तिसिद्धत्वेनतदनंतरंविभक्त्यर्थान्वयइति
द्रव्यदेवतासंबंधांगस्यरूपवर्यर्वेनेपोबहुवचनेनबहुत्वेवगते अनेकयागाइति इत्युत्पत्तिवाक्यगतसंख्ययाकर्म ३८

79
19

भेदइतिसिद्धांतसंक्षेपः पृथक्निवेशित्वात् तांबूलचर्वणादौपैठीनसिः तांबूलचर्वणेस्त्रीणांभोगेमांसनिषेवणे
व्रतलोपोभवेत्कुर्यादष्टाक्षरमनोर्जपमिति मांसस्यभक्ष्यस्यनिषेवणे अभक्ष्यमांसभक्षणेतुस्तेयादिवत्स्मार्तप्रा
यश्चित्तेनसमुच्चयः एवंमैथुनेपिस्वदारविषयेपरदारविषयेतुपूर्ववत्समुच्चयः स्वदारमैथुनेप्यृतुकालादन्यत्र त
थाचकात्यायनः रेतःसंक्रमणाद्योगाद्योगन्यत्रक्षयःस्मृतः जपोष्टाक्षरमंत्रस्यनामशतत्रयस्यवेतिरेतसःसं
क्रमणंगर्भकोशेतद्योग्यंगमनंऋतुकालगमनमितियावत् तदात्मकात्स्त्रीसंभोगादन्यत्रसंभोगेव्रतस्यक्षयइत्य
र्थः देवलेनाप्युक्तं नदारिषुतुसंगमादिति तेनतत्रैवमंत्रजपः जपसंख्यापूर्वोक्ताशतरूपा ऋतुगमनाभ्यनुज्ञापि
प्रागसंनिहितस्यषोडश्यामेवरात्रौसंनिहितस्यअनन्यगतित्वात् एवंब्रह्मचर्येचेतिश्राद्धविषयायामप्यनुज्ञायां
अस्पृश्यस्पर्शादौस्मृत्युक्तंस्नानादि अपरस्यापिनियमस्यलोपेप्रायश्चित्तविशेषोक्तस्तत्रमंत्रस्यनाम्नांवाजपोद्र
ष्टव्यइति अथव्रतेएकादशीनिर्णीयते साचद्विविधासंपूर्णाविद्धाच तस्याश्चसंपूर्णत्वंनोदयमात्रादारभ्यप्रवृत्ता
याःकिंतूदयात्प्रागपिमुहूर्तद्वयव्यापिन्याः तथाच प्रतिपत्प्रभृतयःसर्वाउदयादोदयाद्रवेः संपूर्णाइतिवि
ख्याताहरिवासरवर्जिताइतिस्कंदपुराणवचनेइतरतिथिविषयंसूर्योदयादारभ्यप्रवृत्त्यासंपूर्णत्वंहरिवासरेएका
दश्यांपर्युदस्तं कीदृशंतर्हितत्रसंपूर्णत्वमित्यपेक्षायांचआदित्योदयवेलायाःप्राङ्मुहूर्तद्वयान्विता एकादशी
तुसंपूर्णाविद्धान्यापरिकीर्तितेतिभविष्यपुराणवचनेनेतरातिथिविलक्षणंतदुक्तं अत्रचसूर्योदयादारभ्यप्रवृत्तत्वं
सूर्योदयपर्यंतसत्वंच द्वयंमिलितंसामान्यतःसंपूर्णत्वप्रयोजकंयदुक्तं तन्मध्येपूर्वमेवैकादश्यांपर्युदस्यतेहरिवास
रवर्जिताइत्यनेनतच्चरमपि तत्रैववचनांतरेविशेषविधानात् तेनारुणोदारभ्यद्वात्रिंशन्मुहूर्तव्यापिनीएकादशी
संपूर्णानत्वितरतिथिवत्षष्टिघटिकामात्रव्यापिनी यत्तुआदित्योदयवेलायाआरभ्यषष्टिनाडिका संपूर्णैकादशी
नामितीतरतिथितुल्यंसंपूर्णत्वमेकादश्या अप्युक्तं तन्नमुख्यंकिंत्वनुकल्पः तस्यचविषयोवक्ष्यते अरुणोदयेकदेश

स्यदशम्यापूरणादेकादश्यासकलतदव्याप्त्याविद्धत्वं तेनयाएकादशीसत्त्वारुणोदयव्यापिनीद्वितीयसूर्योदयादर्वागे
वरात्रौदिनेवासमाप्ताद्वादश्यायुक्तासानविद्धानसंपूर्णाकिंतुखंडामात्रं सूर्योदयमारभ्यतदस्तपर्यंतंवर्तमानाइतराति
थइव गरुडपुराणशिवरहस्यमोरधर्मेष्वपि उदयात्प्राग्यदाविप्रमुहूर्तद्वयसंयुता संपूर्णैकादशीनामतत्रैवोपवसेद्गृही
ति तेन अरुणोदयकालेतुदशमीयदिदृश्यते अरुणोदयकालेतुदिशागंधाभवेद्यदीत्यादिवचनेषुयोरुणोदयउक्तः स
उदयप्राचीनमुहूर्तद्वयात्मकत्वद्रष्टव्यः पूर्वैकवाक्यत्वात् योगार्थस्यापितत्रैवसंभवाच्च यच्चक्वचिद्रात्र्यंत्याष्टमभागे
स्यारुणोदयत्वाभिधानंतदल्पांतरत्वादेतत्परमेव यत्तुब्रह्मवैवर्ते चतस्रोघटिकाः प्रातरुणोदयनिश्चयइत्युक्त्वाघ
टिकाविभागेनैववेधातिवेधमहावेधयोगाख्याश्चत्वारोवेधादोषतारतम्यार्थंकेवलंदर्शिताः अरुणोदयवेधःस्या
त्सार्धंतुघटिकात्रयं अतिवेधोद्विघटिकःप्रभासंदर्शनाद्रवेः महावेधस्ततत्रैवदृश्यतेर्कोनदृश्यते तुरीयस्तत्रवि
हितोयोगःसूर्योदयेसतीति तत्रमुहूर्तोघटिकाद्वयमितिवद्घटिकाशब्दोमुहूर्तार्धपरः उदयात्तुप्राक्चतस्रस्तुनाडि
काअरुणोदयइति नारदादिवचनेनाडिकाशब्दोपितथा अतएवनागोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा भूतोष्टाद
शनाडीभिर्दूषयत्युत्तरांतिथिमितिवचनोक्तोविशेषवेधः षट्सार्धसप्तनवमुहूर्तपर्यवसन्नएवकालादर्शादिषुदर्शि
तः तेनत्वाविद्धासवृद्धिभ्यांमुहूर्तानामपिह्रासवृद्धीसम्यगालोच्यवेधनिश्चयःकर्तव्योनतुस्थूलदृशेति अयंचारु
णोदयवेधोदशमीवेधसंयुक्तोयादिस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनैकादशीव्रतमिति गारुडवचनात् प
रमापदमापन्नोहर्षेवासमुपस्थिते नैकादशींत्यजेद्यस्तु यस्यदीक्षास्तिवैष्णवीतिस्कंदपुराणस्मृक्षितविष्णुमंत्रदीक्षा
युक्तत्वरूपवैष्णवविषयः सूर्योदयस्पृशाद्वेषादशम्यागर्हितासदेति अतिवेधादयःसर्वेयेवेधास्तिथिषुस्मृताः
सर्वेष्ववेधाविज्ञेयावेधःसूर्योदयेस्मृतइत्यादिवचनोक्तःसूर्योदयवेधएवतुपरिशेषादितरेषामित्येव यद्यपिमाध
वाचार्यादिभिःसर्वैर्दाक्षिणात्यनिबंधकारैरुच्यतेतथापि अरुणोदयव्यापिन्याःसंपूर्णत्वंतदव्यापिन्याश्चविद्धात्वं ३९

प्रतिपादयतोवचनस्यसामान्यविषयत्वान्नैवोपोष्यमितिवचनेचैवकारप्रयोगेणवैष्णवेनसर्वथानित्यत्वेनकाम्य
त्वेनवापरदिनेएकादशीद्वादश्योरलाभेपिचारुणोदयवेधवत्यांनोपोष्यमित्युक्त्यासतिसंभवेवैष्णवेतरैरपिनोपोष्यमि
तिप्रतीतिःसतिसंभवेतद्विषयत्वमप्यरुणोदयवेधस्यानंतभट्टीयगौडनिबंधोक्तंयुक्तं अतएवकेषुचिदरुणोदयविद्धानि
षेधवचनेषुकाम्योपवासविषयतास्पष्टंप्रतीयते तथाचगरुडपुराणे उदयात्प्राक्त्रिघटिकाव्यापिन्येकादशीयदा सं
दिग्धैकादशीनामत्याज्यावैधर्मकांक्षिभिः पुत्रराज्यसमृध्यर्थंद्वादश्यामुपवासयेत् तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपा
रणं उदयात्प्राङ्मुहूर्तेनव्यापिन्येकादशीयदा संयुक्तेकादशीनामवर्जयेद्धर्मवृद्धये पुत्रपौत्रसमृद्ध्यर्थंद्वादश्यामुप
वासयेत् यत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं अत्रहियउपवासोराज्यपुत्रादिलाभार्थंद्वादश्यांविधास्यतेसका
नचसर्वानि म्यएवविद्धायांनिषिध्यतइतिप्रतीयतेसमभिव्याहारात्नचैवंवैष्णवानुप्रतिसएवनिषेद्धुंशक्यतेनित्यस्यापितानुप्र
तिनिषेधात् तेनतदितरविषयत्वमेवतेषांवचनानां नचैतत्फलश्रवणमर्थवादमात्रंपरद्रव्यसंस्कारकर्मसुपरार्थत्वा
त्फलश्रुतिरर्थवादःस्यादिति अत्रयस्यपर्णमयीजुहूर्भवतिनसपापश्लोकंशृणोति तत्रसंशयः किंपर्णमयत्वंपु
रुषार्थमुतक्रत्वर्थंपुरुषार्थोभयरूपंक्रत्वर्थंवा तत्रपुरुषार्थमितिप्राप्तंपापश्लोकश्रवणाभावस्यपुरुषसंबंधिफ
लस्यप्रतिभानात् अथवाक्रत्वर्थंजुहूपदेशेनविधीयमानंक्रत्वर्थफलसंयोगात्पुरुषार्थमपीतिपूर्वःपक्षः सिद्धांतस्तु
फलंसिद्धंभवतिनचात्रसाध्यताप्रतिभासतेवर्तमाननिर्देशात् संयोगपृथक्त्वंविनातदुभयार्थत्वाभावाच्च एतस्यै
वतदुभयपरत्वेवाक्यभेदापत्तेश्च तस्मात्क्रत्वव्यभिचारितजुहूसंबंधात्क्रत्वर्थंतत्रचफलश्रुतिरर्थवादइतिस्थि
तंपरार्थत्वादित्तन्यायस्याभावात् तत्रक्रतुशतमितितुप्रयाजादिफलश्रुतिवदर्थवादःपारणस्यांगत्वात् इदंचद्वा
दश्यांकाम्यैकादश्युपवासविधानंप्रक्रांतसंवत्सरादिव्यापिकाम्यप्रयोगविषयंतस्येतरतिथिकाम्यव्रतवत्संपूर्णाया
मेवयुक्तत्वात् एवंजातीयस्यविधेःप्रक्रांतविषयत्वेनाप्युपपत्तेः नित्यस्तुद्वादश्यांसबहुषुविषयेषुविधीयते अ

का०त०
४०

नएवंचैकादशीनिमित्तकएवोपवासव्रतेद्वादशीव्रतशब्दोपिबहुषुवचनेषुप्रयुज्यते यदपिसंपूर्णैकादशीयत्रप्रभातेपुनरे
वसाउत्तरांतुयतिः कुर्यादपूर्वामुपवसेद्गृहीत्युत्तरादिनेएकादशीमात्रसत्त्वेकेषांचिदुत्तरस्यामुपवासविधानंयच्चसंपूर्णैकाद
शीयत्रप्रभातेपुनरेवसा सर्वैरुत्तरतः कार्यापरतोद्वादशीयदीति उभयोः परदिनेसत्त्वेसर्वेषांपरत्रोपवासविधानंतदपि
वैष्णवेतरविषयमेवमुक्तं वैष्णवानांविद्धित्वमात्रेणैवपरत्रान्यतरस्याअलाभेप्युत्तरत्रोपवाससत्त्वात् संपूर्णाचात्रन
सूर्योदयद्वयमात्रव्यापिनीकिंत्वदयात्प्रागितिपरिभाषितैव पुनःप्रभातसमयेघटिकैकायदाभवेत् तत्रोपवासोविहित
श्चतुर्थाश्रमवासिनां विधवापिचतत्रैवपरतोद्वादशीनचेदितिगारुडवचनेपरमुदयमात्रव्यापिन्येवग्राह्या नत्वितःपू
र्वमिवोदयात्प्रागितिवचनोक्ताअरुणोदयादारभ्यप्रवृत्ता नाडीपंचकात्मकतिथिवृद्धिर्विनातादृश्योत्तरदिनेएकघटिका
सत्त्वासंभवात् तावत्तिथिवृध्यनंतरंचाकस्मिकस्यह्रासस्यज्योतिःशास्त्रेअप्रसिद्धेः प्रतिभोशब्दश्चायमुषःपर्यायो
द्वितीयदिनप्रातःपरस्त्व संपूर्णैकादशीयत्रपरतःपुनरेवसेत्यादिवचनांतरैकवाक्यत्वात् तेनवैष्णवेतरेषामपिया
वत्संभवमरुणोदयविद्धानिद्धैव यथातुवैष्णवान्प्रत्यरुणोदयविद्धत्वमात्रेणत्याज्यत्वंनैवंसूर्योदयवेधाभावेत
दितरान्प्रति तान्प्रत्यपितथात्वेसूर्योदयस्पृशात्त्वेषादशम्यागर्हितासदा सर्वेष्ववेधाविज्ञेयावेधःसूर्योदयेस्मृत
आदित्योदयवेलायाइत्यादिवचनानांनिर्विषयत्वापत्तेरित्येतावन्मात्रेणवेधद्वयस्यवैष्णवभिन्नानामरुणोदयवि
द्धायाअपिग्राह्यत्वमेवंसूर्योदयविद्धायाअपीतिकोविशेषस्तान्प्रतिसूर्योदयवेधः अरुणोदयवेधस्यैववैष्णवा
न्प्रति उच्यते नैवसाअविद्धाकिंतुविद्धापिग्राह्या विद्धाप्यविद्धाविज्ञेयेत्यादिवचनेभ्यः अरुणोदयविद्धातुता
न्प्रतितादृशोविषयेविद्धैवनभवातिसर्वेष्ववेधाविज्ञेयाइतिवचनात् आदित्योदयवेलायाइत्यस्यचैतादृशएवावि
षयेसंपूर्णत्वप्रतिपादकत्वात् विद्धापीत्येतच्च विद्धापीत्येतच्चसूर्योदयवेधपरमेव यदिदैवात्तुसंसिध्येदेकादश्यांदिनं तिथित्रयं ४०
त्रयं तत्रक्रतुशतंपुण्यंद्वादश्यांपारणंभवेत् द्विस्पृगेकादशीयत्रतत्रसंनिहितोहरिः तामेवोपवसेत्कामसकामोविष्णुत

83
194

त्परः इत्यादिवचनैकवाक्यत्वात् सूर्योदयोत्तरमेवद्वितीयसूर्योदयार्वाग्दिनक्षयेत्रिस्पृशादिव्यवहारात् गौडनिबंधेषुसूर्योदयवि
द्धायाःप्रवेशिन्याख्यायाः सर्वान्प्रत्यपिसर्वदाअग्राह्यत्वमेवोक्तं कुर्यादलाभेसंयुक्तांनालाभेपिप्रवेशिनीमिति संयुक्तारुणोद
यविद्धा एतच्चोपरिशिष्टात्प्रपंचयिष्यामः तदेवंअरुणोदयमारभ्यद्वितीयसूर्योदयंयावर्धमानासर्वान्प्रतिशुद्धा सूर्योदयोत्त
रंक्षियस्यापिदशम्यायुक्तासर्वान्प्रतिविद्धा ततःप्राचीनमुहूर्तद्वयमध्येदशम्यन्वितावैष्णवान्प्रतिसर्वदाइतरांस्तुप्रतिकाम्य
व्रतेपरतोन्यतरसत्त्वेचविद्धेतिशुद्धविद्धाविवेकस्थितेनिर्णयःक्रियते वैष्णवैर्विद्धासर्वथात्याज्या दशमीशेषेतिगरुडपुराण
वचनात् शुद्धाप्यन्यतरस्याअपिपरत्रसत्त्वेत्याज्या तत्रैकादश्यांतावत्तथात्वेत्याज्यत्वंनारदेनोक्तं संपूर्णैकादशीयत्रद्वाद
श्यांवृद्धिगामिनी द्वादश्यांलंघनंकार्यंत्रयोदश्यांचपारणमिति संपूर्णानोदयात्प्रागितिपरिभाषिता द्वादश्यास्तथात्वेत्व
सआह एकादशीयदालुप्तापरतोद्वादशीभवेत् उपोष्याद्वादशीतत्रयदिच्छेत्परमांगतिमिति उभयोस्तथात्वेभृगुनारदाभ्यां
संपूर्णैकादशीयत्रप्रभातेपुनरेवसा तत्रोपोष्याद्वितीयातुपरतोद्वादशीयदीति वैष्णवेश्वयोगपरिभाषाभ्यांवैष्णवागमो
क्तविष्णुमंत्रदीक्षावान् अत्रचविद्धानिषेधस्यप्रकरणेव्रतांगत्वात्तदतिक्रमेव्रतस्यवैगुण्यान्नित्यकाम्यत्वप्रयोगफ
लस्यपापक्षयस्यस्वर्गविष्णुप्रीत्यादेर्वाअसिद्धिरस्त्येवपुरुषस्यापितुप्रत्यवायः अंगहीनोदहेद्राष्ट्रंमंत्रहीनस्तुऋत्विजः
शुद्धाविहीनःकर्तारंनास्तियज्ञसमोरिपुरितिवचनबलाद्यज्ञांगमंत्रब्राह्मणभोजनादिभ्रेषइव तथाह्यत्रदशमीशेषसंयु
क्तागांधार्यासमुपोषिता तस्याःपुत्रशतंनष्टंतस्मात्तांपरिवर्जयेत् दशम्यनुगतायत्रतिथिरेकादशीभवेत् तत्रापत्यवि
नाशःस्यात्प्रेत्यनरकंव्रजेत् इत्यादिषुबहुषुवाक्येषुपुरुषगतमनिष्टंस्मर्यते अतएवचदशमीयुक्तांनतुकुर्यात्कथंचन
जंभस्येयंपुरादत्तादशमीशेषसंयुता उपोष्यतांप्रमादेनप्रायश्चित्तंचरेद्द्विजः इत्युक्त्वा अज्ञानाद्यदिवामोहात्कुर्वन्नेका
दशींनरः दशमीशेषसंयुक्तांप्रायश्चित्तमिदंचरेत् कृच्छ्रपादंनरश्चीर्त्वागांचदद्यात्सवत्सिकां सुवर्णस्यार्द्धकंदेयंतिल
द्रोणसमन्वितमितिप्रायश्चित्तंविधायतदकरणेऽप्रतिसमाहितनिषेधातिक्रमनिमित्तोद्विविधोपिदोषोदर्शितोहेमाद्रुदाहृ

तपुराणवचने प्रायश्चित्तमकुर्वाणस्तत्फलेनविनाशितः सगच्छत्यंधतामिस्त्रंनरकंभृशदारुणमिति वचनांतरमप्येतदर्थक
मेवोदाहृतंतेनैव प्रायश्चित्तंप्रकर्तव्यंशक्त्यर्थंतुव्रतस्यवै निश्छिद्रंजायतेयेनधर्मः संतानमेवच ब्राह्मणान्भोजयेत्त्रिंश
तांचदद्यात्सवत्सिकां धरण्स्यार्धकंदद्यात्तिलद्रोणमथापिवेति एतद्वचनैकवाक्यत्वाच्चपूर्ववचनंयद्यपिपूर्वोक्तवेधच
तुष्टयमध्येयात्तुधानिव्रतयोगेमहाविधेतुबाष्कले जंभास्करस्यातिविधेमोहिनीविधलेशिनीतिजंभास्करभागत्वेननिंदितोया
तिविधस्तदतिक्रमविषयमेवप्रतीयते तथापितस्यनिंदामात्रत्वात्सकलवेधपरमेव तदपि केवलंसूर्योदयतत्प्रत्यासन्नत
तव्यवहितव्यवहिततरादिवेधातिक्रमेपुरुषगतप्रत्यवायतारतम्यंतस्यावश्यंवक्तव्यत्वादन्यथानिर्णयानुपयोगित्वा
द्वेधाविभागप्रतिपादनस्यवैय्यर्थ्यापत्तेः प्रायश्चित्ततारतम्यंव्यवस्थावोद्धावचानांकल्पनीयाएतेनैतदपिनिरस्तं यद्य
र्थवादेपुरुषगतानिष्टश्रवणान्निषेधफलस्यैवंकामशब्दानपेक्षत्वाद्विद्धानिषेधस्यानिवर्तकतयातदर्थत्वंतर्हितेनैव
नैराकांक्ष्यात्प्रकरणबाधेनावगोरणदर्शपौर्णमासप्रकरणेश्रूयते योब्राह्मणायावगुरेत्तंशतेनयातयत्तस्माद्ब्राह्मणा
यनावगुरेदिति अत्रायंनिषेधः क्रत्वर्थः पुरुषार्थोवेतिसंशयेक्रत्वर्थइतितावत्प्राप्तं क्रतुप्रकरणपाठादिति नअवगोरणे
संशयातनामुपन्यस्यैवावगोरणनिषेधाद्यातनापरिहारस्यपुरुषगतनयातदर्थकतन्निषेधस्यपुरुषार्थत्वोचित्यादि
तिसंक्षेपः निषेधवत्कर्मांगत्वंनस्यादेवेति प्रायश्चित्ताकरणेकर्मफलविनाशस्यतत्करणेचव्रतनिश्छिद्रत्वस्याप्य
र्थवादेश्रवणात्तद्वशादेवव्रतांगत्वस्यापिप्रतीतेः यत्तुहेमाद्रिणाघटिकासार्धत्रयत्रयद्वयवेधवाक्यानांरात्रिह्रासवृ
द्धिवशेननिशिप्रांतेतुयामार्द्धेदेववादित्रवादिते सारस्वतानध्ययनेवारुणोदयउच्यतइतिवचनोक्तस्यारुणोदयस्य
रात्र्यांत्याष्टमभागरूपस्यकालभेदेनघटिकाचतुष्टयादिरूपत्वसंभवात्तद्वेधोपलक्षकत्वेनैकार्थत्वमेवोक्तं तदरुणो
दयवेधःस्यात्सार्धंतुघटिकात्रयं अतिवेधोद्विघटिकः प्रभासंदर्शनाद्रवेः महाविधोपितत्रैवदृश्यतेर्कोनदृश्यते
तुरीयस्तत्रविहितोयोगः सूर्योदयेबुधैरितिवेधानांभेदस्यस्पष्टंप्रतीतेरर्धयामवाक्यस्यैवत्वल्पांतरत्वेनमुहूर्तद्वयो ४१

85
194

पलक्षणत्वोचित्यादयुक्तं तेनमुहूर्तार्द्धात्मकघटिकाचतुष्टयरूपारुणोदयांतः किंचिदपिदशमीप्रवेशोऽरुणोदयवेधत्वेसत्येव
दोषतारतम्यसूचनार्थंवेधातिवेधादिप्रतिपादनं तत्रसार्धमित्युपलक्षणं अरुणोदयाद्यघटिकासंबंधमात्रंतुदशम्यावि
वक्षितंतत्तदर्धव्याप्त्यासंपूर्णतत्व्याप्त्यावाभवतु अतएवताद्दशवेधवत्यास्तैनैवक्रमेणसंपृक्तसंदिग्धरूपेणद्वैविध्यकथन
पूर्वकंवर्ज्यत्वमुक्तंगरुडपुराणे अरुणोदयवेलायांदशमीयदिसंगता संपृक्तैकादशींतांतुमोहिन्यैदत्तवान्विभुः उदयात्प्राक्
त्रिघटिकाव्यापिन्येकादशीयदा संदिग्धैकादशीनामवर्ज्येयंधर्मकांक्षिभिरिति उदयवेलाव्यवहितअतिवेधवतीसंयुक्तेत्यु
क्तातत्रैव उदयात्प्राक्मुहूर्तव्यापिन्यैकादशीयदा संयुक्तैकादशीनामवर्जयेद्धर्मवृद्धयइति सूर्योदयप्रत्यासन्नवेला
यांदशमीयोगोमहावेधस्तद्वतीसंकीर्णेत्युक्तातत्रैव आदित्योदयवेलाया आरभ्यषष्टिनाडिकाः सकीर्णैकादशीनाम
त्याज्याधर्मफलेप्सुभिरितिउदयवेलाव्यवहितपूर्वक्षणपर्यंतदशमीयुक्तेत्यर्थः सूर्योदयोत्तरंकिंचिद्विद्यमानदशमी
योगोयोगः सत्वसूर्योदयवेधः प्रसिद्धस्तथाचाननुज्ञातविद्धानिषेधातिक्रमविषयत्वात्पूर्वोक्तप्रायश्चित्तस्यवैष्ण
वानांसर्वप्रकारवेधेतद्भवतितेषांसर्वथाविद्धानिषेधात् अरुणोदयवेधस्यतन्मात्रविषयत्वपक्षेचतेषामेवसूर्यो
दयाव्यवहितव्यवहितव्यवहिततरव्यवहिततमवेधभेदेनतारतम्यापन्नंतत् अन्येषांतुसूर्योदयवेधएव सतिसंभ
वेसर्वविषयत्वेप्यरुणोदयवेधस्यसर्वान्प्रतितादृशमिति वस्तुतस्तु यथाश्राद्धादिदिनेमैथुनादिनिषेधातिक्रमस्य
पुरुषगतानिष्टकीर्तनेनापिनिंदानाहिनिंदान्यायेनतत्तन्निषेधस्तुत्यर्थैव निषेधाश्चकर्मांगमेव तदतिक्रमप्रायश्चि
त्तमप्यप्रकरणाधीतमप्यश्वप्रतिग्रहेष्टिन्यायेननिमित्तभूतातिक्रम्यमाणनिषेधोपस्थापिततच्छेषभूतकर्मांगमे
व एवंविद्धानिषेधातिक्रमनिंदायाअपितन्निषेधस्तुतिमात्रार्थत्वात्तन्निषेधोव्रतांगमेव तदतिक्रमेव्रतस्यैव
वैगुण्यंप्रायश्चित्तमपितत्समाधानार्थमेव निषेधातिक्रमेप्रायश्चित्ताकरणेचपुरुषगतानिष्टकीर्तनमपिअ
र्थवादमात्रं विवादएषइंद्रियेणवीर्येणऋध्यस्पतइतिवद्वोपलक्षितप्रधानफलविपर्ययाभिप्रायमेवप्रायश्चि

त्वकरणेफलश्रवणमप्यंगेफलश्रुतिस्त्वादुपलक्षितप्रधानफलेतितस्त्वत्यर्थमेवप्रयाजादिफलश्रवणवत् वैगुण्यन्तूपस्य कर्मदो
षस्यापिचवेधादिसमाख्ययास्सूर्योदयस्पृशात्वेषादशम्यागर्हितासदेतिसूर्योदयवेधस्यात्यंतगर्हितत्वप्रतीतेस्तस्यास्
त्तितारतम्येनचतत्तन्निषेधतारतम्यप्रतीतेस्तदतिक्रमनिमित्तस्यतारतम्यंयुक्तमितिप्रायश्चित्तानामपितत्समाधानार्था
नांश्रुतानामेवोच्चावचानांव्यवस्थामात्रस्यतारतम्यापन्नतत्वत्तूपस्थेववाकल्पनंयुक्तमेवेति इतिवैष्णवान्प्रत्येकादशी
निर्णीता अथतद्वितरान्स्मार्तत्वेनप्रसिद्धान्प्रतिनिर्णीयते तत्रशुद्धायदासमाहीसमक्षीणाधिकोत्तराएकादशीमुप
वसेन्नशुद्धांवैष्णवीमपिद्वतिमाधवाद्युदाहृतनिर्णायकस्कांदवचनदर्शनात्तयादाक्षिणात्यबहुनिबद्धसंमताद्वर्धमाना
दिभिश्चकल्पतरुकारादितत्वेनविश्वरूपाचार्यलिखितत्वेनचोदाहृतत्वात् शुद्धाविद्धातथात्रेधाभिन्नान्यूनसमा
धिकैः त्रैधंकैकापुनर्भिन्नाद्वादशीन्यूनसमाधिकैरितिवचनाच्चैकादश्याअष्टादशभेदास्तानतंकेश्चितदृताः अ
धिकैरित्युभयत्रापिभावप्रधानोनिर्देशस्तस्यचन्यूनसमयोरप्यन्वयः तेनद्वादशीहानियुक्ताशुद्धन्यूना द्वादशीसाम्य
युक्ताशुद्धन्यूना द्वादश्याधिक्ययुक्ताद्वादशीहानियुक्ताशुद्धसमा शुद्धसमाशुद्धन्यूना द्वादशीसाम्ययुक्ताशुद्धसमा
द्वादश्याधिक्ययुक्ताशुद्धसमा द्वादशीहानियुक्ताशुद्धाधिकाद्वादशीसाम्ययुक्ताशुद्धाधिका द्वादश्याधिक्ययुक्ताशु
द्धाधिकेतिशुद्धानवविधा एवंविद्धापीति अत्रचसमत्वंन्यूनत्वमाधिक्यंचद्वितीयसूर्योदयापेक्षया वेधश्चान्वयव्य
तिरेकाभ्यांविद्धाशुद्धोपलक्षकोयःसस्सूर्योदयोत्तरकालीनएवनत्वरुणोदयगतोपि तत्रगृह्यमाणेकेषांचिद्भेदानाम
संभवात् तादृशवेधरहितायांशुद्धायामधिकायांघटिकापंचकवृद्धायांद्वादशीहानेरसंभवात् एतावद्वृध्यनंतरमेताव
द्धानेज्योतिःशास्त्रमर्यादायामप्रसिद्धेः एवंविद्धाभेदानामपिकेषांचिदरुणोदयवेधे असंगतिर्ज्योतिःशास्त्रमर्याद
याज्ञेया अतएवगरुडपुराणे उदयात्प्राग्यदाविप्रामुहूर्तद्वयसंयुतेत्युपक्रम्याप्युक्तं पुनःप्रभातसमयेघटिकैकायदा
भवेत् परतोद्वादशीनचेदितिचसूर्योदयवेधपरमेव पूर्वत्वरुणोदयवेधाभिधानंत्याज्यत्वमात्रपरंनतुप्रकृतोपयुक्तमि ४२

87/194

त्युक्तमनंतभट्टहेमाद्र्यादिभिः यद्यपिज्योतिषमर्यादयासूर्योदयसमापितिथिर्नायातिकिंतुकथंचिन्न्यूनैवाधिकैववातथा
प्यल्पांतरत्वात्सलद्वयत्रयादिन्यूनैवसमाद्रष्टव्या साम्यावलंबलेनजन्माष्टमीभेदानामेकादशीभेदानांचबहुभिःप्रामा
णिकैरभिधानात् एवमष्टादशभेदानुक्त्वा तत्रनिर्णयोवर्धमानोपाध्यायादिभिस्तावद्विश्वरूपाचार्यलिखितत्वेनैवोदाहृ
तैरन्यैश्चमहाजनपरिगृहीतैर्वचनैःसंवादएवमुक्तः आद्यास्तुषट्स्तुपूर्वैवव्यवस्थानंतरद्वये गृहमेधियतीनांस्यान्न
वम्यांस्यात्परेहनिविद्धात्रयेतुपूर्वास्याव्यवस्थानंतरद्वये अपरेहनिशेषाःस्युःसप्तमीतुव्यवस्थयेतिशुद्धाधिकान्यूनस
मोत्तराचेत्पूर्वागृहस्थैर्यतिभिःपरैव साचेत्पराधिक्यवतीपरैवशेषास्तुशुद्धाःप्रथमाउपोष्याः विद्धासमान्यूनसमोत्त
राचेद्विद्धाधिकन्यूनपराचतत्र सैवव्यवस्थायदिविद्धहीनाग्राह्योपवासेप्रथमैवसर्वैः विद्धासमाप्यद्यधिकोत्तरास्या
द्विद्धाधिकावृद्धसमोत्तरास्यात् तदापरैवप्रतिमुक्तशंकैरेकादशीसर्वजनैरुपोष्येतिच दाक्षिणात्यनिबंधेष्वपिअ
नंतभट्टीयहेमाद्र्यादिष्वष्टादशभेदानभिप्रेत्यमदनरत्नादिषुप्रामाणिककृतेषुहेमाद्रियाद्यर्थसंग्रहग्रंथेषुतानुद्भाव्यैव
क्वचित्क्वचित्पूर्वविसंवादीनिर्णयःकृतः इदंचाष्टादशभेदोद्भावनमिंद्रजालमात्रंतथानोपयुज्यतइतिमयाशुद्धाधिका
धिकद्वादशिकाशुद्धाधिकानधिकद्वादशिकाशुद्धानधिकानधिकद्वादशिकानधिकाधिकद्वादशिका तथाविद्धापीत्य
ष्टावेवभेदान्माधवाचार्यसंमतान्सारभूतानुद्भाव्ययथामतिनिर्णयःक्रियते तत्रयातावच्छुद्धाधिकानधिकद्वादशि
कातस्यांविवादएवनास्ति एवंशुद्धानधिकाधिकद्वादशीकायामपि अतएवस्कंदपुराणे शुद्धायदासमाहीनाधिको
न एकादशीमुपवसेन्नशुद्धांवैष्णवीमपीति एकादशीयदाशुद्धासतीसूर्योदयपर्यंताततोन्यूनावा उत्तराद्वादशीततोधि
कापिभवतितदाशुद्धामेकादशीमेवोपवसेन्नतुद्वादशीमित्यर्थः नचेदेकादशीविष्णोर्द्वादशीपरतःस्थिता उपोष्यै
कादशीतत्रयदीच्छेत्परमंपदमिति नारदवचनंतुयदीच्छेत्परमंपदमित्यर्थवादः नतुपूर्वत्रोपवासविधौमुमुक्षुरूपाधि
कारिसमर्पकं मुमुक्षूणामुत्तरत्रैवोपवासस्यसर्वत्रविधानादनौचित्यात् ततश्चएकादशीभवेत्पूर्णापरतोद्वादशीय

का०त०
४२

दि तदाद्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति अविद्धापि च विद्धा स्यात्परतो द्वादशी यदीत्यादीनि स्कंदपुराणवचना
नि द्वादशी दिने एकादश्या अपि क्रियत्वाः सद्भावे द्रष्टव्यानि पूर्णाप्येकादशी त्याज्या वर्द्धते द्वितयं यदीति वचनांतरात् एकाद
श्या एव पूर्णत्वोक्त्या द्वादश्यास्तदनुक्त्या तस्या एकारयुक्तत्वस्यापि संभवाच्च यत्तु संपूर्णैकादशी त्याज्या परतो द्वादशी य
दि उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणमिति वचनं द्वादश्याः शुद्धत्वाभिधानात्तद्विषयं वक्तुं न शक्यते तद्भागवततं
त्रादि वैष्णवग्रंथांतर्गतत्वात्पूर्वोक्तवैष्णवविषयं अनंतभट्टमाधवादीनामपीदमेव संमतं यत्तु हेमाद्रिणा एवं विधे वि
षये शुद्धायामेकादश्यामुपवासविधानि उदयात्प्राग्यदा विप्रा मुहूर्तद्वयसंयुता संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही इति
वचनाद्गृहीविषयं शुद्धद्वादश्युपवासविधानं संपूर्णैकादशी यत्र द्वादशी चापरेहनि तत्रोपोष्या द्वादशी स्याद्द्वादश्या
मेव पारणं न गर्भे विशते जंतुरित्याह भगवान्हरिरित्यादि वचनवशाद्यतिविषयमिति स्वसंमतं व्यवस्थांतरमुक्तं तत्रो
दयात्प्रागिति वचनं तावद्गृहिणामेव कामनासंभवेन गृहिपदस्य सकामपरत्वादेव कारणे च व्यतिरेकता सर्वावगतेस
कामनामवैष्णवानामपि अरुणोदयविद्धायां काम्योपवासनिषेधकं प्राग्लिखितवचनैकवाक्यत्वात् न गर्भे वि
शत इत्यपि अन्यथाकरणे गर्भप्रवेशरूपदोषपरत्वेनार्थवादमात्रपरत्वाद्गर्भप्रवेशस्य दुःखाविनाभूतस्य सर्वजिज्ञा
सितत्वेन गृहिविषयमपि संभवद्भयाधिक्यविषयत्वेन वैष्णवविषयत्वेन वा व्याख्येयं यानि त्वेकादश्याः शुद्धत्वसं
पूर्णत्वमात्रमुक्त्वा द्वादश्या एव केवलायाः आधिक्यं प्रतिपाद्य परदिने उपवासं विदधति बहूनि वचनानि दृश्यंते ते
ष्वेकादश्याधिक्यमप्युपलक्ष्यत इत्युक्तं एकादशी तु संपूर्णा सद्दशा चोत्तरा भवेत् पूर्णा भवेद्यदा नंदा भद्रा चैव हि
वर्धत इत्यादिषु च शब्दवशात्तच्छीतमपि वक्तुं शक्यते येषु तु उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणमित्यादिषु द्वा
दश्याः शुद्धत्वाभिधानात्तदुपलक्षयितुं न शक्यते तानि वैष्णवविषयाणि निष्कामविषयाणि सर्वाणि वा तथेति दिक् ४२
अत एव एकालिप्यातु संयुक्ता यदि स्याद्द्वापरा भवेद् अर्थैवैकादशी नास्ति दशम्या चाप्यसंयुता कलाथ काष्ठा द्वाद

89
194

श्या यदि स्यादपरेहनि द्वादश द्वादशीर्हंति पूर्वस्मिन्पारणे कृत इति ब्रह्मपुराणवचनं शुद्धद्वादश्यां पारणनिषेधद्वारा अर्थैवे
कादशी नास्ति दशम्या चाप्यसंयुतेत्युक्तायामनधिकायामपि शुद्धैकादश्यामुपवासप्रतिषेधकं सद्वृद्धद्वादश्यामेवोपवा
सं विदधाति तदपि वैष्णवविषयं समाहिताधिकोत्तरेति वचनविरोधात् संयुक्ताग्रहणादपि तथा उदयात्प्राग्दशम्यास्तु
शेषः संयोग उच्यत इति कूर्मपुराणात् एकादशी पूर्वदिनगता लिप्या कलामात्रेण अर्थाद्दशम्या परापरादिनगता
यत्तु पृथिवीचंद्रोदये बृहन्नारदीयनाम्ना लिखितमनन्यगतिकं स्पष्टं वचनं संपूर्णैकादशी शुद्धा द्वादश्यां नैव किंचन
द्वादशी त्रयोदश्यामस्ति तत्र कथं भवेत् पूर्वा गृहस्थैः कार्या स्यादुत्तरा यतिभिस्तिथिरिति तद्धेमाद्रिणाप्यलिखनात्स
र्वस्वैकादशीमात्रवृद्धौ विद्धैकादश्यां वा गृहियतिव्यवस्थाप्रतिपादकवाक्यलिखनादनाकरं तस्मात्शुद्धायामधिका
यां द्वादश्याधिक्येपि पूर्वेद्युरेवोपवासः सर्वेषां द्वितीयदिने द्वादश्याद्यपादमुत्तीर्य तु पारणं द्वादश्याः प्रथमः पादो ह
रिवासरसंज्ञितः तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति विष्णुधर्मोत्तरात् केचिद्विष्णुतत्पर इति वचनाद्वैष्णवविष
यमिति वदंति एवमन्यत्रापि पारणादिने द्वादश्याद्यपादानुवृत्तौ द्रष्टव्यं या तु शुद्धाधिकाधिकद्वादशीका तस्यां सर्वे
षां परेद्युरेवोपवासः पूर्णाप्येकादशी त्याज्या वर्द्धते द्वितयं यदीति स्कंदपुराणवचनात् संपूर्णैकादशी यत्र प्रभाते पुनरे
व सा सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति नारदवचनाच्च एतद्विषयमेव षष्टिदंडात्मिकायाश्च तिथेर्निष्क्रमणं प
रे अकर्मण्यं तिथिमलं विद्यादेकादशीं विनेति गौडनिबंधलिखितं वचनं षष्टिदंडात्मिकाया इत्यविद्धोपलक्षणं गौ
रीव्रतादावप्येतस्यापवाद उक्तः पारणं च परदिने द्वादशीमध्य एव तद्योग्यद्वादशीलाभ इत्युक्तं या तु शुद्धाधिकानधि
कद्वादशिका तत्र सकामानां पूर्वेद्युर्निष्कामानामुत्तरेद्युरुपवासः तथा च स्कंदपुराणे प्रथमेहनि संपूर्णा व्याप्याहो
रात्रमास्थिता द्वादश्यां च तथा तात दृश्यते पुनरेव सा पूर्वा कार्या गृहस्थैस्तु यतिभिश्चोत्तरा विभो इति अत्र गृहस्थय
तिपदे सकामनिष्कामपरे संपूर्णैकादशी यत्र प्रभाते पुनरेव सा पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेदिति मार्कं

ेयवचनैकवाक्यत्वात् निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा प्रातर्भवतु वामा वा द्वादशी चद्विजोत्तम इति स्कंदपुराणे गृहस्थस्यापि निष्कामस्योत्तरत्रोपवासविधानाच्च तेनेदं निरस्तं सकामनिष्कामशब्दयोरेव गृहियतिपरत्वं गृहिणां प्रायः सकामत्वाद्यतीनां च निष्कामत्वात् एवं सति वनस्थनैष्ठिकविधवानामप्युपलक्षणं भवतीति सकामशब्दस्य गृहिमात्रपरत्वे निष्कामस्य तस्योत्तरत्रोपवासविधानानुपपत्तेः एवं सति पुनः प्रभातसमये घटिकैकायदा भवेत् अत्रोपवासो विहितो वनस्थस्य यतेस्तथा विधवायाश्च तत्रैव परतो द्वादशी न चेदित्यत्र वनस्थयतिविधवानैष्ठिकपरतया शब्दानामेकनिष्कामार्थोपलक्षकत्वात् विधेः प्राथमिकादस्मात् द्वितीये द्विगुणं चरेत् तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति वदेकवाक्य चतुर्थादि ब्रह्मवधपर्युदासेन इतरत्रावृत्तप्रायश्चित्तविधानेनैकवाक्यत्वं न पुनः प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायेन हि त्रिब्रह्मवधगोचरनैमित्तशास्त्रावृत्त्यनुवादेन चतुर्थे तदभावपरं पुनर्द्वितीयादिविधेः प्रायश्चित्तानुष्ठाने द्वैगुण्यविधिपरमपि वाक्यभेदप्रसंगादित्यर्थतालभ्यते अन्यथा प्रत्यधिकारिपर्यवसानगत्या वाक्यभेदो भवेत् माधवादीनां तु निःकामस्त्विति वाक्यालिखनाद्गृहियत्यादिशब्दानां यथाश्रुतिपरत्वमेव संमतं विष्णुप्रीतिकामे स्त्वेतादृशे विषये दिनद्वयेप्युपवासः कर्तव्यः संपूर्णैकादशी यत्र प्रभाते पुनरेव सा लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति वृद्धवसिष्ठवचनात् लुप्यते सूर्योदयं न स्पृशतीति तेन समाप्तिर्गृह्यते ततश्च संपूर्णैकादशी यत्र परतः पुनरेव सा त्रयोदशी उषःकाले उपोष्या तत्र का भवेत् उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति स्कंदपुराणवचने त्रयोदशी उषःकाल इति न्यूनद्वादशीग्रहणोपलक्षणं अत्र केचिन्नेताभ्यां वचनाभ्यां एकमधिकारिणं प्रतीतरेतरयुक्तं तिथिद्वयमुपोष्यमिति विधीयते एकनिमित्तकस्योपवासस्यावृत्तेरन्याय्यत्वादधिकारिकल्पनापत्तेश्च किंतु कृत्स्नेनैव गृहियतिरूपाधिकारिभेदेन पृथक् पृथक् तिथिद्वयमुपोष्यत्वेन विधीयते केश्चित् पूर्वा केश्चिदुत्तरेतीति वदंति तदयुक्तं द्वंद्वसमानार्थकेन तिथी इत्येकशेषेणा ४४

91/194

तरेतरयोगस्य प्रतीतेः विष्णुप्रीणनतत्परैरित्यधिकार्यंतरस्यापि श्रुतत्वाच्च इतरथैतस्यानर्थक्यापत्तेः आवृत्तेश्च वाचनिकत्वान्नैकनिमित्तकस्येत्यादिदोषः तस्मादांजस्येन विष्णुप्रीतिकामेनाधिकारिणेतरेतरयुक्तं तिथिद्वयमुपोष्यमित्येव वचनार्थः अथ विद्धानिर्णीयते तत्र या विद्धाधिकाधिकाधिकद्वादशिकास्तासां सर्वेषां परैव तत्र विद्धानिषेधवाक्यान्यनंतानि वैष्णवविषये वस्मार्तेष्वपि निरंकुशं प्रवर्तंते या च विद्धानधिकानधिकद्वादशिका सा सर्वेषां विद्धैव तथा च पद्मपुराणं एकादशी यदा विद्धा परतोपि न वर्धते यतिभिर्गृहिभिश्चैव सैवोपोष्या क्षये तिथिरिति परतो न वर्धत इत्यनेनैकादश्याः साम्यमपि गृह्यते क्षयोपि तस्याः साम्येपि यद्यपि संभवत्येव एकादश्याः सूर्योदयास्पर्शात् तथापि पृथक् क्षयग्रहणानर्थक्यापत्तेरत्र न्यूनत्वरूपः सूर्योदयात् प्राक् समाप्तिरूप एकादश्याः क्षयः क्षयशब्देन गृह्यते स च यत्यर्थं साम्ये मुमुक्षूणामुत्तरत्रोपवासस्य वक्ष्यमाणत्वात् यद्यपि चात्रैकादश्या एवानाधिक्यमुक्तं तथापि द्वादश्या अपि द्रष्टव्यं दिनत्रयस्पृते देवि नोपोष्या दशमीयुता सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशीति स्कंदपुराणे तस्याभिधानात् तथा यदि देवात्तु संसिध्येदेकादश्यां तिथित्रयं तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेदिति नारदवचनेपि अन्यथा द्वितीयदिने उपवासे त्रयोदश्यां पारणं स्यादिति व्यतिरेकप्रतीतेरिति तथा एकादशी यदा विद्धा द्वादश्यां न प्रतीयते द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत् उपोष्या द्वादशी शुद्धा सैवेरेव न संशय इति बृहन्नारदीये द्वादशीमात्राधिक्ये विद्धायां परत्रोपवासविधानाच्च एतद्वचनैकवाक्यतयैव एकादशी यदा लुप्ता परतो द्वादशी भवेत् उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति व्यासवचनेपि तादृशे यदीत्यर्थवादमात्रं न तु मुमुक्षूणामेवोत्तरत्रोपवासार्थमित्यभिप्रेतमेतद्वचनबलाद्विद्धायां द्वादशीमात्राधिक्ये सर्वेषामुत्तरत्रोपवासं वदतां माधवादीनां एकादश्याश्चानाधिक्यं न्यूनत्वेन साम्येन च भवतीत्युक्तं तत्र न्यूनत्वे दिनत्रयस्पृत इति यदि देवादिति वत्स्त्रिस्पृगेकादशीय

नतत्रसंनिहितोहरिः तमेवोपवसेत्कामकामोविष्णुतत्परइतिकूर्मपुराणंचोषोद्बलकानिविद्धोपवासे साम्येपि एकादशीनल
भ्येतिसकालाद्द्वादशीभवेत् उपोष्याद्वादशीविद्धाअपिरूद्दालकोब्रवीत् द्वादशीस्वल्पमल्पापियदिनस्यात्परेहनि दशमीमि
श्रितामहापातकनाशिनीत्यादिनिऋष्यशृंगवसिष्ठादीनांविद्धानुग्रहवचनानिसामान्यतःप्रवृत्तानि अविद्धानिनिषिद्धं
श्चेन्नलभ्यंतेदिनानितु मुहूर्तैःपंचभिर्विद्धाग्राह्यैवैकादशीतिथिरितिचमुहूर्तपंचकंचारुणोदयमारभ्य सूर्योदयमा
रभ्यतद्ग्रहणेत्रिमुहूर्ताधिकक्षयाभावात् द्वितीयदिनेद्वादशीसत्वावश्यंभावेनाविद्धालाभासंभवादित्युक्तं ततश्चदश
मीव्याप्तौदयिकत्रिमुहूर्तोत्तरंप्रवृत्तायाएकादश्यास्त्रिमुहूर्तक्षीणायाःसूर्योदयसाम्यमेवभवति एतदर्थमेवमुहूर्तमिव
भ तियमोपितत्तोवेधाधिक्येपरतानवर्धतइत्यस्यासंभवात् यतिभिर्गृहिभिश्चेत्यत्रगृहिपदंचपुत्रवद्भिन्नविषयंतेषा
मेकादशीदिनक्षयेउपवासप्रतिषेधात् एकादशीक्षयदिनेउपवासंकरोतियः तस्यपुत्राविनश्यंतिमघायांपिंडदाय
थेति दिनद्वयेतुसंप्राप्तेनोपोष्यादशमीयुता यदीच्छेत्पुत्रपौत्राणांवृद्धिसंपदमात्मनइति एकादशीषुनष्टास्करविसंक्र
मणेतथा पारणंचोपवासंचनकुर्यात्पुत्रवान्गृहीत्यादिपंचभिः ततश्चास्मिन्विषयेतेद्वादश्यामेवोपवासःकार्यः एका
दश्यांयदावस्त्रादिनक्षयातिथिर्भवेत् अत्रोपोष्याद्वादशीस्यात्त्रयोदश्यांतुपारणमिति एकादश्यांयदाब्रह्मन्दिनक्ष
यातिथिर्भवेत् तदात्वेकादशींत्यक्त्वाद्वादशीमुपोषयेदितिपितामहगोभिलादिवचनेभ्यः अत्रचयद्यपिपुत्रवद्गृ
हिविषयत्वंस्पष्टंनश्रूयतेतथाप्याकांक्षावशादेवतद्विषयत्वंभवति इतरेषांपूर्वत्रैवोपवासविधानेनाकांक्षाभावा
त् केषुचिद्वचनेषुपुत्रवद्गृहिविषयत्वेनकृप्तनिषेधसमभिव्याहाराच्च तथाचकूर्मपुराणे दिनक्षयेतुसंप्राप्तेउपोष्या
द्वादशीभवेत् दशमीशेषसंयुक्तांनकुर्वीतकदाचनेति भविष्यत्पुराणेपि दिनक्षयेतुसंप्राप्तेनोपोष्यादशमीयुता उ
पोष्याद्वादशीशुद्धात्रयोदश्यांतुपारणमिति अत्रचानिषेधवाक्येषूत्तरोपवासविधिवाक्येषुचतिथित्रयस्पृग्वारद्व

93
1942

योज्योतिषपरिभाषितोदिनक्षयोगृह्यते तेनतत्रैवपुत्रवद्गृहिणामुपवासनिषेधःपरत्रचोपवासः सूर्योदयपर्यंतस्वरूपेसाम्ये
तुपुत्रवतामपिपूर्वत्रैवोपवासनिषेधाप्रवृत्तेस्तत्सापेक्षस्यचद्वादश्युपवासविधेरप्यप्रवृत्तेः एतदभिप्रायेणैवहेमाद्रौभविष्य
त्पुराणं एकादशीकलाप्येकापरतोनचवर्धते गृहिभिःपुत्रवद्भिश्चसैवोपोष्यातदातिथिरिति तथायतिभिर्गृहिभिश्चैसैवो
प्याक्षयेतिथिरित्येतद्वचनगतस्यापिक्षयशब्दस्यान्यूनत्वरूपदिनक्षयपरत्वस्योक्तत्वात्तत्रैवयतीनांपूर्वेद्युरुपवासोविद्धान
धिकायां साम्येतुमुमुक्षुत्वाद्यतीनांशुद्धाद्वादश्यामेवोपवासः तथाचविष्णुरहस्ये दशमीमिश्रितापूर्वापूर्णाचद्वादशीप
रा एकादश्यांमहाप्राज्ञउपवासःकथंभवेदित्युपक्रम्योक्तं शुद्धैवद्वादशीराजन्नुपोष्यामोक्षकांक्षिभिरिति अत्रपरापरदि
नगतैवनतुपूर्वाहोरात्रंप्रविष्टेत्युक्त्याएकादश्याःसूर्योदयपर्यंतत्वप्रतीतिः अन्यथापरशब्दस्यवैयर्थ्यापत्तेः व्यासेनापि
दशमीमिश्रितापूर्वाद्वादशीयदिलुप्यते लुप्यतेत्रयोदश्यांनदृश्यतइत्यर्थः एकादश्यामित्यादिपूर्ववत् पारणंतुत्रयोदश्यां
प्रज्ञायित्वाजनार्दनमिति एवंसत्येकादशीदशाविद्धाद्वादशीनचवर्धते तत्रोपोष्याद्वादशीस्यात्त्रयोदश्यांचपारणमि
त्यादीनिसामान्यवचनान्यपिमुमुक्षाविषयाणिपुत्रवद्गृहिविषयाणिवाद्रष्टव्यानि यत्तुदिनक्षयेपिशुद्धैवद्वादशीमो
क्षकांक्षिभिः उपोष्यादशमीविद्धानोपोष्यैकादशीसदेतिसुमंतुसत्यव्रतवचनं उपोष्याद्वादशीशुद्धाएकादश्यांदि
नद्वयेमुमुक्षुभिर्दशाविद्धानोपोष्यैकादशीतिथिरितिशारदापुराणवचनंच तत्रपरिभाषितोदिनक्षयोनग्राह्यः किंतु
विद्धत्वात्सूर्योदयास्पर्शमात्रमेकादश्याः तच्चद्वितीयसूर्योदयपर्यंतत्वरूपसाम्येपिसंभवतीत्येवैतदमपिवचनद्वयं
साम्यविषयमेव न्यूनत्वविषयत्वेयतिगृहिभिश्चेवेतिवचनविरोधात् नचैतद्विरोधात्तदेवसाम्यविषयमस्त्वितिवाच्यं
न्यूनत्वेपरासाम्येपूर्वेत्यनौचित्यात् न्यूनत्वेमुमुक्षूणांशुद्धद्वादश्युपवासाभ्युपगंतॄणांसाम्येपितस्यैवसंमतत्वाच्च तेन
यानाधिकद्वादशिकान्यूनत्वेनविद्धानधिकातस्यांपुत्रवत्व्यतिरिक्तानांगृहिणांयतीनांचपूर्वत्रैवोपवासः पुत्रवतामे

वपरेद्युः साम्येनतुताद्दश्यांगृहिणांसर्वेषांपूर्वेद्युरेवयतीनांपरमुत्तरेद्युरिति यतिभिर्गृहिभिश्चैवेतिगृहिभिःपुत्रवद्भिश्चेति
वचनद्वयांजस्येनइतरेषांचतथानांजस्याभावेनव्यवस्था मदनरत्नेतुस्कंदंतुसत्यव्रतशारदापुराणवचनस्वरसात्तत्रसदाश
श्रवणाद्यविद्धन्यूनायामपिमुमुक्षूणांपरेद्युरेवोपवासः यतिभिर्गृहिभिश्चैवेतियतिपदंतुनियमपर्यायनियतियुक्तमुमु
मुक्षुनैष्ठिकवानप्रस्थादिपरमित्युक्तं हेमाद्रिणातुनिर्णयएवमेवकृतः यतिपदस्यतुकापिगतिर्नकृतेति यदपितिथितत्त्वे
कालविवेकसंवत्सप्रदीपादिषुदृष्टं एकादशीमुपवसेद्द्वादशीमथवापुनः विमिश्रांवापिकुर्वीतनदशम्यायुतांक्वचित कु न
र्यादलाभेसंयुक्तांनालाभेपिप्रवेशिनीं उपोष्यद्वादशींतत्रत्रयोदश्यांतुपारणं उभयात्प्राकृदशम्यास्तुशेषःसंयोगउच्य
ते उपरिष्टात्प्रवेशस्तुतस्मात्तांपरिवर्जयेत् इतिकूर्मपुराणवचनंउभयानाधिक्येपिविद्धानिषेधपूर्वकंद्वादश्युपवास
विधायकमुदाहृतमुदयोपरिविद्धातुदशम्येकादशीयदि दानवेभ्यःप्रणनार्थंदत्तवान्पाकशासनः दशम्येकादशीवि
द्धागांधार्यातामुपोषिता तस्याःपुत्रशतंनष्टंतस्मात्तांपरिवर्जयेत् येकारयंतिकुर्वंतिदशम्येकादशींयुतां आलो
क्यतन्मुखंब्रह्मन्सूर्यदर्शनमाचरेदित्यादीनिचसामान्यवचनानितदनुरोधेनासंकोचेनैवव्याख्यातानि तत्रकू
र्मपुराणंतावदार्यचूडामणिप्रभृतिगौडैरपिनलिखितमनाकरमिवप्रतिभाति साकरमपिवामुमुक्षुविषयंपुत्रव
द्गृहस्थविषयंवाव्याख्येयं सामान्यवचनानित्वाधिक्यविषयाण्यपिव्याख्यातुंशक्यंतएव तेषामसंकोचेविद्धानु
ग्रहवचनानांसर्वेषामानर्थक्यापत्तेः तेषांकथंचिदपिअरुणोदयविद्धाविषयतयाव्याख्यानेपिमुहूर्तैःपंचभिर्वि
द्धाग्राह्येवैकादशीतिथिरितीदंविद्धानुग्रहवचनंवोपदेवानंतभट्टहेमाद्र्यादिभिःदाक्षिणात्यैराचार्यचूडामणि
प्रभृतिभिश्चगौडैरपिधृतमत्यंतानर्थकंस्यात् तस्मादुभयानाधिक्येविद्धापिपूर्वोक्तव्यवस्थयाग्राह्येवेति याच ४६
विद्धाधिकानधिकद्वादशिका ससर्वैरपिपरैवोपोष्या द्वादश्यनाधिक्यंद्वेधासूर्योदयपर्यंतत्वेनततोर्वागेवसमा

95/170

प्त्यावा उभयथापिपरा तत्राद्यपक्षेवचनानिपद्मपुराणे द्वादशीमिश्रिताकार्यासर्वत्रैकादशीतिथिः द्वादशीचत्रयोदश्यां
विद्यतेयदिवानवेति तथासर्वत्रैकादशीग्राह्याद्वादशीमिश्रितानरैः प्रातर्भवतुवामावायतोनित्यमुपोषणमिति उपोष
णंनित्यंप्रधानंतत्रचास्यकलावछिन्नेकादशीमुख्याताद्दशीचाधिक्येद्वादश्यांलभ्यतेइतिसैवोपोष्या पारणंत्वंगं त
त्रापिद्वितीयदिनेंत्यकालावछिन्नाद्वादशीयदिलभ्यतेयथोभयाधिक्येतदासम्यगेवनोचेत्त्रयोदश्यामपिभवत्वित्यर्थः
अतएवनारदः द्वादश्येकादशीयत्रसंगतात्रिदशाधिप तामुपोष्यततःकार्यंत्रयोदश्यांतुपारणं स्कंदपुराणेपि एकादशी
कलायत्रपरतोद्वादशीभवेत् तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणं परतएकादशीकालोत्तरं द्वितीयपक्षेकूर्मपुराणे
एकादशीद्वादशीचरात्रिशेषेत्रयोदशी सोपोष्याचप्रयत्नेनमहापुण्यविवर्द्धिनी अस्मिंश्चद्वादशीदिनक्षयेपुत्रव
द्गृहस्थैरुपवासोनकार्यः एकादशीद्वादशीचरात्रिशेषेत्रयोदशी उपवासंनकुर्वीतपुत्रपौत्रसमन्वितइतिकूर्मपुराण
वचनात् किंतुतैस्तत्रनक्तंकार्यं तथाचवृद्धशातातपः एकादशीयदाविद्धाद्वादशीचक्षयंगता क्षीणासाद्वादशी
ज्ञेयानक्तंतत्रविधीयतइति स्कंदपुराणेपि एकादशीकलायत्रद्वादशीचक्षयंगता तत्रनक्तंप्रकुर्वीतनोपवासंगृहा
श्रमीतिकेचित्तुपूर्वनक्तेएकादशीदिनक्षये अत्रद्वादशीदिनक्षयेउपवासनिषेधेतुकिंचिद्भक्ष्यंप्रकल्पयेदितिसामा
न्यवचनान्नक्तंहविष्यान्नमितिवचनोक्तभक्ष्यप्रकल्पनमुक्तंतत्तत्रविशेषतोद्वादश्युपवासविधानेअत्रचनक्तविधा
नेसतिविचारणीयं एवंसतियानिपारणाहेनलभ्येतद्वादशीकलयापिचेत् तदानींदशमीविद्धाप्युपोष्यैकादशीति
थिरित्यादीनिविद्धानुग्रहवचनानिसर्वाण्येकादश्याअप्यनाधिक्येद्रष्टव्यानि यत्तुमाधवेनशुद्धाधिकावद्विद्धाधि
कायामपिद्वादश्यनाधिक्येगृह्यियतिव्यवस्थैव एकादशीविवृद्धाचेच्छुक्लाकृष्णाविशेषतः उत्तरांतुयतिःकुर्यात्पूर्वा
मेवसवागृहीतिप्राचेतससामान्यवचनादित्युक्तंतत्संपूर्णैकादशीयत्रप्रभातेपुनरेवसेत्यादिबहुवचनैकवाक्यत

ना

का०त० याप्रचेतोवचनस्यापिशुद्धाविषयत्वस्यैवयुक्तत्वादयुक्तं यातुविद्धाधिकद्वादशिकातस्यांशुद्धद्वादश्यामेवोपवासोद्वाद
४७ श्यामेवपारणंचतत्पर्याप्तद्वादशीलाभे तदलाभेतामुल्लंघ्यापि तथाचनारदीये उपवासदिनंविद्धंयदा भवति पूर्वया द्विती
येद्वियदानस्यात्स्वल्पाप्येकादशीतिथिः तत्रोपवासोविहितः कथंतद्वदस्वतज्ञ सूतउवाच यदानप्राप्यतेविप्राद्वा
दश्यांपूर्ववासरः रविचक्रार्धमात्रोपितदोपोष्यंपरंदिनं उपोष्याद्वादशीशुद्धाद्वादश्यामेवपारयेत् निर्गताचेत्त्रयो
दश्यांकलावद्विकलापिवेति ब्रह्मवैवर्तेपि एकादशीयदालुप्तापरतोद्वादशीभवेत् उपोष्याद्वादशीतत्रयदिच्छेत्परमं
पदमिति यदिच्छेदित्यर्थवादमात्रं नचैकादशीनिमित्तउपवासःकथंद्वादश्यांनहितिथ्यंतरेष्वेवंकुत्रापिदृष्टमितिवा
च्यंकिमत्रदर्शनेनाखावनिकेर्थे किंहिवचनंनकुर्यान्नास्तिवचनस्यातिभारः अतएवोक्तंकूर्मपुराणे एकादशीमु
पवसेद्द्वादशीमथवापुनः विमिश्रांवापिकुर्वीत नदशम्यायुतांक्वचिदिति अतएवचैकादशीव्रतमपिद्वादशीशब्दे
नापिव्यवह्रियतेपुराणेषु शुक्लकृष्णानमेख्याताद्वादशीकेनहेतुना यथाशुक्लातथाकृष्णाद्वादशीमेसदा
प्रियेत्यादिषु यानितुविद्धानुग्रहवचनानितानियथाएकादशीदशायुक्ता परतोपिनवर्द्धते गृहिभिर्यतिभिश्चैव
सैवोपोष्यासदातिथिरितिवचनबलात्परतएकादश्यभावेप्रवर्तंते तथा पारणाहेनलभ्येतद्वादशीकलयापिचेत्
तदानींदशमीविद्धाप्युपोष्यैकादशीतिथिः त्रयोदश्यांयदानस्याद्वादशीघटिकाद्वयं दशम्येकादशीविद्धासैवो
पोष्यातदातिथिः दशमीशेषसंयुक्ताउपोष्यैकादशीतदा यदानस्यात्त्रयोदश्यांमुहूर्तंद्वादशीतिथिरित्याद्यृष्य
शृंगहारितविष्णुरहस्यादिवचनबलात्परतोद्वादश्याअप्यभावे अतएववनांतरेषुसामान्योक्त्याउभयाधिक्यस्या
पिसंग्रहः एकादशीदिशायुक्तांवर्धमानेविवर्जयेत् क्षयमार्गस्थितेसोमेकुर्वीतदशमीयुतामिति एकादशीभवे ४७
त्क्वाचिद्दशम्यादूषितातिथिः वृद्धिपक्षेभवेद्दोषःक्षयपक्षेतुपुण्यदेतिच सोमश्चांद्रीतिथिः गौडनिबंधेषुतुप

97/19

क्षहानौस्थितेसोमेलंघयेद्दशमीयुतामिति उत्तरार्द्धं पठितंशुक्लपक्षेदशमीविद्धासर्वथानकर्तव्या कृष्णपक्षेतादृश्यपिप्रक
र्तव्येत्येतदर्थत्वेनवचनंव्याख्यातंतदयुक्तं किंयद्दशमीयुक्तामेकादशींकेषुतद्विषयेषुवर्जयेच्छुक्लपक्षएवेत्येतत्परमिदंवचनं
उत यद्दशमीयुतांकेषुचिद्विषयेषुकुर्वीततत्कृष्णपक्षेइत्येतत्परं आद्येउभयत्रध्यन्यतरत्रध्योरपिकृष्णपक्षेविद्धायाःकर्त
व्यतापत्तिः नचैतत्तेषामपीष्टं पूर्वोक्तव्यवस्थयापक्षद्वयाविषयत्वेदृंवचनंव्यर्थमेव यद्यपितिथितत्वेदशमीशेषसंयु
क्तायादस्यादरुणोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतमितिवचनात्सर्वदावैष्णवस्ययदरुणोदयविद्धावर्जनंप्रा
संतत्तुशुक्लपक्षएवेत्येतदर्थत्वेनेतद्वचनंहितदपिवैष्णवारुणोदयविद्धापरत्वेस्यवचनस्यविद्धेतोरभावाद्वैष्णवसमाचा
रविरोधाच्चायुक्तं किंच पक्षहानौस्थितेसोमइत्रसोमहानिपक्षइत्ययमर्थः कथंप्रतीयतेयेनकृष्णपक्षप्रतीतिःस्यात् वृ
द्धिपक्षेक्षयपक्षइत्यत्रापिवृद्धिक्षययोश्चंद्रसंबंधित्वेनकिंचित्प्रमाणं तिथिसंबंधित्वंतुतिथिसमभिव्याहारदेवग
तथासतियथामलिम्लुचःपूर्वोदेवोमासस्तथोत्तरः त्याज्यातिथिस्तथापूर्वावृद्धौग्राह्यासदोत्तरेतिसामान्यवचनै
कवाक्यतापिलभ्यते अतएवचतिथिःसशल्यापरिवर्जनीयाधर्मार्थकामेषुबुधैर्मनुष्यैः विहीनशल्यापिविवर्जनीया
यदाग्रतोवृद्धिमुपैतिपक्षइत्यपिवचनंपक्षशब्दस्यापितिथिपरत्वादेकादशीविषयंपूर्वोक्तव्यवस्थानुगुण्येनैवव्याख्या
नमनंतभट्टादिभिः पक्षशब्दस्वरसात्पक्षवर्धनीविषयंवाव्याख्येयं ननुकथंचिदत्रापिशुक्लपक्षप्रतीतिः तस्मात्द्वाद
शीमत्राधिक्येपिद्वादश्यामेवोपवासःपक्षद्वयेपि यत्तुसमयोद्योतसर्वत्रैकादशीकार्यादशमीमिश्रितानरैः प्रात
र्भवतुमावाभूद्यतोनित्यमुपोषणमितिवचनंलिखित्वातत्रप्रातस्त्रयोदश्यांद्वादशीभवतुमावाभूदितिव्याख्याय
तेनत्रयोदश्योद्वादशीसत्वेपिविद्धायामेवोपवासइत्युक्तं तत्रदशमीमिश्रितेकादशीत्युक्ते तदुत्तराव्यवहितप्रातःका
लस्यैव प्रातःपदात्प्रतीतेस्त्रयोदशीप्रातःकालविषयत्वेनव्याख्यानंतावदयुक्तं अव्यहितोत्तरप्रातर्ग्रहणेतुद्वादश्या

BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

प्रातरेकादशीभवतु मावाभूदित्यर्थः स्यात्तत्रैकादशीमात्राधिक्येमुपवासः स्यात्तदपिबहुवचनविरुद्धमितिहेमाद्र्यादिसकल
निबंधेषुदृष्टं सर्वत्रैकादशीकार्याद्वादशीमिश्रितानैरित्येवंरूपमेतद्वचनं तेनयथोक्तैवव्यवस्था एवमष्टस्वपिभेदेष्वेकादशीनि
र्णीता तेनैषसंग्रहः सर्वैरप्युपनीतैश्चशक्तैस्तत्कालमात्रके भक्ष्यमात्रंनभोक्तव्यंशुक्ले कृष्णेहरेर्दिने तत्रापिगृहिणांकृष्णेत
द्भिन्नानांचयत्रवा निराहारस्थितिर्नोक्तातत्रमूलादिभक्षणं व्रतंतुनित्यंगृहिणांशुक्लायामेवपुत्रिणां तद्भिन्नानांतुसर्वेषांक
ष्णायामपितद्भवेत् शयनीबोधिनीमध्येकृष्णायांपुत्रिणामपि तत्रापिशूद्रगृहिणांपुत्रिणांनेतिकेचन वैष्णवानांतुसर्वेषां
कृष्णायामपितद्भवेत् निषेधोरविवारादौतन्निमित्तोपवासगः श्राद्धप्राप्तावप्युपोष्यमाघ्रायपितृसेवितं कृष्णायामपिका
म्यंतुपुत्रवद्गृहिणामपि सधवाप्यननुज्ञाताव्रतादिष्वधिकारिणी पुष्पालंकारवस्त्रादिव्रतेप्यस्यानदुष्यति शारीरनिय
मोपेतंव्रतंकार्यंरजस्यपि आशौचेचतथासर्वैः पूजामन्येनकारयेत् पारयित्वापिचांतेगांदानहोमादिकंभवेत् नित्येप्रार
ब्धकाम्येचपयोमूलादिभक्षणं नक्तैकभक्ताद्यपिवाभवेन्मुख्यसमर्थकः मुख्याशक्तावशक्तौच तत्रापिस्त्रीसुतादिभिः द्वि
जोक्तमिनवादत्वादक्षिणांकारयेद्धुतं विहितानांमनुष्ठानंनिषिद्धानांचवर्जनं दिनत्रयगतंकाम्येवश्यंकार्यंननित्यके स
र्वेष्वेवोपवासेषुप्रातःपारणमिष्यते तेनमध्याह्निकमपितत्रैवाकृष्यवर्तयेत् द्वादश्याः प्रथमः प्रथमः पादः पारणाहेभवेद्य
दि प्रातस्तदातमुल्लंघ्यपारयेद्धरिवासरं द्वादशीभुजिपर्याप्तायदितत्रैवपारयेत् प्रातर्मध्याह्नयोः कृत्यंनित्यंनिर्वर्त्यचो
षसि त्रयोदश्याह्निकालभ्ययोगादियदिवारिणा भद्रांतः पारयित्वापिस्वकालेतत्तदाचरेत् सूर्योदयात्पूर्वतनमरुणो
दयसंज्ञकं मुहूर्तद्वितयंव्याप्याग्रिमसूर्योदयावधि एकादशीस्थिताशुद्धा यदितत्रारुणोदये दशमीसंयुताकिंचिदपिवि
द्धाततः स्मृता साविद्धावैष्णवैर्नित्येप्येकस्याअप्यनिर्गमे परित्याज्यातदन्यैस्तु काम्येसतिचसंभवे नित्यादोसात्तुवि
द्धैवतान्यत्रयथतुसर्वदा विद्धाकदाचित्ग्राह्यापि युक्तासूर्योदयेदिशा एतावताविशेषेणव्यवस्थावचनंसतां ग्रंथे ४८

99
1942

वैष्णवतद्भिन्नविषयत्वेनवेधयोः एवंव्यवस्थितेवेधेविद्धात्याज्यैववैष्णवैः शुद्धाप्यन्यतराधिक्यइतिवैष्णवनिर्णयः
वेधेनार्कोदयस्थेनक्रियतेस्मार्तनिर्णयः शुद्धाविद्धाद्विधैकैकाचतुर्धाधिक्यभेदतः प्रथमायाद्वितीयायाउभयोर्नोभयोरि
ति तत्रयानधिकाशुद्धासैवोपोष्याखिलैरपि द्वादश्याअधिकत्वेपिद्वयाधिक्येपरैवसा शुद्धाधिकायांद्वादश्याअत्राधि
क्येयतिःपरां गृहीपूर्वांहरिप्रीतिकामः कुर्याद्द्वयीमपि विद्धायामुभयाधिक्येसर्वेषामुत्तरामता एकादश्याअनाधिक्येवि
द्धायान्यूनतात्कृते द्वादश्यानधिकत्वेचपुत्रीतरगृहाश्रमैः यत्यादिभिश्चसोपोष्यापुत्रिभिर्द्वादशीतदा समत्वेनत्वनाधि
क्येविद्धायाःपुत्रिणामपि पूर्वापरामुमुक्षूणांन्यूनत्वेनापिनाधिका विद्धापरैवद्विक्षूणामितिकेचित्प्रचक्षते विद्धा
धिकायदानंदाद्वादश्यनधिकासमा तदापरैवसर्वेषांन्यूनाचेद्द्वादशीतदा नक्तंस्यात्पुत्रिगृहिणांनंदात्वनाधिकाप
रा यदिस्यादधिकातत्रशुक्लेकृष्णेविशेषतः द्वादशामुपवासश्चद्वादश्यामेवपारणमिति अयमत्रकाम्योपवा
सप्रयोगक्रमः दशम्यांदिवैवकांस्यमांसक्षारलवणादिवर्जंहविष्यमन्नमनत्याशंभुक्त्वा तदनंतरंदंतकाष्ठेनदंतान्सं
शोध्यतस्यामेवरात्रौश्वःकरिष्यमाणोपवासोद्देशेनाष्टांगमैथुनवर्जनभूमिशयनादिनियमान्दिनत्रयकर्तव्यान्स्वी
कुर्यात् ततोनियमेनतांरात्रिमतिवाह्यदंतधावनवर्जंप्रातः स्नात्वानित्यकृत्यंविधायार्धरात्रादर्वागेवासमाप्तयाद
शम्यायुक्तायामेकादश्यांचेदुपवासस्तदाप्रातरेवतदूर्ध्वमप्यनुवर्तमानयायुक्तायांचेदाद्यमेकादश्यर्द्धेत्यक्त्वासूर्यो
दयादुपर्यप्यनुवर्तमानयायुक्तायांचेद्रात्रौदर्भपाणिरुदङ्मुखो यवतिलमिश्रवारिपूर्णताम्रमयंपात्रमादायामुकफल
कामएकादश्यांनिराहारः स्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युतेति मंत्रेणपात्रस्थजलप्रक्षेपेणसं
कल्पंकुर्यात् ततःपुष्पांजलिंदेवायसमर्प्य पुनस्तत्पात्रजलमादाय ओंनमोनारायणायेतित्रिरभिमंत्रितंतज्जलंपीत्वा
विचित्रपुष्पविरचितायांपट्टवस्त्राद्यावृतपुष्पमंडपिकायांप्रतिमायांशालग्रामशिलायांवामूलमंत्रेणवैदिकमंत्रेणवादि

नमींतचतुर्थ्यंतनाम्नावाषोडशोपचारैर्यथाविभवंविष्णुंसंपूज्यजपहोमप्रदक्षिणास्तोत्रपुराणवाचनश्रवणगीतवाद्यादि
भिर्दिवसंयुक्तस्तस्यांरात्रौजागरणंविधायप्रातःस्नात्वासंभावितांन्नियमलोपांस्तत्तद्विशेषविहितप्रायश्चित्तेनशरीरमं
तःकरणोपघातंवाचश्चविष्णुर्भगवानशेषंशमंनयत्वस्तुममैवशर्मपापादनंतेहृदिसंनिविष्टेअंतःशुद्धिंबहिःशुद्धिं
शुद्धोधर्ममयोच्युतःसकरोतुममैतस्मिन्नशुचिर्वाभिसर्वदा वाक्योपघातानघोघोढांश्चभगवानजःशमंनयत्वनं
तात्माविष्णुश्चेतसिसंस्थितइतिमंत्रेणचसमर्चांविधाय अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसीदसुमुखोना
थज्ञानदृष्टिप्रदोभवेतिमंत्रेणोपवासंविष्णवेसमर्प्यपंचमहायज्ञान्कृत्वायथाविभवंब्राह्मणान्भोजयित्वादक्षिणा
दानेनसंतोष्यद्वादशीभोजनमात्रपर्याप्ताचेदुषस्येवमध्याह्निकपर्यंतंश्रौतवर्जंविधायनैवेद्यतुलसीमिश्रेणनिरा
मिषेणमधुमांसतैलपाकादिशाकवर्जितेनान्नेनकांस्यवर्जितेभाजनेयथाविभवंबंधुभिःसहसकृद्भुक्त्वोपक्रांतं
नियमयुक्तोरात्रिमतिवाहयेदिति नित्येतुशक्यविहितानुष्ठाननिषिद्धवर्जनोपेतमेकादश्यांवायुपर्यंताभ्यवहार्या
नभ्यवहरणात्मकंप्रधानमात्रमवश्यंकृत्वाद्वादश्यांपूर्ववत्पारणांकुर्यात् अशक्तस्यानुकल्पाउक्ताएवेति इत्येकाद
शीनिर्णयः कृष्णैकादश्युभयैकादश्यादिषुव्रतविशेषप्रकारास्तुव्रतकांडेद्रष्टव्याः विष्णोःशयनपरिवर्तनप्र
बोधोत्सवाश्चाषाढभाद्रपदकार्तिकशुक्लैकादशीषुप्रकर्तव्याः तथाचब्रह्मपुराणे एकादश्यांतुशुक्लायामाषाढे
भगवान्हरिः भुजंगशयनेशेतेतदाक्षीरार्णवेसदा एकादश्यांतुशुक्लायांकार्तिकेमासिकेशवं प्रसुप्तंबोधयेद्रात्रौ
भक्तिश्रद्धासमन्वितइति भविष्योत्तरेपि प्राप्तेभाद्रपदेमासि एकादश्यांदिनेसिते कटिदानंभवेद्विष्णोर्महापातक
नाशनमिति कटिदानमंगपरिवृत्तिकरणं मत्स्यपुराणेपि शेतेविष्णुःसदाषाढेभाद्रेचपरिवर्तते कार्तिकेचप्रबु
ध्येतशुक्लपक्षेहरेर्दिनमिति तत्रापिविशेषः निशिस्वापोदिवोत्थानंसंध्यायांपरिवर्तनमिति आसुचैकादशीषुवक्ष्य ४९

माणनक्षत्रतद्भागयोगोनियमतोनापेक्षितःप्रमाणाभावात् तथात्वे त्रयोदशीवदेकादश्याअपिवक्ष्यमाणवचनादेवप्राप्तिसिद्धेः
पुनर्वचनानर्थक्याच्च निशादिवेलाविशेषस्त्वादरणीयएव विष्णुधर्मोत्तरे एकादशीमारभ्यद्दिनपंचकंशयनप्रबोधोत्सवावुक्तौ
एकादश्यामाषाढस्यशुक्लपक्षेजनार्दनं देवाश्चऋषयश्चैवगंधर्वाप्सरसांगणाः अभिष्टुवंतितेगत्वासंततंदिनपंचकं उत्स
वंचैवकुर्वंतिगीतनृत्यसमाकुलं ततस्तुचतुरोमासान्योगनिद्रामुपासते सुप्तंचतमुपासंतिऋषयोब्रह्मसंमताः स्वशरी
राणिशस्त्राणिभक्तास्तंदेवमागताः कार्तिकस्यसितेपक्षेतदेवदिनपंचकं विबोधयंतिदेवेशंगत्वासेंद्रादिवौकसः देवास्त
थैवकुर्वंतितदापिचमहोत्सवमिति वराहपुराणे एतेष्वेवमासेषुशुक्लद्वादशीषुशयनादिकमुक्तं आषाढमासेद्वादश्यांसर्व
शांतिकरंशुभं यएतेनविधानेनज्ञात्वामिकर्मकारयेत् सपुमान्नप्रणश्येतसंसारेषुयुगेयुगे तथाच इयंचद्वादशीदेवप्रबोधा
र्थंतुनिर्मिता त्वयैवसर्वलोकानांहितार्थंशेषशायिनेति मध्यवर्तिनिपरिवर्तनेपिद्वादश्येवग्राह्या एतास्वद्वादश्योत्तरा
त्रिसंध्यादिनेषुअनुराधाश्रवणरेवतीनामादिमध्यांतभागयुक्ताःक्रमेणस्वापादिषुप्रशस्ताः तथाचभविष्यपुराणे आ
भाकासितपक्षेषुमैत्रश्रवणरेवती आदिमध्यावसानेषुप्रस्वापावर्तनोत्सवाइतिरेवतीत्यत्रषष्ठीलोपःउत्सवोजागरणं
अतएवनारदीयेवचनांतरं मैत्राद्यपादेस्वपितीहविष्णुःश्रुतेश्चमध्येपरिवर्तनेति पौष्णावसानेचसुरारिहंताप्रबुध्यते
मासचतुष्टयेनेति यदातुद्वादशीषुतानिनक्षत्राण्येकदेशेनापिनभवंति किंत्वेकादशीषुत्रयोदशीषुवातदातत्रापितत्तदृक्षभा
गयोगकालएवनिशादिवेलानादरेणैवप्रस्वापादिकार्यं अप्राप्तेद्वादशीमृक्षेउत्थानशयनेहरेः पादयोगेनकर्तव्येनाहोरात्रंवि
चिंतयेत् इतिजीमूतवाहनोदाहृतवचनात् उत्थानशयनग्रहणमहोरात्रग्रहणंचोपलक्षणं तेनयदाद्वादशीषुराज्यादिभा
गेषुतत्तन्नक्षत्रभागानामयोगस्तदाद्वादशीनक्षत्रमात्रयोगोपिराज्यादिगतोग्राह्यः पादयोगोयदानस्यादृक्षेणापितदाभवेदि
ति वराहपुराणवचनात् विष्णुर्दिवानस्वपितिनचरात्रौविबुध्यते द्वादश्यामृक्षसंयोगेपादयोगोनकारणमिति विष्णुधर्मोत्त

त्राच्च यदातुद्वादशीषुयानिनक्षत्राण्येकदेशेनापिनभवंतिनपरिवर्तनमपितदापाद्योगेनान्यतिथौसंध्यानादरेणकर्तव्यं अ
तएवनिशिस्वापइत्यस्यानंतरार्धपादयोगादन्यतिथौद्वादश्यामृक्षसंगमादितिनिशिस्वापइत्यादिचद्वादश्यामेवान्वेति अन्य
तिथौसंध्यानाहोरात्रंविचिंतयेदित्युक्तत्वात् एवंचद्वादश्यांनिशाद्यादरे अन्यतिथौच नक्षत्रभागयोगादरेनियतेयदाद्वाद
शीषुनिशादिरन्यत्रतत्तदृक्षभागयोगोन्यतिथौचतदितरनक्षत्रभागस्यैवयोगः तदातत्रद्वादशीष्वेवप्रस्वापादिकर्तव्यं
तत्रत्वयंविशेषः सायंसंध्यायांप्रस्वापावर्तनेप्रबोधश्चेति द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे आभाकासितप
क्षेषुशयनावर्तनादिकमितिवराहपुराणवचनात् संधिसमयइतिशयदावन्वेति संधिसमयश्चसायंसंध्येवरेवत्यं
तोयदारात्रौद्वादश्यांचसमागमः तदाविबुध्यतेविष्णुर्दिनांतेप्राप्यरेवतीमितिजीमूतवाहनोदाहृतवचनात् रेवत्यं
तविबोधग्रहणंचोपलक्षणं क्वचित्त्वाषाढकार्तिकपौर्णमास्योः प्रस्वापप्रबोधावुक्तौ तथाचयमः क्षीराब्धौशेष
पर्यंके आषाढ्यांसंविशेद्धरिः निद्रांत्यजतिकार्तिक्यांतयोः संपूजयान्हरिं ब्रह्महत्यादिकंपापंक्षिप्रमेवव्यपोहतीति
नचाषाढस्येयंकार्तिस्येयमितिछविषयेप्यौत्सर्गिकानुकरणेनाषाढीकार्तिकीपदे एकादशीपरे एवेतिकल्पतरूक्तंयु
क्तं आषाढशुक्लपक्षांतेभगवान्मधुसूदनः भोगिभोगेनिजांमायांयोगनिद्रांसमाश्रुयात् शेतेसोचतुरोमासान्या
वद्भवतिकार्तिकी विशिष्टानप्रवर्तंतेतदायज्ञादिकाःक्रियाइतिविष्णुधर्मोत्तरेपक्षांतइतिस्पष्टमभिधानात् द्वादशी
यदमेकादशीपरमित्यपितदुक्तमयुक्तं प्रतिपद्धनदस्योक्तापवित्रारोपणेतिथिः श्रियोदेव्याद्वितीयातुतिथीनामुत्त
मास्मृता तृतीयास्याद्भवान्याश्चचतुर्थीतत्सुतस्यच पंचमीधर्मराजस्यतथाषष्ठीगुहस्यच सप्तमीभास्करस्योक्तादु
र्गायाअष्टमीस्मृता मातृणांनवमीचैवदशमीवासुकेःस्मृता एकादशीऋषीणांचद्वादशीचक्रपाणिनः त्रयोदशी
त्वनंगस्यशिवस्योक्ताचतुर्दशीममचैवमुनिश्रेष्ठपौर्णमासीतिथिःस्मृता यस्ययस्यचदेवस्ययन्नक्षत्रंतिथिस्तथा ५०

तस्यदेवस्यतस्मिंस्तुशयनावर्तनादिकमितिभोजदेवलिखितशयनतिथिक्रमवचनविरोधात् तेनतिस्रस्तिथयोवैकल्पि
काःशयनादिकालास्तेषांचयथासंप्रदायंव्यवस्थेत्येवयुक्तं चातुर्मास्यव्रतारंभोप्याषाढशुक्लैकादशीद्वादशीपौर्णमासी
षुकर्कसंक्रांतिदिनेवाविकल्पेनकर्तव्यः एकादश्यांतुगृह्णीयात्संक्रांतौकर्कटस्यवा आषाढ्यांवानरोभक्त्याचातुर्मास्य
व्रतंव्रतमितिसनत्कुमारवचनात् आषाढशुक्लद्वादश्यांपौर्णमास्यामथापिवा चातुर्मास्यव्रतारंभंकुर्यात्कर्कटसंक्र
मइतिवाराहवचनाच्च यदाकदाप्यारंभेसमाप्तिःकार्तिकशुक्लद्वादश्यामेवकर्तव्या चतुर्धापिहितच्चीर्णंचातुर्मास्यव्र
तंनरः कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेदितिवाराहपुराणएवाभिधानात् चतुर्धाएकादशीद्वादशीपौर्णमासी
संक्रांतिष्वारब्धमित्यर्थः मत्स्यपुराणेत्वनियमेनापिसमापनमुक्तं चतुरोवार्षिकान्मासान्देवस्योत्थापनावधिरिति
कार्तिकमाहात्म्येचतुर्दश्युपवासपूर्वकंपौर्णमास्यामुक्तं चातुर्मास्यव्रतारंभश्चगुरुशुक्रमौढ्यादावपिकर्तव्यः तथा
चवृद्धगार्ग्यः नशैशवंनमौढ्यंचशुक्रगुर्वोर्नवातिथिः खंडत्वंचिंतयेच्चादौचातुर्मास्यविधौनरइति तेनचातुर्मास्येय
त्किंचित्व्रतमवश्यंकार्यं अतएवमहाभारते आषाढेतुसितेपक्षेएकादश्यामुपोषितः चातुर्मास्यव्रतंकुर्यात्यत्किं
चिन्नियतोनरइति चातुर्मास्यव्रतानिचव्रतकांडादिषुद्रष्टव्यानि आषाढेभाद्रऊर्जेचप्रस्वापावर्तजागराः कार्याःशुक्लै
कादशीषुरात्रिसंध्यादिनेष्वपि यद्वातन्मासतत्पक्षगतासुद्वादशीष्वमी मैत्रश्रवणरेवत्यादिममध्यांतभागकैः यु
क्तासुकेवलर्क्षैर्वाप्यलाभेसर्वथातुभैः योगस्यद्वादशीष्वेतेकार्यास्तिथ्यंतरेष्वपि तत्तन्नक्षत्रभागेषुनिशासंध्याघना
दरात् यदानिशादेरन्यत्रद्वादशीषूक्तभांशकैः योगोन्यभांशैरेवान्यतिथौतत्तद्धरौतथा साम्यंप्रस्वापबोधोचशुक्ल्यू
र्जभितपर्वणोः एकादश्यांशुचौशुक्लेहरौपर्वणिसंक्रमे चातुर्मास्यव्रतारंभः समाप्तिस्तूर्जशुक्लगे हरौपर्वणिवाकार्या
प्रबोधस्यदिनेपिवेतिसंग्रहः इतिविष्णोःशयनादिनिर्णयः अथश्रवणद्वादश्यास्तदितरमहाद्वादशीनांचनि

र्णयः तत्रद्वादश्या अल्पश्रवणयोगेपिश्रवणद्वादशीयोगप्रयुक्तमुपवासादिभवत्येव नतूपवासकर्मकालभूताहोरात्रो
भयव्याप्तयेतदुभयस्पर्शायवाउदयाद्दपर्यंतत्वमस्तमयपर्यंतत्वंवातद्योगस्यापेक्षितं तदुक्तंमत्स्यपुराणे द्वादशीश्र
वणस्पृष्टाकृत्स्नापुण्यतमातिथिः नतुसातेनसंयुक्तातावत्येवप्रशस्यतइति यावतीतेनसंयुक्तातावत्येवप्रशस्यतइति
तावत्यांकर्तुंशक्यंयत्संगमस्नानपूजादाभादितदेवकुर्यान्नतूपवासादितदपिचतद्योगकालएवकुर्यातनतुतत्पूर्वोत्त
रकालयोरित्यनेनेत्यर्थः श्रवणद्वादशीप्रक्रम्यनारदीयेपि तिथिनक्षत्रयोर्योगोयोगश्चैवनराधिप द्विकलोयदिलभ्ये
तसज्ञेयोष्टयामिकइतियोगःशिवयोगादिःशिवचतुर्दश्यादिः पुण्यतमत्वप्रयोजकः यत्तुव्यतीपातवैधृत्यादे
र्योगस्यतावत्कालिकत्ववचनंतत्तन्मात्रप्रयुक्तदानादिविषयंमुहूर्तमप्यहोरात्रइत्यादिवचनाद्रोहिणीयोगोपि
श्रवणयोगवदेव तेननक्षत्रयोगप्रयुक्तेतरमहाद्वादश्यादिषुउपवासादावुदयपर्यंतोस्तमयपर्यंतोवानक्षत्रयो
गोवश्यमपेक्षितः तिथिनक्षत्रयोरितिवचनस्यबहुनिबंधेषुश्रवणद्वादशीप्रकरणगतत्वाभिधानेनतन्मात्रवि
षयत्वात् केचित्वस्यसामान्यवचनत्वमंगीकृत्यश्रवणरोहिणीयोगवदल्पेनापीतरनक्षत्रयोगोवश्यमपेक्षितः
तिथिनक्षत्रयोरितिवचनस्यबहुनिबंधेषुश्रवणद्वादशीप्रकरणगतत्वाभिधानेनतन्मात्रविषयत्वात् केचित्व
स्यसामान्यवचनत्वमंगीकृत्यश्रवणरोहिणीयोगवदल्पेनापीतरनक्षत्रयोगेनापिसकलायास्तिथेःपुण्यत्वमि
च्छंति तत्रश्रवणरोहिणीविषयस्यपुनर्वचनस्यप्रयोजनंचिंत्यं तत्रयातावदेकस्मिन्नेवश्रवणयोगवतीशुद्धा
शुद्धाधिकावाविद्धाविद्धाधिकावातस्यांसंदेहएवनास्ति यदाविद्धाधिकायादिनद्वयेपिश्रवणयोगस्तदैकाद
शीयुताग्राह्या द्वादशीश्रवणस्पृष्टास्पृशेदेकादशीयंदा सएववैष्णवोयोगोविष्णुशृंखलसंज्ञितः उपोष्यवि
धिवत्तत्रनरःसंक्षीणकल्मषः प्राप्नोत्यनुत्तमांसिद्धिंपुनरावृत्तिदुर्लभामितिमत्स्यपुराणवचनात् तत्रैणचत ५१

दाएकादशीद्वादशीप्रयुक्तमुपवासद्वयं तत्रैवयदाश्रवणमेकादशींस्पृष्ट्वाद्वादशींस्पृशति तदातिप्राशस्त्यमुक्तंनारदीयेपि संस्पृ
श्यैकादशींराजन्द्वादशींयदिसंस्पृशेत् श्रवणंज्योतिषांश्रेष्ठंब्रह्महत्यांव्यपोहतीति यदातुशुद्धाधिकायादिनद्वयेपिश्रवण
योगः उत्तरदिनएवचोदयकालीनःसतदोत्तराग्राह्या उदयव्यापिनीग्राह्याश्रवणद्वादशीव्रतइतिबृहन्नारदीयवचनात् ए
तस्यचशुद्धाधिकाविषयेसावकाशत्वान्नपूर्वविषयेप्रवृत्तिस्तेनविद्धाधिकायामुत्तरदिनेउदयकालीनश्रवणयोगेपिपूर्व
स्याग्रहणं अतएवाविरोधाच्चशुद्धाधिकापूर्वदिनेपिउदयकालीनश्रवणयोगवतीपूर्वैव व्रतत्वकर्मकालव्यापित्वात् यदा
तुद्वादश्याःश्रवणयोगएवनास्तिएकादश्येवतुतद्वतीतदातस्यामपिश्रवणद्वादशीप्रयुक्तंव्रतंकर्तव्यं तदुक्तंनारदीयपुराणे
यदानप्राप्यतेऋक्षंद्वादश्यांवैष्णवंक्वचित् एकादशीतदोपोष्यापापघ्नीश्रवणान्वितेति विष्णुपुराणेपि याःकाश्चित्तिथ
यःप्रोक्ताःपुण्यानक्षत्रयोगतः तास्वेवतद्व्रतंकुर्यात्श्रवणद्वादशीविनेति श्रवणद्वादशीव्रतंतुद्वादश्याःश्रवणयुक्ताया
अलाभेप्येकादश्यामपिताद्दश्यांकर्तव्यमित्यर्थः जयाचविजयाचैवजयंतीपापनाशिनीत्यभिधायपुष्यश्रवणपुष्याद्य
रोहिणीसंयुतास्तथेतिब्रह्मवैवर्ते क्रमेणतासांलक्षणाभिधानात्श्रवणायुक्ताद्वादशीविजयसंज्ञा तथातादृश्याद्वादश्या
अलाभेतादृश्येकादश्यपि एकादशीयदाशुक्लाश्रवणेनसमन्विता विजयासातिथिःप्रोक्ताभक्तानाविजयप्रदेतिभवि
ष्योत्तरात् किंतुतदातदुक्तप्रकारविशेषेणपूजादिकर्तव्यं विद्धाधिक्येपिचोत्तरदिनेश्रवणयोगाभावेतादृशीदशमीवि
द्धापिग्राह्या दशम्येकादशीयत्रसानोपोष्याभवेत्तिथिः श्रवणेनतुसंयुक्तासाशुभासर्वकामदेतिवह्निपुराणात् तथाप्यै
कादश्युपवासस्तेनसहतंत्रमेव यद्यपिचभविष्योत्तरेनारदीयविष्णुपुराणवत्श्रवणयुक्तद्वादश्यलाभविषयत्वेतादृश्यै
कादश्यांनप्रतीयते किंतुतल्लाभेतिस्वतंत्रमिदमप्येकंव्रतमिति मदनरत्नादावपितथैवोक्तं पारणदिनेश्रवणापेक्षया
द्वादश्याधिक्येश्रवणमुल्लंघ्यद्वादशीमध्येएवपारणंनतुद्वादश्यंतंप्रतीक्ष्यंद्वादश्यास्तत्रानुपोष्यत्वात् द्वादश्यपेक्षयाश्र

का०त०
५२
वणाधिक्येचोपोष्यंश्रवणमप्युल्लंघ्यत्रयोदश्यामपिपारणं पारणंतिथिवृद्धौतुद्वादश्यामुडुसंक्षयात् उडुवृद्धौत्रयोदश्यां
त्रदोषोनविद्यतइतिवह्निपुराणवचनादितिचपारणानिर्णयः कृतस्तथापिनारदीयाद्येकवाक्यतयातत्रापितादृश्यलाभ
विषयत्वमेवतादृश्येकादश्याद्रष्टव्यं लाघवात् पूजादिप्रकारभेदोपदेशस्तुजयंतीवदुपपन्नः पारणाविषयेवह्निपुराण
चविष्णुशृंखलविषयं शुद्धाधिकाविषयंवाभविष्यति एवाव्युष्टिः समाख्याताएकादश्यामयातव पृथगेवसमाख्या
ताद्वादशीश्रवणान्वितेति भविष्योत्तरवचनंतुव्युष्टिग्रहणात्फलभेदाभिप्रायं नव्रतस्वरूपभेदाभिप्रायं यदाचैकादशी
श्रवणद्वादश्युपवासौदिनभेदेनप्राप्नुतस्तदाशक्तेनद्वयमपिकर्तव्यं तदुक्तंभविष्योत्तरे एकादशीमुपोष्यैवद्वादशीम
प्युपोषयेत् नतत्रविधिलोपःस्यादुभयोर्दैवतंहरिरिति पारणांतंव्रतंज्ञेयंव्रतांतेविप्रभोजनं असमाप्तेव्रतेपूर्वे
नैवकुर्याद्व्रतांतरमितिविष्णुधर्मोत्तरेऽस्यपारणारूपांगविधेस्तस्मिन्नकृतेव्रतांतरारंभनिषेधविधेर्वालोपोबा
धोनस्यादुभयोरेकदैवत्वादित्यर्थवादः प्रधानत्वेकाम्यत्वेननिरवकाशत्वेनचपारणांगबाधस्यव्रतांतरोपक्रमस्य
चचतुर्थीपंचम्यादाविवन्यायप्राप्तत्वेनविधिबाधाप्रसक्तेस्तत्समाधानानपेक्षणात् यस्तुश्रवणद्वादश्येतरेउ
पक्रांतकृतिचिकीर्षव्यापिश्रवणद्वादशीव्रतप्रयोगउपवासद्वयासामर्थ्यानिश्चयाच्चकृतप्रकृतैकादशीव्रतसंकल्पः
पश्चात्तत्रासमर्थःससंकल्पितमेकादश्युपवासंविधायश्रवणद्वादश्यांतत्प्रयुक्तविष्णुपूजादिविधायभुंजीतसं
कल्पबाधप्रसंगाच्छिष्टविरोधप्रसंगाच्च तदुक्तंमत्स्यपुराणे द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंयदि उपोष्यैकादशी
तत्रद्वादश्यांपूजयेद्धरिमिति हरिपूजामेवकुर्यान्नतूपवासमित्यर्थः उपवासकरणेतदंगहरिपूजायाःप्राप्तत्वादेवत
द्विधिवैयर्थ्यात् यस्तुतादृशःप्रागेवनिश्चितोपवासद्वयासामर्थ्यःसकाम्यंनित्यस्यबाधकमितिन्यायेनश्रवणद्वा ५२
दश्यामेवोपवासंकुर्यात् तदुक्तंनारदीये उपोष्यद्वादशींपुण्यांवैष्णवर्क्षेणसंयुतां एकादश्युद्भवंपुण्यंनरःप्राप्नो

107/194

त्यसंशयं वाजपेयेयथायज्ञेकर्महीनोपिदीक्षितः सर्वफलमवाप्नोतिअस्नातोप्यकृतोपिसन्निति दृष्टांतेनवाचनिक
वन्यायेपिबाधेप्रत्यवायोनास्तीतिज्ञाप्यतेवाजपेयपर्यंतंगमनंबकुदीक्षत्वात् श्रवणद्वादशीनिमित्तोपवासपार
णंतुपारणादिनेउभयानुवृत्तावुभयांतइतिमुख्यःपक्षः तिथिरष्टगुणंहंतीत्यादिवचनात् अन्यतरांतइतिगौणः संयो
गिकइत्यनेनोक्तस्यतस्यकालस्यान्यत्रोभयांततुल्यत्वेपि अत्रयाःकाश्चित्तिथयःप्रोक्ताःपुण्यानक्षत्रयोगतः ऋक्षांते
पारणंकुर्याद्विनाश्रवणरोहिणीमितिवचनेश्रवणरोहिणीपर्युदासस्यश्रवणरोहिणीयोगनिमित्तव्रतेउभयांतपक्षस्य
मुख्यत्वद्योतनार्थत्वात् नत्वत्रतिथ्यंतोवश्यंप्रतिक्षणीयोनतुनक्षत्रमात्रांतेपारणंकर्तव्यमित्येतत्परमिदं भांतेकु
र्यात्तिथेर्वापीत्यादिभिर्वचनैर्नक्षत्रांतेपिजयंतीपारणविधानात्तद्विरोधापत्तेः रोहिण्यांशेतद्योगाद्युक्तप्रयोजना
र्थत्वस्यैवावश्यंवक्तव्यत्वात्तत्साहचर्येणवोवैरूप्याश्रवणांशेपि तस्यैवोचितत्वादित्यादिसर्वंजन्माष्टमीप्रकरण
एवोक्तं मदनरत्नादौतुजयंत्यांनक्षत्रमात्रांतपारणाविधिवत्श्रवणद्वादश्यांतदभावात्पर्युदासवशादत्रनक्षत्रमात्रांते
पारणंनभवत्येवकिंतूभयांतेतिथिमात्रांतेवेत्युक्तं इयंचश्रवणद्वादशीबुधवासरयुक्तातिप्रशस्ता श्रवणद्वादशीयोगे
बुधवारोयदाभवेत् अत्यंतमहतीनामद्वादशीसाप्रकीर्तितेतिविष्णुधर्मोत्तरवचनात् भाद्रपदेसात्यंतफलप्रदातथा
चस्कंदपुराणे मासिभाद्रपदेशुक्लाद्वादशीश्रवणान्विता महतीद्वादशीज्ञेयाउपवासेमहाफला बुधश्रवणसंयुक्तासा
चेवद्वादशीभवेत् अत्यंतमहतीतस्यांदत्तंभवतिचाक्षयमिति अत्रसंगमस्नानादिकर्तव्यं स्नानंजाप्यंतथादानंहो
मश्राद्धसुरार्चनं सर्वमक्षय्यफलदंतस्यांभृगुकुलोद्वह तस्मिन्दिनेतुयःस्नातोयत्रबद्धचनसंगमे सगंगास्नानजंरा
मफलंप्राप्नोत्यसंशयं श्रवणेसंगमाःसर्वेपरव्युष्टिप्रदाःसदा विशेषाद्द्वादशीयुक्तेबुधयुक्तेविशेषतइत्यादिविष्णु
धर्मोत्तरेभिधानात् इतरमहाद्वादश्यस्तुपंचब्रह्मवैवर्तेभिहितं उन्मीलिनीवंजुलीनिस्पृशापक्षवर्द्धिनी जयाचवि

त्रयोचैवजयंतीपापनाशिनी द्वादश्योष्टौमहापुण्याः सर्वपापापहाद्विज तिथियोगेनजायंतेचतस्रश्चापरास्तथा न
क्षत्रयोगात्प्रबलंपापंप्रशमयंतिताः एकादशीतुसंपूर्णावर्धतेपुनरेवसा तद्धक्ताद्वादशीत्यर्थः उन्मीलिनीभृगुश्रेष्ठक
थितापापनाशिनी द्वादश्यामुपवासोत्रद्वादश्यामेवपारणं वंजुलीनामसाप्रोक्ताहत्यायुतविनाशिनी अरुणोदयआ
द्यासाद्वादशीसकलंदिनं अंतेत्रयोदशीप्रातस्त्रिस्पृशासाप्रकीर्तिता आद्येकादशी अरुणोदयेस्सूर्योदये एकादशीद्वा
दशीचरात्रिशेषेत्रयोदशी त्र्यहस्पृक्तदहोरात्रद्वादशीसमुपोषयेत् इदमुपवासद्वयासमर्थद्वादशीफलार्थिनंप्रति श्रवण
द्वादशीवत् पुष्यश्रवणपुष्याद्यरोहिणीसंयुतास्तथा उपोषिताः समफलाद्वादश्योष्टौपथक्पृथगिति पुष्याद्यंपुनर्वसु
समस्वर्गादिफलाः नतुकश्चिदासांमिथोविशेषइत्यर्थः अत्रातिथियुक्तासुनकोपिसंदेहः श्रवणद्वादशीनिर्णयेत्वेव
नक्षत्रयोगप्रयुक्तितरमहाद्वादशीत्रयेसूर्योदयारभ्यद्वितीयतत्सूर्योदयमस्तमयपर्यंतंवायोगस्यसत्वमपेक्षितं प्रातःसंक
ल्पयेद्विद्वानुपवासव्रतादिकमित्युपवाससंकल्पस्यसूर्योदयानंतरकालत्वेनउपवासस्यचाहोरात्रसाध्यत्वेनयोयस्य
विहितःकालःकर्मणोयस्ययःकालः दिवारात्रौव्रतंयच्चेत्यादि सामान्यवचनेभ्यः श्रवणरोहिणीयोगवच्चाल्पकाल
स्यापीतरनक्षत्रयोगस्यग्राह्यत्वेप्रमाणाभावात् तिथिनक्षत्रयोर्योगइत्यस्यप्रकरणात्श्रवणद्वादशीविषयत्व
स्योक्तत्वात् कृत्तिकादिभरण्यंतंताराणवासरसप्तकं नैतेसंयोगमात्रेणपुनंतिसकलांतिथिमिति शंकरगीतावचनविरो
धाच्चसामान्यविषयत्वेपितस्यरोहिणीश्रवणद्वादश्योरेवोपसंहारस्ययुक्तत्वात् तयोर्विशेषवचनात् पारणंतुनिर्ण
तमेव एताश्चाष्टावपिमहाद्वादश्यःकाम्याएवनित्यत्वेप्रमाणाभावात्फलश्रवणाच्च एवमेकादश्यांभुक्तेत्यस्यतुवि
षयपुंक्तएवेति नानेनापिनित्यत्वद्योतनं यत्तु नकरिष्यंतियेलोकेद्वादश्योष्टौममाज्ञया तेषांयमपुरेवासोयावदा
भूतसंप्लवमिति अकरणेप्रत्यवायबोधकंपद्मपुराणनाम्नाकेनचिल्लिखितंवचनंतदपिवैष्णवग्रंथेष्वप्यदर्शनादना ५३

109/1942

करमेवेति अल्पश्रवणयुक्तापिसकलद्वादशीशुभा तस्मिकस्मिन्नेवदिनेतद्योगेनास्तिसंशयः दिनद्वयेपितद्योगवतीविद्धा
धिकायदि एकादशीयुताग्राह्यायातुशुद्धाधिकातथा उत्तरेवभवेद्युक्ताश्रवणेनोदयेरवेः सैवग्राह्यान्यथापूर्वैकाद
श्यामेवचेद्युतिः नद्वादश्यांतदाप्युक्तंश्रवणद्वादशीव्रतं एकादशींद्वादशींचशक्तस्तूपवसेत्पृथक् प्रक्रांतप्रवृत्तेकादश्यु
पवासोक्षमस्ततः विष्णुपूजामेवकृत्वाद्वादश्यांभोजनंचरेत् पूर्वमेवाक्षमःकामीद्वादशीमेवलंघयेत् इयांतेन्यतरांते
वातिथिमात्रांतएववा पारयेत्फलभारोत्रबुधेमाद्रेविशेषतः अन्यासुमहतीपक्षयुतासुद्वादशीषुतु दिनेरात्रौचतत्त
त्वं मुख्यंकिंचिद्यदाकदा ऋक्षयोगेपिपूज्यत्वंजयंतीवत्प्रचक्षते तिथियुक्तास्वसंदेहःकाम्याअष्टावपित्विमाइतिसं
ग्रहः इतिश्रवणद्वादशीनिर्णयः अथत्रयोदश्यांकश्चिद्विशेषः शनिवारादिसंयुक्तायांकांचिच्छुक्लत्रयोमारभ्यसंवत्स
रंप्रतिपक्षत्रयोदशीषुशनिवारादियुक्तास्वेवचतुर्विंशतिशुक्लत्रयोदशीषुवाकर्तव्यंयत्प्रदोषसमयशिवपूजानक्त
भोजनात्मकंप्रदोषव्रतंतत्रप्रदोषव्यापिनीत्रयोदशीग्राह्या प्रदोषश्चत्रिमुहूर्तंप्रदोषस्याद्रवावस्तंगतेसतीत्युक्तः
तत्रशिवपूजनस्यप्रदोषकालत्वं ततस्तुलोहितेभानौस्नात्वासानियमोव्रती पूजास्थानंततोगत्वाप्रदोषेशिवमर्चये
दितिस्कंदपुराणेतद्व्रतविधावुक्तं नक्तभोजनस्यप्रदोषकालत्वंनक्तव्रतनिर्णयेवक्ष्यते तत्रान्यतरदिनेप्रदोषव्याप्तौ
तत्स्पर्शेवासैवग्राह्या दिनद्वयेप्रदोषव्याप्तौसाम्येनतदेकदेशस्पर्शेवाउत्तरा प्रातःसंकल्पयेद्विद्वानुपवासव्रतादिक
मितिसंकल्पकालमारभ्यसत्वात् सदैवतिथ्योरुभयोःप्रदोषव्यापिनीतिथिः तत्रोत्तरत्रनक्तंस्यादुभयत्रासायतइति
जाबालिवचनाच्च वैषम्येणतदेकदेशस्पर्शेतदाधिक्यवतीपूर्वापिग्राह्या यद्दिदेवपूजाभोजनपर्याप्तंतदाधिक्यंनोचे
त्साम्यपक्षवदुत्तरेव सायाह्नरूपगौणतत्कालव्याप्तेरपिलाभात् सायाह्नस्यचगौणंतत्कालत्वंप्रदोषस्पृशीभवितत्र
नक्तविधानादवगम्यते तथाचस्कंदपुराणे प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते आत्मनोद्विगुणछायामंदीभव

तिभास्करे तन्नक्तंनक्तमित्याकुर्नेनक्तंनिशिभोजनं एवंज्ञात्वाततोविद्वान्सायाह्नेतुभुजिक्रियां कुर्यान्नक्तव्रतीनक्तफ
लंभवतिनिश्चितमिति तथा मुहूर्तोनंदिनेनक्तं प्रवदंतिमनीषिणः नक्षत्रदर्शनान्नक्तमहंमन्येगणाधिपेतिभविष्य
पुराणेपिनक्षत्रदर्शनोर्ध्वकालस्याहंमन्येइत्युक्त्यामुख्यत्वंपूर्वोक्तोक्तस्यैवगौणत्वमवगम्यते दिनेनक्तंनक्तव्रतयोः
ग्यमित्यर्थः नक्षत्रदर्शनादित्यत्रोर्ध्वमित्यध्याहारः प्राप्ततित्यपूलोपनिमित्तावापंचमी अतएवचादिनद्वयेप्रदो
षस्पर्शाभावेप्युत्तरेव नचात्रैकभक्तादिवन्मुख्यकालेनुष्ठानंकिंतुगौणकालेएवसायाह्नेतुभुजिक्रियामितिवचना
त्पूर्वस्यचपूजादेरप्यपकर्षेणतत्रैवकर्तव्यत्वात् गोवत्सद्वादशीव्रतेप्येवमेवनिर्णयः तत्रापिनरोवायदिवानारीन
क्तंसंकल्प्यचेतसीत्युपक्रमे माषान्नंकामतोश्नीयाद्राक्षौविगतमत्सरः इति चांतेनक्तभोजनविधानात् प्रतीक्षिताग
मभक्त्यागवांगोध्यानतत्परः इतिवचनाद्गोष्ठागतासुसंध्यायांगोपूजाविधानात् एवमेवंजातीयकेन्यत्रापि पौ
र्णमास्यंतचैत्रकृष्णत्रयोदशीशतभिषायुतावारुणी तत्रगंगास्नानंमहाफलं तथाचस्कंदपुराणे वारुणेनसमा
युक्तामधौकृष्णात्रयोदशी गंगायांयदिलभ्येतसूर्यग्रहशतैःसमेतिसैवशनिवारयोगेमहावारुणीशुभयोग
योगेमहामहावारुणी अधिकफलाच तथाचतत्रैव शनिवारसमायुक्तासामहावारुणीस्मृता गंगायांयदिलभ्येतको या
टिसूर्यग्रहैःसमा शुभयोगसमायुक्ताशनौशतभिषायदि महामहेतिविख्याता त्रिकोटिकुलमुद्धरेदिति यश्चत्र
योदश्यांक्षत्रियादीनांशतभिषायांचस्त्रीणांस्नाननिषेधोजाबालीयः त्रयोदश्यांतृतीयायांदशम्यांचविशेषतः
शूद्रविट्क्षत्रियाःस्नानंनाचरेयुःकथंचनेति स्नानंकुर्वंतियानार्यश्चंद्रेशतभिषांगते सप्तजन्मभवेयुस्तादुर्भ
गाविधवाध्रुवमिति सयादृच्छिकदृष्टार्थस्नानविषयः अतएवहेमाद्रौवचनं भोगायक्रियतेयत्तुस्नानंयादृच्छि ५४
कंनरैः तन्निषिद्धंदशम्यादौनित्यंनैमित्तिकेनत्विति अत्रचसंध्यारात्र्यादावपियोगेगंगास्नानंकर्तव्यमेव रात्रौस्ना

111
194

ननिषेधस्यदिवारात्रौचसंध्यायांगंगायांचप्रसंगतः स्नात्वाश्वमेधजंपुण्यंगृहेप्युद्धततज्जलैरितिब्रह्मांडपुराणेसर्वत्र
एवशुभःकालःसर्वोदेशस्तथाशुभः सर्वोजनस्तथापात्रंस्नानादौजाह्नवीजलइतिभविष्यपुराणेचसामान्यतएवप्राप्ति
प्रसवात् प्रसंगतश्चेत्यन्वयः योपिमहानिशायांस्नानादिनिषेधः सोप्यत्रनप्रवर्तते महानिशातुविज्ञेयामध्यमंप्रहर
द्वयं तत्रस्नानंनकर्तव्यंकाम्यंनैमित्तिकादृतइतिदेवलवचनात् अत्रचवारुण्यादिशब्दैरेवतत्तन्मासतिथ्यादिसंग्रहेपि
मासादिशब्दैर्वारुण्यादियोगसंग्रहेप्यधिकरणत्वेनमासादीनांतत्तच्छब्दैर्निमित्तत्वेनचतत्तद्योगस्यवारुण्यादिशब्दैरु
ल्लेखःस्नानादिसंकल्पवाक्येवश्यंकर्तव्यः मासपक्षतिथीनांचनिमित्तानांचसर्वशः उल्लेखनमकुर्वाणोनतस्यफ
लभाग्भवेत् इतिवचनात् योगविशेषस्यवारुण्यादिसंज्ञाकरणस्यसंकल्पाद्युपयोगित्वेनैवसार्थक्याच्च एवंदशह
रायांदशयोगेषुकेषांचित्किंचिद्योगाविनाभावादेवलाभसंभवेपितेनतेनरूपेणसर्वेषांनिमित्तत्वात्सर्वेषांतेनतेनरूपे
णोल्लेखःकर्तव्यः अथशिवरात्रीनिर्णयः तस्याश्चस्वरूपंशिवरहस्येऽभिहितं तत्रभृत्यथदेवर्षेमाघकृष्णचतुर्दशी शि
वरात्रिःसमाख्यातापियेयंत्रिपुरद्विषइति तेनरात्रिशब्दस्यतिथिपरत्वाद्योगेनशिवव्रतयोग्यतिथिलाभाद्रू चतद्विशे
षलाभात्तत्रयोगरूढोयंशिवरात्रिशब्दः यस्तुक्वचिद्व्रतेपिकेवलशिवरात्रिशब्दप्रयोगःसलक्षणया नवरात्रादिशब्दवत्
अतएवप्राचुर्येणशिवरात्रिव्रतशब्दएवव्रतेप्रयुज्यतेतिथिविशेषसंज्ञाकरणप्रयोजनंतुतेनशब्देनतांनिर्दिश्यतत्रोपवास
पूजादिविधानं शिवरात्रिमुपोषयेत् शिवरात्रिंचपूजाजागरणैर्नयेदित्यादि खंडत्वेपूर्वविद्धादिग्राह्यत्वनियमविधानंच
जयंतीशिवरात्रिश्चेत्यादिशिवरात्रिव्रतंचोपवासपूजाजागरणात्मकप्रधानसमुदायरूपं उपवासप्रभावेणबलादपि
चजागरात् शिवरात्रेस्तथातस्यांलिंगस्यापिप्रपूजया अक्षयांल्लभतेलोकान्शिवसायुज्यमाप्नुयादितिनागरखं
डीयेधिकाफलसंबंधबोधकोविधिराधिकारविधिःकारविधौस्वयंचलिंगमभ्यर्च्यसोपवाससजागरः अज्ञानन्नपि

का॰त॰ निःपापोनिषादोगणतांगतइतिसत्यखंडीयेतदुन्नायकेपरहत्यर्थवादस्त्वित्रयाणामपिश्रवणात् एवंमतियत्रकेवलोपवासादिश्रव
५५ णंतत्रेतरदप्युपलक्षितंद्रष्टव्यं क्वचिदशक्तंप्रत्यनुकल्पत्वेनैकैकस्यद्वयोर्वाश्रवणं अथवाशिवरात्रिंचपूजाजागरणेनयेत् कश्चि
त्पुण्यविशेषेणव्रतहीनोपियःपुमान् जागरंकुरुतेतत्र सरुद्रसमतांव्रजेदित्यादिषु अथवादिशब्दश्रवणात् जन्माष्टमीव्रतव
च्चेदमपिव्रतंनित्यंकाम्यंच वीप्सादियुक्तवाक्यात्फलश्रवणाच्च तद्वदेवचतुर्दश्यांरात्रिमात्रसत्वेपित्रयोदशीविधोभवत्येवन
नुतिथ्यंतरवद्दिवाप्रवेशस्यावश्यकता अत्रापिरात्रावेवपूजादिविधानात् निशिभ्रमंतिभूतानिशक्तयःशूलभृद्यतः अतस्त
स्यांचतुर्दश्यांसत्यांतत्पूजनंभवेदिति तत्रनिशीथादूर्ध्वमप्यनुवर्तमानयात्रयोदश्यायुक्ताचतुर्दशीनिशीथायोगिन्यपिपरैवा
पोष्या माघासितेभूतदिनंहिराजन्नुपैतियोगंयदिपंचदश्याः जयाप्रयुक्तांनतुजातुकुर्याच्छिवरात्रिंप्रियकृच्छिवस्येतिहेमाद्रि
माधवाधृदाहृतपुराणवचनात् दिनरात्र्युभययोगलाभाद्रात्रियोगस्यापिभूयस्त्वलाभाच्च जययात्रयोदश्याप्रकर्षेणयुक्ता
मित्यभिधानात्पूर्वेद्युस्त्रयोदश्याभूयोरात्रिव्याप्तिप्रतीतेः इतरथापूर्वेद्युरेवनिशीथयोगिनी दिनद्वयेपितादृशीपूर्वैवग्राह्या
कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेत् जन्माष्टमीरोहिणीचशिवरात्रि
श्चतुर्दशी पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनं जयंतीशिवरात्रिश्चकार्येभद्राजयान्विते माघफाल्गुनयोर्मध्येयास्या
च्छिवचतुर्दशी अनंगेनसमायुक्ताकर्तव्यासासदातिथिरित्यादिस्कंदपुराणादिवचनेभ्यः तत्रसूर्यास्तमयमारभ्यसत्वेआ
दित्यास्तमयेकालेअस्तिचेद्याचतुर्दशी तद्रात्रिःशिवरात्रिःस्यात्साभवेदुत्तमोत्तमा त्रयोदशीयदादेवीदिनभुक्तिप्रमाणा
तःजागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशी प्रदोषव्यापिनीग्राह्याशिवरात्रिश्चतुर्दशी रात्रौजागरणंयस्मात्तस्मात्तां
समुपोषयेत्इत्यादीनिकामिकशिवरहस्यादिवचनान्युपोद्बलकानि रात्रौजागरणंयस्मादितिहेतुवशात्प्रदोषशब्दोपि ५५
रात्रिमात्रपरः प्रदोषासत्वेपिरात्रिव्याप्तिमात्रभूयस्त्वेमाघमासस्यकृष्णायांचतुर्दश्यांसुरेश्वर अहंयास्यामिभूपृष्ठेरा

113
194

त्रौनैवदिवाकलौ लिंगेषुचसमस्तेषुचरेषुस्थावरेषुच संक्रमिष्याम्यसंदिग्धंवर्षपापविशुद्धये तस्माद्रात्रौहिमेपूजांयःकरिष्य
तिमानवः मंत्रैरेतैःसुरश्रेष्ठविपाप्मासभविष्यति निशिभ्रमंतिभूतानीत्यादीनिनागरखंडवचनान्युपोद्बलकानि अत्रदिनद्व
येनिशीथयोगेपरेद्युःप्रदोषनिशीथोभयव्याप्तिलाभात्संकल्प्यकालमारभ्यसत्वादहोरात्रोभययोगाच्चपरैवोपोष्येतिमाध
वः तिथितत्वेप्येवमेव तत्रैतावतीपूर्वविद्धाग्रहणेउपपत्तिः अर्धरात्रात्पुरस्ताच्चेज्जयायोगोयदाभवेत् पूर्वविद्धैवकर्तव्या
शिवरात्रिःशिवप्रियैरिति पद्मपुराणवचनमीदृशएवविषयेपूर्वाविधानार्थं अंततःसर्वाण्यपिपूर्वविधायकानिप्रागुक्ता
नि महतामपिपापानांदृष्टावैनिष्कृतिःपुरा नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतिथिंत्विमामिति स्कंदपुराणोयोमावास्यायु
क्तानिषेधश्चैतादृशएवविषयेसार्थकः पूर्वस्याएवनिशीथव्याप्तौपूर्वाग्रहणस्य माघकृष्णचतुर्दश्यामादिदेवोमहानिशि
शिवलिंगतयोद्भूतःकोटिसूर्यसमप्रभः तत्कालव्यापिनीग्राह्याशिवरात्रिव्रतेतिथिः अर्धरात्रादधश्चोर्ध्वंयुक्तायत्रच
तुर्दशी तत्तिथावेवकुर्वन्तशिवरात्रिव्रतंव्रती अर्धरात्रियुतायत्रमाघकृष्णाचतुर्दशी शिवरात्रिव्रतंतत्रसोश्वमेधफ
लंलभेत् पूर्वेद्युरपरेद्युर्वामहानिशिचतुर्दशी व्याप्तासादृश्यतेयस्यांतस्यांकुर्यात्व्रतंनरइत्यादिनारदीयेशानसंहिता
दिवचनैरेवउत्तरस्याएवतद्व्याप्ताउत्तराग्रहणस्यैवसिद्धत्वात् नचतत्रनिशीथव्याप्तिवचनैःपूर्वस्याइवप्रदोषव्याप्तिव
चनैःउत्तरस्याअपिप्राप्तौपूर्वानियमार्थत्वेनतद्विषयोर्थवत्एवेतिवाच्यं रात्रौजागरणंयस्मादितिहेतुनिर्देशवशात्सम
स्तरात्रिव्याप्तेर्भूयोरात्रिव्याप्तेर्वाविवक्षयैवतत्रप्रदोषव्याप्त्यभिधानात् निशीथरात्र्योरिवप्रदोषस्यलिंगप्रादुर्भावपूजा
कालत्वयोरभावस्तत्त्वरूपस्याविवक्षितत्वात् महानिशापिमहानिशाद्वेघटिकेरात्रेर्मध्यमयामयोरितिदेवलोक्तेरर्ध
रात्ररूपैव किंचअर्धरात्रात्पुरस्तादितिवचनेपूर्वविद्धैवेत्युत्तरविद्धानिवर्तकादेवकारादुत्तरविद्धायाःप्रसक्तिर्गम्यते सा
चोभयत्रनिशीथयोगएवसंभवतिनतुपूर्वत्रैवतस्मिन् एवंनिषेधवशादपि यदापिपूर्वविद्धैवेत्येवकारआग्नेय्येवमनो

नाकार्यैतिवन्नतुकार्यैतिवन्नतुकार्यैस्यैवमर्थकस्तदापिपूर्वस्याअकर्तव्यप्रसक्तिरपिउभयत्रनिशीथयोगएवोत्तरस्यांदिनद्व
यियोगादिबहुगुणलाभादितिसएवतस्यविषयः किंच सर्वत्रापिपूर्वोत्तरविद्धानियमः कालव्याप्तिशास्त्रानिर्णयविषयविष
यएवेत्युक्तं तेनात्रदिनद्वयेनिशीथयोगेमाघासितइतिवचनेनोत्तरस्याविधानात्सविशेषादुभयादिननिशीथयोगविष
येतैवपूर्वविद्धानियमविधेयुक्तेति यच्चप्रतिमासकृष्णचतुर्दशीषु आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा गृह्णीया
न्माघमासेवाद्वादशैवमुपोषयेदित्यादिस्कंदपुराणादिवचनैः पूजोपवासजागरणात्मकमेवकाम्यंशिवरात्रिव्रतंविहितंतस्या
प्रतियामंपूजायाजागरणस्यचविधानात्सकलरात्रिसाध्यत्वाद्बहुरात्रिव्यापिन्यामनुष्ठानमुचितमितितत्रात्राप्ययमे
वनिर्णयःपर्यवस्यति रात्रिव्याप्तिसाम्येतुरुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिथिः अन्येषुव्रतकल्पेषुयथोद्दिष्टामुपाव
सेदितिब्रह्मवैवर्तवचनात्पूर्वस्यामनुष्ठानं येषांमतेप्रदोषव्याप्तिरितिनिर्णायिकातेषामुत्तरस्यामिति अस्याश्चरविभौमा
न्यतरवारयोगेशिवयोगयोगेच प्रशस्ततरत्वंप्रशस्ततमत्वंचस्कंदपुराणेदर्शितंमाघकृष्णचतुर्दश्यांरविवारोयदाभवे
त् भौमोवापिभवेद्देविकर्तव्यंव्रतमुत्तमं शिवयोगस्ययोगेचतद्भवेदुत्तमोत्तममिति तथा त्रयोदशीकलाप्येकामध्येचैव
चतुर्दशी अंतेचैवसिनीवालीत्रिस्पृश्यांशिवमर्चयेदितिवचनात्रिस्पृशापिप्र‥शस्ता पारणंचैतद्व्रतसंबंधिस्कंदपुरा
णएवतिथ्यंतेतिथिमध्येचविहितं कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेदिति
उपोषणंचतुर्दश्यांचतुर्दश्यांचपारणं कृतैःसुकृतलक्षैश्चलभ्यतेवाथवानवा ब्रह्मास्वयंचतुर्वक्त्रैःपंचवक्त्रैस्तथाप्यहं
सिक्थेसिक्थेफलंतस्यवक्तुंशक्तोनपार्वति ब्रह्मांडोदरमध्येतुयानितीर्थानिसंतिवै संस्थितानिभवंतीहभूतायांपारणेकृ
तइतिच तत्रसात्वस्तमयपर्यंतव्यापिनीचेत्परेहनि दिवैवपारणंकुर्यात्पारणांनेवदोषभागितिशिवरात्रिप्रकरणपठितका
लादर्शादिलिखितवचनादन्यतिथ्यागमोरात्राविस्यादिपूर्वलिखितसामान्यवचनाच्चतिथ्यंतंप्रतीक्ष्यदिवापारणस्यक ५६

115
194

र्तुमशक्यत्वेतिथ्यंते नोचेत्तिथिमध्यएवेतिव्यवस्था माधवेनतुयामत्रयोर्ध्वगामिन्यामितिवचनानुसारात्व्यवस्थेक्तासा
मूलादर्शनान्नादृतेत्युक्तं शिवरात्रिव्रतानुष्ठानप्रकारश्चयद्यपिपुराणभेदेननानाविधोस्तितथापिशिवरहस्यादिसंवादीसं
क्षिप्तस्तावदस्मदर्श्यते विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः तस्मान्मृदापिकर्त
व्यंललाटेचत्रिपुंड्रकमितिलिंगपुराणाद्धृतत्रिपुंड्ररुद्राक्षमालोजन्माष्टमीव्रतवत्कालोल्लेखपर्यंतंविधायशिवप्रीतिका
मःशिवरात्रिव्रतंह्येतत्करिष्येहंमहाफलं निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते चतुर्दश्यांनिराहारोभूत्वाचैवपरेह
नि भोक्ष्येहंभुक्तिमुक्त्यर्थंशरणंमेभवेश्वरेतिपठित्वाजलमुत्सृजेत् ततोनित्यकृत्यंविधायरात्रौप्रथमप्रहरेअद्यशि
वपूजांकरिष्यइतिसंकल्प्यपूर्वप्रतिष्ठितएवलिंगेअप्रतिष्ठितेवापूर्ववत्तदानीमेवप्राणप्रतिष्ठांविधायपार्थिवलिंगे
वावक्ष्यमाणपार्थिवलिंगपूजाप्रकारेणभूतशुध्द्यादिपूर्वकंपंचाक्षरादिमूलमंत्रेणवैदिकमंत्रेणपौराणमंत्रैः प्रणवा
दिचतुर्थ्यंतनमोंतशिवनाम्नावाआवाहनादिपूर्वोक्तोपचारैःपूजयेत् तत्रविशेषः ॐ हौं ईशानायनमइतिप्रथ
मप्रहरेदुग्धेनस्नपनं शिवरात्रिव्रतंदेवपूजाव्रतपरायणः करोमिविधिवद्दत्तंगृहाणार्घ्यंमहेश्वरेत्यर्घ्यदानंच तत
स्तन्मंत्रजपेनतत्कथाश्रवणादिभिर्वाजागरणं तद्ध्यानंतज्जपःस्नानंतत्कथाश्रवणादिकं उपवासकृतांह्येतेगुणाः
प्रोक्तामनीषिभिरितिसामान्यवचनात् द्वितीयप्रहरे ॐ अघोरायनमइतिदध्नास्नपनं नमःशिवायशांतायसर्वपा
पहरायच शिवरात्रौददाम्यर्घ्यंप्रसीदउमयासहेतिचार्घ्यदानं तृतीये ॐ हौं वामदेवायनमइतिघृतेनस्नपनं दुःख
दारिद्र्यशोकेनदग्धोहंपार्वतीपते शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमेइत्यर्घ्यदानं चतुर्थे ॐ हौं सद्योजातायन
मइतिमधुनास्नपनं मयाकृतान्यनेकानिपापानिहरशंकर शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमे इत्यर्घ्यदानं एवंमू
लमंत्रजपादिनारात्रिमतिवाह्यप्रभाते अविघ्नेनव्रतंदेवत्वत्प्रसादात्समापितं क्षमस्वजगतांनाथत्रैलोक्याधिपते

नाकार्येतिवन्नतुकार्येतिवन्नतुकार्येत्येवमर्थकस्तदापिपूर्वस्याअकर्तव्यप्रसक्तिरपिउभयत्रनिशीथयोगएवोत्तरस्यांदिन
त्रियोगादिबहुगुणलाभादितिसएवतस्यविषयः किंच सर्वत्रापिपूर्वोत्तरविद्धानियमः कालव्याप्तिशास्त्रानिर्णयविषयविष
यएवेत्युक्तं तेनात्रदिनद्वयेनिशीथयोगेमाघासितइतिवचनेनोत्तरस्याविधानात्परिशेषादुभयदिननिशीथयोगविष
यतैवपूर्वविद्धानियमविधेयुक्तेति यच्चप्रतिमासकृष्णचतुर्दशीषु आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा गृह्णीया
न्माघमासेवाद्वादशैवमुपोषयेदित्यादिस्कंदपुराणादिवचनैः पूजोपवासजागरणात्मकमेवकाम्यंशिवरात्रिव्रतंविहितंतस्या
प्रतियामंपूजायाजागरणस्यचविधानात्सकलरात्रिसाध्यत्वाद्बहुरात्रिव्यापिन्यामनुष्ठानमुचितमितितत्रात्राप्ययमे
वनिर्णयःपर्यवस्यति रात्रिव्याप्तिसाम्येतुरुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिथिः अन्येषुव्रतकल्पेषुयथोद्दिष्टामुपाव
सेदितिब्रह्मवैवर्तवचनात्पूर्वस्यामनुष्ठानं येषांमतेप्रदोषव्याप्तिरितिनिर्णायिकातेषामुत्तरस्यामिति अस्याश्चरविभौमा
न्यतरवारयोगेशिवयोगयोगेच प्रशस्ततरत्वंप्रशस्ततमत्वंच स्कंदपुराणेदर्शितंमाघकृष्णचतुर्दश्यांरविवारोयदाभवे
त् भौमोवापिभवेद्देविकर्तव्यंव्रतमुत्तमं शिवयोगस्ययोगेचतद्भवेदुत्तमोत्तममिति तथा त्रयोदशीकलाप्येकामध्येचैव
चतुर्दशी अंतेचैवसिनीवालीत्रिस्पृश्यांशिवमर्चयेदितिवचनात्रिस्पृशापिप्र[illegible]शस्ता पारणंचैतद्व्रतसंबंधिस्कंदपुरा
णएवतिथ्यंतेतिथिमध्येचाविहितं कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेदिति
उपोषणंचतुर्दश्यांचतुर्दश्यांचपारणं कृतैःसुकृतलक्षैश्चलभ्यतेवाथवानवा ब्रह्मास्वयंचतुर्वक्त्रैःपंचवक्त्रैस्तथाप्यहं
सिक्थेसिक्थेफलंतस्यवक्तुंशक्तोनपार्वति ब्रह्मांडोदरमध्येतुयानितीर्थानिसंतिवै संस्थितानिभवंतीहभूतायांपारणेकृ
तइतिच तत्रसात्वस्तमयपर्यंतव्यापिनीचेत्परेहनि दिवैवपारणंकुर्यात्पारणांनेवदोषभागितिशिवरात्रिप्रकरणपठितका
लादर्शादिलिखितवचनादन्यतिथ्यागमोरात्राविद्यादिपूर्वलिखितसामान्यवचनाच्चतिथ्यंतंप्रतीक्ष्यदिवापारणस्यक ५६

115
194

र्तुंशक्यत्वेतिथ्यंते नोचेत्तिथिमध्यएवेतिव्यवस्था माधवेनतुयामत्रयोर्ध्वगामिन्यामितिवचनानुसारात्व्यवस्थोक्तासा
मूलादर्शनान्नादृतेत्युक्तं शिवरात्रिव्रतानुष्ठानप्रकारश्चयद्यपिपुराणभेदेननानाविधोस्तितथापिशिवरहस्यादिसंवादीसं
क्षिप्तस्तावत्प्रदर्श्यते विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया पूजितोपिमहादेवोनस्यात्तस्यफलप्रदः तस्मान्मृदापिकर्त
व्यंललाटेचत्रिपुंड्रकमितिलिंगपुराणाद्धृतत्रिपुंड्ररुद्राक्षमालोजन्माष्टमीव्रतवत्कालोल्लेखपर्यंतंविधायशिवप्रीतिका
मः शिवरात्रिव्रतंह्येतत्करिष्येहंमहाफलं निर्विघ्नमस्तुमेचात्रत्वत्प्रसादाज्जगत्पते चतुर्दश्यांनिराहारोभूत्वाचैवपरेह
नि भोक्ष्येहंभुक्तिमुक्त्यर्थंशरणंमेभवेश्वरेतिपठित्वाजलमुत्सृजेत् ततोनित्यकृत्यंविधायरात्रौप्रथमप्रहरेअद्यशि
वपूजांकरिष्यइतिसंकल्प्यपूर्वप्रतिष्ठितएवलिंगेअप्रतिष्ठितेवापूर्ववत्तदानीमेवप्राणप्रतिष्ठांविधायपार्थिवलिंगे
वावक्ष्यमाणपार्थिवलिंगपूजाप्रकारेणभूतशुध्यादिपूर्वकंपंचाक्षरादिमूलमंत्रेणवैदिकमंत्रेणपौराणमंत्रैः प्रणवा
दिचतुर्थ्यंतनमोंतशिवनाम्नावाआवाहनादिपूर्वोक्तोपचारैःपूजयेत् तत्रविशेषः ॐ हौंईशानायनमइतिप्रथ
मप्रहरेदुग्धेनस्नपनं शिवरात्रिव्रतंदेवपूजाव्रतपरायणः करोमिविधिवद्दत्तंगृहाणार्घ्यंमहेश्वरेत्यर्घ्यदानंच तत
स्तन्मंत्रजपेनतत्कथाश्रवणादिभिर्वाजागरणं तद्ध्यानंतज्जपःस्नानंतत्कथाश्रवणादिकं उपवासकृतांह्येतेगुणाः
प्रोक्तामनीषिभिरितिसामान्यवचनात् द्वितीयप्रहरे ॐ अघोरायनमइतिदध्नास्नपनं नमःशिवायशांतायसर्वपा
पहरायच शिवरात्रौददाम्यर्घ्यंप्रसीदउमयासहेतिचार्घ्यदानं तृतीये ॐ हौंवामदेवायनमइतिघृतेनस्नपनं दुःख
दारिद्र्यशोकेनदग्धोहंपार्वतीपते शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमेइत्यर्घ्यदानं चतुर्थे ॐ हौं सद्योजातायन
मइतिमधुनास्नपनं मयाकृतान्यनेकानिपापानिहरशंकर शिवरात्रौददाम्यर्घ्यमुमाकांतगृहाणमे इत्यर्घ्यदानं एवंमू
लमंत्रजपादिनारात्रिमतिवाह्यप्रभाते अविघ्नेनव्रतंदेवत्वत्प्रसादात्समापितं क्षमस्वजगतांनाथत्रैलोक्याधिपते

हर यन्मयाद्यकृतं पुण्यं तद्रुद्रस्य निवेदितं त्वत्प्रसादान्महादेव व्रतमद्य समर्पितं प्रसन्नो मे भव श्रीमान् सद्गतिः प्रतिपा
द्यतां त्वदालोकनमात्रेण पवित्रोस्मि न संशय इति व्रतं समर्पयेत् परदिने यथाशक्ति ब्राह्मणान्भोजयित्वा संसारक्लेशदग्ध
स्य व्रतेनानेन शंकर प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति प्रार्थ्य बंधुभिः सह पारणं कुर्यात् एतस्योद्यापनं प्रतिमा
सशिवरात्रिव्रतप्रकारस्तदुद्यापनविधिश्च व्रतकांडेषु द्रष्टव्यः यदा तु आयुष्मान् बलवान् श्रीमान् पुत्रवान्धनवान् सुखी
वरमिष्टं लभेल्लिंगं पार्थिवं यः समर्चयेत् तस्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकं मृद्भस्मगोशकृत्पिंडं ताम्रकांस्यमयं
तथा कृत्वा लिंगं सकृत्पूज्य वसेत्कल्पायुतं दिवि वार्क्षं वित्तप्रदं लिंगं स्फाटिकं सर्वकामदं नर्मदागिरिजं श्रेष्ठमन्यदपि
हि लिंगवत् कृत्वा पूजय विप्रेंद्र लक्ष्यसे चहितं फलमित्यादि नंदिभविष्यपुराणादिवचनवशात्पार्थिवलिंगे शिवपू
जा क्रियते तदा मृदाहरणसंघट्टप्रतिष्ठाह्वानमेवच स्नपनं पूजनं चैव विसर्जनमतः परं हरो महेश्वरश्चैव शूलपा
णिः पिनाकधृक् पशुपतिः शिवश्चैव महादेव इति क्रमादिति देवीपुराणवचनान्मृदाहरणादयः सप्त पदार्थाः प्रण
वादिचतुर्थ्यंतनमोंतहरादिनामभिः सप्तभिः कर्तव्याः अन्ये तूपचारा गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ज्ञेयो
नमः शिवायेति मंत्रः सर्वार्थसाधकः सर्वमंत्राधिकश्चायमोंकाराद्यः षडक्षरः इति नंदिपुराणवचनादोंनमः
शिवायेत्यनेन तल्लिंगे पूजयेन्मंत्रैः सर्वदेवान्पृथक्पृथक् ध्यात्वा प्रणवपूर्वं तु मन्त्रान्नाम्ना सुसमाहित इति वचना
द्वैदिकेनागमिकेन वा मंत्रेण येन केनचिन्नाम्ना वा ततश्चायमनुष्ठानविशेषः ॐ हराय नम इति मृदमाहृत्य केशकीटा
द्यपनयनेन शोधितायां तस्यां शुचिजलप्रक्षेपेण ओं महेश्वराय नम इति संघट्टनं कृत्वा तेन पिंडेन अक्षादल्प
परिमाणं न लिंगं कुत्रचिन्नरः कुर्वीतांगुष्ठतोह्रस्वं न कदाचित्समाचरेदिति वचनादशीतिरक्तिकामितादक्षादधिक
परिमाणमंगुष्ठाधिकोच्चत्वं च लिंगं कृत्वा ॐ शूलपाणये नमः शिव इह सुप्रतिष्ठितो भवेति प्रतिष्ठाप्य ध्यायेन्नि

117
194

त्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं पद्मासीनं समंतात्स्तुतममरगणै
र्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रमिति ध्यात्वा ॐ पिनाकधृते नमः शिव इहागच्छेत्या
वाहनं कृत्वा ॐ पशुपतये नम इति शुद्धोदकेन संस्नाप्यान्यांश्च सर्वान् स्नपनपूर्वभाविनस्तदुत्तरभाविनश्च पाद्यार्घ्यव
स्त्रगंधादीनुपचारानों शिवाय नम इति विसर्जनपर्यंतान्कुर्यात् ततो मूर्तयोष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः आग्ने
य्यंताः प्रपूज्यास्तु वेद्यां लिंगे शिवं जयेदिति भविष्यपुराणोक्तमष्टमूर्तिपूजनं न प्राचीनमग्रतः शंभोरिति रुद्रयामलनि
षेधाद्देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता गुरुक्रमैरिति त्वागमिकीं प्राचीमनादृत्य प्राच्यैशान्यादिक्रमेणाग्नेयीपर्यंतं वा
मावर्तनं कुर्यात् ॐ शर्वाय क्षितिमूर्तये नमः ॐ भवाय जलमूर्तये नमः ॐ रुद्रायाग्निमूर्तये नमः ॐ उग्राय वायुमू
र्तये नमः ॐ भीमायाकाशमूर्तये नमः ॐ पशुपतये यजमानमूर्तये नमः ॐ महादेवाय सोममूर्तये नमः ॐ ईशानाय
सूर्यमूर्तये नम इति ततः स्तोत्रादिना स्तुत्वा नमस्कृत्वा ॐ महादेवाय नम इति विसर्जयेदिति शिवपूजायां च बिल्वप
त्राणि धुत्तूरपुष्पाणि चातिफलदानि धत्तूरकैस्तु यो लिंगं सकृत्पूजयते नरः स गोलक्षफलं प्राप्य शिवलोके महीयते
बिल्वपत्रैरखंडैश्च यो लिंगं पूजयेत्सकृत् सर्वपापविनिर्मुक्तः शिवलोके महीयते सर्वकामप्रदं बिल्वं दारिद्र्यस्य विनाशनं
बिल्वपत्रात्परं नास्ति येन तुष्यति शंकरः शुष्काण्यपि च पत्राणि श्रीवृक्षस्य सदैव हीत्यादि भविष्यस्कांदादिवचनात्
यश्च शिवाय समर्पितं पुष्पं नैवेद्यादि तत्प्रसादरूपेण विष्णुनिवेदितवत्स्वयं नोपयोज्यं स्पृष्ट्वा रुद्रस्य निर्माल्यं सवा
सा आप्लुतः शुचिरिति कालिकापुराणे अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं शालग्रामशिलास्पर्शात्सर्वं याति
पवित्रतामिति परिशिष्टे दत्वा नैवेद्यवस्त्रादि नाददीत कदाचन त्यक्तं यच्छिवमुद्दिश्य तदादानेन तत्फलमिति च भविष्ये
निषेधात् निर्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः नरके पच्यते घोरे ति

तिर्यक्कयोनौचसंभवेत् ब्रह्महापिशुचिर्भूत्वानिर्माल्यंयस्तु धारयेत् तस्यपापंमहच्छीघ्रंनाशयिष्यमहाव्रतइतिस्कंदपुराणवच
नादशुचिनातन्नग्राह्यंकिंतुस्नानादिनाशुचिनेतिस्मार्तः अनुपनीतेननग्राह्यमितिश्रीदत्तः शिवदीक्षारहितेज्योतिर्लि
गातिरिक्तस्यवानग्राह्यमितिशैवाइत्यलंप्रसंगागतेन त्रयोदश्यात्रियामाधोहूर्ध्वमप्यनुवृत्तया युक्तानिशीथायो
गेपिपराशिवचतुर्दशी पूर्वेद्युरेवतद्युक्ताहर्द्वयेपितथाविधा भूयोरात्रितयायोगलाभात्पूर्वैवसंमता दिनद्वयेप्यहोरात्र
वर्तमानापराशुभा प्रदोषेचनिशीथेचवृत्तेरितितुमाधवः रविभौमान्यतरयुक्शिवयोगयुतातया उदितातिप्रशस्तेयंप्र
तिमासासितातुसा बहुरात्रियुताग्राह्यासाम्येपूर्वैवसंमता यदिप्रतीक्ष्यंतिथ्यंतंदिवाशक्यंतुपारणं यदातिथ्यंतएवस्या
न्नचेन्मध्यातएवतदितिसंग्रहः इतिशिवरात्रिनिर्णयः अथैकभक्तादिषुतिथिनिर्णयः यद्यपिकर्मकालव्याप्तियु
ग्मवचनाभ्यांतद्विशेषवचनैश्चोपवासेयोग्राह्यतिथिनिर्णयःकृतस्तेनैवैकभक्तादिष्वपिसकृतप्रायएवतथापितत्तत्का
लपरिच्छेदपूर्वकंतन्नतत्रकिंचिद्विशेषाभिधित्सयासएवयोज्यते तत्रैकभुक्तशब्दादेकभक्तशब्देपिभुक्तशब्देनतत्साध्य
भोजनलक्षणातएकंद्वितीयभोजनाभावसहकृतंभोजनमेकभक्तस्वरूपं तदपिचनक्तव्यपदेशात्ततोभिन्नंदिवैवतस्य
चाहर्भागविशेषःकालस्तेनधर्मविशेषश्चस्वरूपकथनव्याजेनस्कंदपुराणेभिहितः दिनार्धसमयेतीतेभुज्यतेनियमेन
यत् एकभक्तमितिप्रोक्तमतस्तस्माद्दिवैवहीतिनियमेनेत्यस्यनपुरुषार्थनियमप्राप्तद्वितीयभोजननिवृत्तिरयः॥
योगिकैकभुक्तनामधेयादेवतल्लाभात् व्रतपर्यायस्यनियमशब्दस्यतदभिधायित्वाच्च नापिव्रतसामान्यांगत्वेनविहि
ताब्रह्मचर्यादयःसामान्यविधिनैवतल्लाभात् किंतु अष्टौग्रासामुनेर्भक्ष्याः षोडशारण्यवासिनः द्वात्रिंशत्तु गृहस्थस्य
ह्यमितंब्रह्मचारिणः वक्त्रप्रमाणपिंडांश्चग्रसेदेकैकशः पुनरितिव्यासोक्तनित्यभोजनगोचरतत्तदाश्रमग्राससंख्याम ५८
ध्येदिनार्धसमयेतीतेभुज्यतेनियमेनयत् एकभक्तंतुतत्प्रोक्तंन्यूनंग्रासत्रयेणत्वितिदेवलोक्ताग्रासत्रयन्यूनतादेव

119/194

त्ववचनेत्वगत्यासमान्यनियमानुवादः अतस्तदितिसामाख्यानक्तव्यपदेशप्राप्तांरात्रिभोजननिवृत्तिहेतुत्वेनपरामृश्यसूर्यास्त
मयपर्यंतंगौणकालविधिः मुख्यकालस्त्वस्यमध्याह्नव्यापिनीग्राह्याएकभक्तेसदातिथिरितिपद्मपुराणवचनात् कर्मणोयस्ययः
कालइतिसामान्यशास्त्रसंवादिनोमध्याह्नःसोपिनसंपूर्णः किंतुदिनार्धसमयेतीतइतिवचनाउत्तरभागः मध्याह्नश्चपूर्वाह्णम
ध्याह्नापराह्णैस्त्रेधाविभक्तस्यदिनस्यपंचमुहूर्तात्मकोद्वितीयभागएवग्राह्यः पूर्वोत्तरभागद्वयापेक्षयामध्यमस्यैवमध्यश
ब्दाच्छीघ्रंप्रतीतेः पूर्वाह्णमध्याह्नापराह्णसायाह्नैश्चतुर्धाविभक्तस्यतुद्वितीयोभागः प्रातःसंगवमध्याह्नापराह्णसायाह्नैः
पंचधाविभक्तस्यतृतीयभागोवाविलंबितप्रतीतिकइतिसनग्राह्यइतिहेमाद्रिः तदयुक्तं सर्वेषेवमध्याह्नशब्देषनेनन्याये
नत्रेधाविभक्तदिनभागस्यैवग्रहणप्रसंगेविध्यंतरदिनभागतत्संज्ञाकरणस्यानर्थक्यप्रसंगात् संज्ञाकरणस्यकार्यविनि
योगार्थत्वात् उक्तंच पूर्वाह्णोवैदेवानांमध्यंदिनोमनुष्याणामपराह्णः पितॄणामितियच्चतुर्धापंचधाविभागावपिगोभिल
पराशराभ्यां पूर्वाह्णःप्रहरंसार्धंमध्याह्नःप्रहरंतथा आतृतीयादपराह्णःसायाह्नश्चततःपरमिति लेखाप्रभृत्ययादित्ये
त्रिमुहूर्तगतेरवौ प्रातस्तुसंस्मृतःकालोभागश्चाह्नःसपंचमः संगवात्रिमुहूर्तस्तुमध्याह्नस्तत्समःस्मृतः ततस्त्रयोमुहू
र्तास्तुअपराह्णोविधीयते पंचमोदिनभागोयःससायाह्नइतिस्मृतः यद्यदेतेषुविहितंतत्तत्कार्यंविजानतेतिच तेनपंचधावि
भागेसार्धमुहूर्तात्मकश्चतुर्धाविभागेकिंचिदूनमुहूर्तद्वयात्मकस्त्रेधाविभागेसार्धमुहूर्तद्वयात्मकःसर्वोप्यावर्तमानोपरित
नोमध्याह्नोत्तरभागएकभक्तस्यमुख्यःकालस्तदुत्तरोस्तमयावधिःकालोगौणः एवंसतियदान्यतरेवमध्याह्नोत्तरदलव्या
नीतदातस्यामेवतत्कार्यंसामान्यविशेषशास्त्राभ्यां विशेषशास्त्रेचमध्याह्नशब्दउक्तस्तदेकदेशपरोग्रामोदग्धइतिवत् दिन
द्वयेपितद्व्याप्तौतदस्पर्शेसामानतदेकदेशव्याप्तौचपूर्वैव मुख्यकालसंबंधाविशेषेपिगौणकालव्याप्तेराधिक्यात् मुख्य
कालास्पर्शेपिचैकभक्तानुष्ठानंमुख्यकालएव तिथ्यादिषुभवेद्यावान्ह्रासोवृद्धिःपरेहनि तावान्ग्राह्यःसपूर्वेद्युरदृष्टोपिस्व

कर्मणीतिहेमाद्र्यादिधृतवचनात् शास्त्रतस्तत्रतत्तिथिसत्वात् एतदर्थमेवहीदंवचनं उदयास्तमयमात्रसत्वेनसाकल्यवचनं पूर्वे
द्युः पूर्वतिथ्यादिषुस्वकर्मणि उत्तरतिथ्यादिप्रयुक्तकर्मानुष्ठाननिमित्तं ह्रासवृद्धिसाम्यानिचसर्वत्र षष्टिघटिकापेक्षयानतुपूर्वति
थ्याद्यपेक्षया त्रिंशच्चतुर्विंशत्यष्टादशद्वादशघटिकादिक्रमेणसूर्योदयोत्तरंतिथीनांसत्वेचतुःपंचाशच्चघटिकाव्यापित्वेन
तिथीनांपरस्परंसाम्येप्युत्तरोत्तरह्रासव्यवहारात् वृद्धिपक्षेयस्तुयत्रनक्तादौदिनद्वयेपिकर्मकालव्याप्तावुत्तरतिथेर्ग्राह्यत्वंत
त्रकमतिथेः पूर्वदिनेकर्मकालसत्वसंपादनेनतदुपोद्बलनार्थः तिथेः परस्याद्यघटिकास्तुयास्युर्न्यूनास्तथैवाभ्यधिकाश्चता
सांअर्धंवियोज्यं चनतथाप्रयोज्यं ह्रासेचवृद्धौप्रथमेदिनेतदितिलौगाक्षिकृत्तौह्रासवृध्यर्थप्रक्षेपस्तुउपसंहारादिषूपयोगि
संधिनिर्णयार्थः नतुदिनद्वयेमध्याह्नव्याप्त्यादिषुयुग्मवाक्यात्किमितिनिर्णयोनक्रियते द्वितीयादिकयुग्मानांपूज्यतानि
यमादितिवचनादेकभक्तेपितत्प्रवृत्तेः उच्यते यथामध्याह्नादेर्मुख्यकालस्यविधानंतत्कालेनुष्ठानार्थंसंदेहेतत्कालव्या
प्त्यानिर्णयार्थंच तथाअतस्ततयाह्निवैवहीतिगौणकालविधानमपि अनुष्ठानमात्रोपयोगिनोगौणकालस्यस्वकालाद
नंतरःकालोगौणः पूर्वस्यकर्मणइतिसामान्यवचनादेवलाभसंभवात् तेनयत्रेदृशंविशेषतोगौणकालविधानंतत्रगौणका
लव्याप्त्यापिमुख्यकालव्याप्तेश्चतिथिनिर्णितव्यानतुयुग्मवाक्यात् तेनादिनद्वयेमुख्यकालव्याप्तौयुग्मवाक्यान्निर्णया
भिधानंहेमाद्रेरयुक्तं केनचविशेषेणात्रैवयुग्मवाक्यान्निर्णयकरणं अस्पर्शैकदेशसमव्याप्त्योस्तुगौणकालव्याप्त्यातदि
तिनजानीमः वैषम्येणमुख्यकालैकदेशव्याप्तौत्वधिकतत्व्यापिनीग्राह्या यत्वन्यांगमेकभक्तंनतत्रतत्कालव्याप्त्यानि
र्णीतायांतिथौकर्तव्यंकिंतुप्रधानेनिर्णीतायां मध्याह्नस्यचप्रधानेनव्याप्तौगौणकालएवतत्कर्तव्यं अंगगुणविरोधेच
तादर्थ्यादितिन्यायात्दीक्षणीयायाः सोमस्यचेत्यधिकरणेआग्नावैष्णवमेकादशकपालंनिर्वपेदितिविहितायादीक्ष ५९
णीयायायइष्ट्यापशुनासोमेनयजेतसोमावास्यायांपौर्णमास्यांवेतिपर्वण्यनुष्ठेयत्वेनविहितायाःसुत्यायाश्चैकमेव

121
194

पर्वदिनंतच्चविरुद्धं एकादीक्षातिस्रउपसदः पंचमीप्रसुतइतिमध्येव्यवधानावगमात्तत्रेष्टेः प्रथमंपठितत्वाद्दीक्षणीयेष्टेः पर्व
ण्यनुष्ठेयातदनुसारेणसुत्यायादिनांतरेउत्कर्षइतिप्राप्तेब्रूमः प्रधानत्वात्सुत्यैवदर्शेनुष्ठेया अंगानांतदंगानांचप्रधानार्थत्वादिति
तदनुसारेणशेषभूतादीक्षणीयेष्टिर्दिनांतरेपकृष्यतइतिन्यायार्थः यत्तूपवासप्रतिनिधिभूतंतदुपवासयोग्यतिथौमध्याह्नए
वचकर्तव्यंप्रतिनिधित्वात्तिथिर्ययैवोपवासेस्यादेकभक्तेपिसातथेतिसुमंतुवचनाच्चइदंहिवचनंपरिशेषादुपवासप्रतिनिध्येक
भक्तविषयमेवेति नक्तव्रतस्यतुदिवाभोजनाभावविशिष्टरात्रिभोजनात्मकस्यप्रदोषोमुख्यः कालः प्रदोषव्यापिनीग्राह्याति
थिर्नक्तव्रतेसदेतिवचनात् भोजनरूपत्वंचतस्यभोजनघटितैकभक्तोपवासायाचितादिभिः प्राजापत्यादिषुभूयसः साहचर्या
त्साथिकप्रतीतिकं नतुशब्दार्थयोगेन तत्कालीनसाध्यत्वमात्रप्रतीतेः तदंशेरूढिकल्पनायांचप्रमाणाभावात् अतएववक्क
चिन्नक्ताशीवेतिस्पष्टमभिधीयते अतश्चमाधवाद्युक्तंनवरात्रव्रतस्यनक्तव्रतत्वंमुख्यंगौणं यौगिकंवेतिविकल्प्यपूर्वकंयत्के
नचिद्दूषितंभोजनरूपमेवमुख्यंनक्तव्रतमितिभ्रमेणतत्प्रासंगिकप्रतीतिकेशक्तिभ्रांत्या प्रदोषश्चसूर्यास्तोत्तरत्रिमुहूर्ता
त्मकः त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगतेसति नक्तंतत्रतुकर्तव्यमितिशास्त्रविनिश्चयइतिव्यासवचनात् यस्तुद्विगुणछा
यातिक्रमोपलक्षितोदिनांत्यमुहूर्तोयदातुद्विगुणांछायांकुर्वंस्तिष्ठतिभास्करः तत्रनक्तंविजानीयान्ननक्तंनिशिभोजनमिति
सौरधर्मादिषुनक्तव्रतकालत्वेनोक्तःसोनुकल्पः मुहूर्तोनंदिनंनक्तंप्रवदंतिमनीषिणः नक्षत्रदर्शनान्नक्तमहंमन्येगणाधिपेति
भविष्यपुराणेनक्षत्रदर्शनोत्तरप्रदोषभागस्यशिवेनाहंमन्यइतिस्वाभिमतत्वेनतस्यचपरमतत्वेनाभिधानात् तद्वाक्यस्यापि
चाप्रसक्तप्रतिषेधायोगेनप्रदोषमुपजीव्यैवप्रवृत्तेः अंतिममुहूर्तपूर्वभाव्यपिमुहूर्तद्वयंगौणतरःकालः प्रदोषव्यापिनीय
त्रत्रिमुहूर्तादिवायदि तदानक्तव्रतंकुर्यात्स्वाध्यायस्यनिषेधवदितिकूर्मपुराणेतस्यापिनक्तकालत्वेनाभिधानात् प्रदोषतु
ल्यत्वेनाभिधानेपिचतस्यगौणत्वमेवपूर्वोक्तयुक्तेः मुख्यकालेपित्रिमुहूर्तात्मकेआद्यमुहूर्तद्वयंमुख्यतरं निशानक्तंतुविद्वि

का०त०
६०

यंयामार्धंप्रथमेसदेतिस्मृत्यंतरात् एवंनक्षत्रदर्शनानंतरप्रदोषभागस्यनक्तव्रतकालत्वेस्थितेचत्वारीमानिकर्माणिसंध्यायां
परिवर्जयेत् आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमितिनिषेधेपिसंध्यानक्षत्रदर्शनपर्यंतेवनक्षत्रदर्शनात्संध्यासायंतत्पर
तःस्थितमित्यादिवचनोक्ताग्राह्या प्रसिद्धोपिचसर्वेषांसायंसंध्याशब्दःसूर्यास्तादौनक्षत्रदर्शनांतेकाले प्रातःसंध्याश
ब्दश्चकिंचिदालक्ष्यतारकादौसूर्योदयांते संध्योपासनमपितत्रैवविहितं स्कंदपुराणे उदयात्प्राक्तनीसंध्याघटिकात्रयमु
च्यते सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतइतिघटिकात्रयात्मकःसंध्याकालउक्तःससंध्यागर्जितादावनध्यायप्रयो
जकेग्राह्यः वस्तुतस्तुनिषेधेघटिकात्रयात्मकेसंध्याग्रहणेपिवैधेनक्तभोजनेनक्षत्रदर्शनानंतरंघटिकात्रयमध्येपिक्रिय
माणेनदोषः निषेधस्यमैथुनादिसमभिव्याहारेणरागप्राप्तभोजनविषयत्वात् वैधविषयत्वेविकल्पापत्तेश्च यदर्थतया
हियद्विधितःप्राप्तंतदर्थंतयैवतस्यनिषेधोविशेषविषयत्वादिनाप्रबलोप्युपजीव्येनविधिनातुल्यबलसामान्यविषयत्वा
दिनादुर्बलेनापि अतएवपर्वरविवारादिषुरात्रिभोजननिषेधस्यापिरागप्राप्तविषयत्वात् इदंनक्तभोजनंतत्रापिरात्रावेवमु
ख्यकालएवकार्यमितिहेमाद्रिप्रभृतयः माधवस्तुयेत्वादित्यदिनेब्रह्मन्नक्तंकुर्वंतिमानवाः दिनांतेतेपिभुंजीरन्निषेधाद्रा
त्रिभोजनइतिभविष्यपुराणवचनादेतादृशेविषयेपूर्वोक्तेगौणकालएवनक्तव्रतंकार्यमित्याह अत्रेदंचिंत्यं नायंवाचनि
कोर्थःवचनेपिनिषेधादितिहेत्वुपन्यासात् निषेधश्चपूर्वोक्तयुक्त्यावैधेनैवप्रवर्त्तते किंचवैधविषयेपितस्यप्रवृत्तौअन्य
व्रतांगनक्तेतिप्रवर्तेत तत्रचतद्धारोपस्थितत्द्व्रतांगत्वस्यैवप्रजापतिव्रतनयनपूर्वपक्षः तस्यव्रतमित्युपक्रम्यनेक्षेतोद्यंतमा
दित्यमित्यत्रनञ्किंप्रतिषेधः पर्युदासइतिसंशयेपर्युदासस्तावन्नसंभवतिलक्षणापत्तेः किंतुनिषेधः नचैवंफलंकल्प्यं अथा
पिपर्युदासस्तथापिफलकल्पनाभ्यासात् क्रत्वर्थइतिपूर्वपक्षइत्यर्थः न्यायेनप्रसंगादश्वदानेष्टिविधेलौकिकेवैदिकोभय
दानविषयत्वइव क्रत्वर्थपुरुषार्थत्ववैरूप्यंनिषेधस्यापद्येत तेनेदंवचनंभानुसप्तम्यादिविहितसौरनक्तविषयं नतु ६०

123
19

कदाचिद्रविवारप्राप्तेतरनक्तविषयं तत्राहित्रिमुहूर्तस्पृगेवाह्निनिशिचैतावतीतिथिः तस्यांसौरंचरेन्नक्तमहन्येवतुभोजनमिति
क्रमंतुवचनेएवकारेणनक्तस्वभावप्राप्तस्यरात्रिकालत्वस्यनिवर्तितत्वान्निषेधाक्तिःसावलंबनाभवति नरस्यद्विगुणांछाया
मितिक्रमेयदारविः तदासौरंचरेन्नक्तंननक्तंनिशिभोजनमितिकूर्मपुराणेपि इदंसौरनक्तं निशिभोजनरूपंनेतिव्याख्याना
त्सौरनक्तस्यरात्रौनिषेधः नक्तस्यनिशाभोजनात्मकत्वादेवसामान्यतोनिषेधानुपपत्तेः अपिचयेनक्तंकुर्वंतीतिवैधप्रवृत्त्यनु
वादेनित्यवच्चतस्यादित्यवारस्यवैधनित्यमेवविशेषणत्वंप्रतीयतेनत्वार्थसमाजसिद्धंकादाचित्कं तेनेदमपिवचनंसौरन
क्तविषयमेवेतितदेवदिनांत्यमुहूर्तेपूजादिकंपूर्वमेवकृत्वाकर्तव्यं एवंयतिविधवाधिकारिकमपिनक्तंदिवैवनभवति
नक्षत्रदर्शनान्नक्तंगृहस्थस्यबुधैःस्मृतं यतेर्दिनाष्टमेभागेतस्यरात्रौनिषिध्यतेइतिदेवलवचनात् नक्तंनिशायांकुर्वी
तगृहस्थोविधिसंयुतः यतिश्चविधवाचैवकुर्यात्तत्सदिवाकरं सदिवाकरंतुतत्प्रोक्तमंतिमेघटिकाद्वयेइतिस्मृत्यंतराच्च
तदेवंगृहस्थनक्तेनक्षत्रदर्शनोत्तरंप्रदोषभावस्यमुख्यकालत्वेतत्पूर्वसायाह्नस्यचगौणकालत्वेस्थितेचैकस्मिन्नेवकात्
त्स्न्येनैकदेशेनवामुख्यकालंव्याप्नोतिसैवग्राह्या दिनद्वयेपिप्रदोषव्यापिन्युत्तरैव गौणमुख्योभयकालव्यापित्वात् प्रदो
षव्यापिनीस्यादिकूर्मपुराणाद्यादिस्यादुभयोस्तिथ्योः प्रदोषव्यापिनीतिथिः तदोत्तरत्रनक्तंस्यादुभयत्रापिसायतइतिजा
बालिवचनाच्च दिनद्वयेपिप्रदोषास्पर्शिनीपराग्राह्या सायाह्नएवचतत्रभोजनंकार्यं गौणकालव्यापित्वात्प्रदोषव्यापि
नीनस्याद्दिवानक्तंविधीयते आत्मनोद्विगुणाछायामंदीभवतिभास्करे तन्नक्तंनक्तमित्याहुर्ननक्तंनिशिभोजनं एवंज्ञात्वा
ततोविद्वान्सायाह्नेतुभुजिक्रियां कुर्यान्नक्तव्रतीनक्तफलंभवतिनिश्चितमिति स्कंदपुराणाच्च दिनद्वयेपिसाम्येनवैषम्ये
णवातदेकदेशस्पर्शिन्यप्युत्तरैव गौणकालव्याप्तेरधिकत्वात् अनेनैवन्यायेनसौरनक्तेयतिनक्तेचदिनद्वयेसायाह्न
व्यापिनीतदस्पर्शिनी तदेकदेशस्पर्शिनीचपूर्वेद्युरेवतत्व्यापिनीचपूर्वा परेद्युरेवतत्व्यापिनीकेवलंपरेतिज्ञेयं तत्रसा

याङ्गत्वमुख्यकालत्वात् प्रदोषस्य चगौणत्वात् अन्यांगेउपवासप्रतिनिधौनुवाद्वैशेकभक्तन्यायएव अयं चप्रदोषव्याप्त्यानक्तव्र
तनिर्णयोनकेवलंभोजनरूपएवतस्मिन् अन्यत्रापिप्रदोषसाध्यपूजादिरूपेद्रष्टव्यः न्यायाविशेषात् अतएवत्रयोदशीप्रदो
षव्रतेपियोजितः नवरात्रव्रतनिर्णयोप्येतदनुसारेणेवकरिष्यते अथयदातिथिद्वयप्रयुक्तमेकभक्तनक्तादिखंडतिथिनिर्णय
वशादेकत्रदिनेप्राप्नोतितदापूर्वप्रारब्धयोर्द्वयोः पूर्वतिथिप्रयुक्तमनुपसंजातविरोधत्वान्मुख्यकल्पेनकार्यमितरत्त्वनुकल्पे
न तत्रोत्तरतिथिरुत्तरदिनेगौणकालव्यापिन्याः सत्त्वेनैवकर्त्रीतत्प्रयुक्तंव्रतमुत्तरदिनेकर्तव्यं कालस्यात्वंतवाधाभावेकर्त्र
नुरोधस्यापिन्याय्यत्वात् असत्त्वेतस्मिन्नूनेवदिनेकर्त्रंतरेणतत्कारणीयं अनुपादेयकालानुरोधेनोपादेयकर्तृप्रतिनिध्यु
पादानस्योचितत्वात् अयमेवन्यायोनेकतिथिव्यापिपूर्वप्रारब्धव्रतांतःपातिनितद्विरोध्येकतिथिव्रतेपि नियमाश्चोचित
वेशेषि कानक्तभोजिनोव्यासेनोक्तः हविष्यभोजनंस्नानंसत्यमाहारलाघवं अग्निकार्यमधःशय्यांनक्तभोजीषडाच
रेदिति स्नानंकर्मांगंप्रधानकालपूजादेःपूर्वं आहारेलाघवमल्पत्वं कियदित्यपेक्षायांन्यूनंग्रासत्रयेणत्वित्येकभक्तव
दत्रवचनाभावात् प्राजापत्यप्रकरणगताग्राससंख्यानक्तभोजनविषयसाम्यादत्रापिग्राह्या साचपराशरायस्तंबाभ्यांच
तुर्विंशतिमतेचान्यथान्यथोक्ता सायंतुद्वादशग्रासाःप्रातःपंचदशस्मृताः चतुर्विंशतिरायाच्याः परेनिरशनात्स्मृताइति
प्रातस्तुद्वादशग्रासानक्तंपंचदशैवतु अयाचितेतुद्वौचाष्टौप्राजापत्यविधिःस्मृतइतिच अतएवायाचितव्रतेप्ययाचित
शीमितभुगितिवचनादपेक्षिताप्राजापत्यायतदुक्तैवग्राससंख्या अग्निकार्यंहोमकार्यंचकुर्वीतेत्यादिभिर्धान्यव्रतादौ
विहितंहोमरूपं अयाचितव्रतंचोपवासवदहोरात्रसाध्यत्वात्तदुभययोगिन्यांतिथौकर्तव्यं दिवारात्रिव्रतंयच्चेत्यादिस्कं
दपुराणवचनात् यदातत्तिथिरेकस्मिन्दिनेदिवेवान्यस्मिन्रात्राविवतदाहव्यापिन्यांतिथौकर्तव्यं अहःसुतिथयः ६१
पुण्याइत्यादिजाबालिवचनात् त्रिसंध्यव्यापित्वाच्च एवंसतिसंभावितपक्षांतरेष्वप्युपवासवदेवतत्तिथिर्निर्णेतव्या

125
194

अयाचितान्नभोजनंतुयदैवतल्लाभस्तदैवदिनेरात्रौवा अनिषिद्धकालेसकृदेवकर्तव्यं अलाभेत्पवासेपिनव्रतक्षतिः नन्वया
चितव्रतमथापरंत्र्यहंनकंचनयाचेतेतिव्याप्त्तनञ्श्रवणेपिव्रतशब्दत्वेननिषेधरूपत्वासंभवान्नेक्षितोद्यंतमादित्यमित्यादिव
त्संकल्पलक्षणयायाचितमदनीयंनभोक्ष्यइत्येवंविधसंकल्परूपंयथाप्रतीयते तथात्र्यहमद्यादयाचितमयाचिताशीमित
भुगित्यादिषुसमस्तनञ्श्रवणात्व्रतविहितणिनिप्रत्ययश्रवणाच्चयाचितभिन्नमद्यादेवेत्येवंसाधनविशेषविशिष्टादनधा
त्वर्थनियमरूपवाक्यार्थप्रतीतिर्याचितभिन्नमदनीयंभोक्ष्यइत्येवंसंकल्परूपमपि अतएवमाधवेनोभयरूपमपितदंगी
कृतं भनंतभट्टेनतु द्वितीयसंकल्परूपमेव तथाचकथमुपवासेअयाचितसिद्धिः अत्रोच्यते समस्तनञ्श्रवणेप्यपिलाघ
वात्प्राप्तेभोजनेयाचितभिन्नरूपसाधनविशेषनियमएवविधेस्तात्पर्यंनत्वशनरूपधात्वर्थनियमेपिगौरवान् सतोभार्या
मुपेयादित्यत्रतुवीप्सायुक्तस्य ऋतोर्निमित्तत्वेनाविधेयत्वात्केवलधात्वर्थनियमान्नगौरवं नचसर्वत्राख्यातसंबद्धइति
न्यायेनसायंजुहोतीत्यादिवत्कालत्वेनैवगमनानुवादेन ऋतुस्तत्रविधातुंशक्यः तथासतिपरिसंख्यापत्तेः नह्येकस्यां
गमनव्यक्तौ ऋतोःपाक्षिकीप्राप्तिर्येननियमःसंभवेत् तेनावृत्तुगमनव्यक्तिव्यावृत्त्यर्थत्वात्परिसंख्यैवस्यात् इहत्वेकस्यां
भोजनव्यक्तौ अयाचितान्नस्य प्राङ्मुखत्वस्येवसर्वदाऽप्राप्तेसंभवतिनियमः सचनिषेधगोचरसंकल्पतुल्ययोगक्षेमएव
केचिदस्तर्यंमश्यामइतिवत्तामसंगस्यापिनञःक्रियासंबंधाश्रयणेननिषेधवाक्यसमानार्थत्वमेव त्र्यहमद्यादयाचि
तमित्यादीनामिच्छंति यस्त्वशनानुवादेसाधनविशेषनियमस्यत्र्यहादेश्चविधानाद्वाक्यभेदप्रसंगः अयाचिताशीत्यत्र
चैकपदप्रसरभेदप्रसंगः सआर्थिकानुवादाभ्युपगमात्सोरुषेयस्मृत्यादिवचनेषुचबहुशोदर्शनात्परिहृतः नचैवंस
तिनक्तैकभक्तविध्योरपिदिवारात्रिभोजननिवृत्त्योरेवतात्पर्यंस्यात्तथाचतत्राप्युपवासेव्रतासिद्धिःस्यादितिवाच्यं निवृत्ति
मात्रेतात्पर्येव्रतत्वनिर्वाहार्थंसंकल्पेलक्षणाप्रसंगान्निवृत्तिविशिष्टभुतभोजननियमविधानाभ्युपगमेनैवतन्निर्वाह

स्योचितत्वात् चांद्रायणादिविधिस्थप्यनेनेवन्यायेन चंद्रगत्यनुवर्तनाद्यन्यथानुपपत्त्या अनेकगुणोपादानाच्च भोजनविधि
रेव नचनिवृत्तेरपिव्रतत्वमस्त्विति वाच्यं नियमोव्रतमस्त्रीतच्चोपवासादिपुण्यकमिति कोशाद्व्रतशब्दस्यानुष्ठेयभाववाचि
त्वावगमात् पुण्यशब्दोहि धर्मसुकृतादिपर्यायः पुरुषार्थसाधनादृष्टहेतुक्रियायां तदावेशेनतादृशद्रव्यादौवा वेदवादिनां प्र
सिद्धः तथाचोक्तमाचार्यैः श्रेयोहिपुरुषप्रातिः साद्रव्यगुणकर्मभिः चोदनालक्षणैःसाध्यातस्मात्तेष्वेवधर्मतेति केषांचित्ता
दृशोऽदृष्टेवा नचभावनावाक्यार्थवादिनांनिवृत्तेस्तादृशादृष्टहेतुत्वेप्रमाणमस्ति तस्याः कालांतरभाविफलाभावात्स्वरू
पेणैवचसत्वात् कार्यवाक्यार्थवादिभिः कामाधिकारकॢप्तशक्तिवशान्निषेधेषुनिवृत्तिरप्यदृष्टंयद्यप्यभ्युपगम्यते तथापि
नतत्पुरुषार्थहेतुरिति नतत्रतद्धेतुर्वानिवृत्तिः पुण्यशब्दवाच्या अतएवनिषेध्येभ्योनिवृत्तोनधार्मिकइत्युच्यते किंत्वधार्मि
कोनभवतीत्येव तेनाविध्येकत्ववादियद्यपिनिवृत्तिरपि विधिविषयोभवति तथापिनतस्याधर्मत्वं तादृशादृष्टहेतुत्वाभावा
त् अतएवप्रजापतिव्रतनयेनेक्षेतोद्यंतमादित्यमित्यादिस्नातकव्रतप्रकरणाधीतनिषेधेषु पर्युदासलक्षणयासंकल्पवि
धित्वंसिद्धांतितंनिवृत्तेरपिव्रतत्वेप्रधानाख्यातार्थान्वयेनतत्रश्रुत्यानिषेधत्वमेवस्यादितिवैदिकपदवाक्यार्थानभिज्ञा
नांनिवृत्तेरपिव्रतत्वाभिधानंप्रलापएव चतुर्थषष्ठाष्टमकालिकत्वादिविधिषुतु चतुर्थकालिकादिशब्दानां मत्वर्थ्यऽपठन्
प्रत्ययांतानां चतुर्थकालाहारइत्यादिवचनांतरैकवाक्यतया भोजनगोचरचतुर्थादिकालसंबंधपरत्वावगमाद्भवंतिचैक
यदान्यप्यवधारणानियथाद्रक्षोवायुभक्षइतिन्यायाच्च त्र्यादिकालगतभोजननिवृत्तेश्चतुर्थादिकालगतनक्तैकभक्ता
दिनियमस्यचोभयस्य प्रतीतावपिनिवृत्तावेवविधेस्तात्पर्यंनतु भोजननियमेपि गौरवप्रसंगात्कालांशेपरिसंख्यात्वेनभो
जनांशेनियमत्वेनैकपदेभिन्नप्रसरत्वापत्तेश्च व्रतत्वनिर्वाहकस्तु चतुर्थकालाहारोब्राह्मणान्भोजयेदित्यादिविशेष्यादि ६२
भूतब्राह्मणभोजनादिनैव तेनमासादिव्यापिनी चतुर्थकालिकत्वादिव्रतेनुष्ठीयमानेएकादश्याद्युपवासदिनेभोज

127/194

नप्राप्तावपितदकरणेपितद्व्रतक्षतेरभावादुपवासएवकर्तव्यइति तेनायमेकभक्तादिषुसंग्रहः मध्याह्नस्यद्वितीयेर्धेएक
भक्तव्रतंभवेत् तेनतद्व्यापिनीयास्यात्सैकभक्तव्रतेतिथिः दिनद्वयेपितद्व्याप्तावस्पर्शेसाम्यएववा पूर्वविषम्यपक्षेतुयाधि
कासैवगृह्यतां तत्तिथिक्षयनिक्षेपात्पूर्वस्यांभोजनंभवेत् अस्पर्शेपिस्वसमयेगौणस्त्वस्तावधिस्ततः त्रिमुहूर्तंप्रदोषःस्या
द्रात्रावस्तंगतेसति नक्षत्रदर्शनादूर्ध्वंतत्रनक्तव्रतंभवेत् तत्पूर्वभावीसायाह्नोगौणस्तत्समयस्मृतः यातुकृत्स्नेल्पकेवापि
मुख्येतत्समयेभवेत् सैवतत्रैष्यतिशेषपक्षेषुतुपराभवेत् सायाह्नएवभोक्तव्यंमुख्यास्पर्शेचतत्रतु एवंनक्तव्रतेसौरेविध
वायतिनोस्तथा परेद्युरेवसायाह्नव्यापिनीपरतोभवेत् शेषपक्षेषुपूर्वैवज्ञेयान्नक्तैकभक्तयोः अन्यांगयोश्चोपवास
प्रतिनिध्योश्चनिर्णयः नक्तव्रतेचांदिर्चादिनृपेप्येषएवविनिर्णयः अयाचितंत्वह्निरात्रावह्निवायातिथिर्भवेत् तत्रकार्यं
तथाचोपवासवत्तत्रनिर्णयः यदेवायाचितंलब्धंतदेवात्रभुजिर्भवेत् अलाभेतूपवासेपिनव्रतक्षतिरिष्यते इत्येकभक्ता
दिनिर्णयः अथोपाकर्मनिर्णयः इदंचोपाकृत्याधीयीतेत्यध्ययनसमभिव्याहाराद्ब्रह्मचारिप्रकरणाधीतस्यचाधी
तेर्ब्रह्मचर्यस्य ग्रहणाध्ययनार्थत्वेनतन्मात्रपरत्वाद्ग्रहणाध्ययनांगत्वात्तदधिकारिणां ब्रह्मचारिणां भवत्येव तन्मात्रांग
त्वेपिचव्रतस्नातकानामनुवृत्तग्रहणाध्ययनानांगृहस्थानामपिभवति दर्शितंचगृहस्थानामपिग्रहणाध्ययनमाश्वला
यनेनसमावृत्तोब्रह्मचारिकल्पेनयथान्यायमितरजायोपेयेस्येकेप्राजापत्यंस्यादिति व्रतमात्रानुष्ठानेनस्नानंवदद्भिर
न्यैश्चवस्तुतस्तुनकेवलग्रहणाध्ययनार्थमुपाकर्मधारणाध्ययनार्थमपि अध्येष्यमाणोध्याप्येरन्वारब्धइत्यत्राध्या
प्यसमभिव्याहारादध्यापकपरेध्येष्यमाणपदे धारणाध्ययनरूपत्वाण्णिचंविनाप्युक्तस्याध्ययनस्यतेनैवरूपेणलटोपा
कर्मपरिशेषित्वप्रतीतेः उभयोक्तिबलात्तत्समर्थस्याध्याप्यैर्विनाप्युपकर्मस्वीकाराच्च तेनग्रहणाध्ययनानिवृत्तानां
धारणाध्ययनमात्रंकुर्वतांगृहस्थवनस्थानामपिभवति अतएवस्पष्टंगोभिलवचनं उपाकर्मोत्सर्जनंचवनस्थानामपीष्य

का०त०
६३

ते धारणाध्ययनांगत्वाचग्रहिणांब्रह्मचारिणामिति कात्यायनेनतुवेदसाध्यर्थमात्रार्थतैवोक्ता प्रत्यब्दंयदुपाकर्मसोत्सर्गंविधि
वद्विजैः क्रियतेछंदसांतेनपुनराप्यायनंभवेत् अयातयामैश्छंदोभिर्यत्कर्मक्रियतेद्विजैः क्रीडमाणैरपिसदा तत्तेषांसिद्धिका
रणमिति अतएवाकरणप्रत्यवायश्रवणेजपयज्ञस्यापिग्रहणं उत्सर्जनंचवेदानामुपाकरणकर्मच अकृत्वावेदजप्यस्यफलं
नाप्नोतिमानवइति अतएवचउपाकर्मोत्सर्जनयोर्नित्यत्वमत्रचस्मृतिवत् बह्वृचादिगृह्येप्रत्यक्कर्मनेकेकालाउपाकरणस्यो
क्तास्तत्रश्रावणभाद्रपदयोस्तावन्नतुल्यवद्विकल्पः किंतु मुख्यानुकल्पभावेनेतिस्पष्टंप्रतीयते आश्वलायनसूत्रेतावद
थातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रवणेन श्रावणस्यपंचम्यांहस्तेनवेतिश्रावणस्यस्पष्टंविधानं भाद्रपदस्यतुवार्षि
कमित्येतदाचक्षतेइतिसमाख्ययास्त्वनमात्रंततलिंगं अतएवतत्कारिका अद्भ्यौषधयस्तस्मिन्मासेतुनभवंतिचेत्
तदाभाद्रपदेमासिश्रवणेनतदिष्यतइति अन्यसूत्रेप्ययमभिप्रायः श्रावणस्यैवस्पष्टंविधानंभाद्रपदस्यतुक्वचित्सूचनमात्रमिति
यद्यपिश्रावण्यांप्रोष्ठपद्यांवाप्युपाकृत्ययथाविधि अथातःस्वाध्यायोपाकर्मश्रावण्यांप्रोष्ठपद्यांवेत्यादिमनुगोतमादि
वचनेषुश्रावणभाद्रपदयोस्तुल्यकल्पत्वंप्रतीयते तथापिसूत्रस्वरसाच्छ्रावणकर्मसमाख्ययाच्च श्रावणमासस्यमु
ख्यत्वंतत्रापियद्यपि बह्वृचगृह्येषु श्रवणातिरिक्ता अपियाजुषगृह्येषुचपौर्णमास्यतिरिक्ता अपिकालाउक्तास्तथापिब
ह्वृचानांश्रवणनक्षत्रं यजुर्वेदिनांचमैत्रायणगृह्येश्रवणविधानात्तद्भिन्नानांपौर्णमास्येवमुख्यस्तत्कालः उपाकर्म
प्रकुर्वीतिक्रमात्सामर्ग्यजुर्विदः ग्रहसंक्रांत्यदुष्टेषुहस्तश्रवणपर्वसु धनिष्ठाप्रतिपद्युक्तेत्वाष्ट्रसक्षसमन्विते श्राव
णंकर्मकुर्वीरन्नृग्यजुःसामपाठका इत्यादिवचनेषुतत्तद्वेदसंबंधित्वेनतत्तत्कालनिर्देशात् यत्तु केनचित्प्रथमनिर्दिष्ट
त्वाद्ऋग्वेदिनांदुष्टग्रहसंक्रांतित्वेतत्रसूतकादिसंभावनायांवातन्मासशुक्लपंचम्यांकेवलायांहस्तयुक्तायांवाबह्वृचैरुपा ६३
कर्मकार्यं बह्वृचाश्रवणेकुर्युः श्रवणेयजुर्वेदिनांश्रावणीमुख्यः कालइत्युक्तं तदेकैकस्यपदस्यानुष्ठानहेतुज्ञानजनक

129
194

त्वाभावेनैकवाक्यगतपदक्रमस्यक्रमप्रमाणत्वासंभवादवर्जनीयमात्रत्वात्कात्यायनेनश्रवणस्यबौधायनेनचाषाढ्या
अपिप्रथमनिर्दिष्टत्वेनाव्यवस्थितत्वाच्चायुक्तं तेनश्रावणश्रवणग्रहसंक्रांतिदुष्टत्वेतत्रसूतकादिसंभावनायांवातन्मास
शुक्लपंचम्यांकेवलायांहस्तयुक्तायांवाबह्वृचैरुपाकर्मकार्यं बह्वृचाःश्रवणेकुर्युः ग्रहसंक्रांतिवर्जितइत्युक्तत्वात्तत्र
त्येतादृशपंचम्याअपिनिर्देशाच्च अद्भ्यादिनातुश्रवणासंभवेभाद्रशुक्लगतयोः श्रवणतादृशपंचम्योः वार्षिकस
माख्याकरणस्यतत्प्राप्तिफलकत्वात् एवंश्रावणश्रवणस्यगुरुशुक्रास्तवार्धकाद्याक्रांतत्वेतत्रप्रथमोपाकर्मनिषेधात्त
त्रापियथासंभवंश्रावणपंचम्यांभाद्रश्रवणपंचम्योर्वातत्कार्यं निषेधश्चकश्यपेनोक्तः गुरुशुक्रतिरोधानेवर्जयेद्ध
तिचोदितान् इत्याहभगवानत्रिःश्रावणंतुविशेषतइति अयंचनिषेधःप्रारंभानुपादानेपितद्विषयएव यज्ञोपवीतं
धर्तव्यंश्रावणेगुरुशुक्रयोः मौढ्येपिवार्धकेबाल्येनित्यवत्कर्मचोदितमितिस्मृतिसारसमुच्चयेतदनुष्ठानस्यापितत्रोक्तत्वा
त् यज्ञोपवीतधारणेनोपाकर्मोपलक्ष्यते तत्रनवयज्ञोपवीतधारणविधानात् तथाचगालवः कृत्वायज्ञोपवीतानिनवा
निवस्त्रधाधिप हुत्वाग्नौगुरवेदत्वापितृभ्योधारयेत्ततइति अतएवस्मृतिसंग्रहेस्पष्टंप्रथमग्रहणं गुरुभार्गवयोर्मौ
ढ्येवावार्धकेपिवा तथाधिमाससंसर्पमलमासादिषुद्विज प्रथमोपाकृतिर्नस्यात्कृतकर्मविनाशकृदिति अधिमाससं
सर्पमासौमलमासौ आदिशब्देनसिंहस्थगुरुवक्रातीचारादिग्रहणं अत्रप्रथमोपाकृतिनिषेधेयदधिमासादिग्रह
णंतत्रतत्रद्वितीयादिप्रयोगप्राप्त्यर्थंनित्यस्यापिसंगतिकस्यतत्रकर्तुमनुचितत्वात् उपाकर्मतथोत्सर्गः प्रसवाहोत्स
वाष्टकाः मासवृद्धौपराःकार्यावर्जयित्वातुपैतृकीमितिज्योतिःपराशरवचनेसर्वप्रयोगस्याधारणेपनानिषेधाच्च किंतु
तत्रप्रारंभेप्रत्यवायातिशयज्ञापनार्थं प्रसवाहोत्सवशब्देन प्रसवनिमित्ताआपाततस्तद्दिनेप्राप्ताजातेष्टिर्गर्ह्यतेव
र्धापनंवा नतुजातकर्मादि तस्याधिमासएवकर्तव्यत्वोक्तेः वस्तुतस्त्वधिमासेप्रथमोपाकर्मप्रतिषेधः सामगविषयः

का०त०
६४

षांतद्वितीयादिप्रयोगस्यसिंहेरवौमलमासेतत्रैवकर्तव्यत्वात् सिंहेरवावित्युक्तेः अतएवदशहरास्वनोत्कर्षश्चतुर्थ्यपियु
गादिषु उपाकर्ममहाषष्ठ्यांत्र्येतदिष्टंवृषादितइत्युष्यशृंगवचनमपिसामगविषयमेव तदुपाकर्मण्येवएतदिष्टंवृषादित
इतिहेतुप्रसिद्धिलाभात् अन्योपाकर्मणिसौरमासग्रहणेप्रमाणाभावात् तेनसामगैः प्रथममुपाकर्मसिंहस्थेरवौमलमा
सेनकर्तव्यं अन्यैस्तुश्रावणेधिकमासेद्वितीयाद्यपि दशहरास्विति वचनार्थश्चमलमासप्रकरणेनिरूप्यवक्ष्यते य
यजुर्वेदिभिस्तुश्रावण्याअसंभवयेषांगृह्येश्रावणहस्तपंचम्यावुक्तेतैस्तेतयोरप्यसंभवेनभाद्रपदपौर्णमासी तद्गत
हस्तपंचम्योर्वायाह्येयेषांगृह्येतेनोक्तेतेर्भाद्रपद्येवसंक्रांतिग्रहणंवापियदिपर्वणिजायते तन्मासेहस्तयुक्तायां
पंचम्यांवातदिष्यतइतिस्मृतिमहार्णवधृतवचनात् श्रावण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधि युक्तश्छंदांस्यधी
यीतमासान्विप्रोर्धपंचमान् अथातःस्वाध्यायोपाकरणंश्रावण्यांप्रौष्ठपद्यांवेत्यादिमनुवृद्धवसिष्ठादिवचनेषु
प्रौष्ठपद्याअपिप्रौपदीहस्तेनोपाकर्मेतिगोभिलवचनेचप्राप्येत्यध्याहारेणान्यत्रहस्तपंचम्योः प्रायेणसाहचर्यदर्श
नाद्धस्तग्रहणात्पंचम्युपलक्षणेनचभाद्रपदहस्तपंचम्योरप्युपाकर्मकालत्वोक्तेश्चस्मृतिमहार्णववचनेवाशब्दो
निपातानामेकार्थत्वात्तथैवातीतहस्तयुक्तायांपंचम्यामित्येकएवपक्षः अतएवचाश्वलायनसूत्रगतहस्तग्रहणं
पंचमीविशेषणत्वेनवृद्धैर्व्याख्यातं यद्वा यदिस्याच्छ्रावणंपर्वग्रहसंक्रांतिदूषितं स्यादुपाकरणंशुक्लपं
चम्यांश्रावणस्यत्वितिवचनेशुक्लपंचम्याःप्रौष्ठपदीहस्तेनेत्यादिवचनेषुत्रकेवलहस्तस्याप्युपादानाद्धस्तयुक्ता
यांयस्यांकस्यांचित्तिथौपंचम्यांवाकेवलायामपीतिविकल्पार्थएववाशब्दः संक्रांत्यादिग्रहणंसूतकादिसंभावना
या अप्युपलक्षणं संक्रांतौग्रहणेवापिसूतकेमृतकेपिवा गणस्नानंनकुर्वीतनारदस्यवचोयथा अथचेद्रा ६३
ष्ट्रसंयुक्तेपर्वणिस्यादुपाक्रिया दुःखशोकाभयग्रस्ता राष्ट्रेतस्मिन्द्विजातयइतिस्मृत्यंतरवचनेसूतकादावपि

131/194

तन्निषेधात् वैतानोपासनाइतिप्रसवनिवृत्त्यर्थश्चपुनःप्रतिषेधः उपाकर्मणोपिगृह्याग्निसाध्यत्वात् संक्रांतिर्ग्रहणं
वापियदिपर्वणिजायते उपाकृतिस्तुपंचम्यांकार्यावाजसनेयिभिरितिवचनांतरेचवाजसनेयिग्रहणंयेषांगृह्येपंच
मीश्रुतातेषांसर्वेषामुपलक्षणंयापंचम्यामुपाकृतिःकार्यत्वेनोक्तासापर्वणोदुष्टत्वइतिपंचमीपक्षस्यविषयविशेष
मात्रविधानार्थत्वाद्वचनस्य अन्यथासाचवाजसनेयिभिरेवेत्यादिविधानेवाक्यभेदापत्तेः अनुक्तपंचमीकैस्तुप्रौष्ठ
पद्यामेवेत्युक्तं बौधायनीयैस्तुश्रावण्यसंभवेवार्षिकसमाख्यांबाधित्वाआषाढ्यामपिकर्तव्यं श्रावण्यांपौर्णमा
स्यामाषाढ्यांवोपाकृत्यछंदांस्यधीयीतेतिबौधायनसूत्रात् एवमन्यैरपिबह्वृचैर्याज्ञिकैश्चमुख्यकालासंभवेस्वस्व
सूत्रोक्ताअन्येकालाअनुकल्पत्वेनग्राह्याः सामगैस्तुसिंहस्थेसूर्येहस्तनक्षत्रेकार्यं सिंहेरवौतुपुष्यर्क्षेपूर्वाह्णेविचरेद्
द्विः छंदोगामिलिताकुर्युरुत्सर्गंसर्वछंदसा शुक्लपक्षेतुहस्तेनउपाकर्मापराह्णिकमितिगार्ग्यवचनात् एवंचप्रौष्ठपदीहस्ते
नोपाकरणंतेषामुत्सर्जंतीतिगोभिलसूत्रमपिसौरप्रौष्ठपदांगीकारेणक्वचिदपवादविषयेपीतिन्यायेनछविषयेष्योत्सर्गिक
र्मणंकृत्वाहस्तयुक्तांप्रौष्ठपदमाससंबंधिनींतिथिंप्राप्योपाकरणंकार्यं नक्षत्राणश्चसूत्रस्वरसात्सौर्याराात्रिःपौषमहरित्यु
दाहरणाच्चपौर्णमासीमात्रविषयत्वेप्रमाणाभावेनसामान्यविषयत्वात्तिष्ययुक्तांतादृशप्रौष्ठपदीमेवप्राप्योत्सर्जनमिति
व्याख्येयं उपाकर्मापराह्णेस्यादुत्सर्गःप्रातरेवचेतिसामान्यवचनमपिछंदोगविषयमेव विशेषवचनैकवाक्यत्वात् अन्ये
षांतुदैवत्वात्पूर्वाह्णएवोपाकर्म प्रयोगपारिजातेतुसर्वेषामप्युपाकर्मापराह्णिकमुक्तं यत्तुकेनचिद्वेदोपकरणेप्राप्तेकुलीरे
संस्थितेरवौ उपाकर्मनकर्तव्यंकर्तव्यंसिंहयुक्तकइतिवचनंदेशविशेषेव्यवस्थापयतोनर्मदोत्तरभागेतुकर्तव्यंसिंहयुक्त
के कर्कटेसंस्थितेभानावुपाकुर्यात्तुदाक्षिणइतिबृहस्पतिवचनस्यछंदोगविषयत्वमभिदधतांसामगानांदेशविशेषेक
र्कटस्थेरवावुपाकर्मोक्तंतदयुक्तं बृहस्पतिवचनस्योपाकर्मणिदेशविशेषेणसिंहवकर्तव्यव्यवस्थापकतातावत्तैनैवोक्ता

व्यवस्थाचोभयप्राप्तौ भवति नचाहृग्यसामगानांकर्कप्रापकंवचनंक्कापिग्रंथेदृश्यतेयदिच श्रावणशब्देन सामगमासमुपाकर्मका
लविधानंक्कापिस्यात सचकथंचित्सौरपरः स्यात्ततोमीनमेषयोर्मेषवृषभयोर्वा वसंतइतिवचनात सर्वेषांचैत्रवैशाखादीनां
मीनमेषवृषान्यतररूपत्वेनवैकल्पिकरूपत्वाच्छ्रावणस्यापि कर्कसिंहान्यतररूपस्याव्यवस्थायाप्राप्तिः स्यान्नचतादृशमपि
तावत्प्रतिविधानमस्तिप्रत्युतंतत्तरानृप्रत्येवतादृशंविधानमस्ति सौरपरताचतत्रस्य श्रावणशब्दस्यसंभावयितुंशक्यते॥
तथाहिवृषेरवावितिदशहरायाउव युगादीनांसौरोपजीवनेनक्काप्यभिधानादर्शनेप्येतदिष्टंस्वषादितइतिसिद्धकंठेतुनिर्दे
शान्यथानुपपत्त्यायुगादिवाक्यगतानांवैशाखादिशब्दानामेवगौणेपि सौरेतात्पर्यंग्रह्यतइतियथाहेमाद्रिणोक्तं तथात
त्रादिवहेत्वृत्तिपूर्वमुपाकर्मणाप्युत्कर्षनिषेधकालवचनात्तस्मात्तु कर्कसिंहव्यवस्थापकाद्वचनादुपाकर्मविधिगतस्य
श्रावणशब्दस्यापिशक्यंसौरपरत्वंकर्तुं नचैवमुत्कर्षःकालवृद्धौस्यादुपाकर्मादिकर्मणीत्यादिवाक्यंनिर्विषयंस्यादितिवा
च्यं सत्यपिचैत्रादीनांवैकल्पिकमीनमेषादिरूपत्वेतुलामकरमेषेषुप्रातःस्नायीभवेन्नरइत्यस्य कार्तिकमाघवैशाखश
ब्दघटितप्रातःस्नानविध्येकवाक्यतया अन्यस्मादपिचभूयसः स्मार्तपौराणव्यवहाराच्चैत्रादीनांमीनादिरूपत्वस्यौत्स
र्गिकत्वावगमादधिकमासेपि कर्कश्रावणएवोपाकर्म प्राप्तौतत्र सिंहश्रावणविधानार्थत्वेनसार्थक्यात तथामासशब्द
स्यचैत्रादिशब्दानांच सौरएवमुख्यत्वंमन्वानानां जीमूतवाहनादीनांमतेकन्यास्थेरवौकर्तव्यस्यमहालयश्राद्धस्यत
त्राधिमासयातेपि सौरमानोपजीवित्वात्तत्रैव प्राप्तस्यतत्राकर्तव्यत्वार्थंतुलायांकर्तव्यत्वार्थंचतुलाविधानंयावच्चक
न्यातुलयोरित्यादितद्वत तत्रापिचैतैरेवमेववक्तव्यमित्याद्यधिमासनिर्णयेवक्ष्यते न्यायस्यचमंथरत्वादौत्सर्गिकत्व
रूपन्यायलभ्यकर्कनियमावगमात्पूर्वमेवदेशभेदेनव्यवस्थापनंनानुपपन्नं न्यायलभ्यस्तुसदृशनियमात्पूर्वमेवविस ६५
दृशपूतीकायदिसोमंनविंदेतपूतीकानभिषुणुयादिति अत्रकिंसोमाभावेपूतीकैर्यागंसाधयेदितिपूतीकायागसाध

133
19

नत्वेनविधीयंतेउतप्रतिनिधिनियमः यःसोमजातिपरिछिन्नान्सकलावयवानुपादातुमशक्तोविकलानुपादित्सतिस्तद्यर्थका
निति तत्राभिषुणुयादितिलिङ्श्रवणादभावेविधिरितिपूर्वःपक्षः सिद्धांतस्तु अत्यंताप्राप्तविधानेगौरवात सदृशतया
पक्षेप्राप्तानांनियममात्रविधानेलाघवाच्चननुस्तु सदृशानामन्येषांसंभवादीषत्सदृशाःपूतीकाःपक्षेनैवप्राप्नुवंतीतिकथं
नियमइतिचेत्तत्र सौमसादृश्यंनेहप्रतिनिधेःप्रायकं किंतिनियामकं तत्रयावन्यायेनस्तुसदृशंनियंतुमुपक्रमतेतावद्वच
नेनास्तुसदृशाःपूतिकानियम्यंतइतिकादिनियमविधानवत सर्वंचैतद्धेमाद्रिमतमन्वारुह्योक्तं वस्तुतस्तुसामगेतरविष
याएवोपाकर्मणिश्रुतयः श्रावणशब्दोमुख्यचांद्रविषयएव तत्रैवतोपाकर्मकालेकर्कसिंहयोर्द्वयोरपिसंभवादितराव
प्रत्येवदेशभेदेनतयोर्व्यवस्थोचिता नतुसामगान्प्रतितेषांकर्के उपाकर्मणोऽप्राप्तेरेव उपाकर्मनकर्तव्यंकर्कटस्थेदिवाक
रइतिनिषेधाप्रवृत्तेः कथंतर्हिनर्मदोत्तरभागस्थनामप्यार्यावर्तनिवासिशिष्टानां श्रावणएवकर्कटस्थेपिरवावुपाकर्मा
नुष्ठानमृग्यजुर्वेदिनांप्राच्यादिनिबंधेषुदाक्षिणात्यानामपिमहानिबंधेष्वालिखितेस्मिन्नेव वनेश्चसादिस्यवेहि तस्मादि
तरेषामेवयथातथाभवदुपाकर्मसामगानांतुसिंहार्कहस्तएवनचाप्यधिमासेप्युत्कृष्यते आशौचाशक्त्यादिनाचतदति
क्रमेलुप्यतएव एवंग्रहसंक्रांतियुक्तेपि उपाकर्मप्रकुर्वीतेतिप्रागलिखितवचनात ग्रहसंक्रांतियोगश्चयस्मिन्दिनेउ
पाकर्मतद्दिनार्धरात्रात्पूर्वमेवोक्तेषुकालेषु उपजायमानस्तेषांदूषकोनतुतस्मात्परस्तात अर्धरात्रादधस्ताच्चेत्संक्रां
तिर्ग्रहणंतथा उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृदितिगार्ग्यवचनात यद्यर्धरात्रादर्वाक्तुग्रहःसंक्रमएववानोपाक
र्मतदाकुर्यात श्रावण्यांश्रवणेपिवेतिवचनांतराच्च श्रावण्यादिग्रहणमुपलक्षणं यानितुग्रहणादिनेतरेषामपि
तत्समीपवर्तिनां केषांचिद्दिनानांसदोषत्वप्रतिपादकानिवचनानि त्रयोदश्यादितोवर्ज्यंदिनानांनवकंध्रुवं मांग
ल्येषुसमस्तेषुग्रहणेचंद्रसूर्ययोः द्वादश्यादिःतृतीयांतोवेधइंदुग्रहेस्मृतः एकादश्यादिकःसौरेचतुर्थ्यंतः

का०त०
६६

प्रकीर्तितः खंडग्रहेतयोः प्रोक्तमुभयत्रदिनद्वयमित्यादीनितान्युपाकर्मभिन्नविषयाणि नित्येनैमित्तिकेजप्येहोमयज्ञक्रि
यासुच उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइतिवचनात् तेनपर्वणिग्रहदुष्टेपि महाविधांतःपातिनिश्रवणेउपाकर्मभवत्येवे
ति अत्रचसामगानामुत्सर्जनोपाकर्मणोर्यो पूर्वाह्णापराह्णौ तौद्वेधाविभक्तदिनभागौग्राह्यौतद्वाक्यैतयोरेवनिर्देशात् येषां
तुदैवत्वेनोपाकर्मणिपूर्वाह्णग्रहणंतेषांदेवकर्मस्तु पंचधात्रेधाचतुर्धाद्विधाविभागान्यतरविभक्तस्यपूर्वाह्णस्यमुख्यानुकल्प
भावेन प्रयोगाल्पत्वमहत्वाभ्यांवाव्यवस्थितस्यसर्वस्याप्यंगत्वादत्रापितादृशस्यग्रहणं सर्वथापिहस्तश्रवणपर्वणांखंडत्वे औ
दयिकानामेवात्रकर्मणिग्रहणं तथाचपरिशिष्टं धनिष्ठाप्रतिपद्युक्तंत्वाष्ट्रऋक्षसमन्वितं श्रावणंकर्मकुर्वीरन्नृग्यजुःसाम
पाठकाइति कर्मणोधनिष्ठादियुतश्रवणेप्रतिपद्युक्तपौर्णमास्यांचित्रायुतेचहस्तेयथाक्रममनुष्ठानात् श्रवणेन्वयव्य
तिरेकविधयाव्यासवचनमपि श्रवणेनतुयत्कर्मउत्तराषाढसंयुतं संवत्सरकृतोध्यायस्तत्क्षणादेवनश्यति धनिष्ठासंयु
तंयस्माच्छ्रावणंकर्मयद्भवेत् तत्कर्मसफलंविद्यादुपाकरणसंज्ञितमिति औदयिकानिचपर्वादीनिप्रातःसंगवात्मकष
ण्मुहूर्तव्यापीनिग्राह्याणि श्रावण्यांप्रोष्ठपद्यांवाप्रतिपत्षण्मुहूर्तकैः विद्धास्यात्छंदसांतत्रोपाकर्मोत्सर्जनंभवेत् इति
निगमवचनात् पर्वग्रहणंहस्तश्रवणयोरप्युपलक्षणं अतएवपृथ्वीचंद्रोदयेश्रावणीपौर्णमासीतुसंगवात्परतोयदि तदैवौद
यिकीग्राह्यानान्यदौदयिकीभवेदितिगार्ग्यवचनंलिखित्वाउदयेसंगवस्पर्शेश्रुतौपर्वणिचार्द्भे कुर्युर्नभस्युपाकर्मऋ
ग्यजुःसामगाःक्रमात्इतिवचनांतरमपिलिखितंएवंसतिकर्मकालव्याप्तिद्वितीयदिनेलभ्यतेसामगानांत्वपराह्णोपाक
र्मणांवचनात्तत्कालव्यापिनमपिपूर्वहस्तंबाधित्वोत्तरदिनेएवतदनुष्ठानंतेनादिनद्वयेकर्मकालव्याप्तौतदस्पर्शेवा औद
यिकानांहस्तादीनांग्राह्यत्वंयत्केनचिदुक्तंतदयुक्तं संगवस्पर्शहस्तग्राह्यत्वविधानानुपपत्तेः तदापूर्वदिनेकालव्याप्तेरावश्य
कत्वात् यदाचधनिष्ठेत्यादिवाक्येनसर्वयाजुषाणांप्रतिपद्युक्तेपर्वण्युपाकर्मविहितंतदापर्वण्यौदयिकेकुर्युःश्रावणींतैत्ति ६६

135/1942

रीयकाः बह्वृचाःश्रवणेकुर्युर्ग्रहसंक्रांतिवर्जितइतिबह्वृचपरिशिष्टकारिकायांतैत्तिरीयकग्रहणंसर्वयाजुषाणामुपलक्षणमेवब
ह्वृचसमभिव्याहारादपितथा तुल्यकक्षाणामेवहिसमभिव्याहारोभवतिनहिभवतिक्षत्रियैरिदंकर्तव्यंकटैरिदंकर्तव्यमिति भव
तितुब्राह्मणैरिदंकर्तव्यमिति किंच उत्तरार्द्धग्रहादिवर्जितत्वौदयिकत्वरूपश्रवणगतविशेषविधानवत्पूर्वार्द्धेपिपर्वगततद्विशेष
विधानमेवयुक्तं अपेक्षितत्वात्समभिव्याहाराच्च नतुयदौदयिकेपर्वण्युपाकर्मकुर्युस्तैत्तिरीयकाएवेति पूर्वहेतुविपर्ययात्
द्विशिष्टानुवादनिबंधनवाक्यभेदापत्तेश्च उपाकर्ममात्रंहिसंनिहितंनतुपर्वाण्यसाधारण्येनयेनपर्वणःसंनिधिलभ्यत्वाद्यदौ
दयिकेनतैत्तिरीयकाइत्येवश्रुतवचनव्यक्त्यंगीकारेणसपरिह्रियते विशेषणद्वयविधिनिमित्तस्तुवाक्यभेदोविशेषणशब्दयो
र्यौगिकत्वाद्यस्तुतस्तुविशेष्यान्वयसिद्धिसंभवाद्योग्निर्दातासतंडुलविशेषाणांदेवतेतिवद्यदेतादृशंपर्वतत्रोपाकर्मकुर्युरि
तिविधिसंभवात्सुपरिहरः तत्रचपर्वणोविशेष्यस्यवचनांतरैःप्राप्तत्वाद्विशेषणयोरेवार्थात्विधिर्भवतितत्प्राप्तिश्चसर्वया
जुषविषयैवेतिउपलक्षणमेवतैत्तिरीयग्रहणंयुक्तं केचित्तुबह्वृचकारिकाकारस्यबह्वृचसंबंधिधर्मविधानार्थमेवप्रवृत्त
त्वात्तद्विषयमुत्तरार्द्धमेवतद्धर्मविधायकं पूर्वार्धंत्वन्यविषयकंयथाप्राप्तानुवादकमितितैत्तिरीयकग्रहणस्योपलक्षणः
त्वंसमर्थयंते अतएवकालिकापुराणेउपाख्यानपुरःसरंसामान्यतएवचतुर्दशीयुतेपर्वण्युपाकर्मनिषेधऔदयिकताद्वि
धेरुपोद्बलकःश्रूयते चतुर्दश्यांसमुत्पन्नावस्तौरोमधुकैटभौ भेदान्स्वीकुर्वतःयच्चयोनेस्तौजद्भतुःश्रुतीः हत्वातावसु
रौदेवःपातालतलवासिनौ आहृत्यताःश्रुतीस्तस्मैददौलोकगुरुःस्वयं अभूल्लब्धश्रुतिर्ब्रह्मापर्वण्यौदयिकेपुनःअ
तोभूतयुतेतस्मिन्नोपाकरणमिष्यते भास्करंवर्जयेत्कालेवेदाहरणशंकयेति श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी
पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमिति तुवचनंपुराणोक्तश्रावणीकृत्यविषयं नतूपाकर्मविषयं अतएवयेनबद्धो
बलीराजादानवेंद्रोमहाबलः तेनत्वामभिबध्नामिरक्षेमाचलमाचलेतिमंत्रेणयत्सुरोधःप्रभृतिभिर्नृपादीनांश्रावणेपा

का०त० ९७ र्णमास्यां कर्तव्यत्वेन भविष्योत्तरे उक्तं रक्षाबंधनं तत्पूर्वस्यामेव कर्तव्यं ततोपराह्णसमये कृत्वा पोटलिकां शुभां कारयेत्त्वास्तेते
स्तद्वा सिद्धार्थैर्हेमचर्चितामित्यादि तद्विधावपराह्णकालत्वोक्तेश्च यद्यप्युपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणं कुर्वीत
ब्राह्मणैः सार्द्धं वेदानुद्दिश्य शक्तितः इत्यभिधाय ततः इत्याद्यभिधानादुपाकर्मोत्तरकालताप्यस्य प्रतीयते तस्याः पूर्णतिथ्य
वार्थिकत्वेनाविधेयत्वाद्विधेयत्वे वपि वा कालविरोधेनारम्भत्वादुपाकर्मणः परदिने अनुष्ठाने प्येतत्पूर्वस्यामेवापराह्ण
व्यापिन्यां कर्तव्यमिति एवं यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पंच षट् वा मासानुत्सर्जनकालवशाद्व्यवस्थया स्मृ
तिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्ननध्यायेष्वंगानि नूतनब्रह्मचारिणस्तु ज्योतिः
शास्त्रोक्तविद्याप्रारंभकाले प्रारंभांतरं कृत्वा अनध्यायास्तु वक्ष्यंते अथोत्सर्जनकालनिर्णयः तत्र मनुः पुष्ये तु छंद
सां कुर्याद्बहिरुत्सर्जनं द्विजः माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेहनि पुष्ये पौषे मासि बहिर्ग्रामात् तत्र यदा श्रावण्या
मुपाकर्म कृतं तदा पौषशुक्लप्रतिपद्युत्सर्जनं कार्यं यदा प्रोष्ठपद्यां तदा माघ तत्तिथौ श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य
यथाविधि युक्तश्छंदांस्यधीयीत मासान्विप्रोर्धपंचमानिति प्रागुक्तवचनात् अर्धः पंचमो येषु तान् सार्धांश्चतुर इति यावत्
अत एव पुष्य इत्यत्रापि शुक्लस्य प्रथमेहनीति संबंधनीयं उत्सर्जनं च यथापूर्वं पक्षद्वयेपि स्वाध्यायपाठस्योत्सर्जनोत्तरं शु
क्लपक्षेष्वेव वेदाध्ययनविधानात् तथा च मनुरेव यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः विरमेत्पक्षिणीं रात्रिं यद्वाप्ये
कमहर्निशं अत ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत् वेदांगानि रहस्यं च कृष्णपक्षेषु संपठेदिति याज्ञवल्क्यस्तु पौषमा
सगतायां रोहिण्यां कृष्णाष्टम्यां वा तदा पौषमासस्य रोहिण्यामष्टकायामथापि वा जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहि
रिति पारस्करोप्येवं आश्वलायनगृह्ये तु मध्यमाष्टकायामेताभ्यो देवताभ्योन्नेन हुत्वोपरमेलेषिकाधिकरणत्वस्योत्स
र्गिकत्वान्माघकृष्णाष्टमी यद्यप्युत्सर्जनकालत्वेन प्रतीयते तथापि षण्मासानधीयीतेति तत्रैव प्रागुक्तत्वात् सामीपि ९७

137 / 194

काधारत्वांगीकारेण माघीपरतया तद्भाष्यवृत्तिकारादिति व्याख्यातं अत एव बोधायनेनापि षण्मासाध्ययनमभिप्रेत्य श्रावण्युपाकर्म
पक्षे माघ्येवोत्सर्जनकालत्वेनोक्ता श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेदिति उपाकर्मोत्सर्जनकालयोर्व्य
त्ययेन व्यवस्था एषां च पक्षाणां यथापरिग्रहं व्यवस्था सामगानां तु सिंहस्थ एवार्के पुष्यनक्षत्रे सिंहे रवावित्यादि प्राग्लिखितवचना
त् यदा तु सिंहस्थे सूर्ये प्रथमतो हस्त एव भवति तत्पूर्वः पुष्यस्तु कर्कस्थे तदा तत्रैवोत्सर्जनं कृत्वा सिंहार्के हस्ते उपाकर्म कार्यं नूतनब्रह्म
चारिव्यतिरिक्तैः सामगैः मासि प्रोष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा तदा तु श्रावणे कुर्यादुत्सर्गं छंदसां द्विज इति कात्यायनवचना
त् प्रोष्ठपदमासि यो हस्तस्तस्मात्पूर्वभावि श्रावणमासगत इति व्याख्येयं प्रोष्ठपदश्रावणशब्दौ चात्रत्यौ सिंहकर्करूपसौरमासप
रौ सामगानां सौरमास एवोपाकर्मोत्सर्गविधानात् मंदमतीनां तूपाकर्मदिने प्युत्सर्जनं ततः पूर्वं भवति तथा च खादिरगृह्ये
पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेथ वेति औदयिकपर्वणः षण्मुहूर्तसत्त्वापेक्षा बोधके च श्रावण्यां प्रोष्ठपद्यां वेति वचने उ
त्सर्गग्रहणादपि तथा उत्सर्जनकालाभ्यपेतखंडत्वे औदयिका एव संगवस्पर्शिनो ग्राह्याः उत्सर्जनस्यापि देवत्वेन पूर्वाह्णकाल
त्वात् तथा शिष्टसमाचाराच्चेति वनस्थयतिभिन्नानां द्विजानां प्रतिहायनं उपाकर्मोत्सर्जनं च भवेत्पूर्वाह्णकालिकं तत्रोपाक
र्मौषधीनां प्रादुर्भावेन भःसिते पर्वणि श्रवणे कार्यं ग्रहसंक्रांत्यदूषिते अध्वर्युभिर्बह्वृचैश्च कथंचित्तदसंभवे तत्रैव ह
स्तपंचम्यां तयोः केवलयोरपि तत्राप्यसंभवे भाद्रे पर्वणि श्रावणे पि वा तत्पंचमी हस्तयोर्वा तेषां नोक्ता तु पंचमी तेषां
यजुर्वेदविदां पर्वण्येव भवेदिदं बौधायनानां श्रावण्यां ग्रहसंक्रांतिसंभवे आषाढ्यामपि तत्प्रोक्तमथ सामविदां रवौ
सिंहस्थे हस्तनक्षत्रे भवेत्तच्चापराह्णिकं उत्सर्जनं तु तत्रैव पुष्ये तेषां भवेदथ सिंहस्थेर्के प्रथमतो हस्त एव भवेद्यदा तदा क
र्कार्कगे पुष्ये तेषामुत्सर्जनं भवेत् इदं पौषे थवा माघे परेषां शुक्लपक्षतः पौषेष्टकायां रोहिण्यां माघे पर्वणि वासिते भवेन्मं
दमतीनां तु उपाकर्मदिनेपि तत् तिथिनक्षत्रतूपाश्च कालाः सर्वेप्यमी द्विजैः उपाकर्मोत्सर्जनयोर्ग्राह्या औदयिकाः प

का०न० रे कार्त्स्न्येनावयवशोसंगवस्पर्शिनीयदि उपाकर्मोत्तरंपक्षद्वयेप्यध्ययनंश्रुतेः भवेदुत्सर्जनंयावद्धुक्लेष्वेवनउत्तरं कृष्ण
६८ पक्षेषुचांगानांमनध्यायस्कवस्यते इतिसंग्रहः इत्युपाकर्मोत्सर्जनकालनिर्णयः अथेष्टिविषयःपर्वद्वयविनिर्णयः
तत्रदर्शपौर्णमासेष्टौपौर्णमास्यांपौर्णमास्यायजेत अमावास्यायाममावास्ययायजेतेतिवचनात् कृत्स्नप्रयोगस्य
पर्वकालत्वेप्राप्तेपिपूर्वेद्युरग्निंगृह्णातिउत्तरमहर्यजतीत्यादिश्रुत्यंतरादन्वाधानाद्यनुष्ठानेतोपक्रममात्रंपर्वणिइत
रांगोपेतंप्रधानानुष्ठानंतुप्रतिपदीतिद्व्यहकालत्वं अतएवगोभिलेनोक्तंपक्षांताउपवस्तव्याः पक्षादयोभियष्टव्याइ
ति उपवासःकृत्स्नांगभूतयमनियमसंकल्पः एवंचपौर्णमास्यमावास्ययोःप्रयोगैकदेशान्वयेनसंकोचःपौर्णमा
स्यमावास्याशब्दयोस्तिथिविशेषेरूढत्वात् संधौयजेतेतिश्रुतिस्तुसंधेरतिसूक्ष्मत्वेनतत्रैकदेशस्याप्यनुष्ठातु
मशक्यत्वात्संधिमभितोयजेतेतिश्रुत्यंतरैकवाक्यत्वाच्चपर्वप्रतिपत्समुदायलक्षणयाकृत्स्नप्रयोगकालविधायि
केव अतएवबौधायनेनोक्तंसूक्ष्मत्वात्संधिकालस्यसंधेर्विषयउच्यते सामीप्यंविषयंप्राहुःपूर्वेणाह्नापरेणवेति
एवंचसतिपौर्णमास्यमावास्याश्रुतिरप्यमावास्यायामपराह्णेपिंडपितृयज्ञेनचरंतीत्यादौवृत्तिकारादिभिःसंधि
वाचित्वेनव्याख्यानात्पौर्णमास्यमावास्याशब्दनिर्वचनार्थवादोपदर्शितयोगाच्चपौर्णमास्यमावास्याशब्दयोरपि
संधिवाचित्वादपराह्णादिशब्दसमभिव्याहारस्यचाहोरात्रलक्षणाबीजस्यात्राभावात्पूर्वोक्तरीत्यापार्श्वद्वयवर्तितिथिद्वय
लक्षणयासंधौयजेतेतिवत्कृत्स्नप्रयोगकालविधायिकेत्यपिवक्तुंशक्यं तत्रापिनसंपूर्णपर्वान्वाधानकालः नापिसंपू
र्णप्रतिपद्यागकालः किंतुपर्वणोंशत्रयमन्वाधानस्यकालःपर्वचतुर्थांशसहितंप्रतिपदआद्यमंशत्रयंचयागस्य तथा
चगोलाक्षिः त्रीनंशानुपवस्तस्ययागस्यचतुरोविदुः द्वावंशावुत्सृजेदंत्यौयागेचव्रतकर्मणीति प्रतिपत्पूर्वसंबंधिनावं
त्यौचतुर्थांशौयथाक्रमंयागेउपवासेचवर्जयेदित्यर्थः अयंचप्रतिपत्पर्वणोश्चतुर्थांशभिन्नास्त्रीश्चतुरश्चेतिपर्युदास ६८

139
194

विधयापूर्वशेषएवनतुस्वतंत्रयागविधिः पर्वणोयश्चतुर्थांशइत्यादिवाक्यादिवाक्यांतरवशादंशविशेषविषयत्वेन
पूर्वकालविधेःप्रसक्त्यभावाद्वाक्यभेदापत्तेश्च अन्वाधानेपर्वचतुर्थांशवर्जनंच सद्यस्कालव्यतिरिक्तविषयंतस्यत
त्रैवतदनुष्ठानात् अथयदहरुपवसथोभवतितदहःपूर्वाह्णएवप्रातराहुतिंहुत्वेत्यादिवचनात्तदपगमप्रतीक्षासंभवात्
यागोपिसत्यपिपर्वचतुर्थांशादिकालत्वेसर्वदाप्रातरेव पर्वणोयश्चतुर्थांशआद्याःप्रतिपदस्त्रयः यागकालःसविज्ञेयः
प्रातरुक्तोमनीषिभिरितिवचनादथपूर्वाह्णएवप्रातराहुतिंहुत्वेत्यादिगोभिलादिवचनात्प्रातर्यजध्वमित्यादिश्रुतेश्च प्रातःका
लश्चपंचधाविभक्तदिनस्याद्यस्त्रिमुहूर्तोभागः लेखाप्रभृत्यथादित्येत्रिमुहूर्तस्थितेतुवै प्रातःकालइतिप्रोक्तोभागश्चाह्नः
सपंचमः मुहूर्तत्रितयंप्रातरित्यादिवचनाच्चतुरादिविभागेषुप्रातराख्यविभागाभावाच्चयस्तुचतुर्धाविभागपक्षेसार्धप्र
हरात्मकेआद्यभागेसएवाद्यर्धसंयुक्तःप्रातरित्यभिधीयतइतीदानींतनानांप्रातःशब्दयोगःसलक्षणया अनेकार्थत्व
स्यान्याय्यत्वात्पूर्वाह्णःप्रहरंसार्धमितिगोभिलेनतस्यपूर्वाह्णत्वोक्तेश्चऋग्भिःप्रातर्दिविदेवईयतइतित्रेधाविभक्तदिनाद्यभा
गविषयोपिप्रयोगस्तथा एवंचगोभिलीयादौपूर्वाह्णग्रहणंयोगेनेदृशप्रातःपरमेव एवंयागान्वाधानकालेस्थितेयदापौर्ण
मास्यमावास्ययोस्तदुत्तरप्रतिपदोश्चसूर्योदयास्तमयास्पर्शित्वंतदानकोपिविचारः यदादिपंचदश्यारेवास्तमयादूर्ध्वंस
माप्तिःप्रतिपदस्तु तस्मात्प्रागेवतदापितथा ननुतदापौर्णमास्यांभवतुयथास्थितमनुष्ठानं अमावास्यायांत्वस्तादूर्ध्वंसमा
साप्यामपिद्वितीयदिनेप्रतिपदोदिनांत्यमुहूर्तत्रयादर्वाक्समाप्तौतस्यद्वितीययापूरणेनतत्रचंद्रदर्शनसंभवात्तद्वतीचदिनेया
गस्यनिषिद्धत्वान्नतत्संभवः अत्रकेचित्तदामावास्यादिनेप्रातःपर्वतृतीयांशसत्वात्तत्पूर्वदिनेचचतुर्दशीसत्वाद्यागान्वा
धानकालाभावात्कालशास्त्रस्यचबलत्वात्परिहारःकृतःसोयुक्तः यदहःपश्चात्पुरस्तात्सोमोनदृश्येतइतिश्रुतेरपिकालशा
स्त्रत्वात् पर्वणोंशेद्वितीयेपिकर्तव्येष्टिर्द्विजातिभिः अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनादित्यादिभिःसामान्यविहितका

का०त० लोपमर्दनेनैवतदाकालांतरविधानाच्च अन्यथापराह्णसंधावपितथापत्तेः इष्टापत्तिपक्षस्त्वदूषयिष्यते अतोन्यथापरिह्रियते
६९ अपराह्णेथवारात्राविथ्यादिरात्रिसंधिशास्त्रंनिरवकाशं अपराह्णसंधिविषये सावकाशंकिमुत आवर्तनात्परः संधिर्यदितस्मिन्नु
पक्रमः परेद्युरिष्टिरित्येवपर्वद्वयविनिश्चयः मुहूर्ताद्वितीयाचेदित्यादिशास्त्रंबाधतेनचरात्रिसंधिशास्त्रमपिपरेद्युश्चंद्रद
र्शनाभावविषयमितिवाच्यंतदाकिमुतिकन्यायेन आवर्तनात्परः संधिरित्यादिवाक्येश्चापराह्णसंधितुल्यानुष्ठानसिद्धेरा
त्रिग्रहणस्यवैयर्थ्यापातेनैताद्दशविषयत्रिमुहूर्ताद्वितीयाचेत्प्रतिपद्यापराह्णिकी अन्वाधानंचतुर्दश्यांपरतःसोमदर्शना
त् अपराह्णेथवारात्रौयदिपर्वसमाप्यते उपोष्यतस्मिन्नहनिश्वोभूतेयागइष्यते यएवंतस्य चंद्रदर्शनविषयेएवरात्रिसंधि
शास्त्रस्यसार्थक्यात् अतएवनपौर्णमासीमात्रविषयत्वमपि अतएवबोधायनेनकात्यायनेनचचतुर्दशीदिनेपिकिंचिद
मावास्याप्रवेशएवश्राद्धाद्यनुष्ठानमुक्तं यदाचतुर्दशीयामंतुरीयमनुपूरयेत् अमावास्याक्षीयमाणा तदैवश्राद्धमिष्यत
इति द्वितीयदिनेक्षीयमाणामावास्यायदाचतुर्दश्याश्चतुर्दशीदिनस्यतुरीयंयाममनुपूरयेत् अनुप्रविशेत् अस्तात्पूर्वंकिं
चिद्भवेत् तदैवस्वल्पामावास्यापितत्दिनएव श्राद्धान्वाधानादिभवेदित्यर्थः क्षीयमाणेतिविशेषणात्परदिनेदिवासंधिः
प्रतीयते कारिकांतरेपियागदिनेस्तमयात्पूर्वंप्रतिपत्सद्भावावश्यकताप्रतीयते इष्टेरलंप्रतिपदादिनाड्यः सप्ताष्टवायत्र
भवंतितस्या क्षीणास्कनाडीषुदिनस्यपूर्वः कल्पोथवृद्धौचभवेद्द्वितीयइतिदिनस्यांतिमासुसप्ताष्टनाडीषुअमावास्यासंबं
धित्वेनक्षीणासुसतीषुयत्रतस्मिन्नेवदिनेतानाड्यः प्रतिपदाद्यनाडीभिः पूर्यंतेअग्रेचक्षयस्तदातदेवदिनमिष्टेरलंयोग्यंपर
दिनेचंद्रदर्शनादित्येकः कल्पः क्षयेपरदिनेमावास्यावृद्धौचचंद्रदर्शनाभावात्तदेवेष्टेरनुष्ठानमितिद्वितीयःकल्पइत्यर्थः॥
सप्ताष्टवेतिषदधिकनाडीग्रहणाच्चान्वाधानदिनेप्यमावास्याप्रवेशावश्यकताप्रतीयते त्रिमुहूर्ताधिकक्षयाभावात् अ ६९
तएवदृश्यमानेप्येकदेतिगोभिलसूत्रंभाष्यकारेणसंध्यासमीपापत्तिभियाअमावास्यानप्रतीक्षणीयेत्येतत्परतयाख्यातं

141/194

अन्यथादिवामावास्याभावेतत्प्रतीक्षाऽप्रसक्तेः कर्मप्रदीपेप्युक्तं अमावास्यांप्रतीक्षेद्वातदंतेवापिनिर्वपेदिति तदंतेचतुर्दश्यं
त्यभागेअष्टमेंशे चतुर्दश्याःक्षीणाभवतिचंद्रमाइत्युक्तेःऽष्टमांशइत्यर्थः कंदरवेणचगोभिलभाष्येयदहस्त्वेवचंद्रमानदृश्य
तेतामामावास्यांकुर्वीतिगताध्वाभवंतीत्येतत्सूत्रद्वयव्याख्यानावसरेस्तमयात्पूर्वंकिंचिदमावास्यासत्वएवतदान्वाधानाद्यनुष्ठा
नंपरदिनेचामावास्याक्षयोक्त्यादिवासंधावेवाग्रेचंद्रदर्शनभियासंधिदिनेयागानुष्ठानमुक्तं यानिचबोधायनवचनानिच
तुर्दश्यांचतुर्यामेअमायत्रनदृश्यते श्वोभूतेप्रतिपद्यत्र भूतेकव्यादिकाक्रिया चतुर्दशीचतुर्यामाअमावास्यानदृश्यते श्वो
भूतेप्रतिपच्चेत्स्यात्पूर्वांतत्रैवकारयेदित्यादीनितानि द्वितीयात्रिमुहूर्ताचेदितिवचनानंतर्यादग्रेचंद्रदर्शनभियायत्संधिदिने
यागानुष्ठानंतद्दिवाप्रतिपत्सत्वएवेत्यमुमर्थंगमयंत्येव अन्वाधानादिदिनेपरंदिवादर्शसद्भावानावश्यकताद्योतकानीवभासंतेत
त्रापिचतुर्दश्याश्चतुर्थयामेअमासंपूर्णानदृश्यतेकिंत्ववसानेस्वल्पाचतुर्दशीचतुर्थमपियामंस्पृशतिनत्वमावास्यातद्व्यापिनीदृ
श्यतेकिंत्वस्तमयादर्वागस्वल्पेत्यादिमाधवादिभिर्व्याख्यानात्प्रतीकारः यत्तुहेमाद्रिणाचतुर्दशीचसंपूर्णाक्षयगामिनी च
तुरिष्टिरमायांस्याद्भूतेकव्यादिकाक्रियेतियथाश्रुतवचनबलात् पूर्वप्रतिपदोरेवास्तमयात्पूर्वंसमाप्तौद्वितीयाप्रभृतिचांत्यं
तापचयेऽस्तमयपर्यंतायामपिचतुर्दश्यामन्वाधानादिपरदिनेचयागइत्युक्तं तत्स्वयमेवपूर्वोक्तरीत्यापूर्वव्याख्यातं चतुर्दशी
चतुर्यामेत्यादिवचनसमानार्थतयैव तस्यापिव्याख्यानसंभवाद्धिद्वितीयादिक्षयोक्तेश्च कदाचिद्द्वितीयाप्रभृतितिथिक्षये
णैवापराह्णिकत्रिमुहूर्तद्वितीयाभावेपिप्रतिपदिचंद्रदर्शनात्त्रिमुहूर्ताद्वितीयाचेदित्येतद्वाक्यगतंत्रिमुहूर्तद्वितीयासत्व
मविवक्षितंचंद्रदर्शनमात्रंतुविवक्षितमित्येवंपरत्वादनाद्दत्यं माधवीयादौतुद्वितीयाक्षयकारिणीतिपाठः तस्माच्चतुर्दश्य
मावास्यादिनेकिंचिदमावास्याप्रतिपत्सद्भावएवप्रतिपदिचंद्रदर्शनेसंधिदिनेयागानुष्ठानस्यन्याय्यत्वाद्रात्रिसंधौपरदि
नेचंद्रदर्शनेपिप्रतिपद्येवयागइतिनिश्चयान्नतत्रापिविचारः दिवासंधौतुविचार्यते सचत्रेधा आवर्तनात्पूर्वोत्तरभागयो

का०त०
७०

श्चेति तत्रावर्तनेतत्पूर्वंचसंधौतद्दिनेयागः पूर्वदिनेत्वन्वाधानंतदुत्तरंसंधौपरदिनेयागः तद्दिनेत्वन्वाधानमितितावत्पूर्वेद्युस्सा
धारणउत्सर्गः तथाचलौगाक्षिः पूर्वाह्णेवाथमध्याह्नेयदिपर्वसमाप्यते उपोष्यतत्रपूर्वेद्युस्तदहर्यागइष्यते अपराह्णेथवा
रात्रौयदिपर्वसमाप्यते उपोष्यतस्मिन्नहनिश्वोभूतेयागइष्यतेइति अत्रमध्याह्नपूर्वाह्णपराशब्दयोगेनावर्तनतत्पूर्वोत्तर
भागवचनाः आवर्तनाच्चपूर्वाह्णोह्यपराह्णस्ततःपरः मध्याह्नस्त्वतयोःसंधिर्यदावर्तनमुच्यतइत्येतत्प्रकरणपठितवचना
त् अतएवगोभिलः आवर्तनेयदासंधिःपर्वप्रतिपदोर्भवेत् तदहर्यागइष्येतपरतश्चेत्परेहनि पर्वप्रतिपदोःसंधिरर्वागावर्त
नाद्यदितस्मिन्नहनियष्टव्यंपूर्वेद्युस्तदुपक्रमः आवर्तनात्परःसंधीयदितस्मिन्नुपक्रमः परेद्युरिष्टिरित्येषपर्वद्वयविनि
र्णयइति तदाचावर्तनतत्पूर्वसंध्योःपर्वचतुर्थांशेयागानुष्ठानंतदानयागप्रयोगःपर्वमध्येसमापनीयं किंतुप्रतिपदादि
प्रविष्टायां प्रतिपद्यप्रविष्टायांयदिचेष्टिःसमाप्यते पुनःप्रणीयवन्हिंतत्रेष्टिःकर्तव्यायागवित्तमैरितिगार्ग्यवचनेन्यथादोष
स्मरणात् प्रणीयअग्निं पारिशिष्टेतुपक्षादिचरोरूपक्रमोपिपक्षेप्रतिपदंप्रतीक्ष्यैवकर्तव्यइत्युक्तं पक्षादावेवकुर्वीतसदा
पक्षादिकंचरुं पूर्वाह्णएवकुर्वीतविद्धाप्यन्येमनीषिणइति विद्धेपर्वविद्धे संधिनिर्णयश्चतिथिसाम्येयथास्थितएव वृद्धि
क्षययोस्तत्रविशेषमाह लौगाक्षिः तिथेःपरस्यघटिकास्तुयास्युर्न्यूनास्तथैवाभ्यधिकाश्चतासां अर्धंवियोज्यंचतथा
प्रयोज्यंह्रासेचवृद्धौप्रथमेदिनेतदिति ततश्चयदाश्चतुस्त्रिंशन्नाडीरूपपरमदिनंसमयेपौर्णमासीषोडशघटिकासप्तदश
घटिकावायद्वाविंशतिघटिकारूपपरमक्षीणदिनसमयेचद्वादशघटिकात्रयोदशघटिकावा एवंविषुवादावप्यूह्यं परदिने
चप्रतिपत्त्रिमुहूर्तवृद्धा तदायथास्थितसंध्यालोचने आवर्तनेतत्पूर्वंवासंधेःपर्वचतुर्थांशरूपयागकाललाभाच्चसंधिदि
नेयागःप्राप्नोति अर्धवृद्धिप्रक्षेपेणतुसंधिनिर्णयेपरदिने तथायदापरमदिनसमयविंशतिदंडाएकोनविंशतिदंडावापौ
र्णमासी एवमन्यदाप्यूह्यं एवंपरदिनेचप्रतिपत्त्रिमुहूर्तन्यूनातदापराह्णसंधेःसंधिर्यद्यपराह्णेस्यात्तद्यागंप्रातःपरेहनि ७०

143
194

कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यतीतिवचनाच्चप्रतिपच्चतुर्थांशस्यापिकेषांचिन्मतेनयागकालत्वात्परदिनेयागःप्राप्नोतिय
थास्थितसंध्यालोचने अधिकक्षयप्रक्षेपेणतुसंधिदिनएवेतिविशेषः इहचानयारीत्यासंधौनिर्णीयमानेयदाआवर्तनतत्पूर्व
संध्योःप्रतिपद्वृध्या अपराह्णसंधिविशेषेतदभावेपिदिनद्वयेपिप्रातर्यागकाललाभः यदाचआवर्तनतत्पूर्वसंध्योःपरमदिन
समयेकदाचित् अपराह्णसंधौतुसर्वदाक्षयेणदिनद्वयेपिप्रातर्यागकाललाभस्तदापौर्णमास्यांतावद्यागकालशास्त्रस्योप
स्थित्यात्संधिविशेषप्रयुक्तएवनिर्णयः नचापराह्णसंधिविशेषेतद्दिनेप्रातरन्वाधानकाललाभात्परदिनेचपक्षादयोभियष्टव्या
इतिपक्षादिरूपकायागकाललाभात्तदनुरोधेनैवनिर्णयःसंभवतीतिवाच्यं यथासंधिविशेषेणपर्वनिर्णयेअंगगुणविरोधेअं
गप्रधानयोरेककालव्याप्तौअंगस्यप्रधानार्थतयाप्रधानस्यप्राधान्यात्तदनुरोधेनांगस्यापकर्षइतिन्यायार्थः न्यायेनत्रीनंश
नोपवस्तस्येत्यतस्यसूर्योदयात्तमयव्यापिपर्वविषयत्वापादनेनाननुग्राह्यत्वादन्वाधानस्यकदाचित्सर्वचतुर्थांशेकदाचिच्च
तुर्दश्यामनुष्ठानं तथाआवर्तनसमीपापराह्णसंधौप्रातःकिंचित्पर्वतृतीयांशरूपान्वाधानकाललाभेपितस्याननुग्राह्यत्वा
त्यागकालानुरोधेनचनिर्णयेपक्षादिरूपयागकालानुरोधेनपरदिनइवबहुतरप्रयोगव्यापिकाललाभेनपूर्वदिनेपियागानु
ष्ठानस्यसत्वचत्वात् यदात्वावर्तनतत्पूर्वसंध्योःपरदिनेवृध्याभावेनप्रातःप्रतिपच्चतुर्थांशसत्वात्संधिदिनएवप्रातःपर्व
चतुर्थांशरूपस्यागकाललाभः आवर्तनविप्रकृष्टापराह्णसंधौचतद्दिनेप्रातःपर्वतृतीयांशसत्वात्परदिनएवप्रातःप्रतिपत्तृ
तीयांशरूपयागकाललाभस्तदासंधिप्रयुक्तनिर्णयस्यकालशास्त्रमप्युपोद्बलकंभवतिसंप्रतिपत्तेः यदातुसंधिशास्त्रस्य
कालशास्त्रस्यचविरोधोभवतिसचावर्तनतत्पूर्वसंध्योर्नसंभवत्येव अपराह्णसंधौत्वावर्तनसंनिकृष्टेपरदिनेचवृध्यभावेपू
र्वेद्युरेवयागकालस्यप्रातःसत्वात्कालशास्त्रेणपूर्वेद्युःसंधिशास्त्रेणचपरेद्युर्यागप्राप्तेःसंभवति तदापौर्णमास्यांतावद्यपि
संध्युत्तरदिनेनियमविधिविषयःकालोनलभ्यतेप्रतिपच्चतुर्थांशश्चप्रत्युतनिषिद्धः नयष्टव्यंचतुर्थेंशेयागेःप्रतिपदःक

वित् रक्षांसितद्विलुंपंतिश्रुतिरेषासनातनी अपराह्णसंधिशास्त्रंचदृष्ट्यादिनापरदिनेयागकाललाभेपिसावकाशंतथापिसं
धिर्यद्यापराह्णेस्यांद्यागंप्रातःपरेहनि कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यतीतिवृद्धशातातपीयप्रतिप्रसववचनात्संधिशास्त्रा
द्यपरेद्युरेवयागः अत्रकेचिन्न्यायमप्युपन्यस्यंति तथाहिनयष्टव्यमितिनतावदयंपर्युदासः पर्युदासोहिभवन्प्रतिपच्चतुर्थां
शभिन्नश्चत्वारोंशायागकालइत्येवंयागस्यचतुरोविदुरित्यादेःशेषभूतश्चतुर्थांशरहितायांप्रतिपदि,त्येवंपक्षादयोभियष्टव्या
इत्यादेर्वाशेषभूतोभवेत् नचोभयथापिसंभवतितस्यशास्त्रद्वयस्यपर्वणोयश्चतुर्थांशआद्याःप्रतिपदस्त्रयः यागकालःसविज्ञे
यःप्रातरुक्तोमनीषिभिरित्यादिवाक्यविहितप्रतिपदाद्यभागत्रयपरत्वेनतस्यचचतुर्थांशभिन्नत्वस्यस्वतःसिद्धत्वेनपर्युदासा
नर्थक्यात् नचपर्वणोयश्चतुर्थांशइत्यस्यप्राप्तेकर्मणिपर्वचतुर्थांशप्रतिपदाद्यभागत्रयप्रातःकालत्वरूपानेकार्थविधायकत्वा
संभवात्पर्युदासासिद्धार्थानुवादकत्वमेवाद्याःप्रतिपदस्त्रयइत्यंशइतिवाच्यं अग्नीषोमीयपशोर्यूपंमिनोतीतिप्रकृत्यश्रू
यतेअर्धमंतर्वेदिमिनोत्यर्धंबहिर्वेदीति अत्रकिंमीयमानस्ययूपस्यवेद्यभ्यंतरभागोंगत्वेनविधीयतेकिंबाहिरर्धादिसहितो
देशविशेषोलक्ष्यतेतत्रलक्षणाया अन्याय्यत्वाच्छक्तितोवेद्येकदेशोयूपार्धांगत्वेनविधीयतेतथाचार्धांतरंबाहिरेवभवतीत्य
र्थाद्बहिर्वेदीत्यनुवादइति पूर्वःपक्षः सिद्धांतस्तु विधानाभावेइच्छतोवेद्यामेवमानमर्धांतरस्यकोवारयेदितिबहिरित्यपि
विधातव्या तथाचवाक्यभेदइतितावान्देशविशेषोलक्षणीयइति अंतर्वेदिमिनोत्यर्धंबहिर्वेदीतिवत्संधिपार्श्वद्वयवर्ति
नःस्थूलकालस्यैकस्यविधानात्पर्वचतुर्थांशप्रतिपदाद्यभागत्रययोःस्वरूपेणाविधेयत्वात् अन्यथैकवाक्योपादाना
त्कालद्वयस्यसमुच्चयेसतिसायंचप्रातश्चजुहोतीतियदाग्नेयोष्टाकपालोमावास्यायांपौर्णमास्यांचेत्यादिवदश्रुतकर्मा
वृत्त्यापत्तेः प्रातःकालस्यचप्रातर्यजध्वमित्यादिसिद्धस्यानुवादोवापौरुषेयवाक्येवाक्यभेदस्यतथादोषत्वाद्विधिर्वा
स्तु अतएवपंचदश्यांपंचदश्याःपरःपादःपक्षादेःप्रथमास्त्रयः कालःपार्वणयोगस्यादर्शोंशेतुनविद्यतइति परंपाद ७१

145
19

इत्यादियज्ञपार्श्ववचनेतदनुपादानं किंचविकल्पेनार्षेयंवृणीतानहोतारं तथायजतिषुयेयजामहंकरोतिनानुयाजेष्वित्यादौनञ
किंप्रतिषेधःपर्युदासोवेतिसंशयेप्रतिषेधस्तावत्क्रियासंबंधात्नपर्युदासोवरणादिशब्देलक्षणापत्तेर्वरणान्वयेअनित्यसमासा
पत्तेर्नित्योह्यस्यसुपासंबंधेसमासइतिवार्तिककारकातिपूर्वःपक्षः सिद्धांतस्तुविहितकल्पभियातत्रतत्रपर्युदासलक्षणास्वी
क्रियतेइहचपर्युदासत्वेपितस्यापरिहार्यत्वान्नतल्लक्षणायुक्ता तथाहिदिनद्वयेपिप्रातर्यागकालालाभेनित्यत्वेनचयागस्याव
श्यकर्तव्यत्वेसंधिसंनिकर्षात्पूर्वेद्युःपर्वतृतीयांशस्य पक्षादयोभियष्टव्याइतिवचनाद्वोत्तरेद्युःप्रतिपच्चतुर्थांशस्यविकल्पेन
गौणकालतयाप्राप्तिःकेनवार्यते तस्मात्पर्युदासत्वासंभवात्नयष्टव्यमितिनिषेधएवायंनंतोपशावितिवत् तथाचप्रतिपच्चतु
र्थांशस्यापिशास्त्रतोयागकालत्वेनप्राप्तेरवश्यकत्वात्तस्याश्चात्यंतबाधासंभवात्व्यवस्थापेक्षायामावर्तनतत्पूर्वसंधिवि
षयःप्रतिपच्चतुर्थांशनिषेधोपराह्णसंधिविषयश्चतदनुपपत्तिकल्पितस्तद्विधिरिति एतन्न्यायमूलकमेवचपूर्वोक्तंवचनं
संधिर्यद्यपराह्णेस्यादित्यादिमंडनकारिकाचेति अत्रेदमुच्यते मध्याह्नादिसंधिविषयःकिलनयष्टव्यमितिनिषेधोस्मिन्म
तेभिमतः नचतथासंभाति तदासंधिशास्त्रेणपूर्वदिनेयागविधानात्प्रतिपच्चतुर्थांशेयागस्याप्रसक्तेः नचतदाविशेषतो
ऽप्रसक्तावपिपक्षादयोभियष्टव्याइत्यादिकृतसामान्यप्रसक्त्यालब्धात्मनोनिषेधस्यव्यवस्थामात्रंमध्याह्नादिसंधिविषय
त्वेनक्रियतइतिवाच्यं पक्षादिशास्त्रस्यत्वयाशास्त्रांतरवशेनाद्यांशत्रयविषयत्वस्वीकारेणपर्वचतुर्थांशाप्रसंजकत्वात्
अन्यथापर्युदासानर्थक्यात्संभवात् वस्तुतस्त्विष्टिद्वयाभ्यांविकल्पापत्तिभियावरंलक्षणाश्रयणंनचसामान्यविषयस्यापि
विधेर्विशेषविषयस्यनिषेधस्यातुल्यबलत्वात्बाधएवनविकल्पइतिवाच्यं निरपेक्षस्यविशेषस्यशरादेरिवबाधकत्वात् अ
स्यतुप्राप्तिसत्तासापेक्षत्वेनतथात्वाभावात्तस्मान्नित्यवत्तुतयोर्विधिप्रतिषेधयोःपक्षेप्यंताविद्यमानमिथ्यात्वकल्पनादयु
क्तोविकल्पइतिवार्तिकंन्यायविरोधादुपेक्षामितिपूर्वपक्षेइदंनंतोपशाविति अत्रनञःकिंपर्युदासःप्रतिषेधोवेतिसंशये

र्युदासइतितावत्प्राप्तंप्रतिषेधेविकल्यापत्तेरिति राद्धांतस्तूक्तलक्षणापत्तिभियातदंगीकरणं किंचाज्यभागांगविधिःपश्वपशुसा
धारणःस्यात्तदापर्युदासःस्यात्तस्यदर्शमात्रविषयत्वात् पशोःसोमविकृतित्वात्सोमस्यचापूर्वत्वात्तस्मात्सोमेइवनतोविधि
याविततत्रतयोर्विकल्पइतिपर्युदासानर्थक्यसंभवइत्युक्तिकमेव इावंशावुत्सृजेदंत्यावित्यस्यैवनयष्टव्यमित्यस्यपर्युदास
लक्षणया आद्याःप्रतिपदइत्यस्यचश्रुत्यापक्षादिशास्त्रोपसंहारकत्वयातुल्यफलकत्वेपिस्मृत्यंतरत्वात् अतएवसर्वनिबं
धेषुसंधिपार्श्वपरिमाणनिरूपणावसरेपर्वणोयश्चतुर्थांशइत्यादीनांनयष्टव्यमित्यस्यचलेखनं किंचपक्षादिशास्त्रार्द्ध
तसामान्यप्रसक्त्युपजीवकत्वेननिषेधस्यव्यर्थात्तदुपपत्तयेविध्यंतरकल्पनाव्यर्थश्चनिषेधस्यांगीकारः तथात्वेपिदीक्षितो
नज्योतिष्टोमेश्रूयतेदीक्षितोनददातिनजुहोतिनपचतीति किमयंसर्वेषामेवपुरुषार्थानांक्रत्वर्थानांतत्राप्युपदिष्टानांप्रति
षेधः उतातिदिष्टानांपुरुषार्थानांच अथवापुरुषार्थानामेवेति तत्राविशेषात्सर्वेषामितिप्राप्तंनददातीत्यादिवचनस्य
सामान्यरूपत्वात् आहत्योपदिष्टानांप्रतिषेधेउपदेशवैय्यर्थ्यंविकल्पप्रसंगश्चेतिप्राप्तेब्रूमः पर्युदासोयमिति अदीक्षि
तोहोमादिकुर्यादितिपूर्वपक्षः सिद्धांतस्तुपुरुषार्थानामेवप्रतिषेधोनपर्युदासोग्निहोत्रविधेः प्रतिषेधोपुरुषार्थोक्रत्व
र्थोवाभविष्यतस्ततःस्यादेवविकल्पः पुरुषार्थतयाविहितानामग्निहोत्रादीनांक्रतुमध्येपिप्राप्तानांक्रत्वर्थतयाप्रतिषे
धःक्रियतइतिनास्तिविकल्पप्रसक्तिरितिनददातीत्यादिरिववार्तिककृन्मतेसामान्यविशेषन्यायेनबाधकत्वेनपर्युदास
तुल्यत्वाद्विकल्याप्रसक्तेः तस्माद्विकल्पवादिनाविधिकल्पनावादिनाचमध्याह्नादिसंधावेवविशेषतःप्रसंजकोविधि
कल्पनीयस्तथाचतत्रैवपर्वचतुर्थांशविकल्पःप्रसज्येतेति तद्भियापर्युदासत्वमावश्यकमेतस्येतियत्किंचिदेतत् यत्तुपर्यु
दासत्वेपिदिनद्वयेयःशेषस्तस्यासंनिहितत्वात् नचविकल्पप्रसंगः ऐकार्थ्याभावात् यद्यभावपिविधिनिगमकालाला
भेविकल्पस्यदुर्निवारत्वात् निर्बीजापर्युदासलक्षणेत्युक्तं तदयुक्तंनिषेधमूलकविकल्पभियाहिपर्युदासलक्षणास्वी ७२

147/194

कारस्तथाचास्मन्मतेयत्रपर्वचतुर्थांशेयोगोविहितस्तद्भिन्नविषयंनयष्टव्यमित्यादिवचनमितितस्यनिषेधत्वेतत्रैवविषयेविशेषतःप
र्वचतुर्थांशयागप्राप्तेरपेक्षितत्वात् तस्याश्चशास्त्रमंतरेणासंभवात् विकल्पआपद्येतितद्भियापर्युदासलक्षणांब्रूमः अस्यवि
कल्पस्यनिषेधमूलकत्वात् नतुत्वदुक्तविकल्पभियातस्यन्यायलभ्यत्वस्यत्वयैवोक्तत्वात् वस्तुतस्तुनतत्रापिविकल्पः किंतु
संधिर्यद्यपराह्णेस्यादित्यस्यवचनत्वाभावेपर्वतृतीयांशरूपगौणकालांगीकारेणपूर्वेद्युरेवयागानुष्ठानंन्याय्यं संधिशास्त्र
स्यदिनद्वयेयागकाललाभेपिसावकाशत्वात् नयष्टव्यमित्यनेनपर्युदासत्वेनसामान्यप्राप्तिमुपजीव्यनिषिद्धत्वेनवाप्रतिषिद्ध
मुद्गंचरुंनिर्वपेत्श्रीकामइत्यत्रमुद्गाभावेमाषादीनांप्रतिनिधित्वेनोपादानंनवेतिसंशयेतेषांप्रतिनिधित्वेनोपादानमर्हति
कुतःमुद्गकार्येचरुनिष्पादनेसमर्थत्वात् निवारकस्यप्रतिषेधकस्यवचनस्याभावादितिचेन्न अयज्ञियावैमाषावरकाःकोद्र
वाइतिमाषादीनांयज्ञसाधनतानिषेधात् प्रतिनिधित्वेतुसामान्यान्येवभूयांसिगुणावयवकर्मणामितित्रीत्याद्यंशस्येव
तदंशस्याप्यवर्जनीयंयागसाधनत्वमतोनतेषांप्रतिनिधित्वमितिन्यायार्थःइदंचाविशेषेणहितश्रुतिरितिन्यायेनपर्वचतु
र्थांशस्यगौणकालत्वेनापिस्वीकारायोगात् तथाचैतादृशेविषयेपरेद्युर्यागानुष्ठानसिध्यर्थमपिसंधिर्यद्यपराह्णेस्यादित्य
स्यवचनत्वमावश्यकं अतएवहेमाद्रिमंडनकारिकैवेयंनार्षवचनमितिपौर्णमास्यामपराह्णसंधावपिपरेद्युःप्रातःप्रतिप
त्तृतीयांशरूपयागकाललाभएवपरेद्युरनुष्ठानं नान्यथानयष्टव्यमितिनिषेधात् किंतुपूर्वेद्युरेवपर्वतृतीयांशेपि पर्व
णोंशेतृतीयेपीत्यादिसाधारणवचनादित्याह केचित्त्वयज्ञकालस्तिथिर्द्वेधेषट्कलोयादिलभ्यते पर्वतत्रोत्तरंग्राह्यंहीन
नेपर्वउपक्रमेदित्यादिसाधारणंवाक्यंकलाशब्दस्यनाडीवाचितयात्रिमुहूर्तात्मकःप्रातःकालेयागकालसद्भावावश्यकत्व
स्यस्पष्टंप्रतिपादनादत्रार्थेयोजितं आवर्तनतत्पूर्वसंध्योःसंधिशास्त्रेणैवदर्शापराह्णसंधौचत्रिमुहूर्ताद्वितीयाचेत्या
दिनैव पूर्वदिनानुष्ठानसिद्धेरेतद्वाक्यानुपयोगात् हेमाद्रिस्तुदर्शापराह्णसंधिविषयमिदंवचनमभिमतंतेनात्रसकलाश

का॰न॰ न्स्यत्रिमुहूर्ताद्वितीयाचेदितिवचनानुरोधेनमुहूर्तपरत्वाभिधानादित्याद्युक्त तस्मादपराह्णसंधौसर्वदापौर्णमास्यांपरदिने
-७२ यागानुष्ठानंयद्यभिमतंतदासंधिर्यद्यपराह्णेस्यादित्यार्षत्वंवचनत्वंचावश्यमभ्युपेयं उक्तंचतद्वृद्धशातातपीयत्वोपन्यासे
नमाधवादिभिर्बहुभिः नयष्टव्यमितितुपर्युदासआद्याप्रतिपदस्त्वयइत्यादिसमानार्थकः सामान्यप्राप्त्युपजीवनेनप्रति
षेधएववा वार्तिकमतेनदीक्षितोनददातीत्यादिवत् नचतुरोवृणीतइत्यादिवत्पर्वणोयइत्यादिनियमविधिसिद्धांतद
र्शपौर्णमासयोरार्षेयंवृणीतइतिविधायपुनःश्रुतं एकंवृणीतेद्वौवृणीतेनचतुरोवृणीतेनपंचातिप्रवृणीतइति तत्रा
यंविचारः किंदर्शादावेवकार्येयंद्व्यार्षेयोरप्यधिकारःउतत्र्यार्षेयस्यैवेति तत्रार्षेयंवृणीतइतिवरमात्रेविहितेचतुर्णां
षडादीनांचप्रतिषेधादेकद्वित्रिपंचानांप्राप्तंवरणमितितच्छ्रवणमनुवादः अथवार्षेयंवृणीतइतिसामान्यस्यएका
दिभिःसंबंधादेकंद्वौत्रीन्पंचवावृणीतेत्यधिक्रियतइतिप्राप्तेब्रूमः असंख्यातविधौप्रतिषेधद्वयाश्रयाद्वाद्वयंस्यादे
कद्वित्रिविधानेचवाक्यत्रयंस्यात्तस्माद्वित्वमात्रविधौत्वेकार्थविधानादेकवाक्यत्वंतदंतर्गतत्वाच्चद्विवेकत्वश्रवणंनि
त्यानुवादः चतुरादिप्रतिषेधस्त्वनुवादएवतस्मात्रित्वविषयीष्टवरणविधानात्तदुपसंहारसमर्थोधिक्रियतइति अत्र
ऋषिर्गोत्रप्रवर्तकस्तत्संबंधिआर्षेयस्तंवृणीतेकथयतीत्यर्थोत्यार्थिकार्थानुवादोवा सद्यस्कालपौर्णमासीविषयो
यंनिषेधइतितुमाधवः प्रातर्यागकालसत्वेतत्रैवप्राशस्त्यभावेनयागःकर्तव्योनत्वालस्यादिनाप्रतिपच्चतुर्थांशइत्येवं
परोयंनिषेधइत्याहुः अपरेत्वपराह्णसंधिशास्त्रात्सर्वद्वयसाधारण्येनप्राप्तस्यपरेद्युर्यागस्यदर्शएवसोमदर्शनप्र
युक्तत्रिमुहूर्ताद्वितीयाचेदित्यपवाददर्शनात्पौर्णमास्यामपराह्णसंधौवचनाभावेपरेद्युर्यागसिद्धिः पर्वणोंशेत्वतीये
पिकर्तव्येष्टिर्द्विजातिभिः द्वितीयासहितंयस्माद्दूषयंत्याश्वलायनाइत्यपिसाधारणंवचनंसोमदर्शनप्रयुक्तदूषणप
रतयादर्शपरमेवएकमूलकल्पनालाघवात् यज्ञकालस्तिथिर्द्वैधेइतितुत्रिमुहूर्ताद्वितीयाचेदित्येतद्वचनानुरोधेन ७२

147/194

षण्मुहूर्तपरत्वेनहेमाद्रिणैवव्याख्यानाद्दर्शविषयमेवेत्याहुः तदप्ययुक्तं यदापूर्वदिनेयागकालाभावेपिप्रतिषिद्धत्वेनप्रति
पच्चतुर्थांशस्यगौणत्वायोगात्पर्वत्वतीयांशस्यैवसंधिसंनिकृष्टस्यगौणकालत्वाभ्युपगमेनवचनाभावेपूर्वदिनेयागानुष्ठानौ
चित्यमुक्तंतदाकिमुवक्तव्यंपूर्वदिनेयागकाललाभे पर्वणोंशेत्वतीयेपीत्यपिचवचनंतदापूर्वन्यायोपष्टंभितंसाधारणमेवस्या
न्नदर्शनमात्रविषयं नचतदादर्शविषयस्यत्रिमुहूर्तशास्त्रस्यानर्थक्यं अपराह्णसंधौपरदिनेयागकालाभावएवपौर्णमा
स्यांपूर्वेद्युरनुष्ठानंअमावास्यायांतुपरदिनेयागकाललाभेपिसोमदर्शनइत्येवमर्थत्वात् यद्यपिकेश्चित्त्रिमुहूर्ताद्वितीयाचे
दितिवचनस्यपंचधाविभक्तदिनत्रिमुहूर्तात्मकचतुर्थभागरूपापराह्णव्यापिनीद्वितीयेतिव्याख्यानात्सूर्यास्तात्पूर्वंषण्मुहूर्त
द्वितीयासत्वावश्यकत्वलाभेतादृशद्वितीयाविद्धायांप्रतिपदिप्रातःकालव्यापीयागकालोनलभ्यतेतथापिसार्धमुहूर्तमात्र
क्षयेतुकिंचित्तदधिकमपितादृक्स्पर्शात्सलभ्यतएव वस्तुतस्त्वावर्तनात्तुपूर्वाह्णोत्वपराह्णस्ततःपरइतिपर्वनिर्णयप्रक
रणाधीतवचनप्रतिपादितद्विधाविभक्तदिनद्वितीयभागरूपापराह्णग्रहणस्यैवात्राप्युचितत्वात्सूर्यास्तात्पूर्वंत्रिमुहूर्तमात्रद्वि
तीयासत्वेनैवसोमदर्शनोपपत्तेरधिकसत्वप्रमाणाभावाच्चतद्व्याख्यानस्यायुक्तत्वात्त्रिमुहूर्तद्वितीयासत्वस्यैवावश्यकत्वा
त्सोमदर्शनदिनेप्रातःकालव्याप्यपियागकालःसंभवत्येवेति तस्मात्संधिर्यत्रापराह्णेस्यादित्यस्मादार्षवचनादेवपौर्णमा
स्यामपराह्णसंधौसंनिकृष्टेपूर्वदिनेप्रातर्यागकाललाभेप्युत्तरदिनेचतदलाभेपिपरेद्युर्यागइतिमाधवादिबहुसंमतपक्षसि
द्धिः हेमाद्र्युक्तअस्यार्षवचनत्वासंप्रतिपत्तेः परेद्युःप्रातर्यागकाललाभएवापराह्णसंधौपौर्णमास्यांपरेद्युर्यागानुष्ठा
नंनान्यदेतिमतंसोपपत्तिकमुक्तमेवेत्यलंबहुना अमावास्यायामपिआवर्तनतत्पूर्वसंध्योर्यथोक्तएवनिर्णयः अपरा
ह्णसंधावपिवृध्यादिनाद्वितीयदिनेचंद्रदर्शनाभावेपौर्णमासीवदेवयदातुद्वितीयदिनेक्षयादिनासूर्यास्तात्पूर्वंत्रिमुहूर्ते
तदधिकेवाद्वितीयाप्रवेशेनचंद्रदर्शनसंभवस्तदापराह्णसंधित्वेनपरेद्युर्यागप्राप्तेरपवादमाहतुर्बौधायनवृद्धशातातपौ

त्रिमुहूर्ताद्वितीयाचेत्प्रतिपद्यापराह्णिकी अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनादिति प्रतिपद्दिनेअह्नोपरभागेत्रिमुहूर्तात्
तोधिकावाद्वितीयायदिप्रविष्टाभवेत्तदाआपराह्णिककिंचिद्दर्शयुक्तायांचतुर्दश्यामेवान्वाधानादिकृत्वासंधिदिनेयागंकु
र्यात्तत्परदिनेउक्तविधद्वितीयायुक्तप्रतिपद्दिनेचंद्रदर्शनात्तत्रचयागस्यनिषिद्धत्वादित्यर्थः वृद्धवसिष्ठोपि आदित्ये
स्तमितेचंद्रःप्रक्षीणउदयाद्यपि प्रतिपद्यतिपत्तिःस्यात्पंचदश्यांयजेत्तदिति अस्तमितेअस्तमयप्रत्यासन्ने अति
पत्तिर्यागस्याननुष्ठानंनिषेधश्च अर्वागस्तमयाद्यत्रद्वितीयातुप्रदृश्यते तत्रयागंनकुर्वीतविश्वेदेवाःपराङ्मुखाइति
चंद्रदर्शनादिनेविश्वेसर्वेदेवाःपराङ्मुखायतइत्यर्थः द्वितीयात्रिमुहूर्तेतिद्रष्टव्यं वाक्यांतरात् अयंचपर्युदासश्चंद्र
दर्शनार्हप्रतिपद्भिन्नायांप्रतिपदीति सामान्यप्राप्त्युपजीवीनिषेधोवानयष्टव्यमितिवत् पर्युदासत्वंश्रुतोस्पष्टं यस्मि
न्नहनिपुरस्तात्पश्चात्सोमोनदृश्यतेतदहर्यजेतेति चतुर्दशीमिश्रामावास्यायांपुरस्तात्सोमोदृश्यते द्वितीयामिश्रायां
प्रतिपदिपश्चात् तद्द्वयभिन्नायांमध्यवर्तिन्यांप्रतिपन्मिश्रामावास्यायांयजेतेत्यर्थः अंधभास्कराख्ययाज्ञिकग्रंथो
दाहृतायांश्रुतावपि यस्मिन्नहनिपुरस्तात्परतश्चसोमोनदृश्यतेतत्राहर्यजेतेति पर्युदाससिद्धस्य चंद्रदर्शनवत्यांप्र
तिपदीष्ट्यकरणस्यतदाकिंचिद्दर्शयुक्तायांचतुर्दश्यामन्वाधानविधानेनस्पष्टीकरणंतत्रैवश्रुतौ प्रातिपदिसमुदिता
चेदन्वादधीतश्रुतादिनइति चंद्रदर्शनवतिदिनेयागकरणेप्रायश्चित्तंचस्मृतंकात्यायनेन यजनीयेह्निसोमश्चेद्वारु
ण्यांदिशिदृश्यते तत्रव्याहृतिभिर्हुत्वादंडंदद्याद्द्विजातयइति अत्रकेचिच्च छंदस्यनिमित्तकमिदंप्रायश्चित्तं किं
तुस्वतंत्रमंगं तदंगीभूतयागाभावेनसंभवतियजनीयत्वोक्तेश्चेतिचंद्रदर्शनवत्यपिदिनेयागानुष्ठानद्योतकमे
वैतदित्याहुः तत्तुच्छं अपेक्षितकालयागानुष्ठाननिमित्तवैगुण्यप्रतिसमाधानरूपदृष्टार्थत्वसंभवत्यनपेक्षिता
दृष्टार्थत्वायोगात् चेच्छंदोयजनीतनिमित्तप्रतीतेश्चविशेषणेसंक्रमादेवंनिमित्तवाक्याभिव्यक्तिर्वारुणीसो ७४

157
194

मदर्शनवदहोयदियजनीयंयागसंबंधिस्यान्मोहाच्चेत्तत्रयजेतेति हविरार्तिमाछेदित्यस्यहविश्चेदार्तिप्राप्तिविशिष्टंस्यादि
तिवत् तेनयजनीयत्वोक्तिरप्युपपन्नेति नन्वेयथाचंद्रदर्शनवतोदिनस्ययागेपर्युदासःश्रुतस्तथान्वाधानेपि तस्माद्यदेवैनं
नपुरस्तान्नपरस्तात्पश्येत्तदेवोपवसेदित्यादि गोभिलादिभिरप्युक्तं यदहस्त्वेवचंद्रमानदृश्येततामावास्यांकुर्वीतेत्या
दि सत्यं द्वयोरपिचंद्रदर्शनरहितंदिनंकालःसंपूर्णायाममावास्यायांप्रतिपदिचदिनद्वयेपिचंद्रदर्शनाभावादुभयत्राप्य
नुष्ठानं यदात्वेकस्मिन्नेवदिनेचंद्रादर्शनंतदोभयोःस्वकालत्वासंभवेअंगगुणविरोधन्यायेनचंद्रादर्शनदिनेयागस्यपू
र्वस्मिंश्चचंद्रदर्शनवत्यपिअन्वाधानस्यानुष्ठानंयुक्तं अतएवश्रुतिरपि तेह्केदृष्टोपवसंतीति उपवसेदित्यनुवृत्तोआपस्तं
बोपि यदहर्नदृश्येततदहरमावास्यायांश्वोनद्रष्टारइतिचेति यस्याश्वःपरेद्युश्चंद्रंनद्रष्टारस्तस्यांचतुर्दशीमिश्रायांसि
नीवालीसंज्ञकायाममावास्यायामित्यर्थः तदुक्तमापस्तंबसूत्रभाष्यार्थसंग्रहकारेण पूर्वाह्णेवाथमध्याह्नेपर्वसंधिर्यदा
भवेत् तत्रोपोष्यासिनीवालीश्वोनद्रष्टारलक्षणेति गोभिलोप्याह दृश्यमानेप्येकदेति एवंचपिंडपितृयज्ञश्राद्धयोरपि
तदेवानुष्ठानं चंद्रक्षयवत्यपराह्णेद्वितयोर्विधिः अपराह्णेददातितस्मिन्क्षीणेददातीति पिंडान्वाहार्यकंश्राद्धंक्षीणे
राजनिशस्यते वासरस्यतृतीयेंशे नातिसंध्यासमीपतइतिच सचकिंचिदहःपर्यंतवर्तिन्यांचतुर्दशीयुक्तामावास्याया
मेवसंभावयितुंशक्यंतेनप्रतिपद्युक्तायां अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचंद्रमाः अमावास्याष्टमांशेचततःकिलभ
वेदणुरितिवचनात् कर्मप्रदीपेतुपक्षांतंकर्मनिर्वर्त्यवैश्वदेवंचसाग्निकः पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइत्यादि
वचनैरन्वाधानपिंडपितृयज्ञश्राद्धानामेकदिनसाध्यत्वात्पितृयज्ञस्याहस्सुचंद्रक्षयेविधानादन्वाधानकालवाक्यगत
मपिचंद्रादर्शनंचंद्रक्षयोपलक्षणमित्युक्तं यदुक्तंतदहस्त्वेवदर्शनंनैतिचंद्रमाः तत्क्षयापेक्षयाज्ञेयंक्षीणेराजनिचे
त्यपि दृश्यमानेप्यवदेतिचसूत्रंचतुर्दशीमिश्रामावास्यायांश्राद्धेक्रियमाणेतत्कालापराह्णसंनिकर्षातिविप्रकर्षाभ्या

का०त०
७५

ममावास्याप्रतीक्षातदभावप्रतिपादनपरत्वेनव्याख्यातं यच्चोक्तं दृश्यमानेपितच्चतुर्दश्यपेक्षया अमावास्यांप्रतीक्षेद्दा
तदंतेवापिनिर्वपेदिति तुल्यन्यायत्वाच्चैवमन्वाधानेपितच्चतुर्दश्यष्टमांशादिसोमक्षयकालप्रतीक्षातदभावोद्रष्टव्यो गो
भिलोपिचंद्रपूर्तिक्षयनिमित्तकमेवपर्वद्वयनिर्णयमभिप्रेत्यतयोर्ज्ञानत्वात्तज्ज्ञानोपायमाह पृथगेवैतस्यज्ञानस्याध्या
योभवत्यधीयीतवातद्विद्भ्योवापर्यागमयेतेति अध्यायोग्रंथोज्योतिःशास्त्ररूपः एतच्चान्वाधानादित्रयस्यैकदिनसा
ध्यत्वमाश्वलायनापस्तंबव्यतिरिक्तविषयं तेषांकदाचिद्यागदिनेपिपितृयज्ञोभवतीसोत्रस्यामावास्यापदस्यसंधिम
दहोरात्रपरत्वेनतद्भाष्यकारादिभिर्व्याख्यानबलात् तस्मात्सत्यप्यन्वाधानस्यापिचंद्रादर्शनकालत्वेविरोधेतत्रतद्बाध
स्यन्याय्यत्वाद्दिवासंधौचतुर्दश्यांचस्वल्पस्तात्पूर्वंकिंचिदमावास्यासत्वेयागश्चंद्रदर्शनदिनेनकार्यएवेतिसिद्धं रात्रि
संधौतुचंद्रदर्शनदिनेपियागोभवतीतिपूर्वमेवसप्रपंचमुक्तं यत्तुशतपथब्राह्मणंतदहःपश्चाच्चंद्रमाअभ्युदेतितदह
र्यज्ञस्मिमानलोकानभ्युदेतीतियच्चतैत्तिरीयब्राह्मणं एषांवैस्रुमनानामेष्टिर्यमभ्युज्ञातंपश्चाच्चंद्रमाअभ्युदेत्यस्मिन्ने
वास्मैलोकेवर्धुकंभवतीति तदपिचंद्रोदयदिनेयागकर्तव्यताप्रतिपादत्वाच्चंद्रोदयस्यचामावास्याष्टमांशप्रभृतिवि
द्यमानत्वादुरितमात्रस्यचलोकेरदर्शनाच्चचंद्रादर्शनदिनयागप्रतिपादकश्रुतिस्मृतिविरुद्धं यदपिसएवआकु
तिभ्योज्ञातःपश्चाद्दृष्टश्इतिश्रुत्यंतरंतदपिचंद्रादर्शनदिनयागप्रतिपादकबहुश्रुतिस्मृतिविरोधाच्छास्त्रीयदर्श
नाभिप्रायेण प्रतिपद्याकुतिभ्योज्ञातःपश्चाद्द्वितीयदिनेदद्दृशइत्येवंवाव्याख्येयमितिहेमाद्रिः मयात्वुच्यतेनैताःश्रु
तयश्चंद्रदर्शनदिनेयागंस्पष्टतयाविदधतिकिंतुकेवलंस्तुवंतिस्तुत्यातुविधिःकल्प्यः सचचंद्रदर्शनदिनयागविधायि
प्रत्यक्षविधिविरोधान्नकल्पयितुंशक्यते स्तुतिमात्रत्वेवंप्रशस्तमपिचंद्रदर्शनदिनंचंद्रादर्शनदिनापेक्षयाहित
मेवेतिप्रशस्ततरेतत्रैवयागःकर्तव्यइत्येवंचंद्रदर्शनदिनयागविधिशेषतयैवनेतव्याजर्तिलाःअग्निहोत्रश्रूयंते ७५

153
194

जर्तिलयवाग्वाजुहुयात्गवेधुकयवाग्वेत्युक्त्वाअनाहुतिःयैर्जर्तिलागवेधुकाश्चेत्युक्तंतत्रजर्तिलाआरण्यास्तिलाःगवेधुका
आरण्यागोधूमाःतत्रपुनःपयसाऽग्निहोत्रंजुहुयादितिश्रुतंतत्रसंशयःकिंजर्तिलाद्यनाहुतिवादःप्रतिषेधउतपयोहोमस्यार्थ
वादइतितत्रजर्तिलादयस्तावल्लिंगविहितास्तेषामनाहुतिवादःप्रतिषेधःपयोविधिश्चवाक्यांतरमितिप्राप्तेभिधीयते यद्य
पिजर्तिलादयोविहितास्तथाप्यनाहुतिवादोनप्रतिषेधःअनर्थकत्वात् विकल्पार्थोहिप्रतिषेधःसचपयोविधिनैवतेषांसिद्ध
इतिव्यर्थःप्रतिषेधस्तस्मादानाहुतिवादस्तावत्जर्तिलादिनिंदाद्वारेणपयसःस्तुत्यर्थः यदाचैवंतदाजर्तिलादिविधिरपितन्निं
दाद्वारेणपयसःप्रशस्ततरत्वंज्ञापयतेगवेधुकस्तुतिरिवपयोविधिशेषतयोयद्यपिविधिःकल्प्यते तथापिरात्रिसंधौचतुर्दशी
दिनेदर्शप्रवेशाभावेचचंद्रदर्शनदिनेपियागानुष्ठानस्यपूर्वोक्तरीत्यान्याय्यत्वात्तद्विषयोभविष्यतीति यदप्युत्तरामुपवसेदनि
र्ज्ञायेतिश्रुत्यंतरंहेमाद्रिणादाहृतंतदपिप्रतिपदिचंद्रदर्शनादर्शनसंशयेपियाक्षिकस्यापिदोषस्यपरिहार्यत्वात्प्राप्तंपूर्वेद्यु
रनुष्ठानमपोद्यपरेद्युरनुष्ठानंविधत्तां यदपिपूर्वांपौर्णमासीमुपवसेदितिपैंग्यमुत्तरामितिकौषीतकंयापूर्वापौर्णमासीसा
नुमतिर्योत्तरासाराकेतिभाष्यकारैःपूर्वाह्णापराह्णसंधिभेदेनव्यवस्थापितंपक्षद्वयंपौर्णमास्यांप्रतिपाद्ययापूर्वामावा
स्यासासिनीवालीयोत्तरासाकुहूरितितादृश्यमेवतत्पक्षद्वयमप्यमावास्यायामप्युक्त्वापर्वद्वयसाधारण्योक्तपक्षद्वयोपसं
हारार्थंदशाविशेषपठनीयत्वेनभाष्यकारैरेवोक्तमेतरयिब्राह्मणंपूर्वांपौर्णमासीमुपवसेदनिर्ज्ञायपुरस्तादमावास्यायां
चंद्रमसंयदुपैतियद्यततेतेनोत्तरामुपवसेदुत्तराणिहवैसोमायजंतेसोममनुदेवतमेतद्वैदेवसोमंयच्चंद्रमास्तस्मादुत्तरा
मुपवसेदितितदप्यमावास्यायांपुरस्ताच्चंद्रमसमनिर्ज्ञायशास्त्रमार्गेणचंद्रोदयोनभविष्यतीतिनिश्चित्ययदुपैत्युपवस
तियच्चपरेद्युर्यजतइतिव्याख्यानादमावास्यायाःखंडत्वेचंद्रादर्शनदिनेउपवासंपरेद्युश्चंद्रदर्शनदिनेपियागंप्रतिपा
दयदिवलक्ष्यमाणमपिअपराह्णसंधिव्यवस्थापितोत्तरोपवासोपसंहारकत्वात्तस्यचसामान्यप्राप्तस्ययागदिनेचंद्राद

का०त० श्निपिसंभवादविरुद्धं संभवतिचखंडत्वेपिप्रतिपत्वृध्याद्वितीयदर्शोत्तरदिनेपित्रिमुहूर्तद्वितीयाप्रवेशाभावेनचंद्रादर्शनं एत
७६ द्दैवसोमंयच्चंद्रमाइति चंद्रमद्भावप्रयुक्तोयोत्तरयागादिनमर्थवादएवनविधिः ग्राम्यारण्यपशुरित्यनेनप्रसक्तयोरपित
योरग्निहोत्रंप्राकृतित्वंनास्तिपयसस्तुतदस्तीतिइत्थंमहाभागंपयइतिस्तुतेरेकवाक्यत्वसंभवतिनवाक्यभेदकल्पनंन्या
य्यमितिपयोमात्रविधिरन्योर्थवादइतिस्तुतिः सासंपूर्णचंद्रस्यैवप्रतिपत्प्रभृतियीयमानत्वात्सोमद्रव्यवदेवप्रतीकार
त्वेनसामर्थ्याद्वाष्यकारैस्तथाव्याख्यानाच्चपौर्णमासीमात्रविषयेति तस्माच्चंद्रदर्शनादिनेयागानुष्ठानद्योतकस्यानन्य
थासिद्धस्यकस्याप्यसत्वादपराह्णसंधिशास्त्रस्य वसामान्यरूपस्यचंद्रादर्शनविषयेसंकोचापत्तेः संधिर्यद्यपराह्णेस्या
दित्यस्यापिपौर्णमास्यांसावकाशत्वात्सकलनिबंधसंमतेःस्पष्टविधिनिषेधरूपवचनैरमावास्यांसोमदर्शनप्रयुक्तोप
राह्णसंधिशास्त्रापवादःसर्वेषांक्रियतइतिन्याय्यःपंथाः तानिचवचनानिश्रुतिस्मृतिसूत्ररूपाणिहेमाद्र्यादिनिबंधे
षुद्रष्टव्यानि अस्माभिस्तुविस्तरभीतिः कानिचिदेवदर्शितानीति माधवादयस्तुपूर्वोक्तविधान्यथासिद्धत्वेत्तिरीये
तरेपिब्राह्मणरूपकुशकाशावलंबनेनस्पष्टविधिनिषेधरूपनानावचनमहापूरपरिपंथनामाचरंतआश्वलायनापस्तं
बव्यतिरिक्तविषयत्वंचंद्रदर्शनयागनिषेधस्यमन्यंते आपस्तंबसूत्रभाष्यार्थसंग्रहकारोपिपौर्णमासीवदेवामा
वास्यानिर्णयमाह अपराह्णेथवारात्रौयदिपर्वसमाप्यते उपोष्यातत्रराकास्यात्सापूर्णोत्सर्पिलक्षणा अपराह्णेक्षय
यांवायदिपर्वसमाप्यते उपोष्यानुमतिस्तत्रसाश्वःपूरितलक्षणा पूर्वाह्णेवाथमध्याह्नेपर्वसंधिर्यदाभवेत तत्रोपा
ष्यासिनीवालीश्वानद्रष्टारलक्षणेति संधिशास्त्रमेवैकंनिर्णायकंचंद्रदर्शनादेवयागनिषेधकानितुश्रुत्यादिवचना
निसतिसंभवेतदुपोद्बलकानि नतुविरोधेतदपवादकानीतिनामांतरेणतेषामकिंचित्करत्वादप्रामाण्यमेवयत्सूत्र ७६
र्थसारादावुक्तंतत्सामान्यविशेषशास्त्रश्रुतिस्मृत्यादिबलाबलेआपामरंप्रसिद्धेमहत्साहसमित्युपेक्षणीयमेवेत्यु
स·

155
194

पेक्षणीयमेवेत्यलंबहुनाक्षोदेन यदपिप्रकारांतरेणेष्टिकालनिर्णयार्थंआपस्तंबवचनं षोडशेहन्यमेष्टिर्मध्यापंचदशेहनि
चतुर्दशेजघन्येष्टिःपापासप्तदशेहनीतितत्पूर्वेष्टिदिनमारभ्यगणनायांषोडशेदिनेयद्यष्टेरिष्टिस्तदोत्तमा पंचदशेमध्यमा
सप्तदशेधमासप्तदशेनकर्तव्येत्येवमर्थकंप्रधानयागविषयतयावभासमानमपीष्ट्युपक्रमान्वाधानपरंव्याख्येयं साम्यक्ष
ययोःषोडशपंचदशादिनयोरिवद्वृद्धौसप्तदशादिनेपिप्रधानयागानुष्ठानस्यावकाशतयातत्रतन्निषेधानुपपत्तेः पक्षेदिन
द्वयक्षयाभावेनचचतुर्दशादिनेयागविध्यनुपपत्तेः अन्वाधानस्यतुवृद्धिसाम्यक्षयेषुयजनीयदिनादिवारभ्यषोडशपंचद
शाचतुर्दशादिनेषुविधिःसंभवति पापासप्तदशेहनीतिनांतरिक्षिनादिवीतिवत्तद्विषयएवनित्यानुवादः अतएवान्वाधानविषय
मेवबौधायनस्यवाक्यद्वयं अत्रोपवथस्यस्थानानिचतुर्दशीपंचदशीषोडशीनतुत्रयोदशीसप्तदशीतियत्रोपवसथ्यकर्मयज
नीयात्रयोदशां भवेत्सप्तदशांवापितत्प्रयत्नेनवर्जयेदिति अत्रत्रयोदशीनिषेधोपिसप्तदशीनिषेधवन्नित्यानुवादएवदिनद्वयव
द्धेरिवदिनद्वयक्षयस्याप्यभावात् यत्तुवचनांतरंऊनेपंचदशीयाज्यासमेयाज्यातुषोडशी ऊनेवाप्यधिकेवापिनेज्यासप्तदशीक्व
चित् इतितत्रोपवासविषयंभवति पूर्वयागदिनादारभ्यतद्दिनगणनायांसाम्यवृध्योःपंचदशषोडशादिनयोस्तत्प्राप्तेन्यूनत्वसम
त्वयोःपूर्वोपवासदिनादारभ्यगणनायांवृद्धौसप्तदशेपिद्वितीयोपवासानुष्ठानस्यावश्यकत्वात्तन्निषेधानुपपत्तेः नापियाग
विषयं ऊनेपंचदशीसमेषोडशीत्येतदुपपत्तयेयागादिनप्रभृतिगणनायांसप्तदशेपियागस्यावश्यकत्वात् तस्मादयंसप्तदशी
निषेधःप्रधानयागएव दर्शोत्तरप्रतिपद्यल्पाल्पवृध्यासप्तदश्यांप्रायश्चंद्रदर्शनसंभवात्तद्विषयोव्याख्येयः यस्तुहेमाद्रिणा
पियत्रोपवसथ्यंकर्मेत्यस्यवचनस्यपूर्वार्धोत्तरार्धयोरमावास्यापौर्णमासीविषयेनिषेधत्वमेवेत्येकःपक्षउक्तस्तस्यायमभिप्रा
यः यदापूर्वदिनेयोगेदारभ्यक्षयेणचतुर्दशीचतुर्दशीसूर्यास्ताद्धूर्ध्वंसमाप्ता चतुर्दश्यमावास्याचयथा पंचदश्याश्चप्रतिप
दिसूर्यास्तपूर्वत्रिमुहूर्तद्वितीयाप्रवेशेनचंद्रदर्शनसंभवस्तदाचंद्रदर्शनदिनयागनिषेधमात्रालोचनेनप्रसक्तंत्रयोदश्यां

का०त०
७७

चतुर्दश्यामन्वाधानंपूर्वार्धेनिषिध्यते अतएवास्माभिश्चतुर्दश्यमावास्यादिनेप्रतिपच्चवेशावश्यकतोक्ता एवंयदासद्यस्कालयाग
योग्यापौर्णमासीपूर्वयागादिनादारभ्यवृध्यासप्तदशीतदासद्यस्कालत्वात्तत्रप्रसक्तमन्वाधानंनिषिध्यते तेनसद्यस्कालयागयो
ग्यायामपिपौर्णमास्यांसप्तदश्यांसत्यांपूर्वाह्नसंधित्वात्तद्दिनेयागमात्रमन्वाधानंतुतत्पूर्वदिनइतिसद्यस्कालापवादइति पौर्णमा
सीविशेषेचसद्यःसान्वाधानयागानुष्ठानमुक्तंकात्यायनेन संधिश्चेत्संगवादूर्ध्वंप्राक्पर्यावर्तनाद्रवेः सापौर्णमासीविज्ञेया
सद्यस्कालविधौतिथिरिति तदपिवैकल्पिकंननियतं अन्वाहितिश्चास्तरणोपवासौपूर्वेद्युरेते खलुपौर्णमास्यां आवर्तनात्प्रा
क्यद्विपर्वसंधिः सद्यस्तदावाक्रियतेसमस्तमितिसंग्रहकारवचनात् एवंचसद्योवेत्यादिपौर्णमासीविषयंसस्मान्यत्रपंका
त्यायनादिवचनमपिविशेषविषयमेव एकमूलकल्पनालाघवात् पौर्णमास्यामेवपूर्वाह्नसंधिशास्त्रप्राप्तनिर्णयस्यसद्य
स्कालत्वस्यचापवादोवाजसनेयिनांभाष्यार्थसंग्रहकारेणोक्तः मध्यंदिनात्स्यादहनीहयस्मिन्प्राक्पर्वणःसंधिरियंत्वती
या सार्वविकावाजसनेयिमत्यातस्यामुपोष्याथपरेद्युरिष्टिरितिइदंचपौर्णमासीविषयमेव अपराह्नसात्रिसंधिमत्योः
प्रथमद्वितीययोःपौर्णमास्योरेवपूर्वमुक्तत्वात् तदपेक्षयास्यास्तृतीयत्वात् अमावास्यायांप्रतिपच्चतुर्थांशनिषेधस्ये
वचंद्रदर्शनिनिषेधस्यापिबाधापत्तेश्च एकबाधेनैवोपपत्तौद्वयबाधस्यान्याय्यत्वात् इदंचद्वितीयदिनेप्रातःप्रतिपत्तृ
तीयांशलाभेवेदितव्यं नतुतच्चतुर्थांशमात्रलाभे तस्यापराह्नसंधावेवयागकालत्वात् इतिप्रकृतिर्निर्णीता दर्शपूर्णमा
सप्रकृतयस्त्विष्टिपशुबंधाःसद्यस्कालाएव यदिष्ट्यापशुनाचेतिवचनात् इदंहिवचनंविकृतीनांकालव्यवस्थार्थंसद्यस्का
लत्वार्थंचेतिसाधितंतत्रतत्रसंपूर्णपर्वण्यपराह्नसंधौचतदाप्रकृतिप्रधानानुष्ठानाभावाद्विकृतिंकृत्वाप्रकृतिरुपक्रमित
व्या यदिष्ट्येतिवाक्यविहितकाललाभादितिमीमांसकानांयाज्ञिकानांचाविप्रतिपन्नमेव पूर्वाह्नसंधौत्वौदयिकपर्वणः ७८
प्रकृत्यावरुद्धत्वात् पूर्वपर्वण्येवोपदिष्टपर्वकालत्वानुरोधेनातिदेशप्राप्तंप्रतिकालंद्वैयहकालवद्बाधित्वाविकृत्यनुष्ठानं

157
156

युक्तमितिमीमांसकाः तदुक्तंतंत्ररत्ने एवंचयद्धूर्तस्वाम्यादिभिरुच्यतेप्रागावर्तनात्सर्वावर्तनेप्रतिपत्संचदर्शीसंधौसतिकृत्वा
प्रकृतिंप्रतिपदिविकृतिःकर्तव्येति तदन्याय्यमनभिमतंभगवतोभाष्यकारस्येति नचपौर्णमास्यमावास्याशब्दयोर्योगेनपर्वा
त्यक्षणवाचित्वात् तत्रचसमस्तकर्मानुष्ठानासंभवात्तदहोरात्रलक्षकत्वमितिवाच्यं सोमस्यवैराज्ञोर्धमासस्यरात्रयःपत्न्य
आसंस्तासाममावास्यांचपौर्णमासीचनोपैदित्याद्यर्थवादगतवैदिकप्रसिद्धेरायामरलोकप्रसिद्धेश्चतयोस्तिथिवाचि
त्वस्यतत्रैवव्यवस्थापनात् नचपूर्वाह्नसंधिदिनएवविकृतिमनुष्ठायप्रकृतिमनुष्ठीयतांतस्याःप्रतिपद्यप्यविरोधादिति
वाच्यं प्रकृतावुपदिष्टस्यप्रातःकालस्यबाधितुमशक्यत्वात् पूर्वेद्युरनुष्ठानेतुउपदिष्टपर्वकालत्वानुरोधेनविकृता
वतिदिष्टतद्बाधस्यन्याय्यत्वात् निशीथेष्टिश्श्रूयते अग्नयेरक्षोघ्नेपुरोडाशमष्टाकपालंनिर्वपेद्योरक्षोभ्योबिभीयादि
ति तत्रापरंवचनंअमावास्यायांनिशियजेतेति तत्रचिंत्यतेकिंपृथगेवतंत्रंकर्तव्यंउत्तदार्थिकमेवतंत्रंप्रसज्यतइति तत्रा
मावास्यायांनिशीतिसामानाधिकरण्यात्कालवचनामावास्याशब्दोनकर्मवचनस्तेनवाक्यान्नकर्मणामुपस्थानं
नापिप्रकरणात्तदभावात् अतोनालोच्यदर्शेविधीयमानानिशीष्टिस्तत्तत्रोपजीवनासंभवात्सांगयुक्तैवकर्तव्यतया
विधीयतइतिनास्तिप्रसंगइतिप्राप्तेब्रूमः यद्यपिवाक्यात्प्रकरणेनवानोपस्थानंतथापियस्मिन्कालेविधीयतेस
तावन्नियमेनप्रवृत्तामावास्यातंत्रएवतेनतत्रविधीयमानेष्टिस्तंत्रमध्यविहिताभवतिअवश्यंचार्थस्वभावावगतम
प्यमावास्यातंत्रमालोच्यैवनिशीष्टिर्विधातव्या अन्यथाग्निप्रणयनव्रतोपायनादिकमपिविदध्यात्तच्चाशक्यंप्रणी
तानामग्नीनांपुनःप्रणयनासंभवादुपेत्यचव्रतस्यानुत्सृष्टस्यपुनरुपेतुमशक्यत्वात् तस्मादालोच्यैवदर्शतंत्रंविधी
यमानेष्टियत्ततउपजीवितुमशक्यंतावन्मात्रंस्वयंप्रयुक्तेअन्यस्तदार्शिकमेवोपजीवतिविकृत्यंतराणितुनप्रवृत्ततंत्रा
यांप्रकृतौविधीयंतेप्रागेव प्रकृत्यारंभात्तदनुष्ठानसंभवात् इयंतुनिशिविधीयमानातत्तंत्रेमध्येपातिनीप्रसंगमुप

ञीवसीतिवैषम्यंनिशीथ्यादिवदनन्यगतिवचनाभावेपूर्वेद्युरन्वाधानेनोपक्रांतस्यप्रकृतिप्रयोगस्यमध्येकर्मांतरानुष्ठा
नस्यानुचितत्वातत्वात्च अन्यथासर्वत्रविकृतौप्रकृत्यर्धानुष्ठितानुष्ठानस्यमानांगप्रसंगप्रसंगेनिशीथ्यावत्तद्विचार
स्यानुपपन्नत्वाद्दिकृतविशेषाणांप्राकृतांगाश्रितानांनिरवकाशत्वप्रसंगाच्च अतएवसंपूर्णपर्वण्यपराह्णसंधौचवि
कृत्यनुष्ठानानंतरमेवप्रकृत्यन्वाधानंयुक्तं अतिदिष्टप्रकृतिप्रधानांगप्रातःकालानुरोधाच्च प्रकृत्यन्वाधानस्यानु
पदिष्टोपिप्रातःकालोंगकालत्वाद्वाध्यएवेति एवंपूर्वाह्णसंधौपूर्वपर्वणिविकृत्यनुष्ठानेपिद्रष्टव्यं याज्ञिकास्त्वाव
र्तनतत्पूर्वसंध्योःप्रकृत्यनुष्ठानानंतरंसंधिदिनएवविकृत्यनुष्ठानंवदंतितदुक्तं आवर्तनात्प्राग्यदिपर्वसंधिःकृ
त्वातुतस्मिन्प्रकृतिंविकृत्याः तदैवयागःपरतोयदिस्यात्तस्मिन्विकृत्याःप्रकृतेःपरेद्युरिति यदत्रहेमाद्रिणावि
कृतेरपिप्रातरनुष्ठाननियममभिप्रेत्यपूर्वेद्युःकृत्स्नप्रयोगेतदुपक्रमेवोपदिष्टपर्वकालालाभलक्षणवचनानु
ग्राहकन्यायोपन्यसनंकृतं तदतिदिष्टप्रातःकालबाधस्यन्याय्यत्वादुत्तरेद्युरनुष्ठानेप्यावश्यकत्वाच्चयत्किंचि
देव पौर्णमास्यमावास्याशब्दयोःपर्वात्यक्षणवचनत्वंत्वयुक्तमित्युक्तमेव यःपरमोविप्रकर्षःसूर्याचंद्रमसोः
सापौर्णमासीयःपरःसन्निकर्षःसामावास्येतिगोभिलसूत्रंतुलोकवेदप्रसिध्यातिथिवचनयोरेवपौर्णमास्यमा
वास्याशब्दयोरेकदेशवृत्तिप्रवृत्तिनिमित्तप्रतिपादनार्थंभवतिचैकदेशवर्तिनापिनिमित्तेनसमस्ताभिधानंयथा
कुंडलीदेवदत्तइति वैश्वदेवंपर्वेतिच तस्मात्श्रुतिमूलकंवचनमेवैतदित्यंगीकृत्ययाज्ञिकमतेश्रद्धातव्यमिति
एवमपूर्वसोमेपिमीमांसकमतेतिथेरेवांगत्वेनोपदेशात्तस्याश्चनिकृष्टयोरावर्तनतत्पूर्वसंध्योःपूर्वेद्युर्भूयःप्र
योगैकदेशकालव्याप्तिलाभात्तस्यापिविकृतीष्ट्यादिवत्तयोस्तत्रैवानुष्ठानं याज्ञिकमतेतुपौर्णमास्यमावास्या ७८
शब्दयोस्तिथिवचनत्वेपिवचनबलादिवेष्ट्यादिवदेवसोमस्यापिपरेद्युरनुष्ठानंतयोःसंध्योः तद्विषयमपिहिकः

159
194

चित्प्रामाणिकयाज्ञिकनिबंधेखंडेपर्वणिसोमश्चेत्प्रतिपन्मिश्रपर्वणि सोमसुत्याप्रबोक्तव्येत्याहकौषीतकीश्रुति
रितित्रिखंडवचनमेतेनसोमकालोव्याख्यातइतिच दर्शपौर्णमासविकृतिकालनिर्णयप्रकारातिदेशकंसंकर्षकांड
सूत्रवचनंलिखितं संधिवचनत्ववादिनांतुयाज्ञिकानांतद्वदहोरात्रलक्षणाया आवश्यकत्वान्न्याय्योप्येतद्वचनानु
ग्राहकोलभ्यतइतिस्फुतरांतथानुष्ठानंयुक्तं याज्ञिकाचारोप्येवमेवेति आग्रायणेष्टौतुविशेषश्रुतावुक्तःयस्मिन्काले
मावास्यासंपद्येततयेष्ट्वातथैतयायजेतयदिपौर्णमासीस्यात्तयेष्ट्वाथपौर्णमासेनयजेतेति अमावास्यादर्शेष्टि
तयामावास्यया एतयाआग्रयणेष्ट्या इदंचैतयावाचोयुक्त्यापर्यवस्तन्नंपौर्णमास्यमावास्येष्ट्योरंतराआग्रय
णाननुष्ठानंव्रीहिभिरिष्ट्वाव्रीहिभिरेवयजेत यवैर्भ्योयवैरिष्ट्वायवैरेवयजेत व्रीहिभ्यइतिश्रुतिबलाद्व्रीहियव
यवव्रीत्याग्रयणद्रूपपूर्वोत्तरावधिव्यवस्थितं प्रकृतौयेषांव्रीहियवानुष्ठानंतद्विषयं पौर्णमासेकहविष्कत्वनियमा
दर्शस्य तथाचाथयदहश्चंद्रमानदृश्येततामावास्यामितिगोभिलगृह्ये भाष्यं अथेतिपूर्वप्रकृतापेक्षः यत्पौर्णमा
स्यांयागार्थेहविस्त्रपक्रूप्तंतदमावास्यायामप्युपकल्पनीयमित्यर्थः कुतःदर्शंतंपौर्णमासाद्येकैकंकर्मेतिवचनात
येनहविषाकर्मप्रक्रांतंतेनैवसमापनीयमितिचन्यायादिति पौर्णमास्यांपूर्वमाग्रयणानुष्ठानंसद्यस्कालप्रकृत्यनु
ष्ठानविषयमितिहेमाद्रिरितिशिवं पर्वणांशास्त्रयःपूर्वकालोन्वाधानकर्मणः तच्चतुर्थांशसहिताआद्याःप्रातिप
दस्त्रयः प्रातःस्थितायज्ञेःपर्वेत्वतीयेपितुरीयकः पक्षादिश्चवक्रविकेश्चितयागकालःसमाश्रितः आवर्तनेततः
प्राग्वायदिपर्वसमाप्यते तदान्वाधायपूर्वेद्युस्तदहर्यागइष्यते ईदृशामपिराकायांमतेवाजसनेयिनां व्रतमेवपर
त्रेष्टिर्लाभस्तत्समयस्यचेत् संगवावर्तनांतर्यापौर्णमासीसमाप्यते तस्यांसद्योविकल्पेनसान्वाधानयजेविधिः
यदासंधिदिनेयागस्तदाप्येतत्तत्समापनं प्रतिपन्मध्यएवस्यात्पुनर्यागोन्यथाभवेत् प्रतिपत्क्षयवृध्याद्रूप्र

क्षेपेणचपर्वणि इहसंधिविनिर्णयोनयथास्थितदर्शनात् ऊर्ध्वमावर्तनात्संधौतद्दिनेन्वाहितिर्भवेत् परत्रेष्टिः पौर्णमास्यां
दर्शेप्येवनचेद्दिधोः प्रतीच्यांदर्शनंतत्रमतिर्त्वत्रेंदुदर्शने यागः संधिदिनेतस्मात् पूर्वत्रान्वाहितिर्यदि प्रवेशोदर्शपक्ष
योरन्वाधानेष्टिघस्त्रयोः सूर्यास्तोत्तरसंधौतु सत्यपीष्टिदिनेविधौ इष्टेतत्रैवयागः स्यादितिप्रामाणिकीस्मृतिः हेमाद्रि
स्तुनिशासंधावत्यंतापचयेतिथिः द्वितीयाप्रभृतिव्रतेपूर्णेदर्शेयजेतकृतिः भूतेचान्वाहितिश्राद्धपित्रिज्यानामनुष्ठि
तिं येस्त्वापस्तंबमुन्युक्तमाध्वर्यवमुरीकृतं तेषांचेंद्रेक्षणेपीष्टिस्तैत्तिरीयश्रुतौस्फुटेः निषेधाभावतः पौर्णमासीवद्द
र्शनिर्णयः विकाराः पौर्णमासादेरिष्टयः पशवस्तथा स्वतंत्राः सद्यएवस्युः पर्वण्येवनतुद्व्यहं तत्रपर्वणिसंपूर्णे
मध्याह्नात्परतोथवा समाप्तेविकृतीःकृत्वाप्रकृतिष्टेरुपक्रमः मध्याह्नात्पूर्वसंधौबहुयाज्ञिकदर्शने तद्दिनेप्रकृ
तिंकृत्वाविकृतीनामनुष्ठितिः अमावास्यापौर्णमासीशब्दाभ्यांसंधिबोधनात् मीमांसकमतेकृत्वापूर्वेद्युर्विकृति
ततः अन्वाधायसंधिदिनेप्रकृतीष्टेः समापनं अमावास्यापौर्णमासीशब्दाभ्यांतिथिकीर्तनात् नवेज्यायांवि
शेषोयंकेषांचिद्वचनोदितः पौर्णमास्यदर्शस्यचांतरालेनसाभवेत् किंतुप्राक्पौर्णमासेष्टेर्दर्शेष्टेः परतोभवेत्
पर्वण्यखंडेखंडेवस्येवंपर्वविनिर्णयः इतिपर्वनिर्णयः अथनानातिथिसाध्यव्रतेषुतन्निर्णयः क्रियते तेषुच
येसोपपदाः सावित्रीत्रिरात्रगोत्रिरात्रबिल्वत्रिरात्रदुर्गानवरात्रादयः शब्दास्तएवतत्तद्देवतादिसंबंधस्य तत्तत्का
लसंबंधस्यचप्रमाणांतरेणावगतत्वेन प्रवृत्तिनिमित्तसद्भावान्नामधेयानि येतुनिरुपपदास्त्रिरात्रंपंचरात्रंनवरात्रमि
त्यादयः शब्दाउत्पत्तिविधिघन्यत्रयाश्रुतास्तेषामत्यंतसंयोगवाचिद्वितीयांतानांसमासांतदर्शनावश्यकसमाहा
रसमासत्वानांनिरूढप्रायाणांश्रुत्यागुणविधित्वमेव नतुलक्षणयाकर्मनामत्वं त्रयोदश्यादिवाक्यानिचाग्नि
माणिप्राप्तेत्रिरात्रादिसामान्येविशेषविधयस्तद्वशादेवचत्रिरात्रादिशब्दांतर्गतस्यरात्रिशब्दस्यतिथिपरत्वं एवंना ७९

161
194

नातिथिसाध्यत्वेनावगतेषुव्रतेषुविधाद्वयं प्रायस्तावद्भेदप्रमाणाभावादेकमप्युपवासपूजाद्यात्मकंप्रधानं अन्यथासंभ
वात्समुच्चयकालवशादाग्नेयवन्नानातिथिष्वावर्तते तेनतावत्तिथीनांप्रधानकालत्वमेव केषुचिदंतिमतिथिकृत्यमेवप्र
धानं पूर्वतिथिकृत्यंत्वंगं सांगप्रधानप्रयोगस्यतावत्कालव्यापित्वाच्चतेषुत्रिरात्रादिव्यवहारः षड्त्रिंशदहोवाएषयद्द्वाद
शाहइतिवत् एकादशीव्रतादावेवंरूपेपिनतथाव्यवहारः अदादेस्तस्यापर्यनुयोज्यत्वात् तत्रपूर्वविद्धाक्रांतेष्वपियेषु
अंतिमतिथेर्निर्णयोपजीव्यत्वरूपप्राधान्यद्योतकंकिंचिदस्ति यथावटसावित्रीव्रतादिषुवटपूर्णिमावटपैतृकीत्यादिस
माख्या अशक्ताचत्रयोदश्यांनक्तंकुर्याज्जितेंद्रियाचितंचतुर्दश्यांपौर्णमास्यामुपोषणमिति त्रयोदशीचतुर्दश्योरुप
वासयोरनुकल्पविधानंविशेषतः पौर्णमास्यांस्नानंसर्षपमृज्जलैरित्याद्युक्तिरित्येवंजातीयकंतत्रस्वातंत्र्येणकाल
व्याप्त्यादिनांतिमतिथिंनिर्णयेकदेशवर्तिनामपितदव्यवहितपूर्वतिथिनामेवयावदपेक्षंग्रहणंनतुतासांस्वातंत्र्येण
निर्णयःकर्तव्यः यथापूर्वेद्युरन्वष्टकाश्राद्धयोः सप्तम्यष्टमीश्राद्धतुल्यकक्षत्वेपूर्वेद्युःपरेद्युः शब्दयोश्चसप्तमी
नवमीपरत्वेनव्याख्यानात्तस्यापितिथिप्रयुक्तत्वेतयोस्तिथ्योः पूर्वेद्युःपरेद्युः शब्दाभ्यामष्टम्युपजीवनेनोक्तिवशा
दन्ययातथोक्तेर्निरभिप्रायत्वापत्तेः कालव्याप्तिप्रयुक्तंस्वातंत्र्येणनिर्णयमनादृत्यैकदेशवर्तिन्योरप्यष्टमीस्वात
त्र्येणनिर्णयतदव्यवहितयोरेवसप्तमीनवम्योः पूर्वेद्युरन्वष्टक्ययोर्ग्रहणं तथायत्रतुनतादृशंकिंचिदस्तितत्रस्वा
तंत्र्येणेवतत्तत्कर्मयोग्यतावत्तिथिनिर्णयःकर्तव्यः तस्मिंश्चक्रियमाणेतिथिद्वयप्रयुक्तस्यकर्मणस्तंत्रादिनानुष्ठा
नादावृत्त्यावानुष्ठानान्न्यूनसावनदिनव्यापिताधिकसावनदिनव्यापिनावासकृलव्रतप्रयोगस्यभवतुनकापिक्ष
तिः अतएवोक्तंभविष्योत्तरे व्रतीप्रपूजयेद्देवींसप्तम्यादिदिनत्रये द्वाभ्यांचतुरहोभिर्वाह्रासवृद्धिवशात्तिथे
रिति एवंसतियत्केषांचिदीदृशेपिविषयेयथानियमेनसावनदिनत्रयादिव्यापिताभवतितयोपवासादेरनु

ष्ठानंतत्पूर्वविधव्रततुल्यत्वभ्रांत्या अन्यथानवरात्रादिव्रतेष्वपितथानुष्ठानापत्तेः नहितत्रोपवासादिकर्मगतात्रित्वादि
संख्यायेनतथैकदिनेक्रियमाणेषुषोडशप्रेतश्राद्धेषुब्राह्मणभोजनपिंडदानरूपाणांप्रधानानामप्येकदेशकालकर्तृक
त्वादंगवत्प्रसक्तंतंत्रेणानुष्ठानंबाधित्वासंख्याबुद्धिसिध्यर्थंभेदेनानुष्ठानंभवतितथेहापिनिर्णयप्राप्ततिथिबाधेनोद
यास्तमयसत्वप्रयुक्तसाकल्यांगीकारेणप्रधानसंख्याबुद्धिसिध्यर्थंमुख्यतिथ्यंतरायेतुतिथिशेषोपिग्राह्यतामितिवन्नि
र्णयाप्राप्ततिथ्येकदेशेप्यनुष्ठानंस्यात् एवंनानातिथिसाध्यव्रतानांद्वैविध्येस्थितेएतदनुसारेणैवाश्विनशुक्लप्रति
पदमारभ्यतद्गतनवमीपर्यंतंप्रायःसर्वदेशेषुक्रियमाणंयद्दुर्गापूजनात्मकमुत्तरविधाक्रांतंव्रतंतत्रप्रतिपदादिनिर्णयः
क्रियते तत्रव्रतस्वरूपंतावद्भविष्योत्तरे एवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेननक्तेनस्वशक्त्यायाचिते
नवा पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे गृहेगृहेभक्तिपरैर्ग्रामेग्रामेवनेवने स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रि
यैर्नृपैः वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः स्त्रीभिश्चकुरुशार्दूलतद्विधानमिदंशृण्विति विंध्यवासिन्या
मधिष्ठानेदेवीपूजनीयेतिसंभवाभिप्रायेण नतुनियतं स्थानेस्थानेपुरेपुरेगृहेतदसंभवात् देवीपुराणेपि कन्यासंस्थे
रवौशुक्लामाश्विनेप्राप्यनंदिकां अयाचीत्यर्थवैकारीनक्ताशीवाथवाय्वदः भूमौशयीतचामंत्र्यकुमारीर्भोज
येन्मुदा वस्त्रालंकारदानैश्चसंतोष्याःप्रतिवासरं बलिंचप्रत्य दद्यादोदनंमांसमाषवत् त्रिकालंपूजयेद्देवीं
जपस्तोत्रपरायणइति कन्यासंस्थेरवाविति प्रायिकाभिप्रायं एवंकल्पांतरप्रतिपादकदेवीपुराणवाक्येपि इषेमा
स्यसितपक्षेकन्याराशिगतेरवौ नवम्यांबोधयेद्देवींक्रीडाकौतुकमंगलैः ज्येष्ठानक्षत्रयुक्तायांषष्ठ्यांबिल्वाभिमंत्र
णं सप्तम्यांमूलयुक्तायांपत्रिकायाःप्रवेशनं पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं उत्तरेणनवम्यांतुबलि
भिःपूजयेच्छिवां श्रवणेनदशम्यांतुप्रतिपत्त्यविसर्जयेदिति इषइतिपौर्णमास्यंतमासाभिप्रायेण अत्रचोपवासा

दिदेवीपूजाकुमारिकापूजादिबहुकर्माभिधानेपिप्रधानंदेवीपूजनमेवभविष्योत्तरेयुधिष्ठिरकृष्णप्रश्नोत्तररूपेतिहा
सार्थवादेपूजायाएवप्रशंसनात् तत्रतत्रपूजायाएवसफलसंबंधश्रुतेश्च तथाचकालिकापुराणे कृत्वैवंपरमामा
पुर्निर्वृत्तिंत्रिदिवौकसः एवमन्यैरपिसदादेव्याःकार्यप्रपूजनं विभूतिमतुलांलब्धुंचतुर्वर्गप्रदायकमिति पूजयेदि
त्यधिकृत्य भविष्योत्तरेपि भवानीतुष्टयेपार्थसंवत्सरसुखायच भूतप्रेतपिशाचानांनाशार्थंचोत्सवायचेति अन्य
त्रापि पूजयित्वाश्विनेमासिविशोकोजायतेनरइति वर्षेवर्षेविधातव्यंस्थापनंचविसर्जनमिति देवीपुराणेवीप्साश्र
वणाद्योमोहादथवालस्याद्देवींदुर्गांमहोत्सवे नपूजयतिदुष्टात्माद्वेषाद्वाप्यथभैरव क्रुद्धाभगवतीतस्यकामानि
ष्टान्निहंतीति कालिकापुराणेप्रत्यवायश्रवणाच्च पूजायाएवनित्यत्वावगमाच्च शरत्कालेमहापूजाक्रियतेयाच
वार्षिकीतिमार्कंडेयपुराणेपिपूजायाएवनित्यत्वमवगम्यते प्रतिवर्षकर्तव्यत्वार्थमेवहिवर्षेवर्षेभवावार्षिकीतिव्यु
त्पत्यावार्षिकीपदं अन्यथातत्व्यर्थमेवस्यात् देवीपुराणेचोपसंहारोक्तदेवीपूजनेनैवाय्याच्यादिपदानाम
न्वयेनायाचितादिनांकर्तृविशेषणानां क्रतुयुक्पुरुषसंस्कारद्वारांगत्वावगमात् अतएवनिर्णयामृते पूजये
त्प्रयतोदेवींनरोनियममास्थितइतिभविष्योत्तरमुपन्यस्यति यमाश्चदेवीपुराणएवोक्तइत्युक्त्वाकन्यासंस्थइत्या
दिदेवीपुराणमुपन्यस्तं भगवत्यर्चनस्यैवव्रतत्वमुक्तंचरुर्हविष्यंभुंजानाः कात्यायन्यर्चनंव्रतमिति देवीपु
राणेपि शारदींपूजामुपक्रम्यतस्याएवव्रतत्वमुक्तं महाव्रतंमहापुण्यंशंकराद्यैरनुष्ठितं कर्तव्यंसुरराजेंद्रदेवीभ
क्तिसमन्वितैरिति तस्याएवचतंत्रेवान्यद्वारापिकर्तव्यत्वाभिधानेनावश्यकताप्रतीयते स्वयंवाप्यन्यतोवापिपू
जयेत्पूजयीतवेति पूजायाएवचात्रिविधत्वमुक्तंस्कंदभविष्यपुराणयोः शारदीचंडिकापूजात्रिविधापरिगीय
ते सात्विकीजपयज्ञाद्यैर्नैवेद्यैश्चनिरामिषैः माहात्म्यंभगवत्याश्चपुराणादिषुकीर्तितं पाठस्तस्यजपःप्रोक्तः

पंचेद्देवीमनास्तथा राजसीबलिदानेनन्नैवेद्यैःसामिषैस्तथा सुरामासाद्युपहारैर्जपयज्ञैर्विनातुया विनामंत्रैस्तामसी
स्यात्किरातानांतुसंमता ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमानवैः एवंनानाम्लेंछगणैःपूज्यतेसर्वदस्युभिरिति अ
तएवहोमादिरपिपूजात्वमेवोक्तंलिंगपुराणे शारदीयामहापूजाचतुष्कर्ममयीशुभा तांतिथित्रयमासाद्यकुर्याद्भक्त्याविधा
नतइति स्नपनपूजनबलिदानहोमरूपाणिचत्वारिकर्माणि तिथित्रयंसप्तम्यादि अनेनत्रिरात्रकल्पउक्तः इदंचव्रतमा
श्विनशुक्लप्रतिपदमारभ्यतदग्रिमनवमीपर्यंतंकार्यमितिमुख्यःकल्पः कन्यासंस्थेरवौशुक्लशुक्लामारभ्यनंदिकामि
त्यारभ्यमहानवम्यांपूजेयंस्वर्गमोक्षप्रदायिनीत्यंताद्देवीपुराणात् मासिचाश्वयुजेशुक्लेनवरात्रेविशेषतः संपूज्यनव
दुर्गांचनक्तंकुर्यात्समाहितइत्यादिवाक्याच्च अत्रहिनवरात्रशब्दस्याहोरात्रपरस्यतिथिविषयपूर्ववाक्यैकवाक्यत
या औत्सर्गिकसंपूर्णतिथिरेवप्रायोव्यवहारविषयत्वेनसंप्रतिपत्याचतिथिलक्षणत्वात्सप्तम्यंतःकालरूपगु
णविधिः द्वितीयांतोपिवर्कविद्रुतःकालाध्वनोरत्यंतसंयोगइतिवचनात्ताद्दशएव नतुनामधेयं तत्रैवग्रंथेवाक्यांत
रेणप्रवृत्तिनिमित्तभूतकालसंबंधस्याविधानेनतत्प्रक्षेपः तत्रअग्निहोत्रंजुहोतीत्यत्राग्निहोत्रशब्दस्यकर्मनाम
त्वेद्रव्यदेवतयोरभावाद्यागस्यस्वरूपमेवसिध्येत्ततोग्निदेवतारूपोगुणोनेनहविर्होमोविधीयते इत्यग्निहोत्रशब्दो
गुणविधायकइतिप्राप्तेब्रूमः अग्निर्ज्योतिरितिविहितेनमंत्रेणप्राप्तत्वाद्देवतानविधेया ततोग्निसूर्यदेवताक
स्यसायंप्रातर्नियमेनानुष्ठेयस्यकर्मणोग्निहोत्रमित्यग्नयेहोत्रमंत्रेतियौगिकंकर्मनामधेयमिति ननुनामधेय
त्वेज्योतिष्टोमेनयजेतेतिवत्सामानाधिकरण्याय तृतीयापत्तिरितिवाच्यं नैषदोषः अनुष्ठानादूर्ध्वंधात्वर्थस्यसि
द्धत्वाकारेणकरणत्वेपिततःपूर्वंसाध्यत्वाकारंवक्तुमग्निहोत्रमितिद्वितीयायायुक्तत्वादित्यधिकरणार्थसंक्षेपः ८१
संख्यान्यायाभावात् श्रुत्यागुणविधानेसंभवतिबहुव्रीहौसमासांतानुपपत्त्यासमाहारद्विगुत्वेनरात्रिसमुदायवच

165/194

नतयानिरूढयायस्यलक्षणयानामधेयत्वानौचित्यात् नवरात्रोपवासतइत्यत्रकथंचिदुपवाससामानाधिकरण्यसंभ
वेपिप्रधानेनपूजनेनैवैकल्पिकैकभक्तादिनियतदेवीपूजनादिघटितसमुदायेनवासामानाधिकरण्याभावाच्च यत्तु आ
श्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रंवापिकर्तव्यंसप्तम्यादियथाक्र
ममितिवचनेप्रतिपदादिनवमीपर्यंतंनवरात्राख्यंव्रतंकर्तव्यमितिवाक्यार्थंबुध्वाउत्तरार्धेप्रतिपदादिनवतिथिवि
धानात्तत्र स्वन्यायेननवरात्रशब्दस्यनामधेयत्वमुक्तं केनचित्तद्वाक्यार्थापरिज्ञानात् नह्यत्रपूर्वोक्तोवाक्या
र्थः किंतुप्रतिपदादिनवमीपर्यंतंयन्नवरात्रंनवतिथयः तत्रसप्तम्यादियत्त्रिरात्रंतत्रवा अत्यंतसंयोगेनप्रवृ
त्तंदेवीपूजनंकर्तव्यमितिनिरूढप्रायस्यश्रुत्यास्वतोनिश्चितगुणविधित्वत्रिरात्रपदसमभिव्याहारेणविधित्वस्यात्यं
तसंयोगाधिकरणत्ववाचिद्वितीयातस्याग्निहोत्रमित्यादिवद्द्वितीयांतत्वांगीकारेणलक्षणयानामधेयत्वानौचि
त्यात्मीमांसारहस्यानभिज्ञतयातुतस्यतादृशवाक्यार्थभ्रमेणतथाभिधानंनवरात्रसंबंधिव्रतंनवरात्रमितिष
ष्ठीतत्पुरुषरूपेणनवरात्रव्रतशब्देतस्यसामानाधिकरण्याभिधानमपिभ्रमेणैवकर्मधारयत्वकालवाचिनःपूर्वपदस्यलक्षणाप्रसंगा
त्। यत्रनचतिथिह्रासवृध्योर्गुणविध्यसंभवान्नित्यवत्श्रवणविरोधः नामधेयत्वंतुयदाकदाचित्प्रवृत्तिनिमित्तसद्भावेनाप्युपपन्नं
वैश्वदेवशब्दस्येवैकदेशस्यतुमावास्येचत्वारिपर्वाणिवैश्वदेवादीनितत्रप्रथमपर्वण्यष्टौआग्नेयादयोयागविहितास्तेषांसंनि
धाविदमाम्नायतेवैश्वदेवेनयजेतेतितत्राग्नेयादीन्यजेतेत्यनूद्यवैश्वदेवशब्देनदेवतारूपोगुणास्तेषुविधीयते यद्यपिवैश्वदे
वमिक्षायांविश्वेदेवाःप्राप्तास्तथाग्नेय्यां दिषुसप्तस्वप्राप्तत्वाद्विधीयंतेतेष्वग्न्यादिदेवत्याःसंतीतिचेत्तर्हिगत्यभावात्तेषु
विकल्प्यतांनामत्वेतुरूपाभावात्तधिरनर्थकःस्यादितिप्राप्तेब्रूमः उत्पत्तिवाक्यैर्विहितानाग्नेयागानूयजेतेत्यनूद्याष्टानांसंघेवै
श्वदेवशब्दोनामत्वेनोपवर्ण्यतेनचनामोपदेशवैयर्थ्यंप्राचीनप्रवणेवैश्वदेवेनयजेतेत्यादिषुवैश्वदेवशब्देनैकेनाष्टा

ष्टानांसंघस्यव्यवहर्तव्यत्वा तत्रआमिक्षायागविश्वेषांदेवानामित्या प्राततयातत्सह चरितानांछत्रिन्यायेनविश्वेदेवत्वंतस्माडुत्पत्ति
शिष्टेरग्न्यादिभिर्विश्वेदेवानामुत्पन्नशिष्टानांविरोधादनन्वयात्कर्मनामधेयत्वमित्यधिकरणार्थस्तंक्षेपगतदेवतासंबंधेने
तिवाच्यं रात्रिशब्दस्यातिथिपरत्वेनह्रासवृध्योरपितद्गुणविधिसंभवेनाविरोधात् ह्रासितिथिद्वयप्रयुक्तस्यपूजादेस्तंत्रानु
ष्ठानेनवृद्धौचैकतिथिप्रयुक्तस्यप्रक्रांतनियमभंगभयादावृत्त्यानुष्ठानेनसर्वदानवतिथिप्रयुक्तकर्मसत्वात्यद्यपिवृद्धौ
समाप्तिरष्टम्यांह्रासेऽमाप्रातिपन्निशिप्रारंभोनवचंद्यास्तनवरात्रमतोर्थवदितिवदद्भिः कैश्चित्तद्वृद्धिह्रासयोरपि नवाहोरा
त्रसद्भावत्वमुपपादितस्तथाप्यमावास्यारात्रौप्रतिपत्प्रवेशाभावेपिप्रतिपत्प्रभृत्येवारब्धतापचयेनाष्टरात्रोपजने अतिवृध्या
वाष्टम्यहोरात्रिस्पर्शिनवम्यांग्रहित्वादशरात्रोपजनेपूर्वप्रकारस्यावश्यकत्वात् अत्रार्थेमूलाभवोछ्रेपेक्षितः सप्रकारः
तिथिवृद्धौतिथिह्रासेनवरात्रमपार्थकमितितेषामेवोक्तिस्तु नवरात्रमतोर्थवदित्यग्रेभिधानाछंकांतर्गतेतिप्रतीयतेत
स्माद्गुणविधिरेवनवरात्रशब्दोननामधेयं यत्तुक्वचिन्नवरात्राभिधंकर्मनक्तव्रतमितिस्मृतं प्रारंभोनवरात्रस्येत्यादौ
कर्मणिनवरात्रशब्दप्रयोगः सलक्षणया यदिरथंतरसामासोमः स्यादत्यर्तुर्मास्यानिपशुः सोमइत्यादाविवसोमादिश
ब्दस्य अभिधात्वोक्तिरपिप्रतिपादकत्वमात्राभिप्राया स्फुरवेवाजिनंस्फुरासोमइत्यत्रनामातिदेशोक्तिवत् संज्ञासंज्ञिसं
बंधस्यशास्त्रप्रमेयत्वाभावात्तत्क्रमस्यचसामानाधिकरण्यादेरभावस्योक्तत्वात् तस्मान्नवरात्रादिशब्दैः प्रतिपदादिन
वतिथिरूपगुणविधानादत्रव्रतेसमुख्यः कालः अतएवप्रतिपदमारभ्यनवमीपर्यंतं वृध्यापूजाजपकुमारीपूजादिकंक्व
चित्त्वविहितं यदाद्येदिवसेकुर्याच्चंडिकापूजनादिकं द्विगुणंतद्द्वितीयेह्नि त्रिगुणंतत्परेहनि नवतिथिपर्यंतंवृध्यापूजा
जपादिकमित्यादिनाषष्ठ्यादिपक्षोप्युक्तः कालिकापुराणे कल्पांतरे कन्यासंस्थेरवौवत्स शुक्लामारभ्यनंदिकां अयाची
त्वथवैकाशीनक्ताशीत्वथवाब्दवः प्रातःस्नायीजितद्वंद्वः त्रिकालंशिवपूजकः जपहोमसमायुक्तोभोजयेद्वैकुमारिकाः बो ८२

धयेद्बिल्वशाखायांषष्ठ्यांदेवींफलेषुच सप्तम्यांबिल्वशाखांतामाहृत्यप्रतिपूजयेत् पुनः पूजांतथाष्टम्यांविशेषेणसमाचरेत्
जागरंचस्वयंकुर्याद्बलिदानंमहानिशि प्रभूतबलिदानंचनवम्यांविधिवच्चरेत् ध्यायेद्दशभुजांदेवींदुर्गातंत्रेणपूजयेत् विसर्जनंदश
म्यांतुकुर्याद्वैशारदोत्सवे धूलिकर्दमनिक्षेपैःक्रीडाकौतुकमंगलैः भगलिंगाभिधानैश्चभगलिंगप्रगीतकैरितिदेवीपुराणेतुपूर्वक्ष
णनवम्यांदेवीबोधनमुक्तं इषेमास्यसितेपक्षेकन्याराशिगतेरवौ नवम्यांबोधयेद्देवींक्रीडाकौतुकमंगलैः ज्येष्ठानक्षत्रयुक्ता
यांषष्ठ्यांबिल्वाभिमंत्रणं सप्तम्यांमूलयुक्तायांपत्रिकायाःप्रवेशनं पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं उत्तरेणनव
म्यांतुबलिभिःपूजयेच्छिवां श्रवणेनदशम्यांतुप्रणिपत्यविसर्जयेत् यावत्पूर्वापुराकाशंजलवह्निशशिग्रहाः तावच्चचंडि
कापूजाभविष्यतिसदाभुवीति इषइतिपौर्णमास्यंतमासाभिप्रायेण कन्याराशिगतेइतिफलातिशयार्थं नतुतंत्रंतथात्वेउ
पसंहारोक्तनित्यत्वोक्तिविरोधापत्तेः अतएवतत्ततिथीनांतत्तन्नक्षत्रयोगोपिफलातिशयार्थएव स्पष्टमेतदुक्तंलिंगपुरा
णे मूलाभावेपिसप्तम्यांकेवलायांप्रवेशयेत् तथातिथ्यंतरेष्वेवमृक्षेष्वृत्तेफलोच्चयः देवलेनापि तिथिनक्षत्रयोर्योगेद्वयो
रेवानुपालनं योगाभावेतिथिर्ग्राह्यादेव्याःपूजनकर्मणीति सप्तम्यादिपक्षोपिभविष्यपुराणे व्रतीप्रपूजयेद्देवींसप्तम्या
दिदिनत्रयेइति भविष्योत्तरेपि आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रं
वाथकर्तव्यंसप्तम्यादियथाक्रममिति अष्टमीनवम्योरेववादेवीपूजनंकर्तव्यं अष्टम्यांचनवम्यांचजन्ममोक्षप्रदांशिवां
पूजयित्वाश्विनेमासिविशोकोजायतेनरइतिवचनात् प्रावृट्कालेविशेषेणआश्विनेत्वष्टमीषुच महाशब्दोनवम्यांच
लोकेख्यातिंगमिष्यतीतिदेवीपुराणाच्च केवलाष्टमीकेवलनवमीकल्पावुक्तौ कालिकापुराणे यस्त्वेकस्यामथाष्टम्यांन
वम्यांवाथसाधकः पूजयेद्वरदांदेवीमिति ब्रह्मपुराणेपिकेवलाष्टमीपूजोक्ता तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी
प्रादुर्भूतामहाघोरायोगिनीकोटिभिःसह अतोर्थंपूजनीयासातस्मिन्नहनिमानवैः उपोषितैर्धूपदीपैर्वस्त्रैर्माल्यानुलेप

167
194

का०त० नैरिति अयंचोपवासः पुत्रवतोनिषिद्धः उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत् तथातथैवपूतात्माव्रतीदेवींविसर्जयेदिति
८३ कालिकापुराणात् केवलनवमीपूजाभविष्यत्पुराणेप्युक्ता लब्ध्वाभिषेकावरदाशुक्लेचाश्वयुजस्यच तस्मात्सातत्रसंपू
ज्यानवम्यांचंडिकाबुधैरिति भविष्योत्तरेपि नवम्यांतुनवम्यांतुदेवदानवराक्षसैः गंधर्वैरुरगैर्यक्षैः पूज्यतेकिन्नरैरिति उ
पवासोप्यस्यामुक्तः तस्मादियंमहापुण्यानवमीपापनाशिनी उपोष्यातुप्रयत्नेनसततंसर्वपार्थिवैरिति बलिदानंचास्यांवि
शेषतःकर्तव्यं प्रभूतबलिदानंचनवम्यांविधिवच्चरेदितिकालिकापुराणात् एवंप्रतिपदादिषष्ठ्यादिसप्तम्यादिअष्टम्या
दिनवम्यांतकेवलाष्टमीकेवलनवमीरूपः कालविकल्पाः संभवासंभवव्यवस्थितानवरात्रव्रतेसिद्धाः तत्रसर्वेष्वपिप
क्षेषुप्रारंभतिथेःखंडत्वेपूर्वविद्धायामुत्तरविद्धायांवादेवीपूजनरूपंव्रतंप्रारब्धव्यमितिसंशयेकालव्याप्त्यानिर्णयार्थं
तस्यकालोनिर्णेतव्यः तत्रगौडनिबंधेषुतावत्पूर्वाह्णस्तत्कालत्वेनोक्तस्तत्व्याप्त्यैवतिथिनिर्णयःकृतस्तथाहिभवि
ष्योत्तरे प्रातरावाहयेद्देवींप्रातरेवप्रवेशयेत् प्रातःप्रातश्चसंपूज्यप्रातरेवविसर्जयेदिति अतप्रातःशब्दःपूर्वाह्णपरः
पूर्वाह्णेनवपत्रिकाशुभकरीसर्वार्थसिद्धिप्रदा आरोग्यंधनदाकरोतिविजयंचंडीप्रवेशःशुभा मध्याह्नेजनपीडनक्ष
यकरीसंग्रामघोरावहासायाह्नेवधबंधनादिकलहंसर्वक्षतंसर्वदा सप्तम्यामस्तगायांयदिविशतिगृहंपत्रिकाश्री
फलाख्याराज्ञःप्राप्तांगराज्यंजनस्वमखिलंहंतिमूलानुरोधात् तस्मात्सूर्योदयस्थेनरपतिशुभदासप्तमीप्राप्य
देवींभूपालोवेशयेत्तांसकलजनहितांराक्षसर्क्षंविहायेतिज्योतिषवचनानुरोधात् देवीपुराणेपि युगाद्यावर्षवृद्धि
श्च सप्तमीपार्वतीप्रिया रवेरुदयमीक्षंतेनतत्रतिथियुग्मतेति भगवत्याःप्रवेशादिविसर्गांताश्चयाःक्रियाः ति
थावुदयगामिन्यांसर्वास्ताःकारयेद्बुधइतिच यद्यप्येतानिवचनानिसप्तम्यादिदशम्यंतकर्तव्यप्रवेशादिविसर्जनां
तपत्रिकापूजाविषयाणि तथापितैर्विशेषवचनालिखनेनप्रतिपदादिपूजायाअपिपूर्वाह्णे दैविकंकर्मेतिसामान्य ८३

169/1947

वचनेनपूर्वाह्णएवकर्तव्यत्वात्प्रतिपदोपिसप्तमीवदेवनिर्णयस्तेषांसंमतः सामान्यविषयाण्यपिशरत्काले महापूजाक्रियते
याचवार्षिकी साकार्योदयगामिन्यांनतत्रतिथियुग्मतेत्यादीनिनंदिकेश्वरपुराणादिवचनानिगौडनिबंधेषुलिखितानि
कारयेदितिस्वयमशक्तोअन्यद्वारापिकर्तव्यतोक्ता अतएवदेवीपुराणे स्वयंवाप्यन्यतोवापिपूजयेत्पूजयीतवेतिउदय
कालीनतिथेःसविस्तरपूजापर्याप्तत्वेचसंक्षेपपूजायांकालिकापुराणेलिखितं सम्यक्कल्पोदितांपूजांयदिकर्तुंनशक्नु
यात् उपचारांस्तथादातुंपंचैतान्वितरेत्तदा गंधंपुष्पंचधूपंचदीपंनैवेद्यमेवच अभावेपुष्पतोयाभ्यांतदभावेतुभक्तितः
संक्षेपपूजाकथितातथावस्त्रादिकंपुनरिति यातु षष्टिदंडात्मिकापूर्वाह्णव्यापरदिनेत्रिमुहूर्तापिसापूर्वैवसर्वापिग्राह्या पू
र्णत्वात् आदित्योदयवेलाया आरभ्यषष्टिनाडिकाः तिथिस्तुसाहिशुद्धास्यात्सार्वतिथ्योत्थयंविधिरितिनारदीयात्
अकर्मण्यंतिथिमलमित्युक्तत्वाच्चेतिदाक्षिणात्यपाश्चात्यादिनिबंधेष्वप्याधुनिकेषुपूर्वाह्णेदैविकंकर्मेत्यादिसामा
न्यवचनेभ्यः आश्विनस्यसितेपक्षेप्रतिपत्सुयथाक्रमं स्नात्वातस्मिलतेनपूर्वाह्णेपूजयेच्छिवामित्यादिविशेषवच
नेभ्यश्चपूजारूपस्यप्रधानस्यपूर्वाह्णकालिकत्वमंगीकृत्यखंडाप्रतिपद्द्वितीयाविद्धैवग्राह्येत्युक्तं कर्मणोयस्ययः
कालइत्यादिसामान्यवचनात् विशेषवचनानिचोत्तरविद्धाविधायकानिपूर्वविद्धानिषेधकानिचस्पष्टानिबहूनिलि
खितानि याचाश्वयुजमासस्यप्रतिपद्भद्रयान्विता शुद्धाममार्चनंतस्यांशतयज्ञफलप्रदं देशभंगोभवेत्तत्रदुर्भिक्षं
चोपजायते नंदायांदर्शयुक्तायांयत्रस्यान्ममपूजनं तस्माद्भद्रान्वितानंदानवरात्रेप्रशस्यते आश्विनेमासिमेभक्तैः
कर्तव्याशुभपक्षगा प्रतिपत्त्रिमुहूर्तापिपुत्रपौत्रप्रवर्धिनी धनवृद्धिकरीपुंसांसर्वसौख्यकरीतथा अतोन्यथानकर्तव्या
नवरात्रव्रतेमम योन्यथाकुरुतेद्रोहाद्राजापूजाविधौमम तस्यराष्ट्रेप्रजानाशंकरिष्यामिनसंशयः सामयासहिताग्रा
ह्यानकदाचिद्विचक्षणैः सर्वक्षयकरीयस्मात्तस्मात्तांपरिवर्जयेत् अमावास्यायुतांकुर्याद्यदिकश्चित्कदाचन राज्य

का०त
८४

नाशमवाप्नोतिपंचत्वंचाधिगच्छति पूर्वविद्धातुयाशुक्ला भवेत्प्रतिपदाश्विनी नवरात्रव्रतंतस्यांनकार्यंशुभमिच्छतेत्या
दीनि यथाद्वादशभिर्मासैर्मासोद्वंद्वोमलिम्लुचः तथातिथिस्त्वहोरात्राद्वृद्धोप्रोक्तामलिम्लुचा यथामलिम्लुचःपूर्वोदे
वोमासस्तथोत्तरः स्याज्यातिथिस्तथापूर्वाग्राह्योदैवतथोत्तरेत्या॥दीनिचसामान्यवाक्यान्युपोद्बलकत्वेनोपन्यस्तव्या
नि माधवहेमाद्रिप्रभृतिभिस्तत्प्रामाणिकैर्महद्भिर्निबंधकृद्भिर्नवरात्रव्रतस्यनक्तव्रतत्वमुक्तं तच्चनक्तभोजनरूप
त्वात् तस्यपाक्षिकत्वादंगत्वाच्च किंतुरात्रिपर्यायनक्तकालसाध्यत्वात् तच्चनिशिभ्रमंतिभूतानिशक्तयःशूलभृद्य
तइत्यादिसामान्यवचनेनाश्विनेमासिमेघांतेमहिषासुरमर्दिनीं निशासुपूजयेद्भक्त्यामासोपवासादिकःक्रमात्
तथा आश्विनेमेघांतेप्रतिपद्यातिथिर्भवेत् तस्यांनक्तंप्रकुर्वीतरात्रौदेवींचपूजयेत् तथा मासिचाश्वयुजेशुक्लेन
वरात्रेविशेषतः संपूज्यनवदुर्गांचनक्तंकुर्यात्समाहितः नक्तंनक्तभोजनमितिपाक्षिकनक्तभोजनपरामर्शः तथा
रात्रिव्रतमिदंदेवीसर्वपापप्रणाशनं सर्वकामप्रदंनृणांसर्वशत्रुनिबर्हणं तथा रात्रिव्रतमिदंतस्यरात्रौकर्तव्यतेष्य
ते इत्यादिदेवीपुराणादिवचनेभ्यश्चावगम्यते यद्यपिचैतानिवचनानिनमाधवादिभिर्लिखितानि तथाप्याश्विनेत्या
दिपूर्वाह्णकालवचनस्यतदुपजीविनांचद्वितीयाविद्धग्राह्यत्ववचनानामपितैरलिखितत्वादेतेषामेवतुतदीयन
क्तव्रतत्वोक्तिसंवादित्वादेतानितैर्दृष्टानीतिगम्यते अन्यथातेषांतदुक्तेर्निर्मूलत्वापत्तेः अत्यंताप्रयोगाभावाच्चते
षामलिखनंदेवीपूजाप्रकारविशेषकुमारीपूजाबलिदानादिवचनवत् रात्रिशब्देनलक्षणयातिथ्युपादानस्यापीदमे
वप्रयोजनंयद्रात्रिकालत्वसिद्धिः अतएवाष्टमीपूजारात्रावेवविहिता निशायांपूजितादेवीविष्णवीपापनाशिनी
तस्मात्सर्वप्रयत्नेन अष्टम्यांनिशिपूजयेदिति कन्यासंस्थेरवावीषियाशुक्लातिथिरष्टमी तस्यांरात्रौपूजितव्या ८४
महाविभवविस्तरैरितिच यत्तु अतोर्थेपूजनीयासातस्मिन्नहनिमानवैरिति तत्राहःपदंनसूर्योदयास्तमयांतव

171/1942

र्तिकालरूपदिवसपरंकिंतुतिथिरूपचांद्रदिनपरं तस्मिन्नितिप्रकृताष्टमीपरामर्शात् यद्यपिचदेवीपुराणेकालत्रयेपूजन
मुक्तं त्रिकालंपूजयेद्देवींजपस्तोत्रपरायणइति तथापिप्रातर्मध्याह्नयोःसंक्षेपपूजनमंगंविस्तरपूजनंतुप्रधानभूतंरात्रा
वेवेतिद्रष्टव्यं एवंसतियत्प्रातरेवकलशस्थापनादिपूर्वकंदेवीस्थापनंशिष्टानांपूर्वाह्णेपूजयेच्छिवामित्याधुनिकलिखि
तंवचनंच तत्सर्वंप्रथमकालपूजार्थमुपपन्नमेव तिथिनिर्णयस्तुप्रामाणिकोक्तनक्तव्रतत्वबलेनप्रधानपूजनस्यप्र
दोषकालत्वमंगीकृत्यैवकर्तव्यइतिममभतिः यद्यपिचसर्वरात्रिःपूजाकालत्वेनश्रुता तथापिप्रथमातिक्रमेकार
णाभावात्समभिव्याहृतनक्तभोजनानुरोधाच्चप्रदोषव्यापिनीग्राह्यातिथिर्नक्तव्रतेसदेतिवचनस्यचभोजनात्म
कनक्तव्रतइवात्रापिप्रवृत्तेश्चप्रदोषएवतत्कालः तत्रयदाप्रतिपदःखंडत्वंतदाषट्पक्षकर्मकालसंबंधपक्षेषुदिनद्व
येकृत्स्नकर्मकालव्याप्तौद्वितीयदिनएवव्याप्त्येकदेशेनवातत्संबंधेदिनद्वयेपिसाम्येनवैषम्येणवातदेकदेशस्प
र्शेचसंकल्पप्रभृतित्रिकालपूजाकालव्याप्तिलाभात्त्रिसंध्यव्यापित्वाच्चोत्तराग्राह्यत्वस्यनक्तन्यायेनासंदि
ग्धत्वात्पूर्वदिनएवकर्मकालसंबंधःदिनद्वयेपितदस्पर्शइत्यनयोःपक्षयोःकस्यचिद्विशेषस्यवक्तव्यत्वात्तत्र
त्यप्रतिपन्निर्णयःक्रियते तत्रद्वितीयदिनेऽस्तमयात्पूर्वंसमाप्त्यापूर्वदिनएवव्याप्त्येकदेशेनयागकालव्यागेपू
र्वविद्धाग्राह्या कर्मणोयस्ययःकालइत्यादिवचनान्नक्तव्रतेषुसर्वेषुरात्रियोगःशस्यतेइत्यादिवचनात् प्रतिपद्यप्य
मावास्येतियुग्मवाक्याच्च एवंचपूर्वदिनेपिसत्वेस्वल्पतरापूर्वा एतद्विषयाण्येव अमायुक्तैवकर्तव्याप्रतिपच्चंडिकार्चनइत्या
धुनिकनिबंधलिखितानिवाक्यानि नचपूर्वदिनकर्तव्यतायामाद्यास्तुनाडिकास्त्याज्याःषोडशद्वादशापिवा अप
राह्णेचकर्तव्यंशुद्धसंततिकांक्षिभिरित्येतद्वाक्यविहितनाडीत्यागानुपपत्तिः रात्रिरूपायतोदेविदिवारूपोमहेश्वरः
अतःसंधौतयोःपूजेतिप्रदोषएवपूजोपक्रमविधानादितिवाच्यं आधुनिककिंचिद्ग्रंथलिखितस्यास्यवचनस्यत

140763

त्र्यंशलिखितेनैव आद्याः षोडशनाडीस्तुलब्ध्वायः कुरुतेनरः कलशस्थापनंतत्र अरिष्टंजायतेध्रुवमितिवचनेनैक
वाक्यतया अपराह्णसमभिव्याहारेणचकुलाचारप्राप्तापराह्णिककलशस्थापनविषयत्वात् अतएवपूर्वदिनेचित्राँवैधृ
तिसत्वेपिनदोषः आरभ्यनवरात्रंस्याद्धित्याचित्रांवैवैधृतिमित्यस्यापिकचिल्लिखितस्यवचनस्यत्वाद्वैवैधृति
युक्ताचेत्प्रतिपच्चंडिकार्चने तयोरंतेविधातव्यंकलशारोपणंगृहेतितत्रस्यवाक्यांतरवशात्पूर्वोक्तविषयत्वात्
तिथिराज्योःप्राधान्यात्संभवविषयत्वाद्वा पूर्वदिनेप्रदोषादूर्ध्वंप्रवृत्त्याद्वितीयदिनेचास्तमयपर्यंतंसत्वेनदिनद्व
येप्रदोषास्पर्शेपूर्वैवग्राह्या गौणकालव्यापित्वात् स्वकालादुत्तरःकालोगौणःपूर्वस्यकर्मणइतिप्रदोषोत्तरकाल
स्यगौणत्वात् नक्तव्रतेषुसर्वेषुरात्रियोगःप्रशस्यतइतिवचनाच्च यद्यपिप्रदोषेभोजनात्मकनक्तव्रतेप्रदोषपूर्वभा
विनःसायाह्नस्यतद्गौणकालत्वंतद्व्यापिन्याश्चोत्तरस्याएवैवंविधेविषयेतत्रग्राह्यत्वमुक्तं तथापियथातेत्रैतद
र्थप्रतिपादकंप्रदोषव्यापिनीतस्याद्दिवानक्तंविधीयते आत्मनोद्विगुणछायामंदीभवतिभास्करे तन्नक्तंनक्तमित्या
हुर्ननक्तंनिशिभोजनं एवंज्ञात्वाततोविद्वान्सायाह्नेतुभुजिक्रियां कुर्वन्नक्तव्रतीनक्तफलंभवतिनिश्चितमितिव
चनमस्तिनैवंविधमात्रेति रात्रौदेवींचपूजयेदितिवचनान्मुख्यतयैवनक्ताद्यनुरोधेनवाप्रदोषस्यकर्मकालत्वेगौ
णतयाप्रदोषोत्तरकालएवात्रकालःपूजाद्यनुष्ठानोपक्रमस्तु तत्रापिप्रदोषएवतिथिःप्रदोषास्पर्शेपि एकभक्ताद
िवतिथेदिनद्वयेदिनद्वयेपिमध्याह्नाद्यस्पर्शेत्विमध्याह्नेद्वौ यद्यपिचतद्दवत्रसूर्योदयास्तमयवर्तित्वप्रयुक्तति
थिसाकल्याषादितंतत्कालतिथिःसत्वंनास्ति उदयवाक्येनतदुत्तरभाव्यस्तमयपर्यंतंसत्वद्रूपस्यास्तमयवाक्येन
चतत्पूर्वभाव्युदयपर्यंतसत्वद्रूपस्यैवसाकल्यबोधनात् तथापितिथ्यादिषुभवेद्यावानिति वचनबोधितपूर्वति
थ्यधिकरणकोत्तरतिथिक्षयप्रक्षेपप्रयुक्तंतत्संभवत्येव कर्मसमापनेतुमुख्यातिथिसत्तांप्रतीक्ष्यापिक्रियमाणेन ८५

173
1942

दोषः पाक्षिकनक्तभोजनरूपस्यांगस्यप्रधानानुरोधेनचगौणकालेप्यनुष्ठानात् सर्वदाप्यत्रतन्मुख्यकालस्यप्रधानेना
नुरोधेनतस्यतथैवानुष्ठानाच्च एवमनेनन्यायेनोभयेद्युःप्रदोषास्पर्शेत्विपूर्वैवतियद्यपिप्रतिभातितथापिसाधवादिभि
र्नक्तव्रतत्वमात्राभिधानाद्विशेषानभिधानाच्चात्यंतभोजनात्मकनक्तव्रतसाम्यप्रतीतेर्नवरात्रव्रतेप्येतादृशीउत्तरैवप्रा
ह्या अत्रापिसायाह्नस्यैवगौणकालत्वात् प्रदोषव्यापिनीयत्रत्रिमुहूर्तादिवातथा तदानक्तव्रतंकुर्यात्स्वाध्यायस्य
निषेधवदित्यस्ययथाक्रमंमुख्यगौणकालावेदकस्यभोजनात्मकनक्तव्रतइवात्रापिप्रवृत्तेरुपपत्तेः समापनंत्वत्रप्र
धानपूजायाःसायाह्नस्यापितत्कालत्वोक्तिबलात्तद्वर्तितिथावुपक्रम्यप्रदोषएवकर्तव्यं तस्यारात्रिसंबंधस्यावश्य
कर्तव्यत्वात् सायाह्नेतुभुजिक्रियामितिवदत्रवचनाभावाच्चतिथ्यभावेपितत्तिथिकृत्यसमापनस्वचयोयस्यविहितः
कालःकर्मणस्तदुपक्रमे विद्यमानोभवेदंगंनाजितापत्रमेणात्वित्येतत्प्रयुक्तनिर्णयविषयेदृष्टत्वात् उदयवाक्योदय
स्योदयत्वसामान्योपस्थितद्वितीयसूर्योदयपर्यंतसाकल्यबोधकत्वेनतत्प्रयुक्ततत्कालीनतत्तिथिसत्वस्यापि
वक्तुंशक्यत्वाच्च संकल्पपूर्वाह्णमध्याह्नपूजाकालव्याप्तिलाभादयश्चबहवोगुणाउत्तरस्यामितिसैवयुक्ता एवंप्रामा
णिकनिबंधकालोक्तनक्तव्रतत्वानुरोधेनपूर्वेद्युरेवप्रदोषव्याप्तौदिनेसत्वेपितत्रसत्वेस्फुतरांदर्शयुक्तायाएवप्रति
पदोनवरात्रव्रतग्राह्यत्वेन्याय्योयदिदानींतनानांकेषांचिद्दाक्षिणात्यानांनक्तव्रतत्वापह्नवेनअमायुक्तानकर्त
व्याप्रतिपत्स्वजनेमम मुहूर्तमात्राकर्तव्याद्वितीयादिगुणान्वितेत्यादिक्वाप्यदृश्यवचनपुरस्कारेणत्रिमुहूर्तदर्शयुक्ता
महोरात्रव्यापिनीमपिप्रतिपदमुल्लंघ्यमुहूर्तमात्रापिद्वितीयायुक्तैवसाग्राह्येतिनिर्णयकरणंतादृशमेवचानुष्ठानप्रवर्त
नंतत्साहसमात्रं एवंनिर्णीतायांप्रतिपदिपूर्वाह्णेकृतमंगलस्नानोयजमानोनित्यक्रियांकृत्वाअद्यप्रभृतिनवमीपर्य
तंउपवासाद्यन्यतरनियमोपेतोदुर्गापूजनममुकफलकामःकरिष्यइतिसंकल्प्य शुभदारुमयेदेवीपूजार्थमेवनि

मिति कदलीस्तंभादिमंडितेगृहेउत्तमवस्त्रादिभूषितेपूर्वप्रहस्ववाचतुश्चतुरस्त्रम्चतुर्हस्तंवेदिकोपरिसर्वतोभद्रादि
 मंडलंविधायमृन्मयादिप्रतिमांतन्मध्यस्थापितेआसनेतदग्रेकलशंविधिनास्थापयित्वासौवर्णादिप्रतिमांतुमंडलम
ध्यस्थापितकलशोपर्यवस्थापयित्वापूजयेत् पूज्यामंडलकुंभस्थेतिदेवीपुराणात् प्रतिमाचहेमादिमयीभवतितस्मि
न्नदिनेप्रकर्तव्याहेमीवाराजतीतथा मृद्धार्क्षीलक्षणोपेताखड्गेशूलेथपूजयेत् तथा हेमराजतमद्वातुशैलचि
त्रार्पितापिवा खड्गेशूलेर्चितादेवीसर्वकामफलप्रदा तथामृन्मयीप्रतिमांकृत्वाविल्वेवायस्तपूजयेत् आत्म
वित्तानुसारेणसलभेन्मौलिकंफलमित्यादिदेवीपुराणवचनात् प्रतिमालक्षणंचमत्स्यपुराणे जटाजूटसमायु
त्र क्तामर्धेन्दुकृतलक्षणां लोचनत्रयसंयुक्तांपद्मेंदुसदृशाननां अतसीपुष्पवर्णाभांसुप्रतिष्ठांसुलोचनां नवयौव
यौवनसंपन्नांसर्वाभरणभूषितां सुचारुवदनांतद्वत्पीनोन्नतपयोधरां त्रिभंगस्थानसंपन्नांमहिषासुरमर्दिनीं
त्रिशूलंदक्षिणेदद्यात्खड्गंचक्रंक्रमादधः तीक्ष्णबाणंतथाशक्तिंवामतोपिनिबोधत खेटकंपूर्णचापंचपा
शमंकुशमूर्ध्वतः घंटांवापरशुंवापि वामतःसन्निवेशयेत् अधस्तान्महिषंतद्वद्विशिरस्कंप्रदर्शयेत् शिरश्छेदो
द्भवंतद्वद्दानवंखड्गपाणिनं हृदिशूलेननिर्भिन्नंनिर्यदंत्रविभूषितं रक्तरक्तीकृतांगंचरक्तविस्फारितेक्षणं वेष्टि
तंनागपाशेनभ्रुकुटीभीषणाननं सपाशंवामहस्तेनधृतकेशंचदुर्गया वमद्रुधिरवक्त्रंचदेव्याःसिंहंप्रदर्शयेत्
देव्यास्तुदक्षिणंपादंसमंसिंहोपरिस्थितं किंचिदूर्ध्वंतथावामम्अंगुष्ठंमहिषोपरि स्तूयमानंचतद्रूपममरैःसन्नि
वेशयेदिति आवाहनपूर्वभाविध्यानमप्येवमेवकार्यं आवाहनमंत्रश्च एहिदुर्गेमहाभागेरक्षार्थंममसर्वदा
आवाहयाम्यहंदेवीसर्वकामार्थसिद्धये अस्यांमूर्तौसमागच्छस्थितिंमत्कृपयाकुरु रक्षांकुरुसदाभद्रे विश्वेश्व
रिनमोस्तुतेइति एवंमंत्रपाठानंतरंभगवतिदुर्गेइहागच्छइहतिष्ठइहसंनिधेहिइहस्थिराभवसुप्रसन्नाभवेत्यपि ८६

175
195

पठंति पूजांगप्रतिष्ठाप्रकारश्चजन्माष्टमीप्रकरणोक्तोद्रष्टव्यः वेदिकोणेषुचत्वारःकलशाविधिनास्थाप्याः चतुरःक
लशातयस्तुदद्याद्देवगृहेनरः चतुःसमुद्रवलयासतुभुंक्तेवसुंधरामिति विष्णुधर्मोत्तरात् पूजामंत्रश्चजयंतीत्या
दिःकुर्याद्देव्यास्तुमंत्रेणेत्यभिधाय जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधान
मोस्तुते अनेनैवतुमंत्रेणजपहोमादिकारयेदितिदेवीपुराणात् दुर्गालिंगकोवैदिकआगमिकोवा तल्लिंगैःपूजयेन्मं
त्रैःसर्वदेवान्समाहितइत्यग्निपुराणात् प्रणवादिचतुर्थ्यंतंनमोंतंनामवा नाम्नासर्वंसमापयेतिसाधारणवाक्यात्
पूजाचषोडशोपचारैःपंचोपचारैर्वाअन्यैश्चराजोपचारैःछत्रचामरादिभिः साचत्रिकालंप्रदोषविशेषेण पूजोप
करणानिचगंधपुष्पधूपदीपनैवेद्यफलादीनिदेवीपुराणादिषूक्तानि पूजानंतरंचमार्कंडेयपुराणादिगतंदेवीमहात्म्यं
पठेच्छृणुयाद्वा माहात्म्यंभगवत्यास्तुपुराणादिषुकीर्तितं पठेच्चशृणुयाद्वापिसर्वकामसमृद्धयेइतिवचनात् पाठा
दिकंचनसकृदेवकिंतुफलभूमार्थिनोऽसकृदपि अन्यत्रतथादर्शनात् संकल्पितस्तोत्रपाठसंख्यांकृत्वापठेत्सु
धीरितिवाराहीतंत्र वचनाच्च आवृत्तिसंख्याभेदेनफलभेदश्चतत्रैवोक्तः चंडीपाठफलंदेविशृणुष्वगदतोम
म एकावृत्त्यादिपाठानांयथावत्कथयामिते संकल्पपूर्वंसंपूज्यतस्यांगेषुमनूंस्सकृत् पाठाद्बलिप्रदानाच्चसिद्धि
माप्नोतिमानवः उपसर्गोपशांत्यर्थंत्रिरावृत्तंपठेन्नरः ग्रहोपशांतौकर्तव्यंपंचावृत्तंवरानने महाभयेसमुत्पन्नेस
प्तावृत्तंसमुन्नयेत् नवावृत्त्याद्भवेच्छांतिर्वाजपेयफलंलभेत् राजवश्यायभूत्यैवरुद्रावृत्तमुदीरयेत् एकावृत्ते
काम्यसिद्धिर्वैरहानिश्चजायते मन्वावृत्त्याद्रिपुर्वश्यस्तथास्त्रीवश्यतामियात् सौख्यंपंचदशावृत्त्याश्रियमाप्नो
तिमानवः कलावृत्त्यापुत्रपौत्रधनधान्यागमंविदुः राज्ञांभीतिविमोक्षायवैरस्योच्चाटनायच कुर्यात्सप्तदशावृ
त्तंतथाष्टादशकंप्रिये महारणविमोक्षायविंशावृत्तंपठेत्सुधीः पंचविंशावर्तनात्तुभवेद्बंधविमोक्षणं संकटेसमनु

प्राप्तेदुःस्वप्नेविकृतेसमयेतथा ज्ञातिध्वंसेकुलोच्छेदे आयुष्यनाशमागते वैरिवृद्धौव्याधिवृद्धौधननाशेतथाक्षये तथै
वत्रिविधोत्पातेतथाचैवातिपातके कुर्याद्यत्नाछताव्रत्तंततःसंपद्यतेशुभं श्रेयोवृद्धिःशतावृत्ताद्राज्यवृद्धिस्तथा
परा मनसाचिंतितंदेवीसिध्येदष्टोत्तरावृतात् शताश्वमेधयज्ञानांफलमाप्नोतिसुव्रते सहस्रावर्तनाल्लक्ष्मीरावृणो
तिस्वयंस्थिता भुक्त्वामनोरथान्कामान्नरोमोक्षमवाप्नुयात् यथाश्वमेधःक्रतुराट्देवानांचयथाहरिः स्त
वानामपिसर्वेषांतथासप्तशतीस्तवः अथवाबहुनोक्तेनकिंमेतेनवरानने चंड्याःशतावृत्तपाठात्सर्वाःसिध्यं
तिसिद्धयइति श्रवणंब्राह्मणादेवकर्तव्यंब्राह्मणंवाचकंविद्यान्नान्यवर्णजमादरात् श्रुत्वान्यवर्णजाद्वरा
जन्वाचकान्नरकंव्रजेदितिभविष्यत्पुराणात् सचैवंगुणयुक्तः विस्पष्टमद्रुतंशांतंस्पष्टाक्षरपदंतथा कलस्व
रसमायुक्तंरसभावसमन्वितं बुध्यमानःसदात्वर्थंग्रंथार्थंकृत्स्नशोनृप ब्राह्मणादिषुसर्वेषुग्रंथार्थंचार्पये
न्नृप यएवंवाचयेद्ब्रह्मन्सविप्रोव्यासउच्यतेइति पौराणस्तोत्रपाठश्चस्वार्थंपरार्थंवानारायणादीन्नमस्कृत्य
कर्तव्यः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरयेदितिवचनात् जयशब्दार्थ
श्चभविष्यत्पुराणे अष्टादशपुराणानिरामस्यचरितंतथा विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत कार्ष्णं
चपंचमोवेदोयन्महाभारतंस्मृतं शैवाश्चधर्मराजेंद्रमानवोक्तामहीपते जयेतिनामएतेषांप्रवदंतिमनीषिण
इति पाठप्रकारश्चमत्स्यसूक्ते प्रणवंचादौजप्त्वाचस्तोत्रंवासंहितांपठेत् अंतेचप्रणवंदद्यादित्युवाचा
दिपूरुषः सर्वत्रपाठेविज्ञेयोह्यन्यथाविफलंभवेत् शुद्धेनानन्यचित्तेनपठितव्यंप्रयत्नतः नकार्यासक्तम
नसाकार्यंस्तोत्रस्यवाचनं आधारेस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः हस्तसंस्थापनादेवयस्मादल्पफलं
भवेत् स्वयंचलिखितंयत्तुकृतिनालिखितंतुयत् अब्राह्मणेनलिखितंतच्चापिविफलंभवेत् सप्तिछंदा ८७

177
154

च्छिन्नंस्यपठेत्स्तोत्रंविचक्षणः स्तोत्रंनदृश्यतेयत्रप्रणवन्यासमाचरेत् संकल्पितेस्तोत्रपाठेसंख्यांकृत्वापठेत्सुधीः अध्यायंप्राप्यविरमेन्नतुम
ध्येकदाचन कृतेविरामेमध्येतु अध्यायादिपठेत्पुनः इति दुर्गामंत्रंवावैदिकमागमिकंवाजपेद्वाजापयेद्वा दुर्गाग्रतोजपेन्मंत्रमेकचित्तःस
माहितइतिदेवीपुराणात् कुमारीपूजनंचप्रत्यहंयथाशक्तिएकद्व्यादिक्रमेणवाकर्तव्यं तत्प्रकारश्चदेवीपुराणे ब्रह्मोवाच नतथातुष्य
तेशक्रहोमदानजपेनतु कुमारीभोजनेनात्रयथादेवीप्रसीदति अत्रनवरात्रे पितरोवसवोरुद्राआदित्यालोकपालकाः सर्वेतिपूजिता
स्तेनकुमार्यायेनपूजिताः शुक्लाष्टमीचतुर्दश्योर्नवम्यांचविशेषतः कृष्णपक्षेविशेषेणभोजयेत्तुकुमारिकाइतिप्रसंगादन्यत्रापि
तद्विधानं प्रक्षाल्यपादौसर्वासांकुमारीणांचवासव कल्पितेभूतलेरम्येतत्रताआसनेस्थिताः पूजयेद्गंधपुष्पैश्चस्रग्भिश्चापिम
नोरमैः पूजयित्वाविधानेनभोजनंतापादयेत् खंडलड्डुगुडंसर्पिर्दधिक्षीरंसमाक्षिकं तासांदेयंकुमारीणांशनैर्भुंजापयेत्तुताः
पानीयंयाचितंदेयं अन्नंवायाचितंशुभं तास्तृप्तास्तुयदासर्वास्तदास्वाचमनंददेत् आचम्याचाक्षतांदत्वात्वियाक्षतव्यमि
त्युत दातुःशिरसिदातव्याःकन्यकाभिस्थाक्षताः तेनापिप्रणिपातस्तुकर्तव्योभक्तिपूर्वकः अनेनविधिनाशक्रदेवीक्षिप्रंप्रसी
दति ददातिविविधान्कामान्मनोभिष्टान्सुराधिप राज्यंकृत्वाततःपश्चाद्देवलोकंचगच्छतीति पूजांतेचप्रणम्यदेवींप्रार्थयेदने
नमंत्रेण महिषघ्निमहामाये चामुंडेमुंडमालिनी द्रव्यमारोग्यविजयंदेहिदेविनमःसदा भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहे
श्वरी देवेभ्योमानुषेभ्यश्चयक्षेभ्योरक्षसांसदा सर्वमंगलमंगल्येशिवेसर्वार्थसाधिके शरण्येत्र्यंबकेगौरीनारायणिनमोस्तु
ते रूपंदेहियशोदेहिभगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामान्प्रदेहिमे देवीगृहेचघृतपूरितास्तिलतैलपूरितावा
दीपाअहोरात्रंप्रज्वालनीयाः वाद्यादिवादनंचकारणंकारणीयं गीतवादित्रनिर्घोषंदेवस्याग्रेचकारयेत् घंटाभवेदशक्तस्य
सर्ववाद्यमयीतद्वदितिमत्स्यपुराणात् यद्यपिचकन्यासंस्थेरवौशुक्लशुक्लामारभ्यचंडिकां अयाचीत्वर्थवैकाशीनक्ताशीवाथवा
स्वदः प्रातस्नायीजितद्वंद्वस्त्रिकालंशिवपूजकः जपहोमसमायुक्तःकन्यकाभोजयेत्सदेतिदेवीपुराणेप्रतिपदाद्युपक्रमात्सदे
तिवचनाच्चपूजाजपादिवद्धोमोपिप्रत्यहंकर्तव्येनोक्तस्तथापिब्रह्मपुराणेतत्राष्टम्यांभद्रकालीत्युपक्रम्यहोमेब्राह्मणतर्पणा
त्यष्टमीकृत्यमध्येभिधानान्नवम्यांवालिदानंचकर्तव्यंवैयथाविधिजपहोमंचविधिवत्कुर्यात्तत्रविभूतयइतिकालिकापुराणेचन

को०त० नमीद्धत्यमध्येभिधानाच्छिष्टसमाचाराच्चोभयतिथिसंबंधेननवम्यामेवहोमः कर्तव्यः शिवश्चशिवाचशिवोतयोः पूजकः देवीपूजात्मकत्वा
८८ दव्रतस्य अत्रचदेवीपुराणेनंदाप्रतिपदेवप्रथमोपस्थितत्वात् अयाचितादीनांनियमानांवाशब्दश्रवणाद्यथासंख्यासंभवाच्चसर्वदा
विकल्पः पूर्वलिखितकालिकापुराणेतुपत्रिकापूजायाः षष्ठ्यादित्वात्षष्ठ्येवनंदा अयाचितादीनांचयथासंख्यमन्वयः अथशब्द
श्रावणात्संभवाच्च बलिदानंत्वष्टमीनवम्योरेव पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत् जागरंचस्वयंकुर्याद्बलिदानंमहानिशि
प्रभूतबलिदानंचनवम्यांविधिवच्चरेदितिकालिकापुराणात् यद्यपिचदेवीपूजायांब्राह्मणानामप्यधिकारः कर्तव्यंब्राह्मणाद्यै
स्तुक्षत्रियैर्लोकपालकैः गोधनार्थंतथावैश्यैः शूद्रैःपुत्रसुखार्थिभिः सौभाग्यार्थंतथास्त्रीभिरन्यैश्चधनकांक्षिभिः महाव्रतंमहापुण्यंशंक
राद्यैरनुष्ठितं कर्तव्यंसुरराजेंद्रदेवीभक्तिसमन्वितैरितिदेवीपुराणात् स्नातैःसमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः वैश्यैःशूद्रैर्भक्ति
युक्तैर्म्लेच्छैरन्यैश्चमानवैरितिभविष्योत्तराच्च तथापियथासुरयास्वगात्ररुधिरेणचपूजाब्राह्मणस्यनभवतिस्वगात्ररुधिरंदत्वाब्रह्मह
त्यामवाप्नुयात् मद्यंदत्वाब्राह्मणस्तुब्राह्मण्यादेवहीयतइतिकालिकापुराणात् मद्यमपेयमदेयमनिर्ग्राह्यमित्युशनोवचनाच्च त
थापशुबलिदानमांसनैवेद्यपूजापितस्यनभवति तस्याराजसीबलिदानैर्नैवेद्यैःसामिषैस्तथेतिराजसत्वात् ब्राह्मणस्यचसात्वि
ककर्मस्वेवाधिकारस्यभगवद्गीतादिषुप्रसिद्धत्वात् तेनसात्विकीजपयज्ञाद्यैर्नैवेद्यैश्चनिरामिषैरितीयमेवभवति स्पष्टमेवच कन्या
संस्थरवौशक्रेत्यादिनादुर्गाग्रतोजपेन्मंत्रमेकचित्तःसमाहितइत्यंतेनसर्वसाधारणपूजाप्रकारमभिधायतदर्धयामिनीशेषेविजयार्थंन
पोत्तमः पंचाब्दंलक्षणोपेतंगंधधूपस्रगर्चितं विधिवत्कालिकालीतिजप्त्वाखड्गेनघातयेदितिपशुबलिदानादिराजकृत्यत्वेनैवदेवी
एवंराजवरे पुराणेभिहितं एवंचपशुघातःप्रकर्तव्योगवलाजवैधस्तथा तथादेवींतुपूजयित्वायेअर्धरात्रेष्टमीषुच घातयंतिपशून्भक्त्यातेभवंति
महाबलाः बलिंचमेप्रयच्छंतिसर्वभूतविनाशनं तेषांतुतुष्यतेदेवीयावत्कल्पंतुशांकरमित्यादियावत्किंचिन्नानापशुघाततद्बलिदान
विधानंशिष्टपरिगृहीतकालिकादेवीपुराणादिगतंतदग्नीषोमीयादिपशुहिंसान्यायेनधर्म्यमपिक्षत्रियादिविषयमेवेतितत्प्रकारा
नलिख्यंते अतएवविस्तरभियाचाश्वादिपूजाविधिरपिनलिख्यते माषभक्तादिनातुबलिदानंब्राह्मणस्यभवति माषकुल्माषयुक्तं
सार्धंदेयादिक्षुबलिर्निशि कूष्मांडमिक्षुदंडश्चमद्यमासवएवच एतेबलिसमाज्ञेयास्तृप्तौछागसमामताइतिकालिकापुराणात् ८८

179
1962

होममंत्रश्चजयंतीत्यादिः अनेनैवतुमंत्रेणजपहोमादिकारयेदितिप्राग्लिखितदेवीपुराणात् होमद्रव्यंचाज्यतिलादि पूजयेत्तिलहोमैश्चदधि
क्षीरघृतादिभिरितिदेवीपुराणात् केचित्तुमार्कंडेयपुराणगतसप्तशतीस्तवेनप्रतिश्लोकंस्वाहाकारांतेनतिलसर्पिर्भिश्चपायसेनहोमंप्रकुर्व
ति प्रतिश्लोकंजुहुयात्पायसंतिलसर्पिषेतिरहस्याख्यग्रंथंवर्णंचतत्रप्रमाणमुपन्यस्यंति एवंनवम्यांहोमंसमाप्यप्रत्यहुवन्नियमयुक्तो
देवीपूजाकुमारीपूजनब्राह्मणभोजनादिकृत्वादक्षिणामाचार्यायदद्यात् नवम्यांपूर्ववत्पूजाकर्तव्याभूतिमिच्छता दक्षिणांवस्त्रयुग्मंच
आचार्यायनिवेदयेत् इतिमत्स्यसूक्तात् आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रकं प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् त्रिरात्रं
वापिकर्तव्यंसप्तम्यादियथाक्रममितिभविष्योत्तरवचनात् लब्ध्वाभिषेकावरदाशुक्लाख्याश्वयुजस्यच तस्मात्सात्रसंपूज्यानवम्यां
चंडिकाबुधैरितिभविष्यवचनाच्च नवम्यांप्रतिपदादिवत्पूजाआवश्यकीइत्यर्थात् दशम्यांदेवीविसर्जनंनियमत्यागश्च अतएवभ
विष्यपुराणोक्तेप्रतिपदादिविशेषपूजाप्रकारेपिनवमीपर्यंतंपूजामुक्त्वादशम्यामेवविसर्जनमुक्तं केशसंस्कारद्रव्याणिप्रदद्यात्प्रति
पद्दिने पट्टडोरद्वितीयायांकेशसंयमहेतवे दर्पणंचतृतीयायांसिंदूरालक्तकंतथा मधुपर्कंचतुर्थ्यांतिलकंनेत्रमंडलं पंचम्यामंगरा
गंचशक्त्यालंकरणानिच षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेत् सप्तम्यांप्रातरानीयगृहमध्येप्रवेशयेत् उपोषणमथाष्टम्यां
मात्मशक्त्याचपूजनं नवम्यामुग्रचंडायातद्वदेवार्चनंदिवा। पूजाचबलिदानंचतत्वमातृःप्रपूजयेत् कुमारीपूजनीयाचभूषणी
याचभूषणैः संपूज्यप्रेषणंकुर्याद्दशम्यांशारदोत्सवे: अनेनविधिनायस्तुदेवींपूजयतेनरः स्कंदवत्पालयतेतंतुदेवींसर्वापदिस्थितः
पुत्रदारधनादीनांसंख्यातस्यनविद्यते भुक्त्वेहपरमान्भोगान्प्रेत्यदेवगणोभवेदिति कालिकापुराणेपि कल्पांतरेरामरावणयोर्ज
यपराजयार्थंप्रतिपदिदेव्याःप्रबोधनंद्वितीयायाःप्रभृत्यष्टमीपर्यंतंरामरावणयुद्धयुद्धदर्शनपूर्वकंनवम्यांकृतस्यरावणवधस्य
दर्शनंचोक्त्वानिहतेरावणेनवम्यांसकुलैःसुरैः विशेषपूजांदुर्गायाश्चक्रेलोकपितामहइतिनवम्यांदेव्याविशेषपूजामुक्त्वानि
हतेप्रतिपत्प्रभृतिपूजासुचापिस्वाततः संप्रेषितादेवीदशम्यांशावरोत्सवैरितिदशम्यामेवविसर्जनमुक्तं एवंसतियत्केषांचिच्छ्रां
तानांनवमीपारणाचरणंतन्मूलभूतवचनकल्पनंतत्सर्वंशिष्टैःकदाचित्अष्टमीयुक्तनवम्यांनवमीकृत्येजातेद्वितीयनवम्यांक्रिय
माणांपारणामुपलभ्यतत्रनवमीप्रयुक्तत्वभ्रांत्याप्रयुक्तत्वशक्तिभ्रांत्येवासाधुशब्दप्रयोगइत्युपेक्षणीयं प्रतिपदादिदेवीपूजा

का०त० शक्तौसप्तम्यादिदिनत्रयंयथाक्रमंमूलादिनक्षत्रत्रययुक्तेकेवलेवामहाष्टम्यादिदिनद्वयेनवम्यामेववासंपूज्यश्रवणोपेतायांकेवलायांवादशम्यां
८९ देव्यानियमानांचविसर्जनं अष्टम्यामेववासंपूज्यनवम्यामित्युक्तं षष्ठ्यादियक्षस्तु पत्रिकापूजायांसाचवक्ष्यते इयंचाष्टमीनवमीविद्धाग्रा
ह्यावसुरध्रयोरिति युग्मवचनात् अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत् कुजवारोभवेत्तत्र पूजनीयाप्रयत्नतइतिविशेषवचनाच्च नाष्ट
मीसप्तमीयुक्तासप्तमीनाष्टमीयुतेत्यादीनि चाष्टमीनवमीनिर्णयप्रकरणलिखितानि वचनान्यत्रोपोद्बलकानि तेननवरात्रव्रतस्यनक्त
व्रतत्वेन प्रतिपदादिक्रमेण विशेषवचनाच्चाष्टम्यामपिरात्रावेवपूजेतिकर्मकालव्यापित्वात्सप्तमीविद्धैवरात्रियोगिन्यष्टमीतत्रभात्येतियद्य
पिप्रतिभाति अतएवदुर्गाभक्तितरंगिण्यामपिरात्रिपूजायामष्टमीरात्रियोगिनीपूर्वैवग्राह्या कालव्याप्तिशास्त्रात् युग्मादिवचनंतुदिवापू
जादिविषयमित्युक्तं तथाप्यष्टम्यामवमीयुक्तानवम्याचाष्टमीयुता अर्धनारीश्वरप्रायातिथिःसर्वव्रतादिषु सर्वेषुरात्रिसंध्येष्वपि
नवमीसंयुताकार्यासदादुर्गाष्टमीबुधैः सप्तमीसंयुताहंतिपूर्वपुण्यफलंकृतं सदाराज्यस्यशेषपि नवमीसहसंयुक्तामष्टमीकारये
द्बुधः दुर्गादेवीतदापूज्यापूर्वविद्धांनकारयेदित्यादिभिर्विष्णुधर्मोत्तरदेवीपुराणादिगतैःसर्वसंमतैर्विशेषवचनैर्गौरीत्तृतीयादिवत्
कर्मकालव्याप्तिशास्त्रंबाधित्वानवमीयुतायामेवरात्रावसत्याष्टम्यांनवमीपूज्यासहतंत्रेणाष्टमीपूजोक्ता अतएवकामरूपादिनिबं
धेषुवचनं अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच तत्रयाक्रियतेपूजासाविज्ञेयामहापलेति अष्टमीनवमीसंधौतृतीयाखलु
कथ्यते तत्रपूज्यान्वहंपुत्रयोगिनीगणसंयुतती कालिकापुराणोक्तात्तृतीयासंधिपूज्याष्टमीनवमीपूजाभ्यांतंत्रेणैवसिध्यति उपो
षितोह्रितीयाह्नि पूजयेत्पुनरेवतामित्यष्टम्युपवासपरदिनविहितातु नवमीपूज्याप्रातर्वर्तमानायां नवम्यांवर्तुशक्त्यैवविसर्जनात्पूर्व
मितितदनुरोधेनापिनसप्तमीयुतायामष्टम्यामुपवासादि उपवासेतुविशेषतोपिनवमीसप्तमीविद्धाविधिनिषेधो गर्गः एकाद
श्यष्टमीषष्ठीपौर्णमासीचतुर्दशी अमावास्यात्रयोदशीताउपोष्याःपरान्वितादृति स्कंदपुराणे षष्ठ्येकादश्यमावास्यापूर्वविद्धा
तथाष्टमी सप्तमीपरविद्धाचनोपोष्यंतिथिपंचकमिति तत्रचाष्टमीशुक्ला शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी पूर्वविद्धा
नकर्तव्याकर्तव्यापरसंयुता उपवासादिकार्येषुएषधर्मःसनातनइतिनिगमात् अतएवदुर्गोत्सवप्रकरणेनवमीयुतायाअष्टम्याः
प्रशंसाभीमपराक्रम नदिवाननिशापिच विष्टिहतानच सप्तमीशल्यसमोपहता यदिचाष्टमीशेषभवानवमीअमरैरपिपूज्यतमा ८९

181
1902

कथितेतियदितिथिर्द्वेधेअष्टमीशेषभवानवमीभवेन्नवमीविद्धाचाष्टमीलभ्यतेइतियावत् तदासाअमरैरपिपूज्यतमाभवेत् यतोदिवा
निशानिशायामपिविष्टिहतामभवतिविष्टिदूषितस्यतत्पूर्वदलस्यतत्पूर्वाहोरात्रगतत्वात् सप्तमीशल्येनशल्यवदतिदुष्टेनसप्तमीवि
शेषेणचोपहतानभवतीत्यस्यार्थः यदातुनवमीदिनेसूर्योदयोत्तरमष्टम्यास्त्रिमुहूर्तव्यापित्वान्नवमीविद्धत्वेपिपरेद्युःक्षयवशा
न्नवमीसूर्योदयंनस्पृशतितदाष्टमीनवमीविद्धैवग्राह्या यदासूर्योदयेनस्यान्नवमीचापरेहनि तदाष्टमीप्रकुर्वीतसप्तम्या
सहितांनृपेतिसंग्रहवचनात् तथाचअहंभद्राचभद्राचनावयोरंतरंक्वचित् तस्मादृसप्तमीविद्धाकार्यादुर्गाष्टमीतिथिरित्यादीन्यपिवचना
न्यतद्विषयाण्येवमूलेमापिहिसंयुक्तासदात्याज्याष्टमीबुधैः लेशमात्रेणसप्तम्याअपिस्याद्यदिदूषितातिनिषेधश्चपूर्वोक्तविषयःअ
त्रयद्यपि अष्टम्यामुदितेसूर्येअर्धनारीश्वरप्रायेत्यादिवचनेभ्यःशुद्धायाअपिपूर्वाष्टम्याःपरित्यागेननवमीयुक्तायाग्राह्यत्वंप्रती
यते तथापिबहुषुवचनेषुसप्तमीयुतानिषेधसाहचर्येणोत्तरग्राह्यत्वविधानाच्चविद्धाउत्तरदिनेनवमीयुक्तापिपूर्वैवग्राह्या अत
एवगौरीत्तृतीयायाश्चतुर्थीयोगप्रशंसामात्रेणमाधवेनोक्तःशुद्धात्यागोनाद्यतःकेवलंवर्जनीयाप्रयत्नेनसप्तमीवेधसंयुतांपूर्व
विद्धांनकारयेदित्यादिवचनेभ्यःप्रतीयमानऔत्सर्गिकस्त्रिमुहूर्तविधएवात्रनिषेधप्रयोजकःनचोत्तरदिनेत्रिमुहूर्तसत्वएवग्राह्य
नाप्रयोजकंकिंतुसप्तमीशल्यसंविद्धावर्जनीयासदाष्टमीस्तोकापिसातिथिःपुण्यायस्यांसूर्योदयोभवेत् लेशमात्रेणसप्तम्यासा
कार्यापगामिन्यामित्यादिवचनात्गौरीत्तृतीयानेनचदेवाल्पेसप्तमीयोगेनत्याज्यत्वंघटिकेप्युदयमात्रसत्वेनापिचोत्तरस्याग्राह्य
त्वंद्रष्टव्यं तत्रोपवासनियमेघटिकैकायदाभवेदित्यादिसामान्यवचनेभ्यःनवमीतुसदाष्टमीविद्धैवग्राह्या युग्मवाक्यात् श्रा
वणीदुर्गनवमीतथादूर्वाष्टमीयोच पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमितिवचनात् अश्वयुक्शुक्लपक्षेयाअष्टमीमूलसं
युता सामहानवमीप्रोक्तेत्यादिवचनाच्च यदातु नवमीअष्टमीविद्धाभूत्वाद्वितीयदिनेपिसूर्योदयेकियतीभवतितदानवमीप्रयुक्त
स्यपूजादेःपूर्वदिनेकृतत्वेपिमहाबलिदानमात्रंद्वितीयादिनेकर्तव्यं अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत् प्रभातेबलिदानेचदि
नमात्रापिलभ्यते नवम्यांतत्रसंपूज्यदुर्गादुर्गातिनाशिनीतिवचनात् अत्रपूजाबलिदानद्वयेव सूर्योदयपरंरिक्तापूर्णास्यादपराय
दि बलिदानंप्रकर्तव्यंतत्रदेव्याःशुभावहं बलिदानेकृतेष्टम्यांराष्ट्रभंगोभवेन्नृपेतिदेवीपुराणात् अत्रबलिदानंनवमीप्रयुक्तं अ

का॰त॰ ष्टमीप्रयुक्तस्यतत्रैवकर्तव्यत्वात् द्वितीयदिनेनवम्या अलाभेतुपूर्वेद्युरेव नवमीमध्येकार्यंदशम्यांबलिदानंतुदीयतेयत्रमानवैः तद्राष्ट्रंना
९० शमायातिनरकोपद्रवैः स्फुटमिति भविष्येनवमीप्रयुक्तस्यबलिदानस्यदशम्यांकरणेदोषश्रवणात् यातुआश्विनस्यसितपक्षेसप्तमुद्ध
र्तेनसप्तमी तस्यांचपत्रिकापूजाकर्तव्यानवनायकैः प्रशस्तांसफलांबिल्वशाखामाहृत्यपूजयेदितिज्योतिःशास्त्रोविहिताबिल्वशा
खायांदुर्गापूजातदंगभूतंबिल्वतरोर्देवी बोधनं आश्विनकृष्णनवम्यां भद्रायुक्तायांकेवलायांवाकर्तव्यं कन्यायांकृष्णपक्षेतुपू
जयित्वार्द्रभेदिवा नवम्यांबोधयेद्देवींमहाविभवविस्तरैरितिलिंगपुराणात् इषमास्यसितपक्षइतिप्रागुदाहृतदेवीपुराणाच्च नव
म्यांबोधनासामर्थ्येनवरात्रांतर्गतषष्ठ्यांतत्कर्तव्यं षष्ठ्यांबिल्वतरौबोधंसायंसंध्यासुकारयेदिति भविष्यवचनात् तेनदेवेस्तुक्त
त्वान्नवमीपूर्वाह्नव्यापिनीबोधनेग्राह्या उभयत्रचतद्ग्राह्यावार्द्रायोगोविनिगमिकः षष्ठीतुसायंसंध्याव्यापिनी आमंत्रणंतुष
ष्ठ्यामेवज्येष्ठानक्षत्रयुक्तायांषष्ठ्यांबिल्वाभिमंत्रणमितिप्रागुलिखितदेवीपुराणात् बोधनादिषुतत्तत्तिथिषुतत्तन्नक्षत्रयोगेफ
लाधिक्यं नतुसत्वादरणीयोलिंगपुराणदेवलवचनाभ्यामित्युक्तं तिथिःशरीरंदेवस्यांतिथौनक्षत्रमाश्रितं तस्मात्तिथिंप्रशं
संतिनक्षत्रंनतिथिंविनेतिज्योतिःशास्त्राच्च अत्रचयुगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया सूर्योदयमुदीक्षंतेनक्षत्रतिथि
युग्मतेतिवचनेनप्रातरावाहयेद्देवीमित्यादिप्रागुलिखितवचनैः पत्रीविसर्जनंरात्रौप्रवेशंवाकरोतियः तस्यराज्यविनाशःस्याद्राज्या
च्चविकलोभवेत् ऋक्षयोगानुरोधेनरात्रौपत्रीप्रवेशनं विसर्गंवाचरेद्यस्तुसराष्ट्रःसविनश्यतीतिनिषेधेनचपत्रीप्रवेशनस्याष्ट
मीविद्धायांसप्तम्यांप्रातःकर्तव्यत्वात्तदव्यवहितपूर्वदिनएवसायाह्नेषष्ठ्यभावेप्यामंत्रणंकार्यं तदुक्तंब्रह्मांडपुराणेपत्रीप्रवेशात्पू
र्वेद्युःसायाह्नेबिल्ववासिनीं चंडीमामंत्रयेद्विद्वान्नात्रषष्ठीपुरस्क्रियेतिमत्स्यसूक्तेच ज्येष्ठावाप्यथवाषष्ठीसायंकालेनचेद्भवेत् सा
यमेवतथापिस्याद्बिल्वशाखाभिमंत्रणं पूर्वाषष्ठीसनक्षत्रांसायंप्राप्तामपित्यजेत् यदातुपत्रिकापूजानपरेद्युर्भविष्यति संनिकृष्टे
तुयत्पूर्वंपत्रिकादिवसस्यतु तद्दिनेवरणंकृत्वापरेशाखांप्रवेशयेदितितेनपत्रिकापूजायांसप्तम्यादितिथित्रयंप्रातःकालीनंउत्तरो
त्तरतिथिविद्धमेवग्राह्यं प्रातरावाहयेदितिवचनेनप्रातरेवतत्प्रवेशादिविधानात् भगवत्याःप्रवेशादिविसर्गांताश्चयाःक्रियाः ति
थावुदयगामिन्यासर्वास्ताःकारयेद्बुधइतिनंदिकेश्वरपुराणाच्च एवंसतिशरत्कालेमहापूजाक्रियतेयाचवार्षिकी साकार्योदयगा ९

183/194

मिन्यांनतत्रतिथियुग्मतेत्यपिवचनंपत्रिकापूजापरमेव नतुनवरात्रत्रिरात्रादिविहितकेवलप्रतिमापूजाविषयमितिनपूर्वोक्तं तद्विषयतिथि
निर्णयस्यानेनविरोधः यदातुतिथिवृद्ध्यासंपूर्णसप्तमीरूपपत्रिकाप्रवेशादिनापेक्षयाचतुर्थदिनेनवमीतत्प्रयुक्तपूजायोग्यापौर्वाह्णि
कीलभ्यतेपूर्ववचनेरष्टमीयुग्मतायास्तत्रतस्याबाधितत्वात् यदावापत्रिकाप्रवेशादिनोत्तरदिनएवत्रिमुहूर्ताष्टम्युत्तरंवर्तमानानवमीक्ष
यवशादुत्तरदिनेनास्तितदाचतुरहव्यापिनीवापत्रिकापूजाभवति अतएवभविष्ये प्रतीप्रपूजयेद्देवींसप्तम्यादिदिनत्रये द्वाभ्यांचतुर्हो
भिर्वाह्रासवृद्धिवशात्तिथेरिति इदमेवलिंगंसर्वपक्षेषुरात्रिशब्दस्यतिथिपरत्वे अष्टम्यानवमीयुक्तेत्येतदपिवचनमेतादृशनवमीवि
षयमेव पूर्वोक्तपूजाविषयंतुवस्तुतःसंधिपूजाविषयमितिगौडाः बलिदानंचपत्रिकापूजायामपि अष्टम्यांमहानिशायांनवम्यांचदि
वैवभवति पुनःपूजांतथाष्टम्यामित्यादिप्रागुलिखितकालिकापुराणात् विसर्जनंदशम्यामेवत्युक्तं पत्रिकापूजाचप्रतिपत्प्रतिष्ठा
पितदेवीप्रतिमासमीपएव यदिप्रतिमापूजायामपिसप्तम्यादिपक्षस्तदापत्रिकयासहैवप्रतिमायाअपिदेव्यर्थकृतगृहेप्रवेशादिवि
सर्जनांतंकर्तव्यमितिदुर्गाभक्तितरंगिण्यां अयमत्रसंक्षेपतःपत्रिकापूजाविधिः तत्राश्विनकृष्णनवम्यामार्द्रायुक्तायांकेवलायांवा
तच्छुक्लषष्ठ्यांवाज्येष्ठायुक्तायांकेवलायांवासायंकालेशोभनबिल्वतरुसमीपंगत्वा ॐबिल्ववृक्षायनमइत्यर्घगंधपुष्पधूपदी
पनैवेद्यपुष्पांजलिभिर्बिल्वतरुंसंपूज्यजयंतीत्यादिदुर्गेइहागच्छेहतिष्ठेतिबिल्ववृक्षेदुर्गामावाह्यषोडशभिःपंचभिर्वोपचारैः
तांतत्रैवसंपूज्यगीतवाद्यघोषपुरःसरंतत्रैवदेवींबोधयेदनेनरावणस्यवधार्थायरामस्यानुग्रहायच अकालेब्रह्मणाबोधोदेव्या
स्त्वयिकृतःपुरा इषमास्यसितपक्षेनवम्यामार्द्रायोगतः श्रीवृक्षेबोधयामित्वांयावत्पूजांकरोम्यहमिति षष्ठ्यांबोधनेतुइषइ
त्यादिश्लोकस्थाने अहमप्याश्विनेषष्ठ्यांसायाह्नेबोधयाम्यतइति ततोबिल्वतरुमामंत्रयेत् मेरुमंदारकैलासहिमवच्छिखरेगि
रौ जातःश्रीफलवृक्षत्वमंबिकायाःसदाप्रियः श्रीशैलशिखरेजातश्रीफलश्रीनिकेतन नेतव्योसिमयावृक्षपूज्योदुर्गास्वरूपतइ
ति ततआश्विनशुक्लसप्तम्यांमूलयुक्तायांकेवलायांवापूर्वदिनमामंत्रितबिल्वतरुसमीपंगत्वापुनस्तंपूज्यकृतांजलिः प्रसादयेत्
बिल्ववृक्षमहाभागसर्वदाशंकरप्रिय गृहीत्वातवशाखांतुदुर्गापूजांकरोम्यहं शाखाछेदोद्भवंदुःखंनचकार्यंत्वयाप्रभोइति
ततःफलद्वययुतांशोभनामपराजितादिग्गतामेकांशाखांछेदयेद्दातस्येत्यनेनमंत्रेण ॐछिंधिछिंधिफट्फट्हूंस्वाहेतिमंत्रः ततस्तां

शाखामानीय गृहांगणे श्रीवृक्षस्थाप्य शुद्धोदकेन संस्नाप्य बिल्वशाखायै नम इत्यर्घादिभिः पूजयित्वा बिल्वशाखायां मृन्मयप्रतिमा
यां च देवीमावाहन पुरःसरं तथैव पूजयित्वा माषभक्तादि बलिं च दत्वा दोलादिना शाखां प्रतिमां च पूजागृहद्वारदेशमानीय तत्रैव स्था
पयित्वा पूजागृहस्थितानि भूतानि भूतेभ्यो नम इति गंधादिभिः संपूज्य भूताः प्रेताः पिशाचाश्च ये वसंत्यत्र भूतले ते गृह्णंतु मया
दत्तो बलिरेष प्रसाधितः पूजिता गंधपुष्पाद्यैर्बलिभिस्तर्पितास्तथा देशादस्माद्विनिःसृत्य पूजां पश्यंतु मत्कृतां भूतेभ्य एष मा
षभक्तबलिर्नम इति सपुष्पजलोत्सर्गेण बलिं तेभ्यो दत्वा अपसर्पंतु ये भूता ये भूता भूमिपालकाः भूतानामविरोधेन पूजाक
र्म करोम्यहं फडिति तान्यपसारयेत्सर्षपादींश्च विकिरेत् तदकरणे दोषश्रवणात् तथा च कालिकापुराणे स्थितेषु तत्र भूतेषु नैव
घं मंडलं तथा विलुंपंति महालब्धा न गृह्णंति च देवताः तस्माद्यत्नेन कर्तव्यं भूतानामपसारणमिति शारदातिलके विकिरान्वि
किरेत्तत्र सप्तजप्तान् शराणुना लाजचंदनसिद्धार्थफलपुष्पकुशाक्षताः विकिरा इति संप्रोक्ताः सर्वविघ्नविनाशना इति
शराणुः फडित्यस्त्रमंत्रः सचाभिमंत्रणे विकिरणे च ततः पुनः शाखायां प्रतिमायां च देवीं संपूज्य श्रीशैले त्यादिनेतव्यासि मया गच्छ
पूज्यो दुर्गास्वरूपत इति दुर्गास्वरूपतया शाखां ध्यात्वा गीतवाद्यादि घोषेण प्रतिमासहितां पूजागृहं प्रवेश्य आरोपितासि दुर्गे त्वं मृन्मये श्री
फले तथा स्थिरा नित्यं भूत्वा मे गृहे स्वं काम दा भवेति पूजास्थाने शोभने पीठोपरि स्थिरीकृत्य पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां कृत्वा प्रतिष्ठा
मंत्रेण प्रतिष्ठाप्य सपुष्पानक्षतानादाय आवाहयाम्यहं देवीं मृन्मये श्रीफले तथा कैलासशिखराद्देवि विंध्याद्रेर्हिमपर्वतात् आगत्य बि
ल्वशाखायां चंडिके कुरु संनिधिं भगवति दुर्गे इहागच्छेत्यु मयाऽऽराधिता स्थापितासि मया देवी श्रीफले मृन्मयेऽपि च आयुरारोग्यमैश्वर्यं देहि
देवि नमोस्तु ते भगवति दुर्गे इह तिष्ठ तिष्ठेति स्थापयित्वा कृतांजलिः दुर्गे दुर्गे स्वरूपासि स्फुरत्तेजो महाबले महानंदकरे देवि प्रसिद्धमम सिद्धये
एह्येहि भगवत्यंब शत्रुक्षयजयप्रदे भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः पल्लवे संस्थिते
देवि पूजये त्वां प्रसीद मे दुर्गे देवि इहागच्छ सांनिध्यमिह कल्पय यज्ञभागान्गृहाण त्वं योगिनीकोटिभिः सह इति पठेत् ततो जयंतीत्यादि
इदं पाद्यं दुर्गायै नम इति गंधपुष्पादियुतं पाद्यं दत्वा सौवर्णाद्यर्घ्यपात्रे पुष्पाक्षतकुंकुमदधिदूर्वाकुशातिलबिल्वपत्रसहितं जलं निधा
य तेनैव मंत्रेण इदमर्घ्यं दुर्गायै नम इत्यर्घ्यं दत्वा तेनैव इदमाचमनीयमित्यादिक्रमेणाचमनीयपंचामृतस्नानीयपुनराचम ९१

185
1942

नीयवस्त्रपुनराचमनीयानुलेपनादि दत्वा पुष्पांजलिं दद्यात् दां दुर्गायै नम इत्यावृत्तेन ततः अमृतोद्भवं श्रीवृक्षं शंकरस्य सदाप्रियं बिल्वपत्रं
प्रयच्छामि पवित्रं ते सुरेश्वरीति बिल्वपत्रं ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदाप्रियं तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति द्रोणपु
ष्पं च निवेद्य जयंती त्यादीमानि पुष्पाणि दुर्गायै नम इति जातिचंपकादि सुगंधिपुष्पाण्यपि दत्वा तथैव धूपदीपनानानैवेद्य पुनराचम
नीयतांबूलादि दत्वा पूजासाद्गुण्यार्थं किंचिद्दक्षिणां च दत्वा स्तुतिभिः स्तुत्वा प्रणम्य बद्धांजलिः प्रार्थयेत् महिषघ्नि महामाये चामुंडे मुं
डमालिनि आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते कुंकुमेन समालब्धे चंदनेन विलेपिते बिल्वपत्रकृतापीडे दुर्गेहं शरणं गतः सर्वमंगलेति द्वि
पं देहीति च श्लोकद्वयं पठेत् बलिं च दद्यात् एवमेव महाष्टम्यामपि देवीपूजनमर्धरात्रे विशेषतः गीतवाद्यनृत्यादिना जागरणं च कार्यं
राज्ञा तु विजयकामार्द्धरात्रे विशेषपूजापूर्वकं बलिं दद्यात् ब्रह्मपुराणाद्युक्तप्रकारेण शस्त्रादिपूजां च कुर्यात् महानवम्यामपि एवं पूज
यित्वा प्रभूतबलिदानं कार्यं होमश्च पूर्वोक्तप्रकारेण राज्ञा त्वश्वपीडाशांत्यै ब्रह्मपुराणोक्तप्रकारेण एवं ताश्वपूजापि कार्या एवं प्रतिप
दादिपक्षेण देवीं प्रतिमां सप्तम्यादिच पत्रिकां महानवमीपर्यंतं पूजयित्वा दशम्यां श्रवणयुतायां केवलायां वा प्रातर्देव्या विसर्जनं
तद्यथा पूर्ववत्पूजां विधाय प्रणम्य दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्राह्मणप्रियां सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवां मंगलां शोभ
नां शुद्धां निष्कलां परमां कलां विश्वेश्वरीं विश्वमातां चंडिकां प्रणमाम्यहं सर्वदेवमयीं देवीं सर्वरोगभयापहां ब्रह्मेशविष्णुनमितां
प्रणमामि सदा उमां विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं योगिनीं योगमातां च चंडिकां प्रणमाम्यहं ईशानमातरं देवीमीश्व
रीमीश्वरप्रियां प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीं य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः स मुक्तः सर्वपापेभ्यो दुर्गया सह मो
दत इति अन्यैर्वा स्तोत्रैः स्तुत्वा बद्धांजलिर्महिषघ्नीत्यादि श्लोकचतुष्टयेन प्रार्थ्य विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितं पूर्णं भव
तु तत्सर्वं त्वत्प्रसादान्महेश्वरीति प्रसाधक्षमस्वेत्युक्त्वा एकं पुष्पं ॐ दुर्गायै नम इत्यैशान्यां निःक्षिप्य विसृज्य उत्तिष्ठ देवी चंडेशि शुभ
मां पूजां प्रगृह्य च कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके व्रजस्रोतो जले वृद्ध्यै तिष्ठ गेहे
च भूतये इत्युत्थाप्य गीतवाद्यब्रह्मघोषपुरःसरं स्रोतोजलसमीपं नीत्वा दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते संवत्सरे व्यतीते
तु पुनरागमनाय वै इमां पूजां मया देवि यथाशक्त्या निवेदितां रक्षणार्थं समादाय व्रज स्वस्थानमुत्तममिति स्रोतसि प्रवाहयेत् अथ देवी

का॰ त॰ पूजास्थानमागत्य शांतिकलशोदकेन ब्राह्मणैरभिषिक्तो यजमानः हृतशार्दूलदुर्गापूजाप्रतिष्ठासिध्यर्थं ब्राह्मणेभ्यः स्वर्णादिदक्षिणां दत्वाय
९२. थाशक्तिब्राह्मणान्भोजयित्वा स्वबंधुभिः सार्धं भुंजीतेति राजा तु तस्यामेव दशम्यां अथातः प्रस्थानं व्याख्यास्याम इत्यादिना गार्ग्यब्रह्म
णेन विवाहमुद्दिश्योक्तं प्रास्थानिकविधिं कृत्वा अथापराजितादशम्यां पूर्वोक्तविजयमुहूर्ते उक्तं प्रास्थानिकमित्युपक्रम्य तदप्युक्तं श्लोकाः
अलंकृतो भूषितभृत्यवर्गः परिष्कृतोत्तुंगतुरंगनागः वादित्रनादप्रतिनादिताशः समंगलाचारपरंपराशीः राजा निर्गत्य भवनात्सुरोहि
तपुरोगमः प्रास्थानिकविधिं कृत्वा प्रतिष्ठेत्पूर्वतो दिशि गत्वा नगरसीमांतं वास्तुपूजां समाचरेत् संपूज्य चाथ दिक्पालान्पूजयेत्पथि
देवताः मंत्रैर्वैदिकपौराणैः पूजयेच्च शमीतरुं अमंगलानां शमनीं शमनीं दुष्कृतस्य च दुःस्वप्नशमनीं धन्यां प्रपद्येहं शमीं शुभां ततः
कृताशीः पूर्वस्यां दिशि विष्णुक्रमानुक्रमेत् रिपोः प्रतिकृतिं कृत्वा ध्यात्वा चमनसाथ तं शरेण स्वर्णपुंखेन विध्येद्धृदयमर्मणि दिशा
विजयमंत्राश्च पठितव्याः पुरोधसा एवमेव विधिं कुर्याद्दक्षिणादिदिशास्वपि पूज्यांद्विजांश्च संपूज्य सांवत्सरपुरोहितौ गजवाजिपदातीनां
प्रेक्षाकौतुकमाचरेत् जयमंगलशब्देन ततः स्वभवनं विशेत् नीराज्यमानः पुण्याभिर्गणिकाभिः समंगलं य एवं कुरुते राजा वर्षे वर्षे समंग
लं आयुरारोग्यमैश्वर्यं विजयं च स गच्छति नाधयो व्याधयस्तस्य भवंति न पराजयः श्रियं पुण्यमवाप्नोति विजयं च सदा भुवीति गोप
थब्राह्मण एवोक्तं प्रस्थानादि कुर्यात् सर्वे च जनास्तस्यामेवोल्लंघयेयुः सीमानं तद्दिनक्षेत्रे तत्ततो नरा इति कश्यपवचनात् ग्रामसीमामु
ल्लंघ्य आश्विनशुक्लपक्षं प्रक्रम्य दशम्यां च नरैः सम्यक्पूजनीयापराजिता ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नत इति पुराणसमु
च्चयवचनात् ग्रामादैशान्यां अपराह्णे अपराजितापूजां कुर्युः सा यथा अद्याश्विनशुक्लदशम्यां क्षेमसिध्यर्थं राजा तु यात्रायां विज
सिध्यर्थं अपराजितापूजामहं करिष्य इति संकल्प्य चंदनादिलिखिताष्टदलकमलमध्ये अपराजितायै नम इत्यपराजितां तद्दक्षिणतः
क्रियाशक्त्यै नम इति जयां तद्वामत उमायै नम इति विजयां प्रतिष्ठाप्य अपराजितायै नमः जयायै नमः विजयायै नम इत्यावाहनाद्यु
पचारैः संपूज्य प्रणम्य इमां पूजां यथादेवी यथाशक्त्या निवेदितां रक्षार्थं तु समादाय व्रजस्व स्थानमुत्तममिति विसर्जयेत् राजा तु प्रणा
मानंतरं चारुणा मुखपानेन विचित्रकनकोज्वला जया देवी शिवे भक्त्या सर्वकामान्ददातु मे कांचनेन विचित्रेण केयूरेण विभूषिता
जयप्रदा महामाया शिवभावितचेतसा विजया च महाभागा ददातु विजयं मम हारेण सुविचित्रेण भास्वत्कनकमेखला अपरा ९२

187
194

जिता रुद्ररता करोतु विजयं मम इति प्रार्थ्य हरिद्रारक्तवस्त्रे दूर्वायुक्तसिद्धार्थकान्प्रदक्षिणं वलयाकारेण बध्वा सदापराजिते यस्मात्त्वं लता
सत्तमा स्मृता सर्वकामार्थसिध्यर्थं तस्मात्त्वां धारयाम्यहं भवापराजिते देवि मम सर्वसमृद्धये पूजितायां त्वयि श्रेयो ममास्तु दुरितं हत
मिति तद्वलयमभिमंत्र्य जयदे वरदे देवि दशम्यामपराजिते धारयामि भुजे दक्षे जयलाभाभिवृद्धये बलमाधेहि वलयमपि शत्रुपराजयं
त्वद्धारणाद्भवेयुर्मे धनधान्यसमृद्धय इति मंत्रेण दक्षिणबाहौ धारयित्वा पूर्ववदपराजितां विसर्जयेदिति सर्वे त्वाचारात् ग्रामसीमातो
बहिरीशानदिगां तां शमीं पूजयित्वा अमंगलानां शमनीमिति तां प्रार्थयेयुः इयं च दशमी खंडत्वे यदोत्तरैव श्रवणयुक्ता तदैवैकादशीयु
क्ता पूर्वोक्तविधौ ग्राह्या उदये दशमी किंचित्संपूर्णैकादशी यदि श्रवणर्क्षं यदा कार्या सा तिथिर्विजयाभिधा श्रवणर्क्षे तु पूर्णायां का
कुत्स्थः प्रस्थितो यतः उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति कश्यपवचनात् श्रवणे चापराजितेति पूर्वोक्तवचनाच्च संपूर्णैकाद
शीति वचनाच्च तदा कर्मकालव्याप्तिरपि नापेक्षिता इतरथा सर्वपक्षेषु नवमीयुक्तैव ग्राह्या अपराह्णकालव्याप्तिलाभात् दशम्यां तु ज
नैः सम्यक्पूजनीयापराजिता ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नत इत्यपराह्णस्य कर्मकालत्वोक्तेः या पूर्णा नवमीयुक्ता तस्यां पू
ज्यापराजिता क्षेमार्थं विजयार्थं च प्रसिद्धा विधिना नरैः नवमीशेषसंयुक्ता दशम्यामपराजिता ददाति विजयं देवी पूजिता जयव
र्धिनी आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः एकादश्यां तु कुर्वंस्तत्पूजनं चापराजितं दशमीयः समुल्लंघ्य प्रस्थानं कुरुते नरः तस्य सं
वत्सरं राज्ये न क्वापि विजयो भवेदित्यादिवचनेभ्यश्चेति संक्षेपः तदयं संग्रहः अनेकतिथिसाध्येषु कर्मस्वेकस्य कर्मणः अभ्यस्तस्य
प्रतिदिनं भिन्नभिन्नस्य वा पुनः यत्र सत्यपि मुख्यत्वे पूर्वापरदिनोक्तितः उपजीव्यत्वमेकस्याः प्राधान्यं तत्कृतस्य वा तां तिथिं तत्र निर्णीय
तत्पूर्वादिदिनेषु च न तत्तिथ्यंशसत्वेपि तत्तत्कर्मेति निर्णयः यत्र त्वशेषप्राधान्यं न चैकत्रोपजीव्यता स्वातंत्र्येण विनिर्णेयास्तत्र ता
स्तिथयोऽखिलाः कर्मस्यादितिथिर्ह्येवं चतुरादिषु वास्तु तत् एकस्या उपजीव्यत्व उदाहरणमष्टकाः सावित्र्यादि प्रधानत्वे सर्वकाम्य
वद्भूनि तु अभ्यस्तदेवीपूजात्मप्रधानेन नवरात्रके उपवासादिनियमांगके प्येष व्यवस्थितिः अद्य नंदादिषष्ठ्यादिसप्तम्यादिजयादि वा
नवम्यंतमथाष्टम्या नवम्यामेव वेत्यमी आश्विनश्वेतपक्षस्थे पक्षा उक्ताव्रतोत्तमे तत्र देवीपूजनस्य मत्स्यपूर्वाह्णकालतां मुहूर्तमा
त्रापि पराणतु दर्शनसंयुता ग्राह्या प्रतिपदित्येवं बुधाः केचित्प्रचक्षते नक्तव्रतत्वमिच्छंतो माधवाद्याः प्रदोषगां पूजां मुख्यतयेच्छं

का०त० विहितापित्रिकालगे पूत्तनेभक्तभुंजीवत्तनात्रापिविनर्णयः प्रामाणिकानांमहतांतेषामिष्टोमयाप्यते नक्तभोजनएवोक्तोनिर्णयोत्रापि
९३ योज्यते पूर्वत्रैवप्रदोषाप्तौपूर्वाह्णेपरेवसा दिनद्वयेप्रदोषास्पृक्सायाह्नव्यापिनीपरा यातुतत्रविशेषोयंतिथौसायाह्नवर्तिनि प्रार
भ्यपूजांसंरूाप्यप्रदोषतिथ्ययोगिनि नतुसायाह्नएवात्रभुक्तेरेवसमापनं महाष्टमीतुनवमीविद्धारात्रावसत्यपि नवम्यप्यष्टमीविद्धा
बलिदानंतुतत्कृतं द्वितीयदिनवर्तिन्यांकार्यंसूर्योदयस्पृशि तिथिद्वयंप्रयुक्तंचतंत्रेणैवार्चनादिकं कार्यंपूर्वाह्णेनवमीयदिनस्यात्पर
दिने सप्तमीयुक्तदाग्राह्यानवम्यानयुताष्टमी नवमीकृतमेवहकार्यंचनवमीदिने पूजादिबलिदानंच नदशम्यांकथंचन मि
लितेकेवलेवापिअष्टमीनवमीद्वये अनुकल्पनयाप्रोक्तापूजेतद्वतगोचरा अष्टम्याश्चनवम्याश्चतत्रापीत्थंविनिर्णयः केवलाष्ट
मीभिन्नेषुसर्वपक्षेषुचोदिता विसर्जनात्मिकापूजासमाप्तिर्दशमीति थौ तेनात्रैवोपवासादिनियमानांसमापनं उचितंतेननव
मीपारणाभ्रांतिकल्पिता बिल्वशाखात्मिकायांचपत्रिकायामुमार्चनं विहितंयत्पुराणेषुसप्तम्यादितिथित्रये देव्याबिल्वतरो
बोधतदंगमिपत्क्षणे आर्द्रायुक्तेकेवलेवापूर्वाह्णेनवमीदिने कर्तव्यस्तेनसाग्राह्यातत्रपूर्वाह्णगामिनी उभयत्रतथात्वेतुग्रा
ह्यार्द्राऋक्षयोगिनी एवषष्ठ्यांतन्नवम्यांतदसंभवे आमंत्रणंतुतत्रैवसायंचेतद्वयंभवेत् तेनतद्व्यापिनीतत्रसाग्राह्या
द्वादशीद्वयोः ज्येष्ठायुक्तायदापत्रीपूजार्हासप्तमीभवेत् प्रातःपरेद्यावितदाकार्यंपूर्वेद्युरेवतत् षष्ठ्याभावेपिसप्तम्यादितिथित्रयं
मूलादिभत्रययुतंकेवलंवोत्तरोत्तरं प्रातःकालीनमेवेष्टंयस्मिन्पत्रीप्रपूजने तदाचक्रासद्वध्योः स्याद्धिचतुर्दिनगामिता बलिप्रदा
नंत्वत्रापिअष्टमीनवमीकृतं अर्द्धरात्रेदिवाचैवकर्तव्यमितिनिर्णयः अपराजितापूजायांदशम्येकादशीयुता ग्राह्यातदैवश्रवणं
यदातस्यामतोन्यथा सर्वपक्षेषुपूर्वैवतत्कृत्येरविलएवसा निर्णयःसंग्रहश्चेत्थंकर्तव्यंपूर्वमीरितं इतिसामान्यतोनेकतिथि
साध्यकर्मसुतिथिनिर्णयोनवरात्रनिर्णयश्च श्रीकृष्णउवाच पुरावामनरूपेणप्रार्थयित्वाधरामिमां ददावतिथिरिंद्रा
यबलिंपातालवासिनं कृत्वादैत्यपतेर्दत्तंमहोरात्रत्रयंनृप सरहस्यंतदेतत्तेकथयामिशृणुष्वमेइत्युपक्रम्ययुधिष्ठिरप्रश्नपू
र्वकं कार्तिकेकृष्णपक्षेतुचतुर्दश्यांदिनोदये अवश्यमेवकर्तव्यंस्नानंनरकभीरुभिः अपामार्गस्यपत्राणिभ्रामयेच्छिरसोप
रीत्यादिनाभविष्योत्तरेपूर्णिमांतकार्तिककृष्णपक्षचतुर्दश्यमावास्यातदुत्तरप्रतिपद्रूपतिथित्रयेयोविहितः कौमुद्युत्सवस्तत्रे

189

194

वचामावास्यांतपक्षेणापिनारदसंहितायां वर्ज्यासितचतुर्दश्यामिंदुक्षयतिथावपि ऊर्जादौस्वातिसंयुक्तेतदादीपावलीभवेत् तैलेल
क्ष्मीर्जलेगंगादीपावलितिथौवसेत् अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत् इंदुक्षयेपिसंक्रांतौवारेपातेदिनक्षये तत्राभ्यंगोनदोषा
यप्रातःपापापनुत्तयइति तत्रचतुर्दशीतावदभ्यंगस्नाने ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः यमायधर्मराजायमृत्यवेचांतकायच वै
वस्वतायकालायसर्वभूतक्षयायच औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैनमइतिभविष्योत्तरविहितेय
मतर्पणेचदिनोदयप्रातःशब्दयोः समानार्थकत्वात्प्रातःकालव्यापिनीपूर्वापरावाग्राह्या गौडनिबंधेष्वपिदिनोदयइत्येवलिंगत्वेति
ज्योतिष्टोमेषोडशिग्रहंप्रकृत्यश्रूयते तंपरांचमुख्येभ्योनिगृह्णातीति तृतीयसवनेसूर्यास्तमयात् प्रागेवोक्थ्येभ्योग्रहास्त्रयोगृह्यंते
तेभ्यःपरस्तादयंषोडशीविहितः तत्रयदाकदाचिदुक्थ्यग्रहाअस्तमयादूर्ध्वमुपक्रमिष्यन्तेतदाततऊर्ध्वंषोडश्युत्कृष्यतेनवेतिसं
शयेनेतिप्राप्तंकुतः कालानुरोधात् कालोह्येवमाम्नातःसमयाविध्युषितेसूर्येषोडशिनःस्तोत्रमुपाकरोतीति समयोस्तमयःतं
प्राप्तेसूर्येस्तोत्रप्रारंभकालःसोयमुत्कर्षेसतिबाध्येततः सस्तोत्रषोडशीनोत्कृष्येत नत्वनुत्कर्षपक्षेप्युक्थ्यापरभावोबाध्यतांक्र
ममात्रंहितत्वकालस्तुबलीयानितितस्मादनुत्कर्षइतिप्राप्तेब्रूमः परांचमितिशब्देनोक्थ्येभ्यउत्तरकालःषोडशिगृहांगत्वेनविधी
यतेतांतामुख्यस्यग्रहस्यकालमबाधितुंउपसर्जनस्यस्तोत्रस्यकालंबाधित्वासस्तोत्रोग्रहउत्कृष्टव्यइतिसिद्धांतः लिंगत्वेनतुप
ठितं क्वचिद्दिनोदयइतिपठितंतत्पूर्वसंवाद्येव क्वचित्प्रायोदाक्षिणात्याचारसंवादीविधूदयइतिपाठः तत्रचंद्रोदयकालीनस्नाने
ग्राह्या तत्रयापूर्वैवप्रातश्चंद्रोदयेवावर्ततेसाऽखंडासर्वपक्षेषुदीपदानंतेषुसमीचीनैव याद्वत्तरेवप्रातश्चंद्रोदयेवातावत्येवच
समाप्ता तस्यामेवचस्नानंयमतर्पणंचकार्यं ततश्चतर्पणंकार्यमितिस्नानानंतरंतद्विधानात् तस्यकालविशेषानुक्तेश्च दीपदा
नमपियद्यपिइतिस्नात्वाप्रदातव्येदीपाःसंपूज्यदेवताइतिस्नानानंतरमेवविहितं तथापिततःप्रदोषसमयेदीपांदद्यात्मनोहरान्
ब्रह्मविष्णुशिवादीनांभवनेषुमठेषुचेतितस्यस्वतंत्रकालविधानात्क्रमानुरोधेनचकालबाधस्यासंभवात् उक्थ्यापरभावस्यतु
प्रधानमेतेनसमयाध्युषितसूर्यत्वपांगषोडशिस्तोत्रकालबाधकत्वात् पूर्वैधैरेवप्रदोषव्यापिन्यांतन्मात्रंकर्तव्यं क्वचित्तुस्नात्वेत्यस्य
स्थानेनरकायप्रदातव्यादइतिपठितं तदासंपूर्णचतुर्दश्यामार्थिकमेवदीपदानस्यस्नानानंतर्यमितिनतदनुरोधेनखंडायांकाल

का०न० वशायातभिन्नदिनानुष्ठेयत्वंस्नानदीपदानयोस्स्यात्‌ऽयं नरकायेति तु नरकासुरोद्देशेनेति बहवः कश्चित्तु मशकार्थोऽधूमइतिवन्निवर्त्य
९४ प्रयोजनपरत्वेनव्याख्यातं यदातुदिनद्वयेपितत्रपूर्वस्यामेवसर्वस्नानादिसंपूर्णत्वाव ध्वयःक्रत्यक्रमानुरोधाच्च यापिदिनद्वयेपिनता
द्दशीसापिपूर्वैवस्वकालादुत्तरःकालोगौणःपूर्वस्यकर्मणइत्युक्तगौणकालव्याप्तिलाभात् पूर्वविद्धचतुर्दश्यांकार्तिकस्यसिततरे
प्रत्यूषसमयेस्नानंकुर्यात्तत्रप्रयत्नतइतिपृथ्वीचंद्रोदयधृतवचनाच्च चंद्रोदयस्नानपक्षेरात्रावेववर्तमानयात्रयोदश्याचतुर्दशी
विद्धाभवतिरात्रिकर्मत्वात् स्नानंतुअसत्यामपिचतुर्दश्यांप्रातरेवचंद्रोदयएववाभवतितिथ्यादौचमवेद्यावानित्युत्तरतिथिक्ष
यप्रक्षेपेणशास्त्रतस्तत्रतिथेःसत्वात प्रातःपक्षे यांतिथिंसमनुप्राप्यअस्तंयातिदिवाकरइत्यनेनापितथात्वात् अपामार्गशा
खाचतुंबीचमर्दकसीतालोष्ठयुक्तास्नानमध्येशिरसउपरिभ्रामणीयापुनःपुनः अपामार्गमथोतुंबीप्रपुंनाटमथापरं भ्राम
येत्स्नानमध्येतुनरकस्यक्षयायवैइतिब्रह्मपुराणात सीतालोष्ठसमायुक्तसकंटकदलान्वित हरपापमपामार्गभ्राम्यमाणःपुनःपुनरि
तिभ्रामणमंत्रलिंगाच्च यमतर्पणंचउपवीतिनप्राचीनावीतिनवाकार्यं यज्ञोपवीनाकार्यंप्राचीनावीतिनाथवा देवत्वंचपितृत्वंच
यमस्यास्तिद्विरूपतेतिवचनात हेमाद्रिकालादर्शकृष्णतिलसहितत्रिरांजल्यादिरूपंदैवपित्र्यधर्मविकल्पोद्रष्टव्यः अत्रचदीप
दानानंतरंयथाशक्तिशैवविप्रान्भोजयित्वामाषपत्रशाकमिश्रंनक्तभोक्तव्यं ततःप्रेतचतुर्दश्यांभोजयित्वातपोधनान् शैवा
न्विप्रांधर्मपरान्शिवलोकेमहीयते माषपत्रस्यशाकेनभुक्त्वातत्रदिनेनरः प्रेतचतुर्दशीकालेसर्वपापैःप्रमुच्यते नक्तंप्रेतचतुर्द
श्यांयःकुर्याच्छिव तुष्टये नततक्रतुशतेनापिप्राप्यतेपुण्यमीदृशमितिलिंगपुराणवचनेभ्यः अमावास्यायामपिचतुर्दशीवदेवप्रा
तरभ्यंगस्नानंकर्तव्यं भविष्योत्तरेचतुर्दशीस्नानमभिधायएवंप्रभातसमयेत्वमावास्यांनराधिप स्नात्वादेवान्पितॄन्भक्त्यासं
पूज्याथप्रणम्यचेति एवंस्नात्वेत्यतिदेशात नारदसंहितायामपितिथित्रयंदीपावलीत्वेनाभिधायतैलेलक्ष्मीरित्यादिनातत्राभ्यं
गस्नानविधानाच्च अमावास्यांकर्तव्यदीपदानंचयद्यपिद्युत्वात्पार्वणश्राद्धमित्यभिधायततोपराह्णसमयइत्यादिदिरात्रकर्त
व्याभिधानमध्येदीपमालाकुलेरम्येविध्वस्तध्वांतसंचये प्रदीपदोषमहितेशस्तेदीपागमेशुभइत्यभिधानात्सर्वैरपिश्राद्धानं
तरंकर्तव्यमितिप्रतीयते श्राद्धदिनेदोषव्यापिन्यांचतस्यांतत्संभवत्येव तथापियदापूर्वेद्युरेवप्रदोषव्यापिन्यमावास्याश्राद्ध ९४

191
194

योग्याचद्वितीयदिनेतदापूर्वेद्युरेवप्रदोषेलक्ष्मींयथाविभवंपूजयित्वादीपदानंचकृत्वाब्राह्मणादिभ्यश्चभोजनंदत्वास्वयंबांधवैःसहभो
जनंकार्यं दिवातत्रनभोक्तव्यमृतेबालातुराज्जनात प्रदोषसमयेलक्ष्मींपूजयित्वायथाक्रमं दीपवृक्षास्तथाकार्याःशक्त्यादेवगृ
हेषुचेत्याद्यभिधायब्राह्मणान्भोजयित्वादौसंभोज्यचबुभुक्षितान् अलंकृतेनभोक्तव्यंनववस्त्रोपशोभिना स्निग्धैर्मुग्धैर्विद
ग्धैश्चनिर्वृत्तैर्बांधवैःसहेत्यादिस्यपुराणेभिधानात विधेयत्वेपिकालविरोधेक्रमस्यानादृतत्वात् वस्तुतस्तुस्वकालप्राप्त
श्राद्धानुवादात्तक्रमस्यात्राविधानमेव औत्सर्गिकाःस्वंजतिथेरेवप्रायोव्यवहारविषयत्वेनतस्यप्राप्तत्वात् उल्काादानमपि
प्रदोषएवज्योतिर्निबंधविहितंतत्रैवकार्यं तुलासंस्थेसहस्रांशौप्रदोषेभूतदर्शयोः उल्काहस्तानराःकुर्युःपितॄणांमार्गदर्शनमि
तिस्पष्टंचपूर्वप्राप्त्युक्तमुक्तत्वेतत्रैव अमावास्यायदारात्रौदिवाभागेचतुर्दशी पूजनीयातदालक्ष्मीर्विज्ञेयासुखरात्रिकेति प्र
तिपद्यपिदीपावलित्वात्प्रातरभ्यंगस्नानंकृत्वाद्यूतादिकर्तव्यं तस्माद्द्यूतंप्रकर्तव्यंप्रभातेतत्रमानवैः तस्मिन्द्यूतेजयोयस्यतस्य
संवत्सरंशुभं पराजयोद्विरुद्धंतुलब्धनाशस्ततोभवेत् श्रोतव्यंगीतवाद्यादिस्वनुलिप्तैःस्वलंकृतैः विशेषवच्चभोक्तव्यंप्रशस्तैः
बांधवैःसह तस्यांनिशायांकर्तव्यंशय्यास्थानंसुशोभनं गंधर्वस्त्रैस्तथापुष्पैरलैर्माल्यैरलंकृतं दीपमालापरिक्षिप्तंतथाधूपे
नधूपितं दयिताभिश्चसहितैर्नेयासाचभवेन्निशा नववस्त्रैश्चसंपूज्याद्विजसंबंधिबांधवाइत्यादिस्यपुराणात् तथातस्यां
सर्वदिनसंतोषेणावस्थानंप्रदोषेचबलिराजंसंपूज्यतदुद्देशेनदीपानामन्येषांचवस्तूनांयथाविभवंदानंसर्वेकुर्युः योयादृ
शेनभावेनतिष्ठत्यस्यांयुधिष्ठिर हर्षदैन्यादिरूपेणतस्यवर्षंप्रयातिहि रुदितोरोदनेवर्षंहृष्टोवर्षंप्रहृष्यति भुक्तोभोक्ताभवेद्व
र्षंस्वस्थस्वस्थोभविष्यति तस्मात्प्रहृष्टैस्तुष्टैश्चकर्तव्याकौमुदीनरैः वैष्णवीदानवीयंतिथिःपैत्रीयुधिष्ठिरेति लोकश्चापिगृ
हस्यांतःशय्यायांशुक्लतंदुलैः संस्थाप्यबलिराजानंफलैःपुष्पैश्चपूजयेत बलिमुद्दिश्यदीयंतेदानानिकुरुनंदन यानितान्य
क्षयाण्याहुर्मयेतत्संप्रदर्शितमितिचभविष्योत्तरात् अत्रवचनेयद्यपिबलिपूजायांकालविशेषोनोक्तस्तथाप्येतत्पूर्वचनोक्त
राजकर्तव्यतत्पूजायांकृत्वेतत्सर्वमेवहरात्रौदैत्यपतेर्बलेः पूजांकुर्यान्नृपःसाक्षाद्भूमौमंडलकेकृते बलिमालिख्यदैत्येंद्रंवर्ण
कैःपंचरंगकैः सर्वाभरणसंपूर्णंविंध्यावल्यासमन्वितं कूष्मांडबाणजंभोरुमुरुदानवसंवृतं संपूर्णहृष्टवदनंकिरीटोत्कटकुं

का०त० ८लं द्विभुजंदैत्यराजानंकारयित्वान्नृपः स्वयंगृहस्यमध्येशालायांविशालायांततोचयेदितिरात्रेः कालत्वाभिधानात्सर्वेषामपितत्रस
९५ एवकालः शुक्लतंदुलनिर्मेयाप्रतिमालादृशीवलेः बल्युद्देशेनदीपदानमुक्तंवामनपुराणे वामनकर्तृकबलिवरदानव्याजेनका
र्तिकशुक्लपक्षमधिकृत्यवीरप्रतिपदंप्राप्यतवभावीमहोत्सवः तत्रवानरशार्दूलहृष्टाःपुष्टाःस्वलंकृताः अर्घ्यदीपप्रदानेनअर्च
यिष्यंतिमानवाः बलिराजनमस्तुभ्यंविरोचनसुतप्रभो भविष्येंद्रसुराराते पूजेयंप्रतिगृह्यतामितिइयंचप्रतिपद्बलिपूजनेपूर्ववि
द्धाग्राह्या कालव्याप्तिलाभात्प्रतिपद्यप्यमावास्येतियुग्मवाक्यात् श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी पूर्वविद्धैवकर्तव्याशि
वरात्रिर्बलेर्दिनमितिबृहद्यमवचनाच्च यदपिगवांपूजनंक्रीडनंचात्रैवप्रतिपदि नंदादयेतुतत्रैवपूजयेत्सुरभीस्तथेतिस्त्रियः
क्रीडंत्यमावास्यांगावोनंदासुकार्तिकइतिविहितंतत्रापिसापूर्वविद्धैवग्राह्या प्रतिपद्दर्शसंयोगेक्रीडनंतुगवांमतं परविद्धेषु
यःकुर्यात्पुत्रदारधनक्षयः यावृद्धःप्रतिपन्मिश्रातत्रगाःपूजयेन्नृपः पूजयेत्त्रीणिवर्धंतेप्रजागावोमहीपतिरितिदेवलवच
नात् नंदाप्रतिपत्संबंधिन्युदयेसूर्योदयोपलक्षितेप्रातःकाले यद्यप्येतद्वचनात्पूर्वाह्णेक्रीडनंगवामितिवचनाच्चतत्कालव्या
पित्युत्तराप्रतिपत्क्रीडनादौप्रतिभाति तथापिगवांक्रीडनेयत्ररात्रौदृश्येतचंद्रमाः सोमोराजापशून्हंतिसुरभीपूजकंतथे
तिदेवलेननिषिद्धत्वात्सातत्रनग्राह्या अतएवचंद्रदर्शनाभावेक्वचिदुत्तरापितत्रग्राह्यत्वेनोक्ता त्रियामगादर्शतिथीभवेत्
चेत्सार्धरात्रियामाप्रतिपद्वृद्धौ दीपोत्सवेतेमुनिभिःप्रदिष्टेअतोन्यथापूर्वयुतेविधीयेइति पुराणसमुच्चयेपि वर्धमानति
थौनंदायदासार्धत्रियामिका द्वितीयावृद्धिगामीस्यादुत्तरातत्रवोच्यतइतिउत्तरानंदातत्रगोक्रीडनादौ पूर्ववचनेपिदीपोत्स
वपदंनइमेत्ववगंतव्येते तत्रकालानुग्रहलाभात् नतुबलिपूजादि कालबाधप्रसंगात् चंद्रदर्शनाभावलाभार्थंसार्धत्रियामोक्तिसा
मर्थ्याच्च कार्तिकेशुक्लपक्षेतुविधानद्वितयंभवेत् नारीनीराजनंप्रातःसायंमंगलमालिकेतिब्रह्मपुराणवचनोक्तंतुकर्मद्वयंस्वल्प्या
यामपिद्वितीयायुक्तायामिवप्रतिपदिकर्तव्यं लभ्येतयदिवाप्रातःप्रतिपद्घटिकाद्वयं तस्यांनीराजनंकुर्यात्सायंमंगलमालि
केतिभविष्यपुराणात् प्रातर्वायदिवालभ्येतप्रतिपद्घटिकाद्वयं द्वितीयायांतदाकुर्यात्सायंमंगलमालिकां आश्विनांतेयदाद
र्शेनारीनीराजनंभवेत् नारीणांतत्रवैधव्यंदेशेदुर्भिक्षमेवच कार्तिकशुक्लपक्षादावमावास्यांघटिद्वयं देशभंगभयान्नैवकुर्यान्मं ९५

193
1942

गलमालिकामितिदेवीपुराणगतान्वयव्यतिरेकवचनाच्चेति क्वचित्कौमुदीतिथित्रयपूर्वभावित्रयोदश्यामपियमायदीपदान
मुक्तं अश्वयुक्कृष्णपक्षेतुत्रयोदश्यांनिशामुखे यमदीपंवहिर्दद्यादपमृत्युर्विनश्यतीति तत्रमंत्रोप्युक्तः मृत्युनापाशदं
डाभ्यांकालेनामलयासह त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतांनमइति अत्रचतुर्दश्यमावास्यादिकर्तव्योक्तादीपदानल
क्ष्मीपूजादिषुमंत्रादिर्विशेषःप्राच्यनिबंधे तत्रोल्काग्रहणेमंत्रः शस्त्राशस्त्रहतानांचभूतानांभूतदर्शयोः उज्वलज्यो
तिषादेहंदहेयंव्योमवह्निनेति तद्दानेअग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम उज्वलज्योतिषादग्धास्तेयांतुपरमां
गतिमितितद्विसर्जने यमलोकंपरित्यज्य आगतायेमहालये उज्वलज्योतिषावर्त्मप्रपश्यंतोव्रजंतुतइति लक्ष्मीपूजा
नंतरंप्रार्थना नमस्तेसर्वदेवानांवरदासिहरिप्रिये यागतिस्त्वत्प्रपन्नानांसामेभूयात्त्वदर्शनादिति सुखरात्र्यांप्रदोषेतु
कुबेरंपूजयंतिवै धनदायनमस्तुभ्यंनिधिप धिपायच भवंतुत्वत्प्रसादान्मेधनधान्यादिसंपदइति दीपदाने अग्नि
ज्योतिरविर्ज्योतिश्चंद्रोज्योतिस्तथैवच उत्तमःसर्वज्योतिष्षुदीपोयंप्रतिगृह्यतामिति भविष्येसुखरात्रेरूपःकालेप्र
दीपत्वालितालये सर्वान्विंधूनबंधूंश्चवाचाकुशलयार्चयेत् प्रदीपवंनदंकार्यंलक्ष्मीमंगलहेतवे गोरोचनाक्षतंचैवे
वदद्यादंगेषुसर्वतः विश्वरूपस्यभार्यासिपद्मेपद्मालयेशुभे महालक्ष्मीर्नमस्तुभ्यंसुखरात्रिंकुरुष्वमे वर्षाकालेमहा
घोरेयन्मयादुष्कृतंकृतं सुखरात्रिप्रभातेषुतन्मेलक्ष्मीर्व्यपोहतु यारात्रिःसर्वभूतानांयाचदेवेष्ववस्थिता संवत्सरप्रिया
याचसाममास्तुमंगला मातात्वंसर्वभूतानांदेवानांसृष्टिसंभवा आख्याताभूतलेदेविसुखरात्रिनमोस्तुतइति दीपा
वलीप्रतिपदुत्तरयमद्वितीयाख्याद्वितीयाव्रत्यलिंगपुराणे कार्तिकेतुद्वितीयायांशुक्लायांभ्रातृपूजनं यानकुर्याद्वि
नश्यंतिभ्रातरःसप्तजन्मसु तस्याइतिशेषः भविष्योत्तरेतु प्रथमाश्रावणेमासितथाभाद्रपदेपरा तृतीयाश्वयुजे
मासिचतुर्थीकार्तिकेभवेत् श्रावणेकलुषानाम तथाभाद्रेच मिला आश्विनेप्रेतसंचाराकार्तियाम्यकामतेतिच

नस्त्रोद्वितीयाउपक्रम्यप्रथमायांकिंचिद्रात्रायाश्चित्तंद्वितीयायांसरस्वतीपूजा तृतीयायांश्राद्धंकर्तव्यत्वेन सूचयित्वा चतुर्थ्यामि
स्यांकर्तव्यमुक्तं कार्तिकेशुक्लपक्षेतुद्वितीयायांयुधिष्ठिर यमोयमुनयापूर्वंभोजितःस्वगृहेस्वयं अतोयमद्वितीयासाप्रोक्तालोके
युधिष्ठिर अस्यांनिजगृहेपार्थनभोक्तव्यमतोबुधैः यत्नेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनं दानानिचप्रदेयानिभगिनीभ्योविशे
षतः स्वर्णालंकारवस्त्राणिपूजासत्कारभाजनैः सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः प्रतिपन्नकामित्रभगिन्यइतिहेमाद्रिः
पितृव्यभगिनीहस्तात्प्रथमायांयुधिष्ठिर मातुलस्यसुताहस्ताद्द्वितीयायांतथान्टप पितुर्मातुःस्वसुःकन्येतृतीयायांतयोः
करात् भोक्तव्यंसहजायाश्चभगिन्याहस्ततःपरं पितृव्यभगिनीपितृव्यसंबंधेनभगिनीपितृव्यकन्येत्यर्थः सर्वासुभगिनी
हस्ताद्भोक्तव्यंबलवर्धनं यस्यांतिथौयमुनयायमराजदेवःसंभोजितःप्रतिजगत्स्वसृसौहृदेन तस्यांस्वसाकरतलादिहयो
भुनक्तिप्राप्नोतिरत्नशुभगं धनमुत्तमंसइति अन्यत्रापि यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत् अर्घश्चात्रप्रदातव्योयमा
यसहजद्वयैः भ्रातृभगिनीभिः एह्येहिमार्तंडजपाशहस्तयमांतकालोकधरामरेश भ्रातृद्वितीयाकृतदेवपूजांगृहाणचा
र्घंभगवन्नमस्ते धर्मराजनमस्तुभ्यंनमस्तेयमुनाग्रज पाहिमांकिंकरैःसार्द्धंसूर्यपुत्रनमोस्तुते यमस्वसर्नमस्तेस्तुयमु
नेलोकपूजिते वरदाभवमेनित्यंसूर्यपुत्रिनमोस्तुतइतियमुनापूजानंतरंतत्प्रणामः प्रातश्चंद्रोदयेवास्तेयेवल्कण्णचतुर्दशी
सैवाभ्यंगार्पूर्वेद्युरात्मापूर्वावायदिवोत्तरा यत्तुचतुर्दशसंज्ञाभिस्तदनंतरमीरितं यमस्यतर्पणंतच्चकार्यंतत्रैवयत्पुनः दीपदा
नंतत्रैवाह्निविहितंरजनीमुखे पूर्वेतत्कर्मयोग्यायांसंभवक्रममप्यदः प्रातरेवसमाप्तायांत्यक्त्वाकालबलात्क्रमं प्रदोषे
वर्तमानायांपूर्वस्यामेवसंमतं प्रातश्चंद्रोदयेवापियदानस्याद्दिनद्वये तदाद्यदिनगाग्राह्यागौणकालेयतोस्तिसा दिनद्व
येतत्रसतीपूर्णत्वात्प्रथमामता लक्ष्मीपूजादीपदानाद्यमावास्याप्रदोषगं श्राद्धेतत्कर्मयोग्यायांसंभवक्रममप्यदः प्रदो
षगायांपूर्वेद्युःपूर्वस्यामेवपूर्ववत् बलिपूजाप्रदोषेयाशुक्लोर्जप्रतिपत्कृता कर्तव्यापूर्वविद्धायांसाकालव्याप्तितोनरैः ९६

195
154

गोत्रीडनादितत्रैवयदुक्तंतच्चपूर्वतः कार्यंपौर्वाह्णिकमपिनिषेधाच्चंद्रदर्शने अतएवयदासार्धत्रियामाप्रतिपद्भवेत् पूर्वत्रच
त्रियामामापरत्रैवतुतत्तदा नारीभीराजनंप्रातःसायंमंगलमालिका तत्रैवोक्तंद्वयंतद्वितीयायुजितात्तिभौ कार्यमुहूर्तमात्रायाम
पिस्यादितिनिर्णयः यश्चफाल्गुनपौर्णमास्यांप्रदोषेशुष्ककाष्ठकरीषसंचयस्यरक्षोघ्नैर्मंत्रैरग्निनादीपनंकिलिकिलावालध्य
यपूर्वकंतस्याग्नेस्त्रिःपरिभ्रमणंनिःशंकनानाविधभगलिंगनामकीर्तनमिश्रंहास्यगानादिबालानांपरस्परंदारुखड्गयुद्धा
दीत्येवंरूपस्तदुत्तरप्रतिपदिचवंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच अतस्त्वंपाहिनोदेविविभूतेभूतिदाभवेति मंत्रेणप्रातः
कृत्यानंतरंहोलिकाविभूतिवंदनमित्येवंरूपस्तिथिद्वयसाध्योहोलिकोत्सवोभविष्योत्तरेऽभिहितस्तत्रपौर्णमासीपूर्वविद्धैवग्रा
ह्या युग्मवाक्यात् श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनामितिबृहद्यमवचनाच्च हुता
शनीहोलिकापौर्णिमा पूर्वविद्धाप्रकर्तव्याफाल्गुनीपूर्णिमातथेतिशिवरहस्यसंवादात् होलिकादीपनंचप्रदोषेकार्यं तथा
चपृथ्वीचंद्रोदयेदुर्वासोवचनं निशागमेतुपूज्येतहोलिकासर्वदासुखैरिति तत्रभद्रायांसत्यांतुनकर्तव्यं भद्रायांदीपिता
होलीराष्ट्रभंगंकरोतिवै नगरस्यचनैवेष्टातस्मात्तांपरिवर्जयेदितिपुराणसमुच्चयवचनात् भद्रायांद्वेनकर्तव्ये श्रावणीफा
ल्गुनीतथा श्रावणीन्टपतिंहंतिग्रामंदहतिफाल्गुनीतिस्मृत्यंतराच्च एवंसतिभद्रायांविहितंकार्यंहोलिकायाःप्रपूजनमित्या
दिनिबंधाभासवचनंहेयं तथाचसतियेवप्रदोषवर्ततेपूर्वापरावासैवग्राह्या तत्रपूर्वस्यांप्रदोषेभद्रायाअसत्त्वेसम्यगे
व यदातुतत्रभद्राभवतितदाशेषःसूर्योदयःस्मृतइतिपरिभाषितसूर्योदयात्पूर्वंभद्रांतंप्रतीक्ष्यहोलिकादीपनाययदिक
श्चिदपिकालोलभ्येततदाप्रदोषातिक्रमेपितत्रैवतत्कर्तव्यं राकायामह्न्यादूर्ध्वंचतुर्दश्यांयदाभवेत् होलोभद्रावसाने
चनिशीथांतोपदीपयेदितिभविष्योत्तरात् दिनार्द्धात्परतोपिस्यात्फाल्गुनीपौर्णिमायदि रात्रौभद्रावसानेचहोलिकांत
त्रदीपयेदितिपुराणसमुच्चयवचनाच्च निशीथांतेनिशीथोत्तरं एवंसतिमध्यरात्रमतिक्रम्यविष्टिःपुच्छंयदाभवेत् प्र

का०त०
९७

दोषेज्वालयेद्वह्निंसर्वसौभाग्यदायकं प्रदोषान्मध्यरात्रांतंहोलिकापूजनंशुभं इत्यादिनिबंधाभासवचनंहेयं यदातुपूर्व
त्रभद्रारहितःकालोनलभ्यते उत्तरदिनेचसूर्यास्तात्पूर्वमेवपूर्णिमासमाप्तानदाभद्रापुच्छेज्योतिषिकप्रतिष्ठपूर्वदिनएवतत्का
र्यं पृथिव्यांयानिकार्याणिशुभानिचाशुभानिच तानिसर्वाणिसिध्यंतिविष्टिपुच्छेनसंशयइति लल्लवचनात् यदात्वभिन्ने
वविषयेउत्तरापौर्णिमासार्धयामत्रयमितातताधिकावाप्रतिपच्चोत्तरदिनेवृद्धिगामिनीतदाप्रतिपत्प्रदोषएवपौर्णमास्यु
त्तरभाविनिहोलिकादीपनीयानतुपूर्वरात्रौविष्टिपुच्छे तथाचभविष्योत्तरे सार्धयामत्रयंपूर्णाद्वितीयेदिवसेयदा प्रतिप
द्वर्धमानातुतदासाहोलिकास्मृतेति तथाचयापूर्वप्रदोषसत्त्वेपिउत्तरदिनप्रदोषेपितत्रैववाक्यैकतदेशावावर्ततेसास्
तरामुत्तराग्राह्या पूर्वरात्रेभद्राव्याप्तत्वादुत्तरत्रप्रदोषेलाभाच्च पूर्वोक्तंच पूर्वविद्धाग्राह्यत्वमुत्तरत्रप्रदोषास्पर्शेवृद्ध्यभावे
च नचैवंकालव्यापिशास्त्रादेवतत्सिद्धेव्यर्थं विशेषवचनमितिवाच्यं पूर्वदिनेपिप्रदोषास्पर्शेप्रतिपद्वृद्ध्यभावेचसार्थ
क्यात् तत्रपूर्वरात्रौभद्रारहितदीपनकाललाभात्प्रदोषव्रतस्येषुचनक्तभोजनादिषुतत्पूर्वभाविनःसायाह्नस्यगौणकालत्व
दर्शनात्प्रतिपक्षस्येप्युत्तरदिनेचतत्प्रसक्तेः सत्त्वात् तत्रपूर्वरात्राविवभद्रापुच्छेतदलाभेपिवातत्कर्तव्यत्वार्थंपूर्वविद्धाग्रा
ह्यत्ववचनं एतादृशविषयमेव दिवाभद्रायदारात्रौरात्रिभद्रायदादिवा साभद्राभद्रदायस्माद्भद्राकल्याणकारिणीतिज्योति
षिकवचनमिति नचयदापूर्वारात्रिःसर्वाभद्राव्याप्ताउत्तरदिनप्रदोषश्चपौर्णमासीशेषयुक्तोपिग्रस्तचंद्रोदयारात्रिप्रथ
मघटिकायामेववाचंद्रग्रासाद्ग्रहणाक्रांतस्तदासर्वेषामेववर्णानांसूतकंराहुदर्शने इत्यशुचित्वात्कथंतत्रतदनुष्ठानमि
तिवाच्यं तदुत्तरमेवस्नात्वाकर्माणिकुर्वीतशृतमन्नंविवर्जयेदित्यभिधानात्स्नानोत्तरंनित्यनैमित्तिकेष्वधिकाराविधानात्
नचतत्रग्रहणनिमित्तकानामेवकर्मणांग्रहणं स्मार्तकर्मपरित्यागोराहोरन्यत्रसूतकइतितत्रसर्वस्मार्तावश्यकर्मणांप्रतिप्र ९७
सवात् राहोःसूतकादितिहेमाद्रिः अतोग्रहणेवेधप्रभृतिभोजनंग्रहणांतरितपक्वोपयोगश्चनिषिद्धोनान्यत्किंचित्

197
1942

काम्यानितुमहाविधप्रसूत्येवनिषिद्धानीतिप्रदोषव्यापिनीग्राह्यापरापूर्वेतिफाल्गुनी होलिकादीपनेपूर्वाप्रदोषेयदिभ
द्रया व्याप्तस्तदापुरासूर्योदयतःपरिभाषितात् तन्मुक्तोयदिलभ्येतकालस्तत्रापिदीपनं अलाभेविष्टिपुच्छेतत्पूर्णिमायदि
वत्तरा सार्धयामत्रयमिताप्रतिपद्वृद्धिगामिनी तदोत्तराप्रदोषेतत्प्रतिपद्येवचान्यथा। पूर्वस्यामपिभद्रांतरपिस्यादिति
निर्णयः इतिनानातिथिसाध्यकौमुदीहोकोत्सवनिर्णयः अथश्राद्धतिथिनिर्णयः तन्निर्णयश्चवेलारूपश्राद्धकर्मका
लज्ञानाधीनः वेलाचतत्तच्छ्राद्धभेदेनव्यवस्थितेतिश्राद्धभेदानिरूपणीयाः तत्रपार्वणैकोद्दिष्टरूपेणद्विविधेश्राद्धे पार्वण
भेदास्तावत् तत्रयाज्ञवल्क्यः अमावास्याष्टकावृद्धिःकृष्णपक्षोयनद्वयं द्रव्यब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः व्यतीपातोग
जच्छायाग्रहणंचंद्रसूर्ययोः श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताइति अष्टकाशब्दःकर्मनामधेयमप्यत्रतदधिकरण
कालपरः पूर्वोत्तरतिथ्योरुपलक्षणंच तेनामावास्याष्टकाकृष्णपक्षव्यतीपातगजच्छायानांमुख्यमेवकालत्वं वृद्धिसंक्रमण
द्रव्यादिसंपद्ग्रहणरुचीनांतुसाक्षान्निमित्तभूतानांतदुपलक्षणत्वेन अत्रवचनेनक्वचिद्विहितस्यश्राद्धकर्मणःकालमात्रसं
बंधःक्रियतेयइष्ट्येत्यादिवचनेनेष्ट्यादीनां अस्यांस्मृतौकालानालिंगितस्यश्राद्धकर्मणइष्ट्यादेरिवक्वचिदविधानात् त
थात्वेसायंचप्रातश्चजुहोतीतिवत्सकृत्प्रयोगासंभवन्निवेशानेककालसमुच्चयवशेनाभ्यासमात्रापत्तेः स्मृत्यंतरगतांस्त
त्तच्छ्राद्धविधीनपेक्ष्यतत्करणस्यतत्कालविशिष्टानामेवतेषांतत्रविधानेनासंभवात् अनुवादमात्रस्यचसंभवतिविधावन्या
य्यत्वात् तदभावेचेतिकर्तव्यताकांक्षणेनोत्तरत्रतद्विधानानुपपत्तेः तेनान्यथावाचोयुक्त्याशिष्टविधिरेवायं एतेश्राद्ध
कालाः एतेषुकालेषुश्राद्धंकुर्यादित्यर्थः तत्रविध्यैकत्वेपिपृथक्कर्मासंभवन्निवेशानेककालवशेनसंख्यान्यायेनन्याय
सुधाकरमतेसिध्यदपि यावत्कालंश्राद्धभेदोयदाग्नेयइत्यत्राग्नेयभेदवत् मुख्यमतेतुनसिध्यतीतिवस्तुतोत्रवाक्यतंत्र
मात्रं पर्यवसानगत्यातुविधिभेदएव यावत्कालं कालानांविधेयत्वेनगुणभावेनचैकविध्यनुप्रवेशासंभवेपिनिमित्तानामत

यात्वेनतदसंभवात्तदर्शे विधिभेदस्यावश्यकत्वात्तन्निश्चत्वाच्चकालस्नानंतत्रापितदौचित्यात्. तद्भेदेचविहितस्यविधानायोगात्
प्रतिविधिभेदएवश्राद्धानांस्मृत्यंतरेषुभिन्नभिन्नप्रकरणगतैः कालादियुक्तविधिभिःस्पष्टएवभेदइत्यत्रापितदेकवाक्यतालाभा
यतंथैवयुक्तं एवमेवंजातीयकेष्वपिवचनेषुद्रष्टव्यं गोतमीयेपि अमावास्यायांपितृभ्योदद्यात् पंचमीप्रभृतिवापरपक्षस्य
यथाश्राद्धंसर्वस्मिन्वाद्रव्यदेशब्राह्मणसंनिधानेवा कालनियमइतित्रिभिः सूत्रैर्विधास्यमानानां त्रयाणांश्राद्धानांतदुपल
क्षितानांचान्येषामपिसहोपक्रममात्रमथश्राद्धमितिसाहस्राःसाद्यस्काः अथेष्ट्ययनानीत्यादिवत्. अतएवहरदत्तेनतत्व्या
ख्यावसरएवपंचविधंश्राद्धंप्रपंचेनदर्शितंनतुविधिः अतएवनैकफलत्वंनाप्येकप्रयोगत्वंवक्ष्यमाणश्राद्धानां सहोपक्रमप्र
योजनंच अथैतन्मनुः श्राद्धशब्दंकर्मप्रोवाचप्रजानिःश्रेयसायेत्यापस्तंबीयवन्नार्थवादत्वं स्तुत्यप्रतीतेः किंतुशक्तितः
प्रकर्षाद्गुणसंस्कारविधिवत्तस्येत्यादिवक्ष्यमाणधर्माणांसाधारण्यं नचगोतमोक्तानांब्राह्मणविशेषविधिप्रतिषेधादिद्वि
त्रधर्माणांसाधारण्येपिकाविस्तृतिः ऊहबाधविषयभूतानामसंभवात्सामान्यविध्यंतानांहोमपिंडदानादीनांतेननुक्तेरे
व यद्वासाहस्राःसाद्यस्काइत्येकसंज्ञयायुगपत्प्रस्तुत्यपश्चात्क्रमेणविहितायागानिकायिनउच्यंतेतेषांप्रथमःसध
र्मआम्नातस्तत्रोत्तरेषुसौमिकाःधर्माउतलद्धर्माइतिसंशयेअव्यक्तत्वात्सौमिकाइतिप्राप्तेब्रूमः एकनिकायिवर्तित्वंएक
नामकत्वंचावांतरसामान्यमस्तीतिपूर्वस्यसधर्मस्यैवोत्तरेषुविध्यंतइतिसिद्धांतःनिकायित्वसिध्यासाद्यस्कादिवच्छ्राद्ध
शब्दवत्वाद्धापूर्वदर्शश्राद्धविध्यंतस्योत्तरेष्वपरपक्षश्राद्धादिष्वतिदेशासिद्धिरेवप्रयोजनमस्तु दृश्यतेहिमनुयाज्ञवल्क्या
दिस्मृतिषुमत्स्यमार्कंडेयादिपुराणेषुचबहुषुधर्मनिबंधेषुश्राद्धशब्दवत्वरूपात्कचिद्देवतादिसामान्यरूपादपिचोद
नासामान्यात्सर्वश्राद्धेषुदर्शश्राद्धविध्यंतातिदेशः केषुचिदेवतुकातीयापस्तंबीयादिसूत्रेष्वपरपक्षश्राद्धविध्यंताति
देशोभिमतःतेषुतत्रैवधर्मोपदेशात् यत्तुमेधातिथिनाश्राद्धशब्दोमावास्यायांविहितएवपिंडदानब्राह्मणभोजनादि ९८

199/1942

रूपेकर्मणिमुख्योन्यत्रतुनित्यश्राद्धादौकुंडपायिनामयनमासमग्निहोत्रंजुहोतीतिश्रूयतेअत्रप्रकृताग्निहोत्रेमासाख्योगुणोविधी
यतेउतकर्मांतरमितिसंशयेमासलक्षणोगुणोविधीयेत अप्राप्तत्वादितिप्राप्तेब्रूमःकिंमासएवविधेयउपसद्भिश्चरित्वेत्युपसदोपि
नाद्यः नित्याग्निहोत्रेप्राप्तानामुपसदामपिविधातव्यत्वात्नेतरः प्राप्तेकर्मण्यनेकगुणविधौवाक्यभेदापत्तेः तस्माद्विशिष्टकर्मां
तरविधिरित्यधिकरणार्थसंक्षेपः तत्रअग्नयेहोत्रंयस्मिन्कर्मणितदग्निहोत्रमित्येवमवयवार्थेनित्याग्निहोत्रेसंपाद्यतन्ना
मधेयत्वंतावन्निर्णीतंअतस्तत्रैवायंशब्दोमुख्यः नचोभयत्रमुख्यत्वंअनेकार्थत्वस्यान्याय्यत्वात्ततस्तन्नाम्नाव्यपदेशस्तु
द्धर्मप्राप्त्यर्थइतिमासाग्निहोत्रेतच्छब्दवत्कौणाधर्मातिदेशार्थइतिनाम्नामावास्याश्राद्धधर्मातिदेशःसर्वश्राद्धेष्वित्युक्तं त
च्छ्राद्धंद्विविधंपंचविधंअष्टविधंद्वादशविधमित्यादिमुख्यतयैवसर्वत्रश्राद्धशब्दप्रयोगदर्शनान्निबंधृभिश्चसर्वानुवृत्त
श्राद्धशब्दवाच्योपाधिनिर्वचनक्लेशस्वीकरणान्नातीवादरणीयं श्राद्धशब्दस्त्वेकेनोपाधिनाप्रवर्तमानःसर्वत्रैषिशब्दवन्मु
ख्यएवसचोपाधिःश्राद्धतत्वविवेचनेनिष्कृष्यते गोभिलीयान्यपि अथश्राद्धं अमावास्यायांपितृभ्योदद्यात्पंचमीप्रभृ
तिवापरपक्षस्ययदहरुपपद्येतेतिसूत्राणिगोतमीयवदवच्छेदेनव्याख्येयानिपंचमीप्रभृतिवेतिविकल्पाभिधानंतुशास्त्रां
तरोक्तप्रतिपत्प्रभृतिपक्षाभिप्रायेणनत्वमावास्याभिप्रायेण तस्यांपृथक्श्राद्धविधानात् अतएवतद्भाष्यकृतातथैवोक्त्वा
प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीमितियोगीश्वरवचनमुपन्यस्तं यत्तुतेनैवश्राद्धशब्दंश्राद्धमनेनभुक्तमितिवच्छ्राद्ध
प्रदेयान्नपरमंगीकृत्योत्तरेणैकवाक्यतयैवपूर्वसूत्रंव्याख्यातंनत्वधिकारार्थत्वेनपृथक्कृत्य यच्चगौडैःश्राद्धशब्देअ
ग्निहोत्रवद्यौगिकंद्वितीयंनामधेयमंगीकृत्यतथैवव्याख्यातंतदस्तुनाम सर्वथाकालविशिष्टंकर्मविधेयएवैते वस्तु
तस्तुपृथगेवाथश्राद्धमितिसूत्रं विध्येकवाक्यत्वेधिकारार्थथशब्दानन्वयात् नचपिंडपितृयज्ञानंतर्यंगार्ह्यस्यानंतर्य
वाथशब्देनोच्यतइत्युक्तं गृह्यसूत्रापेक्षयास्यग्रंथांतरत्वाद्विशेषतस्तयोरेवानुपस्थितेश्च पिंडपितृयज्ञानंतर्यस्यचा

का०त०
९९

न्वष्टक्वस्थलीपाकधर्मातिदेशेनामावास्यायांपिंडपितृयज्ञंविधायतत्श्राद्धमित्युक्त्वेतरदन्वाहार्यमितिशब्देनाभिधाना
दनुशब्दादेवसिद्धत्वात् पिंडपितृयज्ञप्रसंगेननक्षानंतर्यंविधातुमेवहिस्वतंत्रेग्रंथेविधास्यमानस्यदर्शश्राद्धस्यतत्रपराम
र्शः परामृष्टस्यचतस्यपश्चान्मासीनमितिसूत्रेणप्रातिमासिकत्वविधिःपिंडपितृयज्ञसाहित्येन अतएवदक्षिणाग्नौह
विषःसंस्करणमित्यादिनापिंडपितृयज्ञस्यैवाग्नेइतिकर्तव्यताविशेषविधिर्नप्रसंगइतिन्यायेन एवंसतिगौतमीयादिग
तस्यसामान्योपक्रमस्याप्यधिकारमात्रार्थित्वेनकर्मविधित्वाभावात्कालसमभिव्याहृतानामेवविशिष्टविधित्वेपेणत
द्विधित्वात्प्रतिकालंश्राद्धकर्मभेदेसति अमावास्यायाःकृष्णपक्षांतर्गतत्वेपिकृष्णपक्षश्राद्धाद्भिन्नतच्छ्राद्धं अभेदेयाज्ञ
वल्क्यादिवचनेषुपृथगमावास्याग्रहणवैयर्थ्यापत्तेः नचायनविषुवतीरिवप्राशस्त्यातिशयद्योतनार्थंतद्ग्रहणं अत
एवनिगमः अपरपक्षेयदहःसंपद्यतेअमावास्यायांतुविशेषेणेतिवाच्यं अवयुत्यानुवादवशेनतद्योतनेअमावास्या
पदान्वितस्यश्राद्धकालपदस्यानुवादत्वेनइतरान्वितस्यचविधित्वेनवैरूप्यापत्तेः पुनर्विधानादेवतद्योत्यतामितित्वेन्न
तस्यासंभवादेव नत्वप्रवृत्तप्रवर्त्तनात्मकंविधानमेकगोचरंपुनःसंभवति अतएवविधिभेदादेवकर्मभेदःशब्दांतरादी
नितुविधेःकर्मस्वरूपपरतामात्रंगमयंतीतिभेदन्यायरहस्यं अयनविषुवतोस्तुश्राद्धस्यविधानमेवगोबलीवर्दन्याये
नतदितरसंक्रांतिपरेणसूर्यसंक्रमपदेनतयोस्तस्याविधानात्स्पष्टंचगोबलीवर्दन्यायेनतस्यायनादिभिन्नपरत्वमुक्तं
शूलपाणिना इतरसंक्रांतिपेक्षयायनादिश्राद्धस्यावश्यकत्वज्ञापनंतुयदीदंनस्यात्तदाकिंस्यादितिपरिसंख्यान्याये
नापूर्वश्राद्धविधेरवलक्षणयासमभिव्याहृतसामान्यविधेःस्वविषयेतरविषयत्वक्लेशकरस्यप्रयोजनमात्रं भिद्यं
तएवचेतरसंक्रातिश्राद्धेभ्योयनादिश्राद्धानि यदिचात्राप्यमावास्याशब्दसमभिव्याहारात्कृष्णपक्षशब्दंतद्भिन्नति
थिसमुदायपरंकृत्वामावास्याश्राद्धंतेननविहितममावास्यापदेनैवविधीयतइत्युच्यतेसिध्यत्येवंतथापिपक्षश्रा ९९

201/1942

द्धादमावास्याश्राद्धस्यभेदः नत्वेतदत्रसंभवद्युक्तिकंयदिहिकृष्णपक्षशब्देनसर्वासुतत्तिथिषुभिन्नान्येवश्राद्धानिएकस्यै
वतावंतःप्रयोगावासमुच्चित्यविधीयेरंस्तदामावास्याशब्दसमभिव्याहारात्तद्भिन्नतिथिष्वेवतेनविधीयंते अमावास्या
यांत्वमास्याशब्देनैव आवश्यकत्वज्ञापनंचतत्प्रयोजनमित्युक्तिःसंभवेन्नत्वेतदस्ति श्राद्धभेदेतावत्प्रमाणमेवना
स्ति आवृत्तिरपि अश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिनइतिवद्वीप्साश्रवणाभावात्पक्षनिमित्तकश्राद्धस्यचव
संतनिमित्तज्योतिष्टोमवत्सकृत्करणेनैवसिद्धेरयुक्तायत्तुसर्वेष्वेवापरपक्षस्याहस्सुक्रियमाणेपितॄन्प्रीणातिकर्तु
स्तुकालाभिनियमात्फलविशेषइत्यापस्तंबवचनंतेनापिसमुच्चितासुसर्वतिथिषुश्राद्धंविधीयतेकिंतुपितृप्रीति
र्यस्यांकस्यांचिदप्यपरपक्षतिथौश्राद्धेक्रियमाणेविशिष्टाप्रतिपद्येवद्वितीयायामेवेत्यादिकालाभिनियमाद्यःश्रा
द्धंकरोतितस्यकर्तुस्तुतत्तत्कालनियमात्प्रथमेहनिक्रियमाणेस्त्रीप्रायमपत्यंजायतेद्वितीयेस्तेनाःपुत्राजायंतइत्या
दिःफलविशेषोभवतीत्युच्यतेव्याख्यातंचेत्थमेवतद्धरदत्तेन यदपिदेवलवचनंपार्वणश्राद्धमभिधायअनेनविधिना
श्राद्धंकुर्यात्संवत्सरंसकृत् द्विश्चतुर्वायथाश्राद्धंमासेमासेदिनेदिनइति अहरहःश्राद्धमुच्यतेनतुदिनेदिनइतिवीप्सा
श्रुत्याऽपरपक्षश्राद्धमवराम्यतइतिशूलपाण्युक्तिर्युक्ता संवत्सरप्रक्रमात्तस्यैवमासिमासीत्यत्रेवदिनेदिनइत्यत्राप्य
न्वयप्रतीतेः अतएवापस्तंबेननित्यश्राद्धंप्रक्रम्योक्तमेवंसंवत्सरमिति मासिमासीत्यनेनतुमासानुमासिकमित्युक्त
त्वात् अमावास्याश्राद्धंवामासिमासिचैवमित्युक्तत्वादपरपक्षश्राद्धंवागृह्यते यदहःसंपद्येतेतिकातीयसूत्रंतुत
दहर्ब्राह्मणानामेकत्वेतदेकवाक्यतयैवकर्क्कादिभिर्व्याख्यातं एवंगोभिलीयमपियदहरुपपद्येतेतिभिन्नमपिद्रव्यब्रा
ह्मणसंपत्तिरित्येतत्समानविषयतयानतुद्वयमपिकृष्णपक्षेएकदिनपक्षविधायकं येनपूर्वसूत्रस्यसमुच्चयेनसर्व
तिथिविधायकतागम्येत तेनसामान्यकृष्णपक्षेप्रतिपत्प्रभृतियस्यांकस्यांचिच्चतुर्दशीभिन्नायांतिथौपितृतृप्तिवि

शेषकामनायांपंचमीप्रभृतियस्यांकस्यांचित्ततोपिविशेषकामनायादशम्यादियस्यांकस्यांचित्ततोपिविशेषकामना
याममावास्यायांसकृदेवश्राद्धंकर्तव्यंएवंचमार्गादिकृष्णपक्षेपिशक्तस्यप्रतिपदादिस्ततोहीनशक्तेःपंचम्यादिस्ततोपिहीन
शक्तेर्दशम्यादिस्ततोपिहीनशक्तेरमावास्यामात्रंश्राद्धकालइतिवाचस्पत्युक्तेःकृष्णपक्षेप्रत्यहमितिहेमाद्र्युक्तेश्चसमूलंवि
त्यमेव प्रोष्ठपद्युत्तरापरपक्षविशेषेतुपंचपक्षावक्ष्यंते तेनात्रगोबलीवर्दन्यायानुपपत्तेः प्राप्तेकृष्णपक्षश्राद्धेफलवि
शेषार्थममावास्यायांतुविशेषेणेतिवदमावास्याविधिरित्येवापपतति तत्रश्राद्धकालाइतिबहुवचनावगतपरस्परान
पेक्षेतत्रान्वयविघातकेवेरूप्यापत्तेरयुक्तं निगमवचनेतुपृथग्विधित्वाद्युक्तोपरपक्षश्राद्धएवफलविशेषार्थममा
वास्याविधिः यद्यपिचामावास्यायामपराह्णेमासिकमपरपक्षस्यवाऽयुक्ष्वहःस्वितिहिरण्यकेशिसूत्रेमावास्यायाइ
तरायुग्मतिथिभिःसहतुल्यवद्विकल्पःप्रतीयतेतथापिनिगमैकवाक्यतयातस्याःप्रशस्तत्वंतत्रापिद्रष्टव्यं एवंकेचि
त्सव्यमानेमासिश्राद्धमपरपक्षस्योत्तमेहनीत्यापस्तंबीयेपियद्यपितथापरपक्षस्यजघन्यान्यहानीत्युत्तरसूत्रेणै
वतथाशब्देनापरपक्षस्यापराह्णःश्रेयानित्युक्तश्रेयस्त्वानुकर्षणात्प्रतिपदंपक्षयाद्वितीयादीनिद्वितीयापेक्ष
यात्तृतीयादीनीत्यनेनक्रमेणामावास्यायाःश्रेयस्करत्वंहरदत्तव्याख्ययासिध्यत्येव तथापिवस्तुतःकृष्णपक्षेद
शम्यादौवर्जयित्वाचतुर्दशीमितिमनुवचनेनैकवाक्यतयाजघन्याहःपदेनदशम्यादीनामेवोपादानेनतेषामेवत
त्रश्रेयस्त्वाभिधानात्तन्मध्येपिश्रेयस्तरत्वप्रतिपादनार्थंपूर्वसूत्रं नदर्शेनविनाश्राद्धमाहिताग्नेर्द्विजन्मनः इति
मनुवचनैकवाक्यतयाहिताग्निविषयंवास्तु कृष्णपक्षश्राद्धाविषयतयाहीदंमनुवचनंपार्थसारथिमिश्रैःप्राऽ
प्येश्चव्याख्यातं तस्माद्भिन्नमेवकृष्णपक्षश्राद्धादमावास्याश्राद्धंतस्यफलविशेषलोभेनतत्रैवक्रियमाणेनकृ
ष्णपक्षश्राद्धेनाविरुद्धांगकत्वेचतंत्रंविरुद्धांगकत्वेत्वावृत्तिरस्तु मनुनातुस्पष्टमेवपितृयज्ञंतुनिवर्त्यविप्रश्चं

203
1947

द्रक्षयेऽग्निमान्पिंडान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकमितिचंद्रक्षयसंज्ञिकायाममावास्यायांश्राद्धंसविधिकंविधायकृष्णप
क्षेदशम्यादौवर्जयित्वाचतुर्दशींश्राद्धेप्रशस्तास्तिथयोयथैतानतथेतराइतिपश्चात्कृष्णपक्षश्राद्धविधानात्तयोर्भेदोदर्शितः
आश्वलायनेनापिमासिमासिचैवंपितृभ्यइत्यनेनपूर्वसूत्रमतापरपक्षपदानुषंगेणान्वष्टक्यधर्मातिदेशेनप्रतिमासमपरप
क्षश्राद्धंविधायाथातःपार्वणश्राद्धेइत्यादिनाचतुर्थेध्यायेपृथगेवामावास्याश्राद्धंपार्वणशब्देनप्रस्तावपूर्वकंपिंडपितृयज्ञ
व्यतिषंगेणकृत्स्नविधानतयाविहितं यद्यपिचतत्रसप्तम्यादिनिर्दिष्टानांपार्वणादीनांकरिष्यमाणधर्मविधानावधित्वसंः
कीर्तनरूपउद्देशाएवप्रतीयंते ननुविधानंतदुपपत्त्यर्थमेवचैकोद्दिष्टस्यश्राद्धमस्मैदद्युरितिस्वशास्त्रगतंकाम्याभ्युदयिक
योश्चशास्त्रांतरगतंविधानंव्याख्यातृभिर्दर्शितंतथापिपर्वणिभवंपार्वणंतथाप्येकस्मिन्नेवपर्वणिभवत्यमावास्यायांनो
भयोःपर्वणोःपिंडपितृयज्ञेनसहव्यतिषंगदर्शनादितिवृत्तिग्रंथात्पार्वणशब्दस्यकालविशिष्टकर्मविधायित्वप्रतीतेः
तस्यकालविधायित्वाभावेतद्विशेषविचारानुपयोगात् नचकर्मनामधेयत्वोक्तिविरोधः कर्मनामधेययोरपिपार्वणोपांशु
याजशब्दयोरन्वर्थतासिध्यर्थंदेवतोपांशुत्वविधित्वस्येष्टत्वात् तद्वदेतस्यापिकालविशिष्टकर्मविधायित्वासंभवात् कर्मवि
ध्यभावेतदीयकृत्स्नविध्यंतोपदेशानुपपत्तेश्चकर्मविधिःपार्वणशब्दः अतएवचपार्वणश्राद्धस्यैवात्रविधानं पिंडपितृयज्ञ
व्यतिषंगघटितस्यविध्यंतरस्यान्यत्रासंभाविनस्तन्मात्रान्वयित्वात् अतएवैकैकमेकैकस्यद्वौद्वौत्रींस्त्रीन्वेतिब्राह्मणसं
ख्याविधेःपार्वणमात्रविषयत्वंवृत्तिकारेणोक्तं पार्वणेतुवक्ष्यतीति काम्यादीनांतुशास्त्रांतरस्वशास्त्रांतरसिद्धानामेवात्रो
पादानमतिदेशप्राप्तपार्वणविध्यंतरसंबंधानुवादश्चसप्तम्या कर्तव्यतासिध्यर्थंचेतिवृत्तिग्रंथोपिपार्वणविषयएवसर्वे
षामत्रविधानाभ्युपगमेसर्वान्प्रत्यकृत्स्नविहितस्यविध्यंतरस्यातिथ्यादिबर्हिर्धर्मविशेषवदुपदेशात्स्वसाधारण्यापत्तेस्तत्रच
बहुग्रंथविरोधप्रसंगान्तत्तत्कामरूपसाध्यविशेषतत्तिथिवाराद्विरूपसाधनविशेषानुवादाच्चानुपपन्नःकाम्यविधिः मा

सिश्राद्धेनसमंविकल्याभिधानादपिपार्वणस्यततोभेद आश्वलायनसूत्रव्याख्यातॄणांसंमतः नचैकस्मिन्नेवापरपक्षश्राद्धेप्रकार
विकल्याभिप्रायंतत् अतएवहेमाद्रिणादर्शश्राद्धस्यापरपक्षश्राद्धाभेदसाधनेनैवतयोर्विकल्पमतंनिरस्तं एककर्मत्वेहिपितृय
ज्ञश्राद्धबलिदानप्रकारविकल्पवन्मासिश्राद्धपार्वणप्रकारयोर्विकल्पोयुज्यतेनतु तदस्तीतिवाच्यं अन्वष्टक्यंचपूर्वेद्युर्मा
सिमासिचपार्वणंकाम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं आचार्येणाष्टौश्राद्धान्युक्तानीत्यादिबहुशोभेदव्यवहारेण
तदसंभवात् प्रकारविकल्पेसमानकालत्वस्यहेतुत्वानुपपत्तेश्च कर्मभेदेअदृष्टार्थयोः श्राद्धयोः समानकार्यत्वेप्रमाणा
भावात्कथंतेनहेतुनाविकल्पउच्यतइतिचेत् श्रूयतामत्रोपपत्तिः तत्तदर्थवादवशात्पितृतृप्तिविशेषार्थमुत्संनादिमां
सविशेषादिरूपतत्तद्रव्यमघात्रयोदश्यादिरूपकालविशेषपुष्करादिरूपदेशविशेषपंक्तिपावनादिरूपपात्रविशेषोपदे
शास्त्रमुख्यत्वेनप्रजानिःश्रेयसायेत्युक्त्वाश्राद्धकर्तृगामिन्यपिफलेद्वारत्वेनपितृतृप्तेःश्राद्धकर्मफलत्वेनसर्वैरपिनि
बंधकारैरभ्युपगतत्वात्कृष्णपक्षेपितृतृप्तिःकर्तव्येत्येतावन्मात्रेद्वयोरन्यतरकरणेनापितत्सिद्धेर्युक्तएवपार्वणमासि
श्राद्धयोर्विकल्पः द्वयोरपिचनैमित्तिकत्वेपिमासिश्राद्धाकरणहेतुकप्रत्यवायपरिहारस्यामावास्यायाअपितत्कालत्वेन
तन्मात्राधिकरणकश्राद्धानुष्ठानेनापितत्सिद्धेः अमावास्याश्राद्धाकरणहेतुकप्रत्यवायपरिहारस्यचानेनविधिनाश्राद्ध
मितिपूर्वोदाहृतदेवलवचनात्संवत्सरमध्येसकृद्विरादिकरणेनापिसिद्धेः मनुनाप्युक्तं अनेनविधिनाश्राद्धंत्रिरब्दस्येह
निर्वपेत् हेमंतग्रीष्मवर्षासुपांचयाज्ञिकमन्वहमिति अत्रहेमंतप्रयुक्तंकुंभस्थेर्केअमावास्यायांग्रीष्मप्रयुक्तंवृषस्थे
वर्षाप्रयुक्तंकन्यास्थइतिद्रष्टव्यं ऋतवश्चऋतुसंवत्सराभिप्रायेणमासचतुष्टयात्मकाः अनेनविधिनाश्राद्धंत्रिरब्दस्ये
हनिर्वपेत् कन्याकुंभवृषस्थेर्केकृष्णपक्षेचसर्वदेतिमत्स्यपुराणैकवाक्यत्वात् अतएवकेषुचिद्वचनेषुमहालयापर
पक्षश्राद्धनवरात्रव्रतयोर्वर्षाकालत्वमुक्तं एतस्मान्मत्स्यपुराणवचनादपिस्पष्टोमावास्याश्राद्धस्यकृष्णपक्षश्राद्धा १०१

205
194

द्भेदः दर्शश्राद्धस्यसंवत्सरेत्रिरनुष्ठानरूपानुकल्पविधानात्कृष्णपक्षश्राद्धस्यचसर्वदैवकर्तव्यत्वविधानात् अन्योप्यनुकल्पः सा
ग्निकस्यपिंडपितृयज्ञपिंडदानेनैवसिद्धिर्निरग्निकस्यब्राह्मणभोजनमात्रमित्येवंरूपःपार्वणासंभवेउक्तोनिगमेआहिताग्नेःपित्रर्चनं
पिंडैरेवनिरग्नेःपूर्णमंनदानमिति तत्राप्यशक्तनिरग्निविषयेविष्णुपुराणे अन्नेनवायथाशक्तिकालेस्मिन्भक्तिनम्रधीः भोजयि
ष्यंतिविप्राग्र्यास्तन्मात्रविभवोनरः असमर्थोन्नदानस्यधान्यमात्रंस्वशक्तितः प्रदास्यतिद्विजाग्र्येभ्यःस्वल्पाल्पामपिदक्षिणां
अत्राप्यसामर्थ्ययुक्तःकराग्राग्रस्थितांस्तिलान् प्रणिपत्यद्विजाग्र्यायकस्मैचिद्भूप्रदास्यति तिलैःसप्ताष्टभिर्वापिसमवेतांस्त्रि
जलांजलीन् भक्तिनम्रःसमुद्दिश्यभुव्यस्माकंप्रदास्यति यतःकुतश्चित्संप्राप्यगोभ्योवापिगवाह्निकं अभावेप्रीणनेयस्मात्श्राद्ध
युक्तःप्रदास्यति सर्वाभावेवनंगत्वाकक्षामूलप्रदर्शकः सूर्यादिलोकपालानामिदमुच्चैःपठिष्यति नमेस्तिवित्तंनधनंनचा
न्यत्श्राद्धोपयुक्तंस्वल्पतोस्ति तृप्यंतुभक्त्यापितरोमयैतौभुजौवर्त्मनिमारुतस्येतिभोजयिष्यतीत्यादिःप्रार्थनापितॄणां तस्मा
त्तस्यप्यमावास्यायाःकृष्णपक्षविनाभावित्कृष्णपक्षश्राद्धाद्भिन्नमेवतत्श्राद्धं एवमष्टकाश्राद्धमपि अष्टकाशब्दश्च यद्यपि
सूत्रस्मृतिपुराणेषुकर्मणिकालविशेषेचप्रयुक्तोदृश्यते तथाप्यष्टकापितृदैवत्यइतिव्याकरणादष्टमीष्वष्टकाइत्याद्यसति
विध्यालोचनयाचकर्मण्येवशक्तःकालेतुतत्संबंधाल्लाक्षणिकएवतत्रापिसत्यपिप्रचुरप्रयोगे अतएवैकवचनंसमुच्चितक
लानुरोधेनावृत्तावप्याग्नेयत्कर्मणएकत्वात् तच्चाष्टकानांमध्येयमाश्वलायनादीनांहोमश्राद्धरूपकर्मद्वयस्य कात्यायना
दीनांहोममात्रस्यैवयोगीश्वरवचनेतुश्राद्धकालाइत्युक्तेःकालपरएव सचकालोमावास्यांतमार्गशीर्षादिमासचतुष्टयभा
द्रपदकृष्णाष्टमीरूपः भाद्रपदाष्टमीकर्मण्यप्याश्वलायनव्यतिरिक्तैरष्टकाशब्दप्रयोगात् प्रौष्ठपद्यष्टकाभूयःपितृलोकेभ
विष्यतीतिपुराणाच्च आश्वलायनीयानामपिप्रौष्ठपद्यांकर्मतादृशमेवएतेनमाध्यावर्षंप्रौष्ठपद्यामपरपक्षेइतितुल्यत्वा
तिदेशात् अष्टकाशब्दःपरतंत्रोनात्ति माध्यावर्षशब्देनव्यवहारात् अनुष्ठानंपरंशारदाभेदेनव्यवस्थितं यथाश्वलाय

का० त० नानांहेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइति एतेनमाघ्यावर्षमितिचसूत्रकारवचनात्कस्यपंचस्वेकस्यांवेति
१०२ पक्षाश्रयणेद्वयोः प्रोष्ठपदीव्यतिरिक्ताश्चतस्रोष्टकागोभिलीयाह चतुरष्टकोहेमंतस्ताःसर्वाःसमांसाश्चिकीर्षेदितिकौत्सइ
ति हेमंतइति ऋतुसंक्रमणाभिप्रायेणशिशिरस्यापिसंग्रहः केषांचिद्दर्शितफाल्गुनाष्टमीत्यागेनत्वादशभाद्रपदाष्टमीसंग्रहेण
चतस्रः तथाचब्रह्मपुराणे ऐंद्र्यांतुप्रथमायांचशाकैःसंतर्पयेत्पितॄन् प्राजापत्यांद्वितीयायामांसैःश्राद्धेश्चतर्पयेत् वैश्व
देव्यांतृतीयायामपूपैश्चयथाक्रमं वर्षाक्रमेण्यशाकैश्चचतुर्थ्यामेवसर्वदिति अत्रयद्यपिमासविशेषोपादानंनास्ति तथावा
युपुराणेपि पित्र्यदानायमूलेस्युरष्टकास्तिस्रएवच कृष्णपक्षेवरिष्ठाहिपूर्वाचैंद्रीविभाव्यते प्राजापत्याद्वितीयास्यात्तृती
यावैश्वदेविकी आद्यापूपैःसदाकार्यामांसैरन्याभवेत्तथा शाकैःकार्यातृतीयास्यादेषद्रव्यगतोविधिः याचाप्यन्याचतुर्थी
स्यात्तांचकुर्याद्विशेषतइति तथापिपौषेकृष्णाष्टकायांतुशाकैःसंतर्पयेत्पितॄनितिब्रह्मपुराणएवशाकाष्टकात्वेनोक्तायाः
प्रथमायाःपौषमासीयत्वेनाभिधानात् शाकंतुफाल्गुनाष्टम्यांस्वयंपत्न्यपिवापचेत् वास्तुशाकादिहोमश्चकार्यःपूपाष्ट
कावतेति छंदोगपरिशिष्टेचवायुपुराणेशाकाष्टकात्वेनोक्तायास्तृतीयायाःफाल्गुनमासीयत्वेनाभिधानात् अमावास्या
ष्टकास्तिस्रःपौषमासादिषुत्रिषु तिस्रश्चान्वष्टकाःपुण्यामाघीपंचदशीतथेति कूर्मपुराणाच्चपौषमाघफाल्गुनगताएवति
स्रः चतुर्थीतुवर्षर्तुगतत्वेनाभिधानाद्भाद्रपदगतेव पौषादित्रयंच पौर्णमास्यंतपक्षेण आग्रहायण्यामतीतायांकृष्णास्ति
स्रोष्टकास्तथेति आग्रहायण्याऊर्ध्वंतिस्रोष्टकाइतिचविष्णुधर्मोत्तरादिवचनात् यत्तुहेमाद्रिणावायुपुराणेमासविशेषानु
पादानात्तिस्रस्तायद्याग्रहायण्याऊर्ध्वमितिवचनाद्दर्शितमार्गशीर्षादिमासत्रयगताएवतदायाचाप्यन्याचतुर्थीस्यादि
तिफाल्गुनकृष्णाष्टमी अश्वलायनवचनात् पौषमासादिषुत्रिष्वित्युक्तत्वात् पौषादित्रयगताइतिपक्षेब्रह्मपुराणवचना
नुसाराद्भाद्रपदकृष्णाष्टमीत्यभिधानान्मार्गशीर्षादिचतुष्टयमिवपौषादित्रयमपिदर्शितमेवाभ्युपगतंप्रतीयते मदनर १०२

207
194

त्नेप्याग्रहायण्याऊर्ध्वंतिस्रइतिपक्षेफाल्गुनीवर्जनंपौषमासादिषुत्रिष्वितिपक्षेमार्गशीर्षवर्जनमिति चतुर्थ्यास्तुव्यवहिताप्रोष्ठपद्येत्यव्य
वहितअष्टकापक्षेपक्षद्वयाभिधानात्तथैवप्रतीयतेतदाग्रहायण्यूर्ध्ववचनस्यपौषादित्रयवचनस्यचकृष्णादिमासग्रहणेनैक
पक्षप्रतिपादकत्वसंभवेविकल्पमूलभेदकल्पनापादकभिन्नार्थत्वस्यासंभवादयुक्तं मार्गशीर्षादित्रिकगतअष्टकापक्षेफा
ल्गुनकृष्णाष्टमीचतुर्थीत्युक्तिस्तुहेमाद्रेरत्यंतायुक्तैव तथासतिहिचतसृणामप्यव्यधानादाश्वलायनगोभिलीयकौत्सम
तोक्तिवदादावेवचतस्रइत्युच्येतकिमितितिस्रश्चतुर्थीचपृथक्पृथगुच्येरन् अष्टकापक्षेपिहिप्रोष्ठपदींगृहीत्वासंवत्सरश्चतु
रष्टकएव चतुरष्टकत्र्यष्टकपक्षभेदस्तुगोभिलोक्तोहेमंताभिप्रायः त्र्यष्टकइत्युत्तरसूत्रेपिहेमंतपदानुषंगात् भाद्रपदीग्रह
णेतुव्यवधानाद्धेमंतानंतर्गतत्वाच्चपृथक्चतुर्थ्युक्तिःसंगच्छते चतुर्थीशब्दाच्चब्रह्मपुराणेचतुर्थीशब्देनैवोक्तायाःप्रोष्ठ
पद्याएवप्रत्यभिज्ञातस्माद्वायुपुराणेपिचतुर्थीभाद्रपदगतेव सापिचावश्यकैव त्र्यष्टकापक्षेपि हेमंतःपरंत्र्यष्टकः अतएव
भाद्रपदाष्टकाया अप्यावश्यकत्वे गोभिलस्यस्वमतत्वेनत्र्यष्टकापक्षोक्तिर्विरुध्येतेतिशूलपाणेःशंकाश्राद्धयागविषयत्वे
नतयोरविरोधाभिधानंचसर्वमेवायुक्तं आश्वलायनादिभिस्तत्रहोमस्याप्यभिधानाच्चशाकादिद्रव्यभेदइंद्रादिदेवताभे
दश्चाश्वलायनव्यतिरिक्तविषयः तेषांतुपंचस्वपिदेवतानांद्रव्याणांचभेदएव शाकादिद्रव्यव्यवस्थाचप्राधान्याभिप्राया
तीर्थयात्रांगश्राद्धेघृतवत् मुन्यन्नंब्राह्मणस्योक्तमित्यादिवच्च नतुनिरपेक्षत्वाभिप्रायशाकादीनांकेवलानांभोज्यत्वाप्र
सिद्धेः नतुदेवतावद्धोमविषयेनैरपेक्ष्यमेवशाकादीनांभवतु नपितॄन्संतर्पयेदितिविरोधात् अष्टकाग्रहणंचयोगीश्वर
वचनेतत्पूर्वसप्तमीनांतदुत्तरनवमीनांचोपलक्षणं पूर्वेद्युःपितृभ्योदद्यात् अपरेद्युरन्वष्टक्यमिति आश्वलायनवचनात्
अन्वष्टका अन्यत्राप्युक्ताः अमावास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाइतिविष्णुस्मृतौ अमावास्येत्यादिकूर्मपुराणेच एवंच
शुक्लादिमार्गशीर्षादिचतुष्टयभाद्रपदकृष्णाष्टमीनांतत्पूर्वोत्तरसप्तमीनवमीनांचश्राद्धकालत्वेसत्यपियत्सर्वेषांतत्रदेते

का०त० करणंयथाश्वलायनव्यतिरिक्तानांफाल्गुनाष्टम्यांसर्वस्मिंचसप्तमीषुच तत्तच्छाखाश्रयमुक्तमन्यपरशाखाश्रयंतुयः कर्तुमि
१०३ च्छतिदुर्मेधामोघंतत्तस्यचेष्टितमित्यादिवचननिबद्धयाज्ञिकसंमतप्रमाणपरिग्रहव्यवस्थाव्यवस्थितानुष्ठानवशात् वृद्धिः पुत्र
जन्म अग्न्याधानसोमयागादीनिश्रौतानि महादानंतडागाद्युत्सर्गदेवप्रतिष्ठादीनिपौराणानिस्त्रीसंस्कारापत्यसंस्कारादीनि
सौत्राणि ग्रहशांतिविनायकस्नपनादीनिस्मार्तकर्माणिच तथाचब्रह्मांडपुराणे कर्मण्यथाभ्युदयिकेमांगल्येचातिशोभने
जन्मन्यथोपनयनेविवाहेपुत्रकस्यच पितॄन्नांदीमुखान्नामतर्पयेद्विधिपूर्वकमिति आभ्युदयिकंस्वाभ्युदयार्थंकर्मराज्या
भिषेकनवग्रहमखमहादानादि मांगल्यंगर्भाधानसीमंतोन्नयनादि अतिशोभनेइतितद्विशेषणेन ब्राह्मण्यश्चवृद्धाजीव
पत्योजीवप्रजायद्यदुपदिशेयुस्तत्तत्कुर्युरथखल्वूच्चावचाजनपदधर्माग्रामधर्माश्चतान्विवाहेप्रतीयादित्यादिसूत्रानुम
तस्याचारप्राप्तस्यफलादिभिर्गर्भिणीकुक्षिभरणादेर्विवाहाद्यंगहरिद्राचंदनादेश्चव्यावृत्तिः अतएवोक्तंमत्स्यपुराणे ना
निष्ट्वातुपितॄन्श्राद्धेकर्मवैदिकमाचरेदिति कर्मप्रदीपेपि अनिष्ट्वातुपितॄन्श्राद्धेनकुर्यात्कर्मवैदिकं तत्रापिमातरःपूर्वंपूज
नीयाःप्रयत्नतः आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेदिति विष्णुपुराणेपि
कन्यापुत्रविवाहेषुप्रवेशेनववेश्मनः नामकर्मणिबालानांचूडाकर्मादिकेतथा सीमंतोन्नयनेचैवपुत्रादिमुखदर्शने नांदी
मुखंपितृगणंपूजयेत्प्रयतोगृहीति पुत्रादिमुखदर्शनइत्यनेनतद्योग्यतासंपादकंपुत्रजन्ममात्रंगृह्यतेनतुजातकर्म पूर्वव
चनेनवैदिककर्मप्राप्तस्यनांदीमुखश्राद्धस्य केषुचित्कर्मसुपर्युदासार्थनाष्टकासुभवेच्छ्राद्धंनश्राद्धेश्राद्धमिष्यते नसोष्यं
तीजातकर्मप्रोषितागतिष्ववास्तोपरिस्तीर्याग्निमाज्याहुतीर्जुहोतीत्यादिकंयत्सोष्यंतीकर्मतत्रेत्यर्थः प्रोषितप्रत्यागतेज्ये
ष्ठस्यपुत्रस्योभाभ्यांपाणिभ्यांमूर्द्धानंपरिगृह्यजपेदितियत्पुनःपुत्रस्यमस्तकाघ्राणकर्मतत्रेत्यर्थः प्रत्यागमकर्मस्वितिप
रिशिष्टवचनेजातकर्मणितन्निषेधात् अतश्चग्रहणवन्नैमित्तिकंश्राद्धंपुत्रजन्मन्यपिभवत्येवनतुकर्मांगं अतएवनिषेक १०३

209/194

कालेसोमेचसीमंतोन्नयनेतथा ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवत्कृतमितिपारस्करवचनेनकर्मांगश्राद्धविषयत्वेनजातकर्म
नोपात्तं किंतुवृद्धाविवितिपुत्रजन्मनिमित्तंश्राद्धंदृष्टांतत्वेनपृथगेवोपात्तं अतएवचयज्ञोद्वाहप्रतिष्ठासुमेखलाबंधमोक्षयोः
पुत्रजन्मवृषोत्सर्गेनांदीश्राद्धंसमाचरेदितिजाबालिवचनेपिपुत्रजन्मैवगृहीतंतेनजातकर्मणिवृद्धिश्राद्धपर्युदासश्छंदोग
विषयस्तत्परिशिष्टगतत्वात् इतरेषांतुतत्रापितद्भवत्येवजन्मनीत्यादिवचनादितिकेषांचिदुक्तिर्निरस्ताविदितव्या वृषोत्सर्गश्च
काम्यः प्रेतत्वनिमित्तेनश्राद्धमितितन्निषेधात् श्राद्धशब्देनप्रमीतगतफलार्थकर्ममात्रग्रहणात् अन्यथापिंडपितृयज्ञे
तत्प्रसंगात् अष्टकाशब्देनगोभिलादिसूत्रोक्तःहोमंत्रपाष्टकाकर्मग्रहणात्तत्रपृथक्कृतन्निषेधः अत्रवचनानिष्ट्वेतिसामान्य
वचनादेवविवाहादिष्वपिश्राद्धसिद्धौतेषुपुनर्वचनमुपसंहारार्थं तेनविशेषवचनोपात्तेष्वेवकर्मसुवृद्धिश्राद्धंभवति नान्य
त्रेतिकेचित्तदयुक्तंसामान्यवचनानर्थक्यापत्तेः यत्रहिशाखांतरगतत्वेनवाद्वारविशेषसंबंधप्रमाणेनवासामान्यवचन
मप्यर्थवद्भवति तत्रैवोपसंहारोभवतिपुरोडाशंचतुर्धाकरोतिआग्नेयंचतुर्धाकरोतीत्यादौ प्रकरणेनारभ्याधीतसाप्तदश्य
वाक्यादौच अनारभ्यकिंचिदाम्नायते सप्तदशसामिधेनीरनुब्रूयादिति अत्रेदंसाप्तदश्यंप्रकृतौपंचदशेनबाधितंविकृ
त्यर्थमितिस्थितंविकृतिषुअपिकाशकावित्यशमित्रविंदाध्वरकल्पादिप्रकरणेसाप्तदश्यंश्रुतं यदिदंप्राकरणिकंसप्तदशसामिधेनीव
चनंकिमाज्यभागाविधिवदपूर्वतापरमुतोपसंहारार्थमितिसंदेहेकृप्तोपकाराःप्रकृतौसामिधेन्योयतस्ततः ताभिरेवनिराकां
क्षानेष्ठंतिप्रकृतान्वयं साप्तदश्यंत्वनारभ्यवादप्राप्तमनूद्यते सामिधेन्यस्तुचोद्यंतेताभिश्चपूर्वतास्फुटेतिप्राप्तेब्रूमः भ
वेदेवसामिधेनीविधिर्यदिसाप्तदश्यविधिस्त्वेषतस्मान्नापूर्वताभवेत् नचसाप्तदश्यविधौकिमितिनापूर्वत्वं उच्यते त
स्यसामिधेनीद्वाराक्रतुसंबंधस्तासांचचोदकप्राप्तेर्नचोदकलोपःसंभवति चोदकलोपेचापूर्वत्वमिति किंच साप्तदश्यं
सामिधेनीसंबंधितयाश्रुतंयावक्रत्वंगतांकल्पयतितावत्प्राकरणिकेवनेध्वरकल्पादिसंबंधेकृतेक्षीणार्थापत्तिर्नकर्मा

तरसंबंधंकल्पयतितेनसाप्तदश्योपसंहारार्थानिप्राकरणिकानिवचनानीतिनापूर्वत्वमितिनचेहतथासंभवतिस्मृतिपुराणादीनां
सर्वेषांसर्वान्प्रतिप्रमाणत्वेनशास्त्रांतरन्यायाभावात्साक्षात्कर्मांगत्वेनतस्यश्चोभयत्रापिवाक्यीयत्वेनसाप्तदश्यन्यायाभावाच्च
तेनकेषुचित्पुनर्वचनंसामान्यवचनस्यप्रपंचमात्रंतत्रावश्यकत्वार्थंवा अतएवाग्निहोत्रहोमवैश्वदेवादिषुकेषांचिदृद्धिश्रा
द्धाननुष्ठानंकेषांचिच्चानुष्ठानंयेषामनुष्ठानंतद्विषयमेवेद असकृद्यानिकर्माणिक्रियंतेकर्मकारिभिः प्रतिप्रयोगंनेतासु
मातरःश्राद्धमेववेत्यस्त्वाताद्दशकर्मपरिगणनार्थंपरिशिष्टवचनं आधानेहोमयोश्चैववैश्वदेवेतथैव बलिकर्मणिद
र्शेचपौर्णमासेतथैवच नवयज्ञेचयज्ञज्ञावदंत्येवंमनीषिणः एकमेवभवेच्छ्राद्धमेतेषुनपृथक्पृथगिति वैश्वदेवादिषुश्रा
द्धावृत्तिनिषेधादप्युपसंहारोनयुक्तः उपसंहारेतत्रश्राद्धस्यैवाप्रक्तः कृष्णपक्षःसर्वोपि नतुप्रतितिथ्यावर्ततेसकृत्कृतेकृ
तःशास्त्रार्थइतिन्यायात् वसंतेज्योतिष्टोमवत् अश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिनइतिवचर्चवीप्सायाअश्रवणात्
यच्चपंचमीप्रभृतिवापरपक्षस्ययथाश्राद्धंसर्वस्मिन्वेतिगौतमसूत्रं तत्रापिनसर्वस्मिन्नित्यनेनसमुच्चितासुसर्वतिथिषुश्रा
द्धंविधीयतेयेनावृत्तिःस्यात् किंतुपंचम्याःपूर्वतिथीनामपिश्राद्धकालत्वंतेनकात्यायनसमानार्थमेवतदपि प्रपंचितंच
तत्प्रसंगात्प्राक् यदहःसंपद्येतेतिततदहर्ब्राह्मणानामंत्र्येत्येतदेकवाक्यतयाभाष्यकारैर्व्याख्यातंसकृत्करणस्यैवद्योतकं
केचित्तुयदहःसंपद्येतेत्येतावतोविछिन्नस्यैकाहपक्षविधायकत्वमंगीकृत्यपूर्वसूत्रयोः प्रतिपंचमीप्रभृतिसमुच्चितसर्व
तिथिविधायकत्वेनावृत्तिपक्षमपिशक्तविषयंमन्यंते तदपियत्तच्छब्दयोःपरस्परसापेक्षत्वेनैकतायाएवस्पष्टंप्रतीतेर्वाप्र
त्याध्याहारापत्तेश्चायुक्तं अतएवस्योनंतमंत्रेयदिपूर्वार्द्धेचयच्छब्दःस्यादेववातेवस्यादित्युक्तंतंत्रे यदपिचतुर्दशकामानु
पक्रम्यज्ञातिश्रैष्ठ्यंसर्वकामानाप्नोतिश्राद्धदःसदापत्प्रभृतिचैकांवर्जयित्वाचतुर्दशीमितियोगीश्वरवचनंतयद्यदि
कृष्णपक्षनिमित्तकश्राद्धाश्रिततत्तत्तिथिरूपगुणानांफलसंबंधविधायकंतदाकामनयाप्येकस्मिन्कृष्णपक्षेएकतिथावि १०४

वश्राद्धंगुणफलानुरोधेनाश्यानावृत्तेः अयंचपक्षआपस्तंबधर्मादिषुसंभवति तत्रापरपक्षश्राद्धंप्रक्रम्यतत्तत्तितलकानां
श्रवणात् याज्ञवल्कीयेतुकृष्णपक्षश्राद्धानुपक्रमात्तस्याश्रयत्वेनालाभात्तत्तत्फलार्थंतयातत्तत्तिथिषुश्राद्धान्येवविधि
शिष्टविधिरूपेणविधीयंतेतानिचपरस्परंकृष्णपक्षनिमित्तत्वान्नित्यश्राद्धाच्चभिद्यंतइत्येकस्मिन्नपिकृष्णपक्षेयावत्कामंतेषा
मनुष्ठानंभवतुयेनकेनापिनित्यस्यप्रसंगात्सिद्धिःसमानप्रकारकत्वेनतुकृष्णपक्षसमान्येतन्निमित्तस्यनित्यस्यश्राद्धस्या
वृत्तौकिंचिदपिप्रमाणमितिप्रतिपदादिषुपंचम्यादिषुदशम्यादिषुवामावास्यांताकचतुर्दशीनार्जितासुतिथिषुमध्येयस्यां
कस्यांचित्तिथावमावास्यायामेववासकृदेवकृष्णपक्षसामान्यप्रयुक्तंश्राद्धं यद्यपियाज्ञवल्कीयंचतुर्दशीयजनंकाम्यश्रा
द्धविषयंतथापिनभस्यस्यापरेपक्षेश्राद्धंकार्यंदिनेदिने नैवनंदादिवर्ज्यंस्यान्नैववर्ज्याचतुर्दशीतिकार्ष्णाजिनिवचनेभाद्र
पदापरपक्षेचतुर्दशीवर्जननिषेधादन्यत्रतद्वर्जनावगमात् कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशीश्राद्धेप्रशस्तास्तिथ
योयथैतानतथेतराइतिमनुवचनेचनित्यएवकृष्णपक्षश्राद्धेदशम्यादिपक्षेचतुर्दशीवर्जनोक्तेःप्रतिपदादिपंचम्यादिप
क्षयोरपिकृष्णपक्षसामान्येतद्वर्जनं अतएवचतत्रनंदादिकमपिवर्ज्यं तथाचनारदसंहितायां ननंदासुभृगोर्वारेरोहि
ण्यांचत्रिजन्मसु रेवत्यांचमघायांचकुर्यादापरपक्षिकमिति नंदाःप्रतिपत्षष्ठ्येकादश्यः त्रिजन्मानिआद्यदशमैकोन
विंशानिनक्षत्राणि गार्ग्योपिनंदायांभार्गवदिनेत्रयोदश्यांत्रिजन्मसु एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयादिति वृद्धगा
र्ग्योपिप्राजापत्येचपौष्णेचपित्र्यर्क्षेभार्गवेतथा यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रोविनश्यतीति एवमन्येपितद्विषयानिषे
धाःप्राजापत्यंरोहिणीपौ॰रेवतीपित्र॰मघाप्रयोगपारिजातादिद्रष्टव्या भानौभौमेत्रयोदश्यांनंदाभृगुमघासुच पिंड
दानंमृदास्नानंनकुर्यात्तिलतर्पणमितिस्मृत्यंतरेपिंडदानग्रहणंश्राद्धोपलक्षणमेव एकमूलत्वाय यत्त्वन्येपिपिंडदानगा
द्याःकालविशेषनिषेधास्तेप्रेतकृत्यविषयावक्ष्यंते इदंचतुर्दशीनंदादिवर्जनंभाद्रपदकृष्णपक्षेपि आषाढ्याःपंचमप

का॰त॰ सेकन्यासंस्थेदिवकरे यो वैश्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमिति नागरखंडोक्तेरेक
१०५ दिनपक्षे भवेत्येव तत्र तदप्रवृत्तौ कारणाभावात् पक्षांतरेषु तु नंदादिवर्जनं भवति प्रतिपदादिपक्षयोश्चतुर्दशीवर्जनमपि ति
थियोगनक्षत्रयोगविशेषनिषेधप्रयोजकांतरसत्त्वेपि सकृत्पक्षे महालयश्राद्धं भवत्येवेत्युक्तं प्रयोगपारिजातोदाहृते संग्र
हवचने अमापाते भरण्यां च द्वादश्यां पक्षमध्यके तिथिवारं च नक्षत्रं योगं च न विचारयेदिति मृततिथिसमानजातीया
यामेव चतुर्दशीभिन्नायां तत्पक्षांतर्गततिथौ निषेधप्रयोजकयुक्तायामपि सकृत्पक्षे यावत्संभवं प्रायः सकलदेशीयाः शिष्टा
महालयश्राद्धं कुर्वंति एकदिनपक्षातिरिक्ताश्च पंच तत्र पक्षाः कृष्णप्रतिपदादिशुक्लप्रतिपदंतमिति षोडशतिथिपक्ष एकः
प्रतिपदादिदर्शांतमिति पंचदशतिथिपक्षोन्यः पंचम्यादि अष्टम्यादि दशम्यादि चतुर्दशीवर्ज दर्शांतमित्यपरे पंचदशसप्त
पंचतिथिपक्षाः तत्र प्रथमः पक्षः शाट्यायनिना दर्शितः नभस्यस्यापरपक्षे तिथिषोडशकस्तु यः कन्यागतान्वितश्चेत्स्या
त्सकालः श्राद्धकर्मणीति चेदित्यसंदिग्धे संदिग्धवचनं शास्त्राणि चेत्प्रमाणं स्युरितिवत् न ह्यत्र सकलस्य पक्षस्य कन्यागतान्
वितता विवक्षिता वाक्यभेदप्रसंगात् पक्षविशेषगते तिथिषोडशके श्राद्धं कुर्यादिति च तदा यदि सकलः कन्यागतान्वितो भव
तीति न च तादृश एव तिथिषोडशके श्राद्धं विधीयत इति वाच्यं प्रतिसांवत्सरिकत्वव्याघातापत्तेः अत एव शारदनवरात्रां
तर्गतसप्तम्यादितिथिषु मूलादियोगे प्राशस्त्यमात्रं न तु स आदरणीय इत्युक्तं अत एव वृद्धमनुनाप्युक्तं मध्ये वा यदि वाप्यं
ते यत्र कन्यां रविर्व्रजेत् स पक्षः सकलः पूज्यः श्राद्धं तत्र विधीयते इति तेन यदा कदाचित्कन्यागतान्वयस्तस्यापेक्षितः स च
नित्यवत्प्राप्त एव कन्यागते सूर्ये समाप्तिं विना तस्य भाद्रपदत्वाभावात् मेषादिसवितरि यो यो मासः प्रपूर्यते चांद्रः चैत्राद्यः
स ज्ञेयः पूर्तिद्वित्वेधिमासोंत्य इति चैत्रादिमासविशेषाणां लक्षणस्य ज्योतिःशास्त्रेभिधानात् यत्त्वादित्यपुराणे आषाढी
मवधिं कृत्वा यस्यात्पक्षस्तु पंचमः श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वेत्युक्तं तत्पक्षोपक्रमे सूर्यः कन्यां गच्छतु वा न वे १०५

213
194

त्येवं व्याख्येयं सकलस्य पक्षस्य कन्यायोगो नापेक्षित इत्यभिप्रायः पंचमत्वं चांतरा मलमासानाद्यात्तदिति मलमासनिर्णये वक्ष्य
ते तिथिषोडशकश्चामावास्योत्तरां प्रतिपदमादायेति देवलेनोक्तं अहः षोडशकं यत्तु शुक्लप्रतिपदा सह चंद्रक्षयाविशे
षेण सापि दर्शात्मिका स्मृतेति श्रुतिसूत्रेषु च पौर्णमास्युत्तरा प्रतिपदुत्तरपौर्णमासीत्वेनामावास्योत्तरा चोत्तरामावास्यात्वे
न व्यवहृता तथा चैतरमावास्यायां पौर्णमास्यां वा यजेतेत्याश्वलायनसूत्रे पौर्णमास्यमावास्याशब्दाभ्यां प्रतिपद्विगृह्यत
इति सिद्धांतिना व्याख्यातं सपक्षः सकलः पूज्यः श्राद्धषोडशकं प्रतीति वचनांतरेपि प्रतिपदोप्यमावास्यात्वेनैकीकारमभिप्रे
त्यैव पक्षपदोपादानं अमावास्यामात्रग्रहणे षोडशश्राद्धासंभवात् तेनात्र षोडशतिथिपक्षाश्रवणे एकेनाधिकारिणा कृष्णप्र
तिपत्प्रभृति शुक्लप्रतिपत्पर्यंतमेकतंत्रं श्राद्धं कर्तव्यं अमावास्योत्तरप्रतिपत्संग्रहपक्षेण तिथीनां षोडशत्वमुपपादयतो हेमा
द्रेरपीदमेवाभिमतं एतद्वचनापेक्षमेव संख्यया कर्मभेदमभ्युपगच्छता तेनैतस्योत्पत्तिविधित्वांगीकारात्तत्र चाधिकारिभेद
देवताभेदानुपादाने तदैक्यस्यैव प्रतीतिः तेन जीवत्पितृकदौहित्राधिकारिणा क्रियमाणं मातामहदैवत्यं श्राद्धमभिप्रे
त्य पक्षाभिधानं हेमाद्रेरिति पामराणां भ्रम एव तथात्वे च दौहित्रप्रतिपच्छ्राद्धमूलप्रमाणान्वेषणक्लेशस्तस्य नोपपद्येत यत्तु
हेमाद्रिणा तिथिषु षोडशत्वोपपत्तये न्यत्प्रकारद्वयमुक्तं तिथिवृद्धिमभिप्रेत्य पूर्वपौर्णमासीं गृहीत्वा वेति तत्र नाद्यो नित्य
वद्वचनविरोधात् न द्वितीयो परपक्षश्रुतिविरोधात् तिथिपदेनाहोरात्रलक्षणा यत्तेश्च प्रकरणांतरोक्तस्याश्रुमुखोपरित
न नांदीमुखसंज्ञकपित्रादिदैवत्यस्य वार्षिकश्राद्धस्य माघ्यादिश्राद्धवद्दत्रादिपरिवृत्तेश्च तेन वचनस्वरसादुत्तरप्रतिपत्सरिग्र
हेण पंचदशदिनपक्षात्पक्षांतरमेवेदं महालयापरपक्षश्राद्धे एवं सति यदेतस्यामेव प्रतिपदि जीवत्पितृकैः क्रियते पार्वणवि
धानेन मातामहश्राद्धं तदपि कन्यासंक्रांत्युपलक्षिते तदपरपक्षनिमित्तकमेव अत एव जीवत्पितृकैरेव क्रियते मृतपितृकैर्येन
केनापि पक्षेण क्रियमाणेन पितृपार्वणेनैव सहितस्यापि करणात् ननु जीवत्पितृकस्यापरपक्षनिमित्तकं पित्रादिश्राद्धं दर्शश्राद्धं

गयाश्राद्धंचापरपक्षिकंनजीवत्पितृकः कुर्यात्तिले कृष्णेश्चतर्पणमितिवचनेननिषिध्यतेयथातथामातामहश्राद्धमपि वस्तुत
स्तुपितृश्राद्धनिषेधेमतिप्राप्तिरेवमातामहश्राद्धस्यनास्तिपितरोयत्रपूज्यंतेतत्रमातामहाध्रुवमितिपितृश्राद्धोपजीवनेनतस्यवि
धानात् नचपितृश्राद्धस्यापितर्हिकथंनिषेधः प्रमीतदेवत्यस्यतस्यजीवत्पितरिप्राप्त्यभावात्इतिवाच्यं यतः सत्यंजनकदेवत्यं
नप्राप्नोतिकिंतुमन्वादिभिः स्मृतिकारैः आश्वलायनापस्तंबादिभिश्चगृह्यकारैर्यद्दर्शश्राद्धमपरपक्षश्राद्धंवाप्रकृत्यश्राद्धधर्माः
म्नातास्तस्यपूर्वनिर्वापादिप्रकारेणकरणपक्षेजीवत्पितृकंप्रतिसवैरुक्तः कश्चिदकरणपक्षोपि अतिदेशाच्चेमरश्राद्धेषपितृलक्ष
यंप्राप्नोति तथाचप्रमीतपितामहादिदेवत्यंजीवत्पितृकस्यापिदर्शश्राद्धंकरणपक्षेप्राप्नोत्येव तत्रयथाउद्वाहेपुत्रजननेऽग्निरुत्थे
ष्ट्यांसौमिकेमखे तीर्थेब्राह्मणआयातिषडेतेजीवतः पितुः गर्वोतीर्थेचसन्यस्तेतातेचपतितेसति येभ्यएवपितादद्यात्तेभ्योद
द्यात्स्वयंसुतइत्यादिवचनैः केषुचिच्छ्राद्धेषुकरणपक्षस्तत्रचप्रकारविशेषोनियम्यते तथादर्शश्राद्धमित्यनेनकेषुचित्कथंचिद
प्यकरणपक्षः तेनपित्रादीनांदर्शादौश्राद्धनिषेधेसतितदुपजीविप्राप्तिकस्यमातामहादिश्राद्धस्याप्राप्तिरेवनिषेधोवेतिकथंजी
वत्पितृकस्यतत्प्राप्तिर्महालयापरपक्षेउच्यते प्राप्तिस्तावद्दर्शादिषुजीवत्पितृकस्यपितृश्राद्धाभावेपिपितामहादिश्राद्धसत्वात्तदु
पजीवनेनैवमातामहश्राद्धंतस्यवक्तुंशक्यतेपितरइतिबहुवचनात् पितुरित्यादिसंबंधिपदमात्रप्रक्षेपेणपित्रादिशब्दैरेवपिता
महादीनांदेवतात्वाच्च अतएवविष्णुस्मृतौजीवत्पितृकादिकस्यपितृपार्वणपूर्वेषांदेवतात्वंविधायतत्सहप्रयोगमातामहपार्वण
णिजीवमातामहस्यतत्पित्रादीनांदेवतात्वंपूर्वातिदेशेनविहितंमातामहानांचैवमिति गंगायांतुस्वातंत्र्येणापिसर्वेषांश्राद्धस्य
प्राप्तिरस्तियन्नाम्नापातयेत्पिंडंतंनयेद्ब्रह्मशाश्वतमिति अथप्राप्तावपिनिषेधात्कन्योपलक्षितेप्यपरपक्षेतन्निमित्तंमातामहश्राद्धंनप्राप्नोतीत्युच्यते तदपिन सामान्यतोह्यापरपाक्षिकस्यनिषेधः विशेषतश्चकन्यागतेसवितरिपितरोयांतिवेसुता १०६

नू शून्याप्रेतपुरीराजन्यावद्वृश्चिकदर्शनमित्याद्यर्थवादान्नीतायेषांश्राद्धेयेधिकारिणस्तैस्तेषांकन्यागतोपलक्षितेपर

215
1942

पक्षेश्राद्धंकर्तव्यमितिविधिः अत्रहिपितृसुतग्रहणंश्राद्धदेवतातदधिकारिमात्रोपलक्षणं नागरखंडेगोनदद्यातिनरः श्राद्धंपितृणांवे
द्रसंक्षये क्षयिताशापरीतांगाः पितरस्तस्यदूषिताः प्रेतपक्षंप्रतीक्षंतइत्युपक्रम्यततस्तुलागतेप्यर्केस्वर्येवांछंतिपार्थिव श्रा
द्धंस्ववंशजैर्दत्तंक्षुत्पिपासासमाकुलाइतिसामान्येनाभिधानात् अतएवैतद्वचनबलादेवजीवत्पितृकस्यमातृश्राद्धमपि
कन्यागतापरपक्षनिमित्तंस्मृतिरत्नावल्यामभिहितं एतावांस्तुविशेषः तत्रदर्शोत्तरप्रतिपद्येवमातामहश्राद्धवत्तदुक्तं इदानींतुतस्यनवम्या
मनुष्ठानाचारइति अतएवमृतस्त्रीकैः पितृश्राद्धदिनएवपृथगपृथग्वामातृत्वसेरपिसंपादितत्वात्जीवत्पितृकैरेवतत्तत्स्यर्थंनवम्यां
सत्क्रियतइतितस्याअविधवानवमीत्वप्रसिद्धिर्महाराष्ट्रेषु अतएवचापुत्रपितृव्यज्येष्ठभ्रात्रादिनामपिश्राद्धस्यतत्तन्मृततिथौजीवत्पि
तृकैः शिष्टैः कैश्चित्करणंमहालयापरपक्षेतेनसामान्यापरपक्षनिमित्तस्यैवश्राद्धस्यजीवत्पितृकान्प्रतिप्रतिषेधात्कन्योपलक्षिता
तिप्रशस्तापरपक्षनिमित्तंमातामहादिश्राद्धंतेषामपिप्राप्नोत्येव तादृशस्यैतस्यदर्शमनतिक्रम्यापिकरणेबाधकाभावेपियत्तद्
त्तरप्रतिपदिकरणंतत्केवलंसदाचारात् नन्वेवंपितामहादीनामप्येतदपरपक्षनिमित्तंश्राद्धंकर्तव्यंस्यात् नस्यात् नजीवंतमतिक्र
म्यदद्यादितिनिषेधात् वृध्यादिवच्चप्रतिप्रसवाभावात् एवंचप्रतिपद्यपिक्रियमाणस्यमातामहश्राद्धस्यापरपक्षनिमित्तकत्वा
विघातात्तन्निमित्तकस्यचश्राद्धस्याधिकमासापातेउत्कर्षस्यवक्ष्यमाणत्वाद्दर्शोपजातकन्यासंक्रांत्यावधिमासापातेदौहित्रप्रति
पच्छ्राद्धस्यतदतिलंघनेनापरपक्षश्राद्धव्यवधानेनैवकरणमुचितमितिवक्ष्यतेमलमासनिर्णये यान्यपिसूर्यसिद्धांतेषड्विंशेधनु
षोभागेद्वाविंशेनिमिषस्यच मिथुनाष्टादशेभागेकन्यायाश्चचतुर्दशे इत्युक्त्वा अतऊर्ध्वंतुकन्यायायान्यहानितुषोडश क्रतुभि
स्तानितुल्यानिपितृभ्योदत्तमक्षयमितिषोडशदिनानिश्राद्धकालत्वेनोक्तानितानिभवंतुनामतथा नभस्यस्यापरेपक्षेइतिवचनेन
तानिगृहीतुंशक्यंतेअपरपक्षश्रुतिविरोधादेव नहितानिकन्यायाःशेषदिनान्यपरपक्षएवभवंति तिथिश्रुतिविरोधाच्च ति
थिशब्दस्यचांद्रदिनमात्रवाचित्वेनसौरेऽप्रवृत्तेः काम्यत्वाच्चतत्श्राद्धस्यपितृभ्योदत्तमक्षयमितिश्रवणात् कन्यागतेसवित
रियान्यहानितुषोडशेत्यत्रभवतुतेषांग्रहणंतत्रपक्षविशेषोपलक्षणेकारणाभावात् ज्योतिषसंवादाच्च अत्रवचनांतरेश्राद्धषोड

का०त० शकमित्युक्तावपि न संख्यया श्राद्धानां भेदः अनुत्पत्तिवाक्यगतत्वात् वचनस्यैकदेशकन्यासंबंधमात्रेण सकलपक्षपूज्यत्वमात्रप्रतिपा
१०७ दनपरत्वात् मध्यवायाद्विवाप्यंतइतिवद्मनुवचनवत् श्राद्धषोडशकमिति द्वितीयानिमित्तभूतलक्षणार्थकर्मप्रवचनीययोगेन श्राद्धा
नामुद्देश्यत्वप्रतीतिश्च संभवति चकालविधौ तत्संबंधित्वरूपेणोपादेयानामपि कर्मणां स्वरूपेणोद्देश्यत्वमनुवाद्यत्वं च नचयादिब्रा
ह्मणायत्नेतेत्यादिवत्त्यागकारणं किंचित् नचानेकगुणोपादानं हेमाद्र्युक्तं तदुक्तं आदौमध्येथवाप्यंतइत्येतेषां द्वितीयद्विगुणं
तृतीयेत्रिगुणमित्यादिवत्स्वरूपेणाविवक्षितत्वात् एकदेशमात्रविवक्षणात् तेन नभस्यस्यापरपक्षइति श्राद्धासत्तिविधौ संख्या
युक्ततिथिसमुच्चयवशादाग्नेयवद्यावत्तिथिसिद्धानामभ्यासानामियं संख्या श्राद्धषोडशकमिति नचैवपक्षस्य पंचदशति
थ्यात्मकत्वादनेनैव न्यायेन हेमाद्र्युक्ता सामान्यकृष्णपक्षेपि प्रतितिथिश्राद्धावृत्तिरेवस्यान्नतु पूर्वोक्तं सकृदेवानुष्ठानमितिवाच्यं प
क्षस्यवस्तुतः पंचदशतिथिरूपत्वेपि तिथीनां स्वरूपेणांगत्वाभावात् अन्यथातिथेरपि नानालक्षणसमुदायात्मकत्वेन क्षणाना
मंगत्वापत्तेः किंत्वयनर्तुमासादिविशेषवन्महासमुदायरूपस्य पक्षस्यैवायोगान्ययोगव्यावृत्त्यांगत्वं अतएव सकृत्करणेपि तत्र
इदंकर्मास्मिन्नयनेस्मिन्नृतावस्मिन्मासेनुष्ठितामिति बुद्धिः महालयापरपक्षेतु पूर्ववाक्ये संख्यावशात्क्वचिद्दिनेदिनेइतिवीप्सा
वशात्पक्षमित्यादिष्वत्यंतसंयोगद्वितीयावशात्क्वचित्सकलादिशब्दवशाद्यावत्तिथ्यभ्यासप्रतीतिः अभ्यासपक्षेत्वदिनेदक्षि
णादानमितियुद्धमाद्रिणोक्तं तेन च यत्सूचितं यावत्समाप्तिमात्रैक्यं तदप्ययुक्तमेव निमंत्रणादिविसर्जनांतस्यैव श्राद्धप्रयोगस्यै
व सायंप्रातर्होमवदावृत्तेः कालस्य प्रयोगानुबंधत्वेन तत्समुच्चयबलात् प्रयोगावृत्तेरेवोचितत्वात् सोमयागेतु प्रधानस्वरूपा
नुबंधदेवतासमुच्चयवशात्प्रधानस्यैवावृत्तिः अतएव यत्र देवतादिसमुच्चयकृता प्रधानमात्रावृत्तिः सोमयागग्रहयज्ञादिषु य
त्र चोत्पन्नगतसंख्याकृता साएकादशप्रयाजलक्षहोमकोटिहोमादिषु तत्र तावदभ्याससमुदायवृत्तिविधिप्रमेयाजातिः य
त्र तु कालवशात्प्रयोगावृत्तिः सायंप्रातरग्निहोत्रदर्शपौर्णमासिकाग्नेयादिषु प्रतिनिमित्तावृत्तिः ततश्चास्या आवृत्तेरिदमेव
वैलक्षण्यं यदत्रावृत्तिविशिष्टात् फलमिति तत्र प्रत्येकं समवेतासा केनचविशेषेण दक्षिणादानमात्रस्यैव सकृत्करणमुच्यते प्र १०७

217/1942

धानमात्राभ्यासानुपगमेहि आराद्उपकारिणां सर्वेषामपि प्रधानपूर्वोत्तरभाविनां तदुचितं पात्रानत्यर्थानां वत्वंनिमंत्रणादिविसर्ज
नांतश्राद्धप्रयोगभेदेसत्यपि ब्राह्मणालाभे किंचित्प्रयोगलोपभयेन चिकीर्षितसकलप्रयोगार्थमभिन्नैरेव पात्रब्राह्मणैः सहसकृदे
देवोपसंवादमात्रकरणाद्राजसूययद्वर्त्विजां तेषामधिष्ठानैक्यं भवति चेद्भवतु कुशादर्व्यादियो मंत्राः ब्राह्मणाश्च बहुश्रुताः
नतेनिर्माल्यतां यांति विनियोज्याः पुनः पुनरिति ब्राह्मणानां विनियुक्तविनियोगाविरोधात् वरणभरणरूपेतु निमंत्रणदक्षिणादा
ने प्रतिश्राद्धप्रयोगं भिन्नेएवोचितेराजसूयवदेव अतएवच पक्षश्राद्धार्थं ब्राह्मणैः सहसकृद्देवोपसंवादेपि तेषामाशौचेभ्यासां
तरेत्यागोन्येषां चोपादनं निमंत्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य च देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् इत्यस्य वचनस्य शा
स्त्रीयनिमंत्रणाभावेनाप्रवृत्तेः तथासत्यपि प्रयोगसंघस्य संभूयैकफलजनकत्वे सायंप्रातरग्निहोत्रवत्प्रातितिथिसंकल्पभेदात्प्रति
पदि महालया परपक्षश्राद्धं करिष्ये द्वितीयायां महालयपरपक्षश्राद्धं करिष्ये इत्यादिप्रावृक्भेदाद्वांतराप्रतिबंधान्निश्चयेन केनचिदभ्यासे
यत्र पक्षेणारब्धेप्येतस्मिन् श्राद्धेयद्यंतरा श्राद्धकर्तुराशौचोपनिपातस्तदा श्राद्धेपाकपरिक्रियेत्युक्तमुख्यप्रारंभाभावात्संकल्प्या
भावाच्च प्रारब्धस्यतकं नास्तीत्यस्याप्रवृत्तेरनधिकारात्तत्र प्राप्तानां प्रयोगाणामनुष्ठानमेव तस्मिंश्चसति कृतानामपि प्रयोगाणां स
हकार्यांतराभावादफलत्वं तथा चाशौचापगमोत्तरं सकृदादिपक्षेण यावद्दीपावलि पुनर्महालयश्राद्धं कर्तव्यं प्रतिबंधांतरेतु
प्रतिनिधिना तद्दशायां कर्तव्यं सायमग्निहोत्रपौर्णमासानंतरमाशौचोपनिपातेतु प्रातरग्निहोत्रदर्शयोर्वैतानोपासनाः कार्याः क्रि
याश्च श्रुतिचोदनादित्यधिकारप्रतिप्रसवादाशौचमध्येप्यनुष्ठानं यत्तु कृष्णपक्षे यजमानमरणसंभावनायां दर्शेष्टिपर्यंताग्नि
होत्रहोमकरणपूर्वकं तदानीमेव दर्शस्यानुष्ठानं तद्धाचानिकं शुक्लपक्षेपुनराधानेसति गौणकालेदर्शानुष्ठानवत् नतु तेषाम
पि संकल्पितत्वात्पूर्वकृतानां निःफलत्वप्रसंगभयाद्धाकालाभावेन सायंकृतहोमसहकारिणः प्रातर्होमस्याप्यसंकल्पितत्वेन
सायंप्रातर्होमांतराणां सुतरामसंकल्पितत्वात् अनधिकारप्रतिबद्धसहकार्यंतराभावेनिःफलत्वस्यौचित्यापातत्वाच्च अ

नीयामीत्यादिवद्वाचनिकानुष्ठानाभवेनैवदेशादेवफलसंपत्तेः कल्पयितुमशक्यत्वादित्यलमतिदूरंगत्वा पंचदशदशसप्तपंचति
थिपक्षाब्रह्मपुराणेदर्शिताः अश्वयुक्कृष्णपक्षेतुश्राद्धंकुर्याद्दिनेदिने त्रिभागहीनपक्षंवात्रिभागंत्वर्द्धमेववा नसंतिपितरश्चेतिकृ
त्वामनसियोनरः श्राद्धंनकुरुतेतत्रतस्यरक्तंपिबंतिते यावच्चकन्यातुलयोःक्रमादास्तेदिवाकरः तावच्छ्राद्धस्यकालस्स्यात्शून्यं
प्रेतपुरंतदेति दिनेदिनइतिवीप्सायांपंचदशतिथिलाभः स्पष्टश्चवचनांतरे कन्यागतेसवितरिदिनानिदशपंचच पार्वणेनहविधि
नाश्राद्धंतत्रविधीयतइति अग्रेत्यंतसंयोगद्वितीयाबलाद्दर्शादितिथिलाभः दिनशब्दस्यचपक्षक्रमाच्चांद्रदिवपरत्यातिथिप
त्वं तिथिनैकेनदिवसश्चांद्रेमानेप्रकीर्तितइतिविष्णुधर्मोत्तरात् अतश्चपक्षस्यअहोरात्रेणचैकेनसावनोदिवसः स्मृतइतिल
क्षितचतुर्दशसावनदिनात्मकत्वेताद्दशषोडशदिनात्मकत्वेपिवानकापिक्षतिः ह्रासेतिथिद्वयप्रयुक्तप्रयोगद्वयस्यतंत्रेणा
नुष्ठानात् वृद्धौचयद्यपिगुणानुरोधेनप्रधानावृत्तेरन्याय्यत्वात्पंचदशप्रयोगाणांचसकृत्करणादेवसिद्धेरेकदिनच्छेदएवो
चितः नचनवरात्रव्रतवदाहत्यावृत्तिवचनंतथाप्यावारादेकतिथिप्रयुक्तस्यश्राद्धस्यावृत्त्याप्रयोगेणाविच्छेदेनैवानुष्ठानं किं
तिथिप्रयुक्तंश्राद्धमावर्तनीयमितितुश्राद्धकालव्याप्त्याधिक्येनविवेक्तव्यं एवमग्रिमपक्षेपितृतीयोभागस्त्रिभागः पक्षस्य
पंचदशतिथयः तत्रतद्धीनतावाद्यानांचतसृणांचतुर्दश्याश्चवर्जनात् एवमर्धत्रिभागपक्षयोरपिचतुर्दशीवर्जनं नभस्यस्या
परपक्षेश्राद्धंकुर्याद्दिनेदिनेदिने नैवनंदादिवर्ज्यंस्यान्नैववर्ज्याचतुर्दशीतिप्रतिपदादिपक्षएवचतुर्दशीवर्जनादितरपक्षेषुत
द्वर्जनप्रतीतेः कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशीमितिसामान्यकृष्णपक्षेदशम्यादिपक्षेमनुनातद्वर्जनोक्तेश्च नचे
दमाश्विनापरपक्षश्राद्धंततोभिन्नंतस्यैवत्वत्रविशेषतः पुनराभिधानंप्रशंसनंचफलातिशयार्थमावश्यकत्वातिशयार्थं
वानंदादिवर्जनंतुनभवतिसंख्याहानिप्रसंगात् अर्धंचपक्षस्यैव उक्तपक्षयोःपक्षस्यैवभागितयान्वयादत्रापितथैवि
त्यात् नतुसंनिधानात्त्रिभागस्यार्धमितिकल्पतर्वादिसकलग्रंथविरुद्धंधरलपाण्युक्तंयुक्तं पाठसंनिधेरकिंचित्करत्वात् आ १०८

219/1942

नंतर्यमचोदनेतिन्यायात् बुद्धिसंनिधेस्त्रिभागान्वितस्यपक्षस्योत्तरत्राप्यस्येव अनंतरेणसंबंधःस्यात्परस्याप्यनंतरइतिन्या
यात् अन्यथात्रिभागोपित्रिभागहीनपक्षस्यैवस्यात् उत्तरोत्तरहीनपक्षाभिधानानौचित्यमात्रत्यागस्तुछंदानुरोधात् यदपिशूल
पाणिनवान्यदप्यत्रोक्तं त्रिभागहीनमितिषष्ठ्यादितिथिषुत्रिभागमित्येकादश्यादिषु पंचपंचतिथीनामेवपक्षत्रिभागत्वात् उत्त
रादयनाच्छ्राद्धेश्रेष्ठंस्याद्दक्षिणायनं चातुर्मास्यंचतत्रापिप्रसुप्तेकेशवेहितं प्रोष्ठपद्याःपरःपक्षस्तत्रापिचविशेषतः पंचम्यू
र्ध्वंचतत्रापिदशम्यूर्ध्वमतोप्यति मघायुक्ताथतत्रापिशस्तताराजंस्त्रयोदशी तत्राक्षयंभवेच्छ्राद्धंमधुनापायसेनच सर्वस्वेना
पिकर्तव्यंश्राद्धमत्रनराधिप परान्नभोजीत्वपचःश्राद्धमत्रतुकारयेदितिविष्णुधर्मोत्तरसंवादाच्च यच्चूर्ध्वंवाचतुर्थ्याइतिकृ
ष्णपक्षेदशम्यादावितिचतत्सामान्यकृष्णपक्षे तेनाश्विनापरपक्षेकस्मिन्नपिपक्षेचतुर्दशीवर्जनंनास्त्येवेति तदप्ययुक्तं श्रा
द्धंशस्त्रहतस्यैवचतुर्दश्यांमहालयइतिकालादर्शाद्युदाहृतवचनविरोधात् सामान्यकृष्णपक्षश्राद्धादस्याभेदाच्च पंचमी
प्रवृत्तेर्दशमीप्रवृत्तेरूर्ध्वमितिव्याख्यानेनविष्णुधर्मोत्तराविरोधादत्रापितद्धर्मप्रवृत्तेर्बाधकाभावात् एतद्व्याख्यासंवादि
स्पष्टमाश्विनापरपक्षाधिकारेदेवीपुराणे कन्यास्थेतुरवावेशेपूजाकार्यायथाविभौजंगीतिथिमासाद्ययावच्चंद्रार्कसंग
मं तत्रापिमहतीपूजाकर्तव्यापितृदैवते ऋक्षेपिंडप्रदानंतुज्येष्ठपुत्रीविवर्जयेदिति भौजंगीपंचमी चंद्रार्कसंगमोदर्शः
एतेनविषशस्त्रश्वापदादितिर्यक्ब्राह्मणघातिनांचतुर्दश्यांक्रियाकार्याअन्येषांतुविगर्हितेतिमरीचिवचनेयाचचतुर्द
श्यामशस्त्रहतादिश्राद्धनिंदा सामान्यकृष्णपक्षश्राद्धविषयानतुमहालयाआनंतर्यमिति दर्शपूर्णमासप्रकरणेश्रूयते
हस्तावववनेनिक्ते उतपराजीस्तृणातीति वेद्यामास्तरीतुंसंपादितस्तुगस्तंबउत्तपराजितः तत्रहस्तशुद्धिर्दर्भास्तरणवाक्य
योर्निरंतर्येणपठितत्वात्क्रमप्रमाणेनहस्तशुद्धिद्वारास्तरणमात्रस्यांगहस्तावनेजनमितिचेत् मैवं अवनेजनेहस्तसंस्का
रःसंस्कृतौचहस्तौसर्वानुष्ठानयोग्याविस्येताद्दशंसामर्थ्यं लिंगंप्रकरणंचदर्शपूर्णमासयोःस्फुटंअतःप्रबलाभ्यांलिंगप्र

नंतर्यमचोदनेतिन्यायात् बुद्धिसंनिधेस्त्रिभागान्वितस्यपक्षस्योत्तरत्राप्यस्त्येव अनंतरेणसंबंधःस्यात्परस्याप्यनंतरइतिन्या
यात् अन्यथात्रिभागोपित्रिभागहीनपक्षस्यैवस्यात् उत्तरोत्तरहीनपक्षाभिधानानौचित्यमात्रत्यागस्तुछंदानुरोधात् यदपिशूल
पाणिनेवान्यदप्यत्रोक्तंत्रिभागहीनमितिषष्ठ्यादितिथिषुत्रिभागमित्येकादश्यादिषु पंचपंचतिथीनामेवपक्षत्रिभागत्वात् उत्त
रादयनात्श्राद्धेश्रेष्ठेस्याद्दक्षिणायनं चातुर्मास्यंचतत्रापिप्रसुप्तेकेशवेहितं प्रोष्ठपद्याःपरःपक्षस्तत्रापिचविशेषतः पंचम्यू
र्ध्वंचतत्रापिदशम्यूर्ध्वमतोप्यति मघायुक्ताथतत्रापिशस्तारराजंस्त्रयोदशी तत्राक्षयंभवेच्छ्राद्धंमधुनापायसेनच सर्वस्वेना
पिकर्तव्यंश्राद्धमत्रनराधिप परान्नभोजीत्वपचःश्राद्धमत्रतुकारयेदितिविष्णुधर्मोत्तरसंवादाच्च यच्चूर्ध्वंवाचतुर्थ्याइति कृ
ष्णपक्षेदशम्यादावितिचतत्सामान्यकृष्णपक्षे तेनाश्विनापरपक्षेकस्मिन्नपिपक्षेचतुर्दशीवर्जनंनास्त्येवेति तदप्ययुक्तं श्रा
द्धंशस्त्रहतस्यैवचतुर्दश्यांमहालयइतिकालादर्शाद्युदाहृतवचनविरोधात् सामान्यकृष्णपक्षश्राद्धादस्याभेदाच्च पंचमी
प्रवृत्तेर्दशमीप्रवृत्तेरूर्ध्वमितिव्याख्यानेनविष्णुधर्मोत्तराविरोधादत्रापितद्धर्मप्रवृत्तेर्बाधकाभावात् एतद्व्याख्यासंवादि
स्पष्टमाश्विनापरपक्षाधिकारिदेवीपुराणे कन्यास्थेतुरवावंशेपूजाकार्यायथाविधि भौजंगीतिथिमासाद्ययावच्चंद्रार्कसंग
मं तत्रापिमहतीपूजाकर्तव्यापित्र्यदैवते ऋक्षेपिंडप्रदानंतुज्येष्ठपुत्रीविवर्जयेदिति भौजंगीपंचमी चंद्रार्कसंगमोदर्शः
एतेनविषशस्त्रश्वापदादितिर्यक्ब्राह्मणघातिनांचतुर्दश्यांक्रियाकार्या अन्येषांतुविगर्हितेतिमरीचिवचनेयाचचतुर्द
श्यामशस्त्रहतादिश्राद्धनिंदा सामान्यकृष्णपक्षश्राद्धविषयानतुमहालयाआनंतर्यमिति दर्शपूर्णमासप्रकरणेश्रूयते
हस्ताववनेनिक्ते उतपराजीस्तृणातीति वेद्यामास्तरीतुंसंपादितस्तृगस्तंबउत्तपराजितःतत्रहस्तशुद्धिर्दर्भास्तरणवाक्य
योर्नैरंतर्येणपवित्रत्वाक्रमप्रमाणेनहस्तशुद्धिद्वारास्तरणमात्रस्यांगहस्तावनेजनमितिचेत् मैवं अवनेजनंहस्तसंस्का
रःसंस्कृतौचहस्तौसर्वानुष्ठानयोग्याविसेतादृशंसामर्थ्यंलिंगंप्रकरणंचदर्शपूर्णमासयोःस्फुटंअतःप्रबलाभ्यांलिंगप्रक

रणाभ्यां क्रमबाधात्सर्वशेषो हस्तशब्दहिरितिन्यायार्थः परपक्षश्राद्धविषया प्रकरणभेदेन सामान्यविशेषकृष्णपक्षश्राद्धयो
र्भेदादितरथा संक्रांत्यादिप्रयुक्तस्याप्यशस्त्रहतश्राद्धस्य चतुर्दश्यां निषेधापत्तेरित्यपि शूलपाण्युक्तिनिरस्ता वेदितव्या नह्य
संनिधिमात्रं प्रकरणांतरं किंतु पूर्वानुपादेयसंबंधसहकृतः स च प्रत्यभिज्ञानार्थं तस्यावश्यापेक्षितत्वात् इह तु कृष्णपक्ष
रूपानुपादेयसंबंधः प्रत्यभिज्ञाहेतुरेवेति विपरीतं प्राप्तस्यैव तु कृष्णपक्षसामान्यश्राद्धस्य विशेषे तत्र तत्र स्मृतिपुराणादौ
पुनरभिधानं फलातिशयाभिधानार्थं अकरणे प्रत्यवायातिशयाभिधानार्थं चेत्युक्तं अत्र च कश्चिदश्वयुक्कृष्णपक्ष इति कु
चिन्नभस्यस्यापरेपक्ष इति यदभिधानं तदेकस्यैव पक्षस्य शुक्लादिकृष्णादिभेदभिन्नमासद्वयेन तस्यैवोपलक्षणात् अत
एव विष्णुधर्मोत्तरे प्रोष्ठपद्याः परः पक्ष इत्येवोक्तं आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः तत्र श्राद्धं प्रकुर्वीत कन्यां
गच्छतु वा न वा आगते पि रवौ कन्यां श्राद्धं कुर्वीत यत्नतः आषाढ्याः पंचमः पक्षः प्रशस्तः पितृकर्मसु शक्रध्वजनिपातां
को यः स्यात्पक्षस्तु पंचमः स विज्ञेयो परः पक्षः श्राद्धं तत्र विधीयत इत्यादीनि जातूकर्णजाबालिकार्ष्णाजिनिप्रभृतीनां
बहूनि वचनानि स्पष्टं चांद्रमासग्रहणद्योतकान्यप्रमाणीकृत्य कन्यां गते सवितरि पितरो राजानुशासनात् भवंत्येतपुरी
शून्या यावद्वृश्चिकदर्शनं ततो वृश्चिक आयाते निराशाः पितरो नृप पुनः स्वभवनं यांति शापं दत्वा सुदारुणं सूर्ये क
न्यास्थिते श्राद्धं यो न कुर्याद्गृहाश्रमी कुतः स्तस्य धनं पुत्राः पितृनिश्वासपीडिता इत्येवमादिषु वचनेषु कन्यासंबंधेने
व श्राद्धविधानाद्ब्रह्मपुराणादिगतमाश्विनपदमपि जीमूतवाहनमतेन शक्त्यैव तात्पर्यग्राहकवशाद्वा लक्षणयापि सौरा
श्विनपरमेव नभस्यपदमपि तुलामकरमेषेषु प्रातःस्नायी भवेन्नर इत्यादिकार्तिकमाघवैशाखस्नानादिविधायिबहु
वचनदर्शनान्मीनादिष्वेव चैत्रादित्वस्यौत्सर्गिकत्वेपि मीनमेषयोर्मेषवृषयोर्वा वसंत इति वचनात्सर्वर्तुमासानां वैक॰ १०९
ल्पिकत्वेन कन्याया भाद्रपदत्वस्यापि संभवात्तत्परमेव अस्मिंश्च पक्षे तुलाया आश्विनत्वस्य संभवाद्वचनांतरगतमाश्वि

नपदं तुलापरं प्रमादादिना मलमासत्वाद्वा मासि कन्यागतो भानुसंक्रांतो भवेद्यदि दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयमिति वचना
त्कन्यायामकरणे तु कल्पत्वेन तुलाप्राप्त्यर्थमिति येके चिन्मन्यंते तदप्यनेन विष्णुधर्मोत्तरवचनेनापहसितं द्रष्टव्यं ब्रह्मपुराणे पौर्ण
मास्यंतमासक्रमेणैव स्वकलकृत्याभिधानाच्च यद्यपि च इंद्राग्नीय चरुर्ध्येते मासादिः संप्रकीर्तितः अग्नीषोमो स्मृतो मध्ये स
माप्तौ पितृसोमकाविति मासलक्षणवशान्मासशब्दस्तद्विशेषवचनाच्चैत्रादिशब्दादर्शांतमुख्यास्तथापि कृष्णतात्पर्यवशा
ल्लक्षणयापि पौर्णमास्यंतपरत्वमेव न्याय्यं सकृत्पक्षश्च आषाढ्याः पंचमपक्ष इति नागरखंडवचनमूलकः पूर्वमेव दर्शित इति
षट्पक्षा महालया परपक्षे केचिदत्र सर्वानूपिंडदाननिषेधान्महालयश्राद्धविषयत्वे हेतुप्रमाणगंधशून्याना पितृद्विषयान्क्रा
द्धनिषिद्धानापि च स्वमत्यैव पिंडदानमात्रविषयान्परिकल्प्य प्रतिपदादिपक्षेपि पिंडदानरहितं सांकल्पिकविधानेनैव श्राद्धं क
र्तव्यमिति वदंति तदतिनिर्मूलं यत्र च कन्यागतरवियुक्तानि दिनान्यतिप्रशस्तानि पक्षांतरेपि कन्यास्थे रवौ श्राद्धं प्रशस्यते
कन्यागते पंचमे तु विशेषेणैव कारयेदिति हेमाद्र्युदाहृतादित्यपुराणात् नित्यं चात्र श्राद्धं प्राह षांते यमः प्रेतान् पितृंश्च
यमालयात् विसर्जयति मानुष्ये कृत्वा शून्यं स्वकं पुरं क्षुधार्ताः कीर्तयंतस्ते दुष्कृतं यः स्वयं कृतं कांक्षंति पुत्रपौत्रेभ्यः पायसं
मधुसंयुतं तस्मात्तांस्तत्र विधिना तर्पयेत्पायसेन तु मध्वाज्यतिलमिश्रेण तथा शीतेन चांभसा ग्रासमात्रं परत्वन्यैर्दत्तं यः
प्राप्नुयान्नरः भिक्षामात्रेण यः प्राणान्संधारयति वा स्वयं यो वा संधारयेद्देहं प्रत्यहं स्वात्मविक्रयात् श्राद्धं तेनापि कर्तव्यं
तैस्तैर्द्रव्यैः सुसंचितैरित्यादित्यपुराणात् शाकेनापि नापरपक्षमतिक्रमेदिति कात्यायनवचनाच्च आषाढ्याः पंचमे प
क्षे यः श्राद्धं न करिष्यति शाकेनापि दरिद्रोपि सोत्यजत्वमुपेष्यति आसनं शयनं भोज्यं स्पर्शनं भाषणं तथा तेन सार्धं क
रिष्यंति ये ते यापतमानराः इति नागरखंडे करणे प्रत्यवायश्रवणाच्च काम्यं च पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा प्राप्नो
ति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलानिति कार्ष्णाजिनिवचनात् यदि चैकेनचित्प्रतिबंधेन तत्पक्षमध्ये सकृत्पक्षेणापि श्राद्धं

221
194

नज्ञातं तदेतदनंतरं शुक्लपंचमीयावत्कस्मिंश्चिद्दिने कार्यं हंसेवर्षासु कन्यास्थेशाकेनापिगृहे वसन् पंचम्योरंतरे कुर्यादुभयोर
पिपक्षयोरितियमवचनात् उभयोः कृष्णशुक्लयोः पक्षयोस्तत्संबंधिन्योः पंचम्योरंतरे कृष्णपंचम्युपक्रमप्रभृति शुक्लपंच
म्यंतं यावत्कस्मिंश्चिद्दिने श्राद्धं कुर्यादिति त्रिभागहीनपक्षेण कृष्णपंचम्यादितस्य चोपलक्षणत्वा दन्यपक्षेणाप्यमावास्या
पर्यंतासु तिथिषु श्राद्धस्य बहुभिर्वचनैः प्राप्तत्वादुत्तरपंचमीपर्यंततिथीनां प्रथमानुकल्पत्वेन विधानार्थमेवेदं वचनं तत्रा
प्यसंभवे तुलासंक्रांतियावत्कस्मिंश्चिद्दिने तत्राप्यसंभवे वृश्चिकसंक्रांतियावत्कस्मिंश्चिद्दिने यावच्च कन्यातुलयोः क्रमा
दास्ते दिवाकरः तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदेति ब्रह्मपुराणात् कन्यातुलयोः क्रमावस्थानस्य प्राप्तत्वादे
क्रमादित्युत्तरत्रान्वेति क्रमात् श्राद्धस्य कालः स्यादिति तारतम्येनेत्यर्थः तथा च नागरखंडेपि कन्यापि क्षयात्तुलया अनु
कल्पत्वं दर्शितं नददातिनरः श्राद्धं पितॄणां चंद्रसंक्षये क्षपिताशापरीतांगाः पितरस्तस्य दूषिताः प्रेतपक्षं प्रतीक्षंते गुरु
ग्रासमन्विताः कर्षुकाजलदं यद्वद्दिवा नक्तमतंद्रिताः प्रेतपक्षेप्यतिक्रांते यावत्कन्यागतो रविः यावच्छ्राद्धं प्रवांछंति दत्तं
वै पितरः सुतैः ततस्तुलागतेप्येके सूर्ये वांछंति पार्थिव श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः तस्मिन्नपि व्यति
क्रांते काले वृश्चिकगे रवौ निराशाः पितरो दीनास्ततो यांति निजालयं मासद्वयं प्रतीक्षंते गृहद्वारसमाश्रिताः वायुभूताः
पिपासार्ताः क्षुत्क्षामाः पितरो नृणां यावत्कन्यागतः सूर्यस्तुलास्थश्च महीपत इति तत्रापि कार्तिकामावास्यायां विशे
षतः कार्यं येयं दीपान्विता राजन् ख्याता पंचदशी भुवि तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालयमिति भविष्योत्तरवचना
त् पंचदशी अमावास्या ख्याते त्युक्तत्वात् तस्यामेव च दीपमालाश्च कर्तव्याः शक्त्या देवगृहेषु च रथ्यापणश्मशानेषु
नदीपर्वतसानुष्वित्यादिना ब्रह्मपुराणे बहुदीपदानविधानात् यद्यपि वृश्चिके कार्तिकपौर्णमास्यामपि दीपदानं विहितं
स्यात्तथाप्यमावास्यैव ग्राह्या कृष्णपक्षस्य पित्र्ये प्रशस्तत्वात् दीपावलीत्वेन तस्या एव ख्यातत्वाच्च अमावास्यायां च
तत्प्रयुक्त श्राद्धप्राप्तावपि महालयप्रयुक्तमप्राप्तं शक्यत एव विधातुं श्राद्धमात्रप्राप्तिश्च कार्तिकामप्यां विशिष्टा ११०

223
145

आषाढ्यामथ कार्तिक्यां माघ्यां त्रीन्पंच वा द्विजान् तर्पयेत्पितृपूर्वं तु तदस्याक्षयमुच्यत इति यमवचनात् यच्च महालयदर्शानंतरप्र
तिपदि जीवत्पितृकैः क्रियते मातामहश्राद्धं यच्च स्मृतिरत्नावल्यादिनिबंधनिर्माणकाले प्रतिपद्येव तस्यामिदानीं तु महालयांतर्गतम
मावास्यां जीवत्पितृकैरेव क्रियते मातृश्राद्धं अपुत्रपितृव्यज्येष्ठभ्रात्रादिश्राद्धं च तत्तन्मृततिथौ तत्तदधिकारिभिस्तदपि तत्तत्कालेषु क
थंचिन्नष्टावमेतेष्वेव शुक्लपंचमीपर्यंतादिषु गौणगौणतरादिकालेषु कर्तव्यं तस्यापि कन्योपलक्षितापरपक्षनिमित्तत्वात् तत
प्यनापितं प्राक् अत्र च यथा कृष्णपक्षसामान्यप्रयुक्तं श्राद्धमाहिताग्नेरमावास्यायामेव भवति नान्यतरेषामिवान्यस्यामपि
तिथौ अमावास्यायां तु फलातिशयमात्रं न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन इति मनुवचनात् इदं हि वचनं नाहिताग्नेर्द
र्शश्राद्धातिरिक्तश्राद्धनिषेधार्थं प्रतिसांवत्सरिकादिश्राद्धाभावप्रसंगात् दर्शपदे श्राद्धलक्षणाप्रसंगात् नियममंत्रिसंभवति
अपूर्वनिषेधपरत्वे गौरवाच्च एतेन दर्शश्राद्धसदृशानां साधारणकालानामेव श्राद्धानामयं प्रतिषेधो नासाधारणकाल
कानामाब्दिकादीनामित्यपास्तं किंतु कृष्णपक्षप्रयुक्ते श्राद्धे सकृदेव यस्यां कस्यांचित्तिथौ कर्तव्ये दर्शकालनियमार्थमि
ति पार्थसारथिमिश्रप्रभृतिभिर्व्याख्यातं तथा महालयापरपक्षश्राद्धमपि सकृत्पक्षे दर्श एवाहिताग्नेर्भवति प्राप्ते सकृत्
सामान्ये तत्र कालविशेषनियममात्रकरणे लाघवेन तत्रैव पक्षे पूर्ववचनप्रवृत्तेः पुरावाच इति अस्ति अध्वरकल्पा नामका
म्येष्टिः तत्र प्रातःकाले त्रयाणां यागानामाग्नावैष्णवसारस्वतबार्हस्पत्यानां संघः पतितः मध्यान्हयोरपि तथैव
पतितः तत्र श्रूयते पुरावाचः प्रवदितोर्निर्वपेदिति तत्र त्रिषु अंगानां किं तंत्रं उत त्रयाणामर्थे अंगान्यावर्तनीयानि
वा तत्र तंत्रमिति प्राप्ते कुतः पुरावाचः प्रवदितोर्निर्वपेदित्यविशेषात् सर्वनिर्वापस्यापकर्षे सति तदादिवाभिसंबंधा
दिति न्यायेन निर्वापांत्यसर्वस्यांगकांडस्यापकर्षः स्यात् प्रतिप्रधानमिति प्राप्ते ब्रूमः भवेदेवं यदि सर्वनिर्वापापकर्षः स्या
त् किंतु आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेदिति विहितो यः प्रातःकालीनो निर्वापः स एव संनिहितत्वात् पुरावाच इति

विशिष्यते नान्यकालीनस्तेन प्रधानकालेत्वंगानां बोदक प्राप्तं न बाधितं तस्मान्मध्यंदिनापराह्णवर्तिनां प्रधानानामंगानिन
तत्रावर्तिनीयामीतितंत्रमेदइतिसिद्धांतः प्रवदितार्निनपेदित्यस्यैव प्रातःकालीनप्रधानांगनिर्वापिपक्षांतराणित्वाहिताग्नि
रपिसंभवत्येव अनेनैवन्यायेन सन्यासिनोथाह्निकादिपुत्रः कुर्याद्यथातिथि महालयेतु य श्राद्धं द्वादश्यामेव तद्भवेदित्य
पिवचनं सकृत्सक्षाविषयमेव यत्तु आहिताग्नेः पित्रादिवार्षिकश्राद्धं दर्शकर्तव्यश्राद्धप्रकारेण त्रिपुरुषोद्देशेनविनाप्रतिसंव
त्सरं चैवामित्याद्युक्तप्रकारेणैकोद्देशेन न भवतीत्याहिताग्निकर्तकाब्दिके पार्वणप्रकारनियमार्थत्वेन केषांचिन्मनुवचनस्य
व्याख्यानं तद्वार्षिकश्राद्धस्य मनुस्मृतौ विशेषतोऽसंनिधानाद्दर्शपदेलक्षितलक्षणापत्तेश्चायुक्तं आहिताग्नेर्दर्शश्राद्धमे
वानियतं तेन विनान्यत् श्राद्धं तु तस्य न नियतमिति नियतपदाध्याहारेण मेधातिथिव्याख्यानं कथंचितयुज्यतां नाम केचित्
दर्शेनविनेत्यस्य कृष्णपक्षश्राद्धविषयत्वमभ्युपेत्यैव नैपित्र्यज्ञियो होमो लौकिके अग्नौ विधीयत इत्यस्य पूर्वार्धस्य तत्रो
तुत्वेनेत्थं व्याख्यानं कृतं आहिताग्निना सर्वाधानिना श्राद्धरूपपित्र्यज्ञांगभूतो होमः स्मार्तकर्म विवाहाग्नावितिविहिते
औपासने तावत्कर्तुं न शक्यते लौकिके तु स न विधीयते अग्नेः प्रतिनिध्यभावात् प्रत्युत साग्निरग्नावनग्निस्तु द्विजपाणाव
थाप्सुवा कुर्याद्वेनोक्रियां नित्यं लौकिके नेति निश्चितामिति हेमाद्र्युदाहृतस्मृतिवचनेन निषिध्यते साग्नित्वाच्चानग्नि
कस्य विहितपाण्यादौ न भवति परिशेषात्त्रेताग्नावेव कर्तव्यस्तत्रापि दक्षिणाग्नावेव पित्र्यकर्माधिकरणत्वेन तस्य दृष्टत्वात्
अयविवृणामग्निरितिमंत्रवर्णाच्च स च दर्शान्यदिने न लभ्यते यदि हि श्राद्धीयहोमोपि स्वार्थतया तस्य विहरणमाहरणं वा
प्रयुंजीत ततस्तत्रापि स लभ्येत स च तदा तत्प्रयुंजीत यदि क्वापि तत्प्रयुक्तिं विना तं न लभेत शक्नोति तु दर्शे तां विनापि दर्श
यागार्थविहरणादेरेव तं लब्धुं अत एव विज्ञानयोगिनाप्युक्तं पिंडपितृयज्ञानंतरभाविनि दर्शश्राद्धे विहृतदक्षिणाग्नेः सं
निधानादिति तस्माद्धेतोराहिताग्निना सर्वाधानिना दर्श एव कृष्णपक्षश्राद्धं कार्यं नान्यदिन इति तदिदमयुक्तं साक्षाद्वच
नं विना श्राद्धीयहोमस्य श्रौतेग्नौ कर्तुमशक्यत्वात् तथाहि न तावदग्नीनां श्रौतानां प्रयोजनाकांक्षया स्मार्तकर्मणि १११

225
19

विनियोगः विशेषलौकिकमिति गर्गत्रिरात्रसामानि प्रतिश्रूयते अग्निपनिधायस्तुवीतेति तत्राग्निमुपनिधायस्तुवीतेति
तत्रोपनिधेयोग्निर्वैदिकः स्यात् आधानादिसंस्कारस्य प्रयोजनाकांक्षितया समस्तवैदिककर्मशेषत्वादितिप्राप्तेब्रूमः आहवनीये
जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिभिर्होमादिभिः प्रयोजनाकांक्षा निवर्तिताऽतो नाहवनीयादिशब्दवदग्निशब्दः संस्कार
निमित्तः किंतु जातिनिमित्तस्तथा च लौकिककार्येष्विव वैदिकेष्वपि शेषभावं भजते तस्य सर्वकार्यसमर्थत्वात्तथा च विनाहवनी
यादिसंस्कारवाचकविशेषणं न वैदिकस्योपस्थापकइति सिद्धांतः असंयुक्तो ह्यभानामपि तेषां वाचनिकैर्होमादिभिरेव प्र
योजनाकांक्षाशांतेः वचनेपि कृत्वाग्नौ पितृयज्ञवदित्यादि यद्यपि सामान्यविषयं तथापि न श्रौताग्निपरं विशेषे लौकिकं स्यादि
तिन्यायात् किमुत गृह्याणि वक्ष्याम इति प्रतिज्ञानात् गृह्यगतं कर्म स्मार्तं विवाहाग्नावित्युक्तत्वाच्च स्मृतिगतमप्यौपासनाग्नि
परमेव यदा तत् न च पितृयज्ञवदित्यतिदेशाद्दक्षिणाग्निप्राप्तिरिति शंभुशंखधराद्युक्तं युक्तं अग्नेरुपदेशसिद्धत्वेनातिदे
शस्य तद्भिन्नधर्मविषयत्वात् अन्यथाग्नावित्यस्य वैयर्थ्यापातात् अत एव च न तस्य दक्षिणाग्निपरत्वमपि तदनुपाद
ने हि कदाचिदतिदेशाद्दक्षिणाग्निरेव प्राप्नुयादिति तन्निवृत्त्यर्थमौपासनाग्निपरमेव तत् एकस्यैवाग्निशब्दस्य गृह्याग्नि
मतं प्रति तत्परत्वं सर्वाधानिनं च प्रति दक्षिणाग्निपरत्वं चान्याय्यं तेन गृह्येषु स्मृतिषु चाग्निपदेन गृह्याग्नेरेव ग्रहणात्
तदभावे सर्वथा निरग्नेरिव अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति वचनात्पाणावेव श्राद्धीयो होमोक्तेर्युः अनः
ग्न्यादिपदैरपि गृह्याग्निरहित एवोच्यते अत एव होमस्याधिकरणाकांक्षया दक्षिणाग्निप्राप्तिरित्यपि न युक्तं सत्याम
प्याकांक्षायां वाचनिकेन पाणिनैव तन्निवृत्तेः वस्तुतस्तु न होमस्याधिकरणाकांक्षा देवतोद्देशत्यागपूर्वकप्रक्षेपमा
त्ररूपत्वात् अत एव यदाहवनीये जुहोतीत्यपूर्वविधिरेव न नियमविधिरित्युक्तं न देवताग्निशब्दक्रियमित्याधिकरणे
संनिधानमात्रं त्वकिंचित्करमाहवनीयाद्यतिप्रसक्तं च अथैतदपरितोषादेवमिताक्षरायामुदाहृतमाहिताग्निस्तु जु
हुयाद्दक्षिणाग्नौ समाहितः अनाहिताग्निस्त्वौपसदे अग्न्यभावे द्विजे वेति मनुवचनमेव सर्वाधानिनः श्राद्धीयहोमे

का०त०
११२

दक्षिणाग्निप्रापकत्वेनाभिमतंतर्हिश्रौतिष्यादिभिरिवाप्रयोजकलक्षणाभावात्श्राद्धीयहोमेनापितस्याविहरणादिप्रयुक्तिसंभवा
द्दर्शान्यादिनेपिदक्षिणाग्निः कल्पएव अतएवोक्तंवायुपुराणे आहृत्यदक्षिणाग्निंतुहोमार्थंवैप्रयत्नतः अग्न्यर्थंलौकिकं
वापिजुहुयात्कर्मसिद्धयइति अग्न्यर्थंस्मार्तंकर्मविवाहाग्नाविति स्मार्तकर्माधिकृतोपासनाग्न्यर्थे तत्कार्यार्थमिति याव
दितिनपित्र्यज्ञियद्गत्यस्यनदर्शनित्यत्रार्थहेतुत्वेनव्याख्यानंयत्किंचिदेव वाचनिकएवत्वयमर्थोनदर्शनविना श्राद्धमाहिता
ग्नेर्द्विजन्मनइतिद्वयोरप्याहिताग्न्योः नपित्र्यज्ञियइतितुवायुपुराणोक्तलौकिकनिषेधार्थंपृथगेववाक्यं निषिध्यतेच
स्मृत्यंतरोक्तस्मृत्यंतरेण यदुच्यतेद्विजातीनामितिवत् नचवायुपुराणगतंलौकिकपदंगृह्याग्निपरं अग्न्यर्थमित्यग्निप
दंचस्ववाक्यप्रकृतदक्षिणाग्निपरंतेनाग्नौकरणहोमेदक्षिणाग्निरेवमुख्यस्तदभावेगृह्याग्निरनेनविधीयतइतिवाच्यंस्व
वाक्यप्रकृतपरामर्शस्यसर्वनाम्नातत्तद्विशेषशब्देनेववादृष्टत्वात्सामान्यवाचिनाग्निशब्देनदक्षिणाग्निपरामर्शानुपपत्तेः
अधिकृतविशेषपरत्वंतुसामान्यशब्दस्यव्रीहीन्प्रोक्षतीत्यादिषुबहुशोदृष्टं किंचगृह्यस्मृत्युक्तकर्मस्कन्धायाद्वाक्याच्च
स्वर्गतोगृह्याग्निरेवमुख्यस्तदसंभवेऽपवादत्वेनवापाण्यादिवद्दक्षिणाग्निर्विधीयतइत्येवोचितं अतएवमिताक्षरायां
कर्मस्मार्तंविवाहाग्नावित्यस्यापवाददर्शनादित्युक्त्वा आहिताग्निस्त्वित्यादिवाक्यंलिखितंसर्वाधानिविषयत्वंचतस्यो
क्तमित्यलंप्रसंगागतेन महालयापरपक्षांतर्गतभरण्यांचतन्निमित्तंश्राद्धंमहाफलं भरणीपितृपक्षेतुमहतीपरिकीर्ति
ता अस्यांश्राद्धंकृतंयेन सगयाश्राद्धकृद्भवेत्इतिमत्स्यपुराणात् अथात्रैवत्रयोदश्यांश्राद्धेकिंचिद्विचार्यते तत्रयद्य
पिमघायुक्ताथतत्रापिशस्तारार्जस्त्रयोदशी पूर्वोदाहृताद्विष्णुधर्मोत्तरवचनादाषाढ्याः पंचमपक्षेगयामध्याष्टमी
स्मृता त्रयोदशीगजच्छायागजातुल्येतुपित्र्यकेइति ब्रह्मांडपुराणाच्चापरपक्षनिमित्तमेवयेनकेनापिसकृत्पक्षाभिन्नेनप ११२
क्षेणत्रयोदश्यांक्रियमाणंश्राद्धंत्रयोदशीश्राद्धमितिप्रतीयतेतथापिभिन्नमेवेदंतस्मात् यत्किंचिन्मधुनामिश्रंप्रदद्या

227/19

तुत्रयोदशी तदप्यक्षयमेवस्याद्वर्षासुचमघासुच यद्ददातिगयास्थश्चसर्वमानंत्यमश्नुते तथावर्षात्रयोदश्यांमघासुचाविशे
षतः प्रोष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीं प्राप्यश्राद्धमकर्तव्यंमधुनापायसेनवा श्राद्धकालममावास्यांनित्यंपार्थिवस
त्तम पौर्णमासीतथामाघीश्रावणीचनृपोत्तम प्रोष्ठपद्यामतीतायांतथाकृष्णत्रयोदशी अष्टकान्वष्टकास्तिस्रस्तथैवचनृपो
त्तम एतानिश्राद्धकर्माणिनित्यान्याहप्रजापतिः श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यते अमावास्यास्तिस्रोष्टकास्तिस्रोन्व
ष्टकामाघीप्रोष्ठपद्यूर्ध्वंकृष्णात्रयोदशीत्यादिषुमनुयाज्ञवल्क्यविष्णुधर्मोत्तरविष्णुस्मृत्यादिगतस्पष्टविधिवचनेषु अनेक
स्मृतिपुराणगतपितृगाथारूपार्थवादोन्नेयविधिवचनेषुचापरपक्षनिमित्तस्यश्राद्धस्याप्रत्यभिज्ञानात् यद्यपिचायंत्र
योदशीविशेषः कृष्णपक्षाविनाभूतस्तथापिनतत्श्राद्धाविनाभूतः सकृत्पक्षेतत्रतदभावात्येनतदुपस्थापयेत् कृष्ण
पक्षविशेषस्तुकृष्णपक्षसामान्यनिमित्तश्राद्धाविनाभूतस्तदुपस्थापयत्येवेतिततोमहालयापरपक्षश्राद्धस्याभेदो
युक्तः पूर्वोक्तवचनैश्चनित्यत्वावगमात्प्रकरणांतराच्चकृष्णपक्षसामान्यविहितात्काम्यश्राद्धादपिभिन्नं नह्यत्राग्नि
होत्रदर्शपौर्णमासादिवत्कामनिमित्तसंयोगतदात्प्रयोगमात्रभेदोनकर्मस्वरूपभेदइतिसंभवति एकोसाचिद्विधिसंनि
धाभावेनकर्मस्वरूपभेदायवादकस्यसंनिधौत्वविभागादितिन्यायस्यतद्रूद्वाभावात् तेनात्रकर्मभेदएव युगादिश्राद्धात्तुत्र
योदशीश्राद्धंनभिद्यतेत्रयोदशीविशेषस्ययुगादित्वाविनाभावात् तस्यचपुनर्मन्वोर्विधिदिस्मृत्यादिषुतावद्युगादिसामा
न्यश्राद्धविधेरभावाद्यत्तएव यदिकश्चिन्नाद्विधावप्येतस्यविधिः स्यात्तीयनविपुवन्महालयादिवदावश्यकत्वार्थः पलाति
शयार्थश्चभविष्यति अतएवोक्तंब्रह्मपुराणे योनामवर्द्धयेद्देहंप्रत्यहंस्वात्मविक्रयात् श्राद्धंतेनापिकर्तव्यंतैस्तैः द्रव्यैः सुस
चितैः त्रयोदश्यांविशेषेणवर्षासुचमघासुच नास्मात्परतरः कालः श्राद्धेष्वन्यस्तुविद्यते यदत्रसाक्षात्पितरोगृह्णंत्यमृ
तमक्षयमिति अत्रचयद्यपिबहुषुवचनेषुमघायुक्तैवत्रयोदशीश्राद्धकालत्वेनवश्रूयतेतथापिकेवलापिप्रोष्ठपद्यपरील
निसातथाभवत्येवप्रोष्ठपद्यामतीतायांतथाकृष्णत्रयोदशी प्रोष्ठपद्यूर्ध्वंकृष्णत्रयोदशीत्यादिवचनेभ्यः अपिजायेतसो

का॰ त॰ स्माकंकुलेकश्चिन्नरोत्तमः प्रावृट्कालेसितेपक्षेत्रयोदश्यांसमाहितः मधूत्कृतेनयःश्राद्धंपायसेनसमाचरेत् कार्तिकंसकलं
११३ वापिप्राक्छायेकुंजरस्यच अपिनःसकुलेजायाद्योनोदद्यात्त्रयोदशीं पायसंमधुसर्पिर्भ्यांप्राक्छायेकुंजरस्यचेतिविष्णु
मन्वादिमन्वादिस्मृतिगतासुपितृगाथासुचत्रयोदशीमात्रप्रशंसनात् कार्तिकंसकलंवापीतिचपृथगेवप्रशंसोन्नेयःस
कलकार्तिकव्यापिनोमधुप्लुतपायसद्रव्यकस्यश्राद्धस्यविधिःप्राक्छायेकुंजरस्येतिचतथैवापराह्णिकहस्तिछायाद्यपदेशां
गकस्य अतएवमहाभारते अपिनःसकुलेजायाद्योनोदद्यात्त्रयोदशीं मघासुसर्पिषायुक्तंपायसंदक्षिणायने अजेनसर्वलो
हेनमघासुचयतव्रतः हस्तिछायासुचतथाकर्णव्यजनवीजितमिति वर्षास्वितिचत्र्यृतुसंवत्सराभिप्रायेणमासचतुष्टयात्म
कंवर्षर्तुमभिप्रेत्य तथाचमहाभारते चतुरोवार्षिकान्मासान्योमांसंपरिवर्जयेत् चत्वारिभद्राण्याप्नोतिकीर्तिमायुर्यशो
बलमिति यतीनधिकृत्यवसिष्ठेनाप्युक्तंनचौरमेकत्रवसेदन्यत्रवर्षाकालात्श्रावणाद्यश्चत्वारोमासावर्षाकालइति पृ
थक्मघाग्रहणंभारतवचनेमहालयपक्षगतायाःकेवलमघायाःअपित्रयोदशीवत्श्राद्धकालत्वार्थंसंनिधोत्वविभागा
दिति दर्शपूर्णमासप्रकरणेदेशकालनिमित्तान्याम्नायंतेसमेयजेत अतएवनिधेयाः उपादानविधिशब्दयोःपर्यायत्वात्
ततःकर्मविधिरित्यवश्यमभ्युपेयंतत्रप्रकरणोदर्शादेः पूर्वनिहितस्यएभिर्वाक्यैः पुनर्विधानेसमिधोयजतीत्यादिवदत्या
सा देवकर्मभेदइतिप्राप्तेब्रूमः देशादीनामविधेयत्वेपिविहितकर्मणासहतेषांसंबंधोविधीयतांसचकर्मवत्पूर्वंनविहितइ
त्यप्राप्तत्वाद्विधिमर्हति तदुक्तमुपादानविधिशब्दोपर्यायाविति तदसत् अप्रवृत्तप्रवर्तनंविधानंतच्चपुरुषविषयःशब्द
व्यापारः अननुष्ठितस्यानुष्ठानमुपादानंतच्चकर्मविषयः पुण्याधारइतिमहान्विशेषः योपिदर्शादीनांपुनर्विधिः सोपि
देशादिसंबंधंविनातुकर्मानुवादइतिनकर्मभेदमावहति समिधोयजतीत्यादौविधेयगुणांतराभावेनानुवादासंभवात्पुन
र्विधानंभेदहेतुरितिवैषम्यंतथाचवसिष्ठेनापिकेवलमघासुश्राद्धमुखेन पितापितामहश्चैवतथैवप्रपितामहः उपासंते ११३

कृतंजातंपिप्पलंशाकुनाइव मधुमांसैश्चशाकैश्चपयसापायसेनच एषनोदास्यतिश्राद्धंवर्षासुचमघासुचेति उभययो
गेतुफलातिशयार्थत्वलक्षणंप्राशस्त्यं योगोमघात्रयोदश्योःकुंजरछायसंज्ञितः भवेन्मघायांसिंहेचशशिन्यर्केकरेस्थिते
इतिब्रह्मपुराणोक्तकुंजरछाययोगप्राशस्त्यातिशयवत् प्राशस्त्यार्थमेवचमहाभारतवचनेपूर्वमघाग्रहणं वाक्यांतरेषुच
मघायुक्तादिग्रहणं स्पष्टंचैतद्योगीश्वरवचने तथावर्षात्रयोदश्यांमघासुचविशेषतइति एवंसतित्रयोदशीसमभिव्या
हृतेषुवचनेषुयामघासुचेतिचकारः सयद्यपितिथ्यासहेतरेतरयोगार्थस्तथापिप्रशस्त्यार्थएवमघायुक्तादिवचनव
त् वस्तुतस्तुसपरस्परनिरपेक्षकक्रियान्वयलक्षणंसमुच्चयार्थएवप्राक्छायेकुंजरस्यचेतिवत् केवलमघायाअपिश्रा
द्धकालत्वोक्तेः वर्षासुत्रयोदश्याविशेषणमेव प्रावृट्कालेसितपक्षेत्रयोदश्यांवर्षात्रयोदश्यामित्यादिवचनात् यत्तु
शूलपाणिनावर्षावन्मघापित्रयोदशीविशेषणमेवमघायुक्तवाक्यैकवाक्यत्वात्तथामघायुक्तैवत्रयोदशीश्राद्धकालः
नतुकेवलात्रयोदशीमघावा यत्तुक्वाचित्कंकेवलतत्श्रवणंतदितरोपलक्षणंपूर्वोक्तादेवहेतोः मघायुक्तपितृगाथाथ
र्वार्थवादेषुतुसुतरां अर्थवादानांविधिशेषतेनतदनुरोधेननेतव्यत्वात् विधौचवर्षासुचमघासुचेतिमघायोगस्याश्रव
णात् केषुचित्वर्थवादेष्वपिमघायोगापिश्रूयतएव अत्रविधिःकल्प्यमानोविशिष्टतिथिगोचरएवकल्पयितुंन्याय्योनतुत्र
योदशीमात्रश्राद्धगोचरएकफलातिशयार्थमघायोगगोचरश्चान्योगौरवप्रसंगात् गजछायाकुंजरप्राक्छाययोगेतुत्र
योदशीश्राद्धएवफलातिशयार्थौअत्यमुन्युक्तत्वादित्युक्तंतदयुक्तं नह्यृषिवचनानांसंवादात्प्रामाण्यंयेनवक्तृकल्पत्वबहु
त्वकृतोविशेषःस्यात् तेनयद्येकविधौकल्पनालाघवमात्रेणस्वारसिकंनैरपेक्ष्यबाधिनाप्यनाकांक्षितेतरोपलक्षणंस्वी
क्रियतेतर्हिसर्वोपसंहारेणतादृशैकविधिकल्पनाद्गजछायाख्ययोगयुक्तायामेवत्रयोदश्यांकुंजरप्राक्छायएवचश्राद्धं
स्यान्नान्यत्र अथवृपतोहिनिराकांक्षाभिन्नत्वेनावधारिताः अन्योन्यानादरेणैवप्रार्थयंतेप्रयोजनमितिन्यायेनतत्तद्
विवचनानुरूपनानाश्रुतिकल्पनमपिप्रामाणिकमेवततोमदुक्तमेवकल्पतर्वादिसंमतंयुक्तं अतएवकेवलमघात्रयोदशी

220 / 194

का० त०
११४

प्रशंसार्थत्वात्पार्थवादेभ्य प्रत्यक्षतोवा केवलतत्फलोचरविध्योः कृत्स्नत्वात्प्रशंसार्थवादेभ्यः फलातिशयार्थतया कृत्स्नविशिष्ट
तिथिगोचरस्यैवविधेः कल्पनात्रविधिद्वयकल्पनागौरवमपि एवंचसामान्यकृष्णपक्षत्रयोदश्यांज्ञातिश्रैष्ठ्यबहुप्रजादिफ
लकंकाम्यमेवश्राद्धं महालयापरपक्षत्रयोदश्यांतुपक्षश्राद्धात्काम्यश्राद्धाच्चभिन्नंयुगादित्वनिमित्तवत्त्वेनेतरयुगादिश्रा
द्धापेक्षयाप्यावश्यकं अक्षय्यतृप्त्यादिपितृगतप्रजापुष्ट्यादिकर्तृगतमहाफलजनकंचश्राद्धमितिस्थितेयतावत्कृष्णत्रयो
दशीसामान्यश्राद्धविषयाः स्पष्टानिषेधाः कृष्णपक्षेत्रयोदश्यांयः श्राद्धंकुरुतेनरः पंचत्वंतस्यजानीयाज्ज्येष्ठपुत्रस्य
निश्चितं गृहीत्रयोदशीश्राद्धंनकुर्यात्पुत्रवानपि उपवासंचसंक्रांतौग्रहणेचंद्रसूर्ययोः त्रयोदश्यांतुवैश्राद्धंनकुर्यात्पु
त्रवान्गृही नेष्यतेसोपवासश्चैकश्चिदप्ययनद्वयेइत्यादयोज्योतिर्बृहस्पतिवामनपुराणषट्त्रिंशन्मतादिगताः यत्र
तादृशाएवयुवमारिणस्तेभवंतियुवानस्तत्रम्रियंतइत्यापस्तंबकात्यायनाद्युक्तनिंदान्नेयानिषेधास्तेपुत्रवद्भ्राहिणो
न्यबहुपुत्रलाभार्थततश्राद्धनिषेधपराः तेष्वेवतस्याधिकारिणःश्रवणात् युवानः समनंतरजनिष्यमाणापेक्षयापू
र्वोत्पन्नाइतियावत् तेम्रियंतइतिदोषश्रवणाच्च ज्येष्ठपुत्रस्येतिज्येष्ठशब्दोपितत्परएव भवतुवासक्षेपिंडदानंतुज्ये
ष्ठपुत्रीविवक्षयिदिचसर्वज्येष्ठपरस्तथापितद्धतएवनिषेधः अतएवस्कांदेनागरखंडे योवांछतिनरोमुक्तिंपितृभिःस
हचात्मनः असंतानश्चयस्तस्यश्राद्धंप्रोक्तात्रयोदशी संतानयुक्तोयःकुर्यात्तस्यवंशक्षयोभवेदितिएतत्सामान्यतोदृ
ष्टमूलिकवचेकमात्रपुत्रवतांबहुपुत्रकामनयापुत्रार्थविहितहरिवंशश्रवणादिकर्मानाचरणप्रसिद्धिः शिष्टानां आन
र्थक्यत्संवादरूपनागरखंडेतिहासार्थवादात्तुमहालयापरपक्षत्रयोदश्यांकेवलायांमघादियुक्तायांवावहत्या
वश्यकंमहाफलंचश्राद्धंविहितंतस्यनिषेधउन्नीयतेतत्राहियद्यपित्रयोदश्यांकृतेश्राद्धेकस्माद्वंशक्षयोभवेत् सहिश्रा
द्धंत्रयोदश्यांकुरुतेपायसेनचेत्युपक्रमेत्रयोदशीमात्रंप्रतीयतेतथापिसक्षेपित्र्येयदाचेंद्राहंसश्चैवकरेस्थितः त्रयो ११४
दश्यांतुसाछायाविज्ञेयाकुंजराह्वया श्राद्धेचापिप्रशस्तासापितृणांतृप्तिकारिणी अतोमघात्रयोदश्यामितरे वहिसा

231
117

धनैः करोतिश्रद्धयाश्राद्धंतत्प्रभावमनुस्मरन् तस्यतद्वचनंश्रुत्वायेचान्येपिजनाभुवि नभस्यस्यत्रयोदश्यांश्राद्धंचक्रुर्मुदा
न्विताः अद्यप्रभृतियःश्राद्धंत्रयोदश्यांकरिष्यति कन्यासंस्थेसहस्रांशौतस्यस्याद्वंशसंक्षयइति मध्यमध्यमहालयत्रयोद
शीपरामर्शादुपक्रमस्यार्थविरोधेनतत्तत्परत्वात्तच्छ्राद्धस्यैवतत्रनिषेधः तत्रस्पष्टैर्विधिभिर्बहुफलार्थतयाविहितस्यात्संत
निषेधासंभवात् क्रत्वर्थत्वाभावाच्चषोडशिग्रहणाग्रहणवद्विधिप्रतिषेधयोर्विकल्पसंभवान्निषेधस्यकस्मिंश्चिद्विष
यभेदेऽवश्यंकर्तव्येपिंडदानेपितत्तद्रूपविस्तरसाहित्यरूपस्तावदेकस्तद्विषयोनागरखंडएवोक्तः अतःश्राद्धंविनादेयंतद्दि
नेमधुपायसं खड्गमांसंकालशाकंमांसंवाध्रीणसस्यच तस्याभावेपिदातव्यंक्षीरोदनमनुत्तमं तस्मिन्नहनिविप्रेभ्यःपितृ
णांतुष्टयेनृप तस्याभावेपिदातव्यंजलंतिलविमिश्रितमिति अत्रश्राद्धशब्दः पिंडदानपरस्तस्यापिपितृदेवत्यत्वेनश्राद्ध
शब्दवाच्यत्वात् अग्रेब्राह्मणभोजनस्योक्तत्वेनतन्निषेधासंभवात्पितृतुष्टेस्तदुद्देशंविनाऽसंभवेनतत्रपितृणामवश्यं
उद्देशनीयत्वात् तत्तद्रूपविचतदंगानांनिमंत्रणादीनांब्राह्मणोपवरणामवश्यंभावित्वेपिंडदानस्यतदंगानांचाभावेनतत्र
युक्तेनचवाचानिकेनार्घ्यदानाग्नौकरणाद्यभावेनविस्तरपर्युदासोपपत्तेः अद्यप्रभृतियःश्राद्धमितिपूर्वतनोपिश्राद्धश
ब्दःपिंडदानपरएवनिंदायाः अतःश्राद्धंविनेतिपर्युदासशेषत्वात् युक्तश्चैतच्छ्राद्धेपिंडदाननिषेधस्तस्ययुगादिप्रयुक्त
त्वात् तत्रचअयनद्वितयेश्राद्धंविष्णुवद्वितयेतथा युगादिषुचसर्वासुपिंडनिर्वपणादृतइतिपुलस्त्येनपिंडदाननिषे
धात् नचैवंसामान्यनिषेधेनैवसिद्धेर्विशेषनिषेधोव्यर्थः प्राप्त्यभावादसंगतश्चेतिवाच्यं पूर्वोक्तनानावचनेरेतत्त्रयोदशी
श्राद्धस्यात्यावश्यकत्वाक्षय्यपितृतृप्तिहेतुत्वयोरवगमात्पिंडदानस्यचतीर्थश्राद्धादिषुब्राह्मणभोजनासंभवेकेवलपिंड
दानविधानेनब्राह्मणभोजनापेक्षयातिशयेनपितृतृप्तिहेतुत्वावगमादष्टकान्वष्टकादिसमभिव्याहाराच्चसत्यपियुगा
दिश्राद्धत्वेसामान्यनिषेधबाधेनात्रपिंडदानंभवत्येवेतिशंकानिवृत्त्यर्थत्वात् अतएवककोपाध्यायेनापिनःसकुलेभू
यादित्यादिर्मघात्रयोदशीश्राद्धविषयापितृप्रार्थनापिंडदानविषयवोक्ता येषुग्रंथेष्वेतत्त्रयोदशीश्राद्धनिषेधस्तत्र

का० त०
११०

युगादिसामान्यश्राद्धतत्रत्यपिंडदाननिषेधयोरनुक्तत्वाच्च अन्याप्येकवर्गोद्देश्यकत्वपानिषेधविषयः कार्ष्णाजिनिनोक्तः श्राद्धैं
वैकवर्गस्यत्रयोदश्यामुपक्रमेत नकुर्यात्तत्रयेयस्यप्रजांहिसंततिस्तस्यतदिति तेप्रज्ञामितिह्वचिस्नाठः एकवर्गस्यपितामह
मात्रवर्गस्य किंतुमातामहवर्गस्यापीतिविधिर्विषयः नतुतत्तत्कालविहितेषुतत्तच्छ्राद्धेष्वितिकर्तव्यताकांक्षायांसमीपधर्मा
नुपदेशादुपदिष्टधर्मकस्य पार्वणाख्यस्यदर्शश्राद्धस्य धर्मा अतिदेशात्प्राप्यंते पार्वणेचयद्यपिपितृभ्योदद्यादितिलिंगस
मवायगौणपितृशब्दोपात्तविहितेनपितृ पितामहप्रपितामह देवत्याभ्यासत्रयसमुदायात्मकेनप्रकरणलब्धधर्मेणैकेनश्रा
द्धसमुदायिनासहैव प्रयोगवचनानिदेशप्राप्तधर्मविशिष्टंमातामहादिदेवत्याभ्याससमुदायात्मकंसमुदायांतरमपिश्रा
द्धंमातामहानामप्येवमित्यादिनाविहितं तथापितस्यातिदेशतोधर्मग्राहित्वेनभिक्षुकत्वान्नहिभिक्षुकोभिक्षुकांतरंयाचि
तुमर्हतिसत्यन्यस्मिन्नभिक्षुकइतिन्यायेनतदीयधर्मातिदेशानौचित्यात्पित्रादिश्राद्धरूपस्यैवसमुदायिनोधर्माणाम
तिदेशः एकसमुदायिविकारेचसमुदायांतरेणैवातिदिश्यते कर्मणस्त्वप्रवृत्तित्वादितिन्यायात् तेनयद्यपिश्राद्धांतरे
षुमातामहादीनामतिदेशतोनप्राप्तिः सौर्यादिष्विवाग्नीषोमादीनांतथापिपितरोयत्रपूज्यंतेतत्रमातामहाध्रुवं अवि
शेषेणकर्तव्यंविशेषान्नरकंव्रजेत् कर्षूसमन्वितंमुक्त्वातथाद्यंश्राद्धषोडशं प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडिति
स्थितिरित्यादिवचनैरेवयथाश्राद्धांतरेषुमातामहश्राद्धस्यापिप्राप्तिस्तथात्रयोदश्यामपितत एवतस्यापिप्राप्तेः कथमे
कवर्गयत्नस्यप्रसक्तिर्यस्यायंप्रतिषेधः क्वचित्तुप्रत्याब्दिकाद्यतिरिक्तेषुसर्वेषुत्रिपुरुषश्राद्धेषुदर्शश्राद्धातिदेशादेव
मातामहादिप्राप्तिंवदंति तथाहि भवेत्पूर्वोक्तोन्यायोयद्यभ्यासत्रयसमुदायात्मकात्पित्रादिश्राद्धादन्यत्ताद्दशंमाता
महादिश्राद्धंनामकर्मस्यात्तच्चनदास्याद्यद्यमावास्यायांपितृभ्योदद्यादिति पितृशब्दोजनकपुरुषवचनोवक्तृवचना
न्वयार्थेचपितामहप्रपितामहाविवलक्षयेत् तदाहि मातामहादिश्राद्धस्यतत्राविहितत्वादगत्यामातामहानामप्येव ११५
मितिविशिष्टविधिरेवकर्मभेदापादक आपद्यते नत्वेवमस्तिनायंपितृशब्दोजनकपुरुषपरोलक्षणापत्तेः नापिवस्व

233
151

रुद्रादित्यान्निष्वात्तादिदिव्यपितृपरः स्वधापितृभ्यइतिवत् नामगोत्राद्यन्वयविधानात् किंतुसपिंडीकरणांतश्राद्धजन्यावस्था
विशेषवचनः मंत्रगतपितृशब्दवत् तेचसर्वएवदेवताभूताः कर्मणित्वप्रवृत्तत्वादिति इष्टौफलादयश्चत्वारः संति तत्रफलंस्वर्गः
नियमोयावज्जीवकर्तृकत्वं कर्तास्वर्गकामः संघः आग्नेयादीनांषण्णांसाहित्यंतएते चत्वारः सौर्यादिषुविहितेषुकिमितिदर्श
तेनवेतिसंशये अतिदिश्यंतइतितावत्प्राप्तं प्रकृतिसंबंधात्प्रयाजादिवदितिचेत् नकथंभावयित्वाहिविकृतिभावनायदेवप्र
कृताविस्थंभावनगृहीतंतदेवापेक्षतेनचफलादीनामित्थंभावेनान्वयः फलनियमयोःपुरुषार्थत्वात् स्वर्गकामोपिनकर्मार्थः
कर्मैवतदर्थमित्युक्तंप्राक् तथाग्नेयादीन्यपितुल्यवत्फलंप्रतिकरणत्वेनोपदिष्टानिनान्योन्यस्यांगंतेनैनैकस्योपकारेअ
न्यानिप्रवर्ततेनचाप्रवर्तमानेषुतेषुतत्साहित्यंभवति तस्मान्नफलादीनामतिदेशः नचप्राकृतमेवफलमुद्दिश्यविकृतिर्वि
धीयतांनप्रवृत्त्यैवतस्यावरुद्धत्वादितिन्यायार्थः पितृशब्देनैवचोद्दिष्टव्याइति यद्यप्येतावन्मात्रालोचनयातिप्रसक्तंतथा
पिपितरिदंतेघ्यंशक्रधंतांपितरइत्यादिमंत्रानानान्मातामहानामप्येवमित्याद्युक्तेश्चपित्रादीनांत्रयाणांमातामहादीनांच
त्रयाणांदेवतात्वंपित्रादिशब्देश्चोद्देशइत्यवगम्यतेतेनपितृभ्योदद्यादित्युपदेशेनैवावस्थाविशेषरूपसामान्यवचनेनापि
पित्रादिमातामहादित्रिकत्रिकपरेणषण्णांदेवतानांविधानात्तावदभ्याससमुदायात्मकमिदमेकमेवश्राद्धंमातामहानाम
प्येवमितितुनधर्मातिदेशः एककर्मणिऐंद्राग्नेंद्रप्रदानवत्प्रकृतिविकृतिभावासंभवात् किंतुतद्देवसर्वाभ्यासेषुसमान
विधानानामेवधर्माणांकेषुचिदभ्यासेषूक्तस्यप्रयोगप्रकारस्येतरेषुलाघवार्थंसंक्षेपेणैवंप्रदर्शनमेवमितरे अपिसवनद्व
त्यादिवत् अतएवयाज्ञवल्कीयादिषुद्विरेवमभिधानं धर्मातिदेशार्थत्वेएकेनैवसकलेत्थंभावातिदेशसिद्धेस्तद्द्वयध्वा
रापर्यालोचनयापिपितृशब्दोवस्थाविशेषवचनएवावगम्यते पितृमातृमातामहाद्यनुस्मृतस्यतदतिरिक्तस्यसामान्यस्या
संभवादिति तदेतदपेशलं वृद्धौश्राद्धत्रयंस्मृतंतत्रवांवैश्वदेविकमित्यादिवचनेभ्यः श्राद्धभेदप्रतीतेः तस्यचपित्रादि

का० त०
११८

त्रययागवन्मातामहत्रययागस्यापितेनैवविधिनाविधानेऽनुपपत्तेः कर्मभेदस्यविधिभेदाधीनत्वात् विध्येकत्वेपिसंख्यान्या
येनन्यायसुधाकरमतेनेतादृशगुणभेदेनापिकर्मभेदाभ्युपगमेपित्रादित्रयेपिप्रत्येकंकर्मभेदापत्तिः इष्टापत्तौश्राद्धेकव्य
वहारस्यराजसूयादिवत्समुदायनामत्वेनोपपत्तावपिसर्वत्राविवक्षितसाहित्यानांसमुदायिनामेवेतिकर्तव्यतात्वयापित्रादि
त्रयेपिप्रयोगकालेवैश्वदेवादीनामारादुपकारिणांतंत्रत्वापत्तेःस्मृतिशिष्टव्यवहारविरोधः तुल्यत्वेहिसतिकिमितिवर्गद्व
यएवतंत्रत्वंस्मृतिषुतंत्रेणकरिष्यइत्यादिरूपेणशिष्टैश्वव्यवह्रियतेनैकवर्गेपितेनैकवर्गेकर्मैक्यमेव अभ्यासभेदमात्रंव
र्गद्वयेतुकर्मभेदएवेतिगम्यते अतएवमिताक्षरायांदर्शश्राद्धप्रकरणेयदिद्वावेवब्राह्मणौलभ्यौतदादैवेपात्रंप्रकल्प्यपितृ
वर्गेमातामहवर्गेचैकैकंनियुंज्यादित्युक्त्वातत्रप्रमाणत्वेनयद्येकंभोजयेत्श्राद्धेदैवंतत्रकथंभवेत् अन्नंपात्रेसमुद्धृत्यसर्वस्य
प्रकृतस्यच देवतायतनेकृत्वाततःश्राद्धंप्रवर्तयेत् प्रास्येदन्नंतदग्नौतुदद्याद्वाब्रह्मचारिणइतिवचनमुदाहृतंएवंहिव
नश्राद्धत्वंवर्गद्वयेप्रत्येकंपर्याप्तमेकवर्गेचव्यासक्तमितिदर्शयति किंचमातामहश्राद्धेशुंधन्तांमंत्रस्यपिंडपितृयज्ञप्रकृतिकत्वा
हापपत्तौ अपिश्राद्धद्वयस्यैकविधिविधेयत्वेनैककर्मत्वेर्घ्यमंत्रादिषूहोनस्यात् एककर्मणिप्रकृतिविकृतिभावासंभवात
तेनैवमादिव्यवहारोपपत्तयेत्रयःपित्र्यइतिवत् जनकपुरुषवचनलिंगसमुदायगौणःपितृशब्दोप्येतत्पितृभ्योदद्यादित्ये
तेनपित्रादित्रिकदैवत्यश्राद्धमात्रविधिमातामहादिश्राद्धस्यत्वातिदेशिकधर्मविशिष्टस्यमातामहानामप्येवमितिपृथ
गेवविधिरित्येववक्तव्यं आश्वलायनादिसूत्रेषुतुपित्रादित्रयमात्रदैवत्यार्थमंत्राम्नानादर्घ्यदानस्यचभोज्यब्राह्मणा
स्वपित्वापित्रादिभ्यएवत्रिभ्योभोजनदानंपिंडपितृयज्ञकल्पेनतेभ्यएवपिंडदानंस्पष्टमुक्तं ननुमातामहादिभ्यः वायुपु
राणेपिपिंडदानरूपंप्रधानंपित्रादिभ्यएवोक्तं मधुसर्पिस्तिलयुतांस्त्रीन्पिंडान्निर्वपेद्बुधइतिजातूकर्ण्येनापिकृत्वावने
जनंदद्यात्त्रीन्पिंडांस्तुयथाविधीति दर्शेवत्स्यात्त्रयोद्देशःसपिंडीकरणेकृतइतिव्यासवचनादप्याब्दिकेदर्शश्राद्धप्र ११६
कारातिदेशात्तत्रत्रिपुरुषोद्देश्यकमेकंश्राद्धंप्रतीयते द्विरुक्तिस्तुयाज्ञवल्क्यादिषुस्वस्वेतिकर्तव्यताविशिष्टब्राह्मण

235
194

भोजनपिंडदानरूपप्रधानद्वयस्यप्रत्येकंविधानार्था यद्यपिप्रथमोक्तेःपूर्वंपितृवर्गेपिब्राह्मणभोजनंनोपदिष्टंतथापिब्राह्मणो
पवेशनादेस्तद्भोजनांगत्वात्तद्विधिनैवापत्क्रांतविधिकस्यतस्यसंभवतिमातामहादिसंबंधित्वेनविधिः श्राद्धंकुर्यादित्यनुवृ
गाध्याहारान्यतराभिधानंतुहेमाद्रियत्रैकवमातामहानामेवमित्युक्तिस्तदभिप्रायं अतएवपुलस्त्यवचनं मातुःपितरमारभ्य
त्रयोमातामहाःस्मृताः तेषांतुपितृवच्छ्राद्धंकुर्युर्दुहितृसूनवइति कात्यायनसूत्रेतुपितृभ्यःपितामहेभ्यःप्रपितामहेभ्योमा
तामहेभ्यःप्रमातामहेभ्योवृद्धप्रमातामहेभ्यइतितुल्यवन्मंत्राम्नानात्त्रीँस्त्रीन्पिंडान्दद्यादितिवीप्सायुक्तेकषट्पिंडदानविधे
श्चतद्भाष्येवाविशेषाद्भयेषांपित्रादीनांमातामहादीनांचैत्येवंकर्कोपाध्यायेनव्याख्यानादपरपक्षेश्राद्धंकुर्वीतेत्युक्त
निविधेश्ववर्गद्वयस्याप्येकएवश्राद्धविधिरितिप्रतीयते बृहस्पतिस्मृतावपिसर्वस्मात्प्रकृतादन्नात्पिंडान्मधुतिलान्वितान्
पितृमातामहादीनांदद्यात्कृत्स्नविधानतइति व्यासस्मृतावपिपितॄन्मातामहांश्चैववद्विजःश्राद्धेनतर्पयेदिति देवलस्मृतावपि
एवनापिहिविप्रेणषट्पिंडंश्राद्धमाचरेत् षडर्घ्यान्दापयेत्तत्रषड्भ्योदद्यात्तथाशनं पिताभुंक्तेद्विजकरेमुखेभुंक्तेपितामहः
प्रपितामहस्तुतालुस्थःकंठेमातामहस्मृतः प्रमातामहस्तुहृदयेवृद्धोनाभौतुसंस्थितः एवमप्याचरेच्छ्राद्धंषट्दैवत्यंमहामु
नेविभक्तंकारयेद्यस्तुपितृहासप्रजायतेइति मत्स्यपुराणेपि पिंडान्वाहार्यकंश्राद्धंप्रकृत्यप्राचीनावीतिनाकार्यमतःस
र्वंविजानता षड्भ्यश्चतस्माद्धविःशेषात्पिंडान्दद्यात्तथोदकं दद्यादुदकपात्रेषुसतिलंसव्यपाणिनेति अत्रचपक्षेमातामहना
चैवमित्युक्तेःप्रकारप्रदर्शनार्थत्वेनपूर्ववदुपपत्तावपिऊहविषयाणांचमंत्राणांकेषांचित्कातीयसूत्रेदर्शनेपिवर्गद्वयश्रा
द्धस्यैकोत्पत्तिविधिविषयत्वेएकवर्गइववर्गद्वयेपितुल्यरूपकर्मापत्तेरेकवर्गेअभेदव्यवहारस्यवर्गद्वयेचभेदव्यवहारस्यकथंचि
दप्युपपादयितुमशक्यत्वात्तदुपपत्तयेएकेनापिविधिनावचनांतरवशादेकैकवर्गेभ्याससमुदायात्मकेवर्गद्वयेचपरस्परभि
न्नंविलक्षणमेवकर्मोत्साद्यतइत्यवश्यमंगीकर्तव्यं दृष्टंचन्यायवचनस्वरसप्राप्तस्याप्यर्थस्यान्यथाकरणमनन्यगतिकप्रमाणां
तरवशाद्दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यादौ आग्नेयोष्टाकपालोऽमावास्यायांपौर्णमास्यांचाच्युतोभवतीत्यादिषु किमुतसंक्षेपलाघवा
दिप्रधानकपुरुषप्रणीतेषुस्मृतिसूत्रवचनेषु तेनकेषुचित्पंथेषुविप्रादित्रययागाभ्याससमुदायात्मकमेकंश्राद्धंपृथगुत्पत्ति

का०त०
११.१

पूर्वकं धर्मोपदेशयुक्तं विधाय पश्चाद्वाचनिकं धर्मातिदेशयुक्तं तादृशमेव मातामहादिश्राद्धं पृथगेव विधीयते सहप्रयोगता च तस्य
पितृश्राद्धेन सहैव स्वंदविकृतं तत्र पक्षात्त्वात् तत्प्रयोगमध्यविधानेन वज्ञाप्यते केषुचित्तु तादृगेव कर्मद्वयं सहैवोल्लाद्य पश्चाद
भयसंबंधेन धर्मा उपदिश्यंते तत्र सहप्रयोगत्वं स्पष्टमेव तत्रापि पितृश्राद्धप्रकारस्य सविस्तरं मातामहश्राद्धप्रकारस्य च मा
तामहानां चैवमिति संक्षेपेणाभिधानेन मातामहश्राद्धस्य पितृश्राद्धान्यद्भावस्य वचनादणुरपीति न्यायेन विकृतिश्राद्धेषु पि
तृश्राद्धधर्माणामेवातिप्रदेशः केषुचित्त्वति संक्षेपप्रधानेषु पितृश्राद्धमेव सप्रकारमुपदिश्य ग्रंथांतरोक्तमुपजीव्य वा पित
रायत्र पूज्यंते तत्र मातामहा इत्यादिप्रकारेण तत्सहप्रयोगस्य मातामहश्राद्धस्य तदुपजीवनेन विधानं केषुचित्तु तदपि न के
वलं पितृश्राद्धस्यैव विधानमित्येवं सर्वापि ग्रंथानां प्रस्थानभेदः पूर्वोक्तस्य वर्गद्वयगतस्य भेदाभेदव्यवहारस्य सर्वग्रंथानु
गावसिद्धस्य संरक्षणार्थं कर्म पूर्वोक्तरीत्यैकरूपमेवांगीकर्तव्यं वृद्धौ नांदीमुखान्पितॄनिति तु पितृशब्दस्य मातृमातामह
श्राद्धयोर्ग्रंथांतरादेव प्राप्तिमंगीकृत्य जनकादित्रिकमात्रपरतयामावास्यायां पितृभ्यो दद्यादिति वत्संभवव्याख्यातस्यापि
यन्मिताक्षरायां सामान्यपरतया व्याख्यानं तत्स्वधाऽस्तु पितृभ्य इत्यादिषु तस्य तत्परतादर्शनाच्छ्राद्धत्रयस्यापि योगीश्वरव
चनाद्बद्धत्वप्रदर्शनार्थं तथापि तु वर्गत्रये प्रत्येकं भिन्नमभ्याससमुदायात्मकं कर्मत्रयमेवोपदिश्यते श्राद्धत्रयमिति व्य
वहारात् तेन पितृमातामहश्राद्धयोर्भेदोऽवश्यंभावि निविकृतिश्राद्धेष्वेकस्य पितृश्राद्धस्यैव धर्माणामतिदेशस्योचित
त्वान्मातामहानामतिदेशतस्तत्राप्राप्तेर्यच्छ्राद्धांतरेषु पार्वणातिदेशेन मातामहप्राप्तिमभिधाय पितरो यत्र पूज्यंते इत्यादि
वचनतस्तत्राप्यभिधानं हेमाद्र्यादीनां पितृव्याणां च तत्स्वापरितोषादेवेति श्राद्धांतरेष्विव त्रयोदशीश्राद्धेपि वचनादेव
मातामहानामपि प्राप्तेः प्रसक्तस्यैकवर्गयजनस्य कथं तत्र प्रतिषेधः तत्र हेमाद्रिरित्थं समादधे इतरश्राद्धेष्विव त्रयोदशी
श्राद्धेपि पितरो यत्र पूज्यंते इत्यनेनैवैकवर्गयजननिषेधसिद्धावपि तत्र पुनस्तस्य निषेधो दोषविशेषार्थः स च न तत्प्रस्तुत
विषयस्येति वाक्यशेषे दर्शितः यद्वा श्राद्धे कुंडगोलकादिनिषेधवत्भ्रमप्रसक्तस्य तस्यायमत्र प्रतिषेधः तथा च तत्र ब्रा ११७
ह्मणाद्ब्राह्मण्यामुत्पन्नो ब्राह्मण एव यथा गोर्गवि गौरश्वादश्वायामश्व इति न्यायाभासमूलकभ्रमस्तथात्रापि अंगविष

237
194

यस्याशक्यत्यागान्यायस्य प्रधानैकदेशेऽपि प्रवृत्तिरिभ्रममूलक इति मया त्वच्यते मिताक्षरायां गृह्यभाष्यादिषु च मातामहश्राद्धस्या
नावश्यकत्वं तावदमावास्यादिष्वुक्तं तत्र गृह्यभाष्याद्युक्तेर्मूलं बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रकीर्तितं तस्य तावति शास्त्रार्थे सर्वः
कृतो भवेदिति तत्रैव लिखितं वचनं लभ्यते मिताक्षरोक्तिस्तु याज्ञवल्क्यादिस्मृतिषु गोभिलकात्यायनादिसूत्रेषु च नित्यवद्वर्णना
त्सर्वप्रामाणिकनिबंधकाराद्वेतेभ्यः कर्षूसमन्वितमित्यादिपरिशिष्टादिवचनेभ्यश्च प्रत्यक्षेभ्यो मातामहश्राद्धस्यापि पितृश्राद्धवद
मावास्यादिष्वावश्यकत्वावगतेर्निर्मूलेव प्रतिभाति तत्र त्रयोदश्यामेकवर्गश्राद्धनिषेधोयं वृध्यादिषु च षड्भ्यः पितृभ्यस्तदनुश्रा
द्धदानमुपक्रममित्यादिमातामहश्राद्धपुनर्वचनमेवमूलं क्वचिद्धि निषेधात्पुनर्वचनाच्चान्यत्रानावश्यकत्वं स्फुटं गम्यत एव अवि
शेषेणेति तु वचनं येन मातामहेन सह मातुः सपिंडीकरणं कृतं तद्विषयं पुत्रेण हि साधारणेषु श्राद्धकालेषु पितुरिव मातुरपि त
त्पिरवश्यं कर्तव्या न च मातामहेन सह सापिंड्ये तस्मै दानं विना मातुस्तत्प्राप्तिहेतुभागलाभः संभवति एकमूर्तित्वमायाति सपिंडी
करणे कृते पत्नी पतिपितॄणां तु तस्मादंशेषु भागिनीति वचनादाहत्यवचनं विना तस्यै पृथगत्र दानासंभवात् पतिपित्रंशभागि
त्वस्य च सपिंडनव्यवस्थया व्यवस्थितत्वात् पितामह्यादिभिः सापिंड्ये पत्न्यंशभागित्वमेव एकत्वं सा गता भर्तुः पिंडे गोत्रे च
सूतके न योषिद्भ्यः पृथक्कुर्यादवसानदिनादृते स्वभर्तृपिंडमात्राभ्यस्तृप्तिरासां यतः स्मृता इति च सामान्यवचनात् स्त्रिया
त्वपित्रा सह सपिंडीकरणे तदपवादकपित्रंशभागित्वोक्तिवत् पितामह्यादिभिः सह तस्मिन्न तदपवादिकायास्तदंशभागित्वो
क्तेरभावाच्च अपुत्रसंतानमातामहविषयं च तादृशमातामहश्राद्धस्य दौहित्रेणावश्यं कर्तव्यत्वात् पौत्रदौहित्रयोर्लोके वि
शेषो नैवद्दृश्यत इति वचनात् तस्माद्यत्र केवलपितृवर्गनिषेधरूपेण वा मातामहपुनर्वचनं तत्रैव मातामहश्राद्धं नित्यमन्यत्रा
नित्यमिति तन्नित्यत्वार्थस्त्रयोदश्यामेकवर्गनिषेधः श्राद्धं नैवैकवर्गस्येत्येतत्समानार्थं हेमाद्र्युदाहृतं वचनांतरमपि न
त्रयोदशीश्राद्धं पुत्रवान्यः कृतायुषे एकस्यैव न कुर्यात्स पार्वणं तु समाचरेदिति एकस्यैव वर्गस्य पार्वणं पर्वणि दर्शेऽक्रि
समाप्तेनामावास्याश्राद्धेन सह पांपट्टदैवत्यमित्यर्थः तत्रैवं मातामहानामप्येवमिति पित्रादिश्राद्धसहप्रयोगस्य मातामह

श्राद्धस्योत्पत्तेः केचित्तुवदंतिनत्वशास्त्रत्रयेयस्येतीत्यमात्रावाप्तिप्रयुक्तदोषश्रवणाद्वर्गांतरगणामिश्रानांपित्रादीनांमात्रादीनां
मातामहादीनांपितृव्याणांभ्रातृणांमातुलानांश्वशुराणांगुरूणांदुहितृणांभगिनीनांभार्याणांपितृस्वसृणांमातृष्वसृणांसख्या
दीनांमध्येएकस्यकतिपयवर्गस्यश्राद्धंत्रयोदश्यांनकुर्यादितिनिषेधव्याजेनसर्वेषांतत्रश्राद्धिश्राद्धंनैवैकवर्गस्येत्यनेनविहितंत
त्सार्वणैकोद्दिष्टमध्येकेनप्रकारेणकर्तव्यमित्यपेक्षायांसपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणं पितृव्यभ्रातृमातृणामेकोद्दिष्टंस
देवहि सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते अपुत्राणांचसर्वेषामपत्नीनांतथैवच भ्रातृभगिन्येपुत्रायस्वामिनेमातुला
यच पितृव्यगुरवेश्राद्धमेकोद्दिष्टंनपार्वणं अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषास्तथा तेषामपिचदेयंस्यादेकोद्दिष्टंनपा
र्वणमित्यादिभिर्जातूकर्ण्यप्रचेतआपस्तंबादिवचनैः पितृमातृमातामहातिरिक्तानांसर्वेषांमृताहमहालयगयादिष्वेको
द्दिष्टप्राप्तिःएकस्यैवनकुर्यात्सपार्वणंतुविधीयतइत्यनेननगिरागिरेतिब्रूयादितिवन्निषेधानुवादपुरःसरंपार्वणप्रकारोवि
धीयतेतेनत्रयोदश्यामस्यांपितृव्यादीनामप्यपुत्राणांपित्रादिवत्त्रिपुरुषमेवश्राद्धंकर्तव्यं पुत्रवतांतुश्राद्धमेवतेषांनभव
ति एवंतीर्थेमहालयेचपुत्रेषुविद्यमानेषुनान्येनकारयेत्स्वधामितिवचनात् गयायांतुस्वपित्राद्धुद्देशेनगतस्यपुत्रवताम
पिपितृव्यादीनांभवति यन्नाम्नापातयेत्पिंडंतंनयेद्ब्रह्मशाश्वतमितिपुनर्वचनस्यैवमर्थवत्त्वादिति अत्रेतावद्वक्तव्यंत्र
योदश्यांकेनप्रमाणेपितृव्यादिश्राद्धप्राप्तिरिति यदुक्तंश्राद्धंनचैकवर्गस्येत्यनेनैवनिषेधव्याजेनेति यदुक्तं श्रुतेर्निंदासम
भिव्याहाराच्चनिषेधस्यैवात्रवाक्यार्थत्वात् नचवाच्यंपंचपंचनखाभक्ष्याइत्यादिविधिषुयथालक्षणयाइतरनिवृत्तिर्वाक्या
र्थस्तथात्रविधिकरणनिंदापिकरणस्तत्स्यैर्थैवेति पितृमातामहवर्गयोर्मध्ये आवश्यकत्वादिनापितृवर्गमात्रस्यैवपार्वणै
कोद्दिष्टदेवतानांमध्येपितृव्यादिसाधारण्येनैकदेवतामात्रयजनप्राप्त्यभावेननिषेधस्यैवात्मलाभासंभवात् पितृव्यवर्गमा
त्रयजनप्रतिषेधेनचसामान्यवचनादिनातत्साहित्येनावगतस्यमातामहवर्गयजनस्यैवलक्षयितुंशक्यत्वात् किंतुमाता
महादीनामपीति ननुपितृव्यादीनामपीति एकवर्गस्यनकुर्यात्किंतुवर्गांतरस्यापिकुर्यादितिप्रतीतेश्चपितृव्यादिसा ११८

239
145

धारण्येनकतिपयप्रतिषेधस्यतथैवप्रापणस्यचानुपपत्तिः नहिपितृव्यादीनांवर्गत्रयत्वंतद्धि अग्नीषोमादिवत्समुच्चितदेवतात्वेस्या
त्पित्रादिवद्वाप्रत्येकंदेवतात्वेप्यभ्यासमात्रभेदेनकर्मैक्येनचपितृव्यमातुलादिषुद्वयमप्येतदस्ति यद्यपिचगयामहालयादिषुश्रा
द्धविहितंतस्यचभेदप्रमाणाभावादभेदातिदेशसामान्यवचनाभ्यांपितृमातामहवर्गयोरेवदेवतात्वेप्राप्यमाणेस्वेनभर्त्रासहश्रा
द्धंमाताभुंक्तेस्वदेवहि क्षयाहंवर्जयित्वैकंस्त्रीणांनास्तिपृथग्विधिः केचिदिच्छंतिनारीणांपृथक्श्राद्धंद्विजोत्तमाः आचार्य
गुरुशिष्येभ्यःसखिज्ञातिभ्यएवच सर्वेभ्यश्चपितृभ्यश्चतत्पत्नीभ्यस्तथैवच पिंडानेभ्योगयायांतुदद्याद्रुद्रपदेद्विजः ती
र्थेपुचैवसर्वेषुमाघमासेमघासुच एकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत् दौहित्रपुत्रदारांश्चयेकनिष्ठसहोदराः निः
संतानामृतायेचतेभ्योप्यन्नंप्रदीयतइत्यादिचतुर्विंशतिमतभविष्यादिवचनैर्मात्रादिपितृव्यादीनामपिदेवतात्वेनविधाना
त्सपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणं पितृव्यभ्रातृमातृणामेकोद्दिष्टंसदेवहीतिचजातूकर्ण्यवचनेनतत्रव्यवस्थयापार्वणै
कोद्दिष्टप्रकारविधानात्तत्तत्प्रकारवदभ्यासप्रचयात्मकमेकमेवश्राद्धमितिद्वितीयप्रकारेणवर्गत्रयत्वंपितृव्यादीनामपिवक्तुं
तत्रशक्यतेतथात्रयोदशीश्राद्धेपिकथंचित्तेषांदेवतात्वप्राप्तौतथापिअपरपक्षेश्राद्धंकुर्वीतपड्भ्यःपितृभ्यस्तदनुश्राद्धदा
नमुपक्रमेदित्यादिवद्वेदाभेदव्यवहारोपपत्तयेपूर्वोक्तेनन्यायेनप्रतिवर्गमभ्याससमुदायात्मकानिपरस्परंचभिन्नानित्रीणि
पार्वणानिप्रतिदैवतंभिन्नान्येकोद्दिष्टानिचगयामहालयादिषुश्राद्धोत्पत्तिविधिनादेवताविध्येकवाक्यतापन्नेनविधीयंत
इत्येवयुक्तमितिनक्वापिपितृव्यादीनांवर्गत्रयत्वंतेननैकस्यपित्रादिवर्गस्यैवकुर्यात्किंतुमातामहादिवर्गस्यापीत्ययमेवश्रा
द्धंनचैकवर्गस्येतिवचनस्यार्थोनतुपितृव्यादीनामपीति नत्वस्याइतिनिंदापिमातामहश्राद्धाकरणस्यैवतत्करणप्रशंसाप
रेति तथाचानेनवचनेननतावत्त्रयोदश्यांपितृव्यादिश्राद्धप्राप्तिश्चतुर्विंशतिमातामहादिवचनैस्त्वत्रतत्प्राप्तिरनाशंक्यै
वमहालयश्राद्धात्त्रयोदशीश्राद्धस्यभेदात् एवंत्रयोदश्यांपितृव्यादीनांश्राद्धस्यैवप्राप्त्यभावेएकस्यैवनकुर्यात्सपार्व
णंतुसमाचरेदित्यस्यतत्रैकोद्दिष्टप्रकारनिषेधेनपार्वणप्रकारंविधायकत्वासंभवात्पितृमातामहश्राद्धयोरपिकृतस

पिंडीकरणमपित्रादेर्मासिकाब्दिकातिरेकेणैकोद्दिष्टनिषेधात्तत्प्राप्त्यभावेन तदर्थकल्पायोगात्पूर्वदृष्टतव्याख्यया श्राद्धं नैवैकवर्गस्ये
त्येतत्समानार्थत्वमेवयुक्तं पार्वणशब्दस्यच गौणत्वमनुवादत्वाद्युक्तमेव नचनगिरागिरेतिब्रूयादेरैष्टत्वो यमितिवदत्रापिनिषे
धभागोनुवादोयंतु विधिरेवेतिवाच्यं नेष्ठत्रयोदशीश्राद्धं पुत्रवान्यः कृतायुषइतित्रयोदशीश्राद्धनिषेधानुवादेनतद्विषयसमर्प
णार्थत्वादस्यसमानार्थत्वंचविनातदनुपपत्तेर्निषेधभागस्यैवात्रविधित्वस्यवाच्यत्वात् अतएवदाक्षिणात्यैरपिसर्वैर्निबंधे
ष्वस्त्रयोदशीश्राद्धं षड्दैवत्यमेवोच्यते नतुतीर्थमहालयादिवद्द्वादशदैवत्यं हेमाद्रिणापित्रयोदशीश्राद्धप्रयोगप्रकारदर्शना
वसरेतथैवोक्तं तेनकृष्णत्रयोदश्यांमात्रविद्यमानपुत्रेणगृहिणा एष्टव्याबहवः पुत्राइतित्रयोदश्यां बहुप्रजाइतिवचनवशा
द्बहुपुत्रलाभेगयाश्राद्धंनकर्तव्यं भाद्रकृष्णत्रयोदश्यांतुदर्शादौपितृवर्गश्राद्धमात्रेणापिनित्यशास्त्रार्थसिद्धावपिननगिरागि
रेति ज्योतिष्टोमेश्रूयतेयज्ञायज्ञीयेनस्तुवीतेति तत्रयज्ञायज्ञेत्यनेनशब्देनयुक्तायामृच्युत्पन्नंसामयज्ञायज्ञीयं तस्यामृचि
गिराशब्दः पठ्यते यथायज्ञायज्ञावोअग्नयेगिरागिराचदक्षसेइति तत्रसामगायानिमगानमधीयानाः सहैवगकारेणगाय
ति गिरागिराइति ब्राह्मणेतु गकारलोपपूर्वकमाकारयकारादिकं गानंविधीयते ऐरंकृत्वोद्गेयमिति गिराशब्देगकारलोपेन
इराभवतिइरायाःसंबंधिगानंऐरं तादृशंकृत्वाप्रयोगकालेगानंकर्तव्यमित्यर्थः तत्रयोगिगानब्राह्मणयोः समानबलत्वे
नविशेषाभावाद्विकल्पेनप्रयोक्तव्यमितिप्राप्तेभ्रमः नगिरागिरेतिब्रूयादात्मानमेवउद्गातागिरेति गकारगानबाधकमुक्त्वा
गकारसहितगिरापदंगेयत्वेनविधीयते अप्राप्तत्वात्तेनपाठप्राप्तेगिरापदेबाधितेसबाधोनगिरेतिनिषेधेनानूद्यतइति
नवमेद्रष्टव्यं तावन्मात्रं कर्तव्यंकिंतु मातामहवर्गस्याप्यवश्यं तत्रापिपिंडदानरूपंप्रधानंनकर्तव्यंकिंतुब्राह्मणभोजनमा
त्रं मधुघृतप्लुतपायसादिनाविशिष्टेनान्नेन पुत्रवद्भिर्गृहिभिरितिसामान्यविशेषरूपविधिनिषेधवचनानांव्यवस्थासिद्धा
अथकृष्णचतुर्दश्यांकिंचिन्निरूप्यते तत्रकृष्णपक्षसामान्यनिमित्तकेश्राद्धेचतुर्दशीवर्जनस्यपूर्वमुक्तत्वाद्येनकेनापि
पक्षेणयस्यांकस्यांचिच्चतुर्दशीवर्जितायांतिथौतस्मिन्पित्रादीनांश्राद्धेकृतेपि चतुर्दश्यांशस्त्रादिहेतुकमरणनिमित्तं १११

तेषांपुनः श्राद्धंकर्तव्यमेव तथाचमरीचिः विषसर्पश्वापदाहितिर्यग्ब्राह्मणघातिनां चतुर्दश्यांक्रियाकार्या अन्येषांतुविग
र्हितेति विषादिभिर्ब्राह्मणांतैर्घातायेषांतेषामित्यर्थः नतुतान्प्रयघ्नंतीतिविषेःसंभवात् तेषांयेब्रह्मणेहताइतिब्रह्मपुराण
दर्शनाच्च विषादिग्रहणंशस्त्रादीनामप्युपलक्षणं अपमृत्युभवेद्येषांशस्त्रमृत्युरथापिवा उपसर्गमृतानांचविषमृत्युमुपेयु
षां वह्निनाचप्रदग्धानां जलमृत्युमुपेयुषां सर्पव्याघ्रहतानांचशृंगैरुद्बंधनैरपि श्राद्धंतेषांप्रकर्तव्यंचतुर्दश्यांनराधिपेति
हेमाद्र्युदाहृतनागरखंडवचनात् अपमृत्युरकालमृत्युरप्राप्तजरसामेवमृत्युः अतएवमार्कंडेयपुराणं युवानःपितरोयः
स्यमृताःशस्त्रेणवाहताः तेनकार्यंचतुर्दश्यांतेषांतेषांतृप्तिमभीप्सतेति पितरइतिनजनकादयएवकिंत्ववस्थाविशेष
रूपपितृत्वापन्नाःसर्वेपि युवानस्तुगृहेयस्यमृतास्तेषांप्रदापयेदितिवायुपुराणेसामान्याभिधानात् तेनपुत्रभ्रात्रादी
नामपिताद्दृशानांभवति उपसर्गोग्रहभूताद्यावेशः शृंगैः शृंगिभिः वृक्षारोहणलोहाद्यैर्विद्धज्वालाविषादिभिः नखि
दंष्ट्रिविपन्नायेतेषांशस्ताचतुर्दशीतिप्रचेतोवचनेनखादिमृतानांग्रहणात् अत्रादिशब्देनविद्धद्विषादिसाहचर्यात्प्रमा
दमृत्युहेतवोविधिंविनाबुद्धिपूर्वमरणप्रवृत्तमृत्युहेतवश्चान्येपिगृह्यंते तेनाग्निजलादयोपिवचनांतरोपात्तास्तादृशा
एवग्राह्याः अतएवनागरखंडेप्युक्तं दुर्मृत्युनामृतायेचसंग्रामेषुहताश्चयइति ततश्चभर्तृमरणनिमित्तवह्निप्रवेशे
नमृतानांस्त्रीणांप्रसाध्यव्याध्याद्यभिभूतानांचाग्निजलप्रवेशादिमृतानामिहश्राद्धंनभवति प्रायोनशनाभ्यांतुविधि
नापिमृतानांभवति प्रायोनशनशस्त्राग्निविषोद्बंधनिनांतथा चतुर्दश्यांभवेच्छ्राद्धंतृप्त्यर्थमितिनिश्चयइतिब्रह्मपुरा
णात् युद्धमृतानांच युद्धहतानांश्राद्धकर्मणि चतुर्दशीप्रशस्तेतिविष्णुस्मरणात् प्रीयंतेपितरस्तस्ययेचशस्त्रहतारणइ
तिवृद्धमनुस्मरणाच्च एतच्चशस्त्रघातादिहेतुकमरणनिमित्तकंकृष्णचतुर्दशीश्राद्धं पित्रादीनामप्येकोद्दिष्टमेवभवति
नतुपार्वणरूपं तथाचगार्ग्यः चतुर्दश्यांतुयत्श्राद्धंसपिंडीकरणात्परं एकोद्दिष्टविधानेनतत्कार्यंशस्त्रघातिनइति स
पिंडीकरणात्परमित्यनेनेदंज्ञाप्यते येषामौर्ध्वदेहिकमेवानिषिद्धंपतितात्मत्यागिप्रभृतीनांयेषांवासपिंडीकरणमात्रंप्रति

2141 A
194

का॰त॰ षिद्धं व्युत्क्रममृतादीनां तेषां यथा यागं नारायणबल्यादिपूर्वकं यावद्दोर्ध्वदेहिकं सपिंडीकरणं च न क्रियते तावच्चतुर्दशीश्रा
१२० द्धमपि न भवति सत्यप्येकोद्दिष्टरूपत्वइति अपरंच सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते तत्र तत्र त्रिपुरुषं कुर्याद्वर्जयित्वा मृताहि
कमिति शंखवचनात्प्राप्तस्य पार्वणस्यायमपवादइति अतएव वृद्धमनुः एकपिंडीकृतानां तु पृथक्कर्म न नोपपद्यते सपिंडीक
रणादूर्ध्वं मृतेन्हि कृष्णचतुर्दशीमिति भविष्यत्पुराणेपि समत्वमागतस्यापि पितुः शस्त्रहतस्य च एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां
महालयइति समत्वं पूर्वैः सह प्रेतत्वपरित्यागेन पितृत्वरूपं सपिंडनप्राप्तस्य महालयइति तत्रावश्यकत्वार्थं न तु तत्रे
वेदं शस्त्रेण तु हातायैवेतेभ्यस्तत्र प्रदीयतइति याज्ञवल्क्यवचनेन पूर्वलिखितैश्च बहुभिर्वचनैः कृष्णपक्षमात्रे तद्विधा
नात् अतएव च नागरखंडे कस्माच्छस्त्रहतानां च श्राद्धं प्रोक्ता चतुर्दशी एकोद्दिष्टं कुतश्चात्र कारणं प्रब्रवीहि मे दूत्या
नर्तनपृष्टेन तर्तयज्ञो ब्रह्माहिरण्याक्षसंवादरूपेतिहासमुखेन यच्च शस्त्रहतानां च तस्मिन्नहनि दीयते एकोद्दिष्टं नरैः
श्राद्धं तत्तेवक्ष्यामि कारणं संख्ये शस्त्रहता ये च निर्विकल्पा न चेतसा युध्यमाना न ते मर्त्ये जायंते मनुजाः पुनः पराङ्मुखा
ये हन्यंते पलायनपरायणाः ते भवंति नराः प्रेताः एतदाह पितामहः संमुखा अपि ये दैन्यं हन्यमाना वदंति च पश्चात्तापं च वा
कुर्युः प्रहारैर्जर्जरीकृताः तेपि प्रेता भवंतीह मनुः स्वायंभुवोब्रवीत् कदाचित्तु चलनं शूराणामपि जायते तेषामपि दिने त्वत्र
देयं प्रेतत्वशंकया अपमृत्युमृतानां च सर्वेषामेव देहिनां प्रेतत्वं जायते यस्मात्तस्मात्तेषां हितावहं श्राद्धं हि पार्थिवश्रेष्ठ
विशेषेण प्रकीर्तितं एकोद्दिष्टं च कर्तव्यं यस्मात्तत्र दिने नरैः सपिंडीकरणादूर्ध्वं तत्ते वक्ष्यामि कारणं यदि प्रेतत्वमापन्नः क
दाचित्त्रासिता भवेत् तदर्थं तस्य कर्तव्यं श्राद्धं तत्र दिने नय पितामहाद्यास्तत्रादौ श्राद्धं नार्हंति कर्हिचित् इत्यनेन ग्रंथे
न संशयितं निश्चितं वा शस्त्रहतानां प्रेतत्वं चतुर्दशीश्राद्धस्य तद्रूपत्वे एकोद्दिष्टत्वे च कारणं यदभिहितवान् तदपि सत्यपि यः
कश्चिन्मानवः श्राद्धं स्वपितृभ्यः प्रदास्यति प्रेतपक्षे चतुर्दश्यां नभस्ये मासि संस्थिते इति तेनैकोद्दिष्टमेवात्र कर्तव्यं न तु १२०
पार्वणं पितृपक्षे चतुर्दश्यां कन्यासंस्थे दिवाकरइति चोपक्रमोपसंहारयोर्विशेषसंस्पर्शे सामान्यकृष्णचतुर्दशीपरमेव

243
194

अर्थवादमात्रं चैतत् एतच्छ्राद्धस्य आहत्य सपिंडीकरणोत्तरत्वाभिधानात् सपिंडीकरणांतैश्च श्राद्धैः प्रेतत्वनिवृत्तेः तन्निवर्त्य
प्रेतत्वविलक्षणेस्तन्निवर्त्यप्रेतत्वकल्पनेपि सकृच्चतुर्दशीश्राद्धात्तन्निवृत्तौ पुनः पुनस्तत्करणविरोधः पितुरितिसुतैरिति च यो
यस्य श्राद्धाधिकारी तस्य तस्योपलक्षणं पितृमात्रादित्रिकमध्ये द्वयोः शस्त्रादिभिर्मरणे एकोद्दिष्टद्वयं तंत्रं भवति त्रयाणाम
पि तथात्वे तत्त्रयं आहत्य पार्वणविध्यभावेन तत्रापि चतुर्दशीनिमित्तकस्यैकोद्दिष्टस्यैव प्राप्तेः तंत्रेण च बहूनामपि स्वका
लेनुष्ठानसंभवान्न कालासंभवः अपरार्कस्तु त्रिष्वपि शस्त्रादिहतेषु पार्वणमेव मन्यंते तस्यायमभिप्रायः नैते एकोद्दि
ष्टविधयः पार्वणबाधेनैकोद्दिष्टं विदधति किंतु पार्वणासंभवात्प्राप्तमेव तदनुवदंति पार्वणासंभवश्च शस्त्रहतादिभि
न्नानां तत्र श्राद्धनिषेधात् अन्येषां तु गर्हिते ति पितामहाद्यास्तत्रादौ श्राद्धं नार्हंति कर्हिचिदिति च तत्रेदं वक्तव्यं सपिं
डीकरणोत्तरभावित्वेनाश्राप्यभ्यात्रयसमुदायात्मके वैश्वदेवादिकादिप्रकारविशिष्टपार्वणरूपे श्राद्धे प्राप्ते वचनात्प्र
धानभूतकिंचिदभ्यासनिवृत्तावपि तदीयप्रकारविशेषनिवृत्तौ कारणाभावेनैकोद्दिष्टप्रकाराप्राप्तेः तस्योक्तः पार्वणोवि
धिरित्यत्र प्राच्यव्याख्यानइव एकस्मिन्द्वयोर्वैकोद्दिष्टविधिरिति कस्यचिदपरार्कानुसारिणो निबंधवचः तेनैकोद्दिष्टविधा
नाभावे एकपुरुषं वा पार्वणविधिनैव श्राद्धं स्यादिति विधय एवैते एकोद्दिष्टप्रकारस्येति त्रिष्वपि शस्त्रादिहतेष्वेकोद्दिष्टान्ये
व तावंत्युचितानि यच्च शूलपाणिना कृष्णचतुर्दशीश्राद्धविधायिनां पार्वणकालप्रकरणगतत्वादिदं श्राद्धं पार्वणविधि
नैव कर्तव्यं तच्च त्रयाणामपि शस्त्रादिहतत्वे त्रिपुरुषमेकस्य द्वयोर्वा तथात्वे एकपुरुषं द्विपुरुषं वा न त्वेकोद्दिष्टविधिना त
द्वचनानि तु निर्मूलान्येव पार्वणाशक्तविषयाणि वेत्युक्तं तत्र सर्वनिबंधलिखितानां निर्मूलत्वाभिधानं प्रायः पाठमात्रे
ण च विशेषवचनबाधनं महत्साहसमित्युपेक्षणीयं तदप्यपरं तेनैवोक्तं कृष्णचतुर्दशीमात्रे पित्रादीनामेव श्राद्धं पा
र्वणरूपत्वात् महालयांतर्गतायां तु तस्यां पितृव्यभ्रात्रादीनामपि ब्रह्मपुराणे प्रायो न शूनेत्यादिना सामान्यचतुर्दशी
श्राद्धमभिधाय आश्विने तर्पणीयाश्च लुप्तपिंडोदकक्रियाइति पुनरभिधानस्य तत्प्रापणार्थत्वात् तच्चैकोद्दिष्टविधि

ना अपुत्रायेमृताः केचितस्त्रियोवापुरुषास्तथा तेषामपिचदेयंस्यादेकोद्दिष्टंनपार्वणमित्यापस्तंबवचनादितितदपिपूर्वलिखि
तेः आयानधनेत्यादियंचशस्त्रहतारणे युवानस्तुगृहस्थस्येत्यादिभिश्चतुर्दशीमात्रेताद्दशानांसर्वेषामेवदेवतात्वोपदेशादतिदे
शानुरोधेनचोपदेशसंकोचस्यायुक्तत्वादयुक्तं यत्वाश्विनइत्यादिब्रह्मपुराणवचनंतन्महालयापरपक्षश्राद्धे अपुत्रपितृव्यादी
नांदेवतात्वप्रापकंसत्तदंतर्गतचतुर्दशीश्राद्धेपितत्प्रापकंनतुतत्रैवविशेषतः नत्वेतच्चतुर्दशीश्राद्धंत्रयोदशीश्राद्धवद
परपक्षश्राद्धाद्भिन्नं किंतुतस्यैवाभ्यासोवचनाच्छस्त्रहतादिमात्रेदेवत्वः शस्त्रेणतुहतायेवाइतितुशब्दात् तेनकृष्णचतुर्दशी
मात्रेशस्त्रादिहतयुवमृतादीनांपित्रादीनांमात्रादीनांमातामहादीनामपुत्राणांपितृव्यभ्रात्रादीनांचैकोद्दिष्टविधिनाश्राद्धंक
र्तव्यमेव इदानींतुतदनाचरणंकृष्णपक्षसामान्यश्राद्धस्यैवानाचरणात् महालयचतुर्दश्यांत्वावश्यकमितितत्रैवप्रचुरःस
माचारः येतुचतुर्दशीमात्रेमहालयचतुर्दश्यामेववाशस्त्रादिभिरापिमृतास्तेषांमृताहनिमित्तंयच्छ्राद्धंतद्यथाकुलाचार
मेकोद्दिष्टंपार्वणंभवतिनत्वेकोद्दिष्टमूपमेव कृष्णचतुर्दशीनिमित्तत्वाभावात् तन्निमित्तंचैकोद्दिष्टंतदापृथक्कृनभवतिपा
र्वणापेक्षयैकोद्दिष्टस्यन्यूनधर्मत्वेपिसमानेषुधर्मेषुगृह्यमाणविशेषतयातंत्रत्वोपपत्तेः संक्रांतिव्यतीपातादिनिमित्तं
कंचतुर्दश्यामपिपार्वणमेवभवति चतुर्दशीनिमित्तकंचतदापृथक्कृभवति सपिंडकापिंडकत्वप्रयुक्तविरुद्धधर्मकत्वादि
तिदिक् शस्त्रघातादिनिमित्तकंचचतुर्दश्यांयद्यपित्रयाणामपिश्राद्धंकृतंभवतितथाप्यपक्षनिमित्तकंमात्रादित्रस्य
र्थेचदिनांतरेश्राद्धंकर्तव्यमेव अपरपक्षनिमित्तस्यचतुर्दश्यांवर्जनात् एवंचमाहालयेपिसकृत्पक्षेपितृव्यादि त्रस्यर्थेच
येषुतुपक्षेषुचतुर्दशीवर्जनंनास्त्येवेत्युक्तंतेषुचमहालयापरपक्षश्राद्धेनसहशस्त्रघातादिनिमित्तंश्राद्धंमृताहन्यायेन
तंत्रमेवभवतिनतुपृथक् नचैवंमृताहश्राद्धेप्येकोद्दिष्टविधिनाक्रियमाणेपितामहादितृप्त्यर्थंचपृथक्पार्वणंस्यादिति
वाच्यं पितुर्मृताहेपितामहादिर्महालयेसर्वेषामेवतर्पणीयत्वास्मरणात् पार्वणविधिनातुक्रियमाणेपितुर्मृताहश्राद्धेत १२१
त्सिद्धयेपितामहादिप्राप्तिः यत्तुहेमाद्रिणाकेनाचित्कारणेनमहालयचतुर्दश्यांशस्त्रपातादिनिमित्तंकोद्दिष्टश्राद्धा

संभवेतत्पक्षेपृथक्कृतन्निमित्तमपिश्राद्धंकस्मिंश्चिद्दिनेकार्यंतच्चपार्वणविधिनेत्येतावत्पर्यंतमुक्तंतत्रमूलंमृग्यं इति
निर्णीतः कृष्णपक्षः सूर्यसंक्रमोगोबलीवर्दन्यायेनायनविषुवद्भिन्नः तेषांपृथगुपादानात् तथोपादानप्रयोजनंचाव
श्यकत्वस्यवाफलातिशयस्यवाज्ञापनंसप्रकारकंपूर्वमेवोक्तं अतएवविष्णुधर्मोत्तरे श्राद्धसंक्रमणंभानोःप्रशस्तंपृथि
वीपते विषुवद्दितयंतत्र अयनेद्वेविशेषतइति व्यतीपातेविष्कंभादिषुयोगविशेषश्रवणाश्विनधनिष्ठार्द्रानागदेवतमस्तके यद्यमा
रविवारेणव्यतीपातःसउच्यतेइतिवृद्धमनूक्तोवा नागदेवतमाश्लेषामस्तकंप्रथमःपादः प्रत्येकंचेदंसंबध्यतेसूर्याचंद्रमसोः
क्रांतिसाम्यंज्योतिःशास्त्रगम्यंव्यतीपातइतिकल्पतरुः गजच्छायायदेंदुःपित्र्यदैवत्येहंसश्चैवकरेस्थितः तिथिर्वैश्रवणीवा
चगजच्छायाप्रकीर्तितेतिस्कंदपुराणोक्ता पित्र्यदैवत्येमघायां हंसः सूर्यः करेहस्ते वैश्रवणीयातिथिस्त्रयोदशी कुंज
रच्छायापदेनाप्ययमेवयोगउच्यते योगोमघात्रयोदश्योयाःकुंजरच्छायसंज्ञकः भवेन्मघायांसंस्थेचशशिन्यर्केकरेस्थि
तइतिब्रह्मपुराणात् इयंचभाद्रपदकृष्णत्रयोदश्येवभवतिनान्या यद्यपिप्रौष्ठपद्यूर्ध्वंकृष्णत्रयोदशी प्रोष्ठपद्यामती
तायांतथाकृष्णत्रयोदशीतिविष्णुस्मृतिविष्णुधर्मोत्तरादिषु भाद्रपदकृष्णत्रयोदशीमात्रस्यनित्यश्राद्धकालेषुपाठात्ता
वन्मात्रमेवकर्तव्यंभवतिकृष्णपक्षश्राद्धात्तभिन्नत्वंचतच्छ्राद्धस्यसाधितमेवतथापियस्यामेताद्दशयोगेनप्राशस्त्याति
शयःसत्रयोदशीविशेषएवशुद्धेनैवोपलक्ष्यते नत्वेताद्दशयोगवत्येवसाश्राद्धकालइत्येतस्याभिप्रायः प्राकृच्छाये
कुंजरस्यचहस्तिच्छायास्कंचतथाकर्णव्यजनवीजितमित्याद्युक्ताश्राद्धदेशरूपागजच्छायेहनगृह्यतेश्राद्धकालाइत्युक्तेः
प्राप्तिकाललक्षणायांसैवदोषः संज्ञाकरणवैयर्थ्यंचतदर्थानुपादानेसंज्ञायांतुदेवदत्तादिशब्दवन्मुख्यैतैव इदंचान्येषा
मपियुगादिमन्वादिव्रीहियवपाकमृताहादीनांनित्यश्राद्धकालानामुपलक्षणं एतेषुचनित्यंश्राद्धं तथाचविष्णुः अ
मावास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकामाघीप्रोष्ठपद्यूर्ध्वंकृष्णात्रयोदशीव्रीहियवपाकौचेति एतांस्तुश्राद्धकालान्वैनि
त्यानाह प्रजापतिः श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइतिमाघीपौर्णमासी व्रीहिपाकेचकर्तव्यंयवपाकेचपार्थिव नैतावा

योमहाराजविनाश्राद्धंकथंचन पौर्णमासीतथामाघीश्रावणीचनृपोत्तम प्रोष्ठपद्यामतीतायांतथाकृष्णत्रयोदशी एतांस्तु
श्राद्धकालान्वैनित्यानाहप्रजापतिरितिविष्णुधर्मोत्तरात् व्रीहयःशरत्सस्यंधान्यं सत्यपिधान्यंव्रीहित्वंबकारितिव्रीहिश
ब्दस्यधान्यपर्यायत्वेनशालयः यथोक्तवस्तुसंपत्तौग्राह्यंतदनुकारियत् यवानामिवगोधूमाव्रीहीणामिवशालयइति
व्रीह्यभावेतेषांतत्प्रतिनिधित्वोक्तेः व्रीहयःशालयोमुद्गागोधूमाःसर्षपास्तिलाः यवाश्चौषधयःसप्तविपदोघ्नंतिधा
रिताइतिपृथगुपादानाच्चतेनशरदिवसंतेचेत्युक्तंभवति अतएवतत्तुल्यकालोनवयज्ञः छंदोगपरिशिष्टे शरद्वसंतयोः
केचिन्नवयज्ञंप्रचक्षतइत्युक्तेः यत्तुतत्रैवपक्षांतरमुक्तंधान्यपाकवशादन्यइतितदपेक्ष्यातदुत्कर्षे अतएवधनुस्थरवा
वपितत्करणप्रसंगेतन्निंदा मेषमारभ्यचैत्रादिगणनायांवृश्चिकस्यशरदंतभावात्तत्रतत्करणप्रशंसाचज्योतिःशा
स्त्रे वृश्चिकेशुक्लपक्षेतुनवान्नंशस्यतेबुधैः अपरेक्रियमाणंतुधनुष्येवकृतंभवेत् धनुषियत्कृतंश्राद्धंमृगनेत्रास्तरा
त्रिषु पितरस्तन्नगृह्णंतिनवान्नामिषकांक्षिणइति यच्चनवान्नश्राद्धमुक्तंनवोदकेनवान्नेचगृहप्रच्छादनेतथा पितरः
स्पृहयत्यन्नमष्टकासुमघासुच तस्माद्दद्यात्सदायुक्तोविद्वत्सुब्राह्मणेषुचेतितदपीदमेव गृहप्रच्छादनेनवगृहसंपाद
नेमघासुभाद्रकृष्णगतासुकेवलास्वपिब्राह्मणेषुप्राप्तेष्वितिशेषः उपलक्षणंचैतद्द्रव्यसंपत्तेरपि अत्रसदाशब्दा
न्नित्यत्वंवृद्धिश्राद्धस्यनैमित्तिकत्वान्नित्यसंस्काराद्यंगत्वाच्चानित्यत्वं कृष्णपक्षश्राद्धस्यशाकेनापिनापरपक्षमतिक्रा
मेदित्यादिवचनेभ्यः संक्रांतिग्रहणायनादावपिश्राद्धंनित्यं आदित्यसंक्रमणंविषुद्वयंविशेषेणायनद्वयंव्यतीपातो
जन्मर्क्षमभ्युदयश्चएतांस्तुश्राद्धकालान्वैनित्यानाहप्रजापतिः श्राद्धमेतेषुयद्दत्तंतदानंत्यायकल्पतइतिविष्णुस्म
रणात् उपप्लवेचंद्रमसोरवेश्चत्रिष्वष्टकास्वप्ययनद्वयेचपानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः
श्राद्धंकृतंतेनसमासहस्रंरहस्यमेतत्पितरोवदंतीतिविष्णुपुराणाच्च अत्रपानीयमपीतिवचनात्श्राद्धस्यावश्यक
त्वंगम्यतेग्रहणेशातातपवचनादपि सर्वस्वेनापिकर्तव्यंश्राद्धंवैराहुदर्शने अकुर्वाणस्तुतच्छ्राद्धंपंकेगौरिवसीदती
ति यदिसर्वस्वेणापिश्राद्धसामग्रीसंपादनेदरिद्रस्यसर्वस्यव्ययोभवतितेनापीत्यर्थः सर्वेषांस्वमुपजीव्यमुदकंतेना

पीतिहेमाद्रिः द्रव्यब्राह्मणसंपत्तौहारीतवचनादपि तीर्थद्रव्योपपत्तौचनकालमवधारयेत् पात्रंचब्राह्मणंप्राप्यसद्यःश्रा
द्धंविधीयतइति निषिद्धरात्र्यादिवर्जंप्राशस्त्यावहमपराह्णादिकालंनप्रतीक्षेतेत्यर्थः अतएवदेवीपुराणे अकालेप्यथवा
कालेतीर्थश्राद्धंसदानरैः प्राप्तैरेवसदाकार्यंकर्तव्यंपितृतर्पणं पिंडदानंतुतच्छस्तंपितॄणांचातिदुर्लभं विलंबोनैवकर्तव्यो
नैवविघ्नंसमाचरेदिति पिंडदानग्रहणंसकलश्राद्धासंभवेतन्मात्रमपिकर्तव्यमित्येवमर्थं व्यतीपातेपिपितामहवचनात्
अमावास्याव्यतीपातपौर्णमास्यष्टकासुच विद्वान्श्राद्धमकुर्वाणःप्रायश्चित्तीयतेतुसइति माघ्यादिषुपुनर्वचनंफला
तिशयार्थमावश्यकत्वातिशयार्थंवा नित्यसमभिव्याहाराच्चसंक्रमश्राद्धरूप्यादावपिनित्यंश्राद्धं समभिव्याहारश्चमा
र्कंडेयपुराणेपिविशिष्टब्राह्मणप्राप्तौसूर्येंदुग्रहणेयने विषुवेरविसंक्रांतौव्यतीपातेचपुत्रक श्राद्धार्हद्रव्यसंपत्तौतथा
दुःस्वप्नदर्शने जन्मर्क्षग्रहपीडासुश्राद्धंकुर्वीतचेछयेतिचकारोभिन्नक्रमः ग्रहणादिकालेषुश्राद्धंप्रतीछयाचयदाक
दाचिच्छ्राद्धमवश्यंकुर्वीतेत्यर्थः नतुफलस्येछयेति पूर्ववाक्यैरावश्यकत्वावगमात्युगादिष्वपिनित्यं वैशाखमासस्यसि
तातृतीयानवम्यसौकार्तिकशुक्लपक्षे नभस्यमासस्यतमिस्रपक्षेत्रयोदशीपंचदशीचमाघे एतायुगाद्याःकथितापुरा
णैरनंतपुण्यास्तिथयश्चतस्रः पानीयमपीत्यादिविष्णुपुराणात् पंचदशीपौर्णमास्यमावास्याचकल्पभेदेन पौर्णमा
सीतुमाघस्येतिभविष्यत्पुराणान्माघेचपौर्णमास्यांतुघोरंकलियुगंतथेतिब्रह्मवैवर्तवचनात् अमावास्याचतपसइतिमा
घेचंद्रक्षयेहनीतिदर्शेतुमाघस्येतिचनागरखंडेब्रह्मपुराणादिवचनेभ्यश्च मन्वंतरादिष्वपिनित्यं तथाचमत्स्यपुराणे॥
अश्वयुक्शुक्लनवमीद्वादशीकार्तिकीतथा तृतीयाचैवमाघस्यतथाभाद्रपदस्यच फाल्गुनस्याप्यमावास्यापौषस्यैका
दशीतथा आषाढस्यापिदशमीतथामाघस्यसप्तमी श्रावणेचाष्टमीकृष्णातथाषाढेचपौर्णिमा कार्तिकीफाल्गुनीचै
त्रीज्येष्ठीपंचदशीसिताः मन्वंतरादयस्त्वेतादत्तस्याक्षयकारकाः अस्यशेषेहेमाद्रौ आसुतोयमपिस्नात्वातिलदर्भ
विमिश्रितं पितॄनुद्दिश्ययोदद्यात्सयातिपरमांलभेदिति अत्रतोयमपीत्युक्त्यानित्यत्वं शूलपाणिनात्वस्यशेषस्यालि

[illegible]

का०त० स्वनात्काम्यमेवासामुक्तं एवंयत्रैतादृशकिंचिन्नित्यत्वद्योतकं साक्षान्नित्यत्वोक्तिरकरणप्रत्यवायश्रवणंवातन्नित्यमितर
१२३ त्काम्यं श्रुतफलंवातिथिवारनक्षत्रादिष्वर्थवादादिकल्प्यफलंवायुगांतकल्पाद्यादिषु अतिविस्तरापत्तेस्तानिनलिख्य
ते पित्रादिमृततिथौत्वयावश्यकंश्राद्धं प्रतिसंवत्सरंकार्यंमातापित्रोर्मृतेहनि पितृव्यस्याप्यपुत्रस्यभ्रातुर्ज्येष्ठस्यचैव
हीतिब्रह्मपुराणवीप्साश्रवणात् सर्वेषामेवश्राद्धानांश्रेष्ठंसांवत्सरंमतं क्रियतेयत्खगश्रेष्ठमृताहनिबुधैःसदा मृ
ताहनिपितुर्यस्तुनकुर्यात्श्राद्धमादरात् मातुश्चखगशार्दूलवत्सरांतेमृताहनि नाहंतस्यखगश्रेष्ठपूजांगृह्णामिनो
हरिः नब्रह्मानचैवरुद्रोनचान्येदेवतागणाः तस्माद्यत्नेनकर्तव्यंवर्षेवर्षेमृताहनि नरेणखगशार्दूलभोजकेनविशे
षतइतिभविष्यत्पुराणेऽकरणदोषश्रवणाच्चभ्रातुर्ज्येष्ठस्येतिविशेषणादपुत्रस्यापिकनिष्ठस्यनावश्यकं अतएवोक्तंन
पुत्रस्यपिताकुर्यान्नानुजस्यतथाग्रजः अपिस्नेहेनकुर्याच्चेत्सपिंडीकरणंविनेति अत्रपित्रग्रजाभ्यांसपिंडीकरणंपुत्रा
नुजयोर्नकर्तव्यमितिप्रतीयते नतुसर्वथेति तेनप्रेताभ्युदयकामनायामन्येनतयोस्तदपिकारयित्वासांवत्सरिकादिः
पित्रग्रजाभ्यांस्वयमपितयोःकर्तव्यं नतुनित्यंस्नेहेनेत्युक्तत्वात् मृताहनीतिचमरणाधिकरणतिथिसजातीयायां
तिथावित्यर्थः वत्सरांततिथेर्मृतसंबंधाभावादहःपदस्यचतिथिरूपचांद्राहःपरत्वात् सजातीयत्वंचतन्मासतत्पक्ष
गतत्वेनप्रतित्वादिनाच मासपक्षतिथिस्पृष्टेयोयस्मिन्म्रियतेहनि प्रत्यब्दंतुतथाभूतंक्षयाहंतस्यतंविदुरितिव्यास
वचनात् अत्राहःपदमहोरात्रपरं मरणाधिकरणाहोरात्रस्यतिथिस्पर्शश्चतत्संबंधरूपोमरणकालेविवक्षितानत्वदया
स्तमयदिनत्रिमुहूर्तादिसत्वेनपारणेमरणेमरणेचूर्णांतिथिस्तात्कालिकीस्मृतातिथिशंखवचनात् सांवत्सरिकश्राद्धाधि
करणाहोरात्रस्यचतत्तिथ्यास्पर्शःशास्त्रतःश्राद्धयोग्यत्वेननिर्णीतया वत्सरश्चचांद्रःचैत्रादिमासविशेषरूपमासप
क्षतिथिसंबंधलिंगात् चैत्रादीनांचांद्राणामेवमुख्यत्वात् आब्दिकेपितृकार्येचमासश्चांद्रमसःस्मृतइतिविशेषवच
नाच्च मासशब्दस्यचैत्रादिविशेषपरत्वंचसामान्यपरत्वेआनर्थक्यापत्तेश्चक्रवत्परिवर्ततस्सूर्यःकालवशाद्यतः अतः १२३
सांवत्सरंश्राद्धंकार्तव्यंमासचिह्नितं मासचिह्नंतुकर्तव्यंपौषमाघाद्यमेवच यतत्रविधानेनसमासःपरिकीर्तितइति
स्त

239/194

त्पकहारीतवचनाच्चावगम्यते सर्वंचैतन्मासतत्वविवेचनेतिवक्ष्यते वत्सरांतग्रहणाच्चयद्यपिसजातीयत्वनिरूपिकायामाद्यम
रणतिथिव्यक्तावपिमासपक्षतिथिस्पृष्टइतिवचनादाद्यंसांवत्सरिकंश्राद्धंप्राप्नोतिमासिकवत् अतएवाद्यमेकादशेहनीतिसांव
त्सरिकपरत्वेनापिकैश्चित्व्याख्यातंतथापिमासतिथिः सजातीयत्वनिरूपकतयाश्राद्धाधिकरणतिथेरुपलक्षणमेवनतुतदधि
करणमितिदर्शयति वार्षिकसमाख्याचविध्यनुसारित्वाद्वर्षांतेभवंवार्षिकमितिव्याख्येयानतुवर्षेभवमिति मासिकेतुव
क्ष्यते वत्सरांतेजातमृतेहनीतिचार्थः चांद्रसंवत्सरस्यपूर्वतिथ्यंतसमाप्तत्वेनद्वितीयवत्सरादिभूतायास्तत्तिथेःपूर्वव
त्सरांत्यत्वाभावात् अतएवसपिंडीकरणंविधायगोभिलेनाप्युक्तं अतऊर्ध्वंसंवत्सरेसंवृत्तेप्रेतायान्नंदद्याद्यस्मिन्न
हनिप्रेतःस्यादिति तेनसांवत्सरिकश्राद्धस्यद्वितीयादिसंवत्सराद्यमृततिथिसंबंधेनैवोत्पन्नत्वात्प्रथमसंवत्सरोपक्रमभू
तायांमरणाधिकरणतिथौप्राप्तिरेवनास्तीतिनतस्याद्यपदेनग्रहणं युक्तंचैतत् अभ्यर्थेकमेवाब्दिकश्राद्धंप्रथममृततिथौप्रा
प्तवनादेकादशाहेक्रियमाणंप्रेतदैवत्यंद्वितीयादितत्तिथौपितृत्वात्तद्दैवत्यमितिविरूपंस्यात् एतेनैतदपिनिरस्तंवेदितव्यं
यच्छूलपाणिनोक्तं प्रथममासिकवार्षिकादीनांमासेभवंवर्षेभवमितिव्युत्पत्त्यासमाख्ययाप्रथमादिमासवर्षाद्यधिकरणत्वंप्र
तीयते नचप्रथमादिमासवर्षाद्यधिकरणत्वंप्रतीयते नचप्रथमादिमासवर्षसमाप्त्युत्तरद्वितीयादिमासादिभूतमृततिथौ
क्रियमाणानांतत्संभवति नचमासिकवार्षिकादिसमाख्याप्रवृत्तिभूतामासवर्षादिशब्दा अजहत्स्वार्थलक्षणयाएकदिना
धिकमासादिपराइतिवाच्यंद्वितीयादिमासवर्षेषुतदनुपपत्तेः तस्मान्मृततिथेर्मृततिथिर्यावत्त्रिंशत्तिथ्यात्मकोमासश्चांद्र
स्तादृशएवषष्ठ्यधिकशतत्रयतिथ्यात्मकः संवत्सरोत्रमासवर्षशब्दाभ्यांविवक्षितः एवंत्रिपक्षशब्दोपितादृशपंचचत्वा
रिंशत्तिथ्यात्मकःसार्धमासवचनः मृततिथेरितिचदर्शादर्शश्चांद्रइतिवदवधौपंचमी तथाचास्मृततिथेरेवपूर्वमास
शब्दार्थत्वंनतुपूर्वमृततिथेरितिद्वितीयादिमृततिथिष्वेवप्रथमवर्षांतर्गतासुप्रथमादिमासिकानिद्वितीयचत्रशकुंादिमृत
तिथिष्वेवप्रथमादिवार्षिकाणीति वार्षिकश्राद्धस्यवत्सरांतमृततिथावेवोत्पन्नत्वेनवर्षेजातेभवमित्येवसमाख्याव्युत्पत्त

रोचिरत्येन प्रथमवार्षिकादेः प्रथमवर्षाद्यधिकरणत्वस्यैवाभावात् एतादृशकल्पनानर्थः स्यात् मासिकानितु प्रथमादिमासादिमृत
मृततिथिष्वेवेति वक्ष्यते सकललोकव्यवहारविरुद्धं चेदं अभिधानं द्वितीयादिमृततिथिषु जातस्यैव मृतस्याप्याद्यद्वितीयत्वती
यामासोल्लग्नस्त्रयोदशमृततिथौ चाद्यं द्वितीयं वर्षं लग्नमित्येवमाचारव्यवहारात् मासवर्षाद्यमृततिथ्यश्वावधिमात्रत्वे
पूर्वदर्शवदुत्तरमासवर्षांतर्गतव्यवहाराभावप्रसंगात् सर्वथा प्रथमवत्सरांत्यमृततिथावाद्याब्दिकं द्वितीयवत्सरांत्यमृततिथौ
द्वितीयमित्यादि इदं चाब्दिकश्राद्धं ग्रहणकाले तत्पूर्वप्रहरचतुष्टयत्रयद्वयरूपकालवेधकाले वा प्राप्तं भोक्तृब्राह्मणलाभे अन्ने
नैव तदलाभ आमान्नादिनापि तद्दिन एव कर्तव्यं यथा च गोभिलः दर्शे रविग्रहे पित्रोः प्रत्याब्दिकं मृपस्थितं अन्नेनासंभवेद्
म्नाकुर्यादामेन वा स्मृतइति दर्शे पित्रोः स्मृत इति च सर्वमविवक्षितं उपलक्षणं आमपदेन वितुषतंडुलादि गृह्यते ननु सतुषं
सस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतमिति वसिष्ठवचनात् प्रत्याब्दिकग्रहणं च
अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन कश्चिदिति वार्षिके सर्वथा साधनत्वेन निषिद्धस्यामादेः प्रतिप्रसवार्थं अत एव तन्मासि
कस्याप्युपलक्षणं अमावास्यादिश्राद्धं तु तत्रामेन भवत्येव श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितं अमावास्यादि
नियतं माससंवत्सराद्दृते इति हारीतवचनात् श्राद्धस्य पाकश्राद्धस्य विघ्नः संभवे माससंवत्सरशब्दाभ्यां मासिकसांवत्स
रिकोपादानं यत्तु ग्रहणात्तु द्वितीये ह्नि रजोदोषात्तु पंचम इत्यल्पयज्ञः सांवत्सरिकविषयं वचनं पठति तदनुरूपं चानुति
ष्ठति तन्निर्मूलं पाकश्राद्धासंभवरूप श्राद्धविघ्नस्यैव प्रपंचः कात्यायनेन दर्शितः आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि
हेमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रम इति बोधायनेनापि संक्रमे न्नद्विजाभावे प्रवासे पुत्रजन्मनि हेमश्राद्धं संग्रहे वा द्वि
जः श्वद्रः सदा चरेदिति संग्रहवचनात्तत्कालापतितं ग्रहणनिमित्तकश्राद्धातिरिक्तमपि दर्शादिश्राद्धमासादिनेक्कर्त
व्यं तत्र ग्रहणपुत्रजन्मनोः पक्वान्नभोक्तृसंभवद्भुतः पाकश्राद्धासंभवो द्विजाभावे च पत्न्यभावतः रजोदोषे कालिकप्रवासती
र्थप्राप्त्यादिषु पक्वाभावद्भुतः आपदन्नाभावादिषु पाकाभावद्भुतः हेमश्राद्धविधौ चान्नाभाव इति आमान्नस्यापि ग्रहणं १२४

241
1942

अत एव आत्मनोदेशकानां विप्लवे समुपस्थिते आमश्राद्धं द्विजैः कार्यं शूद्राणां तु सदैव हीत्युशनोवचनं स्मृत्यंतरवचनं च पाकाभावे
धिकारस्याद्विप्रादीनां नराधिप अपत्नीनां महाबाहो विदेशगमनादिभिः सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः इति विदेश
गमनादिभिः पाकाभाव एव विवक्षित इत्यन्वयः अपत्नीनामित्यपि हेतुगर्भविशेषणेनापत्नीकत्वप्रयुक्तः पाकाभाव एव विवक्षि
तः तस्मादेवंजातीयकानां पाकश्राद्धासंभवद्वारकमेव द्विजानप्रत्यामहेमश्राद्धनिमित्तत्वं संक्रमाग्न्यभावयोस्तु तदसंभ
वात्स्वतंत्रयोरेव अग्न्यभावे च यद्यप्यधिकरणकमग्नौकरणं न संभवति तथाप्यग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति पा
णिहोमेन पाकश्राद्धमपि संभवत्येव अन्यथाधिकाराभावेन श्राद्धस्यैवाप्राप्तेस्तत्रामादिद्रव्यसाधनविधिरपि दुःस्थितः स्यात्
अत एव च यावत्स्यादन्नाग्निसंयुक्त उत्पन्नाग्निरथापि वा आमश्राद्धं तदा कुर्याद्धस्ते ग्नौकरणं भवेदिति जमदग्निवचने पाणिहो
मश्रवणमनुवाद एव स्मृतिरत्नावल्यां तु आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदस्तदा हस्ते ग्नौकरणं कुर्याद्ब्राह्मणस्य विधानत
इति वचनादामश्राद्धे साग्नेरपि पाणिहोम इत्युक्तं तत्रैव च पत्न्यभावतद्रजोदोषग्रहणतीर्थसंक्रमादिषु च पत्निसंनिधाने पि
पाकसंभवेप्यामश्राद्धमेवमित्युक्तं बोधायनादिवचनेषु चामश्राद्धमविधाय हेमश्राद्धस्यैव विधानं पुत्रजन्मसमभिव्याहा
रात् तत्र तस्यैव मुख्यत्वात् तथा च संवर्तः पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् न पक्वेन न चामेन कल्याणान्यभिकामय
न्निति पुत्रजन्मातिरिक्तेषु तु यथा पक्वान्नासंभवे आमं तथा तदसंभवे हेम द्रष्टव्यं अन्नप्रकृतित्वेनामस्यांतरंगत्वात् आमा
न्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान् धान्याच्चतुर्गुणेनैव हिरण्येन स्मृता विषेति मरीचिवचनमात् धान्यादेकैकब्राह्मणतृ
प्तिपर्याप्तान्नसिद्धिसमर्थात् आमं तु द्विगुणं प्रोक्तं हेमं तद्वच्चतुर्गुणं अन्नाभावे द्विजातीनां ब्राह्मणस्य विशेषत इति हेमा
द्रिधृतधर्मवचनैकवाक्यत्वात् हेमाद्रिस्तु आमादिति व्याचख्यौ हेम्नश्चतुर्गुणत्वं च तावद्धान्यलाभपर्याप्तत्वं पूर्वव्याख्याने
हेम्न आमद्वैगुण्यं विवक्षितं तेन तस्य त्रैगुण्यादितो द्विगुणत्वं हेम्नो द्रष्टव्यं आमत्रैगुण्यादिकं चोक्तं व्यासेन आमं दद्याद्विको
तेयत द्दानं द्विगुणं भवेत् त्रिगुणं चतुर्गुणं वापि नत्वेकगुणमर्पयेदिति तस्यैव वचनांतरं आमं दत्तु कौंतेय दद्यादन्नाच्च

का० त०
१२५

र्गुणं सिद्धान्नंतु विधिर्यः स्यादामश्राद्धेष्वयं विधिः आवाहनादि सर्वं स्यात्पिंडदानं च भारत दद्याद्यच्च द्विजातिभ्यः शृतं वाऽशृतमेव वा
तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेदिति पक्वद्विगुणस्यापि धान्यस्य दानेऽशक्तेन तत्पर्याप्तमपि देयं असमर्थोऽन्नदानस्य धान्य
माशां स्वशक्तितः प्रदद्यात्तु द्विजातिभ्यः स्वल्पाल्पामपि दक्षिणामिति वराहपुराणात् अत्र स्वशक्तित इत्यस्य पक्षांतरविधा
यकत्वात् अन्यथा द्विगुण्यादि पक्षाणां शक्तिकृतव्यवस्थानुवादकत्वमात्रेवैयर्थ्यापत्तेः अश्यत इत्याशामिति विशेषणाच्च
ब्राह्मणे स्वकृतान्नं स्वगृहपक्वं भोक्तव्यं न तत्कार्यांतरे विनियोक्तव्यमिति सूच्यते तच्च ब्राह्मणाल्लब्धमेव क्षत्रियादिलब्धं
तु स्वस्वेनयथेष्टं विनियोक्तव्यं तथा च व्यासः हिरण्यमामश्राद्धीयं लब्धं यत क्षत्रियादितः यथेष्टं विनियोज्यं स्याद्द्विजा
याद्ब्राह्मणात्त्वयमिति क्षत्रियादित इत्यादि शब्देन वैश्यएव गृह्यते शूद्राल्लब्धस्य तु भोजनएव स्वीयपरकीयं वापि विनियो
गो न यथेष्टं नापि ब्राह्मणलब्धवत्स्वभोजनएव आमं शूद्रस्य यत्किंचित श्राद्धिकं प्रतिगृह्यते तत्सर्वं भोजनायालं नित्येन
मितिकं न त्विति षट्त्रिंशन्मतात् हिरण्यं तु ततो लब्धमपि नित्यादावपि विनियोज्यमित्युक्तं तत्रैव हिरण्यं तत्पुनः श्राद्धं गृहीतं
नैवदुष्यति तेन नित्यक्रियाः कार्या हिरण्येनान्यमुच्यत इति पिंडदाने आमात्साधनांतरमप्युक्तं षट्त्रिंशन्मते आमश्राद्धं
यदा कुर्यात्पिंडदानं कथं भवेत् गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा पिंडान्दद्याद्यथालाभं तिलैः सह विमत्सर इति गृह
पाकात्समुद्धृत्य पिंडान्दद्यादिति प्रधानभूतात्गृहपक्वादोदनात् उद्धृतेन तदेकदेशेनेति साधनांतरविधिः हेमश्राद्धेप्येव
मेव गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा पिंडदानं प्रकुर्वीत हेमश्राद्धकृते पीति भविष्योत्तरात् शूद्रकर्तृकेप्यामाद्श्रा
द्धे पिंडदानमोदनादिना भवति शूद्रस्य गृहपाके न तत्पिंडान्निर्वपेत्तथा सक्तुमूलं फलं तस्य पायसं वा भवेत्ततः इति हेमाद्रि
लिखितात् भविष्योत्तरात् पिंडनिर्वपणार्थमिति शेषः स्त्री शूद्राश्च सधर्माण इति वचनादग्न्यभावे द्विजाभावे प्रवासे पुत्रजन्म
नि हेमश्राद्धं संग्रहे च सदास्त्रीशूद्रयोरपीति भविष्योत्तरवचनाच्च स्त्रीकर्तृकमपि सर्वं श्राद्धमामादिसाधनकं पायसादिसा
धनकपिंडकं च भवति पूर्ववचनेषु पिंडदानग्रहणाच्च तत्रैवामातिरिक्तमथोदनादिसाधनं भवति विकिरादौ त्वाममेव आ १२५
मश्राद्धप्रदः पिंडांस्तथाग्नौकरणं च यत् तद्धात्रतेनैव यत्किंचिच्छ्राद्धिकं भवदिति प्रचेतोवचनात् आमादिश्राद्धप्राप्ता

24p3
194

कृत्यादिकं लुप्यते मंत्रेषु च केषुचिद्दूहो मरीचिनोक्तः आवाहने स्वधाकारे मंत्रा ऊह्या विसर्जने अन्यकर्मण्यनूह्याः स्युरामश्रा
द्धविधिः स्मृत इति आवाहने तत्तन्मंत्रे पितॄन्हविषे अत्तवे इत्यत्र स्वीकर्तवे इत्यूहः विसर्जने तत्तन्मंत्रे तृप्ताः यातेत्यत्र तर्पयतेति नमो
वः पितर इति मंत्रः स्वधाकारः तत्र इषद्वति पदस्य स्थाने आमायेत्यूह इति हेमाद्रिः तदयुक्तं रसशब्दादि पदवदिषइति पदस्याशा
स्यान्नप्रतिपादकत्वेन प्रदेयान्नप्रतिपादत्वाभावात् तेन पूर्वेषां तु स्वधाकार इति वत्स्वधा पित्र्य हविदीनं तत्करणं स्वधाकारस्त्वदं
गमंत्र इदमन्नमित्यादिस्तत्रैकब्राह्मणभोजनपर्याप्तान्ननिष्पादनसमर्थधान्यं चतुर्गुणमिदं धान्यमित्यादिरूपेणोहः कार्य इति
स्वधाकार इत्यस्यार्थः इदं च प्रसंगादुक्तं सप्रकारकमामादिश्राद्धं ग्रहणादन्यत्र मृताहे द्विजानां न भवति मासे संवत्सरादौ ले इति
पूर्वलिखितवचनात् अनग्नीकः प्रवासी च यस्य भार्या रजस्वला आमश्राद्धं द्विजः कुर्यान्न तत्कुर्यान्मृताहनीति पुष्पवत्स्व
पि दारेषु विदेशस्थोप्यनग्निकः अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचिदिति मरीचिलौगाक्षिवचनाभ्यां च अन्नेनैवाब्दिकं
कुर्यात्तद्दहरेव तेन पत्न्यां रजस्वलायामपि तद्दहरेवान्नेनैवाब्दादिपक्षेन सर्वस्यापि सांवत्सरिकमासिकश्राद्धानुष्ठानमुचितं
यत्तु मृताहनि तु संप्राप्ते यस्य भार्या रजस्वला श्राद्धं तदा न कर्तव्यं कर्तव्यं पंचमेहनीति हेमाद्रिमाधवादिलिखितं वचनं तद्यस्य
मृतस्य श्राद्धकर्त्री भार्या रजस्वलेति व्याख्येयं न तु यस्य श्राद्धकर्तुर्भार्या रजस्वलेति हेमाद्रिस्तु पाणिग्रहणाद्धि सहत्वं कर्मस्विति
वचनेन गृहस्थस्य श्राद्धेपि भार्यया सहैवाधिकारात्तस्याश्च रजस्वलादशायामशुचित्वेनानधिकारे व्यासज्यवृत्ते भर्तृगतस्या
प्यधिकारस्य विधानात्तस्यास्तद्दशापगम एव श्राद्धमुचितमिति यस्य श्राद्धकर्तुरित्यादेरेवं मृताहनीति वचनार्थः पुष्पव
त्स्वपीति वचनं तु सहाहूत भार्यांतरसद्भावविषयमित्याह ननु दंपत्योः सहाधिकारप्रतिपादकं पाणिग्रहणाद्धीति वचनं हि श
ब्दस्वरसादनुवादरूपं न्यायमूलकं श्रौतस्मार्ताग्निसाध्यकर्मविषयं तेषूभयसंयोगेनोत्पन्नानामग्नीनामधिकारिविशेषणी
भूतानामुभयस्वामिकत्वेनोभयसाध्यकर्मघटितप्रयोगत्वेन च सहाधिकारस्य न्याय्यत्वात् पूर्तव्रतादिषु तु पृथगेवाधिकार
इति नावन्मिताक्षरादिभिरुक्तं च तथा श्राद्धे च निरग्नीनामप्यधिकारात् सलीसाध्यकर्माघटितत्वाच्च निरग्निकर्तृके श्राद्धे

का०त०
१२८

र्थं अन्यथापत्न्यासहाधिकारः नचश्राद्धांगपाकस्यमध्यपिंडप्राशनस्यचपत्नीसाध्यत्वात्कथंश्राद्धकर्मणस्तत्साध्यकर्मा
घटितत्वंपत्नीशब्दश्चयज्ञस्वामिवचनोधिकाराभाविकथमितिवाच्यं पाकेआत्मादेःकर्त्रंतरस्यापिविधानात्पिंडप्राशनस्यच
काम्यत्वेनपाक्षिकत्वात् पितृपितामहादिगततत्स्युद्धारादिरूपफलार्थंमृतपित्रादिकस्यामावास्याद्यवछिन्नजीवनवतोऽक
रणप्रत्यवायपरिहारार्थंयाश्राद्धेपितृत्वाद्यानिरूपिकायास्तस्याः फलभागित्वाभावेनतद्रूपयज्ञस्वामित्वासंभवात्तत्र पत्नीश
ब्दस्यभार्यामात्रवचनत्वाच्च अत्रोच्यते पत्न्यांरजस्वलायांपंचमेहनिश्राद्धानुष्ठानेतयासहतत्राधिकारहेतुं आधिकृतभार्यां
तरसद्भावेनचस्यांविद्रजस्वलायां(मानीत्यादिवचनमूलकमेवेदं) मपितद्भिन्नेएवत्वदनुष्ठानंवदतोहेमाद्रेःसाग्निककर्तृ
कश्राद्धविषयमेवेदंसर्वमभिमतं मृतेहनीत्यादिवचनमूलकमेवेदंहेमाद्रेरभिधानं अपुत्रातुयदाभार्यासंप्राप्तेभर्तुराह्नि
के रजस्वलाभवेत्सातुकुर्यात्तत्पंचमेहनीतिश्लोकगौतमवचनसमानार्थंतस्यापिवचनस्येतरसकलनिबंधकारव्याख्या
नेअधिकारिण्याःस्त्रियाः अशक्तौतदंतेश्राद्धानुष्ठानस्यजननमरणाशौचवन्यायात् देयेपितृणांश्राद्धेतुआशौचेजा
यतेयदितदाशौचेव्यतीतेतुतेषांश्राद्धंप्रदीयतेशक्तिर्भृतेनदातव्यंयातिथिःप्रतिपद्यते सातिथिस्तस्यकर्तव्यानत्वन्या
येकदाचनेतिऋष्यश्रृंगवचनाच्चसिद्धेरेतद्वचनवैयर्थ्यापत्तेः अतएवनिरग्निकविषयमपीतितुहेमाद्र्युक्तार्थसंग्रह
ग्रंथमात्रदर्शिनामल्पज्ञानांभ्रमएवफलभागित्वरूपोस्यधिकारः श्राद्धेपत्न्यासहनसंभवत्येवेत्यधिकारिविशेषणरूपए
वाधिकारितत्सहत्वंतदापिनिमित्तरूपेनसंभवतीत्यग्निरूपएवतत् नत्वेवममावास्यादिश्राद्धमप्यग्निसाध्यंसाग्निकस्य
पत्न्यांरजस्वलायांनस्यात् सहाधिकारात् नेवं भवत्येवतत्तदाआमादिश्राद्धविधानात् श्राद्धस्यैवाभावेसाधनविधे
संभवात् नचानग्निविषयंतत् तस्यपृथक्ग्रहणात् अनग्निकःप्रवासीचयस्यभार्यारजस्वलेत्यादिस्मृतिरत्नावल्या
द्युदाहृतेनआमश्राद्धंयदाकुर्यादितिवाक्येनामश्राद्धेपाणिहोमविधानादग्निसाध्यतापितस्यनास्तीतिसंभवत्येव
पत्न्यानधिकारिपितत् अथाह्निकमेवनतुतत्कुर्यान्मृताहनीतिआमप्रतिषेधादन्नेनैवकर्तव्यं अग्निहोमांगकंपत्न्याअ १२८

245
194

शक्तौनसंभवति किंचमृताहनीतिवचनस्यपत्न्यांरजस्वलायांसहाधिकारिण्यास्तस्याअशक्तित्वाद्यश्राद्धंनकर्तव्यंतन्मृताहन्ये
वेतिपरिसंख्यार्थत्वेनव्याख्यातुंशक्यत्वादमावास्याश्राद्धंपत्न्यांरजस्वलायामपिकर्तव्यमेव नचपरिसंख्यार्थत्वेपंचमेहनी
त्यपिविधानाद्वाक्यभेदःप्रसज्येत पंचमेहनीत्येवतुविधेतदकर्तव्यमितिनिषेधोनगिरागिरेतिब्रूयादितिवदनुवादःसंभव
तीतिवाच्यंपरिसंख्यायाएवकेवलायाविधानात् पंचमेहनीत्यस्यदेयेपितृणांश्राद्धेत्विस्येतद्वचनादेवप्राप्तत्वात् अतएव
नस्यनिवृत्तिकालोपलक्षणतापि तेनश्राद्धकर्तुर्भार्यायांरजस्वलायामेताद्दशाधिकृतपत्न्यंतराभावेसाग्निककर्तृकमेवाह्नि
कश्राद्धपत्न्याःशक्तौभवत्येवहेमाद्रेःसंमतं परमार्थस्त्विदमयुक्तं तथाहि अग्निसाध्येपिश्राद्धेनपत्न्याअधिकारःसंभव
तिफलभागित्वंह्यधिकारःस्वाम्यपर्यायोपरिभावार्थकोधिशब्दयोगात्तत्सिध्यर्थंषष्ठाध्यायेसर्वकर्मणांफलवत्स्वस्थापना
च्च फलत्वाभप्रयोजकत्वात्त्वधिकारिविशेषणेधिकारिशब्दप्रयोगः नचनित्यनैमित्तिकश्राद्धेषुपत्न्याःफलभागित्वंसंभ
वतिपूर्वोक्तान्यायात् पाणिग्रहणाद्धीतिवचनंतुन्यायप्राप्तसहत्वानुवादः तेनपुत्रकामश्राद्धादौभवतुपत्न्याअध्याधि
कारोनतुसर्वत्राग्निसाध्येपि नचैवमाधानगतात्मनेपदादिविरोधः अग्निस्वामिगतस्यैवफलस्यजननात् पुरुषस्यापि
तत्स्वामित्वात् अग्न्यभिगतंफलंनजनयति अग्निसाध्यानिकर्माणि किंतुतत्स्वामिगतमेवेत्येतावदात्मनेपदादिनावगम्य
ते नतुसर्वस्वामिगतफलजनकतायत्रदंपत्योरन्यतरएवरक्षोरोगपापादिग्रहीतस्तत्रतत्परिहारार्थंरक्षोघ्नीपवित्रेष्ट्यादौ
तदसंभवात् यज्ञस्वामियजमानभार्याकर्तृकत्वेन चावगतानांपदार्थानामाज्यावेक्षणादीनांयजमानभार्याकर्तृकत्वमात्रंत
त्रसंभवतस्त्यागायोगात्कृत्यते सत्रेकस्मिंश्चित्तयजमानेनष्टेप्रतिनिध्युपादानेनसप्तदशकर्तृकत्वमात्रवत् फलसंस्का
रास्तत्रस्त्रियाभवंतिनचेत्येवमादिविस्तरभियानविचार्यते तेनयथान्यतरफलार्थान्यप्येवंजातीयकानिअविरोधात्
उभयस्वामिकेष्वप्यग्निषुभवंतितथाश्राद्धमपिभविष्यति अशक्तिविभूतयातुपत्न्यास्वसाध्यपदार्थानांकर्तुमशक्यत्वात्तत्व
टितप्रयोगाणितानितस्यांरजस्वलायांमाभूवन् श्राद्धंतुस्वयंपाकादिनाकर्तुंशक्यमेवेतिसहाधिकारवशात्पत्न्यांरजस्व

लायांश्राद्धंनभवतीतियत्किंचिदेव ननुभवतुहेमाद्रीयंसहाधिकारन्यायोपन्यसनमयुक्तंवचनादेवतुमृताहनीत्यादिकात्सर्वेषा
मप्ययमर्थोस्तुमृतभार्याविषयत्वेतस्यन्यायादेवतदर्थप्राप्तेरानर्थक्यापत्तेः कर्तृभार्याविषयत्वादितिचेन्न अपुत्रातुयदाभा
र्येषष्ठाद्यद्रुति दर्शपौर्णमासाभ्यांस्वर्गकामोयजेतेत्यादिश्रूयते तत्रयागक्रियानिष्पादकत्वंकर्तृत्वंफलभोक्तृतयास्वामि
त्वमधिकारः तादृशाधिकारोयागकर्तुर्नास्तिकुतः फलभोगाभावात् तथाहि यजेतेत्यत्राख्यातेनभावनाभिधीयतेतस्यांचधा
त्वर्थोभाव्यः एकपदोपात्तत्वात् स्वर्गस्तुपदांतरोपात्तत्वाद्वाक्येनभाव्यतयान्वेति तच्चवाक्यमेकपदत्वपया श्रुत्यावाध्यंतस्व
र्गस्यभाव्यत्वाभावेसतिगुणत्वमभ्युपेयंस्वर्गशब्दस्यसुखसाधनंचंदनवाचीलोकेतथाव्यवहरात् तच्चकामयितुंयोग्यंते
नद्रव्येणविनायागानिष्पत्तेः तस्मादत्रफलानभिधानेनतद्भोगाभावात्कर्तुर्यागेकर्तृत्वमेवनाधिकारइतिप्राप्तेब्रूमः यजेते
त्याख्यातंविधित्वाकारेणपुरुषंप्रवर्तयतिपुरुषश्चस्वाभिमतंफलमंतरेणनप्रवर्ततइतितदपेक्षितंस्वर्गमेवभाव्यतयावि
धिरुपादत्तेस्वर्गशब्दश्चसुखविशेषे रूढोन्यत्रलाक्षणिकः अनेकार्थत्वेगौरवात्नयागंतस्यस्वतःसुंदरत्वात् ततश्च
कामिपदयोगात्स्वर्गस्यैवभानायांभाव्यत्वेनान्वयात्कर्तुःफलभोगसंभवादधिकारइतिसंक्षेपः इत्यादिन्यायप्राप्तस्यैवा
र्थस्योपनिबंधनात् एवंजातीयकानांभूयसांवचनानांस्मृतिषूपलब्धेः वाचनिकत्वेवास्यार्थस्यान्हतुमदधिकृतभार्यांतरस
त्वेकस्यांचिदपितादृश्यांपंचमेहन्येवानुष्ठानंस्याद्वचनाविशेषात् इदंचदूषणंसहाधिकारन्यायमूलकत्वेपिद्रष्टव्यं कस्यां
चिदप्यशुचिभूतायांतावद्यासक्ताधिकारविघातावश्यंभावात् ऋत्विग्वद्गुणभावएवपत्न्याःपरंकारणतावच्छेदकावच्छि
न्नयत्किंचित्सत्वेकार्योपधानाद्यस्यांकस्यांचिदपिशुचिर्भूतायांस्यादनुष्ठानंतदाचसहाधिकारोक्तिरनुपपन्नामृताहनीति
वचनेनतदाननुष्ठानमुक्तं पुष्पवत्स्वपीतिवचनेनचानुष्ठानंतयोरेवंव्यवस्थाक्रियतेनतुन्यायः कश्चिदुपन्यस्यतइतिचेत्
नभार्यांतरस्याधिकृतत्वोक्तिवैयर्थ्यात् एकभार्येणतस्यांरजस्वलायांतदाश्राद्धंनकर्तव्यं अनेकभार्येणतुतदापिकस्यांचि १२७
दरजस्वलायांतिष्ठंत्यांकर्तव्यंज्येष्ठायांवारजस्वलायांवानकर्तव्यंतस्यांशुचिर्भूतायांकनिष्ठायांतादृश्यामपिकर्तव्यमित्ये

247 / 1942

वंरूपायाएवव्यवस्थायाः सुवचत्वात् वस्तुतस्तुपूर्वव्याख्याप्रकारेणतयोर्भिन्नविषयत्वान्नैवव्यवस्थापेक्षास्तीतियत्किंचिदेवे
तत् तस्मादेकभार्यः साग्निकोपितस्यांरजस्वलायामन्नेनैवमृताहएवाब्दिकमासिकमासिकश्राद्धंकुर्यात् तद्भिन्नंत्वमावा
स्यादिश्राद्धमामेनैकपाकेनापिवा श्राद्धकर्त्रीस्त्रीरजस्वलाचेन्मासिकाब्दिकंचरजोनिवृत्तौकुर्यादमावास्यादिनिमित्तंतुप्यत
त्वेति आशौचेनतुक्षयाहप्रतिबंधआशौचांत्यदिनेचोत्तरदिनेतत्कर्तव्यं देयंपितृणांश्राद्धंत्विति पूर्वोक्ताद्दृष्यशृंगवच
नात् देयविशेषणंमृताहातिरिक्तश्राद्धव्यावृत्त्यर्थंतेषांदानंप्रतिग्रहोहोमः स्वाध्यायः पितृकर्मच प्रेतपिंडक्रियावर्जमाशौ
चेविनिवर्ततइतिशंखवचनाददेयत्वात् मृताहश्राद्धस्यतुविघ्नमात्रेदेयता श्राद्धविघ्नेसमुत्पन्नेमृताहेऽविदितेतथा
एकादश्यांप्रकुर्वीतकृष्णपक्षेविशेषतइतिसबहुष्वयजमानेषुएकस्मिन्मृतेप्रतिनिधिर्नास्तियजमानप्रतिनिधेरभावादि
तिचेन्मैवंभंग्यंतरेणतत्सिद्धेः सत्रिणोहिकार्यद्वयंफलभोक्तृत्वंयागकर्तृत्वंच तत्रप्रतिनिधेः फलित्वाभावेपिकर्तृत्वंसंभ
वतिऋत्विकार्येकर्तृत्वं प्रतिनिधिमंतरेणसाप्तदश्याभावात्सप्तदशावराः सत्रमासीरन्निति सप्तदशानांकर्तृत्वात्तथा
चषोडशैवकार्याणिनिष्पद्येरन्नएकंकार्यंलुप्येततस्माद्यजमानस्यप्रतिनिध्यभावेप्यृत्विजः प्रतिनिधिसद्भावात्पुरुषां
तरंप्रतिनिधापनीयमितिस्थितेपक्षे तत्रबोधफलीतिप्रतिनिधित्वेनानीतस्यफलीसंस्कारावपनादयः कर्तव्यावेतिसंदे
हेनेतिप्राप्त्यंकुतः फलयोग्यतासंपादकाहिते नचानीतस्यफलमित्युक्तं अतोनास्यफलिसंस्कारइतिचेत्सत्यं इतरेषांतु
सप्तदशकर्तृकैः संस्कारैर्योग्यताजन्यतेसर्वत्रकर्त्रंशेसाप्तदश्यनिवेशादतस्तत्सिध्यर्थंप्रतिनिधेरपिसंस्कारानकुर्यादिति
यथातथेत्यर्थः लघुहारीतवचनात् मृताहइति श्राद्धविघ्नेसमुत्पन्नइत्यस्यापिविशेषणमध्यगतत्वेनविशेषाग्रहणात्साकां
क्षत्वाच्च अतएवतत्रैवकालांतरानुष्ठानाचारः यद्यपिचात्रकालविशेषावच्छिन्नादेयतोक्तानतुदेयतासामान्यंतथापिव्यर्था
दपितावत्सिद्धंतदुपजीव्यदेयतोक्त्यात्रविशेषलाभोघटवएव अथाग्नेय्याग्नीध्रमुपतिष्ठतइत्यत्रस्तोत्रादिद्वाराविशेष
विनियोगेनसिद्धस्यक्रतुसंबंधसामान्यस्यलाघवायोपजीवनात्सूक्ताग्नेयीविशेषलाभः तत्रत्यकालविशेषस्यतुनत्व

न्योविकदाचनेत्यत्रनिषेधान्मृताहप्रत्यासन्नमुख्याशौचानंतरदिनापेक्षयागौणत्वं निषेधार्थमुपजीव्यस्यतस्यसर्वथाप्रतिषेध्य
मशक्यत्वेनप्रतिषेधस्यसंभवविषयत्वात् तेनाशौचानंतरदिनेपिप्रमादादिनाऽकरणेनदुत्तरामावास्यायांतत्रापिकथंचिद
संभवेकृष्णैकादश्यांतत्रापितथात्वेशुक्लायांतस्यांमासिकाब्दतुसंप्राप्तेअंतरामृतसूतके वदंतिशुद्धौतत्कार्यंदर्शेवापिविच
क्षणाइति षट्त्रिंशन्मतेश्राद्धविघ्नेसमुत्पन्नेत्वंतरामृतसूतके अमावास्यांप्रकुर्वीतश्राद्धावेकमनीषिणइतिव्यासवचनेचा
मावास्यायाअप्याशौचविघ्नेविधानात् कृष्णैकादशीतत्रविशेषतइत्युक्त्यासूचितावानुकल्पभूताशुक्लैकादशीविप्रसा
मान्येविहितापिविशेषविहितकालासंभवेअत्राप्याकांक्षयाग्राह्या पाकासंभवादिनाह्निकविघ्नेतुतदुत्तरामावास्यायां
कृष्णैकादश्यांवातत्कर्तव्यं व्यापन्नोप्याह्निकंनैवकुर्यादामेनकर्हिचित् अन्नेनेदममायांतुकृष्णेवाहरिवासरइतिका
र्ष्णाजिनिवचनात् कृष्णपक्षेविशेषतइतिवचनाच्छुक्लैकादश्यामपि व्याध्यानादिनाऽशक्तेनतुपुत्रादिनातद्दिनएवान्येनक
रणीयं अनुपादेयकालानुरोधेनोपादेयकर्तृप्रतिनिधेर्न्याय्यत्वात् व्यापन्नोपीतिवचनंतुनव्याध्याद्यापद्विषयंतदाआ
मेनापिकर्तुमशक्यत्वाद्धाऽमनिषेधसाहचर्यात्तस्यपाकासंभवरूपापद्विषयत्वात् प्रतिनिधिन्याय्यसंभवेसामान्यवच
नादमावास्यादिषु यत्तुएकोद्दिष्टंतुकर्तव्यंपाकेनैवसदास्वयं अभावेपाकपात्राणांतदहःसमुपोषयेदितिश्राद्धचिंताम
ण्यादिषुलिखितंस्वकालाकरणनिमित्तोपवासरूपप्रायश्चित्तविशेषविधायकंसदुत्तरकालकर्तव्यतासूचकंस्वयमिति
वचनात्प्रतिनिधिनिषेधकंवचनंतन्मासिकैकोद्दिष्टविषयं एकोद्दिष्टंतुसंप्राप्तेयदिविघ्नःप्रजायते मासेन्यस्मिंस्तिथौ
तस्मिन्श्राद्धंकुर्यात्प्रयत्नतइतिदेवलवचनेनमासिकंचोदकुंभंचयद्यदंतरितंभवेत् तत्तदुत्तरस्वातंत्र्यादनुष्ठेयंप्रचक्ष
तइतिवचनेनैकवाक्यतयामासिकविषयेणैकवाक्यत्वात् अतएवतदहरुपवासेनैवश्राद्धस्थानीयेनतदकरणप्रायश्चि
त्तेनकृतार्थत्वादेकोद्दिष्टंपुनर्नकर्तव्यमेकादश्यादिष्विति श्राद्धचिंतामण्युक्तिर्यस्यैतानिनदत्तानिप्रेतश्राद्धानिषोड
शपिशाचत्वंस्थिरंतस्यदत्तैःश्राद्धशतैरपीतिवचनोक्तदोषापादनेनातिथितत्वकृताद्दूषिता एवंहिवदन्षोडशश्राद्धे १२८

249
1942

ष्वेकोद्दिष्टविषयमिदंवचनमितिमन्यते तदहश्चेत्प्रदुष्येतकेनचित्सूतकादिना सूतकानंतरंकुर्यात्पुनस्तदहरेवचेत्युत्तरमासग
ततत्तिथिरूपकालविधायकामत्रिवचनमपिमासिकविषयमेव पूर्ववचनैकवाक्यत्वात् यस्यतुमरणतिथिरेवनज्ञायतेत
न्मासगतायाममावास्यायांकर्तव्यं नज्ञायतेमृताहश्चेत्प्रमीतिप्रोषितेसति मासश्चेत्प्रतिविज्ञातस्तद्दर्शेस्यान्मृताहनी
तिबृहस्पतिवचनात् मृताहनियत्कर्तव्यंतद्दर्शेतिशेषः प्रोषितइतिमृततिथ्यज्ञानकारणोपलक्षणं अतएवसामान्यतोभविष्यपुरा
णे मृताहंयोनजानातिमानवोविनतात्मज तेनकार्यममावास्यांश्राद्धंसांवत्सरंन्रपेति श्राद्धविघ्नइतिमरीचिवचनात्तन्मास
कृष्णशुक्लैकादश्योर्वायद्यपिचात्रकृष्णपक्षेविशेषतइत्युक्त्याशुक्लैकादश्यनुकल्पस्तथापिशुक्लपक्षेमृतइतिज्ञानेसैवग्राह्या
पक्षस्याप्यज्ञानेतुसानुकल्पइतिद्रष्टव्यं यदातुमरणतिथिरेवज्ञायतेनतन्मासस्तदामार्गमाघभाद्रमासानामन्यतमेमासितत्ति
थौकार्यं दिनमेवविजानातिमासंनैवतुयोनरः मार्गशीर्षेथवाभाद्रेमाघेवाथसमाचरेदितिभविष्यपुराणात् अत्रापिशु
क्लपक्षज्ञानेतद्गतातत्तिथिः नोचेत्कृष्णगतैव तस्यापित्र्यप्रशस्तत्वात् तिथिमासयोरुभयोरपिमरणसंबंधिनोरज्ञानेप्रस्थ
नोत्तरमेवयस्यजीवनवार्तानज्ञातातन्मृताहश्राद्धेप्रस्थानदिनमासौ दिनमासौनविज्ञातौमरणस्ययदापुनः प्रस्थानदिन
मासौतुग्राह्यौपूर्वोक्तयादिशेतिबृहस्पतिवचनात् पूर्वोक्तयादिशेत्ययमर्थः प्रस्थानस्यापिमासज्ञानेदिनाज्ञानेतन्मास
स्थामावास्यादिषु मासाज्ञानेदिनज्ञानेचमार्गशीर्षादिषुप्रस्थानतिथ्यावेति शुक्लपक्षज्ञानतदज्ञानयोःपूर्ववत् यदाप्रस्थ
नस्यापिदिनमासयोरज्ञानंयस्यवाप्रस्थानोत्तरंबहुकालंचजीवनवार्ताश्रुतैवपश्चात्तन्मरणज्ञानंनतुतद्दिनमासौतदाम
रणश्रवणसंबंधिनौदिनमासौग्राह्यौ मृतवार्ताश्रुतेर्ग्राह्यौपूर्वोक्तक्रमेणत्वितिभविष्योत्तरात् पूर्वोक्तक्रमेणत्वित्ययम
र्थः मरणवार्ताश्रवणसंबंधिमासमात्रस्मरणेतदमावास्यादिषु तद्दिनमात्रस्मरणेमार्गशीर्षादिसंबंधिनितद्दिने शुक्ल
पक्षज्ञानतदज्ञानयोःपूर्ववत् यस्यतुमरणतच्छ्रवणप्रस्थानानांसर्वेषामपिदिनमासयोरज्ञानंतदाह्निकविषयेप्रभासखंडे मृ
तस्याहनजानातिमासंवापिकथंचन तेनकार्यममावास्यांश्राद्धंमाघेथमार्गकइति कथंचनेतिमरणादिरूपेणकेनापिचि

का०त०
१२१

ङ्गितमित्यर्थः यस्यत्वज्ञानदेशगतस्यजीवनमरणान्यतरानिर्धारणात्पंचदशवर्षाणिप्रतीक्ष्य पश्चात्प्रतिकृतिदाहाद्यौर्ध्वदेहिकंक्रिय
तेतस्यदाहकालीनतिथावेवाब्दिकंमासिकंचकार्यं तथाचजातूकर्ण्यः पिताग्निप्रोषितेयस्यनवार्तानैवचागतिः ऊर्ध्वंपंचदशाद्व
र्षात्कृत्वातत्प्रतिरूपकं कुर्यात्तस्यचसंस्कारंयथोक्तविधिनाततः तदानीमेवसर्वाणिप्रेतकर्माणिसंचरेदिति तदानीमेव तदानी
मृतस्यैव अनेनसर्वत्र दाहदिनस्यावधित्वमुक्तं भविष्योत्तरेतुतदादीत्येवपाठः इयंचपंचदशवर्षप्रतीक्षापिपितृविषया पि
तरीतिवचनात् यत्तुयस्यनश्रूयतेवार्तायावद्द्वादशवत्सरं कुशपुत्रकदाहेनतस्यस्यादवधारणमितिबृहस्पतिवचनं प्रोषित
श्चयदाकालोगतश्चेद्द्वादशाब्दिकः प्राप्तेत्र्यादिवर्षेप्रेतकार्याणिकारयेत् जीवन्यदिसआगच्छेत्घृतकुंभेनियोजयेत् उ
द्धृत्यस्नापयित्वास्यजातकर्मादिकारयेत् द्वादशाहंव्रतचर्यात्रिरात्रमथवास्यतु स्नात्वोद्वहेततांभार्यामन्यांवातदभावतः
अग्नीनाधायविधिवद्व्रात्यस्तोमेनवायजेत् अथेंद्राग्नेनपशुनागिरिंगत्वातुतत्रतु इष्टिमायुष्मतींकुर्यादीप्सितांश्चक्र
तूंस्ततइति वृद्धमनुवचनंचतत्पित्रातिरिक्तविषयं जीवन्नित्यादितुपितर्यपिभवत्येव व्रतचर्याब्रह्मचर्यरूपा पंचाशद्वर्षः
न्यूनवयस्कस्यपंचदशवर्षप्रतीक्षातदधिकवयस्कस्यद्वादशवर्षाणीतिकेचित् तस्यस्यावधारणमितिवचनाच्चमर्तृमर
णरूपनिमित्तावधारणप्रयुक्तंतद्भार्यायाएकचित्यारोहणेनपृथक्चित्यारोहणेनवामरणमपिभवत्येव नचवस्तुतो
मरणाभावेपितस्याःप्रत्यवायशास्त्रीयत्वात्तदवधारणस्येतिदिक् एतेचामावास्यादयःक्षयाहातिरिक्तानियमेनपार्व
णश्राद्धकालाः एतेषुयानिश्राद्धानिविहितानितानिपार्वणविधिनात्रिपुरुषोद्देशेनैवकार्याणीत्यर्थः अतएवोक्तंक्र
त्वंन एकमुद्दिश्ययच्छ्राद्धमेकोद्दिष्टमुदीरितं त्रीनुद्दिश्यतुयत्तद्धिपार्वणंसमुदीरितमिति यद्यपिपार्वणशब्दःपर्वणि
भवमितिव्युत्पत्त्यादर्शश्राद्धएवमुख्यतद्धर्मत्वाद्वादितरत्रगौणस्तथाप्येकोद्दिष्टेपितद्धर्मातिदेशसत्यपितत्राप्रयोगा
न्नव्यावृत्तः केषुचिदेवश्राद्धेषुप्रयोगेनिमित्तभूतोभिधेयदर्शश्राद्धगुणएवानेनवचनेनप्रदर्श्यतेतेचत्रयःपुरुषाःपि
तृपितामहप्रपितामहएवसत्यपिदर्शश्राद्धद्वयेमातामहश्राद्धस्यततोभिन्नस्यपितृश्राद्धविकृतिश्राद्धत्वादितरश्रा १२१

251
1942

द्धेषुपित्र्यश्राद्धधर्मातिदेशस्यैवयुक्तत्वादितिपूर्वमुक्तं मातामहश्राद्धप्राप्तिश्चयथैतेषुतरपिपूर्वमुक्तं पार्वणविकृतित्वंचसर्व
श्राद्धशब्दवत्वाख्यत्वोदनासामान्याद्वचनात् तथाचमत्स्यपुराणे एतदग्निमतःप्रोक्तमन्वाहार्यंतुपार्वणं यथेंदुसंक्षये
तद्वदन्यत्रापिनगद्यतइति यदपिद्वितीयंमत्स्यपुराणवचनंततःप्रभृतिसंक्रांतावुपरागादिपर्वसुत्रिपिंडमाचरेच्छ्राद्धमेको
द्दिष्टंमृताहनीति तत्रापिपिंडग्रहणस्योपलक्षणत्वात्पार्वणधर्मकत्वमेवाभिप्रेतं एवंसतिसंक्रांतिग्रहणमप्युपपद्यते अ
यनद्वितयेश्राद्धंविषुवद्वितयेतथा संक्रांतिषुचसर्वासुपिंडनिर्वपणाद्दतइतिब्रह्मपुराणेतच्छ्राद्धेपिंडदाननिषेधाद्यथाश्रुते
नुपपत्तेः पुनर्वचनंचैकोद्दिष्टंमृताहनीत्येतद्विधानार्थं ततःप्रभृतिसपिंडीकरणोत्तरं एतदभिधानंचनतत्पूर्वभाविषुए
कोद्दिष्टश्राद्धेषुपार्वणातिदेशोनास्तीत्येवमर्थं तेष्वपितद्धर्मातिदेशस्यावश्यंवक्तव्यत्वात् अन्यथाकेषांचिद्धर्माणां
पर्युदासानुपपत्तेः यथाहयाज्ञवल्क्यः एकोद्दिष्टंदेवहीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितंह्यपसव्यवत्
उपतिष्ठतामक्षय्यस्थानेविप्रसर्जनेअभिरम्यतामितिवदेद्ब्रूयुस्तेभिरतास्महेतिः तथाश्वलायनगृह्यपरिशिष्टे प्रेतश्राद्धे
षुसर्वेषुनस्वधानाभिरम्यतां स्वस्त्यस्तुविसृजेदेनंसंकल्पणववर्जितं एकोद्दिष्टस्यपिंडेतुअनुशब्दोनप्रयुज्यते पितृश
ब्दंनकुर्वीतपितृहाचोपजायतइति अत्रदेवाग्नौकरणावाहनादीनांवाचनिकःपर्युदासः पितृपदेपितमंत्रनिवृत्त्यैकार्घ्यपिं
डत्वादीनामर्थप्राप्तानामनुवादः उपतिष्ठतामित्यादिनांप्राकृतस्थानेनविधिः किंतुतेषुउक्तानांपार्वणधर्माणाम
नुष्ठानंनास्तीत्येतावन्मात्रेणप्रदानंयत्रयत्रैषांसपिंडीकरणात्परं तत्रपार्वणवज्ज्ञेयंश्राद्धमभ्युदयाद्दतेइतिशातातपवच
नेभ्युदयश्राद्धपर्युदासवत् तत्रापिप्राचीनावीतादिवद्बहुपार्वणधर्माणांमनुष्ठानाभावात् अतएवमिताक्षरायांब्रूयुस्तेभि
रताःस्मइतिशब्दःप्रसिद्धवाचीप्रसिद्धपार्वणसंबंधिशेषधर्मप्रापकत्वेनव्याख्यातः एवंसपिंडीकरणादूर्ध्वंयत्रयत्रप्र
दीयते तत्रतत्रत्रयंकुर्याद्वर्जयित्वामृताहनीत्यादिशंखवादिवचनेष्वपिसपिंडीकरणोर्ध्वकालग्रहणमेवमतिप्रायकमे
व मृताहनियत्कर्तव्यंतद्वर्जयित्वेत्यर्थः मृताहशब्दश्चनिरूपपदोमासपक्षतिथिस्पष्टइतिपरिभाषितक्षयाहपरः मास

संबंधितिथिपरस्तपपदात्प्रतिमासमित्यादि एवंविधानिवचनानिनश्राद्धांतरेषुपार्वणधर्मातिदेशविधायकानिकिंतुवचनांत
रसिद्धतदनुवादिनतत्रक्षयाहपर्युदासार्थानितेनैवंविधवचनैरेकोद्दिष्टंपरित्यज्यपार्वणंकुरुतेयदि अकृतंतद्विजानीयात्स
मातृपितृघातकः प्रतिसंवत्सरंतस्मादेकोद्दिष्टंसमाचरेत् एकोद्दिष्टंपरित्यज्यपार्वणंयः समाचरेत् सदेवापितृहासःस्यान्मा
तृभ्रातृविनाशकः मृताहेपार्वणंकुर्वन्नधोधोयातिमानवः संपृक्तेष्वाकुलीभावः प्रेतेषुतुयतोभवेदित्यादियममत्स्यपुराणा
दिवचनैश्चैकोद्दिष्टविधानेनाब्दिकश्राद्धमुक्तं येसपिंडीकृताः प्रेतानतेषांतुपृथक्क्रिया यस्तुकुर्यात्पृथक्पिंडंपितृहा
सोभिजायते पार्वणेनविधानेनसांवत्सरिकमिष्यते प्रतिसंवत्सरंकार्यंविधिरेषसनातनइति सपिंडीकरणंकरणंकृत्वा
कुर्यात्पार्वणवत्सदा प्रतिसंवत्सरंविद्वान्छागलेयोदितोविधिरित्यादिभिश्चकूर्मपुराणशातातपादिवचनैर्बहुभिःपार्वण
विधानेनतदुक्तंअत्रच राजन्संवत्सरेपूर्णेसपिंडीकरणेकृते निराशाःपितरोयांतिएकस्यावाहनेकृते एकोद्दिष्टंतुकर्तव्यंया
वत्पित्रोःसपिंडनं राजन्सपिंनादूर्ध्वमेकोद्दिष्टंनिवर्तते नपृथक्पिंडदानंतुतस्मादूर्ध्वंविधीयते प्रेतानामिहसर्वेषांयाम
त्रस्तानियोजितः प्रेतत्वंचेषनिस्तीर्णः प्राप्तःपितृगणंतुसः व्यवतेपितृलोकान्तुपृथक्पिंडनियोजने परिणीतायथायो
षिन्नगच्छेत्पितृकंकुलं प्रेतोप्येवंमहाराजसंयुक्तःपितृभिःसह संवत्सरंभवेद्यावदेकोद्दिष्टंकथंचन संवत्सरेव्यतीतेतुत्रिभिः
समान्यमुच्यते कृतार्थास्त्विहनिर्वृत्ताः सपिंडीकरणेकृते तेगताःपितृलोकंतुयथाहभगवान्शिवः सपिंडीकरणंकृत्वाकु
र्यात्पार्वणवत्सदा प्रतिसंवत्सरंविद्वानित्येवंमनुरब्रवीदित्यादिभविष्यत्पुराणादिषुपार्वणविधानस्यभूयःप्रशंसादर्शनात्कर्त
व्यंपार्वणंराजन्नेकोद्दिष्टंकदाचन सुबहून्यत्रवाक्यानिमुनिगीतानिवक्ष्यते अल्पानिचैवराजेंद्र एकोद्दिष्टंप्रचक्षते तस्मा
द्वचनसामर्थ्यात्पार्वणंस्यान्मृताहनीतिसुमंतुवचनाच्चविप्रतिषिद्धधर्मसमवायेभूयसांस्यात्सधर्मत्वमितिन्यायेनपार्वण
प्रकारानुष्ठानस्यैवोचितत्वान्नकेवलंमातापितृविषयाणामेवापितृव्यादिविषयाणामपिक्षयाहेकोद्दिष्टविधीनामननुष्ठा
नलक्षणमप्रामाण्यमेवकेचिन्मन्यंते प्रत्यक्षश्रुतिविरोधाच्च तथाचद्वेमाघ्नदाहतंश्रुतिद्वयं देवावाअसुरान्हत्वापितृ
त्वंसमविंदतःसंतोनवष्टधाः सहेवेत्यब्रुन्येनस्समानस्तेवःपरस्यानुस्वंभागंप्रतिगृह्णन्त्येवमेनाश्वदिति मासिमास्यृतावैतो १३०

प्रतिहेमंत ग्रीष्मवर्षास्तु प्रतिसंवत्सरेचदेवाश्चपितरश्चसहास्तामितिच येपितरोनोस्माकंसमानाःसदृशाःसपिंडीकृताइतियावत्
तेवयंदेवास्तेपितरश्च वोयुष्माकंपार्श्वात्परस्यपितृभागस्यचानुसहैवेतियावत्स्वंस्वंभागंप्रतिगृह्णंतीतिहेतोरेवमेवदेवयागसा
हित्येनैवसदेवपार्वणविधानेनैवपितृयागानुष्ठानमभूदित्याद्यश्रुतेरित्यर्थः देवाश्चपितरश्चश्राद्धंभोक्तुंसहतिष्ठंतीतिद्वितीयायाः
आसपिंडक्रियाकर्मद्विजातःसंस्थितस्यच अदैवंभोजयेच्छ्राद्धंपिंडमेकंचनिर्वपेदितिसहपिंडक्रियायांतुकृतायामस्यधर्मतः
अनयैवावृताकार्यंपिंडनिर्वपणंसुतैरितिमनुवचनविरोधाच्च मनोर्हिधर्मप्रवक्तृविप्रतिषिद्धेति पंचदशरात्रस्याग्निष्टुत्प्रथ
ममहः तस्यचैकाहत्रयोग्निष्टुत्प्रकृतिः तत्रोपसत्कालीनसुब्रह्मण्याह्वानार्थमाग्नेयाविहितासाचतद्विकृतित्रेपप्रथमेहनिचो
दकताप्राप्नोतिद्वितरेषुचतुर्दशस्वहःसुप्रकृत्यनुसारेणेंद्रीप्राप्ताउपसत्कालीनायाश्चसुब्रह्मण्याया अहर्गणेषुतंत्रंनिर्णीतंत
थासत्यत्रोपसत्कालीनसुब्रह्मण्यायामाग्नेयेंद्रोःकलहप्रावावसंज्ञातविरोधितयाप्रबलस्यप्रथमस्याह्नःआनुगुण्येनाग्ने
याकार्येतिप्राप्तेब्रूमः बहूनामह्नामनुग्रहादैंद्राकार्यात्यजेदेकमितिन्यायेनबहुत्वस्यप्राबल्यहेतुत्वादितिन्यायार्थःतस्य
यद्वैकिंचनमनुरवदत्तद्भेषजमितिवेदेनाभ्यनुज्ञातत्वादितरापेक्षयाबलीयस्त्वं अतएवाहुः अन्वर्थविपरीतातुयास्मृतिः
सानशस्यतइति तदयुक्तं नतावद्विप्रतिषिद्धेतिन्यायस्यायंविषयःनहिधर्मप्रवक्तृमुनिवचसांसंवादात्प्रामाण्यंयेनैवंस्यात्
विशेषतोयाज्ञवल्क्यादिमहर्षिवचसां याज्ञवल्क्येनचैकोद्दिष्टमुक्तंप्रतिसंवत्सरंचैवमिति नचमुनिवचसांपरस्परविरोधे
न्यतरस्यभ्रांतिमूलत्वं येनबहूनांभ्रांत्यसंभवादल्पवचसामेवस्यात् प्रत्यक्षश्रुतिविरोधेपितदभावात्सुमंतुवचनंत्वनेन
केनाविप्रकारविशेषेणपार्वणप्रशंसापरमेव यच्चश्रुतिद्वयंपार्वणपरमुदाहृतंनतत्तस्यविधायकं किंत्वन्यस्यकस्यचिद्विधेः
शेषोद्योतकमात्रं ननुलिंगदर्शनपर्यायद्योतकमात्ररूपवैदिकवाक्यविरोधेपिस्मृतेरप्रामाण्यमुक्तमाचार्यैःश्रुतिलिंगाधिक
रणेयथास्मृतिवैदिकलिंगविरोधेतत्रकथमित्यादिना उच्यते अनन्यथासिद्धलिंगविषयंतत् अन्यथासिद्धंचेदंश्रुतिद्वयं
दर्शश्राद्धप्रतिमासापरपक्षश्राद्धेना तस्यैवश्रुत्यंतरेमासिमासिवोशनमितिविधानात् सर्वश्राद्धप्रकृतित्वाच्च अशक्त

253
194

एकसंवत्सरमेवमासिमासस्मृताहते हेमंतग्रीष्मवर्षाख्य ऋतुत्रयमेववा अशक्तितारतम्येन शक्तस्तु शक्तितारतम्येनतैरेवत्रिभिःप
क्षैः प्रतिसंवत्सरंदर्शनिमित्तमपरपक्षनिमित्तंवा सदैवश्राद्धंकर्तव्यमितिद्वितीयश्रुतेरपितद्विषयतयाव्याख्यानसंभवात् तथा
चपूर्वमुदाहृतंदेवलवचनं अनेनविधिनाश्राद्धंकुर्यात्संवत्सरंसकृत् द्विश्चतुर्वायथाश्राद्धंमासेमासेदिनेदिनइति संवत्सर
पर्यंतमेवमासेमासेद्वादशमितियावत् चतुर्वारंद्विवारंसकृद्वायथाश्राद्धं अनेनपूर्वोक्तपार्वणविधिनाश्राद्धंकुर्यात् यदास
कृत्तदाकन्यायांतस्याः पित्र्येतिप्रशस्तत्वात् दिनेदिने अहरहः श्राद्धमपिसंवत्सरमेव अनेनविधिनाकुर्यादितिहितस्यार्थः
अतएवापस्तंबेनापिनित्यश्राद्धंप्रक्रम्योक्तमेवंसंवत्सरमिति मनुनाचदर्शश्राद्धंप्रक्रम्य अनेनविधिनाश्राद्धंत्रिरब्दस्येह
निर्वपेत् हेमंतग्रीष्मवर्षासुपांचयज्ञियमन्वहमितितेनश्रुतेः क्षयाहमित्रविषयत्वाभावात्स्मार्तानामेवतद्विषयाणांपार्व
णैकोद्दिष्टविधीनांविरोधस्मृतिद्वैधेतुविषयः कल्पनीयः पृथक्पृथगितिविषयव्यवस्थाकल्पनमेवोचितं तत्रशूलपाणिप्र
भृतयस्तावदेवंमन्यंते मृताहनितुकर्तव्यंप्रतिमासंतुवत्सरं प्रतिसंवत्सरंचैवमाद्यमेकादशेहनीति प्रतिसंवत्सरंचै
वमेकोद्दिष्टंमृताहनीतिततः प्रभृतिसंक्रांतावुपरागादिपर्वसु त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टंमृताहनीति सपिंडीकर
णादूर्ध्वंयत्रयत्रप्रदीयते तत्रतत्रत्रयंकुर्याद्वर्जयित्वामृताहनीत्यादियाज्ञवल्क्यव्याघ्रमत्स्यपुराणशंखादिवचनैस्ता
वन्मृताहशब्दोपतेस्तस्यमासपक्षातिथिस्पृष्टइतिपरिभाषितक्षयाहपरत्वात् क्वचिच्चप्रतिसंवत्सरशब्देनैवतस्यविशेषणा
त्क्षयाहश्राद्धमेवैकोद्दिष्टंविधीयते प्रदानंयत्रयत्रैषांसपिंडीकरणात्परं तत्रपार्वणवच्छ्राद्धंज्ञेयमभ्युदयादृते अर्वाक्
संवत्सराद्वर्द्धेपूर्णेसंवत्सरेपिवा येसपिंडीकृताः प्रेतानतेषांतुपृथक्क्रिया नपृथक्पिंडदानंतुतस्मादूर्ध्वंविधीयते प्रेता
नामिहसर्वेषांयेमंत्रस्तान्नियोजिताः कृतार्थास्तेतुसंवृत्ताः सपिंडीकरणेकृते प्रेतत्वाच्चेहनिस्तीर्णाः प्राप्ताःपितृगणांतुते यः
सपिंडीकृतंप्रेतंपृथक्पिंडेनियोजयेत् विधिघ्नस्तेनभवतिपितृहाचोपजायतइतिसपिंडीकरणेकृतेपृथक्त्वंनोपप
द्यते पृथक्त्वेतुकृतेपश्चात्पुनःकार्यासपिंडतेति असपिंडीकृतंप्रेतमेकोद्दिष्टेनतर्पयेत् सपिंडीकरणादूर्ध्वंत्रिभिःसा १३१

255
164

मान्यमिष्यतइत्यादिशातातपलघुहारीतजाबालिवचनैस्तुसपिंडीकृतानांपार्वणंसामान्यतोविधीयतेमृताहशब्दाभावात्तेन
सामान्यविशेषन्यायेनैतेषांमृताहेतरविषयत्वान्मृताहेसर्वेषामेकोद्दिष्टस्यैवपूर्ववचनैःप्राप्तावौरसक्षेत्रजौपुत्रौविधिनापार्व
णेनतु प्रत्यब्दमितरेकुर्युरेकोद्दिष्टंसुतादशेतिजाबालिवचनादौरसक्षेत्रजाभ्यांस्वपित्रोः क्षयाहश्राद्धंपार्वणविधिनैवकर्तव्यं
ताभ्यामपिसाग्निकाभ्यामेवयत्रयत्रप्रदातव्यंसपिंडीकरणात्परं पार्वणेनविधानेनदेयमग्निमतासदेतिमत्स्यपुराणेविशेष
णात् ततश्चनिरग्निकयोरौरसक्षेत्रजयोरपि अन्येषांतुपुत्राणांसाग्नीनांनिरग्नीनांचविशेषविहितमेकोद्दिष्टमेवक्षयाहे
भवति नचसंदेश्युक्तत्वात्साग्निकयोर्नित्यंनिरग्निकयोस्त्वौरसक्षेत्रजयोः पाक्षिकंपार्वणमपिनत्वेकोद्दिष्टनियमइतिवाच्यं
तयोःपार्वणविधेर्वैषम्यापत्तेः एकएवहिसविधिःसाग्निकयोस्तयोर्नित्यंपार्वणंविदधातिनिरग्निकयोस्तुपाक्षिकमिति
सामान्यरूपाणांपार्वणविधीनांमृताहविषयैरेकोद्दिष्टविधिभिःस्वविषयादुत्कालितानांतदितरविषयत्वेनमृताहेपार्वण
विधेरन्यस्याभावात् येनतद्वशादेवविकल्पःस्यात् निरग्निकस्यसाग्निकस्यचपार्वणनियममात्रार्थोयंविधिःस्यात् अत
एवदेयमग्निमतासदेतिनसर्वपुत्राणांविशेषणार्थंऔरसक्षेत्रजभिन्नानांपार्वणप्राप्त्यभावेनयद्दत्तकादिभिःपार्वणंकर्तव्यं
तदग्निमद्भिरेवेतिविशेषणासंभवात् संभवतितुयत्क्षेत्रजौरसाभ्यांपित्रोर्मृताहेपार्वणंकार्यंतदग्निमद्भ्यामेवेति एवंसति
आपाद्यसहपिंडत्वमौरसोविधिवत्सुतः कुर्वीतदर्शवच्छ्राद्धंमातापित्रोर्मृताहनीति पुत्राणामौरसःपुत्रःपुत्रमात्रास्तथाप
रेपितुःपितृगणस्यस्यनित्यंकुर्यात्सपार्वणमितिजमदग्निवाक्येऔरसग्रहणंक्षेत्रजस्याप्युपलक्षणं औरसक्षेत्रजयोःसा
ग्निकयोरेवपार्वणनियमोहेमाद्रेरपिसंमतः स्पष्टंचात्रार्थेभविष्यत्पुराणमुदाहृतंनिरग्नेरौरसस्योक्तमेकोद्दिष्टंमृताह
नि प्रत्यब्दंपार्वणंसाग्नेरन्येषांतुनपार्वणमिति औरसग्रहणंवाक्यांतरेसहोक्तस्यक्षेत्रजस्याप्युपलक्षणं तत्समःपुत्रिका
सुतइत्यौरससमत्वात्पुत्रिकापुत्रस्यापीत्यधिकमुक्तंतेन अग्निप्रधानंसर्वेषामनुष्ठानंगृहाश्रमे तद्योगात्कृतसामर्थ्याः
सर्वत्राहितपावनं वर्षेवर्षेतुकुर्वीत पार्वणंयोग्निमान्द्विजः कुर्यादनग्निमाधीरएकोद्दिष्टंमृताहनीत्यादीनिचकार्ष्णा

का०त०
त्रिनिभविष्यत्पुराणादिवचनान्यधिकानिलिखितानि अन्येषामेकोद्दिष्टनियमंतुशूलपाण्यादिवद्धेमाद्रिर्नमन्यतेकिंतुपरं सं
१३२ नयनासित्रोर्मृताहन्यपिपार्वणं सपिंडीकरणादूर्ध्वंवर्षेवर्षेमृताहनीति कर्तव्यंपार्वणंराजन्नेकोद्दिष्टंकदाचनेत्यादिभिर्बहुभिर्वृ
ताहशब्दोपेतैर्विशेषवचनैस्तदुपोद्बलितैश्चसामान्यवचनैरपिपूर्वोदाहृतैः पार्वणस्यापिप्राप्तेर्विकल्पमेव येनास्यपितरो
यातायेनयाताःपितामहाः येनयायात्सतांमार्गंतेनगच्छन्नदुष्यतीतिवचनाद्वंशपरंपरायातसमाचारव्यवस्थितंमन्यंते यत्तु
तद्ग्रंथान्निरग्नीनामौरसादीनामेवविकल्पःदत्तकादीनांतुसाग्निकानांनिरग्नीनांचैकोद्दिष्टमेवेतिप्रतीयतेतन्निरुपपत्तिकं
यदिहिसाग्निस्तुपार्वणंप्रत्यब्दंपार्वणेनैवविधिनाक्षेत्रजौरसोइत्यादीनांसामान्यतःप्राप्तपाक्षिकपार्वणनियमार्थत्ववत्प्र
त्यब्दमेतदेकस्यकुर्युः श्राद्धंसुतादशेत्यादीनामपिताद्दशैकोद्दिष्टनियमार्थत्वमभिप्रेत्यैतदभिधानंततोनग्निमानौरसश्चै
त्येवमादीनामप्यविशेषात्तथात्वान्निरग्नीनामौरसादीनामपिविकल्पाभिधानमुक्तमेव अथसाग्नीनांपार्वणनियमार्थ
मेवतद्वचनंनतुनिरग्नीनामेकोद्दिष्टनियमार्थमपिवाक्यभेदप्रसंगात्किंसामान्यतःप्राप्तस्यैकोद्दिष्टमपिताद्दशैकोद्दिष्ट
नियमार्थत्वमभिप्रेत्यैतदभिधानंततोनग्निमानौरसश्चेत्येवमादीनामप्यविशेषात्तथात्वान्निरग्नीनामौरसादीनामपि
विकल्पाधानमयुक्तमेव अथसाग्नीनांपार्वणनियमार्थमेवतद्वचनंनतुनिरग्नीनामेकोद्दिष्टनियमार्थमपिवाक्यभेद
प्रसंगात् किंतुसामान्यतःप्राप्तस्यैकोद्दिष्टस्यानुवादएवेत्यभिप्रेत्यनिरग्नीनांविकल्पाभिधानंतुल्यमौरसादीनांपार्वण
नियमार्थवचनेतरेषामेकोद्दिष्टाभिधानस्यापितादतितेषामपिविकल्पएवयुक्तइति केचित्तुअग्निमत्वस्यौरसक्षेत्रज
विशेषणत्वानभ्युपगमेनतद्वाक्यद्वयस्यापिस्वातंत्र्यमेवांगीकृत्यौरसक्षेत्रजाभ्यांपुत्राभ्यांक्षयाहेपार्वणंकार्यमितरै
रेकोद्दिष्टमितिसाग्निकैःपार्वणंनिरग्निकैरेकोद्दिष्टमितिवैकल्पिकीव्यवस्थासाग्निभ्यांनिरग्निभ्यांवौरसक्षेत्रजाभ्यां
साग्निकैश्चदत्तकादिभिरपिपार्वणमेवकार्यं इतरैरेकोद्दिष्टमेवेतिसमुच्चित्यैवाव्यवस्थामन्यंते मिताक्षराकारस्तुपार्व
णैकोद्दिष्टयोर्विकल्पमेवाचारव्यवस्थितंमन्यतेनतुवाचनिकींव्यवस्थांतथाहिवाचनिकव्यवस्थाभ्युपगमेहिएतैरेवपा १३२
र्वणंकार्यमितरैर्वैकोद्दिष्टमितितत्तद्वचनव्यक्तिर्वक्तव्या तथाचसामान्यरूपाणांपार्वणैकोद्दिष्टविधीनांविषयविशे

257
194

येउपसंहारस्यापद्यते सचसामान्यवाक्यवैयर्थ्यापत्तेरयुक्तः ताद्दशस्यहिसामान्यवचनस्यविशेषवचनेनोपसंहारोभवतित
स्योपसंहाराद्विशेषवचनसमानविषयस्यापिकेनचिदंशयोजनेनार्थवत्त्वा तथानारभ्याधीतस्यसामिधेनीसाप्तदश्यविधेःप्रकृ
तेःप्रकरणाधीतपांचदश्यावरुद्धत्वाद्विकृतिविषयस्यसाक्षात्सामिधेनीलक्षणद्वारसंबंधमात्रबोधकस्यतावतैवचार्थव
त्त्वेतन्मात्रसंबंधेआनर्थक्याद्व्यभिचारितक्रतुसंबंधसामिधेनीद्वारोपस्थितसर्वविप्रकृतिक्रत्वपूर्वसंबंधकस्यनोन्मु
खस्यपशुमित्रविंदादिप्रकरणस्थितेनतत्क्रत्वपूर्वसंबंधबोधकेनसाप्तदश्यविधिनोपसंहारः यथावाशाखांतरगतस्यतत्तच्छाखा
ध्येतृनप्रत्यर्थवतःपुरोडाशंचतुर्धाकरोतीत्यस्यसर्वविशेषाक्षेपोन्मुखस्यशाखांतरगतेनाग्नेयंचतुर्धाकरोतीत्यनेन नचप्रकृ
तेमृताहमात्रविषयाणांपार्वणैकोद्दिष्टवाक्यानांकथंचिदर्थवत्तासंभवति ग्रंथांतरगतत्वेपिस्मृतिग्रंथानांशाखांतरव
त्व्यवस्थितप्रमाणत्वाभावात् तेनामावास्यांक्षयोयस्यप्रेतपक्षेथवापुनःसपिंडीकरणादूर्ध्वंतस्योक्तःपार्वणोविधिरितिशंख
वचनवदौरसक्षेत्रजतदितरसाग्निनिरग्निरूपतत्तद्विषयविशेषालिंगितपार्वणैकोद्दिष्टवचनानांव्यवस्थितरूपत्वेपिएतेषांपार्वण
मेवतेषामेकोद्दिष्टमेवेतिवचनव्यक्त्यानियमार्थतापरंस्यात् वस्तुतस्तुतेषामव्यवस्थितरूपत्वात्सापिन एकोद्दिष्टंतुकर्तव्य
मौरसेनमृताहनि सपिंडीकरणादूर्ध्वंमातापित्रोर्नपार्वणमितिपैठीनसिनौरस्यापिएकोद्दिष्टविधानात् बह्वग्नयस्तुयेविप्रा
येचैकाग्नयएवच तेषांसपिंडनादूर्ध्वमेकोद्दिष्टंनपार्वणमितिचभृगुणासाग्नीनामपितद्विधानात् बृहन्नारदीयेविप्रःक्षया
हपूर्वेद्युरित्यादिग्रंथेनक्षयाहेपार्वणमभिधायअन्यभावेतुविप्रस्यपाणौहोमोविधीयतइतिनिरग्निकस्यपाणिहोममात्ररूप
विशेषविधानेनतस्यापिवत्रपार्वणाभ्यनुज्ञाप्रतीतेश्च एतेनतेषामेकोद्दिष्टंनकिंतुपार्वणमितिकिंतुशब्दाध्याहारेणस्वारस
भंगेनापिहेमाद्रेःपूर्ववचनव्याख्यानमभ्युपगम्यतदविरोधसंपादनेनवर्षेवर्षेतुकुर्वीत पार्वणंयोग्निमान्द्विजइत्यादिभिःसा
ग्नेःपार्वणनियमकरणाभ्युपगमेपिपित्रोरनग्निमान्धीरएकोद्दिष्टंमृताहनीत्यादिनानिरग्नेरेकोद्दिष्टनियमःकर्तुंनशक्य
तइतिद्रष्टव्यं वाक्यभेदप्रसंगाच्च इदंचनिरग्नेरेकोद्दिष्टनियमाकरणंतस्यपार्वणैकोद्दिष्टविकल्पाभिधायिनोहेमाद्रेरपिसं

मतमेव एतेन चौरसस्यसाग्नीनांचैकोद्दिष्टविधानेननिरग्नीनामपिचपार्वणविधानेनमिताक्षराहेमाद्रीयमदनरत्नादिग्रंथलिखितेनसा
ग्न्योरौरसक्षेत्रजयोरेव पार्वणं अन्येषांत्वेकोद्दिष्टमेवेति शूलपाण्याद्यभिमतमप्यपहसितंवेदितव्यं यःसपिंडीकृतमित्यादिसामान्यवच
नैरेवमृताहेपिपार्वणंप्राप्यमाणंमृताहविषयैरेकोद्दिष्टवचनैर्बाध्यते प्रतिप्रसवस्तुसाग्निकयोरौरसक्षेत्रजयोस्तस्यतितदुक्तिस्तु
मृताहविषयेष्वेवपूर्वलिखितेषुभूयःस्ववचनेषुसत्स्वनन्यथासिद्धस्यैतेषांरपराधीयदेनमंधीनपश्यतीतिन्यायेनोपेक्षणीयैव किं
चसामान्यवचनान्यपिप्रयोजनलिप्सयामृताहविषयाण्येव अन्यविषयत्वेनिःप्रयोजनत्वात् तथाहि किमेतःश्राद्धेषुपार्वण
प्रकारोविधीयतेतस्यसपिंडीकरणोत्तरकालिकत्वंवानाद्यः तस्यपार्वणातिदेशादेवसिद्धेः एकोद्दिष्टविधानेनक्वचित्सरंतस्यबा
धः नद्वितीयः ततःपूर्वमेकोद्दिष्टविधानेन पितृत्वप्राप्त्यभावादेवतत्रत्यश्राद्धेषुकृत्स्नपार्वणप्रकारासंभवेनचतदुत्तरकालि
कत्वेवार्थात्तदतिदेशस्यतदनुष्ठानस्यचसिद्धत्वात्कात्स्न्याभिप्रायेवचपार्वणवद्भावस्यसपिंडीकरणोत्तरकालिकत्वोक्ति
र्नतुतत्पूर्वभाविषुतदभावाभिप्रायाकिंचित्पार्वणधर्मपर्युदासानुपपत्तेरित्युक्तं पृथक्त्वेतुमृतेपश्चास्युनःकार्यासपिंडतायःस
पिंडीकृतंप्रेतमित्यादिकापार्वणविधिशेषभूताएकोद्दिष्टनिंदापितस्यक्षयाहविषयत्वंद्योतयति अप्रसक्तस्यनिंदानुपपत्ते
र्मृताहएवचसपिंडनोत्तरंतस्यप्रसक्तेः यत्रचापौरुषेयवेदगतापिकिंचित्सक्षाविधिशेषभूताकिंचित्सक्षानिंदातत्प्रसक्तपे
क्षाभवतियेनतद्बलेनतस्यापिविधिमुन्नीयतमपिपक्षंकल्पसूत्रकाराःपाक्षिककर्तव्यत्वेननिबध्नंतितत्रकिंमुवक्तव्यंपौ
रुषेयस्मृतिगतातत्प्रसक्त्यपेक्षेतितेनैकोद्दिष्टनिंदोपोद्बलितःपार्वणविधिरपिपरस्परनिंदोपोद्बलितोदितानुदितहोमवत्
निंदितसमानविषयत्वौचित्यात्निंदितस्यैवैकोद्दिष्टस्यक्षयाहविषयत्वात्सोपितात्पर्यतःक्षयाहविषयएवक्षयाहकटाक्षेपे
वप्रवृत्तेषुतेषुयःसंक्रांत्यादिपरामर्शोयत्रयत्रेतिवीप्सावादश्चसप्रासंगिकःतेनामावास्याप्रेतपक्षक्षयाहयोरेवपार्वण
नियमः इतरत्रतुसाग्नीनांनिरग्नीनांचौरसक्षेत्रजयोर्दत्तकादीनांचसर्वेषांपार्वणैकोद्दिष्टयोर्विकल्पएवच सचवंशपरंप १३३
रयातत्समाचारस्यव्यवस्थितइत्येवमिताक्षरोक्तं युक्तंयदिचसाग्निकौरसविषयैकोद्दिष्टविध्योरनावारात्तदातस्यापिपार्व

259
194

णानियमोभवतुविकल्पोप्रतिहतएवेति अस्मिंश्चपक्षेपितुर्गतस्यदेवत्वमौरसस्यत्रिपौरुषं सर्वत्रानेकगोत्राणामिवस्यैवमृताहनी
तिपराशरवचनमथौरसदत्तकादिविषयमेवव्याख्येयं एवंहितदातस्यार्थःऔरसस्यौरसेनदेवत्वंगतस्यसपिंडीकृतस्यपितुःस
र्वत्रदर्शादौमृताहनिचश्राद्धंत्रिपुरुषंपार्वणविधानेनकर्तव्यं दृष्टांतार्थेचसर्वग्रहणं मृताहएवतुकटाक्षितः अनेकगोत्राणांएकगो
त्रोत्पन्नैर्दानक्रयादिनान्यगोत्रंप्रविष्टैर्दत्तकादिभिरितियावत् पितुर्मृताहन्यैवैकस्यैवकर्तव्यदर्शादौतुयथाप्राप्तंपार्वणमिति अ
त्रापिऔरसस्यपार्वणनियमएवविधेयः दत्तकादिष्वेकोद्दिष्टांशेत्वनुवादएवमिताक्षराकारमतेत्वनेकगोत्राणांकर्त्रासहभिन्नगोत्रा
णांमातुलादीनांमृताहनिश्राद्धमधिकार्यंतराभावेभागिनेयादिभिरेकस्यैवकार्यमित्यर्थः अयमपिचविधिरेव अत्रापितृग्रहणं
मातुरप्युपलक्षणं पूर्वलिखितवचनमध्येकेषुचित्पित्रोर्मातापित्रोरितितुस्पष्टंमातुरप्युपादानात् केषुचिच्चौरसादिपुत्रोपादा
नादेवतत्प्रतिसंबंधितयापितुरिवमातुरपिश्राद्धदेवतात्वेनोपस्थितिसिद्धेःप्रत्यब्दंयोयथाकुर्यात्पुत्रःपित्रेसदाद्विजः तथैव
मातुःकर्तव्यंपार्वणंचान्यदेवचेतिकात्यायनवचनाच्च पितुर्गतस्यदेवत्वमितिवचनस्यस्वमतेनव्याख्यानार्थेमिताक्षराग्रंथेयन्मा
तामहपरित्यागेनमातुलादिग्रहणं तेनापुत्रमातामहश्राद्धमपिमृताहेपित्रवत्पार्वणैकोद्दिष्टप्रकारविकल्पेनकर्तव्यंनत्वेकोद्दिष्टप्रकारे
णैवेतिगम्यते पितृव्यभ्रातृमातॄणामपुत्राणांतथैवच मातामहस्यापुत्रस्यश्राद्धादिपितृवद्भवेदितिहेमाद्रिधृतजातूकर्ण्यवचनाद
विशेषेणकर्तव्यमितिवचनाच्च अतएवात्रमातामह्यपिगृह्यतेदौहित्रत्वाविशेषाच्च मातृशब्देनात्रमातृसपत्नीस्वौरसपुत्ररहिता
गृह्यते इतरथामातुःश्राद्धंकुर्यादित्युक्तेप्रतिसंबंधिनःपुत्रस्यैवश्राद्धकर्तुरुपस्थितेस्तस्याअपुत्रविशेषणव्याघातात् उपदेशा
देवजननीश्राद्धेपार्वणादिसिद्धेरतिदेशानपेक्षणाच्च यत्तुसपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणं पितृव्यभ्रातृमातॄणामेकोद्दिष्टं
सदैवाहीतिकात्यायनवचनंतत्कर्तृपेक्षयाकनीयःपितृव्यादिविषयं पितृव्यभ्रातृमातॄणांज्येष्ठानांपार्वणंभवेत् एकोद्दिष्टंकनि
ष्ठानांदंपत्योःपार्वणंमिथः इतिदाक्षिणात्यनिबंधधृताचारसंवादिचतुर्विंशतिमतवचनात् ज्येष्ठोभ्रातापितुःसमइतिवचना
च्च अत्रापिसर्वत्रमातृपदंमातृसपत्नीपरमेवपूर्वत्रैवजनन्याःपार्वणविधानादेकोद्दिष्टविधानुपपत्तेः यत्तुपितृव्याद्येकोद्दिष्ट

का०नि० १३४

वचनानांतीर्थमहालयश्राद्धविषयत्वं उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः श्वशुरभ्रातृतत्सुतपुत्रर्त्विक्याज्ययोषकाः
भगिनीस्वामिदुहितृजामातृभगिनीसुताः पितरौपितृपत्नीनांपितुर्मातुश्चयास्वसा सखिद्रव्यदशिष्याद्यातीर्थेचवमहाल
ये एकोद्दिष्टविधानेनपूजनीयाः प्रयत्नतइतिहेमाद्रिधृतसंवादात्प्रयोगपारिजातादावुक्तं तत्प्रावत्सरिकप्रकरणपठित
स्यकात्यायनवचनस्यसदाशब्दयोगान्महालयादिविषयत्वस्यापिसंभवेपिप्रकरणाबाधायसांवत्सरिकविषयत्वस्यापश्य
श्यंवाच्यत्वादयुक्तं पितृपत्नीनांमातृसपत्नीनांमातापितरौ अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषास्तथा तेषामपिचदेयं
स्यादेकोद्दिष्टंनपार्वणमिति सपिंडीकरणादूर्ध्वंयत्रयत्रप्रदीयते भ्रात्रेभगिन्यैपुत्रायस्वामिनेमातुलायच मित्रायगुरवेश्वा
द्धमेकोद्दिष्टंनपार्वणमितिच गर्गस्मृतेस्तुवचनंसंवादिकात्यायनवचनाविरोधायजातूकर्ण्यवचनेपितृवद्भाववचनमावश्य
कत्वार्थंनतुपार्वणधर्मातिदेशार्थमितियद्धेमाद्रिणोक्तंतदपिवाचनिकव्यवस्थैवपितृव्यादित्रयविषयपार्वणैकोद्दिष्टयो
रविधासंपादनान्निरस्तंवेदितव्यं मातामहपितृव्यभ्रातृसपत्नीश्राद्धावश्यकत्वस्यपुत्राद्यैरेवचोत्तराइत्यनेनैवसिद्धश्च
तथाहिविष्णुपुराणे पूर्वाःक्रियामध्यमाश्चतथाचैवोत्तराःक्रियाः त्रिप्रकाराःक्रियाह्येतास्तासांभेदंशृणुष्वमे आदाहाद्वा
दशाहाच्चमध्ययाःस्युःक्रियामताः ताःपूर्वामध्यमामासिमास्येकोद्दिष्टसंज्ञिताः प्रेतेपितृत्वमापन्नेसपिंडीकरणादनुक्रि
यंतेयाःक्रियाःपित्र्याःप्रोच्यंतेतानृपोत्तमाइतिपित्र्यकर्मणस्त्रैविध्यमभिधायपितृमातृसपिंडैस्तुसमानसलिलैस्तथा
तत्संघातगतैश्चैवराज्ञावाधनहारिणा पूर्वाःक्रियाश्चकर्तव्याइतिराजांतैःपूर्वक्रियाअवश्यंकर्तव्याइत्यभिधायपुत्राद्यैरे
वचोत्तरादौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयैर्यथेत्यनेनपुत्रःपौत्रःप्रपौत्रोवाभ्रातावाभ्रातृसंततिरितिविष्णुपुराणएवपू
र्वनिर्दिष्टानांपुत्रादीनांभ्रातृसंतत्यादीनांदौहित्राणांचकर्तॄणांस्वप्रतिसंबंधिनांउत्तराश्चशब्दात्पूर्वामध्यमाश्चावश्य
कर्तव्यत्वेनोक्ताः अत्रत्वेवकाराःकार्याइत्यनेनसंबध्यतेयद्यप्यन्यदेवत्यःपशुराग्नेय्येवमनोताकार्येत्यत्रेव यथाश्रुत
नियमेस्वामिमातुलमित्रादिश्राद्धप्रकारोपदेशानुपपत्तिप्रसंगात् पुत्रादीनामावश्यकत्वोक्तौतुकरुणयान्येषामपिसंबं १३४

261
1942

धिश्राद्धप्रसक्तौतत्प्रकारविधानमुपपद्यते अतएवोक्तंसंग्रहे कारुण्यात्क्रियतेश्राद्धंयस्यदातानविद्यते एकोद्दिष्टंभवत्येषांसर्व
दानतुपार्वणमितिसर्वदास्क्षयाहेतीर्थमहालयादौचेत्यर्थः अतएवचराजांतानांपूर्वक्रियामात्रावश्यकत्वोक्तेर्मध्यमास्वनियमइति
निबंधकाराः प्रेतसंबंधिप्रभूतधनहारिणोयस्यकस्यापितदुत्तरक्रियाणामप्यवश्यकर्तव्यतोक्ता स्कंदपुराणेमलमेतन्मनुष्याणां
द्रविणंयत्प्रकीर्तितं तद्गृह्णन्मलमादत्तेदुर्विधाज्ञानिनामपि ऋषिभिस्तस्यनिर्दिष्टानिष्कृतिःपावनीपरा आदेहपतनात्तस्यकु
र्यात्पिंडोदकक्रियामिति दुर्विधाःदरिद्राः यद्यपीति त्वंह्यग्नेप्रथमोमनोतेतिमनोतामंत्रोग्नीषोमीयपशौपठितः तत्रैवचेदंवचनंय
द्यप्यन्यदेवत्यःपशुराग्नेय्येवमनोताकार्येति सोयंमंत्रःकिंविकृतिषुवायव्यादियागादेवतमूहितव्योऽथवाऽविकारेणप्रयोक्तव्यइ
तिसंशयेऊहितव्यइतितावत्प्राप्तं यतःअग्नीषोमीयस्यद्विदेवत्यत्वात्केवलाग्नेयदेवत्यामनोतातत्राऽसामर्थ्यादुल्लक्ष्यमाणायद्य
पीतिवचनेननिवार्यतेयद्यपिद्विदेवत्याकृष्यायकेदेवत्येवमनोताकार्यानोल्लक्ष्यतेति नत्वनेनान्यत्रोहःप्रतिषिध्यते प्रकृतौच
देवतद्वयरूपार्थप्रकाशनरूपदृष्टद्वारकाभावेप्यदृष्टार्थत्वसंभवादितिचेत् अत्रब्रूमः अग्निन्यायेनाग्निपदस्याग्नीषोमलक्षक
त्वेनदृष्टद्वारकत्वसंभवात्प्रकृतावनर्थकंयद्यपीतिवाक्यंविकृतावूहनिवारणेनचरितार्थंतस्मादूहोनास्तीति आदेहपतनात्त
स्यकुर्यात्पिंडोदकक्रियामितिदुर्विधाःदरिद्राणामज्ञानिनांसुवर्णानामपितत्स्वरूपनित्यन्वयः तेनामावास्यामहालयक्षयाह
योर्यतिक्षयाहेचयस्यकस्यापियेनकेनापिकेषांचिन्मतेऔरसक्षेत्रजाभ्यांसाग्निकाभ्यांमातापितृक्षयाहेच पार्वणमेवकार्यं
इतरत्रक्षयाहेसाग्निकौरसाद्यतिरिक्तैश्चमातापित्रोरपिपार्वणमेकोद्दिष्टंवा विकल्पेन मातामहयोर्ज्येष्ठानांचापुत्राणांमातृ
सपत्नीपितृव्यभ्रातॄणांदंपत्योश्चपरस्परंतथैव ज्येष्ठानामपिपितृव्यादीनांपत्न्याश्चतीर्थमहालययोरेकोद्दिष्टमेव अज्येष्ठा
नांपितृव्यादीनामाचार्यादीनांचापुत्राणांक्षयाहेतीर्थादौचैकोद्दिष्टमेव मातामहानांमातृसपत्न्याश्चतीर्थादौपार्वणमेव
सर्वत्रयत्रमातृश्राद्धंपृथक् मातृशब्दस्यपितृपत्नीवाचित्वेनजननीसपत्न्यामपिप्रवृत्तेः तदभावेपिवापितृपत्न्यःसर्वा
मातरइत्यस्माद्वचनात् नहीदंवचनंकेवलंसापिंड्यार्थमेवकिंतुमातृत्वप्रयुक्तकार्यप्राप्त्यर्थंचमातृशब्देनैवतदभानिर्देशा

का०त०
१३५

र्थंच विनिगमनाविरहात् एवंसति सूत्रकारेणान्वष्टकास्वेव पृथक् मातृश्राद्धस्योक्तत्वात् धूर्तिकारादिभिः सर्वैस्तत्रोक्त एतत्स्या
न्मूलकोऽज्ञनन्यासहैव तत्तत्पत्न्या अपि श्राद्धप्रकारो न्यायतुल्यत्वात्तीर्थमहालयादावपि प्राप्तो अविरुद्धो भविष्यति यत्र पत्नी भर्तृ
चितामन्वारुह्य मृता तत्र भर्तुस्तस्याश्च तिथिभेदेन मरणे तत्तत्तिथौ तस्य तस्याश्च पृथगेव सांवत्सरिकं यदा तत्र तिथ्यैक्यं तदाय
मप्येकदेशकालकर्तृकत्वेनाग्रत्यमाणविशेषत्वाद्देवताभेदेन पृथक् क्रियमाणयोरपि प्रधानयोरंगानां तंत्रं प्राप्नोति न च भिन्न
प्रयोगविधिपरिगृहीतानां प्रधानानां कथं तंत्रं तत्तत्प्रयोगविधिपरिगृहीतपदार्थानां प्रयोगविध्यंतरोपसंगृहीतपदार्थव्यव
धानेन प्रयोगप्राशुभावभंगापत्तेरिति वाच्यं एककालानां भिन्नप्रयोगविधिविहितानामपि प्रधानानां भेदेन प्रयोगे मुख्य
कालबाधापत्तेस्तदनुरोधेन प्रयोगप्राशुभावभंगेनापि तंत्रानुष्ठानस्यैवोचितत्वात् तथापि एककालगतास्तु नां बहूनामथवा द्व
योः तंत्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्पृथक् पृथक् पूर्वस्य च मृतस्यादौ द्वितीयस्य ततः पुनः तृतीयस्य ततः कुर्यात्संनिपाते त्वयं क्र
म इति भृगुवचनेसांवत्सरिकाणां क्रमस्य प्रयोगभेदाख्यस्य पृथक्त्वस्यैव वाहत्य विधानात्पाकमात्रतंत्रत्वोक्तेश्च पृथगेव दंपत्यो
योः श्राद्धं प्राप्नोति दैवादेकतिथौ मृतानामितरेषामिव तत्र तद्बाधेन प्रकारविशेषो विहितो लौगाक्षिणा मृताहनि समासेन पिं
डनिर्वपणं पृथक् नवश्राद्धं च दंपत्योरन्वारोहण एव त्विति समासेन संक्षेपेण यथाहि पितृकः पितृद्वयोद्देशेनैकं पिंडं ददाति ए
कस्मिन् पिंडे द्वौ द्वावुपलक्षयेदिति वचनात् तथात्रापि दंपत्योः स्त्रिया अन्वारोहणे अतएव च ब्राह्मणोप्येक एव द्वयोः प्रक
रणादेव श्राद्धरूपविशेषलाभेन पिंडनिर्वपणस्योपलक्षणत्वात् अतएव चनमृताहविशिष्टश्राद्धानुवादनिबंधनवाक्य
भेदोपि दंपत्योरिति तु विशेषणं विधेयस्य समासस्यानेकापेक्षस्यैकश्राद्धे विधातुमशक्यत्वात्मृष्यामहइतिन्यायेनावि
वक्षितमेव अन्वारोहणे तु विधेयसमासविशेषणं हविषोद्वित्वेतिवत् पृथक् नवश्राद्धं चेत्यन्वयः चस्त्वर्थे नवश्राद्धं त्व
न्वारोहणे दंपत्योः पृथगेव कुर्यात् पृथक्त्वं च पूर्वोक्तसमासविपर्यय एव तेन प्रधानमात्रभेदः अंगतंत्रता भवत्येव अ १३५
तएव वचनांतरं नवश्राद्धं तु युगपत्तु समापयेदिति समाप्तिग्रहणमुपक्रमस्याप्युपलक्षणं तद्यौगपद्येन विना समाप्ति

263
194

यौगपद्यासंभवात् ननु च मृताहश्राद्धमात्रे समासे विहिते नवश्राद्धे कथं तत्प्राप्तिर्येन तद्विपर्ययरूपपृथक्त्वं विधीयते न च मृता
हग्रहणस्योद्देश्यविशेषणत्वेनाविवक्षितत्वात्पूर्वविधिनैव तत्रापि तत्प्राप्तिरिति वाच्यं सांनिधिनैव श्राद्धलाभान्मृताहस्यै
वोद्देश्यत्वादन्यथा तृध्यान्वष्टक्यादावपि समासविध्यापत्तेः सत्यमनुवाद एवायं पूर्वविहितसमासविपर्ययस्य अतएव नव
श्राद्धग्रहणमुपलक्षणमवयवपिंडषोडशश्राद्धादीनां एकवाक्यताप्येवं सति लभ्यते सांगप्रधानतंत्रत्वरूपसमासविपर्ययो
ऽगमात्रतंत्ररूपो वाक्यभेदेन विधीयतां पक्षांतरमपि गार्ग्येणोक्तं एकचितां समारूढौ दंपती निधनं गतौ पृथक् श्राद्धं तयोः कुर्या
दोदनं च पृथक् पृथगिति ओदनं श्रादनं पिंडं वा कतंत्रत्वस्य न्यायादेककालगतानामपि वचनादेकचितां समारूढौ म्रियेते यदि दंपती तंत्रे
णाश्रपणं कुर्यात्पृथक् पिंडं समापयेदिति विशेषवचनाच्च प्राप्तिः श्राद्धशब्देन च ब्राह्मणभोजनमुच्यते तेन ब्राह्मणभोजनपिंडदानात्मकं प्रधा
नमात्रं भेदेन कर्तव्यं अंगानि तु तंत्रेण पितृपितामहपार्वणद्वयवदित्यर्थः न चेदं वचनं नवश्राद्धविषयं तेन सांवत्सरिके पूर्ववचनोक्त एक एव प
क्ष इति वाच्यं या समारोहणं कुर्यात् भर्तुश्चितायां पतिव्रता तां मृताहनि संप्राप्ते पृथक् पिंडे नियोजयेत् प्रत्यब्दं च नवश्राद्धं युगपत्तु समापये
दिति भृगुणा मृताहश्राद्धे एव पृथक् पिंडदानस्योक्तत्वात् पिंडग्रहणं ब्राह्मणभोजनस्याप्युपलक्षणं चकारो नवश्राद्धं चेति योजनीयः तु
शब्दः समापयेदिति पृथक् पिंडदानोक्तेः प्रयोगभेदशंकास्यात्तन्निवृत्तये इदमुच्यते प्रत्यब्दं श्राद्धं नवश्राद्धं च समापयेत्तु युगपदिति या
त्वस्य वचनस्य सांवत्सरिकैकोद्दिष्टपक्षविषयता हेमाद्रिणोक्ता सा निर्बीजा न च पिंड इत्येकवचनादेव मिति वाच्यं तस्यानुवाद्यवि
शेषणत्वेनाविवक्षितत्वात् यस्मिंश्च नियोजयेत्तत्स्थ पृथगित्येव ह्यत्र विधीयते न तु पिंडोपि तेन प्रधानेपि तंत्रमंगेष्वेवेति तं त्रमिति पक्षद्व
यमन्वारोहणे मृताहे कृत तच्च शक्याशक्तिव्यवस्थितं अतएव प्रयोगपारिजाते वचनं एकचितां समारुह्य मृतयोरेकबर्हिषि पित्रोः
पिंडान्पृथक् दद्यात्पिंडं वा पत्नस्मृत इति बर्हिर्ग्रहणं सकलांगोपलक्षणं यत्तु तिथिभेदेनाप्यन्वारोहणे भर्तृतिथावेव पत्न्या अपि श्रा
द्धस्यानुष्ठानं केषांचिद्दक्षिणात्यानां तदति भ्रांत्यैवेति इत्थं पार्वणश्राद्धकाला दर्शिताः अथैकोद्दिष्टकालाः प्रदर्श्यंते यानि श्रा
द्धान्येकोद्दिष्टप्रकारेण कर्तव्यानि तानि प्रदर्श्यंते तत्र स्मृत्यर्थः तानि त्रिविधानि नवानि नवमिश्राणि पुराणानि चेति तथा चाश्वलायनः

नवश्राद्धंदशाहानिनवमिश्रंतुषड्कत्नू अतःपरंपुराणंवैत्रिविधंश्राद्धमुच्यतइति श्राद्धमेकोद्दिष्टं तत्रनवानितावत् तान्यनेकविधा
न्युक्तानि तत्रहेमाद्र्युदाहृतेनागरखंडे त्रीणिसंचयमस्पार्थितानिवैशृणुसांप्रतं यत्रस्थानेभवेन्मृत्युस्तत्रश्राद्धंतुकारयेत् एकोद्दि
ष्टंततोमार्गेविश्रामोयत्रकारितः ततःसंचयनस्थानेतृतीयंश्राद्धमिष्यते पंचमेसप्तमेतद्वदष्टमेनवमेतथा दशमेएकादशेचैवनवश्रा
द्धानिविदुरिति कात्यायनोपि चतुर्थेपंचमेचैवनवमेकादशेहनि यत्तुवेदीयतेजंतोस्तन्नवश्राद्धमुच्यइति संज्ञाकरणंचचांद्रा
यणंनवश्राद्धइतिप्रायश्चित्तविशेषविधानार्थं एवमन्यत्रापि यद्यप्यनेकविधानिवान्युक्तानितथापीदानींशिष्टाचारेप्रथमे
ह्नितृतीयेचसप्तमेनवमेतथा एकादशेपंचमेस्युर्नवश्राद्धानिषट्तथेतिवसिष्ठोक्तानिप्रचरंति पितृमरणोत्तरंप्रथमाब्देविशे
षमाहदेवलः स्नानंचैवमहादानंस्वाध्यायंपितृतर्पणं प्रथमाब्देनकुर्वीतमहागुरुनिपातने स्नानंसमावर्तनंकाम्यस्नानंवा महा
दानसाहचर्येणविशेषप्रायदर्शनादितिन्यायात्स्वाध्यायः काम्यब्रह्मयज्ञाध्ययनं अग्नितर्पणंकाम्योहोमः देवलः प्रमीतौ
पितरौयस्यदेहस्तस्याशुचिर्भवेत् नदैवंनापिवापित्र्यंयावत्पूर्णोनवत्सरः दैवंस्नानादिपित्र्यंगयापरपक्षनिमित्तमेकोद्दिष्टं
पार्वणंचपित्रातिरिक्तस्य अतएवआश्वलायनपंगयाश्राद्धंश्राद्धंचापरपक्षकं प्रथमेब्देनकुर्वीतकृतेपिचसपिंडने तथा दर्शश्रा
द्धंगयाश्राद्धंश्राद्धंचापरपक्षिकं प्रथमेब्देपिकुर्वीतयदिस्याद्भक्तिमान्सुतः भक्तिमान्भक्त्यारब्धश्राद्धवान् तत्कृत्वातानि
कुर्यादितिकेचित् तत्रमूलंचिंत्यंसुतइत्येवनिमित्तसमर्पकं भक्तिमत्वंतुकर्मांगत्वेनप्राप्तत्वादनूद्यतेइतियुक्तंतथासर्वेषांप्रे
तकार्याणिमहागुरुनिपातने कुर्यात्संवत्सरादर्वाक्श्राद्धमेकंतुवर्जयेत् भृगुः माताचैवतथाभ्राताभार्यापुत्रस्तथास्नुषा
एषांमृतौचरेच्छ्राद्धमन्यंनतुपुनःपितुः तथा माताचैवसुतोभ्रातापत्नीचैवविपद्यते तत्रश्राद्धानिकुर्वीतनकुर्याज्ज्ञानेकस्य
ते मातागौणीनिजजननीतन्मरणोत्तरंप्रमीतौपितरौयस्येतिदेवलीयनदैवपित्र्ययोर्निषेधात् एतत्पूर्णसांवत्सरिकपरमिति
केचित्तत्रापिमूलंमृग्यं अत्रपितरिमृतेन्यदीयंश्राद्धंनकुर्यादितिनिषिध्यते अन्यमृतौकुर्यादितितुनिःप्रत्यूहंसामान्य
वाक्यप्राप्तमेवानूद्यतइतिदिक् इतिग्रथांतरेप्रतापमार्तंडेपंचमेस्युर्नवश्राद्धानिषट्तथेतिवृद्धवसिष्ठोक्तानिप्रचरंतिः १३६

265
194

बौधायनेनतुपंचैवोक्तानि नवमदिवसकर्तव्यस्यचतत्रासंभवेएकादशदिनकर्तव्यतोक्ता मरणाद्विषमेषुदिनेष्वेकैकं नवमश्राद्धंकु
र्यादानवमात् यत्रनवमंविच्छिद्यतेएकादशेह्नितत्कुर्यादिति अनयोःपक्षयोर्व्यवस्थाप्युक्ताशिवस्वामिना नवश्राद्धानिपंचाश्व
लायनशाखिनां आपस्तंबाःषडित्याहुर्विभाषातैत्तिरीयिणइति अत्रिणालिकमेवोक्तं नवश्राद्धनिमित्तंतुएकमेकादशेह
नीति आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनीतियच्छंखोक्तमाद्यंतदपिनवममितिहेमाद्रिणाकालखंडेव्याख्यातं कात्या
यनगृह्येइदंनावमित्युक्तं तदपिनवमेवस्वार्थेऽण्करणात् एवंसतियदिगृह्येषुनवश्राद्धान्युक्तानिभवंतितदाययागृह्यंकर्त
व्यानिनोचेत्सर्वाणिपुराणाद्युक्तानिकर्तव्यानि तेषांप्रेतत्वकनिवर्तकत्वात् यथाह वृद्धवसिष्ठः अलब्धाचनवश्राद्धंप्रेतत्वा
न्नविमुच्यते अर्वाक्तुद्वादशाहस्यलब्ध्वातरतिदुष्कृतमिति वाचनिकस्तुकेषांचिद्विकल्पोयथाशिवस्वामिवचनात् एतेषांच
सर्वेषांयद्यपिनवश्राद्धानिकुर्वीतप्रेतोद्देशेनयत्नतः एकोद्दिष्टविधानेननाम्यथातुकदाचनेतिब्रह्मांडपुराणात्सपिंडनपूर्वभा
वित्वाच्चैकोद्दिष्टरूपत्वंतथापिब्राह्मणायुग्मसंख्याभवंति पंचमेनवमेचैवतथैवैकादशेहनि युग्मांस्तुभोजयेद्विप्रान्नवश्रा
द्धंतुतद्विदुरितिकूर्मपुराणात् नवश्राद्धंतुतद्विदुरित्युक्तत्वादेतद्वचनानुपातेषपियुग्मद्विजाएव शूलपाणौत्वयुग्मान्भोज
येद्विप्रांस्तन्नवश्राद्धमुच्यतेइतिपाठः एकादशाहिकत्वेकोपि अत्रिवचनात्कात्यायनोक्तचतुर्थाहनवश्राद्धेत्वन्यदपिदे
यमुक्तंबृहस्पतिना चतुर्थेहनिविप्रेभ्योदेयमन्नंहिबांधवैः गावःसुवर्णंवित्तंचप्रेतमुद्दिश्यशक्तितः यदिष्टंजीवतश्चासी
द्दद्यात्तस्यप्रयत्नतइति क्षत्रियादिस्तुपंचमादि तथाचब्रह्मपुराणे चतुर्थेब्राह्मणानांचपंचमेहनिभूभृतां नवमेवैश्यजा
तीनांशूद्राणांदशमात्परेइतिशय्यादिकत्वेकादशाहादिके तथाचबृहस्पतिः एकोद्दिष्टविधानेनयदेकस्यप्रदीयते अवाहना
ग्नौकरणरहितंदैववर्जितं वस्त्रालंकारशय्याद्यंपितुर्यद्वाहनायुधं गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्तेतदर्पयेत् भोजनंचान्न
विधंकाप्येतव्यंजनानिच यथाशक्त्याप्रदद्याच्चगोभूहेमादिकंतथेति नवशय्यापितदादेया सूतकांतद्वितीयेह्निशय्यांद
द्यात्सुलक्षणां कांचनंपुरुषंतद्वत्फलवस्त्रसमन्वितं संपूज्यद्विजदांपत्यंनानाभरणभूषणैः वृषोत्सर्गंतुकुर्वीतदेयातुक

पिलाशक्रमेतिमत्स्यपुराणात् यद्यपिचैकादशेऽह्निनवश्राद्धमपिविहितं मृतेहनितुकर्तव्यंप्रतिमासंतुवत्सरमित्यभिधाय आद्यमे
कादशेहनीति याज्ञवल्क्येनाभिधानान्मासिकानांचतन्माससंबंधिमृताहाधिकरणकानांतत्तन्मासाद्यदिनेष्वेवकर्तव्यत्वेनम
रणादिने प्राप्तस्याद्यमासिकस्यैवैकादशेहनीत्युत्कर्षस्योचितत्वादाद्यमासिकमपितत्रप्राप्तंतथापिश्राद्धेनोक्तेप्रेतवस्त्रालंका
रादिदानंयत्रविहितंतदेकादशश्राद्धंताभ्यांभिन्नमेव कूर्मपुराणे एकादशेह्निकुर्वीत प्रेतमुद्दिश्यभावतइत्यादिनासधर्मकमेका
दशाहश्राद्धं विधायैवंमृताह्निकर्तव्यंप्रतिमासंतुवत्सरमित्यनेनतद्धर्मातिदेशेनमासिकानामुत्पादनात् मत्स्यपुराणेपि ततस्त्वेका
दशाहेतुद्विजानेकादशैवतु क्षत्रादिःसूतकांतेतुभोजयेदयुजोद्विजानित्यादिनासधर्मकंतद्विधाय अनेनविधिनासर्वमनुमासंस
माचरेदितितथैवतेषामुत्पादनात् तथा एकादशाह्नियत्श्राद्धंतत्सामान्यमुदाहृतं एकादशेभ्योविप्रेभ्योदद्यादेकादशेहनीतिभ
विष्योत्तरे एकादशाहिकर्तव्यंश्राद्धंप्रेताययत्नतः श्वःकरिष्यइतिज्ञात्वाब्राह्मणानामंत्रणक्रियेतिवाराहपुराणेवात्यंताबुद्धि
स्थमासिकश्राद्धेविधीयमानमेकादशाहश्राद्धंततोभिन्नमेवभवति तस्मिंश्चैकस्यैवप्रेतस्यस्थानेएकादशब्राह्मणाइतिमुख्यः
कल्पोमत्स्यपुराणात् प्रातरुत्थायप्रेतश्राह्मणानेकादशामंत्र्यापराह्णेनानाभक्ष्यान्नरसकविन्यासैरित्यादिसत्यव्रतवचना
च्च विष्णुनातुयथाशक्तिबहवउक्ताः अथाशौचव्यपगमेप्रातःस्नप्रक्षालितपाणिपादःस्वाचांतएवंविधानेवब्राह्मणान्य
थाशक्त्युदङ्मुखान्गंधमाल्यवस्त्रालंकारादिभिःपूजितान्भोजयेदितिवाराहपुराणेतु गतोसिदिव्यलोकंत्वंकृतांतविहित
पथः मनसावायुभूतेनविप्रेत्वाहंनियोजये पूजयिष्यामिभोगेनएवंविप्रंनिमंत्रयेदिति स्नापनाभ्यंजनंदद्याद्विप्रायविधिपू
र्वकमितिब्राह्मणंशीघ्रमानयेत् आगतंचद्विजंदृष्ट्वाकर्तव्यास्वागतक्रियेति प्रावरणार्थंछत्रंतद्ब्राह्मणायप्रदीयते पश्चा
दुपानहौदद्यात्पादस्पर्शकरेशुभे संतप्तवालुकान्महिमहींकंटकितांतथा संतारयतिदुर्गाणिप्रेतेददद्उपानहौ तिलोपस्त्वा
रंकृत्वातुविप्रस्यनियतात्मवानितिचैकस्यैवब्राह्मणस्यतत्रतत्रपरामर्शादिकोप्युक्तः बहुपक्षेपिप्रेतोपभुक्तवस्त्रादिकंन
वशय्याचतन्मध्येएकस्माएवगुणवतेदेयं इतरेभ्योयथाशक्तिदक्षिणामात्रंतथाचभविष्योत्तरे एकादशेहनीत्यनंतरंभोज १३७

नंतत्रचैकस्मैब्राह्मणायमहात्मने वस्त्रालंकारशय्याद्यंपितुर्यद्वाहनादिकं गोगृहासनदासीस्त्रक्दद्यात्संपूज्यभक्तितइतिबृह
स्पतिवचनेपिश्राद्धभोक्त्रे।तदर्पयेदिति एकस्माएववस्त्रादिदानमुक्त्वाप्रदद्याद्दक्षिणांतेषांसर्वेषामनुरूपतइत्युक्तं सत्यव्रतेना
प्युक्तं तेषामेकस्मैगुणवतेशय्यादिदेयेति इदमेवचसर्वैकोद्दिष्टप्रकृतिभूतत्वादाद्यमितिमिताक्षरादिग्रंथेषुव्यवहृतंहेमाद्रिणा
पिश्राद्धखंडे यद्यपिकात्यायनयाज्ञवल्क्यादिभिःसामान्येनैकोद्दिष्टधर्माउपदिष्टास्तथापिमत्स्यपुराणवराहपुराणबौधाय
नविष्णुस्मृत्यादिष्वेकादशाहश्राद्धमेवप्रस्तुत्यादितिदेशप्राप्तेषुपार्वणधर्मेषुविशेषरूपानपूर्वांश्चानेकविधानूधर्मानुपदि
श्यपश्चान्मासिकसांवत्सरिकाद्येकोद्दिष्टेषुतेऽतिदिष्टाः अत्रचबहुषुवाक्येष्वेकादशाहग्रहणंब्राह्मणाभिप्रायकमाशौचांत
रदिनोपलक्षणं अथाशौचव्यपगमइतिविष्णुवचनात् क्षत्रादिःसूतकांतेतुभोजयेदयुजोद्विजानितिमत्स्यपुराणाच्च तेनक्ष
त्रियादिभिःस्वस्वाशौचांतेत्र्यहैकाहाशौचिमिश्चतन्मध्यएवदशाहकृत्यानुष्ठानितदंतएवैकादशाहश्राद्धंकर्तव्यमितिशूलपा
णिप्रभृतयः एवंसपिंडीकरणमपिषोडशश्राद्धेष्वेकाहिद्वादशाहेतिपक्षाश्रयणे आद्यश्राद्धोत्तरदिनेसर्वेषामिति विज्ञानेश्व
रहेमाद्रिप्रभृतयस्तुसर्वेएकादशाह्नियच्छ्राद्धंतत्सामान्यमुदाहृतं सर्वेषामेववर्णानांसूतकंतुपृथक्पृथगितिपैठीनसिवच
नादाद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनि कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरेवसइतिशंखवचनाच्च क्षत्रियादिभिरपिव
चनादाशौचसत्त्वपिमरणादेकादशाहएवाद्यश्राद्धंकर्तव्यमितिवदंति तथात्र्यहैकाहाशौचयोरपितत्रैवसर्वैः सद्यःशौचेपिदात
व्यंप्रेतस्यैकादशेहनि सएवदिवसस्तस्यश्राद्धशय्यासनादिष्विति शंखवचनात् सद्यःशौचग्रहणंस्वारसिकाशौचसंकोचोप
लक्षणं अत्रैतस्मिन्पक्षेविष्णुवचनविरोधस्तावन्नास्ति तस्यब्राह्मणाभिप्रायित्वाप्युपपत्तेः संकोचमात्रंहि तदानतुकस्यचिल्ल
क्षणा उपलक्षणत्वेनैकादशाहशब्देविधेयोसास्यात् नापिमात्स्यविरोधः ब्राह्मणएकादशाहेआद्यश्राद्धेएकादशद्विजान्भोज
येदेवक्षत्रियादिस्तुतत्रैवतत्कुर्वन्नापिनपंक्तेनान्नेनतदाब्राह्मणान्भोजयेत् किंतुतदास्यक्तेन तावद्ब्राह्मणभोजनपर्याप्तेनामेन
सूतकांतेपक्वान्नभोजयेदित्येवमर्थकेनतेनास्यैवपक्षस्यप्रसाधनात् एवंसत्येकादशाहसूतकांतरूपकालद्वयेपितंब्राह्मणक्ष

त्रियादिविषयं विधिद्वयमर्थवद्भवति अन्यथा विष्णुवचनवद्भूतकांतद्रूपकालोपेतं नैवेदं नैव विधिना सर्ववर्णसाधारणाद्यश्राद्ध
विधिसिद्धौ तदनर्थकं स्यात् अयुग्मग्रहणं च श्रोत्रियाभोजनीयास्तु नवसप्त त्रयोदशेति स्वहस्त्यत्युक्ता युग्मसंख्यां तस्याप्युपसं
ग्रहार्थं अत्रेतावच्चिंत्यं गात्रपूरकाणां पिंडानामसमाप्तौ क्षत्रियादीनामेकादशाहे कथमाद्यं श्राद्धमिति यदाहि यावदाशौचं प्रेतस्यो
दकं पिंडमेकं च दद्युरिति विष्णुवचनेन ब्राह्मणे दश पिंडाः स्युः क्षत्रिये द्वादश स्मृताः वैश्ये पंचदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिता
इति पारस्करवचनेन चोक्तः पिंडपक्षः समाश्रीयते तदापि पिंडासमाप्तिः स्पष्टैव यदापि सर्वेभ्यः प्रेतवर्णेभ्यः पिंडान्दद्याद्दशैवेति
ति पारस्करेणैवोक्तो द्वितीयः पक्ष आश्रीयते तदापि राज्ञस्तु दशमः पिंडो द्वादशेहनि दीयते वैश्यस्य पंचदशमे ज्ञेयस्तु दशम
स्तथा शूद्रस्य दशमः पिंडो मासे पूर्णेह्नि दीयत इत्यादि पुराणात् पिंडः शूद्राय दातव्यो दिनान्यष्टौ नवा वा यथा संपूर्णे तु ततो मा
से पिंडशेषं समापयेदिति प्रचेतोवचनाच्च स्वस्वाशौचोत्यदिने दशमपिंडदानस्य सर्वेषां विधानात्सास्त्येवेति एतावांश्च परिहा
रो मास्तिवचनस्यातिभार इति यदाहि याज्ञवल्क्योक्तः पिंडत्रयदानपक्षः समाश्रीयते सर्वेषामेव वर्णानां सूतके मृतके थ
वा दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीदित्यंगिरसोक्तं क्षत्रियादीनामपि दशरात्राशौचं वा इदानींतनभूयः शिष्टक्ष
त्रियशूद्राचार संवादी तदा तावत्सम्यगेव यदापि द्वादशाहाद्याशौचपक्षस्य पूर्वोक्तयोश्च पिंडदानपक्षयोः समाश्रयणं
तदापि वचनवशादेकादशाहश्राद्धं कृत्वापि पिंडसमाप्तौ न काचित्क्षतिः मिताक्षरादिमत एव शूद्रस्य मृताहावधिक द्वा
दशाहे षोडशश्राद्धपूर्वकं सपिंडीकरणं कृत्वैव यत्तु शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रियते सदा द्वितीयेन तु कर्णाक्षिनासिका
स्तु मासतः अंत्रांसभुजवक्षांसि तृतीयेन तु सर्वदा चतुर्थेन तु पिंडेन नाभिलिंगगुदानि च ऊरू जंघे तथा पादौ पंचमेन
विधीयते षष्ठेन सर्वमर्माणि सप्तमेन च नाडयः दंतलोमाद्यष्टमेन वीर्यं तु नवमेन च दशमेन तु पूर्णत्वं तृप्तत्वं तद्विपर्यय इ
ति ब्रह्मपुराणादिषु दशपिंडदानस्यावयवनिष्पादकत्वश्रवणं तदर्थवादमात्रं अत एव मिताक्षरायामिदं किमपि नोदंकितं १३८
किंच यद्येतेषां पिंडानां प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तितेत्येतदर्थवादप्रमाणकं प्रेतशरीरावयवनिष्पादकत्वं स्यात्तत

269
1942

उत्तरश्राद्धसहकारिणा तद्विनाशफलकस्याद्यश्राद्धस्य तत्पूर्वकत्वपितृत्वप्राप्तिफलकानां सपिंडीकरणांतानां वा दशमपिंडा पू
र्वं करणं विरुध्येत न तु तत्संभवति प्रेतशरीरस्य क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनंदनेति वचनात् दुःखैकभोगहेतुत्वेन तन्निष्पत्ते
र्वैधकर्मफलत्वासंभवात् अवशिष्टकर्मफलोपभोगार्थं जरायुजादिशरीरावयवारंभकत्वे तु सत्यपि न कोपि विरोधः वस्तुतस्त
दपि न संभवति शुक्रशोणिताहारपरिणामविशेषादिभिर्दृष्टैरेतच्छरीरपातावशिष्टकर्मभिश्च तदारंभोपपत्तेरेतत्पिंडदा
नानपेक्षणात् अन्यथा चंडालतिर्यगादिशरीरपातानंतरं शरीरांतरारंभो न स्यात् तत्र पिंडदानाभावात् तेनार्थवादिकमपि
नावयवनिष्पत्तिः पिंडदानस्य फलं किंतु तदकरणनिमित्तप्रेतनरकप्राप्तिपरिहारः तथा च ब्रह्मपुराणे ग्रामाद्बहिश्च कर्तव्यं
जलाशयसमीपतः पिंडदानं दशाहानि प्रेतायारण्यमाश्रितैः अरण्ये पिंडदानं तु ह्योमांतं क्रियते यदि तदा रौरवमायाति प्र
मीतः प्रथमेहनि पुन्नामसंज्ञं त्वपरे महारौरवं तृतीयके तामिस्राख्यं चतुर्थे तु प्रयात्ययस्कृदारुणं पंचमे चांधतामिस्रं षष्ठे
घोरं च सप्तमे अमेध्यभूमिसंपूर्णं सप्तमेहनि घातकं असिपत्रवनं घोरमष्टमेहनि सर्वथा महारौरवसंज्ञं तु नवमे याति मा
नवः अवीचिरिति विख्यातं दशमेहनि भीषणमिति प्रथमेहनि पिंडदानं यदि न क्रियत इत्यनुषंगः एवमग्रेपि इयं चाकरणे
निंदा नारण्यादिरूपदेशसंबंधस्य किंतु पिंडदानस्यैव तस्यैव पूर्वं नानाविशेषणविशिष्टस्य विहितत्वात् अत एव तस्यैवाकरणे
हेतुत्वेनेदं परामृश्यते तंडुलैः सक्तुभिः शाकैः फलैर्वाप्यद्भिर्यातः देशकालानुसारेण कुर्यात्प्रेतस्य तर्पणमिति तेनापिं
डदानस्याकरणनिमित्तनरकप्राप्तिरूपप्रेतानिष्टपरिहारार्थत्वात्तच्छाकं इंगुदीपिण्याकपर्यंतातिनिःसारद्रव्यविधानेन चाव
श्यकत्वावगमाद्द्वाराणशीमरणादिनिमित्तकमुक्तभावेन नरकादर्शनफलकप्रबलकर्मणा वा प्रेतगतानिष्टासंभवेपि कर्तुर
वाकरणे प्रत्यवायकल्पनया तत्परिहारार्थत्वाद्द्वादशमपिंडदानात्पूर्वमपि प्रेतत्वनिवर्तकस्यैकादशाहश्राद्धस्य सर्वैः शूद्रेण वा द्वा
दशाहे सपिंडीकरणपर्यंतानामपि करणे न कश्चिद्विरोध इति यद्यपि पिंडदानस्यापि स्वगोत्रा वान्यगोत्रा वा स्त्रियो वा पुरुषास्तथा
प्रेतास्तु पिंडसंबंधान्मुच्यंते तेन कर्मणा वायुभूतास्तु तिष्ठंतः कालक्षेपेण सर्वदेत्यादित्यपुराणात् प्रेतत्वावस्थानिवृत्तिरेव फलं

का०त०
१३९

अतएवफलप्रतिपादकत्वेनेदमेववाक्यमवतारितंहेमाद्रिणा तथात्वे तदकरणेनरकप्राप्तिः करणाच्चनरकाप्राप्तिरपिपूर्ववचनो
क्तासंगच्छेत अधर्मारब्धंहिप्रेतशरीरंदुःखैकभोगहेतुस्तन्निवर्तकाभावेदुःखभोगार्थेतांस्तान्नरकाननुगच्छतिपिंडदानेनचतदारं
भकाधर्मनाशद्वारातच्छरीरनिवृत्तौतदप्राप्तिरिति तथात्वेपिवचनोक्तश्राद्धैःसहाविकल्पःकिंतुसमुच्चयएव अदृष्टार्थत्वात् क्र
मविधानाच्च भाष्यकारमते आधानपवमानहविर्वत् एवंचकृतेपिपूर्वमेवाद्यश्राद्धेसपिंडनपर्यंतेचप्रेतत्वनिवृत्तिर्दशमपिं
डोत्तरमेवभविष्यतिपौर्वापर्यमात्रेविपरीत्यं प्रेतशरीरावयवपूरकत्वाभिधानंत्वर्थवादमात्रमप्यस्मिन्नेवपक्षेसावलंबनं पूर्ण
स्यज्ञानवतोविनाशनेह्युत्कर्षातिशयइति आधानेति आधानप्रकरणेपवमानहवींषिविहितानि तान्याधानाद्विप्रकृष्यंते
द्वादशयंस्कृ रात्रिष्वनुनिर्वापादित्यादिभिः तत्राग्निहोत्रादीनिकिमाधानानंतरमेवप्रवर्तंतेउततेषुकृतेष्वितिविचारेप्रवर्तंते
तावतस्यसंस्कारमात्रंक्रियतइतिप्राप्तेब्रूमः ननिरपेक्षमाधानंआहवनीयाद्युत्पादकंपवमानेष्टेरपितदुत्पादकत्वात् नचवि
कल्पः तस्याप्रधानोत्तरकालविधानात् अतःसमुच्चितायाएवतदुत्पादकत्वान्नततःपूर्वमाहवनीयाद्यतिनिर्वृत्तिः यदाप्या
धानांगंपवमानेष्टिस्तदाप्यनंगेनप्रधानेनसाध्यनिष्पत्तेस्तदुत्तरकालमेवाग्निनिष्पत्तिः यच्चोक्तंउत्पन्नस्यसंस्कारमात्रमि
तितथापितस्याहवनीयकार्योपयोगात्तेनविनातदनिष्पत्तेस्तदुत्तरकालेवकर्मणांनिष्पत्तिरित्याशयइतिपूर्णज्ञानवच्चपह
त्वाविनश्यतइति तथाच शिरस्त्वाद्येनपिंडेनप्रेतस्यक्रियतेतदेत्युपक्रम्यदशमेनतुपूर्णत्वंक्षुद्विपर्ययइत्युक्तंदशाहेप्रेत
पिंडनज्ञानंप्रेतेषुजायतइतिच एवंचयथाअर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत् प्रेतत्वमिहतस्यापिज्ञेयंसंवत्सरं
नृपेत्यग्निपुराणात् कृतेसपिंडीकरणेनरःसंवत्सरात्परं प्रेतदेहंपरित्यज्य भोगदेहंप्रपद्यतइतिविष्णुधर्मोत्तराच्च शस्त्रा
दिनाव्यतिरिक्तेननिमित्तेनषोडशश्राद्धसपिंडनापकर्षेपिवत्सरांतोपिप्रेतदेहनिवृत्तावपेक्ष्यते तथात्रैकादशाहादा
वाद्यश्राद्धादिकरणेपि आशौचांत्यदिनेक्रियमाणंदशमपिंडदानमपीति तदंतएवसमस्तनिवर्तकसंपत्त्याप्रेतदेहनिवृत्ति
रुपपन्नेति ममतुप्रतिभाति दुःखैकभोगहेतुनाउत्सर्गतोयावदेकसंवत्सरस्थायिनावायवीयेनप्रेतदेहेनभोग्यंयदुःखं १३९

271
194

तद्भोगैकनाशोनियमेनतद्देहारंभकोमनुष्यशरीरारंभकाधर्मविशेषः पितृत्वप्राप्तिप्रतिबंधकः सर्वमनुष्याणामस्तियेश्च
तुर्थाश्रमःशूद्रकागारकयुक्ताचचतुर्भिर्जायतेयदा श्रद्धयाश्राद्धकृद्भिर्नप्रेतोजायतेमृतइतिपद्मपुराणादिविहितंकर्म
वानकृतंततश्चप्रेतशरीरारंभंविनातदेकसाध्यदुःखभोगासंभवात्तंचविनातदेकनाश्याधर्मनाशासंभवात्तदारंभोपेक्षि
तएवाधर्मनाशोपकारहेतुत्वादितिवेधस्यापिपिंडदानस्यदुःखैकभोगहेतोरपिप्रेतदेहस्यावयवद्वारारंभःफलंसंभवत्ये
व अतएवदुःखहेतोरपिउपवासादिरूपस्यतपसःफलनाश्यकर्मफलालाभप्रतिबंधकाधर्मनाशोपकारेणकर्मांगत्वमु
क्तंतपश्चफलसिद्धित्वाल्लोकवदित्यत्र अतएवचैकादशाहादिश्राद्धानामेवपूर्णप्रेतशरीरनिवृत्तिःफलत्वेनावगम्यते
यस्यैतानिनदत्तानिप्रेतश्राद्धानिषोडश पिशाचत्वंस्थिरंतस्यदत्तैःश्राद्धशतैरपीतियमवचनादेकादशादिभिःश्राद्धैर्मृ
तस्याप्यायनंभवेत् सम्यक्संवत्सरंपूर्णंपितृणांस्थानमृच्छतीतिदेवलवचनाच्च आप्यायनंतुष्टिःप्रेतत्वपरिहारइतिशू
लपाणिनाव्याख्यातं यत्तुस्वगोत्रावान्यगोत्रावेतिवचनंतच्चिरकालमृतास्कृतौर्ध्वदैहिककेवलदुरितप्राप्तप्रेतदेहवि
षयं अतएवकालपेक्षेणतिष्ठतइतितत्रोक्तं यत्तुत्रिरात्रंदशरात्रंवाप्रेतोद्देशेनोदकंक्षीरंचस्नानपानार्थंदीयतेतत्रासौ
तदानीमेवस्नानेपानेवाविनियुक्तेतस्यप्रत्यक्षतोनाशदर्शनात् किंतुदानजनितापूर्वेणतस्यस्नानपानयोग्यदेहलाभो
त्तरंतत्सजातीयंनीरक्षीरांतरमुपतिष्ठतीतिनकोपिविरोधः यदप्यन्यज्ञातीनांसहभोजनादिप्रेताप्यायकत्वेनदशाहम
ध्यगतंश्रूयतेतस्याप्येषैवगतिः यथावागर्भिण्योपयुक्तंदोहदान्नपानादिअपूर्णस्यैवगर्भस्याप्यायकंतथेदमपिक्षीरो
दकदानाद्यपूर्वद्वारेणप्रेतदेहपुष्टिकरंभविष्यति तेनगात्रपूरकसमाख्यातैरधिकारिभिर्मरणानंतरमेवदत्तैःपिंडैःक्षि
प्रमक्लेशेनप्रेतभावयोग्यानांप्रेतशरीरंजायते तदभावेतुविलंबेनक्लेशेनचगर्भशरीरवदेव कीकटादिदेशविशेषस्थ
तिकाद्यवस्थाविशेषमरणेनदुर्मरणावेधबुद्धिपूर्वमरणादिनावाक्षिप्रमप्यतिमूढंजडवृक्षादिवत् पिंडदानदेवतात्वेप्य
नधिकृतंतत्रप्रायश्चित्तविशेषादिनातदधिकारंसंपादितेमोहापनयनेनतत्तदवयवगतज्ञानविशेषसंपादनेनज्ञान

वत् दुःखानुभवयोग्यंतच्छरीरपिंडैर्माशौचदानेनक्रियते इत्याद्यलमतिद्दूरंगत्वा तेनप्रेतशरीरसंपादकत्वेन काप्यनुपपत्तिरि
तितदेवप्रयोजनंयावत्संभवमाशौचपिंडानां अतएवापितृव्याणांतत्तदवयवनिष्पत्त्यर्थत्वेलिखेनैवप्रथमादिदशमांत
पिंडदानप्रयोगलिखनं तेनदशमपिंडदानात्पूर्वंप्रेतदेहस्यैवानिष्पन्नत्वात् यथाज्योतिष्टोमेव्यहंनाश्नातित्र्यहंनाश्नाती
त्यादिनोक्तंतयोरध्वर्योर्यजमानस्यवेतिसंशयोध्वर्योर्युक्तं तस्यदुःखात्मकत्वेनपरिक्रीतपुरुषैःकर्तुमुचितत्वात् अन्
तवदनवत्फलभोक्तृसंस्कारत्वाभावाद्यजमानस्यनयुक्तमितिचेत् मैवं भाविस्वर्गस्वरूपफलप्रतिबंधकपापनिवर्त्तकत्वे
नदुःखरूपअशनेनतपसःफलिसंस्कारकत्वसंभवाद्वपनादिवदितिसंक्षेपः तन्निवृत्त्यर्थानामेकादशाहादिश्राद्धानांत
त्रकरणमनुचितमेवेत्येकादशाहग्रहणमाशौचांत्यादिनोत्तरदिनोपलक्षणमेवयुक्तं विष्णुवचनैकवाक्यतया पैठीनसि
वचनंतुआशौचोत्तरदिनभूतेएकादशेह्निबहुषुवचनेषूत्पन्नंयच्छ्राद्धंतत्तस्मादेवहेतोर्नब्राह्मणमात्रविषयंमंतव्यंकिं
तुसर्ववर्णविषयंश्राद्धस्वरूपवत्कालोपिकिंतथानेत्याहस्तत्कंतुपृथक्पृथगितिहेतोस्तत्तदुत्तरादिनेकर्तव्यमितिव्याख्ये
यं शंखवचनंतुशूलपाण्यादिभिरेवलिखितं ततःश्राद्धमशुद्धोतुकुर्यादेकादशेतथा कर्तुस्तात्कालिकीशुद्धिरशुद्धः
पुनरेवसइति अशुद्धोप्रथमादिदिनेषुएकादशेचैकोद्दिष्टश्राद्धंकुर्यात् नत्वशुद्धोकथंश्राद्धंकर्तव्यमतआह श्राद्धकर्तु
स्तात्कालिकीशुद्धिःकर्मांतरेपुनःसोशुद्धएवेतिचव्याख्यातं अशुद्धाविप्रेवोक्ते ब्राह्मणस्यैकादशेनप्राप्नोतीतिपृ
थगेकादशग्रहणं तस्मात्सर्वैकोद्दिष्टप्रकृतिभूतमाद्यसंज्ञकमेकादशाहश्राद्धमन्यदपिचैकादशाहकृत्यं स्वस्वाशौचो
त्तरदिनएवसर्वैराशौचांत्यदिनेदशमपिंडदानानंतरंकर्तव्यमित्युचितं एकादशाहग्रहणंचतस्यैवोपलक्षणं तदपिसं
पूर्णपर्यायद्वादशाहादिरूपजात्याशौचोत्तरदिनस्यैवतेषामेवावांतरसाजात्येन द्राक्बुद्धिस्थत्वात् अतएवोद्गातृप्रा
तिपदिकेनबहुवचनान्वयार्थंलक्ष्यमाणा अन्येनसर्वर्त्विजोनामपिसर्वेसामगाःकिंत्वपस्तुब्रह्मण्यास्त्रयएवस्तोत्र
कारिणइत्युक्तंतृतीये दशमेह्निपतद्यस्याहद्वियात्मविशुद्ध्यतीत्यत्रचसंपूर्णाशौचांत्यदिनोपलक्षणमेवोक्तंआशौ १४०

वग्रंथेषु तेनउद्गात्रमंत्रेउद्गातॄणांचमसइतिश्रूयते तत्रोद्गातृचमसमेकंउद्गाताभक्षयेत् उद्गीथशब्दाभिधेयायाःसामभक्तेर्गा
तारिउद्गातृप्रातिपदिकस्यरूढत्वादित्येकःपूर्वपक्षः उद्गातॄणामितिबहुत्वस्यैकस्मिन्नन्वयात्तदुपलक्षिताःसर्वेपिभक्षयेयुरिति
द्वितीयः उद्गीथप्रस्तोतृप्रतिहर्तृन्सामभागानुद्गातृप्रस्तोतृप्रतिहर्तारःप्रयोगकालेगायंतिउतउत्कर्षेणगायंतीतियोगेनोद्गा
तारःस्त्रयोभक्षयेयुरितितृतीयः रूढिर्योगमपहरतीतिन्यायादेकएवोद्गाता तेनचबहुवचनोपपत्तयेप्रत्यासन्नाउपलक्ष्ये
तेप्रत्यासत्तिःप्रस्तोतृप्रतिहर्त्रोरिवसुब्रह्मण्यस्याप्यस्ति सामवेदाध्यायित्वेन सुब्रह्मण्याह्वानरूपकर्मण्योद्गातृसमाख्या
याःसत्वादितिचतुर्थःइतिप्राप्तेब्रूमः सदसोभक्षणस्यान्यत्वात्सुब्रह्मण्यस्यतदप्रवेशात्तेनरहिताःअवशिष्टाःसामगाभ
क्षयेयुरितिसंक्षेपः तेनत्र्यहैकाहाशौचयोस्तन्मध्येदशपिंडदानानुष्ठानेपिएकादश्याहिकृत्यमेकादशाहेएवभवति तथा
चसद्यःशौचेपीतिशंखवचनंपूर्वमुदाहृतं अतएवचक्वचित्तद्बाधार्थंतृतीयेतूदकंकृत्वाचतुर्थेश्राद्धमाचरेदित्युक्तं
द्वादशाहाशौचकारिणांक्षत्रियाणांमासाशौचकारिणांशूद्राणांत्वाचारोप्येवमेवयदाशौचांत्यादिनांतरादिनेआद्यश्रा
द्धादितदुत्तरादिनेचसपिंडीकरणमिति प्रायस्त्विदानींक्षत्रियैःशूद्रैश्चदशाहाशौचपक्षएवानुष्ठीयतइतितेषामेकाद
शाहद्वादशाहयोराद्यादिश्राद्धानुष्ठानमस्मिन्नपिपक्षेनाविरुध्यतेशूद्राणांद्वादशाहएवसपिंडीकरणविधायकंविष्णुवच
नंतुनमरणावधिकद्वादशाहपरमित्यनुपदमेववक्ष्यते एवंनवश्राद्धरूपाण्येकोद्दिष्टानिदर्शितानि इदानींनवमिश्राणि
प्रदर्श्यंतेयानिषोडशश्राद्धानीत्येवंप्रसिद्धानि तान्यप्यनेकविधानिस्मर्यंते तत्रब्रह्मपुराणेतावत् नृणांतुत्यक्तदेहानां
श्राद्धाःषोडशसंख्यया चतुर्थेपंचमेचैवनवमेकादशेतथा तथाद्वादशभिर्मासैःश्राद्धाद्वादशसंख्यया कर्तव्याःशु
चिभिस्तेषांतत्रविप्रांस्तुभोजयेदिति भविष्यत्पुराणेपि अस्थिसंचयनेश्राद्धंत्रिपक्षेमासिकान्वि रिक्तयोश्चतथाति
थ्योःप्रेतश्राद्धानिषोडशेतिरिक्तयोस्तिथ्योरेकयातिथ्यान्यूनेषष्ठेद्वादशेचमासिछंदोगपरिशिष्टेद्वादशाहप्रतिमा
स्यानिआद्यषाण्मासिकेतथा सपिंडीकरणंचैवद्वत्येतच्छ्राद्धषोडशमिति आद्यमेकादशाहिकं षाण्मासिकेतुनषा

273
194

का०त०
१४१

ण्मासिके एकं पूर्वषट्कांतर्गते षष्ठमासे अपरमुत्तरषट्कांतर्गतेतत्र कियत्तिथिन्यूनयोस्तयोस्तेष्वपेक्षायांतत्रैकाहेनतु
षण्मासायदास्युरपिवात्रिभिः न्यूनाः संवत्सरश्चैवस्यातांषाण्मासिकेतदेति अत्रैकाहन्यूनपक्षेपंचम्यांमृतस्यततीया
यांत्र्यहन्यूनपक्षिप्रतिपद्यून षाण्मासिकद्वयमितिकेचित् मासोद्यत्रद्यमृताहंगृहीत्वोत्तरमृताहपूर्वतिथिपर्यंतत्रिंशत्ति
थिसमुदायात्मकचांद्रस्तथैवलोकप्रसिद्धः तस्यचैकाहन्यूनताउपांत्यतिथावेव अंत्यायांपूर्तेः एवंत्र्यहन्यूनतापि अंत्य
पूर्वचतुर्थद्रर्वते तदयुक्तंषाण्मासिकाब्दिकश्राद्धस्यातांपूर्वेद्युरेव तदिति हेमाद्रिमाधवाद्युदाहृतपैठीनसिवचनविरो
धात् अत्रहिषाण्मासिकाब्दिकशब्दावूनतत्परौ पूर्वद्युःशब्दश्च मृताहपूर्वतिथिपरः मासिकानिस्वकीयेतुदिवसेद्वाद
शेपिवत्युत्तरत्राभिधानात् एतत्संरक्षणार्थमेवद्वितीयादिमृताहेषुक्रियमाणानांप्रथमादिमासिकत्वंचतत्तन्मासाधि
करणकत्वाबाधेनसिध्यत्विस्यितदर्थंशूलपाण्यादयः पूर्वमृततिथ्यवधिकोत्तरमृततिथिपर्यंतत्रिंशत्तिथिसमुदाया
त्मकंमासमत्रवदंति तत्तुतेषामेवाभिप्रेतमेताद्दशमेवषष्ठ्यधिकशतत्रयतिथ्यात्मकंसंवत्सरंद्रूषयद्भिरस्माभिरुत्त
रमृततिथेरुत्तरमासवर्षादित्वस्यैव सकललोकप्रसिद्धिविषयत्वात्तद्विरोधेनसांवत्सरिकप्रकरणएवद्रूषितं तेना
द्यमृततिथिंगृहीत्वैवत्रिंशत्तिथ्यात्मकोमासः प्रथमादिः तत्रप्रथमादिमासिकानिमासेभवंमासिकमितिव्युत्पत्त्या
प्रथमादिमासाद्यमृततिथिषुवाभवंतुमासेतीतेभवंमासिकमितिव्युत्पत्त्यावाद्यद्वितीयादिमासाद्यमृततिथिषुतेषां
मृताहाधिकरणत्वात् ऊनानितुतत्तन्मासांत्यतिथावेव उत्तरमासाद्यमृताहात्पूर्वेद्युरेकाहन्यूनतापक्षेतदानीमेवतथा
त्वात् अंत्यतिथ्यंत्यक्षणेहिमासपूर्तिर्निमंत्रणरूपश्राद्धारंभकालेतत्प्रयोगकालेचैकाहन्यूनतेव उपांत्यतिथौतुतत्का
लव्यहःश्रूनता तेनयदेकतिथ्यभावप्रयुक्तामासस्यैकाहन्यूनता तस्यांतिथावित्यैकाहन्यूनइत्यस्यार्थः यत्तियित्रया
भावप्रयुक्तात्र्यहन्यूनतातन्मध्येप्रथमतिथावितित्रिभिर्न्यूनइत्यस्य हेमाद्रिपरिशिष्टवचनद्वयंजातूकर्ण्यवचनत्वेन
पठितं कालादर्शमदनरत्नादिषुजातूकर्ण्यवचनंपठितं द्वादशप्रतिमास्यानि आद्यषाण्मासिकेतथा त्रैपक्षिका १४१

275
194

ब्दिकेचेतिश्राद्धान्यवानिषोडशैत्यैतावदेव अत्राद्यषाण्मासिकाब्दिकशब्दाऊनमासिकोनषाण्मासिकोनाब्दिकपराः द्वादशानाम
पिमासिकानांपृथग्ग्रहणादितिचव्याख्यातं तत्रत्रैपक्षिकंसूतकांतेगृहेश्राद्धमेकोद्दिष्टंप्रचक्षते द्वादशेहनिमासेचत्रिपक्षेच
ततःपरमितिब्रह्मपुराणात्त्रैपक्षिकंमेवदूत्तेत्रिपक्षेतदनंतरमितिभविष्यपुराणाच्चावगम्यतेत्रिपक्षइत्यधिकरणसप्तम्य
नुरोध्याद्वत्तेप्रवृत्तइतिकेश्चित्व्याख्यातं केश्चिदेतदनुरोधेनात्रिवातीतइतिशेषःकृतः तद्भोजनेप्रायश्चित्तविधादाना
दपित्रैपक्षिकंश्राद्धंगम्यतेतथाचशंखः चांद्रायणंनवश्राद्धेपराकोमासिकेस्मृतः पक्षत्रयेतिकृच्छ्रःस्यात्षाण्मासेकृच्छ्रए
वहि आब्दिकेपादकृच्छ्रःस्यादेकाहःपुनराब्दिकइति आब्दिकेन्यूनाब्दिके ऊनाब्दिमासिकंत्र्यहत्रिभागोनपक्षोचत्रिष्वपि
मासेषुश्लोकेगौतमगालववचनयोः कालादर्शात्कदाहृतयोरवगम्यतेएकद्वित्रिदिनैरूनैस्त्रिभागेनोनएववा श्राद्धान्यूना
ब्दिकादीनिकुर्यादित्याहगौतमइति त्रिभिर्वादिवसैरूनेद्वाभ्यामेकेनवातथा आद्यादिषुचमासेषुकुर्यादूनाब्दिकादि
कमिति ऊनेऊनत्वे आदिशब्दाभ्यांषष्ठद्वादशमासयोरूनषाण्मासिकोनाद्यमासिकयोश्चग्रहणं ऊनाद्यमासिकस्यद्वा
दशाहेपिकालः उक्तोगोभिलेनमरणाद्द्वादशाहेस्यान्मास्यूनेचोनमासिकमिति इदमेवचोनमासिकंद्वादशाहपक्षमाश्रि
त्यद्वादशेहनिमासेचेतिब्रह्मपुराणवचनेएकादशाहश्राद्धमभिधायद्वितीयेह्निपुनस्तदेकोद्दिष्टंसमाचरेदितिमत्स्यपु
राणवचनेचविहितंद्रष्टव्यं द्वादशमासिकानांच मृतेहनिकर्तव्यंप्रतिमासंतुवत्सरमितिवचनान्मृततिथ्यधिकरणकानां
मासेतीतेभवमितिव्युत्पत्त्यामासेभवमितिव्युत्पत्त्यैवाद्यमृताहावधिकोत्तरमृततिथिपर्यंतमासाश्रयणेनवाद्वितीयप्रभृ
तितत्तन्मासीयमृततिथ्यधिकरणकत्वात्प्रथममाससंबंधिसर्वाद्यमृततितिथौमासिकंप्राप्नोत्येवनयथावत्सरांतेमृता
हनीत्युत्पन्नंवार्षिकश्राद्धं किंत्वाद्यमासिकंद्वितीयमृततिथौद्वितीयंतृतीयमृततिथावित्यादिक्रमेणद्वादशमासिकंप्र
थमाब्दिकतिथौ आद्यश्राद्धंत्वेकादशाह्निक्रियमाणंमासिकाद्भिन्नमेवेतिप्राच्यग्रंथेषुस्पष्टमेवोक्तं मिताक्षरादिष्व
पिविशेषानभिधानान्मासिकेषुआद्यशब्दस्यचान्यथाव्याख्यानादिवमेवप्रतीयते परमार्थतस्तुलोकप्रसिध्यनुगु

का०त० णमृतितिथिंगृहीत्वैवत्रिंशत्तिथ्यात्मकश्चांद्रोमासोमान तस्या अवधित्वमात्रं उत्तरमृततिथिमासमघटिकेतिमासेभवंमासिक
१४२ मित्येवचमासिकाद्यमासिकादिशब्दव्युत्पत्तिः समुदायांतर्गतयत्किंतत्तिथ्यधिकरणाकत्वेपिचमासिकत्वंभवत्येवज्योतिष्टो
मस्येववसंतकालत्वंश्राद्धस्येवापरपक्षिकत्वं तत्रप्रथमातिक्रमेकारणाभावान्मृताहनितुयत्कर्तव्यमित्यादिवचनाच्च
तत्तन्मासाद्यमृतायांमृततिथाविवाद्यादिमासिकानिकर्तव्यानितेनसर्वाद्यमृततिथावेवाद्यंनवश्राद्धवत्कर्तव्यत्वेनप्रा
प्तंप्रथममासिकमेकादशआशौचोत्तरदिनेचोत्कृष्यते याज्ञवल्क्यवचनेआद्यमेकादशेहनीति युक्तंचैतन्मासिका
नांपूर्वविहितत्वात् यद्यपिचसांवत्सरिकमप्येतत्पूर्वविहितंप्रतिसंवत्सरंचैवमितिसंवत्सरोपिमासवत्पूर्वमृततितिथिमे
वगृहीत्वातथापितस्यवचनांतरेषुसंवत्सरांतएवोत्पन्नस्यसर्वाद्यमृततिथौप्राप्तिरेवनास्तीतितदुत्कर्षपरत्वेनाप्याद्यमे
कादशेहनीत्यस्यव्याख्यानमयुक्तमित्युक्तंसांवत्सरिकप्रकरणे एवंचप्रथममासिकोनमासिकद्वितीयमासिकत्रैप
क्षिकतृतीयमासिकचतुर्थपंचमषाण्मासिकसप्तमाष्टमनवमदशमैकादशमासिकोनाब्दिकानिषोडशश्राद्धानिक्र
मेणदद्यादितिहेमाद्र्युदाहृतस्मृत्युबोधितःश्राद्धक्रमोप्युपपद्यते अन्यथोनानांतत्तन्मासिकोत्तरत्वंत्रैपक्षिकस्यचद्विती
योत्तरत्वंनस्यात् यत्तुततोद्वादशभिर्मासैःश्राद्धाद्वादशसंख्ययेतिवचनान्मासांतभवत्वंमासिकानांप्रतीयतेप्रथमस्या
प्येकादशाहिकोत्तरत्वप्रतीयते तदप्यापाततः मदनरत्नादिषुतावत्तथाद्वादशभिर्मासैरित्येवपाठोलिखितः पूर्व
पाठेप्येकादशानांतदुत्तरत्वात् सम्नातदुपपत्तिः विश्वादर्शेप्याद्यमृततिथिकालीनत्वमेवमासिकानामाद्यंत्वेका
दशइतिस्पष्टमुक्तंमासेपूर्णे यदेकादशसुमृतदिनेष्वाद्यमेकादशाहेन्यूनाब्देयत्तदर्धेयदपितदपरंद्वादशाहेत्रिपक्ष
इति कालादर्शस्मृत्यर्थसारादिष्वप्येवमेव अतएवचषोडशश्राद्धपक्षेषुबहुपूक्तेष्वप्ययमेवपक्षोबहुभियुक्ताहत
त्वात्संप्रतिशिष्टैराद्रियते युक्तश्चायंतथाहिपारिशिष्टोक्तसपिंडीकरणांतभावेनषोडशश्राद्धपक्षश्राद्धानिषोडशा
पाद्यविदधीतसपिंडतामितिवचनेनशूलपाण्यादिभिरपिलिखितेनाविरुद्धः ब्रह्मपुराणभविष्यपुराणोक्तपक्षाव १४२

273
194

पिनवश्राद्धादिश्राद्धानिकृतानितुयस्यवै नाधिकारीभवेत्तत्रमासषाण्मासिकाब्दिकइतिवचनात्षोडशश्राद्धाधिकारसिद्ध्यर्थानांनवश्रा
द्धानामप्रसिंचयनांगश्राद्धस्यचषोडशश्राद्धांतर्भावस्यासमंजसत्वादसमंजसौ यत्तुप्रलब्धवातुनवश्राद्धंप्रेतत्वान्नविमुच्यतइतिप्रेत
त्वनिवर्तकत्वंश्राद्धवसिष्ठेननवश्राद्धानामुक्तंतदपिसाक्षात्प्रेतत्वनिवर्तकषोडशश्राद्धाधिकारसंपादनद्वारकमेव अतएवव्याघ्रपात्
देयानिवेश्मशुध्यर्थंनवश्राद्धानियत्नतः ततःप्रेतविशुध्यर्थंमृताहनितुवत्सरमिति मृताहनीतिमासिकग्रहणंषोडशानामप्युपलक्ष
णं वेश्मशुध्यर्थताचनागरखंडोक्तनवसंख्यश्राद्धपक्षेलिंगसमवायेन तत्रमृत्युस्थानेश्राद्धविधानात् एवंसत्येकादशाहेश्रा
द्धत्रयंनवश्राद्धमाद्यमासिकंमहैकोद्दिष्टंचेति तत्रमहैकोद्दिष्टंब्राह्मणालाभेअग्नौकर्तव्यंतत्करणप्रकारश्चतथाएकैकरुद्ररूप
प्रेतोद्देश्यकान्येकादशमिलितैकादशरूपप्रेतोद्देश्यकान्येकादशमिलितैकादशरुद्ररूपप्रेतोद्देश्यकमेकंवातथाएकैकवसुरूपप्रेतो
द्देशकान्यष्टौ मिलिताष्टवसुरूपप्रेतोद्देश्यकमेकंवैकोद्दिष्टमित्याधुनातनग्रंथेषुदृश्यमानमपिप्रामाणिकमूलादर्शनादुपेक्षितं
इत्युक्तानिषोडशश्राद्धानि तन्मध्येत्रैपक्षिकपर्यंतान्याहिताग्नेर्दाहदिनादारभ्यैकादशाहादिषुभवंति अनाहिताग्नेस्त्वेकाग्नेर्नि
रग्नेर्वामरणदिनादारभ्यतदूर्ध्वानिस्मृतयोरपिमरणदिनादेव तथाचछंदोगपरिशिष्टे श्राद्धमग्निमतःकार्यंदाहादेकादशेहनि
ध्रुवाणितुप्रकुर्वीतप्रमीताहनिसर्वदेति अग्निमतइतिबह्वग्निकएवगृह्यते मरणादेवकर्तव्यंसंयोगोयस्यनाग्निभिः दाहादौर्ध्व
मशौचंस्याद्यस्यवैतानिकोविधिरितिशंखवचनैकवाक्यत्वात् अतएवैकादशाहग्रहणंनवश्राद्धादीनामप्युपलक्षणं ध्रुवपदेन
चत्रैपक्षिकाद्यूर्ध्वानिगृह्यंते ऊर्ध्वंत्रिपक्षाद्यच्छ्राद्धंमृताहान्येवतद्भवेत् अधस्तात्कार्यदाहादाहिताग्नेर्द्विजन्मनइतिजातूकर्ण्य
वचनात् एतानिचषोडशश्राद्धानिस्वस्वकालेकर्तव्यानीतिमुख्यःकल्पः अनुकल्पमाहमरीचिः मुख्यंश्राद्धंमासिमासिअप
र्याप्तावृतुंप्रति द्वादशाहेनवाकुर्यादेकाहेद्वदशाथवेति अपर्याप्तौप्रतिमासंश्राद्धकरणासामर्थ्येऋतुमुख्यस्यचांद्रस्यसौरस्यवा
सतोरत्रासंभवात्पूर्वमृततिथिमारभ्येतरमृततिथ्यवधिकत्रिंशत्तिथिसमुदायात्मकमासद्वयंप्रतिएकैकंमृताहमतिक्रम्यतदु
त्तरमृताहेप्रतिक्रांतप्राप्तकालंचश्राद्धद्वयंकर्तव्यं क्वचित्त्रयमपि तत्रैकादशाहेआद्यंनिर्वर्त्यऊनमासिकंचस्वकालेद्वितीय

का०त० मासिकंत्रैपक्षिकंचसहतृतीयमासिकेनचतुर्थंसहपंचमेन षष्ठेउनषाण्मासिकंचसप्तमेनअष्टमंनवमेनदशमंएकादशेन द्वादशंऊनाब्दिके
१४२ नसहतत्कालइतिक्रमपूर्वमप्युक्तंनवमिश्रंतुषट्कद्वनिति आशौचोत्तरदिनमारभ्यानवच्छेदेनद्वादशभिर्दिनैरप्रवृत्तानिवाषोडशकर्तव्या
नि अपवर्गेत्ततीयेतिस्मरणात्. तत्राप्येकादशाहे आद्यंततदुत्तरदिनेउनाद्यंद्वितीयेचततत्तदुत्तरदिनेत्रैपक्षिकंतृतीयंचतत्तदुत्तरदिने
षुचतुर्थपंचमषष्ठानि तदुत्तरदिनेउनषाण्मासिकंसप्तमंचतदुत्तरदिनेष्वष्टनवमदशमैकादशानितदुत्तरदिनेद्वादशमूनाब्दिकंचेतिद्वा
दशभिर्दिनैः षोडशश्राद्धानिनिर्वर्त्यतदुत्तरदिनेसपिंडीकरणंकार्यं अथवाएकस्मिन्नेवाह्नि द्वादशेएकादशएववाद्वादशापि मध्य
वर्तीन्यूनमासिकादीनिअपिद्वादशग्रहणेनैवगृह्यंते द्वादशग्रहणंचैकादशाहद्रूपैकाहा भिप्रायेणद्वादशाहद्रूपेतस्मिन्नाद्य
न्यूनान्येकादशेवतस्येकादशाहेकृतवान् एवंचद्विपूर्वदिनादौयदासपिंडीकरणार्थंक्रियंतेतदायावंतिस्वकालकृतावशिष्टानि
तावंत्येवद्रष्टव्यानि इदंपक्षद्वयंसपिंडीकरणापकर्षनिमित्तंतच्चाग्रेविवक्ष्यते तदभावेतुप्रतिमासंप्रत्यृतुवा तथैकादशा
हादारभ्यवत्सरपर्यंतंप्रतिदिनमेकस्मैब्राह्मणायभोजनपर्याप्तान्नसहितउदकुंभोदेयः तथाचपद्मपुराणे उदकुंभश्चदातव्यो
भक्ष्यभोज्यसमन्वितः यावद्वर्षंनरश्रेष्ठसतिलोदकपूर्वकमिति हेमाद्रिकृदाहृतस्मृतिसमुच्चयेपि एकादशाहात्प्रभृतिघटस्तो
यान्नसंयुक्तः दिनेदिनेप्रदातव्यो यावत्स्याद्वत्सरः स्मृतेरिति अत्रपिंडदानमपिपाक्षिकमुक्तंपारस्करेण अहरहरन्नमस्मैब्रा
ह्मणायोदकुंभंचदद्यात्पिंडमप्येकेनिपृणंतीति अस्मैप्रेताय प्रेतोद्देशेनेत्यर्थः हारीतेनापि मृतेपितरिवैपुत्रः पिंडमेध्यस
मापयेत् अन्नंकुंभंचविप्रायप्रेतनिर्देशधर्मतइति प्रेतनिर्देशधर्मतइति प्रेतशब्देनप्रेतोद्देशरूपेणधर्मेणेत्यर्थः एतच्चवर्षां
तसपिंडीकरणपक्षे अतएववचनं प्रेतलोकेतुवसतिर्नृणांवर्षंप्रकीर्तिता क्षुत्तृष्णाः प्रत्यहंतत्रयतोहिभृगुनंदन तदर्थं
मिहदातव्यंजलान्नमभिवत्सरमिति यदाद्वादशाहादौसपिंडीकरणंकृतं तदाअस्मादत्येकवचनस्यविवक्षितत्वादेकस्यैवोद्दे
शोपिनात्रप्रेतशब्देनोद्देशः अनुमासिकवत् सपिंडीकरणापकर्षेपिचषोडशश्राद्धापकर्षवन्नास्यापकर्षः श्राद्धानिषोडशाद
त्वानतुकुर्यात्सपिंडतामितिवचनाभावात् प्रत्युतानपकर्षमेवाहयाज्ञवल्क्यः अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत् १४३

279
1942

तस्याप्यन्नंसोदकुंभंदद्यात्संवत्सरंद्विजइति एतद्वादशादिवसपिंडनोत्तरंपूर्वप्रयोजनासंभवेपिप्रयोजनांतरंकल्प्यं गोभिलीयश्रा
द्धकल्पभाष्येत्वपकर्षकंस्कंदपुराणवचनंलिखितं अन्नंचैवस्वशक्त्यातुसंख्यांकृत्वाब्दिकस्यतु दातव्यंब्राह्मणेभ्यस्तुयद्वात
न्निष्क्रयंचयत् अपिश्राद्धशतैर्दत्तैरुदकुंभंविनानराः दरिद्राद्दुःखिनस्तातंभवंतिचभवार्णवे ततोपकृष्यंदातव्यंप्रेतस्या
प्युदकुंभकमिति तद्यद्यपिसमूलंतथापिनसपिंडीकरणनिमित्तापकर्षविधायकंयाज्ञवल्क्यवचनविरोधात् किंतुयदाक
दापिसपिंडीकरणेप्रत्यहंसोदकुंभान्नदानाशक्तौनैकस्मिन्नेवदिनेआमेनतन्निष्क्रयेणापिवापकृष्यापितावत्कर्तव्यमित्येवं
व्याख्येय अत्रचक्वचिदुदकुंभस्यान्नस्याहित्यंक्वचिच्चान्नस्योदकुंभसाहित्यंयद्यपिश्रुतंतथापिगुणप्रधानभावाविवक्ष
यान्नंचोदकुंभश्चदेयइत्येतावन्मात्रंविवक्षितमित्येषउदकुंभइदमन्नमितिपृथगेवत्यागः कर्तव्यः अयंचसोदकुंभान्नत्या
गः श्राद्धरूपकप्रेतोद्देशेनान्नस्यतत्स्वनीयस्यवाद्रव्यस्यश्राद्धयात्यागश्राद्धमितिमिताक्षरोक्तस्यब्राह्मणस्वीकारपर्यं
तः पितॄनुद्दिश्यद्रव्यत्यागः श्राद्धमितिकल्पतरूक्तस्यसंबोधनपदोपनीतान्पित्रादींश्चतुर्थ्यंतपदेनोद्दिश्यहविस्त्यागः
श्राद्धमितिशूलपाण्युक्तस्यवाश्राद्धलक्षणस्यात्रापिसत्वात् यदाप्याद्ययोस्तयोः पिंडपितृयज्ञपित्र्येष्टिसोमयागगतपिंड
दानेषुपूर्वयोश्चापित्राद्युद्देश्यकभारतादिप्रसिद्धहिरण्यादिदानेषुचातिव्यापकत्वात्सन्न्यासाद्यंगभूतदैवार्षादिश्राद्धेषुचा
व्यापकत्वान्मयान्यत्रप्रपंचितंमंत्रत्ववदाभियुक्तश्राद्धप्रसिद्धिविषयत्वंश्राद्धलक्षणमंगीक्रियतेतदापिहारीतपारस्करा
दिभिः श्राद्धप्रकरणपाठेनतत्प्रसिध्यवगमाच्छ्राद्धत्वमस्यापिभवत्येवसत्यपिचश्राद्धत्वेपिंडदानस्यवचनादेवपाक्षिक
त्वेपि अर्घ्यदानादयः श्राद्धधर्माअत्रनभवंति अस्यापिसंवत्सरंयावदहरहः क्रियमाणत्वेननित्यत्वात् अहन्यहानित्य
श्राद्धंतन्नित्यमभिधीयतइतिभविष्यपुराणात्नित्यश्राद्धेच नित्यश्राद्धमदैवंस्यादर्घ्यपिंडविवर्जितमिति बृहस्पतिव
चनान्नित्यंतावत्प्रवक्ष्यामि अर्घ्यावाहनवर्जितमितिमत्स्यपुराणाच्च श्राद्धधर्मनिषेधावगतेरितिशूलपाणिः तदयुक्तं
अहन्यहनियच्चोदितंतन्नित्यमभिधानंकुर्यादहरहः श्राद्धमितितादृशचोदनाचोदितस्यैवाबाधविशेषानुपादानाच्चाज्ञी

का०त०
१४४

वतो नियोज्यत्वासंभवेन जीवनावधिकसकलाहर्व्यापिन एव प्रतीतेरस्य च तादृशत्वाभावात् अन्यथा अश्वयुक्कृष्णपक्षे तु श्राद्धं
कुर्याद्दिने दिने कार्तिकं सकलं वापीत्यादिविहितश्राद्धानामपि नित्यश्राद्धत्वप्रसंगात् निर्णयामृते तु अदैवं पार्वणश्राद्धं सोदकुंभ
मधर्मकं कुर्यात्प्रत्याब्दिकात् श्राद्धात्संकल्पविधिनान्वहमिति गौतमवचनमर्घ्यमावाहनादिश्राद्धीयधर्मनिवर्तकमुदाहृतं
सपिंडीकरणात्पूर्वं चैतत्क्रियमाणमेकोद्दिष्टविधिना तदूर्ध्वं तु पार्वणविधिनेति चोक्तं पितृव्येरप्येवमेव अधर्मकं कर्तृमो
क्तृनियमरहितं आप्रत्याब्दिकात् यदा पार्वणं तदाऽदैवमित्यर्थः संकल्पविधिश्च सांकल्पं तु यदा कुर्यान्न तदा पात्रपूरणं
नावाहनाग्नौकरणे न पिंडान्विकिरं न चेत्यादिः मया तूच्यते कृत्स्नविधानत्वात्प्रायश्चित्तांगविष्णुश्राद्धवदत्र श्राद्धधर्मान
तिदेशः या हि क्रिया विधीयते सा क्रियायैर्विना न निष्पद्यते तत्साधनसामर्थ्यं कृत्स्नविधानत्वं अत्र च पात्रस्वीकारपर्यंतो
यागविशेषो ददातिना विधीयते तत्र त्याज्यं देवताविशेषः पात्रविशेषश्चापेक्षितः तच्च सर्वमत्रोक्तमेव नामगोत्रे पितॄणां
तु प्रापके हव्यकव्ययोरित्यादिभिः सस्मान्यतः पितृकर्मांगत्वेनोक्तानि नामगोत्रविशिष्टोद्देशप्राचीनावीतित्वदाक्षिणामुख
त्वादीनि दानरूपत्वाच्च दानसामान्यांगभूतानि गंधमाल्यादिभिः पात्रप्रतेस्यतावत्परं भवति एक एव समनंतरमृत उद्देश्यः स
पिंडीकरणादूर्ध्वमपि तस्याप्यन्नं सोदकुंभं दद्यादूर्ध्वं द्विजन्मन इति तस्यापीत्येकवचनात् पिंडमप्येके विपृणंतीत्येकपिंडो
पदेशाच्च यः सपिंडीकृतमित्यस्यापवादात् वचनं त्वनाश्वासनीयं अनन्वितार्थत्वात्प्रसिद्धगौतमीयश्लोकरूपत्वेनासंभा
वितत्वाच्छ्लोकगौतमस्यापि केश्चिल्लिखिते न प्यत्रान्यसंवादाभावात् एवं नवानि नवमिश्राणि चैकोद्दिष्टानि दर्शितानि पुरा
णानि तु पाक्षिकाब्दिक तीर्थमहालयादिश्राद्धगतानि एषु च सर्वेष्वप्येकोद्दिष्टेषु इतिकर्तव्यताकांक्षयाऽदैवमित्या
दिकिंचित्पार्वणधर्मपर्युदासदर्शनाच्च पार्वणधर्मातिदेशे सति तत्र विहिताः यथाह याज्ञवल्क्यः एकोद्दिष्टं दैवहीनमे
कार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितं त्वपसव्यवत् उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने अभिरम्यतामिति वदे १४४
द्ब्रूयुस्तेऽभिरताः स्म इति कात्यायनेऽपि एकोऽर्घ्य एकं पवित्रमेकः पिंडो नावाहनाग्नौकरणे नात्र विश्वेदेवाः स्वदितमिति त

ति प्रश्नः सुस्वदितमित्यनुज्ञावचनमुपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गे अभिरताः स्म इत्यपर इति अत्र चार्थ
पिंडैकत्वश्रवणं न्यायप्राप्तानुवाद एव देवतैक्यादेव सिद्धेः पवित्रैकत्वश्रवणमपि तथेति केचित्तथा हि पवित्रांतर्हिते ष्वप आसिंच
तीत्युक्तत्वात्तद्वारा अर्घ्योदकसंस्कारकं पवित्रं तच्च अस्त्री कुशं कुथो दर्भः पवित्रमिति कुशसामान्यपर्यायत्वे सत्यपि नात्रत
न्मात्रं किंतु अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचिदिति स्वरूपविशेषेण पवित्रसंशब्द
वत्कर्मांगत्वेन च परिभाषितं कुशदलविशेषद्वयात्मकं वाक्येन होमप्रकरणपाठबाधात् तच्च दलद्वयात्मकमेव ननु दलद्वयोप
तकुशद्वयात्मकमिति साधितं मयाश्वलायनसूत्रविवरणे तत्र प्रकृतौ पितृपार्वणे पात्रत्रये पवित्रत्रयसद्भावेऽप्यत्रार्थपात्रैक्या
देकमेव पवित्रं भवति तद्द्वयोरर्थलोपेन बाधात् यत्तु शूलपाणिना एककरणसाध्ये एकोद्दिष्टे पूर्वप्राप्तैककरणधर्माणामे
वापेक्षणात्पितृयागांगस्यैवैकपवित्रस्यात्रातिदेशः पितामहप्रपितामहयागांगयोस्तु पवित्रयोरतिदेश एव नेत्युक्तं तदभ्या
सरूपत्वाज्ञानात् पितामहप्रपितामहयागानां शास्त्रीयभेदभ्रांत्या पवित्रषट्कस्यौत्सर्गिकातिदेशाभिधानं च तदीयमाता
महादियागानां पितामहप्रपितामहयागतुल्यत्वभ्रांत्या तेनाभ्यस्तैककरणभूतपितृपार्वणधर्मांतर्गतानां त्रयाणां पवित्रा
णां संभावितातिदेशानां मध्ये द्वयोर्द्वारलोपाबाध इत्येव वक्तव्यं तेनैकं पवित्रमित्यप्यनुवाद एवेति । तदयुक्तं दलैक्यस्याप्रा
प्तेस्तद्विधायकत्वात् पवित्रशब्दो हि अथ पवित्रे करोतीति वाजसनेयिब्राह्मणे अथर्ववदासाद्य पवित्रे कृत्वा अत एव बर्हि
षः प्रादेशमात्रे पवित्रे कुरुते पवित्राभ्यामाज्यस्योत्पवनमित्यादिषु पारस्करगोभिलाश्वलायनादिसूत्रेषु पवित्रेस्थो वैष्ण
व्याविति मंत्रे च द्विवचनांतः प्रयुज्यमान एकैकदलवचन एव गम्यते तेन परिशिष्टगतमेकवचनं समुदायाभिप्रायं राजसूय
वत् न तु तद्द्वशाद्दलद्वयसमुदाय एव तस्य वाच्यः श्रुत्यादिषु बहुषु लक्षणाप्रसंगात् एतेन परिशिष्टवचनाद्दलद्वयव्यास
क्तमेकमेव पवित्रत्वं द्विवचनांत एव तु विधिगत्वे मंत्रगते च पवित्रशब्दे वयवभूतदललक्षणेति शूलपाण्युक्तिर्निरस्ता नच
होमांगपवित्रादेकैकदलरूपाद्भिन्नमेवेदं सांकेतिकं दलद्वयरूपं पवित्रं तस्यैव प्रसंगेनान्यत्रापि विनियोगसंभवेन भेदे प्र

का०त माणाभावात् ततश्चयद्यपिद्वित्वविशिष्टस्यैवदलद्वयरूपस्यपवित्रस्योत्पन्नत्वात्परिभाषाद्रूपपरिशिष्टवचनाच्चपार्वणेपि
१४७ पवित्रशब्दात्प्रतिपात्रंदलद्वयरूपंपवित्रंप्रत्येततथापिएकोद्दिष्टेएकस्मिन्पात्रेद्वेदलेप्राप्नुयातांनत्वेकंतद्विधानार्थमेकंप
वित्रमिति वस्तुतस्तुसान्यतःपित्र्ये:युग्मसंख्याविधानात्तिस्रस्तिस्र:शलाकास्तुपितृपात्रेषुपार्वणइतिचतुर्विंशति
मताच्चपार्वणेप्रतिपात्रमेकैकदलात्मकानित्रीणित्रीणिपवित्राणि मंत्रस्तुतत्रापिद्विवचनांतएवभवति प्रकृताविव अथा
पित्रीणिस्युरितित्रयाणांपवित्राणांश्रुतौविधानात् तत्रापिचकुशौछिनत्तिपवित्रेस्थइतित्रीन्वेतिकात्यायनेनमंत्र
स्यविनियोगात् गुणभूतवचनानुरोधेनसमवेतार्थप्रातिपदिके संका ति ज्योतिष्टोमेग्नीषोमीयपशौअदितिः
पाशानितिमंत्र:पठितोबहुवचनांतस्तत्रबहुवचनस्यप्रकृतेनन्वयात्प्रकरणादुत्कर्षोबहुपाशयुक्तेषुपशुगणेष्वि
तिप्राप्तेब्रूमः नहिपाशानित्यत्रप्रधानस्यांशस्यानन्वितत्वमस्तिप्रातिपदिकविभक्त्यो:प्रातिपदिकंप्रधानंधर्मिवा
धकत्वात् विभक्तिस्तुकर्मत्वादिधर्मवाचकत्वात्गुणभूता तथापिविभक्तिवचनयोर्विभक्ते:कर्मादिकारकवाचित्वा
त्प्राधान्यंवचनस्यतुकारकगतसंख्यावाचित्वाद्गुणत्वं तथासतिबहुवचनांतेपाशशब्दे प्रातिपदिकंकर्मकारक:
विभक्तिश्चैकस्मिन्नपिपाशेसंगच्छेतेगुणभूतबहुवचनंतुलक्षणयापाशवचनगतंबहुत्वंलक्षयिष्यतितेगुणभूतव
चनानुरोधेननमंत्रस्यप्रकरणपाठोबाधनीयइतिसंक्षेप:संकोचादे:पाशमंत्रवदन्याय्यत्वाच्च प्रकृतौचोहाभावा
त् तद्वदेवपार्वणेप्युपपत्ते:तथाचदलत्रयप्राप्तावेकदलविधिरेकोद्दिष्टे तथाचचतुर्विंशतिमतं एकोद्दिष्टेशलौके
कांनिधायोदकमाहरेदिति हेमाद्रिणाप्येकैकंपवित्रमेकशिखंपवित्रमितिव्याख्यातं विष्णुरपि अथाशौचव्यप
गमेस्नात:स्नप्रक्षालितपाणिपाद आचांतस्त्वेवंविधान्ब्राह्मणान्यथाशक्त्युदङ्मुखान्गंधमाल्यवस्त्रालंका
रादिभि:पूजितान्भोजयेदेकवन्मंत्रानूहेतेकोद्दिष्टउच्छिष्टसंनिधावेकमेवतन्नामगोत्राभ्यांपिंडंनिर्वपेत् भुक्तवत्सु १४५
ब्राह्मणेषुदक्षिणयाभिपूजितेषुप्रेतनामगोत्राभ्यांदत्ताक्षय्योदकेषु चतुरंगुलपृथ्वीस्तावदंतरास्तावदध:खाता
यु

28/194

वितस्त्यायतास्तिस्र:कर्षू:कुर्यात् कर्षूणांसमीपेचाग्नित्रयमुपसमाधायपरिस्तीर्यतत्रैकैकस्मिन्नाहुतित्रयंजुहुयात् सोमा
यपितृमतेस्वधानम: अग्नयेकव्यवाहनायस्वधानम: यमायांगिरस्वतेस्वधानम: स्थानत्रयेचप्राग्वत्पिंडनिर्वपणंचकुर्यात्
ततोदधिघृतमांसै:कर्षूत्रयंपूरयित्वाएतत्तइतिजपेत् एवंमृताहेप्रतिमासंकुर्यादिति अत्रचैकवन्मंत्रानूहेतेतिबहुवचनांतपि
तृपदोपेतेषुमंत्रेषुएकवचनोहोमउक्त: सनप्रकृतैकादशाहिकैकोद्दिष्टाभिप्राय: नाप्येवंमृताहइत्युक्तसपिंडीकरणपूर्वभावि
मासिकैकोद्दिष्टाभिप्राय: तदानीमवस्थाविशेषरूपपितृत्वालाभेनतद्वाचिपितृपदोपेतानांमंत्राणांतेष्वप्रवृत्ते अतएवप्रेतश्रा
द्धेषुपितृशब्दनिषेधद्वारातद्युक्तमंत्रनिषेधोवक्ष्यमाणोन्यायप्राप्तानुवादएव नचजनकपुरुषवचनएवमंत्रगत:पितृशब्दो
स्त्वितिवाच्यं तथासतिबहुवचनान्वयार्थंपितामहप्रपितामहलक्षणापत्ते: तस्याश्चैकेनैवपितृत्वेनसर्वेषुमुख्यत्वोपप
त्ताबन्याय्यत्वात् अतएवमातृश्राद्धेपितृप्रादिकस्यानूहउक्तोन्वष्टक्येवृत्तिकारादिभि: यत्रतुजनकपुरुषवाचिबहुवच
नांतपितृशब्दोपेतेशुंभनमंत्रे अन्यत्रचैवंजातीयकेऊहप्रसंगस्तस्यापिप्रेतश्राद्धेष्ववनेजनादिनिषेधात्प्रेतशब्देनैवोद्देश
विधानाच्चतेष्वप्रवृत्ति तथाचाश्वलायनगृह्यपरिशिष्टेप्रेतश्राद्धेषुसर्वेषुनस्वधानाभिरम्यतां स्वस्त्यस्त्वितिस्थितेदेवंस
ब्राह्मणववर्जितं एकोद्दिष्टस्यपिंडेतुअनुशब्दोनयुज्यते पितृशब्दंनयुंजीतपितृहाचोपजायतइति तथा अनूदकम
धूपंचगंधमाल्यविवर्जितं नवश्राद्धममंत्रंचपिंडोदकविवर्जितमिति अनुदकमनर्घ्यं पिंडोदकमवनेजनप्रत्यवनेजनरू
पंतेनविवर्जितमितिहेमाद्रिणाव्याख्यातं हेमाद्र्युदाहृतस्मृत्यंतरेपि आशिषोद्विगुणादर्भाजयाशी:स्वस्तिवाचनं पितृ
शब्दश्चसंबंध:शर्मशब्दस्तथैवच पात्रालंभोवगाहश्च उल्मुकोल्लेखनादिकं तृप्तिप्रश्नश्चविकिर:शेषप्रश्नस्तथैवच
प्रदक्षिणाविसर्गश्चसीमांतगमनंतथा अष्टादशपदार्थास्तुप्रेतश्राद्धेविवर्जयेदिति यद्यपिपवित्रद्वाराप्राप्त:पवित्रछे
दनमंत्रोद्विवचनांतपवित्रशब्दोपेतएकदलविधानादेकोद्दिष्टेएकवचनोहविषय:कथंचिल्लभ्येततथापिबहुवचनानु
पपत्तिस्तस्मात्प्रसंगात्पुराणैकोद्दिष्टाभिप्रायोयमूहविधि: अतएवसत्यप्येकोद्दिष्टप्रक्रमेपुनरत्रैकोद्दिष्टग्रहणमेकव

का०त० मंत्रानूहेकोद्दिष्टइति सोपिचतथ्यवमंत्रेषुसमुदितपित्राद्यभिप्रायेण प्रयोगाद्बहुवचनंसमवेतार्थं नमोवः पितरइत्यादिषु नतु
१४६ तेषुप्रत्येकंप्रयोगादसमवेतार्थं तेष्वपि असमवेतार्थत्वादेवयथार्घ्यपात्रेतिलावापमंत्रेयथावाएतद्वः पितरोवासइतिज
पनपृथक्पृथगितिब्रह्मपुराणाद्युक्तपक्षाश्रयणेएतद्वइतिमंत्रे यद्यपिचएकोद्दिष्टसामान्ये अभिरम्यतामितिविसर्जनमंत्रोया
ज्ञवल्क्यकात्यायनादिविहितः गोभिलेनतु अभिरम्यतामितिविसर्जनमित्यभिधायैतत्प्रेतश्राद्धेपिविशेषतस्तथाप्याश्वलायना
नांप्रेतश्राद्धेषुसनभवतिविशेषतस्तत्रतंनिषिध्यतत्परिशिष्टमंत्रांतरविधानात् इत्याद्यस्तुकालनिर्णयेप्रासंगिकं अथसपिं
डीकरणकालाविविच्यंते तत्रसाग्निकेनपिंडपितृयज्ञाधिकारिणस्तावत्सध्याशौचोत्तरदिनमारभ्यद्वादशस्वदिनेषुषोडशश्रा
द्धानिपूर्वोक्तविधिनाविधायतदुत्तरत्रयोदशादिनेपितृपितामहप्रपितामहान्यतरस्यमात्रादीनांचतत्कार्यं तदुत्तरपतितायां
ममावास्यायांपिंडपितृयज्ञः दर्शात्पूर्वंतावत्कालासंभवेएकादशाहेद्वादशाहेथवेतिपक्षेणाशौचोत्तरदिनेतत्रेणषोडशश्राद्धा
निविधायतदुत्तरदिनेदर्शादर्वाग्यत्रक्वापिवादिनेसपिंडीकरणंकृत्वादर्शेपिंडपितृयज्ञः द्वादशदिनएवदर्शापातेतत्रैवसपिंड
नंपितृयज्ञश्च॥ आशौचांत्यदिनोत्तरादिनएव दर्शापातेतुतत्रैवषोडशश्राद्धसहितंसपिंडीकरणंकृत्वापितृयज्ञः कार्यः सपिंडी
करणमकृत्वापितृयज्ञस्यकर्तुमशक्यत्वान्मृतपितृकस्यचतदकरणेप्रत्यवायात् तथाचजाबालिः नासपिंड्याग्निमान्पुत्रः
पितृयज्ञंसमाचरेत् पापीभवत्यकुर्वन्हिपितृहाचोपजायतइति एकादशाहंनिर्वर्त्य अर्वाग्दर्शाद्यथाविधि प्रकुर्वताग्निमा
न्विप्रोमातापित्रोः सपिंडनमिति छंदोगपरिशिष्टमप्येतदभिप्रायकमेव अग्निमानर्वाग्दर्शादिति चोक्ते तथाचदर्शात्पू
र्वंसपिंडीकरणस्यावश्यकत्वेसपिंडीकरणंकुर्यात्पूर्वेदर्शेग्निमान्कृतः परतोदशरात्रस्यपूर्णत्वेचेतथेतरइतियातुपूर्वममावास्या
स्वताहाद्दशमीभवेत् सपिंडीकरणंतस्यांकुर्यादिवसतोग्निमानितिच जाबालिहारितोक्तः तत्कालस्यचदर्शत्रिपस्यदशरात्रस्यप
रतःपूर्वदर्शइत्यन्वयेनचमृताहाधिकदशमीत्वोत्तथा चाशौचांत्यदिनानंतरभाविदर्शविषयत्वाव्यवधानेःप्रवृत्तेस्तत्काला १४६
पेक्षायांसपिंडीकरणमासिकार्घ्यवद्द्वादशाहश्राद्धंकृत्वा त्रयोदशेह्निकुर्यादिति विष्णूक्तस्यषोडशश्राद्धव्याप्तद्वादशदिनोत्त

19

रदिनस्यद्वादशाहेत्रिपक्षेवेत्यादिवचनविहितस्यमृतदिनावधिकद्वादशादिनस्यवासामान्यविहितस्यैवात्रापिप्रवृत्तिर्बाधकाभावात्
अर्वाग्दर्शादितिसामान्योक्तिरेतत्कालोपसंग्रहेप्यविरोधात् यथाविधीत्युक्तांप्रत्युक्तस्यैवप्रतीतेश्च अतएवाशौचांत्यदिनानंतर
दिनएवदर्शापातेतत्रैवतत्कर्तव्यतार्थंपृथक्जाबालवचनंहारीतवचनंच हेमाद्रिस्तु अर्वाग्दर्शादित्यस्यस्वतंत्रकालविधायित्वम
त्वादशाहोत्तरंदर्शादर्वाग्यत्किंचिदप्यहः साग्निकस्यकर्तुः सपिंडीकरणकालइत्याह नचवचनांतरविहितसंभवत्कालोपसंग्रह
णेतद्वचनप्रवृत्तावप्यस्यानर्थक्यं औत्सर्गिकवर्षांतकालबाधेनापकर्षार्थत्वात् नासपिंड्येतिवचनमपिकिंतुसपिंडनंकृत्वाअ
नंतरागतेकाले आचरेदेवेतिव्यक्त्यापकर्षार्थमेव सपिंडीकरणंविनापितृत्वप्राप्त्यभावादेवन्वैतस्यार्थस्यप्राप्तत्वात् तत्रनिंदा
नन्वथाचपुत्रग्रहणाच्च मातुरपिसपिंडनस्यापकर्षः अतएवस्पष्टमुक्तंमातापित्रोः सपिंडनमितिमातुरपिचपितृत्वप्राप्तिःश्रा
द्धार्थमिवपिंडपितृयज्ञार्थमप्यपेक्षितेव तत्सिद्धेष्वपितस्याअंशभावित्वात् एकत्वंसागताभर्तुः पिंडगोत्रेवसूतकइतिसामा
न्यवचनात् नचैवंश्राद्धइवपिंडपितृज्ञेपिसपत्नीकत्वेनपित्रादीनांनिर्देशापत्तिः तद्विनार्थांशभागित्वोपपत्तेः मातुर्मातामहेन
सपिंडनेतत्पिंडइव एकमूर्तित्वमित्यादिवचनात् अन्यथामातामहांशभागित्वार्थं तस्यासदुहित्रकेतिनिर्देशापत्तेःप्रपं
चयिष्यतेचैतदन्यत्र अर्वाग्दर्शादितिसामान्योक्त्याचमृतपितृकसाग्निकस्यदर्शश्राद्धमवश्यकमितितदर्थमपिपित्रा
दिसपिंडनापकर्षइतिगम्यते अतएवसपिंड्याग्निमान्पुत्रः पितृयज्ञंसमाचरेत् नपार्वणंनाभ्युदयंकुर्वन्लभ्यतेफलमितिहे
माद्र्युदाहृतेप्रजापतिवचने अवश्यंकर्तव्याभ्युदयसाहचर्येणपार्वणमप्युपात्तं अतएवच पुत्रमतापितृग्रहणस्याप्युपलक्ष
णत्वात् पौत्रादिनापि पितामहादेः सपिंडनमभ्युदयार्थमिवदर्शश्राद्धपिंडपितृयज्ञार्थंकर्तव्यमपकर्षेण पितामहादिपितृत्व
प्राप्तेरपितदर्थमपेक्षितत्वात् एतेनमंत्रवर्जं शूद्राणांद्वादशेह्नीतिविष्णुवचनेनमृतिदिनावधिकद्वादशाहेशूद्राणांसपिंड
नापकर्षविधानस्यापिदर्शश्राद्धार्थत्वात्सच्छूद्रस्यापिद्वादशाहोत्तरंदर्शापातेदर्शश्राद्धावश्यकत्वंद्योतितंवेदितव्यं अतए
वदर्शश्राद्धाधिकारिशूद्रविषयमेतदितिवृद्धैरपिकैश्चिदुक्तं तद्वाराचसच्छूद्रस्यपंचदशाहवा। दतिसच्छूद्रस्यदशाहश्पा

शौचकालसंकोचस्यापिविधानमेतवद्रष्टव्यं किंतुसंवत्सरांतेसपिंडीकरणमितिमुख्यपक्षेणविधायद्विजातीनांमासिकानाम
र्थः प्रायः तेनदशमपिंडदानस्याजातत्वात्कथंशूद्रस्यद्वादशेह्निसपिंडीकरणविधानमित्यनौचित्यमपिमृतिदिनावधिकद्वादशा
हग्रहणेपिपरिहृतंवेदितव्यं वस्तुतस्तुद्वादशेह्नीत्यनेनमृताहाद्द्वादशेह्नीत्युच्यते प्रेतभावनिवृत्तिस्तुद्वतश्राद्धगणाभिप्रा
यमेकवचनं षोडशश्राद्धानीतियावत् आशौचापगमोत्तरंद्वादशस्वहःसुपूर्वोक्तविषयात्कृत्वानंतरंत्रयोदशेह्निकुर्यादिपक
र्षेपक्षंविधायशूद्राणांतुनतस्मिंस्त्रयोदशेकिंतुतत्पूर्वद्वादशदिनएवतत्रकर्तव्यंमासिकंकृत्वेत्युच्यते मासिकार्थवदित्या
दिपूर्ववचनैकवाक्यत्वात् अतएवाग्नेपिमृतिसंवत्सरेधिकमासापातेतत्रैवद्वादशदिनेष्वधिकमेकंदिनमधिकमासकर्त
व्यमासिकाभ्यासार्थवर्द्धयित्वाचतुर्दशेदिनेसपिंडीकरणानुष्ठानंद्विजानांशूद्राणांतुत्रयोदशइत्युक्तंसंवत्सराभ्यंतरेयद्य
धिकमासोभवेत्तदामासिकार्थंदिनमेकंवर्धयेदिति तेनसाग्निकेनपिंडपितृयज्ञार्थंदर्शश्राद्धार्थंचाशौचापगमोत्तरद्वा
दशदिनानंतरंत्रयोदशदिनेमृताहाद्द्वादशाहेदर्शेत्वपेमृताहावधिकैकादशाहेवाद्विजातिनासपिंडनंकार्यं यद्यस्यप्रतिबं
धकवशादेषुकालेषुतन्नकृतातंतदात्रिपक्षादिषुवक्ष्यमाणेषूत्तरकालेषुतत्कर्तव्यं तदाहसाग्निकंप्रकृत्यगोभिलः द्वादशाहा
दिषुकालेषुप्रमादादननुष्ठितं सपिंडीकरणंकुर्यात्कालेषूत्तरभाविष्विति इदंवचनंप्रकरणात्सामर्थ्याच्चसाग्निककर्तृविषय
मेवतस्यैवहिदर्शकर्तव्यानुरोधेनद्वादशाहादयोमुख्याःकालाइत्यनुकल्पत्वेनोत्तरेविधातुंयुज्यंतेनतुनिरग्निकस्यतस्यहि
वर्षांतएवमुख्यः पूर्वएवतुअशक्तिव्याध्यनुरोधोपाधिका अनुकल्पाइति निरग्निकेनत्वाहिताग्नेःप्रेतस्यसपिंडीकरणं
मृततिथ्यवधिकतृतीयपक्षेकर्तव्यं प्रेतश्चेदाहिताग्निःस्यात्कर्तानग्निर्यदाभवेत् सपिंडीकरणंतस्यकुर्यात्पक्षेतृतीय
कइति लघुहारीतोपि अनग्निस्तुयदावीरभवेत्कुर्यात्सदागृही प्रेतश्चेदग्निमांस्तुस्यात्त्रिपक्षेवैसपिंडनमिति अत्र
चाधिकरणसप्तमीवशात्तृतीयःपक्षःसकलःसपिंडीकरणकालोनतुतत्पूर्त्यनंतरामृतिसजातीयातिथिस्तस्यास्तद्व्याप्य १४७
त्वात् एवंत्रिमासषाण्मासादिष्वपि प्रेतश्राद्धनिषिद्धतिथिनक्षत्रादिकंतुपरित्यज्यतत्रतत्कार्यं अमुमाहिताग्निप्रेतवि

287
1942

षयंकालंप्राच्यानलिखंति एतस्यकालस्ययथासाग्निककर्तृनिमित्तेनकालेनअंतरंगनिमित्तकत्वाद्बाधइतिकर्तुर्निरग्नित्वंन्या
यप्राप्तंविशेषणंतथावक्ष्यमाणेनवृध्युपस्थितिनिमित्तकेनापिकालेनबाधोद्रष्टव्यः उभयोर्निरग्निकत्वेसंवत्सरपूर्त्यनंतरमृत
तिथिर्मुख्यःकालः तदुक्तंभविष्यपुराणे सपिंडीकरणंकुर्याद्यजमानस्त्वनग्निमान् अनाहिताग्नेःप्रेतस्यपूर्णेब्देभरतर्षभेति
अत्रचपूर्णइतिपूर्तिक्षणविशिष्टस्याधिकरणत्वप्रतीतेःक्षणस्यचाधिकरणत्वासंभवात्कारकविभक्तिबलीयस्त्वेनचयस्य
चभावेनभावलक्षणमित्यनुशासनलब्धस्यपूर्णेसतीत्यर्थस्यानुचितत्वात्प्रत्ययार्थप्रधानभूताधिकरणत्वानुरोधेनप्रा
तिपदिकेपूर्तितिथिलक्षणायद्यपिन्यायात्प्राप्नोतितथाप्यत्रवचनवशात्पूर्णेसत्यनंतरदिनइत्येवार्थः तथाचोशनाः
पितुःसपिंडीकरणंवार्षिकेमृतिवासरे आधानकपसंप्राप्तावेतत्प्रागपिवत्सरादिति नागरखंडेपि पितुःसपिंडीकरणंवत्स
रादूर्ध्वतःस्थितं वृद्धिरागामिनीचेत्स्यात्तदार्वागपिकारयेदिति शूलपाणिप्रभृतयोपि संवत्सरांत्यमृताहेसपिंडीकरणं
मन्यंतएव किंतु संवत्सरेतुविज्ञेयंततः संवत्सरेपूर्णेसमाप्तिसंवत्सरइत्यादिष्वधिकरणत्वएवसप्तमी पूर्णसमाप्तशब्द
भ्यांचनसम्यक्समाप्तिर्विवक्षिताअंत्यकालरूपायांतस्यांश्राद्धासंभवात् किंतुसंपूर्णेतुततोमासेपिंडशेषंसमापयेत् शू
द्रस्यदशमःपिंडोमासेपूर्णेनदीयतइत्यादिवदीषत्समाप्तिस्तेनपूर्तिदिनलाभः अंत्यमृताहोपिचसंवत्सरांतर्गतएव
नतद्बाह्यः आद्यमृताहस्यावधिमात्रत्वेनतस्यैवषष्ठ्यधिकशतत्रयदिनात्मकसंवत्सरपूरकत्वात् अजहत्स्वार्थलक्षण
यासंवत्सरपदस्यैकदिनाधिकसंवत्सरपरत्वाद्वा संवत्सरांतेप्रेतायेतिविष्णुवचनेपिदशाहांतेपुनःक्रियेतिवदंतशब्दो
नसमीपवचनः किंतुदर्शितःपदइतिवदंतिमावयववचनोंत्यमृताहपरएवेतिमन्यंते तत्तुवार्षिकप्रकरणे आद्यमृताहंगृ
ताहंगृहीत्वैवसंवत्सरव्यवस्थापनाद्वत्सरादूर्ध्वतइतिवचनविरोधाच्चायुक्तं स्मृत्यर्थसारेतुद्वितीयसंवत्सराद्यमृता
हपूर्वभाविनिप्रथमवत्सरांत्यदिनेसपिंडीकरणंप्रतीयते एवंहितत्रश्राद्धक्रमउक्तः एकादशाहमारभ्यद्वादशमासाद्य
मृताहंयावद्द्वादशमासिकांतानिश्राद्धानिकृत्वाद्वादशमासोपांत्यदिनेऊनाब्दिकंतदंत्यदिनेसपिंडीकरणंतदुत्तरमृता

का०त० द्विप्रथमाब्दिकमितितदपिषाण्मासिकाब्दिके श्राद्धेस्यातांपूर्वेद्युरेवतेपितुसपिंडीकरणंवार्षिकेस्मृतिवासरइत्यादिवचनंविरुद्धं
१४८ तेनसंवत्सरइत्यादिसतिसत्तम्येवमृताहएवचसपिंडीकरणं प्रथमसांवत्सरिकस्यतुतदाकागतिःकिंकर्तव्यमुतनेति पृथ्वी
चंद्रोदयादिषुतावन्नकर्तव्यमित्युक्तंमुख्यकालस्यसपिंडीकरणेनावरुद्धत्वात्श्राद्धशेषभोजनरूपसुत्तरांगंविनासपिंडीकरण
प्रयोगस्यासमाप्तेर्गौणकालेपितदसंभवात् मलमासेपिकर्तव्यमाब्दिकप्रथमंद्विजैरित्यादितुतरनुष्ठानद्योतकं द्वादशाहादिसपि
डीकरणपक्षइति यद्यपिचएकोद्दिष्टस्यशेषंतुब्राह्मणेभ्यःसमुत्सृजेत् ततःस्वयंतुभुंजीतपुनर्मंगलभोजनमितिबृहस्प
तिवचनेनप्रेतैकोद्दिष्टस्यशेषभोजनंनिषिद्धंतथापिपार्वणांशशेषभोजनमावश्यकं अतएवसपिंडीकरणेपार्वणैकोद्दिष्टां
शयोःपाकभेदाचारःशिष्टानां। वृद्धिदिनसपिंडनेत्वगत्याशेषभोजनंविनापितत्समाप्तिः श्रीदत्तवाचस्पत्यादयोमैथि
लाअप्येवं तदिदमयुक्तं विसर्जनेनसमाप्तेश्राद्धप्रयोगेपश्चाद्भागतो।नियमेनप्राप्तस्यभोजनस्यनियमःश्राद्धशेषप्र
तिपत्त्यर्थोवाकार्यापेक्षतत्साधनकोवातद्दिनरात्रिगतब्रह्मचर्यादिनियमवत्प्रयोगबहिर्भूतएवश्राद्धांगव्यवधानका
रणाभावत्वव्यवधानमात्रंश्राद्धप्रधानेनसहतस्यतत्रप्रतिसंवत्सरकर्तव्यतयाविहितेनसपिंडनवत्त्वांद्वितीयसंवत्सरा
द्यमृततिथावपिअवश्यंप्राप्तेनवार्षिकश्राद्धेनोत्कृष्टंशेषभोजनंयदिलड्डत्तरंश्राद्धद्वयांगतयातंत्रेणक्रियतेनकापिक्ष
तिःपूर्वकस्यमृतस्यादौद्वितीयस्यततःपुनरितिवचनादेकस्मिन्दिनेक्रमेनक्रियमाणेषुवार्षिकश्राद्धेष्विवनित्यत्वा
च्चगौणकालेप्यनुष्ठानमदोषः वस्तुतस्तुपार्वणविधिनासांवत्सरिकानुष्ठानेनगौणकालप्राप्तिरपि तस्यपराह्ण
कालत्वात्सपिंडीकरणस्यचमध्याह्नकालत्वात् तत्रत्वेकोद्दिष्टांशेनमध्याह्नेपार्वणांशेनचापराह्णप्राप्तेर्मुख्यत्वादे
कोद्दिष्टस्यतद्धर्मस्यमध्याह्नस्यैवानुग्रहोयुक्तः मुख्यत्वंचप्रेतत्वनिवृत्तिपूर्वकपितृत्वप्राप्तिरूपफलभागिप्रेतदैवत्यत्वा
त् पार्वणांशस्यतुतदभावेसंयोजनस्यकर्तुमशक्यत्वात्तदुपकारितयानुष्ठानात् प्रथमानुष्ठेयत्वाच्च प्रथमानुष्ठानंच
प्रथसपिंडीकरणंचत्वार्युदपात्राणिएकंप्रेतस्यत्रीणीतरेषांप्रथमंप्रेतपात्रंपितृपात्रेषुनियोजयेत्समानीवआ १४८

कूतिरिति एवमेवप्रथमपिंडंत्रिषुपिंडेषुनियोजयेदित्याश्वलायनगृह्यात् समाप्तेवत्सरेचत्वार्युदपात्राणिप्रयुनक्तितत्रैकंप्रेताय
त्रीणिपितृभ्यएवंपिंडानितिवैजवापगृह्यात् प्रेतविप्रस्यहस्तेतुचतुर्भागंतुलंक्षिपेत् ततःपितामहादिभ्यःतत्तन्मंत्रैश्चपृथक्
पृथगितिब्रह्मपुराणात् संवत्सरांतेप्रेतायतत्पित्रेतत्पितामहायतत्प्रपितामहायब्राह्मणान्देवपूर्वान्भोजयेदितिविष्णुवच
नादन्येभ्यश्चबहुभ्योवचनेभ्यःस्पष्टमवगम्यते त्रीणिपितॄणामेकंप्रेतस्येतिगोभिलसूत्रंतुबहुविरोधान्नक्रमकल्पकंभवतु
वाछंदोगविषयं तथाप्युपजीव्यत्वादेकोद्दिष्टकालएवानुग्राह्यो नचैकाधिकरण्यस्यैकीयमतत्वेनोपन्यासेनस्वासंमतत्वा
न्मुख्यस्वधर्मत्वस्याधिकरणभेदेनसमसंख्याविषयत्वादत्रचपार्वणेयागत्रयसत्वात्जघन्यस्यापितस्यैवकालानुग्रहो
युक्तइतिवाच्यं तत्रापिकर्मणएकत्वादेवसमुचितदेवतानुरोधेनसोमयागवदभ्यासमात्रभेदात्तेषांचकालादिधर्मानन्व
यात् नचकालोदेवताधर्मः येनयथापूष्णएकमात्रेणेतरसाहित्येनेप्रेत्यवह्नित्वादितरसाहित्येविप्रतिषिद्धधर्मस
मवायेभूयसांस्यात्सधर्मत्वमितिन्यायेनपेषणरूपपूषधर्मबाधेनभूयोन्यदेवतामुख्येति यत्रसमसंख्यानांधर्मवि
प्रतिषेधःतत्रकस्यस्वधर्मलाभःकस्यवान्यधर्मोपजीवनमितिचिंतायांनामनियमप्राप्तौमुख्यस्वस्वधर्मइति तस्यहि
धर्मोऽसंजातविरोधावस्थायांनिर्विघ्नमवगम्यतेजघन्यस्यतुतद्विरुद्धत्वान्नतद्धर्मः संग्रहीतुंशक्यते अयंचार्थः
कैश्चिदेकमधिकरणंकृत्वासाधितःकैश्चिदधिकरणभेदेनेति तृतीयेनेति चरौपेषणमितिस्थितं तत्रसंशयःकिंयत्रा
न्यसहितःपूषादेवतातत्राप्येतत्पेषणंउतयत्रैवकेवलइति तदर्थंकिंदेवताप्रयुक्तंपेषणमुततद्देवत्ययागापूर्वप्रयुक्तमि
ति तत्रयज्ञप्रकरणाभावाद्वाक्येचाश्रवणादेतत्पेषणंदेवताधर्मइतिप्राप्तेब्रूमः ऐंद्रापौष्णादावपिसत्वात्पूषसहितेत
रदेवेन्येपिप्राप्नोतीतिपूर्वपक्षइत्यर्थः सिद्धांतस्तुनहिदेवतात्वमंतरेणप्रविष्टभाक्त्वंमति...
[illegible] देवताकृत्वेननकेनपूष्णःव्यपदेष्टुंशक्यतइत्येकमात्रपूष
कैयोगेपूषणमितिबोध्यःतदनुरोधेनतंडुलाएवग्राह्याद्वतिपेषणस्यदेवतास्वरूपधर्मत्वंतृतीयाधिकरणपूर्वप

का०त०
१४९

क्षममभिप्रेत्यछंदोगपरिशिष्टे उक्तंतदप्यदंतकः पूर्वापैष्टमतिसदाबनुं अग्नींद्रेश्वरसामान्यात्तंडुलोत्रविधीयतइतितथात्रापि
स्यात् तेनसपिंडीकरणस्यैकोद्दिष्टकालेकुतपप्रभृतिमध्याह्नैकदेशएवानुष्ठानात्पार्वणविधिनानुष्ठीयमानस्यसांवत्सरिक
स्यसपिंडीकरणंसमाप्यापराह्णमध्यएवोपक्रमतुंशक्यत्वान्नगौणकालतापीतिपारमार्थिकत्वमुक्तं गौणकालेपितुतदनु
ष्ठानेनकश्चिद्दोषोनित्यत्वादेकोद्दिष्टविधिनानुष्ठानेतस्यावश्यकत्वादित्युक्तं तेनसपिंडदिनेसांवत्सरिकश्राद्धाननुष्ठानेप्य
न्यायोपन्यसनंवाचस्पत्यादीनांतत्तावदयुक्तं यदपिकेचिद्गौडैनोक्तं गोभिलेनपूर्णसंवत्सरेसपिंडीकरणमभिधायात
ऊर्ध्वंसंवत्सरेप्रेतायान्नंदद्याद्यस्मिन्नहनिप्रेतःस्यादितिसूत्रेणाद्याब्दादूर्ध्वंसांवत्सरिकविधानात्प्रथमाब्देवार्षिकश्रा
द्धंभवत्येवेति तदत्यंतायुक्तं नह्यतऊर्ध्वमितिसंवत्सरःपरामृश्यते पूर्णेसंवत्सरेषण्मासेत्रिपक्षेवायदहर्वावृद्धिरापद्
यतइत्यनेकेषांकालानांपूर्वमुक्तत्वात् किंतुसपिंडीकरणंतदूर्ध्वताचप्रथमसंवत्सरेपिसंभवत्येवेतिवीप्साबलात्त
त्रापिप्राप्यमाणंकिमितिनक्रियते किंचैवंसतिमलमासप्रकरणेप्रथमसांवत्सरिकविषयोनिर्णयस्तज्ज्ञैर्जनेप्रायश्चि
त्तविधानंचसर्वंभित्तिचित्रमेवस्यात् पूर्णेसंवत्सरेश्राद्धंषोडशंपरिकीर्तितं तेनैवचसपिंडत्वंतेनैवाब्दिकमिष्यत
इतिवचनमुपन्यस्यसंवत्सरांतक्रियमाणसपिंडकरणेनोभयनिर्वाहाभिधानंचतदीयंतत्राब्दिकाप्राप्तेर्नघटते नचै
तद्वचनबलादेवतर्हितद्दिने आब्दिकाननुष्ठानंभवत्विति वाच्यं एतस्यानाकरत्वादनन्वितार्थत्वाच्च तथाहि त
न्मतेत्रयोदश्यांमृततिथावनुष्ठीयमानषोडशश्राद्धांतर्गतंयद्द्वादशमासिकंतेनतावत्सपिंडीकरणाब्दिककार्यनिर्वा
होनसंभवत्येव अथछंदोगपरिशिष्टेषोडशसंख्यापूरकत्वेनोक्तंसपिंडीकरणमेवेहषोडशपदेनगृह्यतेनचस्व
कार्यमाब्दिककार्यंचक्रियतइतिवचनार्थसोप्यनुपपन्नः पितृत्वापन्नत्वप्रेतरूपस्याब्दिककार्यस्यतेनासंभवात् गौ
डनिबंधलिखितैर्वचनैःसत्प्रतिपक्षंचेदं तथाहिधवलसंग्रहेजाबालिः पूर्णेसंवत्सरेकुर्यात्सपिंडीकरणं १४९
सुतः एकोद्दिष्टंचतत्रैवमृताहनिसमापयेत् तत्रैवगालवोपि पूर्णेसंवत्सरेवृत्ते मृताहेपुनराब्दिकं सपिंडीकर

289
1942

णंकृत्वाकुर्यात्पुत्रस्सुतेनरः संवत्सरेपूर्णेवृत्तेमृताहेसपिंडीकरणंकृत्वापुनराब्दिकंकुर्यादित्यन्वयः पुत्रग्रहणमुत्तरक्रियायेषामा
वश्यकात्तदधिकार्युपलक्षणं इतरग्रहणंतद्भिन्नपरं तत्रमात्स्ये पुत्रःसपिंडनंकृत्वाकुर्यात्स्नानंसचैलकं एकोद्दिष्टंततःकुर्यात्कु
तपंनविचारयेदिति एकोद्दिष्टग्रहणंपाक्षिकेणतेनप्रकारेणसांवत्सरिकमुपलक्षयति तेनैवतद्वचनाविरोधायसाकरमपितत्त
न्मतेनैवंव्याख्येयं पूर्णेसंवत्सरेमृताहेद्वादशमासिकरूपंषोडशश्राद्धंकर्तव्यं ततस्तेनैवदिनेनापृष्टक्तंसपिंडीकरणमाब्दिकंच
कर्तव्यमिति दाक्षिणात्यनिबंधेषुत्विदंवचनंनोपलभ्यतएव एकेनहेमाद्रिणापिपूर्णेसंवत्सरेपिंडःषोडशःपरिकीर्तितइतिपावे
नमुनिविशेषनामानुल्लेखेनैवपठितमिति सपिंडीकरणंकृत्वातद्दिनएवाब्दिकानुष्ठानमुचितमेवेतिममममतिःशिष्टाचारस्त्विदा
नींपूर्णसंवत्सरसपिंडीकरणानुष्ठानपक्षस्यादर्शनात्तदाब्दिककरणान्यतरगोचरोनदृश्यतएवेति केनचिन्निमित्तेनसंवत्स
रांतसपिंडीकरणाशक्तावेकादशोमासस्तत्राप्यशक्तौनवमः तत्राप्यशक्तौषष्ठः तत्राप्यशक्तौतृतीयः तत्राप्यशक्तौतृती
यःपक्षः तत्राप्यशक्तौ आशौचांत्यदिनोत्तरदिनमारभ्यद्वादशस्वहस्सुषोडशश्राद्धानिकृत्वात्रयोदशेह्नि तत्राप्यशक्तौ
एकादशाहेद्वादशाहएववा तानिकृत्वामृतदिनाद्द्वादशाहइतितथाचभविष्यत्पुराणे द्वादशेहनिषष्ठेवात्रिपक्षेवात्रिमासि
वा एकादशेपिवामासिमंगल्यस्याप्युपस्थिताविति षष्ठेवेत्यत्रमासीतिसंबंधनीयं त्रिपक्षेत्रिमासीत्यादौपूरणप्रत्यया
र्थाविवक्षयात्तृतीयेपक्षेतृतीयमासइत्यादिरर्थः वाक्यांतरेषुस्पष्टंतथोपादानात् तेषांचतृतीयमासादीनामधिकरण
त्वासमस्तानामेवांगत्वंनतुतदुत्तरमृततिथेःपूर्णइत्यश्रवणात् क्वचित्संवत्सरान्वयित्वेनश्रुतस्यवानुषंगेप्रमाणाभा
वात् मासंदर्शपूर्णमासाभ्यामित्यादिवृपसद्भिश्चरित्वेत्यस्येव तेनयत्क्वचिन्मासिषष्ठेगतइत्युक्तंतत्रमूलंनविद्मः पैठी
नसिरपि संवत्सरांतेविसर्जनंनवममास्यमित्येकइति विष्णुरपि मासिकार्थंचद्वादशाहंश्राद्धंकृत्वात्रयोदशेह्निवाकुर्या
न्मंत्रवर्जंशूद्राणांद्वादशेह्नीति ननुसाग्निकस्तत्रयदाकर्ताप्रेतश्चानग्निमान्भवेत् द्वादशाहेतदाकार्यंसपिंडीकरणंसुते
रितिगोभिलेनाहिताग्नेरेवकर्तुर्द्वादशाहविधानात् प्रेतश्चेदाहिताग्निःस्यादित्यादिवचनेनचाहिताग्निप्रेतविषयएव

तृतीयपक्षविधानात्कथमनयोः कर्तरिमितेचनिरग्निकेप्राप्तिः नचतत्रतयोरेवकालोनान्यइतीदृशोनियमोनान्यादृशइति
वाच्यं वसंतेब्राह्मणोग्निमादधीतेत्यादिषुयथाएकवाक्योपादानाद्ब्राह्मणादयोवसंतादिष्वेववसंतादिषुब्राह्मणादयए
वेतिद्वयोरपिकर्तृकालयोर्मिथोनियमस्तथात्रापिनियमद्वयस्यापिसंभवात्विषयउपन्यासः तत्रहिकर्तृकालविशेषवि
शिष्टाधानविधिषुविधेययोः कर्तृकालविशेषयोरेककार्यादरुणैकहायनीवद्युक्तोमिथोनियमः इहतुसपिंडीकरण
स्यवचनांतरविहितत्वेनाविधेयत्वात्क्रियानुवादेनचगुणद्वयविधेरसंभवात्स्पष्टंचयदाचेदित्यादिशब्दैः कर्तृप्रेतसा
ग्निकत्वस्यनिमित्तत्वेनोपादानात्कालनियमएववाक्यार्थः तेनतयोः सएवकालोनान्यः कालः सपुनरन्येषामपियुक्त
एव अतएवसाधारण्येनैवद्वादशाहविधायकंव्याघ्रवचनं आनंत्यात्कुलधर्माणांपुंसांचैवायुषः क्षयात् अस्थितेश्च
शरीरस्यद्वादशाहःप्रशस्यतइति कुलधर्माणांसपिंडीकरणाभावेऽनुष्ठातुमशक्यानांतृतीयपंचमवर्षाद्यनुष्ठेयचूडा
करणादीनामन्येषांचप्रतिकूलंव्यवस्थितानांमंगल्यानां अनेनसपिंडीकरणाधिकारिणावत्तदनुष्ठानंवृद्धिश्राद्धा
नंगयाक्रमपिकुलाचारादिप्राप्तंमंगल्यंकर्मनकर्तव्यमितिसूच्यतेशरीरस्यास्थितिः सपिंडीकरणसामग्रीसंपत्तिम
द्दशावस्थानाभावः परचक्राक्रमणनिमित्तपलायनादिनारोगादिनाकर्मकरणसामर्थ्यरूपस्थैर्यापेक्षयायस्थि
त्यभावोवा प्रशस्तत्वंचद्वादशाहस्यप्रकृतसपिंडीकरणविषयमीदृशंनियतकालमासिकोत्तरकर्तव्यतयोत्सर्गतः
संवत्सरांतएवानुष्ठेयस्यसपिंडीकरणस्ययदर्वाक्षण्मासत्रिमासादिष्वनुष्ठानंतदेतान्निमित्तयान्यतमसंभावनयातथा
चेदनंतरद्वादशाहएवतद्भवत्विति द्वादशांचतदहश्चद्वादशाहः सचमृतदिनावधिकएवद्वादशानामह्नांसंघातो
द्वादशाहः षोडशश्राद्धापकर्षकालइतिशूलपाणिः क्वचिन्मृतिदिनावधिकमेकादशमपिदिनंद्वयोर्निरग्निकयोः सपि
डीकरणकालत्वेनोक्तं तथाचचतुर्विंशतिमते सपिंडीकरणंचाब्देसंपूर्णेभ्युदयेपिवा द्वादशाहेपुकेषांचिन्मतेचैकाद
शेतथेति शक्यतेतुवक्तुं यातुपूर्वममावास्येत्यादिवचनैकवाक्यतयायमेकादशाहोदर्शात्मकः पिंडपितृयज्ञाधिका १५०

201/194

स्तिसाग्निककर्तृविषयइति यजमानोग्निमानित्यादिवचनैकवाक्यतयाद्वादशाहोपितद्विषयः किंनस्यादितिचेन्न आनं
त्यादितिवचनात्तस्यसर्वविषयत्वात् इदंहिवचनमायुःक्षयादिसंभावनानिमित्तंसपिंडनापकर्षविदधन्निरग्निकविषयमेव
साग्निककर्तृकसपिंडनापकर्षस्यपितृयज्ञादिनिमित्तत्वात् अत्रैकादशाहद्वादशाहशब्दावाशौचांत्यदिनोत्तरदिनतदुत्त
रदिनोपलक्षकाविति प्राङ्निर्णीतं यथाचायंसंभावितमुख्यकालाशक्तिनिमित्तः सपिंडीकरणापकर्षोद्वादशाहादि
पुतथावश्यकवृद्धिनिमित्तोप्यपकर्षः सर्वेषांगोभिलादिभिरुक्तः यदहर्वावृद्धिरापद्येतेति यद्यपिचात्रवृद्धिदिनेसपिंडी
करणंप्रतीयतेतथापिवृद्धिरापद्येत संनियतेतिव्याख्यानाद्वृद्धिसंनिहितेदिनेइतिद्रष्टव्यं वृद्धिश्राद्धस्यप्रातःकालि
कत्वात्सपिंडीकरणस्यचकुतपप्रभृतिकालत्वात् अतएवनागरखंडे पितुःसपिंडीकरणंवत्सरादूर्ध्वतःस्थितं वृद्धिवा
गामिनीचेत्स्यात्तदार्वागपिकारयेदिति उशनसापिपितुःसपिंडीकरणंवार्षिकेमृतिवासरे आधानाद्युपसंप्राप्तावेतत्प्रा
गपिवत्सरादित्येवोक्तं अयंचवृद्धिनिमित्तकः सपिंडनापकर्षो।वृद्धिश्राद्धार्थः सपिंडीकरणंविनापितृत्वप्राप्त्यभावेनश्रा
द्धस्यैवकर्तुमशक्यत्वात् अतएवशाट्यायनिः प्रेतश्राद्धानिसर्वाणिसपिंडीकरणंतथा अपकृष्यापिकुर्वीतकर्तानांदी
मुखंततइति नांदीमुखशब्देनहितादृशपितृदेवत्यंश्राद्धमेवोच्यते अपकृष्येत्यनुवृत्तावुशनाअपि वृद्धिश्राद्धविहीनस्तु
प्रेतश्राद्धानियश्चरेत् श्राद्धीसनरकेघोरेपितृभिःसहमज्जतीति वृद्धिश्राद्धोपस्थितिविहीनोयःप्रेतश्राद्धान्यपकृष्य
चरेदित्यर्थः अतएवचनपित्रादिसपिंडनस्यैवापकर्षस्तदर्थंकिंतुमातृमातामहादीनामपि तथाचनिरग्निकःसपिंडत्वंपि
तुर्मातुश्चधर्मतः पूर्णेसंवत्सरेकुर्यात्वृद्धिर्वायदहर्भवेदितिपुलस्त्यवचनेमातुरप्युपादानं उपलक्षणंचतत् अत्रचापि
त्रादिशब्दानांसंबंधिशब्दत्वात्प्रतिसंबंध्याकांक्षायांबुद्धिस्थः सपिंडीकरणकर्तैप्रतिसंबंधित्वेनप्रतीयते यथासप्तमंपदं
गृह्णातिउत्तरार्धात्स्विष्टकृतेसमवद्यतीत्यादिषुयादिनएकपदेशिनश्चाकांक्षायांएकहायनीपदित्वेनपुरोडाशादिश्चैक
देशित्वेनतथापिन्यायतुल्यत्वात्तंस्कार्यपित्रादीनामपिग्रहणं भ्रातृपुत्रादीनांपितृव्यादिभिःक्रियमाणेसंस्कारेतदंग

का०त०
१५१

श्राद्धेनेषामपि देवतात्वात् तथा कात्यायनः स्वपितृभ्यः पितादद्यात्सुतसंस्कारकर्मसु पिंडानोद्वाहनात्तेषांतस्याभावेतु
तत्क्रमादिति अत्रजातकर्मादिषु आपोद्वाहांतेषु सुतस्य सुतायावासंस्कारकर्मसु पितापिंडान्दद्यात्स्वपितृभ्य इत्ययंताव
दर्थः प्राप्तएवतथाहि संस्कारकर्मसु पिंडदानोपलक्षितंनांदीमुखश्राद्धंतावदमावास्याष्टका।वृद्धिर्निश्वातुपितॄन्श्राद्धं
कर्मवैदिकमाचरेदित्यादिभिः सामान्यवचनैर्वृद्धिश्राद्धप्रकरणलिखितैश्चविशेषवचनैः प्राप्तमेव तत्रचापितकर्तृत्वमपि पि
तैवोपनयेत्सुत्रंतदभावेपितुः पिता पितापितामहो भ्रातासकुल्योजननीतथेत्यादिभिः क्रमिकाधिकारिविधायकैः प्राप्तमेव
मन्वग्रंथांतरत्वादत्रापितस्यपुनर्भवतुविधिः कुलदेवतादिसंबंधंपितानामकुर्यादित्यादिवदितिवाच्यं तस्याभावेतुतत्क्र
मादित्येतदर्थमेतस्यवचनस्य तद्वचनोपजीवित्वात् एवंस्वपितृभ्य इत्यपिप्राप्तमेव सर्पिर्मधुनीप्राशयेत्तनामदद्यात् अन्नं
प्राशयेत्केशंवेशान्कारयेत् उपनयेत् संवत्समादिशेत् कन्यादद्यादित्यादिप्रयोजकव्यापाररूपसंस्कारविधिषुताव
त्पितुरेवप्रयोजकस्यनियोज्यतानतुप्रयोज्यस्यसंस्कार्यस्य यश्चप्रधानेषु संस्कारकर्मसु नियोज्यः सएवतदंगश्राद्धे
पीतितद्विधिगतेषु पित्रादिषु प्रतिसंबंध्याकांक्षायांतस्यैवान्वयोयुक्तः ननुचसंस्कारकर्मसु संस्कार्य एवाधिकारी
गार्भैर्होमैर्जातकर्मचूडामौंजीनिबंधनैः बैजिकंगार्भिकंचैनोद्विजानामपमृज्यत एतद्वाक्यप्रमितस्यतदकरणप्रयु
क्तदौर्ब्राह्मण्याद्यनर्थपरिहारस्यचफलस्यतद्गामित्वात् विशेषतश्चोपनयनेतस्यानुष्ठानार्थाय ज्ञानोपकारेण
माणवकार्थाध्ययनार्थत्वात्संस्कर्तातुपित्रादिस्तत्रार्त्विक्स्थानीयः अतएवयजमानवत्संस्कार्यस्य संस्कर्तृप्रयो
जकत्वमपिउपनयनेश्रूयते हेमाद्रिस्मृतिमहार्णवाद्युदाहृतायां बुधस्मृतौ गर्भाष्टमवर्षेब्राह्मणंआत्मानमुपनाय
यीतएकादशेक्षत्रियोग्रीष्मेद्वादशेवैश्यावर्षास्विति छंदोग्योपनिषदि चसत्यस्यजाबालस्यात्मानमुपनाययितुंगौ
तमंप्रतिगमनं कन्यानामपिचस्वगतानर्थपरिहारार्थंस्वविवाहंप्रति कारयितृत्वमितिहासेषुदातुरभावेतंप्रतिस्व
यंकर्तृत्वंचगम्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरमित्यादिषु स्मर्यते यश्चाधिकारीसएवनियोज्यइतिसंस्कार्य १५१

293
154

स्यैवसंभवंतः पितृमातृमातामहाद्यानांदीश्राद्धदेवतात्वेन प्राप्नुयुर्नतुसंस्कर्तुः पितुरितिस्वपितृभ्यइति विधातव्यमेव अत्रोऽ
च्यते सत्यमस्तिसंस्कारेषुसंस्कार्यस्यफलभागित्वरूपोधिकारः नतुस्वकर्तृत्वपूर्वकंकर्मभावविरोधात् अतएवनमुख्यः यो
हिकर्तासन्फलभाक्सएवमुख्योधिकारी नचसाक्षात्कर्तृत्वेकर्मभावेन विरोधः प्रयोजककर्तृत्वंतु कर्मभूतस्यापिमार्जनास
विवसंभवत्स्यैवेतिवाच्यं अखिलव्यापारघटितेहि अंशभावनात्मके प्रयोगेकामिनः कर्तृत्वेनयोगेसातिकेषुचिदर्थादेवपारि
क्रयाम्नानबलाद्वान्यप्रवेशेसतिकामिनस्तद्वारकंकेषुचित्प्रयोजककर्तृत्वमाश्रितं नत्विहतथाऽध्ययनविधिनोपनयनवि
शिष्टाऽध्येतुर्नियोगायेनोपनयनेतस्यसाक्षात्कर्तृत्वासंभवात्प्रयुक्त्यातदाश्रीयेत आधानाधिकरणे उपनयस्याधानवत् यन
स्वविधिप्रयुक्तव्यवस्थापनात् पर्यवसितत्वूपनयनविधौतस्यत्वाभ्युक्त्याप्रकरणाद्वाऽध्ययनांगत्वमपीत्येतावानाधाना
द्विशेषः नियमविधित्वमप्युपनयनविधेरध्ययनाधानविधिवत्फलत एवनतुवाक्यार्थतः अध्ययनाविनियुक्तब्राह्मणा
द्युद्देशेनयागाविनियुक्तव्रीह्याद्युद्देशेनेवावघातादे विधानात् उपनयनविधिपूर्वकत्वादध्ययनेब्राह्मणादिविनियोगस्य
यत्तुकश्चिदुपनयनेयस्यप्रयोजकव्यापारश्रवणंतदपिनतत्परमेव अर्थप्राप्तत्वात्पित्रादयोहिपुत्रादिसंस्काराकरणस्योप
पातकत्वात्तत्प्रयुक्तानर्थपरिहारायपुत्रादिसंस्कारेषुस्वतएवप्रवर्तंते तदलाभेन्यस्यकस्यचित्प्रवर्तनंसंस्कार्येणप्रबुद्धेन
तद्धितकारिणावास्वतो योग्येनकेनचिदर्थप्राप्तमेव किंतुप्रयोज्यव्यापाररूपोपनयनमेव याजयेदितिवत् अतएवयाम्यम
पिगर्भाष्टमेद्वब्राह्मणमुपनाययेदित्याद्युपनेयातिरिक्तस्यापिप्रवर्तकत्वस्मरणंतथैव इदमेवाभिप्रेत्यमिताक्षरायांयाज्ञ
वल्क्यगतमुपनाययनपदंस्वार्थणिजव्याततयाव्याख्यातं नतुणिजंततया यदपिकश्चिदुपनेयायोपनेत्रेदक्षिणादानश्रव
णंतदपिद्दष्टसंभवत्वद्दष्टकल्पनानवकाशात्दानस्यर्थंभवतिश्राद्धियोदक्षिणादानात् नतुपरिक्रयवदुपनयने कर्तृत्व
निर्वाहकंमाणवकस्यतस्यैवाश्रवणादियुक्तं तस्मादध्ययनांगत्वात्संभवदपिनियोज्यत्वमुपनयनेपितावत्संस्कार्यस्यना
स्तिसंस्कारांतरेषुत्वसंभावितमेवेति संस्कर्तैवसर्वत्रनियोज्यः कर्तृत्वेन सोपिचनात्यंतमनधिकारी स्वाध्यायाग्निषु

तत्यागः अप्रयच्छत्समाप्नोति भ्रूणहत्यामृतावृत्यादिपुपुत्रदुहित्रादिसंस्काराकरणेदोषस्मरणात् तेनतदंगनांदीश्रा
द्धविधावपिसएवकर्ता कर्तुश्चप्राधान्यंवाक्यार्थेकर्मकारकादपि शाब्दिकानांप्रत्ययार्थत्वात् नैयायिकानामाक्षेपस्या
पिविशेष्यत्वात् मीमांसकैरपिकारकाणिप्रतिक्रियात्वाद्विशेष्यत्वद्रूपेसाध्यस्यचकर्मकारकस्योद्देश्यत्वरूपेप्रधान्येस
त्यपिऔत्सर्गिकाख्यातोपात्तसंख्यासंबंधसिध्यर्थमाख्यातोक्तप्रधानव्यापारसमवायित्वेनप्राधान्यस्यावश्यवाच्य
त्वात् अतश्चयथाअवाच्योपिकर्तृव्यापाररूपयाप्रधानभूतयाभावनयाव्यभिचाराद्विशेषरूपेणकारकांतरवैलक्षण्ये
नोपस्थापितःकर्तैवसंख्ययासंबध्यतेनकारकांतराणि तथापित्रादिशब्दार्थप्रतिसंबंधित्वेनापितस्यैवसंबंधोयुक्तो
नांदीश्राद्धविधौनतुसंस्कार्यस्येतिप्राप्तएवपितुःपुत्रादयस्तत्कर्तृकेश्राद्धे यदातस्यासंनिधानंतस्याप्यवश्यक
र्तव्यंतदपत्यसंस्कारंतत्प्रातिनिधितयायःकरोतिसोपिप्रतिनिधित्वादेवतदीयेभ्यएवपित्रादिभ्योददाति यदापितुः
स्वरूपेणैवासत्वंतदायःपितामहभ्रात्रादिः क्रमलब्धाधिकारस्तदपत्यसंस्कारकर्ता तस्यातदंगश्राद्धेपूर्वन्यायेन
स्वपित्रादीनांदेवतात्वप्रसक्तौतेषांतस्याभावेतु तत्क्रमादिति संस्कार्यस्यपित्रादयस्तत्रतथाविधीयंतेतत्क्रमादिति
तच्छब्देनसंस्कार्यपितापरामृश्यतेतस्येतिवत् संस्कार्यपितृक्रमात्तमारभ्यतेषांपित्रादीनांदद्यादित्यर्थः उपलक्षणं
चैतन्मातृमातामहगणस्यापि नचतस्याभावेत्यत्रापिस्वपितृभ्यइत्यस्यैवानुषंगः तेषामित्यनेननैराकांक्ष्यात् तुश
ब्दानांजस्यात्व अपिनाहितदाभाव्यं तेषामित्यनेनचकेवलाःपितरःपरामृश्यंतेननुस्वपदार्थविशिष्टास्तत्क्रमा
दित्यतद्विरोधात् नचवतत्क्रमादित्यस्यसंस्कार्यपितृप्रत्यासत्तिक्रमादित्यर्थः तत्पदेलक्षणापत्तेर्वैयर्थ्यप्रसंगाच्च
अधिकारिक्रमस्यवचनांतरेणैवसिद्धत्वा किंचयदासर्वोपिसंस्कर्तास्वपितृभ्यएवदद्यात्तदापितास्वपितृभ्यइत्य
विशेषकमेवप्रसज्येतेति तेनसंस्कार्यपित्रादीनामपिसपिंडीकरणंतत्संस्कारोपस्थितौतदंगश्राद्धार्धमपकृष्य १५२
कर्तव्यंतत्संस्काराधिकारिणा अतएवभ्राताभ्रातृपुत्रोवासपिंड्यःशिष्यएववा सहपिंडक्रियांकृत्वाकुर्याद

295
194

भ्युदयंततइतिलघुहारीतवचनमपिमृतस्यभ्रात्रादयस्तत्सपिंडनंकृत्वैवतदपत्यसंस्काररूपमावश्यकमभ्युदयंकुर्युरिति
व्याख्येयं व्याख्यातंचतथाशूलपाण्यादिभिः नतुस्वापत्यसंस्कारादिरूपमभ्युदयमिति महागुरोप्रेतभूतेवृद्धिकर्मकथं
भवेदित्याकांक्षायामनेनापकर्षविधानात् नचभ्रात्रादीनांभ्रात्रादिर्महागुरुः भवतिस्वापत्यस्य दृष्टार्थताचैवंवचन
स्यभवतिभ्रात्रादयश्चतादृशाएवयेसंनिहिताधिकार्यंतराभावान्मृतस्यसपिंडनाधिकारिणस्तदपत्यसंस्काराधिका
रिणश्चवक्ताप्रत्ययात् पुत्रस्तुभ्रातृभगिनीसंस्कारंस्वापत्यसंस्कारंवापित्रादीनांसपिंडनंकृत्वैवकुर्यादितिवचनांतर
सिद्धमेवत्यत्रतदग्रहणं नचापितरौतुमृतौयस्यदेहस्तस्याशुचिर्भवेत् नदैवंनापिवापित्र्यंयावत्पूर्णोनवत्सरइतिदे
वीपुराणवचनान्मातापितृतिमृ संवत्सरेतदपत्यानांतत्पुत्रस्यवास्वापत्यानांकथंसंस्काराभवंत्वितिवाच्यं अशुची
त्वाभिधानस्यानावश्यककर्मविषयत्वात् अपकर्षस्यचावश्यकवृद्धिविषयत्वात् अतएवाधानाद्यपसंप्राप्ताविं
त्युक्तं अतएवचलघुहारीतवचनशेषेपि तथैवकाम्यंयत्कर्मवत्सरात्प्रथमादृतइति काम्यमनावश्यकमपिकर्मवत्सरात्प्रथमा
दृतेतदुत्तरंसपिंडनंकृत्वैवकुर्वीतनतुप्रथमवर्षेसपिंडनमपकृष्य अपकर्षनिमित्तत्वंकाम्यस्यनास्तीत्यर्थः कृतेत्वावश्यकवृ
ध्यर्थमपकर्षेपश्चात्तदपिभवत्वितिशूलपाणिः अन्येतुकाम्यमनावश्यकंकर्मापिसपिंडीकरणंकृत्वैवकुर्वन्तप्रथमसंव
त्सरेतुकृतेपिकेनचिन्निमित्तेनार्वाक्सपिंडनेनकुर्वीतकिंतुतदुत्तरमेवेतिव्याचक्षते तेषामप्यभ्युदयेकाम्येचश्राद्धा
गत्वरूपंविशेषणदानात्श्राद्धनिमित्तकएवायमपकर्षस्तथाचप्रमीतभ्रात्रादिदैवत्यंश्राद्धंयत्रांगंतादृशएवाभ्युदयःका
म्यंचेतिसंमत यस्यकस्यापिसपिंडस्यसपिंडनाभावेयेनकेनापितत्सपिंडनेनतदसंबंधश्राद्धांगकमपिस्वपुत्रोत्सवादिनक्रि
यंततदुपस्थितौचानधिकारिणापितदाकृष्यक्रियतइति यत्केषांचिदाचरणंदृश्यतेतत्रमूलंनविद्मः अधिकारिणातुप्र
मीतदेवत्यश्राद्धांगकावश्यकाभ्युदयोपस्थितौतत्पूर्वादिदिनेष्ववशिष्टषोडशश्राद्धपूर्वकंसपिंडीकरणमपकृष्यकर्त
व्यमेवेति ज्येष्ठासन्निधौकनिष्ठेनापिकर्तव्यंसपिंडीकरणं तेषुहिश्राद्धेषुकर्तृतायद्यपिज्येष्ठस्यैवफलस्वामित्वरूप

का०त०
१५३

स्त्वधिकारः सर्वेषामेवास्ति सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेदिति वचनात् कर्तृत्वांशे
च गुणभूते प्रतिनिधेर्न्याय्यत्वात् एवं सति यद्वाचस्पत्यादिभिरुक्तं ज्येष्ठे संनिहिते कनिष्ठेन स्वपुत्रादिसंस्कारोपसंस्थि
तौ पितरि मृते पि पितामहादिदैवत्यं श्राद्धं कर्तव्यं ब्राह्मणादिहते ताते पतिते संगवर्जिते व्युत्क्रमात्त्र मृते देयं येभ्य एव द
दात्यसाविति स्वस्य सपिंडनक्रियानर्हपितृपरत्वात् स्वपितृभ्यः पिता दद्यादित्यस्यापि तद्योग्यतापरत्वादिति तद्दृयं इदं च
सपिंडीकरणं यदाकेनापि निमित्तेन वत्सरांतादर्वाक् क्रियते तदा सर्वाणि षोडशश्राद्धानि तन्मध्यगतस्वकालकृतावशिष्टा
नि वा ततः पूर्वमपकृष्य कर्तव्यानि तदंतेति अग्नीषोमीयपशौ प्रयाजानामपकर्षः श्रूयते तिष्ठंतं पशुं प्रयाजैर्यजतीति
प्रकृतौ हविर्यासादितेषु स्वाल्प्रयाजाः इष्यंत तदिहापि पशुसंज्ञपनादूर्ध्वं हविरासादनोत्तरं प्रयाजाः श्रोदके न प्राप्तास्ते चा
त्र वचनाज्जीवत्येव पशावपकृष्यंते तत्र प्रयाजमात्रस्यापकर्षः किंवा प्रयाजांतस्यांगकलापस्येति संशये नावदायः प्राप्त
स्तावन्मात्रश्रुतेर्यद्विच प्रयाजांतस्यापकर्षः स्यात्तदा ततः पूर्वभाविनामप्यपकर्षः स्यात्तथा च व्यवहितानां तेषां प्रधान
कालीनत्वं न स्यादिति प्राप्ते ब्रूमः प्रकृते पदार्थानुक्रमस्य क्लृप्तत्वात्स क्रमाणामेव पदार्थानां चोदके नातिदेशात् व्युत्क्र
मे सति पूर्वेण पदार्थेनोत्तरपदार्थस्य बुद्धावनुपास्थापितत्वादनुष्ठानमेव लुप्येत तस्मात्प्रयाजांतस्यापकर्षः स्यादिति
तदंतन्यायस्यार्थः तदंतापकर्षन्यायात् यद्यपि च षोडशश्राद्धानां सपिंडीकरणस्य चनैकफलत्वं फलत्वं पूर्वेषां प्रेत
त्वनिवर्तकत्वात् सपिंडनस्य च पितृत्वप्राप्त्यर्थत्वात् ० तथा च देवलः एकादशादिभिः श्राद्धैर्मृतस्याप्यायनं भवेत्
सम्यक् संवत्सरे पूर्णे पितॄणां स्थानमृच्छतीति आप्यायनं तुष्टिः प्रेतत्वपरिहारः संवत्सरे पूर्णे क्रियमाणेन सपिंडीकरणेति शेषः
यमोपि यस्यैतानि न दीयंते प्रेतश्राद्धानि षोडश पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपीति सपिंडीकरणानंतरं हारीतः ततः
प्रभृति वै प्रेतः पितृसामान्यमाप्नुयात् विंदते पितृलोकं च ततः श्राद्धं प्रवर्तत इति विष्णुपुराणेपि प्रेते पितृत्वमापन्ने सपिं
डीकरणादन्विति अत एव न प्रयोगविधिरप्येको येन क्रमः कल्प्येत तथापि दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति वद्धा १५३

च निकएव षोडशानां सपिंडनक्रमः तथा च गोभिलः श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिंडनमिति वृद्धवसिष्ठोपि श्राद्धा
नि षोडशादत्त्वा नैव कुर्यात्सपिंडनं तद्दानात्तु कृते प्रेतः पितृत्वं न प्रपद्यत इति तद्दानो षोडशश्राद्धानि परित्यज्य कृतेपि स
पिंडीकरण इति शेषः शातातपोपि सपिंडीकरणं सा तु ज्ञेया प्रेतक्रिया बुधैरिति एवं क्लृप्ते क्रमे तदंतन्यायादपकर्षः वक्ष्यमाणे
तानि वचनान्येवापकर्षार्थानि औत्सर्गिकं वर्षांते सपिंडीकरणानुष्ठाने तस्य षोडशश्राद्धे तत्तत्स्य कालक्रमादेव सिद्धत्वा
त् तेषां चापकृष्यानुष्ठानसंभवे आशौचोत्तरं द्वादशस्वहःसु प्रागुदाहृतविष्णुवचनात् आशौचांत्यदिनोत्तरदिने वा
एकाहे द्वादशाथवेति वचनात् द्वादशानामपि मासिकानां त्वेकाहेनुष्ठानामेकादशाहस्तूप एव तस्मिन्संभवाति उत्तरत्राद्य
स्यैकादशे कृतत्वात्तन्न्यूनानामेवानुष्ठानं स्यात् तदुत्तरदिने वा मासिकानि स्वकीये तु दिवसे द्वादशेपि चेति वचनात् य
दा तु तदुत्तरं वृद्ध्यादिवशादपकर्षप्रसक्तिस्तदा यदि मृताहो लभ्यते तदा तत्रैवावशिष्टानुष्ठातव्यानि एकस्यापि तावत्स्व
कालानुग्रहलाभादितरेषामपि मृताहसामान्यकालत्वस्यानुग्रहात् संभवत इति न्यायात् मृताहालाभे तु सपिंडनदिन
एव तन्निमित्तस्यापकर्षस्य तद्दिन एव कर्तुमुचितत्वात् अशक्त्यादिनिमित्तसपिंडनापकर्षार्थमपकृष्टेष्वेषु कृते सपिंडी
करणे यावंत्यपकृष्य कृतानि स्वकाल आगते पुनः कर्तव्यानि दीर्घकालापदं मत्वा पक्षहोमे कृते सति तत्रांतराले यद्यप
त्कदाचिदपगच्छति काले काले पुनर्होमान्जुहुयात्प्राक्कृतानपीति वचनात्पक्षहोमादाविव तथा चांगिरः सस्मात्संवत्स
रादर्वाक् सपिंडीकरणं कृतं मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति अत्र मासिकग्रहणं न त्रयं त्रैपक्षिकयो
रुपलक्षणं अर्वाक् संवत्सराद्यस्य सपिंडीकरणं कृतं षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतम इति गालववचनात् अत्र
षोडशग्रहणापि प्राप्तकालानामेव पुनरावृत्तिर्न स्वकालकृतानां अर्वाग्वाद्यं च यत्र सपिंडीकरणं कृतं तदूर्ध्वं मासिका
नास्याद्यथाकालमनुष्ठितिरिति कार्ष्णाजिनिवचनात् यद्यपीदं वचनमंगिरोवचनं च केवलं सपिंडीकरणं द्वादशाहा
दौ कृत्वा मासिकानि स्वकाल एव कर्तव्यानि न त्वपकृष्येत्येतदर्थकतयाभासते अत एव लघुहारीतोपि प्रेतसंस्कारकर्मा

का०त० णिप्रेतश्राद्धानिषोडश यथाकालंतुकार्याणिनान्यथामुच्यंतेततइति कालविधानसामर्थ्यादेवैतस्यार्थस्यसिद्धत्वादपकर्षनि
१५४ रासार्थमेवेदंवचनं मिताक्षराकारोप्यमुमेवपक्षंमुख्यंमन्यते तदपकर्षपक्षंतुप्राग्वचनोक्तमनुकल्पंनतुद्विरावृत्तिं सपिंडीक
रणादर्वाक्कुर्वन्श्राद्धानिषोडश एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानितु सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः प्र
त्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपीतिवचनेयदातदाशब्दश्रवणादपितथावगम्यते स्वकालकरणापक्षेचप्रेतत्वनि
वृत्तिपूर्वकपितृत्वप्राप्तिः सर्वातएवनतुसपिंडनानंतरमेव शूद्रेणकृतेपिद्वादशाहेसपिंडनेत्रिंशद्दिनकर्तव्यदशमपिंडदा
नानंतरमिवस्पष्टश्चायमर्थउक्तआग्नेयपुराणे अर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत् प्रेतत्वमिहतस्यापिज्ञेयंसंव
त्सरंनृपेति तथापियेनसंभाव्यमानेनाशक्त्यादिनानिमित्तेनसपिंडनस्यापकर्षस्तेनैवनिमित्तेनषोडशश्राद्धानामपकर्ष
स्तावत्पुरुषस्यप्रसक्तः प्रसक्तेपितस्मिन्नशास्त्रीयकालंविनाकृतस्यशास्त्रीयकर्मणःफलाजनकत्वात्सपिंडनस्यतुय
त्किंचिच्छास्त्रीयकाललाभानुष्ठानेपितेषांकालाभावादनुष्ठानेप्राप्तेश्राद्धानिषोडशादत्वानैवकुर्यात्सपिंडतां श्राद्धा
निषोडशापाद्यविदधीतसपिंडतामितिवचनेनापकर्षविधिद्वाराकालेपिविहितेकिमितितेषामननुष्ठानं एवंसत्यप
कर्षविधानस्यपाक्षिकताक्रियेतयद्याहत्यानपकर्षविधानंस्यात्प्रत्युतनिषेधएवतस्य कार्ष्णाजिनिवचनमङ्गिरोव
चनंचगालववचनैकवाक्यतयापुनरनुष्ठानविधायकतयोपपन्नंतद्वदेवैतस्योपोद्बलकमेव लघुहारीतवचनंत्वश
क्त्यारोपेणानावश्यकत्वबोध्यर्थंवापकर्षानकार्यइत्येवपरंसत्वसंवत्सरांतातिरिक्तानांसपिंडीकरणकालानामनुकल्पत्वं
द्योतयति आग्नेयवचनमप्येवंविधापकर्षविषयमेव अशक्तिनिमित्तापकर्षविषयमिदंवृद्धिनिमित्तेत्वपकर्षनंत
रमेवप्रेतत्वपरिहारस्तदर्थमेवतत्करणादितितुशूलपाणिः अतएवापकृष्यकृतानांस्वकालेपुनरनुष्ठीयमानाना
मप्यपकर्षोवृद्ध्युपस्थितौस्मर्यतेशाट्यायनिनासपिंडीकरणादर्वागपकृष्यतानिअपि पुनरप्यपकृष्यंतेवृद्ध्युत्तरनि १५४
षेधनादिति निषेधश्चकात्यायनेनस्मर्यते निर्वर्त्यवृद्धितंत्रंतुमासिकानिनतंत्रयेत् अयातयामंमरणंनभवेत्पुनर

299
1942

स्यत्विति वृद्धिश्राद्धोत्तरंयदिमासिकानिनकुर्यात्तदाऽस्यमृतस्यमरणंपुनरयामंनूतनंभवेदन्यथास्यादितिनिंदा यदातदा
शब्दावपिकालवचनौनयादितदर्थंकोयेनसपिंडनात्पूर्वंपरस्ताद्वासकृदेवानुष्ठानद्योतकौस्यातां यदपिसपिंडीकरणादू
र्ध्वंनदद्यात्प्रतिमासिकमितिपरमतमुपन्यस्यएकोद्दिष्टविधानेनदद्यादित्याहशौनकइतिछंदोगपरिशिष्टंतदपिपुनरनु
ष्ठानविधायकमेव एकोद्दिष्टपदंचवार्षिकलक्षणार्थमितिव्याख्येयं परमतेनोक्तश्चपुनरनुष्ठाननिषेधोयेषामाधिकारि
णामुत्तरक्रियानावश्यकर्तव्यताताद्विषयः तस्मात्वृद्धिभिन्ननिमित्तकेसपिंडीकरणापकर्षेषोडशश्राद्धानिसपिंडना
र्थमपकृष्यकृतान्यपिपुनःस्वस्वकालेकर्तव्यान्येव सोदकुंभान्नदानंतुसपिंडनोत्तरमपिस्वकालएवकर्तव्यंअपकर्षवच
नाभावात् अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत् तस्याप्यन्नंसोदकुंभंदद्यात्संवत्सरंद्विजइतियाज्ञवल्क्यवचनाच्च
प्रेतशब्दस्तुनभवतितदर्थाभावात् वृद्धिनिमित्तेतुसपिंडनापवर्षतदर्थमपकृष्यतानिस्वस्वकालेपुनर्नकर्तव्यानिनि
षेधात् यदापितामहेप्रपितामहेअकृतसपिंडीकरणेपिताम्रियतेतदातयोःसपिंडनेनपितृभावेतत्पुत्रादिनासंपा
दितेतदभावेस्वयंवातंसंपाद्यपितुःसपिंडीकरणंकर्तव्यंयदितथाक्रियमाणेवर्षांतपर्यंतकालातिक्रमोनभवतिसं
भाव्यमानेपिकालातिक्रमेअप्राप्तपितृभावस्यपितामहादेःपार्वणदेवतात्वयोग्यत्वेनप्रधानस्यैवकर्तुमशक्यत्वा
दतिक्रांतेपिकालेप्रोषितावसितपुत्रःकालादपिचिरादपीतिवत्तथैवकर्तव्यमितियद्यपिन्यायेनप्राप्नोतितथापि
वचनादकृतसपिंडनाभ्यामपिताभ्यांपितुःसपिंडनमंतिमकालेकार्यं तथाचकात्यायनः असंस्कृतौनसंस्कार्यौ
पूर्वौपुत्रप्रपौत्रकैः पितरंतत्रसंस्कुर्यादितिकात्यायनोब्रवीत् पापिष्ठमपिशुद्धेनशुद्धंपापकृतापिवा पितामहेन
पितरंसंस्कुर्यादितिनिश्चयइति असंस्कृतौअकृतसपिंडनौपूर्वौपितामहप्रपितामहौ पापिष्ठं अकृतसपिंडीकं
शुद्धेनकृतसपिंडीकरणेनपापकृताअकृतसपिंडीकरणेनवापितामहेनसहशुद्धंसम्यक्कुर्यात् इतिशास्त्रीयो
निश्चयइत्यर्थः एवंकृतेदर्शश्राद्धमपितादर्शश्राद्धमपितादशाभ्यामपिताभ्यांसहकर्तव्यं नतुतर्थमपितयोःसपिं

डनंप्रतिक्षणीयमितिअपितेनैवोक्तं पितुःसपिंडतांकृत्वाकुर्यान्मासानुमासिकमिति एवंचसपिंडीकृताभ्यांपितामहप्रपि
तामहाभ्यांपितुःसपिंडनेकृतरांतदुत्तरंपार्वणकर्तव्यतासिद्धानिरग्निकस्यापि साग्निकस्यतुसपिंडीकरणमपितदर्थं
दशादर्वाग्भवतीत्युक्तं तत्सद्भावेचान्यान्यथापरपक्षिकादीनिभवंत्येवबाधकाभावात दर्शश्राद्धंगयाश्राद्धंश्राद्धंवा
परपक्षिकं प्रथमेब्देनकुर्वीतकृतेपितृसपिंडने दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकं प्रथमेब्देपिकुर्वीतयद्यस्या
द्धिमान्कृतइतिवचनद्वयंकेचित्पठंति अत्रसहगमनेनान्यथावास्त्रियाःपत्न्यासहसपिंडीकरणंभर्तर्यकृतस
पिंडनेपिप्रेतीभूतेनैवतेनसहतस्याःसपिंडनं यापिष्ठमपिश्रुद्धेनेत्यनेनतुल्यन्यायत्वात्सिद्धमितिशूलपाणिः अत
एवकेचिद्दाक्षिणात्यशिष्टाःसहगमनेपत्युःसपिंडनदिनेतेनसहैकप्रयोगेनतत्स्याअपिसपिंडीकरणमखंडपत्नी
पिंडंप्रेतीभूतस्यैवभर्तुःपिंडसंयोज्यताद्दशंभर्तृपिंडंत्रेधाकृत्वातसित्रादिपिंडत्रयेतस्यसंयोजनमितिप्रकारेणकु
र्वंति एकोद्दिष्टद्वयवैश्वदेवपार्वणार्घपात्रब्राह्मणोपादानेन परमार्थतस्तुपत्युःसपिंडनंतावन्मात्रोपयोगिपा
त्रोपादानेनकृत्वातद्दिनएवकालांतरेवाभिन्नप्रयोगंस्त्रियाःसपिंडनंकर्तव्यमित्युचितं आहत्यैकप्रयोगत्वस्य
प्रेतीभूतभर्तृपिंडसंयोजनस्यचविध्यदर्शनात तत्रापिपत्नीपिंडसंयोजनंपरमेकेनेभर्तृपिंडेनभवतुपत्याचैके
नकर्तव्यंसपिंडीकरणंस्त्रियाइतिवचनात सर्वत्रचपिंडसंयोजनंपिंडदानप्रयोगेपिंडोत्थापनपर्यंतंकृत्वाकर्तव्यं
निरूप्यचतुरःपिंडान्दत्वापिंडानितिपिंडदानभावनोत्तरत्वेनविधानात विष्णुनातुविसर्जनोत्तरमुक्तं उच्छिष्टसंनि
धौपिंडत्रयंकुर्यात्दिवपूर्वान्ब्राह्मणानाचांतान्दत्तदक्षिणांश्चानुव्रज्यविसर्जयेत ततःप्रेतपिंडमर्घ्यपात्रोदकवत्पिंड
त्रयेनिदध्यादितिद्वत्याद्यस्तुप्रासंगिकं अथत्रिपक्षादिक्रियमाणसपिंडनोपयोगित्वात्सेतक्रियास्तुनिषिद्धकाला
उच्यंते तत्रगार्ग्यः प्रत्यक्षशवसंस्कारदिनेनैवविशोधयेत आशौचमध्येक्रियतेपुनःसंस्कारकर्मचेत शोध ९५५
नीयंदिनं तत्रयथासंभवमेवतु आशौचविनिवृत्तौचपुनःसंस्क्रियतेमृतः संशोध्यैवदिनंग्राह्यमूर्ध्वसंवत्सराद्य

301
1942

दि प्रेतकार्याणिकुर्वीतश्रेष्ठंतत्रोत्तरायणं कृष्णपक्षश्चतत्रापिवर्जयेत्त्रदिनक्षयमिति प्रेतश्राद्धंप्रकृत्यगार्ग्यः नंदायां
भार्गवदिनेचतुर्दश्यांत्रिपुष्करे तत्रश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयादिति त्रिपुष्करयोगोरत्नमालायां विषमचरणधिष्ण्यं
भद्रातिथिर्यदिजायते क्रूरगुरुशनिदमापुत्राणांकथंचनवासरे मुनिभिरुदितःसोयंयोगत्रिपुष्करसंज्ञितस्त्रिगुणफ
लदोवृद्धौनष्टेद्धतेवमृतेथवेतिप्रेतक्रियामेवप्रकृत्यभारतेपिनक्षत्रेतुनकुर्वीततस्मिन्जातोभवेन्नरः नप्रोष्ठपदयोःका
र्यंतथाग्नेयेचभारत दारुणेषुचसर्वेषुप्रत्यरौचविसर्जयेत ज्योतिषेयानिचोक्तानितानियत्नेनवर्जयेदिति उक्तानिव
र्जयित्वेनतिशेषः प्रोष्ठपदेभाद्रपदोत्तराभाद्रपदे आग्नेयंकृत्तिका दारुणानिदारुणंचोरगंरौद्रमैंद्रंनैरृतमेववस्तु
कानिआश्लेषार्द्राज्येष्ठामूलानिप्रत्यरिर्यजमानपंचमतारा ज्योतिःपराशरः साधारणेध्रुवोग्रेमैत्रेनाशस्यतेमनु
ष्याणांप्रेतक्रियाकथंचित्त्रिपुष्करेयमलधिष्ण्येवेति साधारणेकृत्तिकाविशाखे ध्रुवाण्युत्तरात्रयंरोहिणीच उग्राणि
पूर्वात्रयंभरणीमघाचमैत्राणिमृगचित्रानुराधारेवत्यः यमलधिष्ण्यंधनिष्ठा कश्यपः भरण्यार्द्रातथाश्लेषामूलंत्रि
चरणानिच प्रेतकृत्येतिदुष्टाधनिष्ठाद्यंपंचकमितिवराहपुराणे चतुर्थाष्टमगेचंद्रेद्वादशेचविवर्जयेत प्रेतकृत्यंव्य
तीपातेवैधृतौपरिघेतथा करणेविष्टिसंज्ञेचशनैश्वरदिनेपिच त्रयोदश्यांविशेषेणजन्मतारात्रयेतथेतिजन्मतारा
त्रयमाद्यंदशममेकोनविंशंचतथा नंदायांभार्गवदिनेत्रयोदश्यांत्रिजन्मनि अत्रश्राद्धंनकुर्वीतपुत्रदारधनक्षयादित्यादय
श्चसावकाशश्राद्धमात्रविषयानिषेधाः प्रेतश्राद्धेष्वपिताद्दशेषुप्रवर्तंते त्रिजन्मनीतिजन्मनक्षत्रतारासु॥त्रयोदशीजन्मदि
नंचनंदाजन्मर्क्षतारांसितवासरंच त्यक्त्वाहारीज्येंदुकरांत्यमैत्रध्रुवेषुचश्राद्धविधानमिष्टमितिदीपिकावचनैकवाक्य
त्वात स्वकालेनुष्ठीयमानेषुनिरवकाशेषुतुनिषेधानामप्रवृत्तिर्गोभिलेनस्पष्टीकृता नंदायांशुक्रवारेचचतुर्दश्यांत्रि
जन्मसु एकादशाहप्रभृतिनैकोद्दिष्टंनिषिध्यतइति युगाद्यादिषुप्रेतकर्मणिसर्वनिषेधापवादः स्मृत्यंतरेयुगमन्वादि
संक्रांतिदर्शेप्रेतक्रियायदि देवादापतितातत्रननक्षत्रादिशोधनमिति इतिप्रातिदर्शिताःश्राद्धकालाः एवंप्रदर्शिते

का०त० युश्राद्धकालेषु तिथिप्रयुक्तश्राद्धेषु खंडात्तत्तिथिर्निर्णेतव्या तन्निर्णयश्चवेलापरपर्यायापराह्णाद्यहर्भागव्याप्त्यादिभिः कर्त
१५८ व्यः तदर्थंविधिनिषेधमुखेनश्राद्धवेलानिरूप्यते तत्रनिषेधमुखेनतावत् मनुः रात्रौश्राद्धंनकुर्वीत राक्षसीकीर्तिताहिसा
संध्ययोरुभयोश्चैव सूर्येचैवाचिरोदितइति नातिसंध्यासमीपतइतिच अत्रसंध्याशब्देन उदयात्प्राक्तनीसंध्याघटिका
त्रयमिष्यते सायंसंध्यात्रिघटिकास्वस्ताद्भास्वतइति परिभाषितासंध्यानगृह्यते किंतुमुख्यैव खंडरविमंडलोपलं
भयोग्यकालरूपा परिभाषितायाराज्यंतर्गततयातन्निषेधेनैवनिषेधसिद्धेः स्कंदपुराणे उपसंध्यंनकुर्वीतपितृयज्ञंकथं
चन सकालभास्करः प्रोक्तः श्राद्धंतत्रविवर्जयेदिति मत्स्यपुराणे सायाह्नः त्रिमुहूर्तः स्यात् श्राद्धंतत्रनकारयेत् राक्ष
सीनामसावेलागर्हितासर्वकर्मस्विति बौधायनः चतुर्थेप्राह्णेरप्राप्तेश्राद्धंयः कुरुतेनरः आस्तंगतइवंच्छ्राद्धंदाताचन
रकंव्रजेदितिहारीतः दिवसस्याष्टमेभागेमंदीभूतेदिवाकरे आस्तंगतइवतच्छ्राद्धंपितृणांनोपनितिष्ठतेइति एतेचन
निषेधाः तथात्वेशास्त्रीयप्राप्त्यपेक्षत्वेनतस्याश्चात्यंतबाधासंभवेनविकल्पापत्तेः नार्षेयंवृणीतेनानुयाजेष्वित्या
दिनामिव नचयथादीक्षितोनददातिनजुहोतिनपचतीतिनिषेधोग्निहोत्रहोमादिशास्त्रीयपदार्थगोचरोपिन
तद्विधिभिर्विकल्प्यतेकिंतुविशेषविषयत्वेनबलवत्त्वात्सामान्यविषयांस्तान् दीक्षितातिरिक्तपरान्करोति तथैतेपि
निषेधाएवसंतोमावास्यायांश्राद्धंकुर्वीतेत्यादिविधीन् रात्र्याद्यतिरिक्तपरान्कुर्वंत्विति वाच्यंवैषम्यात् दानहोमा
दिनिषेधोहि पुरुषार्थतद्धोचरत्वात् कर्त्रधिकरणन्यायेन पुरुषार्थतयाप्राप्तोपिप्रकरणात्क्रत्वव्यभिचारिदीक्षित
संबंधाच्चस्त्रीगमनंमांसभक्षादि पुरुषार्थमपिश्रितः प्रतिषेधः क्रत्वंगमिष्टः प्रकरणाश्रयादितिन्यायेनक्रत्वर्थः पु
रुषार्थदानादिविधिभिर्भिन्नविषयत्वाद्विकल्पानर्हस्तत्रसत्क्यभावात्तद्विध्यसंनिधानाच्चतच्छेषपर्युदासत्वानहीयु
क्तंयन्निषेधएवससामान्यविषयान्विधीन्बाधित्वान्यविषयाकरोतिइहतुवाक्यात्प्रकरणाच्च द्वयेपिश्राद्धाद्या
विकल्पाहोएवतिरात्रौश्राद्धंनकुर्वीतेत्यादीनांनिषेधत्वंसामान्यविषयैरपिनिषेधविध्यात्मनानार्थमवश्यंभावितद्विष १५८

303/194

यत्वेविधिभिः समंप्रसज्यतएवविकल्पः अत्यंतबाधेहितेषांपरमार्थतोनिषेधविषयाभिन्नविषयाएवतेभ्युपगंतव्यास्त
थाचप्राप्त्यभावान्निषेधानांविधित्वंनस्यात् नचानन्यशेषभूतानांसंभवद्विधित्वानांचनांतरिक्षेनदिवीतिवदनुपाद
त्वंयुक्तमितिपर्युदासाएतेनानुयाजेष्वित्यादिवत् यत्तुपर्युदासविचारावसरेनानुयाजेष्वित्यत्रसामान्यविध्येकवाक्य
त्वार्थपर्युदासलक्षणानविकल्पभियेतिसामान्यविशेषशास्त्रयोर्विकल्पोनदृश्यतइत्यतिदेशेपर्युदासासंभवइतिच
शूलपाण्यादिभिरित्युच्यतेतत्सर्वमाकरज्ञानप्रयुक्तंविकल्पभयादेवहिनानुयाजेष्वित्यत्र अतिदिष्टविषयेचनार्षेयंवृ
णीतइत्यादौकरोतीत्यस्यपर्युदासलक्षणाव्युत्पादितातंत्रेसामान्यविषयेणचपशौचोदकेनआज्यभागप्रापकेननतोप
शौकरोतीत्यस्यपर्युदासासंभवादावश्यकनिषेधत्वस्यविकल्पोगत्यांगीकृता दीक्षितोनददातीत्यादेश्चज्योतिष्टोमप्र
करणाधीतस्यप्रदेशांतरपठितैर्दानादिभिरनेकवाक्यभूतस्यापिगुणविधिविधयातदुपकारिणः पर्युदासत्वंभाष्यकारे
णतुपात्रवपंतीत्यनेनचवरुणप्रघासावांतरप्रकरणपठितेनानेकवाक्यभूतस्यनवैश्वदेवउत्तरवेदिमुपकिरंतिनशु
नासीरीयइत्यस्यवरैरपिचाभ्युपगतं एतेषांचपर्युदासत्वंषष्ठिनाड्यवच्छिन्नामावास्यादिविधिशेषतयाराज्यादीतर
मावास्यायामितीतिशूलपाणिप्रभृतयः तदयुक्तंपर्युदासोहिनञ्संबद्धतदितरसमस्तसमुदायिघटितसमुदायविष
यस्यसामान्यविधेस्तदितसमुदायिमात्रसंकोचनेनशेषोभवति नचरात्रिसंध्यादयस्तिथिरूपसमुदायघटकाः क्षणा
नामेकैकचंद्रकलाप्रवेशनिर्गमरूपैकलोपाध्यायच्छिन्नानामतंत्रीकृतावांतरसमुदायभावानांतद्घटकत्वात् भवंति
तु अहोरात्ररूपसावनदिवसात्मकसमुदायघाटकाः तथैवव्यवहारात् तथाहियावताक्षणसमुदायेनरवेरेकमुदयाच
लसंयोगमारभ्यापरउदयाचलसंयोगोभवतितावत्समुदायः सावनदिनत्वेनव्यवह्रियतेतथैवरवेरुदयाचलसं
योगमारभ्यास्ताचलसंयोगोयावताक्षणसमुदायेनभवतिससमुदायस्तदवांतरसमुदायभूताहस्त्वेन अस्ताचल
संयोगमारभ्योदयाचलसंयोगोयावतासमुदायेनससमुदायस्तादृशरात्रित्वेनव्यवह्रियते एवंसंध्याप्रातःसंग

का०त० १५७

वादयोपि अहोरात्रसमुदायत्वेनव्यवह्रियंतेनतुतिथिसमुदायित्वेन मध्याह्नापराह्णादिशब्दानांतुयोगवशात्स्पष्टमेवसाव
नदिनभागवचनत्वं अत्रत्याहुः शब्दस्यतद्वचनत्वान्मुहूर्तघटितत्वाच्च मुहूर्ताहिसावनस्यैवभागाः अह्नोमुहूर्ताविख्याता
दशपंचचसर्वदेवत्यादिनियमस्यान्यत्रानुपपत्तेः तेनरात्रिसंध्यादिभिन्नेऽमावास्यादिभागेइतिपर्युदासासंभवाद्रात्रिसंध्यादि
भिन्नेदिनभागइतिसावनदिनसंकोचनेनैषांपर्युदासत्वं नमुसावनदिनस्यविधेरदर्शनात्तत्संकोचनेकस्यविधेः शेषाएतेप
र्युदासाः अमावास्यादिकालविधयएवतद्विधयइत्यदोषः तथाहिकेवलस्यापिवसंतादेर्निमित्तत्वश्रवणमजीवतोनुष्ठा
नासंभवाद्वसंताद्यवच्छिन्नजीवनपरंभवति तथाकेवलस्यामावास्यादेरंगत्वश्रवणमप्यहोरात्रंविहायकर्मकरणासक्ते
स्तद्वदहोरात्रपरमेवभवत्यमावास्यावत्यहोरात्रेश्राद्धंकुर्यादित्यादि अतएवसर्वकर्मसु अद्येत्येवंसावनदिनस्याधिक
रणत्वेनसंकल्पवाक्येउल्लेखः शिष्टानां अद्यसोमार्कग्रहणसंक्रांत्यादौसुतीर्थकइतिदानसंकल्पवाक्ये अद्यकृष्णाष्ट
मीप्राप्येतिचजन्माष्टमीव्रतसंकल्पवाक्येपुराणेष्वपि स्पष्टश्चविधिस्तुः श्रद्धयोपेतः सम्यक्पात्रनियोजकः रात्रेरन्य
त्रकुर्वाणः श्रेयः प्राप्नोत्यनुत्तममितिव्याघ्रपादवचनेतिथिविशेषानुपादानात्सावनदिनशेषतयैवरात्रिपर्युदासः
इदंचपर्युदासत्वमभ्युपगम्योक्तं वस्तुतस्तुरात्रौश्राद्धंनकुर्वीतेत्यादयोनिषेधाएवमुख्यत्वस्यानतुलक्षणयापर्युदासाः
निषेधत्वेपिविकल्पप्रसक्त्यभावात् वार्त्तिककृन्मतेदीक्षितोनददातीतिवत् नन्वुक्तंभिन्नविषयत्वात्तत्रनप्रसज्जते
विकल्पः इहतुसमानविषयत्वात्प्रसज्येतैवेति अत्रवदामि तत्रापिविकल्पाप्रसक्ताविदमेवबीजंयद्यावज्जीवो
पनिबद्धदानादिविधिप्रयुक्तामेवदीक्षितावस्थायामपिदानादिप्रसक्तिमपेक्ष्यसंभवादात्मलाभोनिषेधोनतद
वस्थायांविशेषतस्तत्प्राप्तिमपेक्षतेयेनतदर्थंतत्रापिसामान्यविधेः प्रवृत्तिमनुमन्यमानस्तदितरावस्थाविषयत्वकर
पालक्षणबाधासंभवात्तेनसहविकल्पेतेति दानादिकंपुरुषार्थंनिषेधश्चक्रत्वर्थइतिनिषेध्यनिषिद्धभिन्नविषय १५७
त्वोक्तिश्चैतदर्थमेव यदिहिदानादयोपिक्रत्वर्थाएवनिषेध्याः स्युर्नानुयाजेषुनार्षेयंवृणीतइत्यादीनामिवानुया

305
194

जादयस्ततस्तेषांतत्क्रत्वर्थतापरमार्थतस्तद्विषयविधिविनानसंभवतीतितादृशोविधिस्तादृशस्यनिषेधस्यापेक्षितएवेति
उत्सर्गश्चायंयः क्रत्वर्थोनिषेधः क्रत्वव्यभिचारिणंसंभवत्क्रत्वप्रयोगंवापदार्थमवलंबतइतिविकल्पप्रसंगादेवासंभवत्क्र
त्वर्थदानादिविषयत्वस्यतुदानादिनिषेधस्यस्त्र्युपगमनमांसभक्ष्यादिनिषेधस्येवाविरुद्धंक्रत्वर्थत्वं एवंचसतियद्यावज्जी
वंदानहोमादीन्निकुर्यात्तद्दीक्षितोनेतिवद्यदमावास्यादिमत्यरात्रेश्राद्धंकुर्यात्तद्रात्र्यादौनेत्यमावास्यादिमदहोरात्रगोचरसा
मान्यविधिनोपपत्तौरात्र्यादिनिषेधोनविशेषतस्तत्रतत्प्राप्तिकरंविधिमपेक्षतइतिनिषेधत्वेपिनात्रविकल्पप्रसक्तिः एते
नरात्रौस्नानकुर्वीततथादानंचरात्रिषु पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरित्यादयोनिषेधाव्याख्याताः ननुभवंत्वेते
पर्युदासानिषेधावाउभयथापिप्राप्त्यपेक्षाः प्राप्तिश्चसत्यपिसामान्यविधौश्राद्धेरात्र्यादिवेलानांनास्ति पूर्वाह्णेदैविकंश्रा
द्धमपराह्णेतुपार्वणंएकोद्दिष्टंतुमध्याह्नेप्रातर्वृद्धिनिमित्तकं आमश्राद्धंतुपूर्वाह्णेएकोद्दिष्टंतुमध्यतः पार्वणंचापराह्णेतु
प्रातर्वृद्धिनिमित्तकं शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षणः कृष्णपक्षापराह्णेतुरौहिणंतुनलंघयेदिति ऊर्ध्वंमुहूर्ता
त्कुतपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यते अपराह्णः पितॄणांत्वित्यादिब्रह्मपुराणशातातपमार्कंडेयम
त्स्यहारीतादिवचनैस्तत्तच्छ्राद्धभेदेषुतत्तद्वेलायांनियमितत्वात् अत्रोच्यते प्रातः संगवमध्यात्तत्समीपनिषेधस्तावत्प्रा
तर्वृद्धिनिमित्तकमित्येतद्वचनप्राप्तपुत्रजन्मातिरिक्तविवाहादिनिमित्तकवृद्धिश्राद्धविषयः प्रातः संध्यासमीपंचप्रथ
मोमुहूर्तः अचिरोदितपदेनापिसएवोच्यते। सूर्योदयमुहूर्तौवेतिशातातपवचनात् सायंसंध्यातत्समीपसायाह्नादि
निषेधश्चपार्वणविषयः तत्रपराह्णकालत्वात् अपराह्णस्यचद्वेधाविभागेत्रेधाविभागेचरात्रिपर्यंतत्वात् तथाचैवा
परः पक्षः पूर्वपक्षाद्विशिष्यते तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यते वासरस्यतृतीयेंशेइतिमनुवचनाभ्यामप
राह्णत्वाविशेषाच्च तादृशस्यापितस्यपार्वणांगत्वप्रतीतेः चतुर्थप्रहरसायाह्नदिवसाष्टमभागांत्यमुहूर्तानांचलारत
म्येनवर्ज्यत्वंद्रष्टव्यं यद्वाचतुर्थप्रहरनिषेधोल्पांतरत्वात्सायाह्नविषयएवरात्रिनिषेधस्यतुग्रहणपुत्रजन्मादिनिमि

का०त०
१५८

तश्राद्धविषयत्वंतथाचतस्यपक्षेननुष्ठानमपीतिकेचित् तस्यैवराहुदर्शनसंक्रांतिविवाहात्ययवृद्धिपुत्रस्नानदानादिकंकुर्युर्नि
निकाम्यव्रतेषुचेत्यादिदेवलादिवचनैः रात्रौप्राप्तत्वात्प्राप्तिसापेक्षस्यनिषेधस्यापिपरिशेषात्तद्विषयत्वेप्यसमानविषयत्वा
त् विवाहेचदानस्यैवान्वयोनत्वादिपदोपात्तस्यश्राद्धस्यतन्निमित्तश्राद्धस्यप्रातर्वृद्धिनिमित्तकमितिप्रातःकरणात्तत्ररात्रि
विधानानुपपत्तेः रात्रौविवाहेयदाप्रातर्वृद्धिश्राद्धंनकृतंतदारात्रावपिकार्यमितिशूलपाणिः दर्शश्राद्धप्रकरणगतस्य
मानवनिषेधस्यापरपक्षश्राद्धप्रकरणगतस्यचनचनक्तंश्राद्धंकुर्वीतेत्यापस्तंबीयस्यतदेकवाक्यतयानारभ्याधीतन्या
येनचतद्विषयाणामेवान्येषामपिग्रहणादिनिमित्तश्राद्धविषयत्वसंभवादिदंकेषांचिन्मतमयुक्तं प्रकरणबाधेपिस्वार
सिकसमानविषयत्वाभावाद्विकल्पस्यान्याय्यत्वाच्च तीर्थश्राद्धविषयोयंरात्रिनिषेधइत्यपरे ननुतत्रापिप्रकरणबाध
प्रसंगस्तुल्यः नलिंगेनैवप्रकरणबाधात् तथाहि यद्ययंनिषेधःप्रकरणात्सार्वर्णमात्रविषयस्तदाग्रहणादिश्राद्धेष्व
तिदेशात्तस्यप्राप्तिर्वक्तव्यासाचौपदेशिकनिमित्तस्वभावगतनिमित्तानंतर्यविरोधाज्जातेष्टाविवकालशौचयोर्नसंभ
वति नचयथातत्रशेषाविरोधेनानंतर्यबाधितेतदुपसंग्रहस्तथात्रनकिंचित्तस्यबाधकमस्तियेनातिदेशिकस्या
पिनिषेधस्योपसंग्रहःस्यात् तत्ररात्रिप्रसवविधिस्त्वनर्थकःस्यात् तेनयथानवैश्वदेवउत्तरवेदिमुपकिरंतिन
शुनासीरीयेइतिनिषेधिद्वयोरेवपर्वणोस्तत्कीर्तनसामर्थ्यादुपात्रवपंतीत्यत्रवरुणप्रघासावांतरप्रकरणबाधस्त
थात्रापि क्वाचित्कप्रतिप्रसवसामर्थ्यान्नियतापराह्णकालायांप्रकृतौरात्रेरप्राप्तेश्च तेनदर्शप्रकरणादुत्कृष्टस्या
स्यरात्रिनिषेधस्यनिमित्तस्वरसावगतनिमित्तानंतर्यवशादनियतकालानिनैमित्तिकश्राद्धान्येव जातेष्टाविति पु
त्रजन्मनावैश्वानरेष्टिनिमित्तककालविलंबायोगाज्जन्मानंतरमेवेष्टिरितिप्राप्तेब्रूमः स्तनप्राशनंतावज्जातकर्मा
नंतरंविहितंयदिजातकर्मणःप्रयोगेचवैश्वानरेष्टिर्निरूप्यतेततस्तनप्राशनस्यात्यंतविलंबात्पुत्रोविपद्येततथा १५८
सतिपूतत्वादिकमिष्टिफलंकस्यस्यात् तस्माज्जन्मानंतरंकिंतुजातकर्मणऊर्ध्वमिष्टिः यद्यपिजातकर्मानंतमेव

307
1942

तदनुष्ठानेनिमित्तभूतंजन्मसन्निहितंभवति तथाप्यशुचिनापिपित्रानुष्ठीयमानमंगविकलंभवेत् जातकर्मणितुविपत्तिपरिहा
रायतात्कालिकीशुद्धिःशास्त्रेणैवदर्शिताततोमुख्यसंनिधेरवश्यंबाधितत्वाच्छुद्धिलक्षणांगवैकल्यंवारयितुंआशौचो
र्ध्वमिष्टिंकुर्यादितिचविषयः तत्रापिग्रहणादिषुप्रतिप्रसवेनापोदितस्यतीर्थश्राद्धमेवस्थिरोविषयः ननुतत्रापिप्रतिप्र
सववाक्यानिपित्रव्येलिखितानि महाभारते भुक्तोवाप्यथवाऽभुक्तोरात्रावहनिखेचर नकालनियमोह्यस्तिगंगांप्राप्य
सरिद्वरामिति देवीपुराणे कालेवाप्यथवाकालेतीर्थश्राद्धंसदानरैः प्राप्तैरेवचकर्तव्यंपितॄणांचैवतर्पणं पिंडदानंच
तच्छस्तंपितॄणांचातिवल्लभं विलंबोनचकर्तव्योनचविघ्नंसमाचरेदिति काशीखंडे अकालेप्यथवाकालेतीर्थश्राद्धंच
तर्पणं अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेदिति सर्वेषामेवतेषांवाशब्दोपिशब्दश्रवणाद्गुरुंवाबालवृद्धौवेत्यादि
वत्स्वार्थतात्पर्यरहितानांवचनांतरनिषिद्धरात्रेरन्यत्रेतिवाक्यप्राप्तप्रातःसायाह्नादिगौणकालप्रतिप्रसवार्थत्वा
ददोषः तेनप्रातःकालेतीर्थप्राप्तिर्नकुतपापराह्णरूपप्रारंभप्रधानकालप्रतीक्षाकर्तव्या अविलंबेनैवश्राद्धंकर्त
व्यं सायाह्नप्राप्तेश्चनमुख्यकालोपगतइतितीर्थश्राद्धंनकर्तव्यंकिंतुयेनकेनापिप्रकारेणरात्रेःप्राक्कार्यमेव अत
एवकेपिशिष्टारात्रिभोजनोत्तरकालादौतीर्थप्राप्ताअपितच्छ्राद्धंनकुर्वंति एवंमुख्यकालंयावदस्यापिद्रव्यपात्रसंपत्ता
वपिद्रष्टव्यं तत्रापितीर्थद्रव्योपपत्तौचनकालमवधारयेदितिमुख्यकालप्रतीक्षानिषेधस्त्वेनप्रातःकालसायाह्नादे
रेवप्रतिप्रसवात् इदमपिप्रकृतिप्रकरणपठितस्यप्रकृताविवकथंचित्कार्यसंभवे अयुक्तमेवतेनप्रारब्धश्राद्धेदेवमानु
षप्रतिबंधादसमाप्तेयदिरविरस्तमियात्तदाप्रारब्धत्वाद्रात्रावपितत्समापनेप्रसक्तेनचनक्तंश्राद्धंकुर्वीतेतिनिषेधः
तथाचसामिकृतमेवस्थापयित्वापरेद्युःकृतांतात्समापनीयं। यजमानेनापितदुत्तरमेवभोक्तव्यंननुपूर्वदिनेइत्युत्तरसूत्रं
प्रारब्धेचभोजनस्यापरिसमापनादितीतिहरदत्तः प्रारंभश्चपूर्वेद्युर्निवेदनं यत्तुमाधवेनारब्धेचभोजनसमापनमि
ति अध्येतृभाष्याननुगतमापस्तंबीयपाठंलिखित्वाभोजनग्रहणस्यपिंडदानोपलक्षणत्वंसमापनग्रहणस्यचा

का० त०
१५९
रंभोपलक्षणं चमंगीकृत्य रात्रावथारंभस्य समाप्तिसांवत्सरिकस्याभ्यनुज्ञातेतरान्हिकाकरणप्रत्यवायस्य श्राद्धविप्रस्मृतकालेषु
नुष्ठानेनपरिहारसंभवान्निरुपपत्तिकस्वाछंदमात्रं अत्रपारमार्थिकः परिहारोभिधीयते अपराह्णविधिर्ननियमार्थएकत्त
क्तादिषुमध्याह्नादिविधिवत् किंतुफलातिशयहेतुत्वलक्षणप्राशस्त्यार्थः तथाचमनुः यथाचैवेत्यादि शातातपः दर्श
श्राद्धंतुयत्प्रोक्तंपार्वणंतत्प्रकीर्तितं अपराह्णेपितॄणांतुतत्रदानंप्रशस्यतइति आपस्तंबोपि मासिमास्यपरपक्षस्यापरा
ह्णःश्रेयानिति आपाद्यश्राद्धविषयः दृष्टांतसिध्यर्थः पूर्ववादश्च प्राशस्त्यार्थकएव श्रेष्ठंतत्रोत्तरायणंकृष्णपक्षश्चवतत्रा
पीति एवंसत्यपराह्णः पितॄणामपराह्णस्तुपैतृक अपराह्णेपितृक्रियेत्यादिस्मृतिस्मृतिषुयदपराह्णस्यप्राशस्त्यानालिं
गितंश्रवणंनियमार्थमिवप्रतिभातितदपिपूर्ववचनैकवाक्यतयाप्राशस्त्यपरमेव नतुउदितेदैवतंभानोपित्र्यंचास्तमि
तरवौ द्विमुहूर्तंत्रिरह्नश्चेतिदिनांतेपंचनाड्यस्तुपुण्याःप्रोक्तामनीषिभिः उदयेचतथापित्र्येदैवेचैवतुकर्मणीतिचसाया
ह्नस्यापिपितृकालत्वोक्तिस्तथासतिकिमर्थानचप्रतिषिद्धस्यप्रतिप्रसवार्थोनिषेधोह्यस्यतदानस्वतन्त्रपविषयःकिंतु
द्वेधात्रिधाविभागयोरपराह्णांतर्गतस्यतस्यमनुवाक्यात्पूर्वभागवदेवप्राशस्त्यप्राप्तौचतुर्धापंचधाविभागयोस्तस्य
स्यतन्निषेधोनतदपराह्णात्मकतत्पूर्वभागएवतत्संकोचार्थः सायाह्नःश्राद्धेऽपराह्णएवनप्रशस्तोनकिंतुराक्षसीवेला
रात्रिस्तत्तुल्यः अपराह्णएवतुतत्पूर्वभागःप्रशस्तइति सत्यं पूर्वाह्णस्यापिप्रातर्भिन्नस्यतदाश्राद्धकालत्वात्तदपेक्षया
प्राशस्त्यार्थातस्यपुनःपित्र्यकालत्वोक्तिरतएवशिष्टाअपराह्णेश्राद्धासंभवेसायाह्नएवतत्कुर्वंतिनतुसंगवइति यद्वा
प्रातरादिवत्श्राद्धांगत्वेनैवनिषिद्धस्यसायाह्नस्यगौणकालतयाप्रतिप्रसवार्थासाभविष्यतीतिनकोपिदोषइति एवं
सत्येकोद्दिष्टादिगोचरामध्याह्नादिविधयोपार्वणाविषयाअपराह्णसमभिव्याहारात्प्राशस्त्यविषयाएव तथाकुतपस्या
पिश्राद्धप्रारंभकालत्वंननियतंयेनतन्मुखेनापिवेलानियमस्तत्रस्यात् किंतुतदपिप्राशस्त्यार्थमेव तथाचम
त्स्यपुराणं अह्नोमुहूर्ताविख्यातादशपंचचसर्वदा तत्राष्टमोमुहूर्तोयःसकालःकुतपःस्मृतः मध्याह्नेसर्वदाय १५९

309
194

स्मान्मंदीभवतिभास्करः तस्मादनंतफलदस्तत्रारंभोविशिष्यतइति स्कंदवायुपुराणयोर्युक्तंयत्रगोपतिर्गोभिःकार्त्स्न्येनतपतिक्षणे स
कालःकुतपोज्ञेयस्तत्रदत्तंमहाफलमिति अन्यत्रापि मुहूर्तात्सप्तमादूर्ध्वंमुहूर्तानवमादधः सकालःकुतपोज्ञेयोपितॄणांदत्तमक्षय
मिति खड्गपात्रादिसाहित्येनप्रशंसनादपितद्देवप्राशस्त्यमात्रहेतुतागम्यते प्रभासखंडे मध्याह्नःखड्गपात्रंचतथानेपालकंब
लस्तथापंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः पापंकुत्सितमित्याहुस्तस्यसंतापकारिणः अष्टावेतेयतस्तस्मात्कुतपाइति
विश्रुताइति तथाचकुतपापराह्णादीनांश्राद्धोपक्रमप्रयोगयोःप्रशस्तकालमात्रत्वेननित्यवच्छ्राद्धार्थतयाकेनचिद्विधिनाऽ
नियमितत्वात्तत्रसर्ववेलानांप्रसक्तौयुक्तोरात्रिसंध्यादीनामनैमित्तिकसर्वश्राद्धेषुप्रातःकालेतुमध्याह्नंप्रकुर्वीतद्विजोत्तमः
नैमित्तिकेषुश्राद्धेषुनकालनियमःस्मृतइतिमाधवाचार्योदाहृताछिवराघवसंवादवाक्याच्चप्रातःकालविहितवृद्धिश्राद्धा
तिरिक्तेषुतेषुप्रातःकालस्यनिषेधः तेनरात्रिसंध्याद्वयतदंतिकप्रातःसायाह्नव्यतिरिक्ततदंतरालवर्तिमुहूर्तनवकमपिश्रा
द्धानामनैमित्तिकानांकालः तन्मध्येकुतपादिमुहूर्तपंचकंपार्वणेतिप्रशस्तं ऊर्ध्वंमुहूर्तादित्यादिवचनात् द्वेधाविभक्त
दिनापराह्णप्राशस्त्यप्रतिपादकस्यापिमनुवचनस्यसायाह्ननिषेधवशेनतत्रैवपर्यवसानाच्च अतएवकंगतंमधुकोनामना
स्वादयतीतिन्यायेनशिष्टानांप्रायस्तत्रैवश्राद्धानुष्ठानं एकोद्दिष्टेचमध्याह्नः सचात्रगांधर्वंहित्वाकुतपरौहिणात्मकंमुहू
र्तद्वयमेव प्रारभ्यकुतपेश्राद्धंकुर्याद्रौहिणंबुधः विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेदितिश्लोकगौतमवचनात् इदं
हिवचनंनपार्वणविषयंपूर्ववचनविरोधात् नापिशुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्विचक्षणः कृष्णपक्षापराह्णेतुरौहिणंतुन
लंघयेदितिवायुपुराणवत्तदुपक्रमविषयंप्रारभ्यश्राद्धंकुर्यादितिप्रारंभात्पृथक्श्राद्धकरणस्योपादानात् परिशेषादेकोद्दि
ष्टविषयमेवसायाह्नस्यचनिषिद्धस्यापिपुनर्विधानाद्गौणकालत्वमुक्तमित्युक्तं तत्राप्याद्यद्वितीयतृतीयमुहूर्तानांगौणगौ
णतरगौणतमतादिनाष्टमभागास्यमुहूर्तयोःपुनर्निषेधात् ननुसर्वथाअकालतारात्रिप्रातर्वत् स्वकालातिक्रमेकुर्याद्रा
त्रेःपूर्वंतथाऽवधिरितिव्यासवचनात् रात्रिरन्यत्रेतिवचनाच्च प्रातःकालस्तुपार्वणैकोद्दिष्टयोर्निषिद्धएव सायाह्नस्तुन

का०त०
१६०

विधानाभावात् नचाद्यमुहूर्तस्यपुनर्निषेधाच्छेषभागस्यगौणतयाभ्यनुज्ञागम्यतइतिवाच्यं तस्यसामर्थ्यात्वृद्धिश्राद्धविषय
स्योक्तत्वात् संगवस्त्वननिषिद्धोनापिप्रशस्तइति भवतुवैकोद्दिष्टवृध्यादिषुमध्याह्नप्रातरादिश्रवणंनियमार्थमेव पार्वणे
तुप्रकृतिभूतेकुतपापराह्णयोरुपक्रमप्रयोगकालत्वश्रवणंस्पष्टवचनैः प्राशस्त्यार्थमेवेतियुक्तस्तत्प्रकरणेनारभ्यवाश्रुतो
रात्र्यादिप्रतिषेधः कुतपस्यचनाडीद्वयात्मकस्ययद्भाद्धोपक्रमेप्राशस्त्यंतस्यविकृतिभूतेपार्वणेव्यवस्थास्मर्यतेमार्कंडेये
नशुक्लपक्षस्येत्यादि शूलपाण्यादिभिर्वायुपुराणत्वेनेदंलिखितं इदंहिवचनंशुक्लपक्षसंबंधिनांयुगमन्वादिसांवत्सरि
कादीनांसर्वेषांशुक्लपक्षपुरस्कारेणैवश्रुतानांवामाघपौर्णमास्यादिव्रीहियवपाकादिश्राद्धानांनसर्वस्यप्रयोगस्यपूर्वाह्ण
कालत्वंकृष्णपक्षसंबंधिनांचापराह्णकालत्वंविदधाति एकत्रापराह्णादेर्बाधप्रसंगादपरत्रचप्राप्तत्वात् नचकृष्णपक्षांशे
नुवादएवशुक्लपक्षांशएवतुसामान्यप्राप्तापराह्णादिबाधेनैवपूर्वाह्णविधिरितिवाच्यं अबाधेनोपपत्तौतस्यान्याय्यत्वा
त् द्वेधाविभक्तपूर्वाह्णांतर्गतस्यकुतपपूर्वभागस्यतादृशापराह्णांतर्गतस्यचतदुत्तरभागस्यपक्षभेदेनोपक्रमकालत्व
व्यवस्थापनेनतुनकस्यचिद्बाधोपेक्षितविधानंचलभ्यते रोहिणंतुनलंघयेदित्युपक्रमकालविधानएवसंगच्छतेउपक्र
मेरौहिणंनलंघयेत्तत्रवाकृष्णपक्षसंबंधिश्राद्धमुपक्रमणीयमिति विष्णुरप्युपक्रममेवपूर्वाह्णापराह्णयोःपक्षभेदेन
दर्शयति शुक्लपक्षस्यपूर्वाह्णेकृष्णपक्षस्यापराह्णेविप्रान्स्नातानाचांतानुपवेशयेदिति यत्तुहेमाद्रिणास्यवचनस्यपूर्वो
क्तमेवार्थमंगीकृत्यैकोद्दिष्टविषयत्वमप्युक्तं एकोद्दिष्टमपिपक्षभेदेनकुतपपूर्वोत्तरभागयोरुपक्रमणीयमितितद्विचार्य
तस्यतत्प्रथमभागएवोपक्रमणीयत्वात्तत्राव्यवस्थयाअप्राप्तेः तथाचव्यासः कुतपप्रथमेभागेएकोद्दिष्टमुपक्रमेत्
आवर्तनसमीपेवातत्रैवनियतात्मवानिति तत्रैवेति कुतपप्रथमभागएवपरामृश्यतेनकुतपोविशेषणत्वात् तत्रैवप्र
थमकलायामेवावर्तनसमीपेवेतिविकल्पः कुतपपरामर्शेनत्वत्तरभागविधावपिवाशब्दात्तस्यानुकल्पत्वंनतुपूर्वभा
गतुल्यत्वं तथात्वेकुतपोपक्रमविधानादेवैतस्यार्थस्यसिद्धावस्यानर्थक्यात् कदाचिद्गौणत्वेनगांधर्वेपितस्योप १६०
क्रमः तथाचशिवराघवसंवादेग्रहादिव्यतिरिक्तस्यात्तत्क्रमेकुतपःस्मृतः कुतपादथवाप्यर्वागासनंकुतपे

311
194

वेदिति इदंवचनमेकोद्दिष्टविषयमेवमध्याह्नांगके तत्रैवावैगुण्यात्तदंतर्गतगांधर्वविधानस्योचितत्वात् एतेनवचनद्वयस्यापि
पार्वणैकोद्दिष्टोभयविषयत्वंमाधवोक्तमप्यपास्तं यदपिमाधवस्यैवदैविकपित्र्यश्राद्धविषयतयापूर्वाह्णेदैविकंश्राद्धमपरा
ह्णेतुपैतृकमित्येतत्समानार्थतयाशुक्लपक्षस्येत्यादिवचनव्याख्यानंतदुत्प्रेक्षामात्रकल्पितं यदपिशूलपाणिनाशुक्लप
क्षसंबंधियुगाद्यादिश्राद्धंपूर्वाह्णेकृष्णपक्षसंबंध्यपराह्णेकर्तव्यं पूर्वाह्णस्योत्तरावधिरपराह्णस्यचपूर्वावधिरुक्तोरौहि
णंत्विति तेनशुक्लपक्षेनवममुहूर्तोपरिश्राद्धंनकर्तव्यंकिंत्वर्वागेवकृष्णपक्षेचतस्मात्प्राक्नकर्तव्यं तेनकृष्णपक्षपु
रस्कारविहितश्राद्धेषुरौहिणाख्योनवममुहूर्तोमुहूर्तत्रयात्मकोपराह्णश्चेतिमुहूर्तचतुष्टयंश्राद्धकालस्तत्राप्यपराह्णःप्र
शस्तःशुक्लपक्षपुरस्कारविहितश्राद्धेषुसंगवोमध्याह्नश्चेतिमुहूर्तषट्कंतत्रापिद्वेधाविभक्तपूर्वाह्णांतर्गतोभागःप्रशस्तः
अपराह्णेतुसंप्राप्तेअभिजिद्रौहिणोदये यदत्रदीयतेकिंचित्तदक्षयमुदाहृतमितिमत्स्यपुराणोक्तमभिदाख्याष्टममु
हूर्तरौहिणापक्रमापराह्णात्मकंमुहूर्तपंचकंतुमुहूर्तचतुष्टयापेक्षयाप्रकृष्टंअतएवोर्ध्वंमुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्ट
यंमुहूर्तपंचकंवापिस्वधाभवनमिष्यतइतिमत्स्यपुराणीयमेववचनांतरंप्रातःसायाह्नावधिपरिच्छिन्नंमुहूर्तनवकंतत्प
कृष्टमित्युक्तंतदपिपक्षद्वयसाधारण्येनैवप्रारंभप्रयोगकालत्वेनप्राप्तयोःकुतपापराह्णयोरबाधेनैवपूर्वोक्तविधयाशु
क्लकृष्णाव्याख्यानसंभवेसंपूर्णप्रयोगकालविधायकत्वेनविष्णुवचनविरुद्धस्यव्याख्यानस्यायुक्तत्वादयुक्तं रोहिण
स्यपूर्वाह्णावधित्वंत्वत्यंतायुक्तं पूर्वाह्णांतर्गतस्यैवहिकस्यचित्किंचित्भागव्यवच्छेदेनतंप्रत्यवधित्वंस्याद्यथातस्यैवस्वपू
र्वभाविकुतपोत्तरार्धव्यवच्छेदेनापराह्णंप्रति नत्वपराह्णांतर्गतस्यपूर्वाह्णंप्रतितस्माच्छुक्लकृष्णवाक्यस्यपूर्वोक्तमेवव्याख्या
नंसाधीयं शिष्टाचारानुमतंच नहिकेपिशिष्टाःशुक्लपक्षगतांत्यपौर्णमासीव्रीहियवपाकादिश्राद्धंपूर्वाह्णेरमाच
रंति एतेनैवतद्वचनसिद्धमेवार्थंयुगादिषुप्रतिपादयेत् इशुक्लेद्वेतथाकृष्णेयुगादीकवयोविदुः शुक्लेपौर्वाह्णिकेग्रा
ह्येकृष्णेचैवापराह्णिकेइत्येतदपिस्मृत्यंतरवचनंव्याख्यातं तदेवंनिषेधमुखेनश्राद्धवेलाप्रदर्शना निषिद्धरात्रिसं

ध्यादिव्यतिरिक्तोहर्भागस्येति तत्प्रसंगेनैव विधिमुखेनापि सादर्शितापूर्वाह्णे दैविकं श्राद्धमित्यादिवचनैस्तेषां च प्रयोजनमुक्तं प्रा
शस्त्यार्थानि नियमार्थान्येव चेति तत्र दैविकं श्राद्धं देवानुद्दिश्य क्रियते तत्तु दैविकमुच्यत इति विश्वामित्रोक्तं तस्यापि चश्राद्धत्व
मभियुक्तश्राद्धप्रसिद्धिविषयत्वद्रूपश्राद्धलक्षणकरणे चान्यत्र प्रपंचयिष्यते शूलपाण्यादिभिस्तु मातृकमिति पठितं पि
त्रादित्रयपत्नीस्तु भोज्यामातृः प्रतिद्विजाः स्त्रीणामेव तु तत्त्वस्यान्मातृश्राद्धमिहोच्यत इत्यनन्वितार्थं शंखनामलिखि
तवचनोक्तत्वेनोत्प्रेक्षितमन्वष्टक्यं च मातृकत्वेन व्याख्यातं तन्मेधातिथिकल्पतरुकारप्रभृतिप्रामाणिकनिबंधलिखि
तपाठेन शिष्टाचारेण च विरुद्धमित्युपेक्षणीयं पूर्वाह्णशब्देन चात्र मध्याह्नपूर्वभावी संभवो ग्राह्यः प्रातः व्यपदेशादत्रा
पि प्रातःकालनिषेधप्रवृत्तौ बाधकाभावाच्च आमश्राद्धं च पूर्वाह्णद्वयस्तत्रापि स एव कालात्प्रातःस्तनाद्धर्वं त्रिमुहूर्ता
तु यातिथिः आमश्राद्धं तत्र कुर्याद्विमुहूर्तापि वा भवेदिति व्याघ्रपादवचनाच्च अयं चामश्राद्धे पूर्वाह्णविधिर्द्विजातिक
र्तृकामश्राद्ध एव न तु शूद्रकर्तृकामश्राद्धेपीति हेमाद्रिः तथाहि अस्योभयविषयत्वे नित्यानित्यत्वेन वैषम्यं स्यात् द्विजा
शे आतिदेशिकापराह्णस्य नित्यं बाधेन नित्यत्वात् शूद्रांशे औपदेशिकस्य पाक्षिकबाधेनानित्यत्वात् कथं पुनर्द्वि
जकर्तृके आमश्राद्धे अपराह्णस्यातिदेशिकत्वं शूद्रकर्तृके चोपदेशिकत्वं इत्थं द्विजानां तावदन्नश्राद्धमेव नित्यवत्
श्रुतं आमश्राद्धं तु पाकासंभवाद्यपाधौ श्रुतमनित्यं शूद्राणां तु शूद्रः कुर्यात्सदैव हीति नित्यवच्छ्रुतं तदपि नित्यं त
था च प्रकृतावपराह्णविधिर्द्विजकर्तृकान्नश्राद्धे शूद्रकर्तृकामश्राद्धे चोपदेशात एव भवति साधारणः प्रोक्षणावघा
तादिविधिरिव व्रीहियवयागयोर्द्विजकर्तृकामश्राद्धे त्वनित्ये उपदेशातस्तथा भवितुमशक्नुवन्नतिदेशात् एव भवति क्र
येति न्यग्रोधमुकुजद्रूपस्य फलस्य पिष्टं चम्यते यत्रसो यं फलचमसः स च नैमित्तिकः राजन्यवैश्ययोर्निमित्तीकृत्य
विहितत्वात् सोमस्तु नित्यः उपाधिमनुपजीव्यैव सोमेन यजेतेति विहितत्वात् तस्य च नित्यस्य सोमस्य यथा याग १६१
साधनत्वं तथा फलं चमसस्यापि तदस्ति तस्मात्सोममभिषुणोति सोमं क्रीणातीत्यादयो यागद्रव्यसंस्कारविधयः

313
194

सोम इव फलचमसेपि प्रवर्तत इति प्राप्ते ब्रूमः नित्या अभिषवादिसंस्कारा नित्यं सोमं संस्कारं लब्ध्वा चरितार्थाः संतो ना
न्यं संस्कार्यं अपेक्षंते फलचमसंस्तु सोमविकारत्वात् पश्चाद्वीततो निरपेक्षाः संस्कारविधयो न तत्र प्रवर्तंते न चैता
वता संस्काराभावः चोदकेन तत्सिद्धेः तस्मात्सोममात्रसंबंधिनस्ते विधय इति क्रयाभिषवादिविधिरिव फलचम
सयोगे ततश्चायं पूर्वाह्णविधिर्नित्यानित्यत्ववैषम्यप्रसंगादुभयविषयो भवितुमशक्नुवन्विकल्पापत्तेरेव शूद्रा
मश्राद्धं परित्यज्य द्विजामश्राद्धविषयो भवति एवं सति मध्याह्नपरतो यस्तु कुतपः समुदाहृतः आममात्रेण तत्रैव
पितॄणां दत्तमक्षयमिति शातातपवचनस्यापि मध्याह्नोत्तरकालविधायकस्य सविषयकता भवति पूर्वाह्णस्यामश्राद्ध
मात्रविषयत्वे त्विदं निर्विषयं स्यादिति तदिदमापातरमणीयं तथाहि अग्निष्टोमतदितरसंस्थज्योतिष्टोमदृ
ष्टांतोपवर्णनात्सोमफलचमससाध्ययागदृष्टांतसंकीर्तनाच्चाधिकारिणद्वयव्युत्पादितस्यापि न्यायस्यायं विषयः
वस्याभिमतः तत्र न तावत्संस्थाधिकरणन्यायोत्र संभवति तथाहि किमग्निष्टोमसंस्थस्योक्थसंस्थचैस्येज्योतिष्टोम
स्य समानदीक्षणीयादिधर्मविधानं उताग्निष्टोमसंस्थस्यैव तदितरसंस्थस्य त्वतिदेशादिति भाष्यकारोपन्यस्तस्य वि
चारस्यायं तात्पर्यार्थो वार्तिकेदर्शितः किं यथा पौराडाशिककांडाधीता अग्न्यन्वाधानादयो धर्माः षण्णामथाग्नेया
दिभावनानां प्रकरणात्स्वोपदेशादेवांगं तथा दीक्षणीयादयो ज्योतिष्टोमभावनायास्तदाश्रितोक्थादिकरणकफल
भावनायाश्च उत ज्योतिष्टोमभावनाया एव ते यथोक्थादिभावनानां त्वतिदेशादिति तत्रोभयार्थत्वे यदा ज्योतिष्टो
मेन स्वापूर्वं कुर्यात्तदेत्थं यदा च तत्रैव कदाचिदुक्थादिभिः स्वफलापूर्वं कुर्यात्तदेत्थमिति नित्यानित्यशेषान्वया
धीनशेषनित्यत्वानित्यत्वगोचरतात्पर्यवैरूप्यापत्तेरंगानामाश्रयान्वयस्य पूर्वमवश्यं वाच्यत्वेनान्वययौगपद्या
संभवादाश्रयेणासंबध्यतदाश्रितगुणान्वयासंभवाद्गुणेनासंबंधाप्याश्रयान्वयसंभवाच्चाश्रयभूतस्य ज्योतिष्टो

मस्येवोपदेशतो धर्मा उक्थादिसंस्थानां त्वतिदेशतइति चतत्रनिर्णयः नचायंन्यायः प्रकृतेसंभवतितदाह्ययंन्यायः प्रकृ
तेस्याद्यदि अन्नश्राद्धाद्भिन्नमामश्राद्धंनामकर्मस्याततदपिचद्विजशूद्रकर्तृभेदेन तदाह्येवंवक्तुंशक्यतेद्विजान्न
शूद्रंचप्रतिनित्यत्वेनसमानयोरन्नश्राद्धशूद्रकर्तृकामश्राद्धयोरेवापराह्णयोधर्मा उपदेशतः समानाः द्विजान्नप्रत्ये
वानित्यस्यतत्कर्तृकामश्राद्धस्यतुवैषम्यान्नतथाकिंत्वातिदेशिकाइति नचश्राद्धभेदोत्रास्ति एकमेवदर्शश्राद्धं
तत्रान्नंनित्यवत्श्रुतंसाधनेसोमवत् आमंतुशूद्रकर्तृकत्वनिमित्तेनश्रुतमपिफलचमसवदनित्यमेव पाकाद
द्यसंभवादिनिमित्तेनापिश्रुतमनित्यमेव तत्रोत्तरंषरि [illegible] षाद्विजातिविषयमेवभवति नचापराह्णादधर्मा द्रव्यान्व
यिनः किंतुकर्मान्वयिनस्तच्चकर्मैकमेवेति एतेनफलचमसन्यायोपीहप्रत्युक्तः द्रव्यधर्मगोचरोहिसन्यायः अभिषवाद
योद्रव्यधर्मानित्यवच्छ्रुतानित्यवदेवज्योतिष्टोमापूर्वान्वितायावत्तद्रूर्वभाविनानित्येनसोमद्रव्येणैवद्वारेणन्वेतुमर्हति
नानित्येनफलचमसेन प्रोक्षणावघातादीनांत्वाम्नानतः प्रयोगतश्चव्रीहियवयोः समानत्वेन विशेषाग्रहणात्प्रयुक्त
स्तदुभयद्वाराकर्मान्वयइति नचापराह्णादयोद्रव्यद्वाराकर्मान्वयिनोयेनतन्यायगोचराःस्युः येतुद्रमीव्यंश अभिम
र्शनादयस्तत्रेष्यतएवायंन्यायउपदेशादन्ने आमेतुद्विजसंबंधिनिशूद्रसंबंधिनिवातिदेशादिति यच्चशातातपवचनंत
त्प्रत्युतद्विजातिविषयमेवप्रतीयतेमात्रशब्दादामस्यानुकल्पत्वप्रतीतौसत्यांद्विजान्नस्येवतस्यतथात्वात् किंचयदिपूर्वाह्णवि
धिर्न्यायादेवद्विजकर्तृकामश्राद्धविषयस्तदाशूद्रामश्राद्धस्यद्विजान्नश्राद्धसामानविध्यादेवकृतपोत्तरार्धाद्यपराह्ण
कालत्वसिध्यातद्विषयत्वेवैयर्थ्यापत्तेः सार्थक्यायद्विजामश्राद्धमेवविषयीकुर्यात्तुइदंआगस्याचपूर्वाह्णविधिना
विकल्प्येतेतिद्विजातिविषयत्वेपिपूर्वाह्णविधेर्विकल्पप्रसंगस्तुल्यः यदाचमात्रशब्दस्वरसाशातातपवाक्यंद्विजाति १६२
विषयमेवापद्यतेतदापूर्वाह्णविधेःप्रत्युततद्विषयत्वएवविकल्पःप्रसज्यतेनतुशूद्रविषयत्वे तदामश्राद्धउपदेशाद

315
1942

पिसामान्यविषयात्सावकाशाच्चप्राप्तस्यापराह्णस्यनिरवकाशविशेषशास्त्रविहितेनपूर्वाह्णेननित्यबाधसंभवादामश्राद्ध
त्वप्रयुक्तैरन्यधर्मैरितरधर्माणामिव तेनहेमाद्रिमात्रोप्यन्नमिदंयदिसाकरंतर्हिसर्वत्रामश्राद्धपूर्वाह्णविकल्पितंकुतपोत्त
रार्धादिकालंविधत्तांद्विजामश्राद्धएवचापूर्वाह्णविधिस्तुशूद्रामश्राद्धविषयएवास्त्वित्यलमनेन प्रातर्वृद्धिनिमित्तकमि
तिपुत्रजन्मातिरिक्तवृद्धिपरं पुत्रजन्मरूपवृद्धिनिमित्तकंतुतदनंतरमेवकर्तव्यं निमित्तस्वभावनिबंधनतदानंतर्योप
देशकेननैमित्तिकविधिनैवविशेषरूपेणसामान्यशास्त्रबाधात् न्यायप्राप्तार्थप्रपंचकान्येवपूर्वाह्णेवैभवेद्वृद्धिर्विनाज
न्मनिमित्तकंपुत्रजन्मनिकुर्वीतश्राद्धंतात्कालिकंबुधइत्यादीनिप्राजापत्यादिवचनानि वृद्धिःवृद्धिश्राद्धं अतएवरात्र्या
दिनिषेधोपिसामान्यरूपोत्रनप्रवर्तते उपोद्बलकंच राहुदर्शनेत्यादिदेवलवचनंपूर्वंदर्शितं न्यायप्राप्तानुवादत्वाच्चैवं
जातीयकानांवचनानांसंध्यारात्र्योर्नकर्तव्यंश्राद्धंखलुविचक्षणैः तयोरपिचकर्तव्यंयदिस्याद्राहुदर्शनं स्नानंदानंतपः
श्राद्धमनंतंराहुदर्शने आसुरीरात्रिरन्यत्रतस्मात्तांपरिवर्जयेदित्यादिवचनेषुकस्यचित्केकस्यनिमित्तस्योपादानमुपलक्ष
णमेवसर्वेषां अतएवाशौचसंनिपातेपिनपूर्वप्रवृत्तनिमित्तकमुत्तरप्रवृत्तेनोत्तरप्रवृत्तनिमित्तकंचापूर्ववृत्तेनश्राद्धजात
कर्मौर्ध्वदेहिकाद्यधिकारिणः प्रतिबध्यतेवचनमपिसूतकेतुसमुत्पन्नेपुत्रजन्मयदाभवेत् कर्तुस्तात्कालिकीशुद्धिःपूर्व
शौनशुध्यतीति सूतकादिग्रहणंचोपलक्षणंपूर्वोक्तादेवहेतोः तेनपूर्वप्रवृत्ताशौचमध्येभर्तृमरणेआशौचवतीनामपि
पत्नीनामनुमरणमपिभवति तस्यापिभर्तरिप्रेतेब्रह्मचर्यंतदन्वारोहणंचेतियस्यचभावेनभावलक्षणमित्यनुशिष्टसति
सप्तम्यानैमित्तिकत्वावगमाद्भर्तृसंस्कारप्रयुक्ततच्चितूपजीवित्वेननिरवकाशत्वाच्च फलश्रवणंतुनैमित्तिकत्वविरोधिनि
मित्तेनभाव्याशापूरण्यान्नैमित्तिकस्यापिफलाकांक्षत्वात् अतएवजातेष्टावार्थवादिकफलकल्पनयासंवलिताधिकारित्वं
तत्रयदिविधावर्थवादेवाफलंनश्रूयतेतदापापक्षयः फलंकल्प्येतसतितुतस्मिन्तदेवान्वीयते अकरणप्रत्यवायाभाव
स्यापाक्षिकत्वेनश्रवणास्यापिनैमित्तिकत्वेतदेवचप्रयोजकमंगसंकोचे तच्चेहाप्यस्त्येव सतिहिनिमित्तसंबंधेतदानंतर्यो

का०त०
१६३

पदेशकेन तद्विधिनैव विशेषरूपेण सामान्यशास्त्रविहितानामुपादेयानामनुपादेयानां वा तद्विरोधिनामंगानां भवति बाधः रजस्व
लायास्तु न भवति अशुचित्वादेव सर्वनित्यकाम्यकर्मनिषेधसिद्धेः नचकिंचिदाचरेदिति पुनर्निषेधस्य किंचिच्छब्दसमभिव्याहृतस्य
नैमित्तिकानामपि निषेधफलत्वात् सूतिकायाश्चोदक्याः सूतिकावापीत्यादिव्यवहारादुदक्यासमानधर्मत्वावगमात् किंच सू
तिकोदक्यामरणे नैमित्तिकप्रायश्चित्तादिविधानादनापाद्यमपि तदवस्थामरणमनर्थहेतुतयावगम्यते किमुतापाद्यमिति सा
वकाशोनुमरणविधिस्तद्भिन्नविषय एवोचितः नन्वाशौचे न्यायतः प्राप्तानामपि नैमित्तिकानां नित्यानि विनिवर्तेरन्निति वचना
देव निवृत्तिर्भवतु तेषामपि निमित्तसंबंधादावश्यकत्वपर्यायनित्यत्वावगतेः नित्यानामपि च नैमित्तिकत्वादन्यथा नित्यत्वस्यै
वासिद्धेः न चाकरणे प्रत्यवायश्रवणात्तत्सिद्धिः नित्यानां सतामकरणे प्रत्यवायस्मृत्या बोधनात् यत्तु केषांचिन्नैमित्ति
कानां तत्रानुष्ठानं तत्प्रतिप्रसवरूपवचननिबंधनमेव यावद्वचनमस्तु उच्यते नित्यं नैमित्तिकं काम्यं त्रिविधं कर्म वैदिकमि
ति परिपिठितानां नियतनिमित्तोपाधीश्रुतानां पंचमहायज्ञादीनामेव नित्यपदेन ग्रहणं कार्यकालं संज्ञापरिभाषयोरुपस्थान
मिति न्यायात् अत एव नित्यानीति संक्षेपप्रपंचवचनेषु पंचयज्ञविधानं च न कुर्यान्मृत्युजन्मनोः सूतके कर्मणां त्यागः सं
ध्यादीनां विधीयत इत्यादिषु तादृशानामेवोपादानं दृश्यते यानि तु नैमित्तिकानां केषांचित्प्रतिप्रसववचनानि तानि मंदमती
नां न्यायप्राप्तार्थस्पष्टीकरणार्थान्येव अत एव सूतके तु समुत्पन्न इति वचनमुपन्यस्य तुल्यन्यायत्वादुदकपिंडदानाद्यपीत्या
दि विज्ञानेश्वरप्रभृतिभिरुच्यत इति पुत्रजन्मनिमित्तं च श्राद्धदानादि नालच्छेदात्पूर्वमेव कर्तव्यं न तदुत्तरं तथा च मनुः प्रा
ङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयत इति हारीतोपि प्राङ् नाड्याः छेदात्संस्कारपुण्यार्थान्कुर्वंति नाड्यां तु छिन्नायामा
शौचमिति संस्कारे जातकर्मणि पुण्यार्थेषु च हिरण्यवस्त्रादिदानेष्वनधिकार इत्यर्थः आशौचस्यातिशयविशेषरूपस्येत
रकर्मानधिकारस्य च नालच्छेदात्पूर्वमपि सत्वात् विष्णुधर्मोत्तरेपि अच्छिन्नायां तु नालायां श्राद्धं वै पुत्रजन्मनीति यदि त १६३
त्र कथांचिदसंपत्त्या न जातं तदा सूतकोत्तरं जातेष्टिवत्कर्तव्यं तथा च बैजवापः जन्मनोनंतरं कार्यं जातकर्म यथाविधि

317
196

दैवादतीतकालं चेदतीते सूतके भवेदिति आशौचापगमे कार्यमथवा नियतात्मभिरिति विष्णुधर्मोत्तरमप्येतद्विषयमेव अत्र च प्रातः
कालस्तावत्पंचधाविभागेनैव दिनाद्यमुहूर्तत्रयात्मकः पक्षांतरेषु प्रातर्विभागाभावात् यत्तु त्रेधा चतुर्धा विभक्तदिनाद्यभागयोर
पि क्वचित्प्रातःशब्दप्रयोगः स गौण इत्युक्तं पर्वनिर्णये पूर्वाह्णश्च द्वेधा त्रेधा चतुर्धा विभागेप्यह्नः प्रथमो भागो यौगिकः अपराह्णो
पि द्वेधा त्रेधा विभागयोरावर्तनमध्याह्नापेक्षया तथा मध्याह्नश्च त्रेधा विभागे पूर्वापराह्णापेक्षया तथैव चतुर्धा पंचधा विभागसं
बंधिनोस्तु मध्याह्नापराह्णयोः पारिभाषिकत्वाद् द्वयं शोपि स्वीकार्यः मध्यत्वापरत्वयोरापेक्षिकत्वेन योगस्यान्यत्रापि संभवात्
तत्र संज्ञापरिभाषयोः कार्यविनियोगार्थत्वात्परिभाषयैव च तद्विषये रूढेरात्मलाभात्पारिभाषिकस्यैव मध्याह्नादेः सर्वविनियो
गेषु ग्रहणं स्यान्न तु यौगिकस्येति तस्यापि तत्र ग्रहणसिध्यं द्वेधा त्रेधा विभागयोर्योगसिद्धोप्यपराह्णादिः पुनः पारिभाषितो
पि आवर्तनात्तु पूर्वाह्णोथापराह्णस्ततः पर इति पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणामपि च यद्यपीयं
श्रुतिः पूर्वाह्णादीनां देवादिषु विनियोगफला तथाप्यह्नस्त्रेधा विभागं तेषां च विभागानां पूर्वाह्णादिसंज्ञत्वमपि द्योतयति
श्राद्धे च सर्वपक्षसंबंधिनोऽपराह्णस्य ग्रहणद्योतकानि दृश्यंते तथा चैवापरः पक्ष इति द्वेधा विभागसंबंधिनः वासरस्य तृती
यें श इति त्रेधा विभागसंबंधिनः चतुर्थे प्रहरे प्राप्त इति चतुर्धा विभागसंबंधिनश्चतुर्थप्रहरात्मकस्य सायाह्नस्य श्राद्धे निषे
धस्तादृशस्यैवापराह्णस्य तदंगत्वद्योतकः पंचधा विभागस्तु श्राद्धप्रकरण एवाह स्योक्तो मत्स्यपुराणे प्रातःकालो मुहूर्तांस्त्री
न्संगवस्तावदेव तु मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततः परं सायाह्नस्त्रिमुहूर्तः स्यादित्यादि यद्यपि चैतानि द्योतकानि स्मा
र्तानि श्रुतौ तु पूर्वाह्णो वै देवानामित्याद्यभिधाय तस्मादपराह्णे ददातीति साक्षात्त्रेधा विभागस्तथापि तस्य पिंडपितृयज्ञविशे
षयत्वात्तदुत्तरभाविन्याहिताग्निपार्वण एव तादृशापराह्णनियमो न सर्वत्रेति एवं तत्तच्छ्राद्धगोचरतत्तद्वेलानिरूपणे कृते ति
थिप्रयुक्तश्राद्धेषु स्वं स्वं तत्तिथिर्निर्णीयते तिथिप्रयुक्तानि श्राद्धानि प्रकारभेदेन द्विविधानि कानिचिदेकोद्दिष्टानि कानि
चित्पार्वणानि तत्र यद्यपि योगात् दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितमिति परिभाषया च मुख्यं पार्वणं दर्शश्राद्धमेव

का० त०
१६४

तदन्यस्यांतिथौनैवप्राप्नोतितथापित्रिपुरुषदेवत्यत्वेनतत्सदृशंप्रचुरप्रयोगविषयत्वात्तेनैवसादृश्येननिमित्तेनत्रीनुद्दिश्यतुय
त्तद्धिपार्वणंमुनयोविदुरित्यादिवचनैःपरिभाषितंचयत्क्रोणंपार्वणं तत्रतावदेकोद्दिष्टसाहित्येनसर्वातिथिनिर्णीयते मुख्य
पार्वणमात्रेत्वमावास्यापश्चान्निर्णेष्यते तत्रसर्वतिथिषुसपिंडीकरणपूर्वभाविमासिकमेकोद्दिष्टरूपंतदुत्तरभावितदाद्विकं
चैकोद्दिष्टरूपंपार्वणरूपंवाकाम्यंचप्रतिपद्धनलाभायेत्यादिवाक्यैर्विहितंपार्वणरूपंप्राप्नोति तत्रैकोद्दिष्टरूपेकुतपरोहिण
रूपमध्याह्नैकदेशव्यापिनी पार्वणरूपेचकुतपादिमुहूर्तपंचकव्यापिनीशुक्लपक्षपुरस्कारविहितेतदुत्तरार्धादिसार्धमुहूर्त
चतुष्टयव्यापिनीचतदतिरिक्तेतिथिर्ग्राह्या आरभ्यकुतपेश्राद्धंकुर्यादारोहिणाद्बुधइत्येकोद्दिष्टस्यतत्कालत्वात् ऊर्ध्वंमु
हूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यतइतिचपार्वणस्यतत्कालत्वात् कर्मणोयस्ययः
कालइतिवचनात् मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवे अपराह्णव्यापिनीयापार्वणेसातिथिर्भवेदितिविशेषव
चनाच्च यद्यपिचैतेपराह्णादयस्तत्रतत्रप्रशस्ताःकालानतुनियताइत्युक्तंतथापिविशेषवचनात्तिथिनिर्णयस्तत्व्याप्त्यै
वकर्तव्यं अनुष्ठानार्थत्वाच्च निर्णयस्यानुष्ठानस्यचकर्मगतमध्यास्त्वादन्यायेनतत्रैवोचितत्वात् अपराह्णग्रहणेन
चयद्यपिमुहूर्तपंचकं सार्धमुहूर्तचतुष्टयंवासंपूर्णपार्वणप्रयोगकालः यदिचतावत्कालव्यापिनीलभ्यतेतदाउदारः
कल्पस्तथापियदाताहृशीनलभ्यतेतदाप्रधानप्रयोगकालत्रिमुहूर्तात्मकापराह्णमात्रव्यापिन्यपिग्राह्यानिर्णयश्चत
तव्याप्त्यैवकर्तव्यस्तत्रैवकालव्याप्तिषट्पक्षसंभवादितिद्योतितं तत्रैकस्मिन्नेवदिनेकार्त्स्न्येनैकदेशेनवोक्तयोरेको
द्दिष्टपार्वणकालयोर्वर्ततेसैवतयोर्ग्राह्या दिनद्वयेवैषम्येणतदेकदेशव्याप्तौतदाधिक्यवती अपराह्णांशवचनमपि
मरीचेः अपराह्णव्यापिनीचेदाद्विकस्ययदातिथिः महतीयत्रतद्धि द्वांप्रशंसतिमहर्षयइति दिनद्वयेपिसाम्येनतदे
कदेशव्याप्तिस्तस्याएवतिथेःक्षयेण क्षयेणेतियदापूर्वापराह्णस्यचरमघटिकायामुत्तरापराह्णस्यप्रथमघटिकायां
तिथिस्तदासाम्येनैकदेशव्याप्तिःक्षयेणैवघटिकाचतुष्टयेनक्षीणत्वात् यदापूर्वापराह्णस्यचरमेघटिकात्रयेद्वितीय १६४

31/194

यस्यचाद्यघटिकात्रयेपिवर्ततेतदापिसाम्येनैकदेशव्याप्तिःतिथिस्तुनवर्धतेनापिक्षीयतेकिंतुसमैवयदापूर्वेद्युरपराह्णस्यद्वि
तीयांघटिकामारभ्यपरेद्युरपराह्णस्यचरमघटिकांविहायावशिष्टासुपंचघटिकासुतिथिर्वर्ततेतदापूर्वापराह्णस्यप्रथमघटि
कायामुत्तरस्यचरमघटिकांविहायावशिष्टासुपंचसुवर्तमानत्वात्साम्येनैकदेशव्याप्तिर्भवतितिथिश्चतदाघटिकाचतुष्टये
नवर्धतइतिवृध्यैकदेशव्याप्तिरितिबोध्यंसाम्येनवृध्याभावचतितत्रखर्वोदर्पस्तथाहिंसात्रिविधातिथिलक्षणं खर्वदर्पौप
रौपूर्वाहिंसास्यात्पूर्वकालिकीतिवचनान्निर्णयः खर्वःसाम्यवांस्तिथिः दर्पोवृद्धिमान् हिंसाक्षयस्तद्धानित्यगुणवचनस्या
पिसाप्रातिकलक्षणयाप्रयोगः अतएवलिंगात्यागोगंगाशब्दवत् तिथिलक्षणंतिथिस्वरूपंभावपरत्वेनखर्वादिशब्दानांव्या
ख्यानंपरोपूर्वकालिकीत्यनेनानन्वयादुपेक्षितं अत्रखर्वादीनांपरपूर्वविभागेनग्राह्यत्वाभिधानात्स्पष्टमेवखर्वत्वादीनां
ग्राह्यतिथिगतत्वं यदावृध्यादिनद्वयेप्येकोद्दिष्टकालंपार्वणकालंवाव्याप्नोतितदाक्षयाहश्राद्धेतावदाहबोधायनअपरा
ह्णव्यापिन्यतीतस्ययदातिथिः क्षयेषुवार्तुकर्तव्यावृद्धौकार्यातथोत्तरेति अपराह्णग्रहणमेकोद्दिष्टकालस्यमध्याह्नस्याप्यु
पलक्षणं कालद्वयव्यापिनीत्येवविवक्षितं अतएवसामान्यलएवपरिशेषात्साम्यविषयमिदंस्मर्तव्यवचनं उभहेतुव्यापि
नीचेत्स्यान्मृताहस्यतुयातिथिः पूर्वस्यान्निर्वपेत्पिंडमित्यांगिरसभाषितमिति अत्रक्षयवृद्धिसाम्यानिदिनद्वयेसंपूर्णका
लव्याप्तिवृध्येकनियतत्वात् तत्रातिथावसंभवेनग्राह्यतिथ्युत्तरतिथिगतानियात्याणि दर्शेचपौर्णमासेचपितुःसांवत्स
रेदिनं पूर्वविद्धमकुर्वाणोनरकंप्रतिपद्यतइति नारदीयपुराणंच उक्तंह्येतत्तत्रतत्रयत्कालव्याप्त्यानिर्णयपक्षेषुपूर्वोत्त
रविद्धाग्राह्यत्ववचनानिप्रवर्तन्तइति पैत्र्यंमूलंतिथेःप्रोक्तंशास्त्रज्ञैःकालकोविदैः यस्यामस्तंरविर्यातिपितरस्तामुपा
सते सायाह्नव्यापिनीयातुपार्वणेसाउदाहृतेत्यादीनिवचनान्यत्रोपोद्बलकानि यच्चोत्तरतिथेःसाम्येपूर्वतिथौबहुगुण
सत्वेपिदेवस्वामिवचनादुपक्रममारभ्यकृत्स्नकालव्यापिन्युत्तरैवग्राह्येत्युक्तंमाधवेनतदप्यार्षवचनैरेवपूर्वग्राह्यत्वनि
र्णयेनापास्तंवेदितव्यं यदपिमदनरत्ने उत्तरतिथिगतवृद्धिक्षयाभ्यांनिर्णयकंयद्बोधायनवचनंतत्साम्येनकर्मकालैक

देशव्याप्तिविषयं तत्रैवचोत्तरतिथिसाम्ये पूर्वा खर्वादिवचनं तु क्षयाहश्राद्धव्यतिरिक्तविषयं दिनद्वये संपूर्णकर्मकालव्याप्तौ तु स्कंदं
तुक्वचनात्सर्वदा पूर्वैवेत्युक्तं तदप्ययुक्तं वचनद्वये हि संपूर्णकर्मकालव्याप्ताविवस्पष्टं प्रतीयमानायां केनविशेषणेन बोधाय
नवचनमेकदेशव्याप्तिविषयं क्रियते एकदेशव्याप्तिविषयत्वे चैतस्य तद्गतयोः क्षयवृद्ध्योरुत्तरतिथिगतत्वं निःप्रमाणकं त
दातत्तिथिगतयोरेव तयोः संभवात् न च खर्वादिवाक्यवदत्रापि तत्तिथिगताविवतौ न तदुत्तरतिथिगताविति वाच्यं तथा स
त्येको द्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदनेति वचनात्सर्वापि त्र्यविषयेण तेनैव वाक्येन सिद्धौ क्षयाहि पुनर्वचनमनर्थकं
उपात्तयोः क्षयवृद्ध्योस्तत्समानार्थत्वात् साम्यस्यत्वनुपादानादेव वृद्धिगोचरपरपुनर्वचनस्य साम्यगोचरपरनिवृत्त
र्थत्वे तु परिसंख्यापत्तेस्तस्मान्मदुक्तमेव साधीयं मासिकेष्वपि आब्दिकवदेव निर्णयः तेषामपि मृताहकालकत्वात् मृ
ताहव्यतिरिक्तेषु तु काम्यादिषु दिनद्वये कालव्याप्तौ सर्वदा पूर्वैव मूलादिवचनेभ्यः प्रथमातिक्रमकारणाभावाच्च कुतप
स्यैवोपक्रमे प्रशस्तकालमात्रत्वेन मुख्यगौणसकलप्रधानकालव्याप्तेः पूर्वदिन एव लाभात् कुतपकालिकतिथिग्राह्य
त्ववचनानां च निरग्निकदर्शश्राद्धविषयत्वात् क्षयाहादिश्राद्धस्य च दर्शश्राद्धविकारत्वेपि तत्तिथिनिर्णयस्योपदेशादेव
संभवेनातिदेशानधीनत्वात् कालादर्शे तु क्षयाहश्राद्धव्यतिरिक्तविकृतिश्राद्धेषु दर्शश्राद्धवदेव तिथिनिर्णय इत्युक्तं ॥
एवं मन्वंतरादीनां युगादीनां विनिर्णयः महालयस्य पक्षस्य अष्टकानामपि स्मृत इति तत्र दर्शक्षयाहव्यतिरिक्तसामान्यश्राद्धतिथिनि
र्णयस्य सकलनिबंधकारैः कृतस्य विषयश्चित्यः दिनद्वये कर्मकालस्पर्शिनी उक्तन्यायवचनैः सर्वत्र पूर्वैव नव्यहव्यापिनी चेत्स्यान्मृ
ताहस्य यदा तिथिः पूर्वविद्धैव कर्तव्या त्रिमुहूर्तापि या भवेदिति मनुवचनाच्च यद्यपि व्याप्त्यभाव एकदेशसत्वेपि संभवति तथा
पि त्रिमुहूर्तापि या भवेदिति वाक्यशेषास्पर्शाभाव एवात्रसः माधवेन तु स्कंदं तु वचनमपि नव्यहव्यापिनी चेदित्येवं पठितं त
द्धेमाद्र्यादिसकलग्रंथविरुद्धं त्वेकभक्तादिवत्स्वकाल एव तत्र तिथ्यभावेपि कर्तव्यं तिथ्यादौ च भवेद्यावानिति वचनात्त
त्तिथिक्षयस्य पूर्वतिथौ प्रक्षेपेण यां तिथिं समनुप्राप्य अस्तं याती तिसा कल्य वचनेन च शास्त्रत्वस्तत्र तत्र तिथेः सत्वात् १६५

कृष्णपक्षतिथिपौर्णमासी विशेषव्रीहियवपाकश्राद्धतिथियुगादिमन्वंतरादि अष्टकानक्षत्रयोगादीनामप्ययमेवापि त्र्यनिर्णयः
यत्तु शुक्लपक्षस्य पूर्वाह्न इत्यादि पक्षभेदेन कुतपपूर्वापरभागोपक्रमविधायकं वचनं तदनुष्ठानार्थं न तु निर्णायकं कुतपोपक्रम
विधायकवाक्यवत् अस्यापि तच्छेषत्वात् निर्णयस्तु पक्षद्वयेप्यपराह्णव्याप्त्यैव यदपि द्वे शुक्ले इत्यादि निर्णायकमिव प्रतिभा
ति तदप्येतत्सामान्यवचनसिद्धस्यैवार्थस्य विशेषयोजनमात्रार्थमिति श्राद्धोपक्रमे ग्राह्ये इत्येवमनुष्ठानार्थतयैव व्याख्ये
यं अथवा शुक्लपक्षगता युगादिश्राद्धतिथिर्यदा पूर्वदिने कुतपोत्तरार्धमेवारभ्य प्रवृत्तोत्तरादिने त्रिमुहूर्तं किंचिदूनं वा वर्ध
ते तदा पूर्वोक्तनिर्णयेन प्रथमदिनगता ग्राह्यत्वेन प्राप्नोति तदपवादत्वेन कुतपपूर्वार्धरूपापूर्वाह्णव्यापिन्युत्तरा ग्राह्येति वि
धत्तां न च तदापराह्णशास्त्रस्याप्यं तद्बाधः अपराह्णेपि किंचित्तस्या विद्यमानत्वात्पिंडनिर्वापरहितस्य च साकल्ययुगादि
श्राद्धस्य कुतपपूर्वाह्णोपक्रांतस्य तावति काले मुख्येनानुष्ठातुं शक्यत्वात् कृष्णे चावापराह्णिके इति त्वनुवादः युगादिमात्र
विषयश्चायं शुक्लपक्षे ईदृशविषये पौर्वाह्णिकग्राह्यत्वविधिवाचनिकत्वात् हेमाद्रेस्तु मन्वंतरादिष्वपि शुक्लपक्षगता
स्वयं निर्णयः संमतः शूलपाण्यादिमतं तु पूर्वमुक्तमेवेति संगवकालिकयो रामदैविकश्राद्धयोरप्ययमेव तत्व्याप्त्यादौ
तिथिनिर्णयः सामान्यतिथिनिर्णयप्रस्तावव्याख्यात वृद्ध्यादिशब्दवशाद्दैवश्राद्धेपि खर्वादिवाक्यप्रवृत्तेर्दर्शितत्वात्
दिनद्वये तु कृत्स्नकर्मकालव्याप्तौ तदस्पर्शे च दैविके उत्तरा दैवकार्ये तिथिर्ग्राह्या यस्यामभ्युदितो रविः उदिते दैवतं भानो
वित्यादिवचनात् ननु पूर्वोक्तनिर्णयेन पूर्वापित्र्यत्वाभावेन तिथिमूलास्तमयादिवचनानामप्रवृत्तेरिति अथामावास्या
निर्णीयते तत्र येषां तावत्साग्निकानां पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः पिंड्यज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इ
त्यादिवचनबलादन्वाधानपिंडपितृयज्ञश्राद्धान्येकदिनकर्तव्यत्वेन नियतानि ते स्त्रेधा विभक्त दिनतृतीयभागरूपापरा
ह्णव्यापिन्याममावास्यायां श्राद्धं कर्तव्यं पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते वासरस्य तृतीयेंशे नातिसंध्या
समीपत इति छंदोगपरिशिष्टात् पिंडान्वाहार्यकमिति पिंडपितृयज्ञादनु क्रियमाणत्वात्तत्संख्येति अग्निहोत्रं जुहोती

त्वत्राग्निहोत्रशब्दस्यकर्मनामत्वे द्रव्यदेवतयोरभागस्यस्वरूपमेवनसिध्येत्ततोग्निदेवतारूपोगुणोनेनदविहोमेविधीयतइ
त्यग्निहोत्रशब्दोगुणविधायकइतिप्राप्तेब्रूमः अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंजुहोति सूर्योज्योतिर्ज्योतिःसूर्यःस्वा
हेतिप्रातरितिविहितेनमंत्रेणप्राप्तत्वाद्देवतानविधेया ततोग्निसूर्यदेवताकस्यसायंप्रातःकालयोर्नियमेनानुष्ठेयस्यकर्म
णोनामधेयं नचनामधेयत्वेसत्युद्भिदायजेतेतिवद्यागार्थेनकरणेनसामानाधिकरण्याग्निहोत्रेणेतितृतीययाभाव्यमि
तिवाच्यं अनुष्ठानाद्दर्ध्वंभाव्यर्थस्यसिद्धत्वाकारेणकरणत्वेपिततःपूर्वंसाध्यत्वक्तुं द्वितीयायायुक्तत्वादितिसंक्षेपःचाख्य
न्यायेननामधेयं तस्मात्तिश्च पितृयज्ञंतुनिर्वर्त्यविप्रश्चंद्रक्षयेग्निमान् पिंडान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकमि
तिमनुवचनात् चंद्रक्षयेमावास्यायांपरिशिष्टेतुराज्ञश्चंद्रस्यक्षयेष्टमेंशइतितदुक्तत्एवगृह्यतेशस्यतइतिसमभिव्याहा
रात् मासानुमासशब्दश्चवीप्सापर्यायस्तेनमासेमासेएवमित्यर्थः पितृयज्ञश्चानेनचयद्यपिपितृयज्ञस्तुतर्पणमिति
मनुवचनात्पितृतर्पणमप्युच्यते पितृयज्ञंतुनिर्वर्त्यतर्पणाख्यांद्वितोग्निमान् पिंडान्वाहार्यकंकुर्यात्श्राद्धमिंदुक्षयेसदेति
मत्स्यपुराणेचतदुत्तरकालत्वंदर्शश्राद्धस्योक्तं तथापिमनुवचनेतत्प्रख्यन्यायेननामधेयपिंडान्वाहार्यकशब्दबलात्पिंड
यज्ञंततःकुर्यादित्याद्येकवाक्यतयाचपिंडपितृयज्ञपरएवसः अनेकार्थोहिसः तत्रतर्पणबलिदाननित्यश्राद्धरूपत्वेक
ल्पिवप्रकारत्रययुक्तेपंचमहायज्ञांतर्गतेचप्रयोगात् तादृशस्यचैकस्मिन्प्रयोगेएकार्थपरत्वावश्यंभावेन्यतोनिर्णयसं
भवात् पिंडान्वाहार्यकनामनिर्वचनेनप्रशंसार्थंमानववचनांतरमपीदमेवतद्योतयति पिंडानांमासिकंश्राद्धमन्वाहा
र्यंविदुर्बुधाइति पिंडानांपितृयज्ञपिंडानामन्वाहार्यंतत्संबंधंतदवश्यकर्तव्यमितिप्रशंसार्थमुच्यते अवश्यकर्तव्यस्या
पिमासानुमासिकमित्यनेनैवसिद्धत्वात् नाप्यंगत्वार्थंस्तुतार्थत्वात् पितॄणामितिपाठेतुस्पष्टैवप्रशंसा यथान्वाहार्यमो
दनंदर्शपौर्णमासयोर्ऋत्विज्ञां तृप्त्यर्थंतथेदंदर्शश्राद्धंपितॄणामेकमासतृप्त्यर्थमिति तेनपिंडपितृयज्ञोत्तरानुष्ठेयत्वनि
मित्तकमेवपिंडान्वाहार्यकंमासाख्यानं मत्स्यपुराणेतुतर्पणाख्यपितृयज्ञोत्तरकालत्वमेवदर्शश्राद्धस्योच्यते तर्पणं १६६

चयद्यपिपितृयज्ञस्तुतर्पणमितिमनुवचनेमेधातिथिनाप्येकमप्याशयेद्विप्रंपित्रर्थंपांचयज्ञिकइतिमनुनैवोक्तोयोब्राह्मणभो
जनात्मकःपितृयज्ञस्तद्रूपत्वेनव्याख्यातं तथापिदर्शश्राद्धरूपस्यपंचमहायज्ञांतर्गतपितृयज्ञस्यदर्शश्राद्धादेवप्रसंगसिद्ध
त्वेन पृथगभावाद्दर्शश्राद्धस्यतत्पश्चाद्भावविधानानुपपत्तेःश्राद्धबलिदानरूपपितृयज्ञप्रकारद्वयासमर्थस्ययोनुकल्पस्तृ
तीजलतर्पणरूपःपितृयज्ञप्रकारोयदेवतर्पयत्यद्भिःपितॄन्स्नात्वाद्विजोत्तमः तेनैवसमवाप्नोतिपितृयज्ञक्रियाफलमितिम
नुवचनेपरिशिष्टादौचोक्तःसएवात्रगृह्यतेतर्पणंयदन तत्पश्चाद्भावश्चयद्यपिस्नातस्यश्राद्धविधानादेवप्राप्तःस्नानस्य
तर्पणांतत्वात् सवातेकात्यायनेनैवस्नानविधिरित्युपसंहारात् तथाप्यग्निमतःश्राद्धदिनेतर्पणरूपएवपितृयज्ञोभवति
नतुपित्र्यबलिनित्यश्राद्धरूपोपीत्येवमर्थंतर्पणपुनर्वचनं छंदोगपरिशिष्टेहित्रिप्रकारःपितृयज्ञउक्तःपितृयज्ञस्तुतर्पणं
श्राद्धंवापितृयज्ञस्यात्पित्र्यो बलिरथापिवेति वाशब्दोचचार्थोअतएवानिवर्त्यप्रणिपत्याथपर्युक्ष्याग्निंसमंत्रवत्
वैश्वदेवंप्रकुर्वीतनैत्यकंबलिमेवचेतिमत्स्यपुराणे वैश्वदेवंततःकुर्यान्निर्वृत्तेपितृकर्मणीतिवचनांतरेचनित्यश्राद्धेनो
क्तं बलिरपिनपित्र्यःकिंतुगृहबलिः अतएवकिलमनुनापिसाग्निककर्तृकश्राद्धोत्तरमुक्तं उच्छेषणंतुतत्तिष्ठेद्यावद्वि
प्रान्विसर्जयेत् ततोगृहबलिंकुर्यादितिधर्मोव्यवस्थितइति तेनसाग्निकस्यश्राद्धदिनातिरिक्तदिनेनिरग्नेस्तुश्राद्धदि
नेपित्रिप्रकारोपिपितृयज्ञोभवति श्राद्धदिनेपिसाग्निकस्यतर्पणरूपएवेतिस्वछंदव्यवहारिणःपरिशिष्टप्रकाशकृत्शूलपा
णिप्रभृतयोमन्यंते तत्रयत्तावदुक्तंतर्पणपश्चाद्भावःस्नानपश्चाद्भावादेवश्राद्धस्यप्राप्तइति तदयुक्तं कातीयानुसारि
णांहिकथंचित्तर्पणंस्नानप्रयोगांतर्गतंस्यान्नतुसर्वेषां आश्वलायनेनतावदप्याप्लुत्येतिस्नानोत्तरं ब्रह्मयज्ञंविधायत
त्प्रसंगेनतर्पणंविहितं स्मृतिष्वपिस्नात्वादेवान्पितॄंश्चैवतर्पयेदर्चयेत्तथेतिस्नानेप्रयोगाद्बहिरेवतद्विहितं वस्तुतस्तु
कातीयसूत्रेपिमुख्यत्वादुपसंहारेस्नानसंकीर्तनंप्रदर्शनार्थं स्नानंतुवासःपरिधानानंतमेव उपस्थानब्रह्मयज्ञतर्पणा
दिकंपृथगेवप्रधानं स्मृत्येकवाक्यत्वादेकस्मिन्दिनेनाना॥तीर्थादिस्नानप्राप्तौसकलानुष्ठानस्यतावत्कृत्वप्रसंगाच्च ते

नपश्चाद्भावोत्पत्त्यातर्पणपश्चाद्भावस्य नियमेनाप्राप्तेस्तन्नियमविधानसंभवे परिसंख्यात्वांगीकरणमनुचितं किंच तदंगीकर

णेपितर्पणरूपएव पितृयज्ञः श्राद्धात्पूर्वंकर्तव्यो नतु श्राद्धबलिदानरूपइत्येवं पूर्वकालमात्रेसा स्यान्नतु तद्दिनएव नेति त्रिरूपो
पि पितृयज्ञः समुच्चयेन कर्तव्य इत्येतदप्ययुक्तं तथाहि त्रीरूपः पितृयज्ञ इत्यस्य कोर्थः किं तर्पणबलिदानश्राद्धरूपाणि भि
न्नानि त्रीणि कर्माण्यदृष्टार्थत्वात्समुच्चयार्हाणि तान्येव पितृयज्ञसंज्ञकानि नतु पितृयज्ञो नाम ततो भिन्नं किंचित्कर्मेति अ
थवा पितृयज्ञ एवैकं कर्म तस्य प्रकाराकांक्षायां समुच्चितमिदं प्रकारत्रयं तत्समुच्चय सिद्धये च सोम्यस्य इति द्वेधाप्ययुक्तः
समुच्चयः तत्राद्यपक्षे तावत्संज्ञासंज्ञिसंबंधमात्रकराणि पितृयज्ञस्तर्पणं श्राद्धं चेत्यादिवाक्यानि त्रयाणामेकसंज्ञा
करणस्य च न चातुर्मास्यादिवत्सौकर्येण युगपत्संकल्पादिभिः सिद्धिप्रयोजनं एकप्रयोगविधिपरिग्रहेकफलत्वयोरभावात्
नापि वैश्वदेवादिवद्गुणोपबंधसिद्धिस्तदभावात् तत्रावश्यं सवनीयसमाख्ययैव सवनीयपशूनामाग्नेयैंद्राग्नादीनां
पितृयज्ञसमाख्ययैकया त्रयाणामेककार्यत्वं वक्तव्यं प्रयाजादिसमाख्यया तु नैकप्रयोजनता गुणोपबंधादिप्रयो
जनांतरसंभवात्तस्याः ततश्चैतेषां त्रयाणां समाख्यैकत्वेनैककार्यत्वादसत्यपि वचने विकल्पः स्यात्किमुत वाशब्दयुक्ते
आहत्य विकल्पवचने तद्वशादपि चैककार्यतातदभावे विकल्पासंभवात् सवनीयादीनां तु वचनात्सिद्धांते समुच्चयः
तदाह जैमिनिवचनात्तु समुच्चय इति द्वितीये तु पक्षे पितृयज्ञभावनायां यत्किंचिदेकप्रकारापेक्षायां वचनेन पित्र्यब
लिदानश्राद्धरूपौ द्वौ प्रकारौ तर्पणरूपश्चानुकल्पप्रकारो विकल्पितो विधीयत इति स्पष्ट एव समुच्चय एकेन प्रकारेण नै
राकांक्ष्यात् प्रधानावृत्तेरन्याय्यत्वाद्वचनाच्च वाशब्दश्चार्थ इति तु निःप्रमाणिकमभिधानं महन्न्यायकौशलमाविष्क
रोति मनुना तु श्राद्धरूप एव पितृयज्ञप्रकारोभिहितः दद्यादहरहः श्राद्धमिति नामधेयेन चोदनासामान्येन वा प्राप्तद
र्शश्राद्धप्रकारविशिष्टं कर्मात्यद्यतदंतर्गतब्राह्मणसंख्या वैश्वदेविकपूजानिवृत्त्यर्था एकमप्याशयेद्विप्रं पित्र्यर्थे
पांचयज्ञिये नचैवं प्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजमित्युत्तरवचने पांचयज्ञिय इत्यभिधानात् पितृयज्ञस्तु तर्पण

325
194

मित्यनेनचैतस्यैवब्राह्मणतर्पणस्यपितृयज्ञसंज्ञाकरणात् यदेवतर्पयत्यद्भिरितित्वनुकल्पइत्युक्तमेव विकल्पमभिप्रे
त्यैवचाश्वलायनसूत्रवृत्तिकृतासूत्रेपित्र्यबलिदानस्यैवाम्नानात्तस्यैवचदेवभूतयज्ञप्रायपाठाद्यत्सितृभ्योददातिसपि
तृयज्ञइतिसूत्राच्चपितृयज्ञरूपत्वाद्दृष्टादृष्टार्थ‌ःश्राद्धमितिमनूक्तोब्राह्मणभोजनपर्यवसन्नःश्राद्धरूपःपितृयज्ञस्तत्सू
त्रानुसारिभिर्नकार्यइत्युक्तं यत्रतुसूत्रेषुस्मृतिषु वाद्वयमप्याम्नातंतत्रापितृयज्ञरूपतान्यतरस्यैव यथागमकंवचनब
लादन्यदपिक्रियते दर्शादिश्राद्धदिनेपिपश्चात्पृथग्नित्यश्राद्धकर्तव्यत्वाभिधानंतुप्रसंगन्यायाज्ञानमूलकं अतएव
मत्स्यपुराणादौश्राद्धोत्तरकर्तव्यमध्येतदनभिधानं पित्र्यबलिदानंतुपृथक्कर्तव्यमेवतत्रस्वधापितृभ्यइतिबहुवचनां
तपितृशब्दबलेनतस्यदेवामनुष्याःपितरइतिप्रायःपठितसाधारणपितृदेवत्यत्वात्श्राद्धेनप्रसंगादसिद्धेस्तस्यपितृश
ब्दस्यजनकपरत्वेबहुवचनान्वयार्थंपितामहादिलक्षणायत्तेस्तत्रचप्रमाणाभावात् तच्चश्राद्धांतएव प्रागुदाहृतमार्कं
डेयात् यज्ञत्रयात्मकंआश्वलायनादीनांवैश्वदेवं येषामपिदेवयज्ञएववैश्वदेवं तेषामपितदुत्तरभावित्वात्तच्छ्राद्धां
तएव अतएवमनुवचनगतंगृहबलिग्रहणंसकलोपलक्षणत्वेनमेधातिथिनाव्याख्यातं एतच्चवैश्वदेवस्यश्राद्धां
तेनुष्ठानंकेवलौपासनिकस्य आहिताग्नेस्तुश्राद्धात्पूर्वमेव यथायावद्वैश्वदेवंतावत्तक्षांतंकर्मनिर्वर्त्येतिवचनात्
तेनयत्पिंडान्वाहार्यकसमाख्यातदर्शश्राद्धानुष्ठातुराहिताग्नेरपिमनुवचनस्यतद्विषयमंगीकृत्यश्राद्धांतेवैश्वदेवा
भिधानंपरिशिष्टप्रकाशादौतदयुक्तमेव तेनस्नानपश्चाद्भावविधानादप्राप्तःप्रधानभूतस्तत्तर्पणपश्चाद्भावएवम
त्स्यपुराणवाक्येविधीयतांनाम मनुवचनेतुपिंडपितृयज्ञपश्चाद्भावएवविधीयतइतितन्निमित्तकमेवेदंदर्शश्राद्ध
स्यपिंडान्वाहार्यकसमाख्यानं तादृशंचतत्पिंडपितृयज्ञाधिकारिणःसाग्निकस्यैवसंभवतीतितद्विषयमेवमुपक्रमं
सर्वंदर्शनिर्णयार्थंछंदोगपरिशिष्टंमनुवचनं नतुसर्वविषयमितरान्प्रतितत्समाख्यासंभवात् यदप्यन्यथान्वर्थत्व
मस्याःसमाख्यायामत्स्यपुराणेउक्तं यस्मादन्वाहृताभक्षयंतिद्विजातयः अन्वाहार्यकमित्युक्तंतस्मात्तच्चंद्रसंक्षये

का०त० ति तदपिनसर्वविषयंप्रायः सर्वगृह्यस्मृतिषुब्राह्मणभोजनोत्तरमेवपिंडदानविधानदर्शनात् ब्राह्मणानांपिंडैकदेशभक्ष
१६८ णविधानादर्शनाच्च किंतुपिंडेभ्यस्त्वल्पिकांमात्रां समादायानुपूर्वशः तानेवविप्रानासीनान्विधिवत्पूर्वमाशयेदितिम
नूक्तश्राद्धप्रकारानुष्ठानविषयमेव यदपि ततः प्रभृतिपितरः पिंडसंज्ञांतुलेभिरइतिमात्स्यात् पितॄणामपिपिंडशब्दवाच्य
त्वात्पिंडानांमासिकंश्राद्धमन्वाहार्यंविदुर्बुधाइतिमनुवचनोपदर्शितपूर्वव्याख्यातयोगनिमित्तासासर्वान्प्रतिसंभ
ववतीतिकैश्चिदुक्तं तदपिक्काचित्कब्रह्मद्रथंतरादिगोचरपृष्टशब्दप्रयोगनिमित्तदर्शनार्थस्पर्शनप्रभवत्वार्थवादवत्त
तः प्रभृतीत्यस्यापिक्काचित्कपितृगोचरपिंडशब्दप्रयोगनिमित्तप्रतिपादकार्थवादमात्रत्वात् पिंडेषुसंज्ञासुदृशं
लेभिरइत्यर्थकत्वाद्दानयुक्तं क्वचिच्चपिंडशब्दस्यलक्षणयापितृषुप्रयोगोपिसमाख्यांतर्गतस्यसंभवन्मुख्यत्वस्य
तथात्वेप्रमाणाभावात् तेनपरिशिष्टोक्तोवासरतृतीयांशस्त्रेधाविभागपक्षापराह्णरूपआहिताग्नेरेव दर्शश्राद्ध
कालः तंप्रत्येवपिंडपितृयज्ञश्राद्धोभयानुष्ठानार्थंदीर्घापराह्णापेक्षणात् अतएवातिसंध्यासमीपरूपोदिनांत्यमु
हूर्तएवतंप्रतिनिषिध्यतेनतुसायाह्नस्त्रिमुहूर्तः स्यात्श्राद्धंतत्रनकारयेदितिसकलसायाह्ननिषेधस्तंप्रति तथा
त्वेपंचमुहूर्तात्मकदिनतृतीयभागरूपापराह्णमध्येवशिष्टयोरेकादशद्वादशमुहूर्तयोरुभयानुष्ठानासंभवात् पिं
डपितृयज्ञोपिहिपूर्वाह्णोवैदेवानामित्यादितत्प्रकरणपठितश्रुत्यातत्रैवविहितः तेनवासरतृतीयांशोपिपंचधावि
भक्तापराह्णपर्यवसन्नएवनातिसंध्यासमीपतइतिसकलसायाह्ननिषेधादितिमाधवोक्तिर्निरस्तावेदितव्या अ
तीत्यस्यवैयर्थ्याच्च एतेनैवअमावास्यायामपराह्णेपिंडपितृयज्ञेनचरंतीतिपिंडपितृयज्ञेअपराह्णेचपार्वणमिति
चश्राद्धसंज्ञाविध्यर्थवत्त्वायपंचधाविभक्तदिनचतुर्थभागरूपस्यैवापराह्णस्योभयत्रापिग्रहणं एवंसतियदेकाद
शादिमुहूर्तपंचकस्यपरिशिष्टवचनेश्राद्धविधानंतदेवपिंडान्वाहार्यकसमाख्यायाः पिंडपितृयज्ञानंतरभावाभा
वेप्यन्यथाप्यन्वर्थत्वसंभवेपिदशममुहूर्तेपंचधाविभागपक्षापराह्णांतर्गतेपिंडपितृयज्ञानुष्ठानंसूचयति नाति १६८

329
194

संध्यासमीपतइत्यंतिममुहूर्तनिषेधश्चसमस्तसायाह्ननिषेधेपितदंतर्गतयोस्त्रयोदशचतुर्दशमुहूर्तयोरापद्यभ्यनुज्ञा
नार्थइतियत्परिशिष्टप्रकाशउक्तंतदपहस्तितंवेदितव्यं नचविषयविशेषेपारिभाषिकापराह्णग्रहणेपितस्यानर्थक्यं
विषयांतरेतस्यैवग्रहणात् उचिताचश्रुत्यविषयेविशेषाविषयेचसामान्यतः परिभाषितस्यपौराणिकस्यापराह्णस्य
प्रवृत्तिः यत्त्वाश्वलायनसूत्रवृत्तिकृताचतुर्थभागपदेनपंचधाविभागेनैवापराह्णोव्याख्यातः चतुर्धाविभागेचतुर्थभागस्यापराह्णश
ब्दावाच्यत्वात् तदपित्रेधाभागपक्षापराह्णेपंचधाविभागपक्षापराह्णस्यमुहूर्तद्वयेनांतर्गतत्वादविरोधियथाचतत्रैवमुहूर्तद्वये
अपराह्णेपितॄणांतुतत्रदानंप्रशस्यतइतिवचनाच्छ्राद्धस्याप्युपक्रमोभवतितथापिंडपितृयज्ञः कर्तव्यस्तीव्रेणप्रयत्नेनशिथि
लप्रयत्नकृतेस्तत्रैवोपक्रम्यतत्समाप्त्यनाशक्तौतत्पूर्वभाविनिदशममुहूर्तेपितदुपक्रमः कर्तव्यइत्येवमर्थमिति तस्माद्दर्शेष्ट्य
ग्न्याधानोत्तरानुष्ठेयपिंडपितृयज्ञोत्तरदर्शश्राद्धानुष्ठातॄणांत्रेधाविभागपक्षापराह्णएवश्राद्धकालस्तेषामेवचसः पिं
डान्वाहार्यकसमाख्यापितत्तत्कर्तृकदर्शश्राद्धविषयैवेतिछंदोगपरिशिष्टोक्तोदर्शनिर्णयस्तद्विषयएव तत्रापियेः पश्चाच्चंद्र
दर्शनवतिप्रतिपद्दिनेदर्शेष्टिनिषेधआद्रियतेतेषामेवसंध्यांपौर्णमासीमुपवसेत् पक्षांतउपवस्तव्यइत्येवमुपक्रमकाणांय
दहस्त्वेवचंद्रमानदृश्यतेताममावास्यांकुर्वीततदृश्यमानेप्येकदागताध्वाभवतीतिसूत्राणांमध्येआद्यदर्शांगभूतोपवासविष
यत्वात् उत्तरयोः श्राद्धविषयोरुपवासाधिकारिकर्तृकश्राद्धविषयत्वस्यस्पष्टंप्रतीतेः परिशिष्टस्यचतत्तात्पर्यव्याख्यानेनतद
नुसारित्वात् किंचगताध्वसूत्रेसंमिश्राया चतुर्दश्याअमावास्याभवेत्क्वचित् खर्विकांतांविदुः केचिद्गताध्वामितिचापरइति
चपरिशिष्टेसायाह्नव्यस्यमावास्यायुक्तायाअपराह्णिकाष्टमांशावछिन्नायाश्चतुर्दश्याएवाष्टमेंशेचतुर्दश्याः क्षीणीभवति
चंद्रमायुक्तं चंद्रक्षययोगेनामावास्यात्वसंपत्युक्त्याताद्दृशचतुर्दशीमिश्रपूर्वामावास्यायाएवोपवासश्राद्धार्हत्वं यदुक्तंतद
मावास्यात्वत्वेनाक्षिप्यसमादधतातद्भाष्यकारेणपूर्वस्यांसोमक्षययुक्तापराह्णसंपत्तिमुत्तरस्यांच अमावास्याष्टमांशेच
पुनः किलभवेदणुरितिवचनात्तदसंपत्तिमेकहेतुमुक्तोत्तरस्यांतदनुष्ठानेतदुत्तरदिनेद्वितीयामिश्रप्रतिदिनेपश्चाच्चंद्रदर्शनव

का०त० तियागानुष्ठानप्रसंगस्तत्रच प्रायश्चित्तापत्तिरिति द्वितीयोहेतुरुक्तः यदिचतुर्दशीमिश्रामावास्यापेक्षयामावास्याः प्रतिप
१६९ दश्चवृद्ध्या प्रतिपन्मिश्रामावास्यायामप्यपराह्णे किंचिच्चंद्रक्षयैकदेशस्तदुत्तरयागदिनेच पश्चाच्चंद्रदर्शनं लभ्यते तदा तयो
रेवयश्राद्धमनुपवासयागयोरनुष्ठानमितिच वर्धमानाममावास्यांलभेच्चेदपरेहनि यामात्स्त्रीनधिकान्वापिपित्र्यज्ञस्तत्तो
भवेदिति परिशिष्टवचनोपन्यासेन तत्रैवदर्शितं तदेवंदर्शतदंगभूतोपवासकालविवेचनार्थयोर्गृह्यत द्राष्ययोः श्राद्धपिं
डपितृयज्ञविषयपरिशिष्टोपजीवनात्तस्मिंश्चपरिशिष्टेतादृशतदुपजीवनात् त्रयाणामप्युपवासादीनामेकदिनेनुष्ठानं
येषांचानुष्ठातॄणां तत्तद्विषयमेव दर्शश्राद्धकालविवेचनार्थंपरिशिष्टमितिस्पष्टं तद्ग्रंथालोचनया प्रतीतोयत्पिंडान्वा
हार्यकसमाख्यायायश्राद्धं कथंचित्साग्निनिरग्निसाधारणान्वर्थतासंपादनेनपरिशिष्टोक्तव्यवस्थया अपितत्साधारण्या
भिधानंगौडानां तत्तन्मात्रालोचनमूलकमनादरणीयंतेनतादृशानुष्ठानकर्तॄन् साग्निकान्प्रतियागकालानुरोधेनपरिशिष्टानु
सारिणामावास्यानिर्णयते तत्रतृतीयभागद्व्यापराह्णस्तावत्तान्प्रतिश्राद्धकालइत्युक्तं तत्रापिचंद्रक्षयकालः प्रशस्तः क्षीणे
राजनिशस्तइतिवचनात् सचकालः परिशिष्टएवोक्तः अष्टमांशेचतुर्दश्याः क्षीणोभवतिचंद्रमा अमावास्याष्टमांशेच
पुनः किलभवेदणुरिति क्षीणश्चतुर्थभागोनकलावशिष्टः अणुः परमसूक्ष्मतायाः अभिधानात् अमावास्यासप्तमांशेच
कृत्स्नक्षयः तेनपरमसूक्ष्मताकृत्स्नक्षयश्च द्वयंक्षयशब्दवाच्यं यद्यपिच पुनःशब्दवशाद्द्वादशीपरमसूक्ष्मताचतुर्द
श्यष्टमभागेतादृश्येवामावास्याष्टमभागेपिनचतत्कृतासाचंद्रक्षयशब्दवाच्या तथासत्यमावास्यायाश्चंद्रक्षयाव्याप्ति चारा
त्तेनविशेषणंव्यर्थंस्यादतएव चतुर्दश्यष्टमभागकृत्स्नामावास्यात्मकप्रहरनवकरूपत्वंचंद्रक्षयकालस्यकैश्चित्परिशिष्टभाष्य
कारैरुक्तमयुक्तं तथापिकृत्स्नक्षयोपयोगिनीपरमसूक्ष्मताविवक्षिता नचतदुत्तरभाविन्यमावास्याष्टमभागसातादृशी
भवति मार्गशीर्षज्येष्ठामावास्ययोस्त्वितरविलक्षणाअष्टयामव्यापिताक्षयस्येत्युक्तं तत्रैव आग्रहायण्यमावास्यातथाज्ये
ष्ठस्ययाभवेत् विशेषमाभ्यांब्रुवतेचंद्रचारविदोजनाः अत्रेंदुराद्येप्रहरेवतिष्ठतेचतुर्थभागोनकलावशिष्टः एतदंतएवक्षय १६९

331/196

मितिकृत्स्नएवं ज्योतिश्चक्रविदोवदंति आभ्यां अनयोस्तदंतएव अमावास्यांतएव मलमासयुताश्चेत्त्वनयोरपीतरतुल्यएवक्षयइ
त्युक्तं यस्मिन्पक्षेद्वादशैकश्च यव्यस्तस्मिंस्तृतीययापरिदृश्योनोपजायते यव्योमासः तृतीययाचतुर्थभागमात्रोनत्वात्त्रिभा
गमात्रावशिष्टयाकलयापरिदृश्योरनयोरप्यमावास्ययोराद्ययामेन जायतेभावतिष्ठते किंतुइतरमासवदत्रानयोरप्यमावास्य
योश्चतुर्दश्यंयामएवचतुर्थभागोनकलावशिष्टत्वाच्चंद्रस्यतदधिकभागोनत्वात्त्रिभागमध्येपिकिंचिन्न्यूनकलावशिष्टतयावति
ष्ठतइत्यर्थः अत्रचपौर्णमास्यंतौज्येष्ठमार्गशीर्षाविति परिशिष्टप्रकाशकारः हेमाद्रिरपिवृषस्थेचंद्रेज्येष्ठमावास्या वृश्चिकस्थे
चमार्गशीर्षस्थेतिवदंस्तथैवमन्यते अत्रचमूलंज्योतिःशास्त्रमेव ज्योतिश्चक्रविदोवदंतीत्यभिधानात् तेचचंद्रस्यपरमो
च्चनीचस्थानेइत्यादिज्योतिःशास्त्रइत्यादिसंबंधिवासनायाएवहेमाद्रिणाभिधानाच्च यत्तुतिथितत्त्वकृता पयोमूलफलैः
शाकैः कृष्णपक्षेचसर्वदेतिवचनेनैवब्रह्मपुराणेमावास्याश्राद्धस्यापिविधानाद्ब्रह्मपुराणीयतिथिकृत्यत्वमत्रपौर्णमास्यंत
मासग्रहणेबीजमुक्तं तदेतत्प्रकरणादावमास्याश्राद्धस्यकृष्णपक्षश्राद्धाद्भेदव्यवस्थापनायुक्तं एवंचंद्रक्षयकालमुक्त्वात
स्यप्रयोजनंक्षणेराजनीतिपूर्वोपक्षिप्तमेवोपसंहृतंतत्रैव एवचारंचंद्रमसोविदित्वाक्षीणेतस्मिन्नपराह्णेचदद्यादिति एवंस
तितृतीयभागद्व्यापराह्णव्याप्तोकालव्याप्तिविषयपक्षषट्कमध्ये त्रिमुहूर्ताधिकवृद्धिक्षयाभावेन दिनद्वयेसमस्ततद्व्या
प्तितदस्पर्शपक्षयोरसंभावचत्वारएवपक्षाःसंभवंति पूर्वेद्युरेवपरेद्युश्चपरेद्युरेव कालाकार्त्स्न्येनैकदेशेन वातत्व्याप्तिर्दि
नद्वयेपिसाम्येनवैषम्येणवातदेकदेशस्यैवव्याप्तिरिति तत्रैवतस्मिन्नेवदिनेकृत्स्नकालव्याप्तिरितरदिनेतदस्पर्शनेकदेशव्या
प्त्यावाभवति तत्रदस्पर्शश्चचतुर्दश्यपेक्षयामावास्यायाःसाम्येनाधिक्येनक्षयेणवा यथादशमुहूर्ताचतुर्दशीदशमुहूर्ता
अमावास्यानवाष्टसप्तमुहूर्ताचतुर्दशीदशमुहूर्तापरादशमुहूर्ताचतुर्दशीनवाष्टादिमुहूर्तापरेति पंचदशमुहूर्तापूर्वातावा
त्येवपरा तावत्येवपूर्वाषोडशादिमुहूर्तापरातादृशीपूर्वापंचदशमुहूर्तापरेतिच एकदेशव्याप्तिराधिक्येनैवयथापूर्वत्रैका
दशमुहूर्तमारभ्यप्रवृत्तोत्तरत्रैकादशद्वादशादिमुहूर्तपर्यंतामावास्या उत्तरत्रपंचदशमुहूर्तपर्यंतापूर्वत्रत्रयोदशादिमुहूर्त

का०त० मारभ्यप्रवृत्ताचेति एकस्मिन्नेवदिने कालैकदेशव्याप्तिः क्षयेणैव यथापूर्वत्रद्वादशादिमुहूर्तमारभ्य प्रवृत्तोत्तरत्र नवमदश
१-७० ममुहूर्तपर्यंता उत्तरत्र द्वादशत्रयोदशादिमुहूर्तपर्यंतापूर्वत्रषोडशादिमुहूर्तमारभ्य प्रवृत्ता चेति दिनद्वयेपि साम्येनैकदेशव्याप्ति
रपिवृध्यासाम्येन क्षयेण वा यथाद्वादशत्रयोदशमुहूर्तमारभ्य प्रवृत्तोत्तरत्र त्रयोदशचतुर्दशपर्यंता सार्धद्वादशमुहूर्तो
त्तरं प्रवृत्तासार्धद्वादशपर्यंता चतुर्दशादिमुहूर्तमारभ्य प्रवृत्ता द्वादशैकादशपर्यंतेति एवं वैषम्येणैकदेशव्याप्तिरपि य
थाद्वादशमुहूर्तमारभ्यप्रवृत्ता द्वादशपर्यंता द्वादशत्रयोदशमुहूर्तमारभ्य प्रवृत्तैकादशद्वादशपर्यंता त्रयोदशमारभ्यप्रवृ
त्तैकादशपर्यंताच चतुर्दशपर्यंताच चतुर्दशमारभ्यप्रवृत्ता चतुर्दशत्रयोदशपर्यंता पंचदशं चतुर्दशं वारभ्य प्रवृत्ता त्रयो
दशपर्यंता पंचदशमारभ्यप्रवृत्ता चेति तत्र यापूर्वेद्युरेव कृत्स्ना कालव्यापिनी उत्तरत्र तदेकदेशमपि न स्पृशति सा तावत्पू
र्वैव भवति तत्र कदाचिच्चतुर्दश्यपेक्षयामावास्यायादशमुहूर्तमध्ये वृद्धावपि वर्धमानावाक्यविषयभूतायास्तस्या अभा
वात् यापि तादृशी उत्तरत्र च तदेकदेशव्यापिनी सापि पूर्वैव यदियजनीयदिने चंद्रदर्शनादेकदेशव्याप्तिदिन एव यागः कृ
तन कर्मकालव्याप्तिलाभात्तत्र चंद्रक्षयलाभादुत्तरत्र तदलाभाद्यागेनाविरोधाच्च नचवर्धमानवाक्यविरोधः तत्रापिया
गदिनगतचंद्रादर्शनप्रयोजिकायाः प्रतिपद्वृद्धिसहितायाः प्रमावास्यावृद्धेर्विवक्षितत्वात् अतएव यदि वृध्याचं
द्रादर्शनात्प्रतिपद्येव यागस्तदा तदनंतर पूर्वदिनकर्तव्यान्वाधानानुरोधेन त्रयाणामेवकाल्यनियमाच्छ्राद्धमप्येकदेश
व्याप्तिदिन एव भवति कृत्स्नकालव्यापिनीं तद्गतचंद्रक्षयवतीमपि पूर्वां परित्यज्य अतएव गोभिलगृह्यभाष्ये क्षीयमा
णवाक्यात्पूर्वस्या वर्धमानावाक्याच्चोत्तरस्या यतव्याप्तत्वं तद्यागदिनगतपश्चाच्चंद्रदर्शनादर्शनप्रयुक्तमेवाभिप्रेतं
प्रतीयते तेनैतत्प्रयुक्तनिर्णयविरुद्धश्चंद्रक्षयापराह्णशास्त्रपक्षपातोपित्याज्यः अतएवोभयत्रापि शास्यतद्युक्तं
यत्वेकदेशमपि पूर्वेद्युरेव व्याप्नोति सा स्फुततरां पूर्वा तथाच परिशिष्टं यदा चतुर्दशीयामं तुरीयमनुपूरयेत् आमावास्या
क्षीयमाणा तदेवश्राद्धमिष्यत इति चतुर्दश्याभूयश्चतुर्दयुक्तस्य दिनस्य भाधिक्येनाह्व्यपदेशाभवंति याममित्यर्थः १-७०

333
1942

तदनुपूरणं च समस्ततत्व्यापनेनापि भवति तदेकदेशप्रवेशेन च अतएव त्रिमुहूर्तापि कर्तव्येति वचनांतरं तृतीयभागैकदेशव्याप्ति
मात्रं तु विवक्षितं क्षीयमाणा चतुर्दश्यपेक्षया यागदिनगतचंद्रदर्शनप्रयोजकक्षयवती नतु वासरतृतीयांशे क्षीयमाणा तद
स्पर्शिनीति व्याख्यायुक्ता तत्र कर्मकालव्याप्तिवशादेव पूर्वाग्रहणसिद्धेरेतस्य वैयर्थ्यापत्तेः उपोद्घलकमात्रत्वेन तत्रैतस्योपन्या
सात् पूर्वदिने किंचिन्न्यूनचतुर्मुहूर्तात्मकसमस्तचतुर्थयामपूरणस्याविवक्षितत्वेप्युत्तरदिने दंडमात्रादिक्षयेन तृतीयभागांतर्ग
त किंचिदधिकाद्यमुहूर्तैकदेशव्याप्तेः संभवात्तत्रापि चैतद्वचनप्रवृत्तेरुपपत्तेश्च वृद्धेश्चतुर्दश्यपेक्षत्वात् क्षयस्यापि तादृश
स्यैव ग्रहणौचित्यात् अतएव दिनद्वयेपि क्षयेणैकदेशसमव्याप्तावेतद्वचनवशादेव पूर्वा भविष्यति तत्रैव चैतस्य वचनस्य
परभागः अन्यत्र कालव्याप्तिलाभाधिक्यादिनापि निर्णयसंभवात् नन्वेवं पूर्वस्यां श्राद्धानुष्ठाने उपवासपित्र्ययज्ञाभ्याम
पि तत्रैव भवितव्यं तत्र यदहरेव न पुरस्तान्न पश्चाद्ददृशइति यदहस्त्वेव चंद्रमा न दृश्येत तामावास्यां कुर्वीतेति च श्रुतिसू
त्राभ्यामुपवासकालविधायकाभ्यां विरोधः पूर्वस्यां सिनीवाल्यां पुरस्ताच्चंद्रदर्शनस्यावश्यंभावादित्यतः परिशिष्टांतरं य
दुक्तं यदहस्त्वेव दर्शनं नेति चंद्रमा तत्क्षयापेक्षया ज्ञेयं क्षीणे राजनि चेत्यपीति अर्थानुभाषणं चेत् श्रुतेः सूत्रस्य क्षीणे रा
जनीति तु स्ववाक्यस्यैव नन्वदर्शनविषयायाः श्रुतेः क्षयपरत्वेन पौरुषेयव्याख्याने किंमूलं सूत्रस्य तु तथाव्याख्याने अथ
यदहश्चंद्रमा न दृश्येत तामभावास्यामिति पूर्वसूत्रेण सह पौनरुक्त्यापत्तिरेव मूलं उभयत्रापि चंद्रदर्शनोपादानेपि यदहस्त्वे
वेति द्वितीयसूत्रस्यैव प्रत्यभिज्ञानात्तस्यैव लक्षणया व्याख्यानं तेन पूर्वसूत्रं श्रुतिवृत्तं कुहूविषयं वर्धमानापक्षे इदं तु सिनी
वालीविषयं क्षीणाय क्षइति तदिदं शूलपाण्याद्युक्तमयुक्तं सूत्रस्य श्रुतिमूलत्वेन मूलभूतायास्तस्या एव व्याख्यातुमुचि
तत्वात् मूलं च तत्र श्रुत्यंतरमेव पित्र्ययज्ञविषयं अपराह्णे ददाति तस्मिन्क्षीणे ददातीति त्रयाणामेकदिनसाध्यत्वनियम
स्य च तस्मात्पितृभ्यः पूर्वेद्युः क्रियते पूर्वेद्युरग्निं गृह्णाति पित्र्ययज्ञं तु निवर्त्य पक्षांतं कर्म निर्वर्त्येत्यादि श्रुतिस्मृतिसूत्रेभ्यः
स्पष्टमवगमात्सर्वेषां समानविषयत्वं सूत्रेपि लक्षणायां श्रुत्यंतरमेव मूलं न च पूर्वसूत्रेण पौनरुक्त्यापत्तिः पूर्वसूत्रस्या

का०न०
१७१

खंडामावास्याविषयस्य तस्मात्प्रतिपद्यपवसन्नेवयजेतेति शाखांतरगतश्रुतिमूलकोयः पौर्णमास्यामुत्तरामित्येकइतिप
क्षउक्तस्तन्निवृत्त्यर्थत्वात् दर्शेअमावास्यायामेवोपवासःप्रतिपद्येवयागइति चतुर्दशीमिश्रामावास्याविषयमिदंसूत्रमि
तिवदतोभाष्यकारस्यापीदमेवमतं यातूत्तरेवहृत्स्नकालव्यापिनीपूर्वेद्युस्तदस्पर्शिनीकदेशस्पर्शनवासैवैकदेशव्यापिनी
वासोत्तरेव आद्यायाःकृत्स्नकालव्यापित्वात् पूर्वेद्युस्तदस्पर्शितदेकदेशसंबंधस्याप्यलाभादह्निदर्शप्रवेशाभावाच्च अ
त्रतदेकदेशस्पर्शेप्युत्तरत्रप्रतिपत्प्रवेशाभावेनयागासंभवादन्वाधानादेरेवतत्रानुष्ठानौचित्याद्वर्धमानाममावास्यांल
क्षयेदपरेहनि यामांस्त्रीनधिकान्वापिपितृयज्ञस्ततोभवेदितिपरिशिष्टाच्च द्वितीयस्यामप्येकदेशेपितावत्कालसंबंधला
भात्पूर्वत्राह्निदर्शप्रवेशाभावाच्चान्वाधानादेरसंभवेनक्षीयमाणत्वेपिपूर्वस्याअसंभवात् अह्निदर्शप्रवेशेचसत्यपि
चंद्रदर्शनेद्वितीयामिश्रप्रतिपद्येवयागस्तत्पूर्वदिनएवान्वाधानश्राद्धादि अपराह्णपरिभाषितचंद्रक्षयालाभे अतए
वक्षीणेराजनिशस्यतइत्युक्तंनतुतदभावेसर्वथानभवतीति नतुचतुर्दश्यांवत् यानिवेतदर्थप्रतिपादकानिबौधायनवच
नानिचतुर्दश्यांचतुर्थामइत्यादीनि तेषांव्याचतुर्दश्याश्चतुर्थेयामेमासंपूर्णानदृश्यतेकिंत्ववसानेस्वल्पेत्यादिव्याख्या
विशेषणेत्यर्थः व्याख्यानविशेषणाविरोधइत्यादिसर्वंसप्रपंचमुक्तंपर्वनिर्णये यातुदिनद्वयेपिवैषम्येणैकदेशव्यापि
नी सायथाधिकैकदेशव्यापिनीसैवग्राह्या तत्रपूर्वस्यास्तथात्वेउत्तरत्रक्षीयमाणवाक्यमप्युपोद्बलकं उत्तरस्याश्च
वृध्यातथात्वेवर्धमानावाक्यं पूर्वस्यास्तथात्वेवर्धमानावाक्यं पूर्वस्यास्तथाभूतायाअप्युत्तरत्रयागदिनगतचंद्रादर्श
नप्रयोजकवृद्धौतांन्यायप्राप्तांपरित्यज्यवर्धमानावाक्यादुपवासानुरोधाच्चोत्तरैवभवति एवमुत्तरस्यास्तथाभूताया
स्तादृशचंद्रदर्शनप्रयोजकेक्षयेक्षीयमाणवाक्यादुपवासानुरोधाच्चपूर्वैव एवंतिथिसाम्येनापिकालैकदेशस्यवैष
म्येणव्याप्तौचंद्रदर्शनादर्शनप्रयुक्तोधिकाग्रहणस्यापवादोद्रष्टव्यः यापिदिनद्वयेपिसाम्येनैकदेशव्यापिनी सायदिक्ष
येणतदाक्षीयमाणावाक्यात्पूर्वा यदिवृध्यातदावर्धमानावाक्यादुत्तरा पूर्वत्रचंद्रादर्शन तद्दर्शनप्रयुक्तस्तयोरप १७१

335
194

वादः यदासाम्येनतदात्वयुक्तएवनिर्णयोयागदिनेचंद्रादर्शनेउत्तरा तद्दर्शनेपूर्वेति केचित्तुशूलपाणिप्रभृतयः समापरप
र्यायस्तंभितायामस्याममावास्यायां संमिश्रायाचतुर्दश्या अमावास्याभवेत्क्वचित् खर्विकांतांविदुःकेचिदुपेध्वमितिचापरइतिपरि
शिष्टाद्विकल्पः इदंहिस्तंभिताविषयंक्षीणायाःपूर्वमुक्तत्वाद्वर्धमानायावक्ष्यमाणत्वात् खर्विकांनीचांनिंदितां पित्र्यकर्मानहा
मित्यर्थः कुदेशमासाद्य कुतःकुलीनता कुदेहिनीं प्राप्य कुतोगृहेसुखं कुशिष्यमध्याप्य कुतोनृणांयशः कुपुत्रमुत्साद्य कुतोजलां
जलिः उपेध्वं उपागच्छत श्राद्धानुष्ठानंयस्यांतदहामित्यर्थः सचाविकल्पः त्रिमुहूर्तापिकर्तव्यापूर्वादर्शोन्विवह्निभिः कुहूरध्व
युभिःकार्यायथेष्टंसामगीतिभिरितिलघुहारीतवचनाव्यवस्थितइतिवदंति यद्यपिपारिशिष्टप्रकाशकर्ताकदाचिद्विक
ल्पइत्यपेक्षायांवर्धमानावाक्यमवतारितं यथापिस्तंभिताविषयमेवेदंमतंतस्यापिविकल्पवचनं तेनक्षीयमाणाया
कर्मकालक्षयवत्यास्तदस्पर्शिन्यावर्धमानायाश्चतदपेक्षयातत्स्पर्शिन्याव्याख्यानात् अतएवाह एवंयदादिनद्वये
श्राद्धकालप्राप्तिस्तदाविकल्पः संमिश्रेत्यनेनोक्तइति हेमाद्रिरप्येवमवोचदेतदयुक्तं उपेध्वमितिपाठस्तावदध्येत्रन
तुगतोगताध्वाभवतीति गोभिलसूत्रानुगतश्च गताध्वामिति चापरइतिहिपारिशिष्टंसर्वेछंदोगाःपठंति सूत्रभाष्यका
रेणापिगताध्वसूत्रएवंदंपारिशिष्टंगताध्वामित्येवलिखितं गतोध्वास्वीयंस्थानंयस्याःसेयंगताध्वा चंद्रक्षयवानपरा
ह्णोत्यस्याश्राद्धयोग्योनिसर्गिकस्थानं तच्चतुर्दश्या आक्रांतत्वादेतत्संबंधेनचगतध्वशब्दव्याख्यानेनचतुर्दश्याएव
चंद्रक्षयवदपराह्णसंबंधादमावास्यानामसंपादनंसूत्रभाष्ययोः प्रयोजनमुक्तं यदहस्त्वेवचंद्रमानदृश्येततामम
वास्यांकुर्वीतदृश्यमानेप्येकदेतिसूत्राभ्यामुक्तस्योपवासश्राद्धयोश्चतुर्दशीमिश्रायाः स्वल्पायाअमावास्यायाग्रहण
स्योपोद्बलनार्थं वर्धमानामितिपारिशिष्टोक्तवृध्याचंद्रादर्शनेसत्युत्तराग्रहणंगताध्वसूत्रपरिशिष्टाभ्यांयज्ञनीयदिन
गतपश्चाच्चंद्रादर्शनेनचरदीकृतस्यचतुर्दशीमिश्रामावास्याग्रहणस्यार्थवादत्वेनव्याख्यातं आख्यातंचोपेध्वमिति
कथममावास्यानामधेयं तस्माद्गताध्वामित्येवपारिशिष्टपाठइति पारिशिष्टारूढस्तावन्नविकल्पः यत्तुगतःप्राप्तःपित

का० त०
१७२

लोकं प्रायणाध्वानया प्रशस्तेति यावदिति गताध्वामिति पाठेपि विकल्पप्रतिपादकत्वेन व्याख्यानं तिथितत्त्वकृतस्तदप्यनादरं ते
न संज्ञामात्रकरणार्थमिदं सूत्रं चतुर्दशीमिश्रामावास्या प्रशंसापरं पूर्वाशीषएवनतुस्तंभितायाविकल्पार्थं विनिगमकाभावादेव तु
नस्याविकल्पः सचचतुर्दश्यमावास्यादिनयोः सूर्यास्तात्पूर्वं दर्शप्रतिपत्प्रवेशे सत्युत्तरप्रतिपदि च चंद्रदर्शने तयोरेव यथासं
ख्यमुपवासादेर्यागस्य चानुष्ठानमिति नियमो येषां तेषां चंद्रदर्शनादर्शनाभ्यामेव व्यवस्थित आवश्यकत्वात् येषां तु पर्व
निर्णयोक्तोपपत्त्या चंद्रदर्शनदिनेपि यागानुष्ठानान्नायं नियमोनापि त्र्याणामेकदिनानुष्ठाननियमस्तेषां खर्वदर्पवाक्यादे
व व्यवस्थितः लघुहारीतवाक्यं तु शिष्टव्यवहाराननुगतमुपेक्षणीयमेव नियमरहितं तत्तद्वृद्धिविषयं वा व्यवस्थापकाभाव
त् यदा च व्यवस्थापकमस्त्येकेषु विपक्षेषु चतुर्दशीमिश्रामावास्यायां श्राद्धमनुष्ठेयं तदायद्यमावास्या प्रतीक्षया प्य
तिसंध्यासमीपात्पूर्वं पितृयज्ञः श्राद्धं चानुष्ठातुं शक्यते तदामा प्रतीक्षणीया नो चेच्चतुर्दशीमध्येपि चंद्रक्षयवत्यपराह्णे
पितृयज्ञोत्तरं श्राद्धमुपक्रम्यामावास्यायां समापनीयं तदाह गोभिलः दृश्यमानेप्येकदेति एकदा न तु सर्वदा तेन विकल्पः
सच व्यवस्थितः पूर्वविभयाद्दृश्यमानः प्रातश्चंद्रदर्शनयोग्यचतुर्दशीशेषाभिप्रायः तथा च परिशिष्टं यच्चोक्तं दृश्यमानेपि
तच्चतुर्दश्यपेक्षया अमावास्यां प्रतीक्षेद्वातदंते वापि निर्वपेदिति तस्याश्चतुर्दश्या अंते चंद्रक्षयवत्यंतिमभागे अथ
निरग्निकानन्वाधानपिंडपितृयज्ञश्राद्धानामेकदिनकर्तव्यतानियमरहितांश्चाश्वलायनापस्तंबादीन् साग्निकानपि
प्रत्यमावास्या निर्णीयते तत्र निरग्निकानां पितृयज्ञश्राद्धयोर्भिन्नदिनपाते साग्निकानामपि पंचधा दिनभागपक्षापराह्ण
एव प्रशस्ताः श्राद्धकालकुतपश्च तदुपक्रमकाल इति वचनात्तद्व्याप्त्यैवामावास्यापि निर्णेतव्या वचनं च सामान्यरूपं मू
ततिथिनिर्णये दर्शितं विशेषरूपमपि हारीतः यस्यां संध्यागतः सोमो मृणालमिव दृश्यते अपराह्णे तु या नस्यात्पिंडानां
करणं ध्रुवं अपराह्णः पितृणां तु यापराह्णानुयायिनी साग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनीति तथा च पूर्वेवापराह्ण १७२
व्यापिनी पूर्वा पूर्ववचनात् उत्तरैवापराह्णव्यापिन्युत्तरा उत्तरवचनात् एवं सति भूतभूर्विद्धाममावास्यां मोहादज्ञानतोपि वा

337/1942

श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते इति कार्ष्णाजिनिवचनमपि उत्तरस्या एवापराह्णव्यापित्व उपोद्बलकं दिनद्वयेप्यप
राह्णव्याप्तावुत्तरतिथिवृद्धिसाम्ययोरुभयोरेव उपक्रममारभ्य सकलकालव्यापित्वात् तस्याः क्षये पूर्वा अमावास्या तु याहि
स्यादपराह्णद्वयेपि सा क्षये पूर्वापरा वृद्धौ साम्येपि च परा स्मृतेपि शिवराघवसंवादवचनान्माधवोदाहृतात् यत्तु तस्य ख
र्वादिवचनवद्दिनद्वयगतसमैकादेशव्याप्तिविषयत्वं तेनोक्तं तदेकदेशानुपादानात्स्वरसतः सकलव्याप्तेरेव प्रतीतेर्नादृ
तं तेन क्षयाद्ययोत्रपरतिथिरेव दिनद्वये पराह्णव्यापिनी खर्वादिवचनबलादुत्तरैव सर्वदा दृध्यविनाभावादिति मदनरत्ने
माधवीये च यदयुक्तं तदयुक्तमेव तद्वाक्यगतानां क्षयादीनां ग्राह्यतिथिगतत्वव्यवस्थापनात् तिथिक्षये सिनीवालीति
थिवृद्धौ कुहूर्मता साम्येपि च कुहूर्ज्ञेया वेदवेदांगवादिभिरिति विशेषवचनस्यापि तत्समानार्थकत्वस्य तत्र चेष्टत्वात् द
र्शपौर्णमासं चेत्यपि वचनमेतद्विषयमेव क्षये द्रष्टव्यं दिनद्वयेपि वैषम्येणैकदेशव्याप्तावधिकतद्वती ग्राह्या तस्यां का
लशास्त्रपक्षपातादपराह्णद्वयव्यापिन्यमावास्या यदा भवेत् तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणीति माधवमदन
रत्नाद्युदाहृतवचनाच्च अत्र स्वरसतः संपूर्णापराह्णव्याप्तिप्रतीतावप्यल्पत्वमहत्त्वाभ्यामित्युक्तत्वाद्देकदेशव्याप्ति
प्रतीतिः दिनद्वयेपि साम्येन तस्यां तु लस्यास्तत्क्षयवृद्धिसाम्यैः संभवात् खर्वदर्पवाक्यात्तिथिक्षय इति विशेषवचना
च्च निर्णयः कुहूसिनीवाल्योर्लक्षणमाह व्यासः दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मतेति चतुर्दशीमिश्रा पूर्वा प्रति
पन्मिश्रोत्तरा यत्तु दृष्टचंद्रेति बहुव्रीहिरमावास्यान्यपदार्थकत्वेन तत्रैव चंद्रदर्शने सिनीवाली न तु चतुर्दश्यामिति दर्शन
योग्यस्य चंद्रस्य पूर्वक्षितिजक्रांतिवृत्तसंबंधोपलक्षितात्कृत्स्नामावास्या सिनीवाली दर्शनायोग्यस्य तस्य तत्संबंधोपल
क्षिता कुहूरिताः तादृशसंबंधाच्चैव चंद्रस्य दर्शनादर्शने ते च दृक्कर्मसंस्कारवशेन ज्ञायेते सूर्योदयोत्तरं कियातिघटिष्व
नुवर्तमानायाश्चतुर्दश्या उत्तरं प्रवृत्ता उभयलक्षणरहिता दर्शइति अमावास्या त्रैविध्यं ज्योतिर्ग्रंथेषूक्तं तत्सिनीवाली

का०त०
१०३

कुहूदर्शजननरूपनिमित्तत्रैविध्येन त्रिविधस्य शांतिकर्मणस्तत्राभिधानप्रकरणात्तत्रोपयुज्यते न तु धर्मशास्त्रे वस्तुतस्तु तदपि स्वं
दमावास्यायां पूर्वोत्तरयोर्जनने सिनीवालीकुहूशांती अवं ऽयं दर्शशांतिरिति धर्मशास्त्रोक्तममावास्यायांद्वैविध्यमेवांगीकृ
त्योपपादयितुं शक्यत एव दिनद्वयेप्यपराह्नास्पर्शिन्यां साग्न्यनग्निभेदेन व्यवस्था तथा च जाबालिः अपराह्णद्वयाव्यापी
यदि दर्शस्तिथिक्षये आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मतेति आदिशब्देन स्त्रीशूद्रयोर्ग्रहणं निरग्निपदेनाधिका
रवतोग्निरहितस्योपादानात् तथा च लौगाक्षिः सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि स्त्रीभिः शूद्रैः कुहूः का
र्या तथा चानग्निकैर्द्विजैरिति अत एवाहिताग्निग्रहणमपि पूर्ववाक्यगतं पिंडपितृयज्ञाधिकारि साग्निकमात्रोपलक्षणं
यद्वाहिताग्नेर्धर्मः स एवौपासनिकस्येति वचनाच्च हेमाद्रिस्तु भूतविद्धात्वमावास्या प्रतिपन्मिश्रितापि वा पित्र्यकर्मणि
विद्वद्भिर्ग्राह्या कुतपकालिकीति च कुतपोप्यमावास्याश्राद्धस्य कालः स च सिनीवालीकुहूश्चैव स्मृत्युक्तश्राद्धकर्मणि
साग्निकैस्तु सिनीवाली कुहूः कार्या त्वनग्निकैरित्यादिवचनेन निरग्निकानां प्रतिपद्विद्धामावास्याविधानात् तद्विषयः अ
पराह्णः साग्निकविषयः एवं सति आरभ्य कुतपे श्राद्धं रोहिणं तु न लंघयेदित्यपि वचनं प्रकृतिभूतपार्वणविषयमेव निर
ग्निकान्प्रति तत्रासंभवेत् कुतपाद्यान्मुहूर्तस्त्रीन्यदाचरति भास्करः स कालः कुतपस्तत्र पितृणां दत्तमक्षयमित्यापस्तं
बोक्तः स्थूलो गौणः कुतपो ग्राह्यः तथा निरग्न्यादीनां कुतपव्याप्त्यैवामा निर्णेतव्या न त्वपराह्णव्याप्त्येत्याह अत एव दि
नद्वये मध्याह्नव्याप्तौ निर्णयकं सिनीवाली कुहूश्चैव श्रुत्युक्तश्राद्धकर्मणि स्यातां ते यदि मध्याह्ने श्राद्धादि स्यात्कथं तदा
तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता साम्यापि च कुहूर्ज्ञेया वेदवेदांगवेदिभिरिति प्रचेतोवचनमपि सविषयं भ
वति कालादर्शकारोपि कुतपस्यानग्निकर्तृकदर्शश्राद्धकालत्वं मन्यते किंतु दिनद्वयेप्यपराह्णव्याप्त्यभावे निमित्तनि १०३
त्यापराह्णबाधेन फलचमसवत् मथाद्व्यते साग्निकानां तावत्परिष्ठवचनात्त्रेधा विभागपक्षापराह्णो दर्शश्राद्धस्य

339/1942

कालः एवं सति मत्स्यपुराणादौ दर्शश्राद्धप्रकरण एवोक्तो नारभ्यविहितोपि वा प्रकृतित्वात्तत्रैवागतः पंचधाविभागादिपक्षाप
राह्णो यदि न निरग्निविषयः किंविषयस्तर्हि यद्यपि परिशिष्टोक्तस्यापराह्णस्य पिंडपितृयज्ञोत्तरदर्शश्राद्धानुष्ठानात्साग्निकवि
षयत्वाभावाद्दशानियमरहितसाग्निकविषयाभावेति कथंचिद्वक्तुं शक्यते तथापि दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं
अपराह्णे पितॄणां तु तत्र दानं प्रशस्यत इत्यादिवचनैर्निरग्निकान्प्रत्यपि प्राप्तमपराह्णस्य दर्शश्राद्धकालत्वं तस्मादनंतफ
लदस्तत्रारंभो विशिष्यत इत्यादिवचनैश्च प्राप्तं प्रकृतित्वात्कुतपस्य तत्प्रारंभकालत्वं तान्प्रति तदा बाध्येत यदि कुतपका
लिकग्राह्यत्ववचनमन्यथा नोपपद्येत तत्तु दिनद्वयापराह्णस्पर्शाभावे निर्णायकं तया सकृतरमुपपद्यते सिनीवालीत्या
दिवचनवत् भूतविद्धाग्रहणं च तत्र दृष्टांतत्वेन जाबालिवचनं च निरग्न्यादीन्प्रत्यपराह्णप्राप्तिद्योतकं अपराह्णद्वयाव्या
पीति तत्रोपादानात् प्रचेतोवचनं तु स्यातां ते यदि मध्याह्नादित्येवं कालादर्शादिषु पठितं मध्याह्नादुपरि स्यातामिति व्या
ख्यातं तेनाविरोध्येव यत्तु माधवेन ग्राह्या कुतपकालीकीत्यस्य वचनस्यैकोद्दिष्टविषयत्वमुक्तं तत्र यद्यपि दर्शमृताब्द
श्राद्धस्यामावास्याक्षयोयस्येति वचनादेकोद्दिष्टरूपत्वाभावेपि सपिंडीकरणपूर्वभाविमासिकमेकोद्दिष्टं विषयो लभ्य
ते दर्शमृतस्य तथापि तत्र विशेषवचनं व्यर्थमित्यनुकल्पत्वेन कुतपव्याप्ति निरग्निकान्प्रत्यनेन विधीयत इति द्वितीयए
मा वपक्षस्तदुक्तो युक्त इत्यलं बहुना अयमत्र मताहा[illegible]श्राद्धतिथिनिर्णयसंग्रहः मुहूर्ताविकोद्दिष्टस्य कालः कुतपो रो
हिणो तौ मुहूर्तत्रिकात्वत्मापराह्णपार्वणस्य तु शुक्लपक्षप्रयुक्तस्य युगमत्वादिरूपिणः तदन्यस्य विहायाद्यं कुतपाद्ई
स एव सः तत्रापि चैकोद्दिष्टस्य पार्वणस्यादिमस्य तु प्रारंभः कुतपस्याद्ये दले न्यस्योत्तरत्र तु ततः सा पार्वणे मुख्या प्रार
भ्य कुतपं भवेत् अपराह्णांतमितस्या अलाभे त्वापराह्णिकी ४ तस्य प्रधानकालत्वात्तत्व्याप्त्या तेन निर्णयः सर्वेषां व्या
प्तिपक्षाणां तस्मिन्नवचसंभवात् ५ तत्रैकैकवमध्याह्नकालत्वेनोतेकदेशतः सैवैकोद्दिष्ट इत्येवं पार्वणे चापराह्णि

का०त० की ८ तत्तत्कालैकदेशेयावैषम्येणदिनद्वये वर्ततेसाधिकाग्राह्येकाद्दिष्टेपार्वणेपिच ७ साम्येनतादृशीवृध्यासाम्येनो
१०४ ततिथिर्यदि पराह्णांशेनपूर्वाव्यापिनीत्वेद्दिनद्वये ८ कृत्स्नस्यकर्मकालस्यतदोत्तरातिथिःक्षये साम्येचपूर्वावृद्धौ
तुपरावार्षिकमासिके ९ पौर्णमासीकृष्णपक्षाष्टकाश्राद्धादिषुत्वियं पूर्वातिक्रमबीजस्याभावात्पूर्वैवसर्वदा १० अ
न्यपक्षेषुतुश्राद्धेषेतेप्वाह्निकवत्तिथिः दिनद्वयेपिकालस्पृक्पित्र्येपूर्वैवसर्वदा ११ कर्मानुष्ठानमात्रापिकालएवभ
वेत्किल आमिकेदैविकेचैवतिथिःसंगवकालिकै १२ कालव्याप्तितदस्पर्शपक्षयोस्तद्दिनद्वये उत्तरादेविकेग्रा
ह्येसैवंदर्शविनिर्णयः १३ तत्रयेषामेकदिनेन्वाधानपितृयज्ञयोः श्राद्धस्यचक्रियानित्यापश्चाच्चंद्रेक्षणेपिच
१४ दर्शेष्टेरननुष्ठानंतादृशान्साग्निकान्प्रति निर्णीयतेत्वमावास्यापरिशिष्टानुसारतः १५ त्रेधाविभक्तदिवस
तृतीयांशाविनाकृते दिवसांत्यमुहूर्तेनप्रातरन्वाहितेपरं १६ पार्वणंतेविधातव्यंपितृयज्ञपुरःसरं तत्रापिशस्तश्चं
द्रस्यक्षयकालःसचक्षयः १७ कृत्स्नक्षयःसूक्ष्मतावपरातत्पूर्वभाविनी चतुर्थभागोनकलापरिशिष्टत्वलक्षणा
१८ दर्शाष्टमोंशावधिकश्चतुर्दश्यष्टमांशकः आरभ्यतस्यसमयःप्रायिकोज्योतिषेस्मृतः १९ तत्रपंचमुहूर्तात्मि
तृतीयादिनभागगा व्याप्तिश्चतुर्थासंभाव्याकार्त्स्न्येनोतैकदेशतः २० पूर्वेद्युरपरेद्युर्वासमावाविषमाथवा दि
नद्वयेप्येकदेशेनेवंत्यत्रचनिर्णयः २१ कार्त्स्न्येनैवैकदेशेनपरेचव्यापिनीयदि कालस्यसैवग्राह्यास्यात्पूर्वैवाप्ये
कदेशतः २२ कार्त्स्न्येनवापरत्रास्पृक्तादृशीयदिसैवतत् यातुपूर्वैवकार्त्स्न्येनकालंयातिपरापिच २३ एक
देशेनयागश्चततःपरदिनेभवेत् वृध्यातत्काललाभेनचंद्रस्यादर्शनात्तथा २४ तदेकदेशव्याप्त्यामपिश्राद्ध
संमतं परस्यामेवतत्रैवपूर्वाहेतुविपर्ययात् २५ यागश्चतत्कृगायांतत्पूर्वस्यामेवन्नवेत् पित्र्येकदेशतुसा
म्यवैषम्यतःस्पृशेत् २६ सापिपूर्वापरस्यांचेद्यागस्तत्परतःसचेत् परेवशस्ताश्राद्धादौ यदाभूतपतेदिने २७ १०४

341/1942

श्राद्धंचपितृयज्ञश्चप्राप्तोसंध्यासमीपतः प्राग्दर्शनंप्रतीक्ष्यापिकर्तुंशक्योतदाखलु २८ प्रतीक्ष्यदर्शंकर्तव्योनोचेद्भूतां
त्यभागके अथयेषामेकदिनेन्वाधानपितृयज्ञयोः २९ श्राद्धस्यचक्रियानित्यापश्चाच्चंद्रेक्षणेनच दर्शेष्टेरप्यनुष्ठानंता
दृशान्साग्निकान्प्रति ३० निरग्निकांश्चाधिकृत्यक्रियतेदर्शनिर्णयः तत्रापराह्णेयेकेवकार्त्स्न्येनैवैकदेशतः ३१ वर्त
तेसैवतेग्राह्यापित्र्येथोयादिनद्वये व्याप्नोतितममावास्यास्योत्तराद्वृद्धिसाम्ययोः ३२ तदुत्तरातिथेर्ग्राह्यापूर्वातस्याः
क्षयेमता। दिनद्वयेप्येकदेशंवैषम्येणयदास्पृशेत् ३३ यदापूर्वापरावापिग्राह्याधिक्येनतद्वती साम्येनतादृशीत
स्याद्वृद्धिसाम्यक्षयेभवेत् ३४ पूर्वयोरुत्तरान्येतुपक्षेपूर्वादिनद्वये कालास्पृक्प्रथमासाग्नेर्निरग्न्यादेःपरास्मृता
३५ मुख्योष्टममुहूर्तात्मातदादित्रितयात्मकः गौणोवाकुतपोनग्नेःश्राद्धकालस्तथासति ३६ तद्व्याप्त्यैवनिर
ग्नीनांदर्शनिर्णयइत्यपि हेमाद्रिरूचेतत्वंतु विवेक्तव्यंविवेकिभिः ३७ इतिश्राद्धकालतत्वविवेचनं अथरविसं
क्रांतिनिर्णयः तल्लक्षणंनागरखंडे रवेःसंक्रमणंराशौसंक्रांतिरितिकथ्यतेइतिरवेरितिसंक्रांतिरित्यत्रापिसंबध्यते
अतएवोत्तरार्धेस्नानदानतपःश्राद्धहोमादिषुमहाफलेति इतरग्रहसंक्रांत्यपेक्षयेत्यर्थः तथाचराशीनांद्वादशत्वा
त्ताअपिद्वादशभवंति यथाचदेवीपुराणे द्वादशैवसमाख्याताःसमाःसंक्रांतिकल्पनाइति कल्पनाभेदाः तेचसंक्रांतिसामा
न्यनिमित्तकेषुविधिप्रतिषेधेषुसमाःसाधारणाः अविसर्गपाठेसमानवर्षे एकैकवर्षसंबंधिन्यइत्यर्थः कदाचित्संवत्सरस्य
त्रयोदशमासत्वेपिसंक्रांतयोद्वादशैवनत्वमावास्यादिवत्तदापित्रयोदशेत्येवमर्थएवकारः तासांचमध्येकासांचित्कासां
चिदवांतरसंज्ञाश्चतस्रः द्वयोरयनमिति द्वयोर्विषुवमिति चतसृणांषडशीतिमुखमिति चतसृणांविष्णुपदमपि अय
नंचाद्विविधंदक्षिणमुत्तरमितियदाहवसिष्ठः अयनेद्वेविषुवेद्वेचतस्रःषडशीतयः चतस्रोविष्णुपद्यश्चसंक्रांत्योद्वादश
स्मृताः मृगकर्कटसंक्रांतिद्वेउदग्दक्षिणायणे विषुवतीतुलामेषौतयोर्मध्येततोपराः वृषवृश्चिककुंभेषुसिंहेचैवय
दारविः एतद्विष्णुपदंनामविषुवादधिकंफलं कन्यायांमिथुनेमीनेधनुष्यपिरवेर्गतिः षडशीतिमुखीप्रोक्ताषडशीति

का०त० गुणाफले इतिषडशीतिमुख्यएवषडशीतयोनामैकदेशेन अपोमकरः तयोरयनविषुवतोर्मध्ये एतान्येवायनादिसंज्ञा
१२५ प्रयोजकान्राशींश्चरस्थिरद्विस्वभावरूपाभिर्ज्योतिःशास्त्रप्रसिद्धाभीराशीचतुष्कत्रयसंज्ञाभिर्निर्दिशेतएवसंज्ञाउक्तानारद
संहितायांस्थिरभेत्वर्कसंक्रांतिर्ज्ञेयाविष्णुपदाह्वया षडशीतिमुखंज्ञेयंद्विस्वभावेषुराशिषु सौम्ययाम्यायनेत्वभेभवतो
मृगकर्किणोः तुलाधनुजयोर्ज्ञेयंविषुवत्सूर्यसंक्रमइति एताएववारभेदेनचजाताःप्रत्येकंसप्तसंज्ञाभवंति तथाचदेवी
पुराणे सूर्येघोराविधोर्ध्वांक्षीभौमवारेमहोदरी बुधेमंदाकिनीनाममंदास्फरगुरोर्हिते मिश्रिताशुक्रवारेस्याद्राक्ष
सीचशनैश्चरे मंदाध्रुवेषुविज्ञेयामृदौमंदाकिनीतथा क्षिप्रेध्वांक्षीविजानीयादुग्रेघोराप्रकीर्तिता चरेमहोदरीज्ञेया
क्रूरेर्क्षेस्तुराक्षसी मिश्रिताचैवनिर्दिष्टामिश्रेर्क्षेस्तु संक्रमइति मदनरत्नेनक्षत्रप्रयुक्तसंज्ञोत्तरंवारप्रयुक्ताः
ध्रुवादिनक्षत्राणिदर्शितानिज्योतिषरत्नमालायां रोहिणीसहितमुत्तरात्रयंकीर्तयंतिमुनयोध्रुवाह्वयं त्वाष्ट्रमित्रशशि
पूषदेवतान्याभनंतिमुनयोमृदून्यथा आश्विनीगुरुभमर्कदैवतंसाभिजिल्लघुचतुष्टयंमतं मूलशक्रशिवसर्पदेवतान्यु
ग्रपंत्यथचतीक्ष्णसंज्ञया वैष्णवत्रययुतःपुनर्वसूमारुतंचचरपंचकंत्विदं पूर्विकात्रितयमांतकमघेत्युग्रपंचकमिदं
जगुर्बुधाः हव्यवाहनयुतंद्विदैवतंमिश्रासंज्ञमथमिश्रकंमस्त्विति त्वाष्ट्रचित्रा मित्रशशिपूषदेवतान्यनुराधामृगरेव
त्यः गुरुभंपुष्यः अर्कदैवतंहस्तः लघुक्षिप्रं शक्रशिवसर्पदैवतानिज्येष्ठार्द्राश्लेषाः वैष्णवत्रयश्रवणादित्रयं मा
रुतस्वाती पूर्विकात्रयंपूर्वात्रयं आंतकंभरणी हव्यवाहनःकृत्तिका द्विदैवतंविशाखा एतत्संज्ञाविशेषप्रयुक्तः
पुण्यकालविशेषोवक्ष्यते संक्रांतिकालेचस्नानदानादीनिविहितानि तत्रनागरखंडे पूर्वमुदाहृतं शातातपीयेपि
संक्रांतौयानिदत्तानिहव्यकव्यानिदातृभिः तानिनित्यंददात्यर्कः पुनर्जन्मनिजन्मनिइति अयनादिविशेषपुरस्कारे
णापितारतम्येनफलवद्दानादिविहितंवृद्धवसिष्ठेन अयनेकोटिपुण्यंचलक्षंविष्णुपदीफलं षडशीतिसहस्रंतु षडशी
त्यांस्मृतंबुधैः शतमिंदुक्षयेदानंसहस्रंतुदिनक्षये विषुवेशतसाहस्रंव्यतीपातेत्वनंतकमिति तत्रस्नानश्राद्धयोरकर १२५

343
1942

णेप्रत्यवायस्मरणान्नित्यत्वस्मरणाच्चनकेवलंसंक्रांतिकालकत्वं किंतुतन्निमित्तत्वमपि तथाचशातातपः रविसंक्रमणेप्राप्तेन
स्नायाद्यस्तुमानवः सप्तजन्मानिरोगीस्यान्निर्धनश्चैवजायतेइतिविष्णुरपि आदित्यसंक्रमणं विशेषेणविषुवद्वयमयन
द्वयंव्यतीपातोजन्मर्क्षमभ्युदयश्च एतांस्तुश्राद्धकालान्वैनित्यानाहप्रजापतिरिति अस्याश्चसंक्रांतेःसूर्यमंडलनेमिरेखैक
देशतन्मध्यकेंद्रस्यवापूर्वराशिसंबंधत्यागेनोत्तरराशीप्रवेशरूपायाःकालस्यातिसूक्ष्मतयादुर्ज्ञानतयाचतत्रैकस्यापिस्ना
नादिकर्मणोनुष्ठानुमशक्यत्वात् बहूनांतुस्तरांतथात्वात् सन्निहितकालेतान्यनुष्ठातव्यानिसंधिसंनिहितइवकालेद
र्शपूर्णमासेसचकालःकिमुभयतःकिंवान्यतरतःकियांश्चेत्यपेक्षायांहेतुपूर्वकंश्राद्धःकालोदेवलेनदर्शितः संक्रांतिस
मयःसूक्ष्मोदुर्ज्ञेयःपिशितेक्षणैः तद्योगाच्चाधश्चोर्ध्वंत्रिंशन्नाड्यःपवित्रिताइति तद्योगात्संक्रांतियुक्तात्सूक्ष्मकालाद
धऊर्ध्वमपिचमिलित्वात्रिंशन्नाड्योधःपंचदशऊर्ध्वंपंचदशेत्येवंतन्निमित्तस्नानादिषुपवित्रायोग्याःकृताःशास्त्रकारैरि
त्यर्थः माधवेनप्रत्येकंत्रिंशदित्युक्तं तदतीतानागतोभोगोनाड्यःपंचदशस्मृताइतिदेवीपुराणविरुद्धं भुज्यतेपाल्यतेवि
धिनिषेधावस्मिन्नितिभोगः भुजपालनाभ्यवहारयोरितिस्मरणात् अर्वाक्षोडशविज्ञेयानाड्यःपश्चाच्चषोडश का
लःपुण्योर्कसंक्रांतेर्विद्वद्भिःपरिकीर्तितः नाड्यःषोडशपूर्वेणसंक्रांतेरपरेणच राहोर्दर्शनमात्रेणपुण्यकालःप्रकीर्तितः
संक्रांतौपुण्यकालस्तुषोडशोभयतःकलाइत्यादीनिशातातपमरीचिजाबालादिवचनान्यपि अत्यंतरत्वात्पूर्वसंवादीन्येव
रविमंडलकेंद्रपूर्वापरभागयोर्हिसामस्त्येनोत्तरराशिचक्रानुप्रवेशःपंचदशपंचदशघटिकाभिरेवानुपातायातार्भिर्भवति
तात्कालिकरविमंडलवशाच्चकदाचित्षोडशभिः रविमंडलकेंद्रस्यैवचैत्तरराशिचक्रप्रवेशोमुख्यासंक्रांतिः तत्पूर्वोत्तरभा
गोचयावताकालेनोत्तरराशिचक्रमनुप्रविशतस्तावन्मुख्यःसंक्रांतेःपूर्वतःपरतश्चभोगः अतएवचसर्वास्वपिसंक्रांति
षुसाधारणोयमुभयतःपुण्यकालः संक्रांतिविशेषेचपूर्वापरकालयोन्यूनघटिकावत्पुण्यतरत्वंक्वचिच्चतयोस्तुल्यत्वं न
तुसामान्येनदेवलेनोक्तस्यकालस्यविशेषवचनवशात्क्वचित्पूर्वैवक्वचिदुत्तरैवक्वाचिच्चोभयतःपुण्यमितिव्यवस्थेव

का०त० स्नानंमाधवोक्तंयुक्तं अतएवपुण्यकालोविष्णुपद्याः प्राक्पश्चादपिषाडशीतिस्कंदपुराणवचनेनोभयतः षोडशनाडीपुण्यत्व
१-७६ वचनानांविष्णुपदीषूपसंहारइतियत्केश्चिदुक्तं तदप्ययुक्तं अयनादौसदादेयंद्रव्यमिष्टंगृहेषुयत् षडशीतिमुखेचैवविमोक्षे
चंद्रसूर्ययोरित्यभिधायसूक्ष्मेसंक्रांतिकालेदानानुपपत्तेस्तद्योग्यस्थूलकालापेक्षायांतत्प्रतिपादकस्यास्यवचनस्यषडशीति
मुखादिविषत्वस्यापिस्पष्टंप्रतीतेश्च एवंसर्वसंक्रांतिसाधारण्येनोभयतःपंचदशषोडशघटिकारूपेपुण्यकालेसति म
ध्येतुविशेषेणपुण्यंप्राग्विष्णोदक्षिणायने षडशीतिमुखेतातिअतीतेचोत्तरायणे याम्यायणेविष्णुपदेतथादौदानाद्यनंतंवि
षुवेतुमध्ये वदंत्यतीतिषाडशीतिवक्त्रेमहर्षयः खल्वयनेचसौम्यादस्यादीनियानिवसिष्ठलौगाक्ष्यादिवचनानितानिसंक्रां
तिभेदेनपूर्वोत्तरकालयोः प्राशस्त्यातिशयप्रतिपादनार्थानि अतएवज्योतिर्ग्रंथेषडशीतिमुखेतीतेतथोदगयनेचभूरिफल
मिति मध्येउभयतइतियावत् इदंचसामान्यवचनमिद्धार्थानुवादः उपांश्वपसमंद्रंप्रायणीयायांमंद्रतरमातिथ्यायांउपांश्व
पसस्त्वित्यत्रन्यायसिद्धोपांशुत्वस्ययथानुवादस्तथेत्यथास्त्वितिवत् इतरसंक्रांतिवत्पूर्वोत्तरकालान्यतरकालप्राशस्त्य
मनिष्टत्वर्थः यत्तुविष्णुपदीषुपूर्वकालपुण्यकालत्वप्रतिपादकंवचनं तत्पुण्यास्स्याविष्णुपद्याश्चप्राक्पश्चादपिषोड
शीतिवृद्धवसिष्ठवचनस्यैतद्विरोधादेवविषुववदनुवादत्वासंभवादनेनवचनेनसर्वसाधारण्येनसामान्यवचनात्पुण्य
त्वेनसिद्धयोःपूर्वोत्तरकालयोःपुण्यतरत्वेविष्णुपद्यांप्रतिपादितेपूर्वकालस्यपुण्यतमत्वप्रतिपादनार्थंद्रष्टव्यं वर्तमाने
तुलामेषनाड्यस्तत्रभयतोदश विषुवेषण्मुहूर्तंस्यात्षडशीतिमुखेत्रयं तथार्वविष्णुपदेत्रीणिपुण्यानिकवयोविदुरित्या
दिपंचदशन्यूनघटिकापुण्यत्वोक्तिवत् क्वचित्संचदशषोडशनाडीनामपिपुण्यतरत्वंद्रष्टव्यं यत्रतदधिकनाडीनांपुण्य
त्ववचनं यायाःसंनिहितानाड्यस्तास्ताःपुण्यतमास्मृताइतिवचनात् यथावृद्धवसिष्ठः अतीतेऽनागतेपुण्येद्वेउद
क्दक्षिणायने त्रिंशत्कर्कटकेनाड्योमकरेविंशतिःस्मृताइति ब्रह्मैववर्तेतुमकरेतुदशाधिकाइतिपाठः बृहस्पतिः
ऽयनेविंशतिःपूर्वामकरेविंशतिःपराइति अयनेदक्षिणायने माधवीयेवृद्धवसिष्ठपाठः षडशीत्यामतीतासांष १-७६

345
1942

ष्टीरुक्तास्तुनाडिकाइति तत्रापिप्रत्येकंपंचदशेति २ मिलित्वाषष्टिरितिहेमाद्रिः परमार्थतस्त्वष्टिरितिपाठः अष्टिःषोड
श तच्छंदसोषोडशाक्षरपादत्वात् एवंमंदादिसप्तसंक्रांतिषुयत्त्रिचतुःपंचसप्ताष्टनवद्वादशएवचक्रमेणघटिकात्वेतास्त
त्पुण्यंपरमार्थिकमित्यल्पघटिकापुण्यत्ववचनंतदपिपुण्यतमत्वप्रदर्शनार्थमेव एताश्चपूर्वभोगिन्योत्तरभोगिन्योभयतोभो
गिन्योवासंक्रांतयोयदिदिवामध्याह्नादिषुजायंते तदादिवैवतत्रतत्रोदितप्रशस्तपुण्यकाललाभात्सम्यगेव यदातुपूर्वभो
गिन्यांसूर्योदयोत्तरमव्यवधानेनजायमानायांदिवापूर्वप्रशस्तःपुण्यकालोनलभ्यतेउत्तरभोगिन्यांवासूर्यास्तात्पूर्वमव्यव
धानेनजायमानायांउत्तरस्तदासामान्यवचनप्राप्तयोरुत्तरपूर्वकालयोरेवयथायथंदिवैवदानाद्यनुष्ठेयंनतुप्रशस्तकाल
लाभाभावात्पूर्वस्यामुत्तरस्यांवारात्रौ अह्निसंक्रमणेपुण्यमहःकृत्स्नंप्रकीर्तितं रात्रौसंक्रमणेभानोर्दिनार्धंस्नानदानयोरि
तिवृद्धवसिष्ठवचनात् अत्राहिपूर्वार्धेनयथाश्रुतार्थपरंसर्वसंक्रांतिसाधारणपूर्वोत्तरनाडीपुण्यत्ववचनादेवतस्यसिद्धेः
किंतुविशेषगोचरप्रशस्तकालवचनेनप्रसक्तस्यरात्रिपुण्यकालत्वस्यप्रतिषेधकाह्निसंक्रमेणकृत्स्नंपूर्वभागावच्छिन्नमुत्तरभा
गावच्छिन्नंवाअहरेवपुण्यंदानादियोग्यंनरात्रिरिति उभयतोभोगिनीषुतूभयोरपिकालयोःसमत्वान्नरात्रावनुष्ठानप्रसंगः
एवंरात्रिसंक्रमेपिदिनार्धपुण्यत्वविधानादर्थाद्यायाःसंनिहिताःराहुदर्शनसंक्रांतीत्यादिसामान्यवचनप्राप्तस्यरात्रिपुण्यका
लत्वस्यनिषेधः अनेनैवाभिप्रायेणगोभिलोपिरात्रौसंक्रमितेभानौदिवाकुर्यात्तुतत्क्रियामिति रात्राविव्युत्तरार्धंसएवव्रणो
तिसाधितत्पूर्वोत्तरविभागेन अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरिक्रिया ऊर्ध्वसंक्रमणेचोर्ध्वमुदयात्प्रहरद्वयं पूर्णेचेद
र्धरात्रेतुयदासंक्रमतेरविः प्राहुर्दिनद्वयंपुण्यमुक्त्वामकरकर्कटाविति मध्याह्नआवर्तनं तत्त्वोदयश्चपूर्वोत्तरदिनयोःसंनि
धानलाभात् दिनद्वयमप्यधीवच्छिन्नमेवद्रष्टव्यं रात्रौसंक्रमणइतिसामान्यतोरात्रिसंक्रमेदिनार्धपुण्यत्वस्यैवोपक्रमेभिधा
नात् स्पष्टंचेदंदेवीपुराणे संपूर्णअर्धरात्रेतुउदयेस्तमयेपिच मानार्धंभास्करेपुण्यमपूर्णेशर्वरीदलेइति संपूर्णअर्धरात्रे
संधौ उदयेप्रातःसंध्यायां अस्तमयेसायंसंध्यायां अपूर्णेशर्वरीदलेसंधिपूर्वोत्तरभागयोः सायंसंध्यातउत्तरंप्रातःसंध्या

का०न० तःपूर्वं योगिनलक्षणयावाभास्करोदिवसः निशीथेच पूर्वोत्तरभागयोः सायंप्रातः संध्ययोश्च संक्रमणेदिनार्धपुण्यमित्यर्थः क
१७१ स्मिन्‌रात्रिभागकस्यदिनस्यार्धमित्यपेक्षायामुक्तंतत्रैव अर्धरात्रेत्वसंपूर्णेदिवापुण्यमनागतं संपूर्णउभयोर्नियमातिरेकेपरे
ह्ननीति अत्रसंपूर्णार्धरात्रशब्देनसायंसंध्यानिशीथपूर्वभागश्चलक्ष्यते तत्रसंक्रमणेनाविद्यते आगतमागमनंयस्यतद
नागतमनीतमितियावत्‌ तद्दिवामामार्धंपुण्यंतस्योत्तरंसंनिधानात्‌ संपूर्णेअर्धरात्रेरात्रिदलसंधौसंक्रमणेउभयोःपू
र्वोत्तरदिवसयोरुत्तरपूर्वमानार्धे अर्धरात्रादतिरेकतःपरंसंध्यायांवासंक्रमणेपरेह्ननिपूर्वमानार्धंपुण्यमित्यर्थः संपू
र्णउभयोरित्यत्रव्यवस्थोक्तादेवीपुराणे आदौपुण्यंविजानीयाद्यद्यभिन्नातिथिर्भवेत्‌ अर्धरात्रेव्यतीतेतुविज्ञेयमप
रेह्ननीति अर्धरात्रेसंक्रमणेपूर्वदिनोत्तरार्धवर्तियद्यभिन्नासंक्रमणकालीनातिथिर्भवेत्तदादौपूर्वदिनोत्तरार्धेपुण्यंविजा
नीयात्‌ एवंसतियदिद्वितीयदिनपूर्वार्द्धेतिथ्याभिन्नास्यात्तदातदित्यर्थसिद्धमितितत्रतयोर्व्यवस्था व्यतीतेअर्धरात्रेपू
र्वदिनतिथ्यर्भेदेपिपरेह्नन्येवेति यदात्वर्द्धरात्रसंक्रमकालीनातिथिर्दिनद्वयार्धयोरपिभवतितथापूर्वभोगिनीपूर्व
दिनोत्तरार्धंउत्तरभोगिनीपूत्तरदिनपूर्वार्द्धमुभयतोभोगिनीचेच्छाविकल्पः इयंचव्यवस्था अर्धरात्रपदानुपादानेपि
तत्संक्रमविषयैव तत्रैवदिनद्वयपुण्यत्वोक्तेः प्रधानात्त्यापत्तेश्चतत्समुच्चयायोगेव्यवस्थापेक्षणात्‌ एवंसतियस्मि
न्कस्मिन्नपिरात्रिभागेसर्वस्मिन्नयनव्यतिरिक्तेसंक्रमणेसमस्तादिनार्द्धपुण्यत्वेस्थितेविष्णुपद्यांधनुर्मीननृयुक्कन्यासुवैयदा
पूर्वोत्तरगतंरात्रौभानोःसंक्रमणंभवेत्‌ पूर्वाह्णेपंचनाड्यस्तुपुण्याःप्रोक्तामनीषिभिः अपराह्णेचपंचैवश्रौतेस्मार्तेच
कर्मणीतियत्‌ याम्यांपूर्वापरदिनगतास्तमयोदयपूर्वोत्तरपंचनाडीपुण्यत्ववचनंतत्तदतिशयप्रदर्शनार्थं पूर्वो
त्तरगतमित्युक्तत्वात्पूर्वाह्णापराह्णयोर्व्युत्क्रमेणान्वयः केचिदेतद्विशेषवचनवशात्सामान्यवचनंदिनार्द्धवचनं
विषुववचनमन्यंते आसन्नसंक्रमंपुण्यंदिनार्द्धंस्नानदानयोः रात्रौसंक्रमणेभानोर्विषुवत्ययनेदिनमितियज्ञपा
र्श्ववचनादपि अस्यहिविषुवतिसंक्रमणेरात्रौसतिदिनार्धंअयनेतुदिनमित्यर्थः अतएवनायनमपिविषयः पू १७१

र्वस्यतत्रप्रत्यासंनस्यसर्वस्यैवदिनस्यानेनपुण्यत्वोक्तेः वृद्धवसिष्ठेनमुक्तामकरकर्कटाविति पर्युदासाच्च एवंनिशीथपूर्वोत्तरभागगो
चरदिनार्द्धपुण्यत्वोक्तेविषुवविषयत्वेतत्समभिव्याहृतानिशीथगोचरोभयदिनपुण्यत्वोक्तिरपि तद्विषयैव ततश्चादौपुण्यं
विजानीयादितिव्यवस्थापि तद्गोचरातथैत्यपिकेचित्‌ तदेतद्द्वयमप्ययुक्तं वृद्धवसिष्ठवचनंहिमुक्तामकरकर्कटाविति पर्युदा
ससामर्थ्यादयनव्यतिरिक्तसर्वसंक्रांतिविशेषविषयमेवस्पष्टं नतद्विशेषवचनेनबाधितुमुपसंहर्तुंवाशक्यं तथात्वेवि
षुवमात्रविषयेतस्मिन्‌पर्युदासान्वयात्‌एवंसतिदेवीपुराणमपितत्समानार्थंतत्समानविषयमेवएकमूलकल्पनालाघवा
त्‌ यज्ञपार्श्ववचनेतुवस्तुतोविषुवतिसामान्यवचनसिद्धमर्थमनूद्यायनेदिनार्धादपवादिनततःकिंचिद्दूनतयासंपूर्णस्य
हितस्यपुण्यत्वंविधीयते अतएववक्ष्यमाणयोरप्ययनविषयैर्योर्वचनयोरहनीत्युक्तं यद्वापादत्रयेणसर्वसंक्रांतिविषयेसा
मान्यतोदिनार्धपुण्यत्वंविधायचतुर्थपादेनविषुवत्ययनेचतथैवसमस्तदिनपुण्यत्वंविधीयतां संक्रमस्तुनिशीथस्या
तन्वध्यामाःपूर्वपश्चिमाः संक्रांतिकालोविज्ञेयस्तत्रस्नानादिकंचरेदिति भविष्योत्तरवचनेनैवनिशीथसंक्रमेमाधव
स्तुदिनद्वयमितिदिवेतिवापाठमभिप्रेत्यविषुवतिसंक्रमेरात्रौजातेदिनार्धपुण्यं अयनसंज्ञकेतुसंक्रमेदिवाजातेदिनार्धपुण्यं
कर्कटेपूर्वार्धपुण्यंमकरेउत्तरार्धंतच्चमध्यंदिनोपज्ञातायनविषयमितिव्याचख्यौ एवंरात्रिजातसंक्रांतिषुसंधितत्पू
र्वोत्तरभागविभागेनयोनिर्णयः कृतस्तंसर्वमयनयोःपर्युदासितुंवृद्धवसिष्ठवचनशेषोमुक्तामकरकर्कटाविति तयो
स्तुतथाभूतयोः कथमित्यपेक्षायांमाधवस्ताद्राहुदर्शनसंक्रमणेरवेः राहोश्चदर्शनेस्नानंप्रशस्तंनान्यथानिशी
त्यादिवृद्धयाज्ञवल्क्यवसिष्ठादिवचनैःसर्वसंक्रांतिषुप्रसक्तस्यरात्रावपिस्नानाद्यनुष्ठानस्यापवादमुक्त्वेत्ययनयोः
पर्युदासादौत्सर्गिकंरात्रावेवतत्तयोरुचितं एवंसतिरात्रिपुण्यत्ववचनान्यपिसविषयाणिभवंति अन्यथानिर्विषया
णिस्युः यद्यपिचायनयोरपिदिवैवपुण्यकालत्वविधायकान्यपिवचनानिसंति तथाचभविष्योत्तरे मिथुनात्कर्कसं
क्रांतिर्यदिस्यादंशुमालिनः प्रभातेवानिशीथेवा कुर्यादहानिपूर्वतः कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः प्रदोषेवा

347
1942

का०त० र्धरात्रेवास्नानंदानं परेहनीति वृद्धगार्ग्योपि यदास्तमयवेलायांमकरंयातिभास्करः प्रदोषेवार्धरात्रेवास्नानंदानंपरेहनि अर्धरा
१७८ त्रेतदूर्ध्वंवासंक्रांतौदक्षिणायने पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति तथापितन्माहत्यरात्रिनिषेधाप्रतीतेरर्थात्तत्कल्पनेचत
द्विधीनांनिर्विषयत्वेनानर्थक्यप्रसंगादानर्थक्यप्रतीहतीनामितिविकल्पेसतिशिष्टाचारतोव्यवस्थेतितदेतद्युक्तं इतरसंक्रांति
ष्वपिहिनसाक्षाद्रात्रिपुण्यकालत्वंकेनचिद्वचनेननिषिद्धंकिंतुदिनार्धपुण्यत्ववचनेनार्थादेव तादृशाश्चतन्निषेधायनयोरप्य
विशिष्टः रात्रौसंक्रमितेभानावितिगोभिलवचनमपितथा तत्रेतरग्रहसंक्रांतिविषयत्वस्यकैश्चिदुक्तस्यरुद्रवसिष्ठवचने
रविपदोपादानादसंभवाद्रात्रिपुण्यवचनानांनिरवकाशत्वादेवायनविषयत्वंवाच्यं तावताइतरसंक्रांतिविषयत्वमपीत्यय
नमात्रविषयत्वंनिप्रमाणिकं ग्रहणवदयनमितितुमाधवमतानुसारिणः कस्यचिदधुनातनस्यैवच तेनप्रमादादिनादिवा
स्नानाद्यनुष्ठानासंभवेविषयत्वंसर्वसंक्रमेष्वेवरात्रिपुण्यत्ववचनानामाचारतोव्यवस्थवेत्येववक्तव्यं तदपिनिशीथोप
जातेष्वेवयुक्तं संक्रमस्तुनिशीथेस्यादितिभविष्योत्तरवचनेतत्रैवपञ्चनामाद्इतिरात्रेरपिसंग्रहात् नचसर्वरात्रिसंक्रमनिर्ण
यशेषभूतात्पूर्णंचेदर्धरात्रेत्वित्येतन्मात्रशेषभूताद्धामुत्वाभकरकर्कटावितिपर्युदासादेवानयोस्तुननिशीथपूर्वापरभाग
जातयोः पूर्वदिनोत्तरार्धमुत्तरदिनपूर्वार्धंचपुण्यंनापिनिशीथजातयोर्दिनद्वयंकिंतुरात्राविवेत्येतदर्थकाद्रात्रिपुण्यत्ववच
नानामयनयोरुपसंहारइतिवाच्यं पर्युदासात्तयोःपूर्वोक्तार्थनिवृत्तिमात्रप्रतीतोनिर्णयार्थंवचनांतरापेक्षायांभविष्योत्त
रादिवचनाद्दिवापुण्यत्वस्यैवप्रतीतेः तद्बलादेवपर्युदासस्यार्धरात्रनिर्णयमात्रशेषत्वोक्तिरपिहेमाद्रेरयुक्तैव तत्रार्धरात्र
पूर्वोत्तरभागजतयोरप्ययनयोरितरसंक्रांतिविलक्षणनिर्णयकरणात् नचतद्वचनगतयोर्वाशब्दयोर्यथातयात्वेनयथा
कर्केतरसंक्रांतिसाधारण्येनप्रभातेजातेउत्तरेहनिपुण्यंनतुदिनद्वयेतथानिशीथजातेपूर्ववत्रैव यथाचमकरेप्रदोषेजातेपूर्व
त्रैवाहनितथार्धरात्रेजातेपरेहन्येवेतिव्याख्यानात्ताद्दशयोरितरसंक्रांतिसद्रूपएवनिर्णयः तथासति आसन्नसंक्रमंपुण्यमि १७८
तिउदयेस्तमयेपिवेत्यादिसामान्यवचनेनधनुर्मीनावतिक्रम्यकन्यांचमिथुनंयदा पूर्वापरविभागेनरात्रौसंक्रमतेरविः द्वि

349
1942

नांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः उदयेचतथापंचदेवेपित्र्येचकर्मणीतिस्कांदनविशेषवचनेनचतदंशेविरोधःसंपद्यते अ
स्तंगतियदासूर्येभ्रपंयातिदिवाकरः प्रदोषेचार्धरात्रेवातदापुण्यंदिनांतरमितिबोधायनवचनेचास्तंगतइत्यनेनैवलाभात् प्र
दोषार्धरात्रशब्दयोरानर्थक्यंचपरिहृतंभवति अर्धरात्रोपजातयोरेवपरंदिनद्वयपुण्यत्वापवादेनैकैकदिनपुण्यत्वंतत्रविधी
यतइतिवाच्यं अस्तोदयांतर्जातानामायनविषयाणांवचनानामेतादृशक्लिष्टव्याख्यार्थांबीजाभावात् तथाहिनतावत्सामान्य
वचनाविरोधसंपत्तिस्तद्बीजं विशेषवचनेनसामान्यवचनस्यात्यंतदोषत्वाभावेनतद्बाधार्थंविशेषवचनानांक्लिष्टव्याख्या
याअन्याय्यत्वात् वस्तुतस्तु आसंनसंक्रमोपीत्यादिनामप्ययनेतरसंक्रांतिमात्रविषयत्वाच्चसामान्यवचनंकिंचित्समाना
र्थेषुत्वनेकेषुवचनेषुयःकस्यादपिविशेषःपर्युदासःससर्वेषामविशेषोभवति नचरुद्रवसिष्ठवचनएवपर्युदासोवाक्य
त्रयविशेषत्वेआवृत्तिप्रसंगादनंतरस्यपूर्णंचेदित्यस्यैवशेषोभवत्पूर्वयोःशेषोनभवतीतिदूरापास्तंतत्समानार्थेतरवच
नशेषत्वंतस्येतिवाच्यं तात्पर्यग्राहकवशेनावृत्तेरप्यदोषत्वात् गौणंलाक्षणिकंवापीतिन्यायात् अस्तिचात्रत्रितयशे
षत्वेतात्पर्यग्राहकंभविष्योत्तरवृद्धगार्ग्यादिवचनमेवरात्रिमात्रोपजातायनविषयकं वस्तुतस्तुनार्षेयंवृणीतेनहोता
रंवृणीतइत्याद्यतिदेशशेषपर्युदासवत्भाष्यकारमतेदीक्षितोनददातिनजुहोतीत्यादिपर्युदासवच्चगुणविधितयाकांक्ष
कवाक्यतयायंपर्युदासोनतुनानुयाजेष्वित्यादिवत्पदैकवाक्यतया नहिनहोतारंवृणीतइत्यादीनांप्रधानवाक्यानतिसमी
पतत्प्रकरणमात्रेश्रुतानांतच्छेषभूतप्रकृतिवच्छेषशेषतायंदेकवाक्यतयासंभवतिकिंतुयत्प्रकृतिवत्कुर्यात्तद्धोतृवरणा
दिव्यतिरिक्तमितिगुणविधितयैव तथात्रापियोयंरात्रिजातेषुसंक्रमेषुनिर्णयःसमकरकर्कटव्यतिरिक्तेष्विति×नापि
प्रदोषार्धरात्र×अतोनावृत्तिप्रसंगइति×शब्दानर्थक्यंतद्बीजं अस्तंगतइत्यनेनास्तमयवेलायामुदयस्तमयेपिवेतिव
त्सायंसंध्योपादानात् कैमुतिकन्यायसिद्धत्वेपदानामर्थभेदेनानर्थक्याभावान्न्यायस्यचमंथरत्वेनवाक्यस्यापिसा
र्थकत्वात् प्रभृतदृष्टांतत्वेनव्याख्यानएवानर्थक्यंतत्प्रयोजनाभावात्श्रुतपूर्वोत्तराद्दरन्वयाभावादृष्टांतासामंजस्यं

का०त० च यत्तु धनुर्मीनावतिक्रम्येति स्कंदपुराणं तत्र पूर्वापरविभागेनेति मीनमतिक्रम्य येषं कन्यामतिक्रम्य तुलामित्यत्रैव संबध्यते न नु
१७९ धनुरतिक्रम्य मकरं मिथुनमतिक्रम्य कर्कमित्यत्र पूर्ववाक्याविरोधाय तयोस्तु रात्रिमात्रे जातयोर्यथासंख्यमुदये दिनांते च पंच
पंचघटिकानां पुण्यतमत्वं विधीयते यद्वा धनुरादीनां नसंनिहितामपि क्रमणक्रियां प्रतिकर्मत्वं किंतु व्यवहितामपि प्रधान
भूतां संक्रमणक्रियां प्रत्येव एवं सति यस्याः शास्त्रकर्मलाभोपि भवति अन्यथार्थतस्तत्र मकरादिकर्मलाभः स्यात् अनूद्यमा
नामतिक्रमणक्रियां प्रतित्वार्थिकं तत्पूर्वराशीनां कर्मत्वं यद्वातिक्रम्येत्याक्रम्येत्यर्थः सामान्यविशेषभावाच्च नान्यतरानर्थ
क्यं यात्तनाध्यापनाद्योनादावरान्नितिवत् तेनोभयथापि षडशीतिविषयमिदं वचनं नायनविषयं ग्रंथांतरत्वाच्च न विष्णु
पद्यामितियमवचनेन गतार्थतेति तेन मकरे स्वर्यास्ताद्दूर्ध्वं यदा विजातं उत्तरदिनस्यैवाद्यार्धं पुण्यं आद्याः पंचघटिकाः
पुण्यतमाः कर्केचोदयात्पूर्वं जाते पूर्वदिनस्यैवोत्तरार्धं पुण्यं अंत्याश्च पंचघटिकाः पुण्यतमाः आचाराद्रात्रौ वानुष्ठानमि
त्ययमेवानयोर्निर्णयः संक्रांतिप्रयुक्तयात्रामैथुनादिनिषेधस्तूक्तदानादिविहितकर्मकालास्त्वतारतम्येन प्राप्त्याक्तत्रा
पि संक्रांतिकालस्यातिसूक्ष्मत्वेन दुर्ज्ञानत्वाविशेषात् अतएव लौगाक्षिः याश्चानिषेधा अपि सूक्ष्मकालेपदं स्थिरीकर्तु
मशक्नुवंतः आलोच्यतत्तुल्यतयोपदिष्टं भवंति नित्यं परिपूर्णकामाः अयनविषुवप्रयुक्तानध्याये तु विशेषो हेमाद्रावुदा
हृतायां स्मृतौ अह्नि चेद्रात्रियुग्मं स्याद्रात्रौ चेद्दिवासरद्वयं संक्रांतिः पक्षिणीत्येयादानाध्ययनकर्मस्विति दानं वेदस्या
ध्यापनं संक्रांतिरितिसामान्योक्तिरप्ययनविषुवपरैव तत्रैव तदानध्यायस्मरणात् तथा चान्यत्रापि निद्धाद्वयं दि
वा रात्रौ संक्रमे वासरद्वयं अनध्यायं प्रकुर्वीत अयनेषु विषुवे तथेति आदित्यस्य राशिसंक्रमवन्नक्षत्रसंक्रमे ग्रहांतरा
णां च नक्षत्रराशिसंक्रमणे स्नानाद्यनुष्ठानं तत्कालं चाह जैमिनिः नक्षत्रराश्योरविसंक्रमेस्युरर्वाक् परत्रापि रसेंदुनाड्यः पुण्या
स्तथेंदोस्त्रिधरापलैर्युगैकेव नाडी मुनिभिः प्रभोक्ता नाड्यश्चतस्रः सपलाः कुजस्य बुधस्य तिस्रो मनवः पलानि सार्द्धा १७९
श्चतस्रः पलसप्तयुक्ता गुरोश्च शुक्रे सपलाश्चतस्रः द्विनागनाड्यः पलसमयुक्ताः शनैश्चराभिहिताः सुपुण्याः आद्यं

357
1942

तमध्ये जपहोमदानं कुर्वन्नवाप्नोति सुरेंद्रधामेति अर्वाक् परत्रापीति सर्वत्र संबध्यते रसेंदुनाड्यः षोडशघटिकाः त्रिधरापलै
स्त्रयोदशपलैः सपलास्त्वेकपलाधिकाः मनवश्चतुर्दशपलानि च नागाभ्यष्टौ द्विगुणिताः षोडश एवं सति ग्रहांतरसंक्रमाणां
रात्रौ संभवे रात्रावेव स्नानादि रविसंक्रमवद्दिवापुण्यत्ववचनाभावात् पूर्वोक्तसामान्यवचनेभ्यश्चाकाम्यं चैतत्तत्र स्नाना
दिफलश्रवणानित्यत्वबोधकाभावाच्चेति तदयं संग्रहः पूर्वतः परतश्चैव संक्रमे षष्ठिविलेषापि नाड्यः षोडश तत्कर्मयोग्याः
पंचदशाथवा यानि संक्रांतिभेदेन तत्पूर्वोत्तरकालयोः व्यवस्थितानि लक्ष्यंते पुण्यत्ववचनानि तु २ तत्प्रकर्षपराण्येव
तानि न्यूनघटिष्विव यदा कन्याधनुर्मीनमिथुनेषु रवेर्गतिः ३ षडशीतिमुखी कुंभवृषसिंहध्वजेश्चिके प्रोक्ता विष्णुपदी
मेषतुलयोर्विषुवाभिधा ४ मकरे चोदगयनं कर्कटे कर्कटे दक्षिणायनं तत्र विष्णुपदे पूर्वं दक्षिणायन एव च ५ षडशीति
खे तीते तथा चैवोत्तरायणे विषुवे प्रागतीते च पुण्यत्वं सिद्धमेव तु ६ विष्णुपद्यां च पूर्वं तु प्रशस्ततमता मता एवं मंदादिभे
देन नाड्यस्त्रिचतुरादिकाः ७ भूयः पुण्यतमास्त्रियाविंशतिस्त्रिंशदादिकाः पुण्यमात्रास्तत्तद्दिवा मध्यह्नादाविमा यदा
८ पूर्वपश्चादुभयतो भोगिन्यस्त्रिविधा अपि संक्रांतयः प्रजायंते सम्यगेव तदा खलु ९ यदा तु पूर्वभोगिन्य उदयास्तम
नांतरं रवेस्तूत्तरभोगिन्यस्तदस्तात्पूर्वमेव च १० जायंते तत्र सामान्यवचनप्राप्तयोरपि कालयोस्तत्परप्राचोग्रहः स्ना
नादिकर्मसु ११ प्रशस्तकाललाभेन नरात्र्यंतर्गतस्य सः अयनव्यतिरिक्तासु संक्रांतिदशस्वपि १२ निशीथात्पूर्वं
जातासु पूर्वस्याह्नः परं दलं ततः पश्चात्तु जातासु परस्याद्यं दलं शुभं १३ यत्तु पूर्वोत्तरदिनगताकास्तोदयांतिके
पंचनाडिषु हृयं षडशीतौ च पुण्यता १४ एतस्मिन्विषये प्रोक्ता प्राशस्त्यार्था मता तु सा निशीथ एव जातासु तेतासु य
दितद्वृता १५ अभिन्नातिथिराद्या हा तिथ्यायस्मिन्परं दलं परा हतिथ्या भिन्ना चेत्स रेह्न्यद्यं दलं शुभं १६ दिनद्वयेपि
तस्याश्चेदनुवृत्तिव्यवस्थया पूर्वपश्चाद्भोगिनीषु दलद्वयमिदं शुभं १७ विकल्पतात्पुभयो भोगिनीष्विगोचरे पूर्वोत्तरा
होरात्राणां कृत्स्नानां पुण्यता क्वचित् १८ कर्कटमकरौ रात्रौ जाते त्वेष विनिर्णयः निशीथादुत्तरमपि कर्के पूर्वमिनोदया

न १९ जातेपरदलंपुण्यंपूर्वस्याह्नस्तथाह्नयं अर्धरात्रात्पूर्वमपिस्तूर्यास्तमयतःपरं २० जातेपूर्वदलंपुण्यंपरस्याह्नोथ
वानिशि आचारात्स्नानदानादेःकेषांचिदुदिताक्रिया २१ पूर्वोत्तरदिनांत्याद्यपंचनाडिषुतत्तमा निषेधेष्वपियात्रादेः
प्रथमोत्तरभाविनां २१ वे ध्रुवोदितानांचकालानांग्रहणंमतं अनध्यायेविशेषोयंविषुवादिनिमित्तके २३ अह्निचे
द्रात्रियुग्मंस्याद्रात्रौचह्यस्तरद्वयं इतिसंक्रांतितत्वविवेचनं अथग्रहणकालनिर्णयः तत्रतत्वरूपंतत्रकारणंन
क्षत्रविशेषगणात्मकाग्नेयादिमंडलेषुमासराशिविशेषेषुचतदुपजननेग्रासभेदेनोपरक्तरविशशिवर्णभेदेनचशुभा
शुभफलविशेषाज्योतिःशास्त्रेप्रसिद्धाः तत्रकर्तव्यमुक्तंहेमाद्रिमाधवाद्युदाहृतायांस्मृतौ ग्रस्यमानेभवेत्स्नानं
ग्रस्तेहोमोविधीयते मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयतइतिहोमग्रहणंदेवार्चनश्राद्धयोरुभयोरुपलक्षणं स्नाने
स्यादुपरागादौमध्येहोमस्सुरार्चने इतिब्रह्मवैवर्तवचनात सर्वस्वेनापिकर्तव्यंश्राद्धंवैराहुदर्शने अकुर्वाणस्तुना
स्तिक्यात्पंकेगौरिवसीदतीतिमहाभारताच्च निस्यानिचतत्रश्राद्धादीनि तत्रश्राद्धस्यतावन्नित्यत्वमेतस्मादेववचना
न्नैमित्तिकंतुकर्तव्यंग्रहणेचंद्रसूर्ययोः बांधवानांचमरणेनारकीस्यादतोन्यथेतिकूर्मपुराणे अकरणेप्रत्यवायश्र
वणाच्चपूर्वमुक्तं यत्तुविशिष्टब्राह्मणप्राप्तिसूर्येंदुग्रहणेयने जन्मर्क्षेग्रहपीडासुश्राद्धंकुर्वन्तवेच्छयेति मार्कंडेयपु
राणे तदपीच्छयाचेत्यन्वयेनश्राद्धंप्रतिरुचिश्चैवव्यतत्समानार्थतयाव्याख्यानं काम्यमपीहश्राद्धंतथाचविष्णुः
राहुदर्शनदत्तंहिश्राद्धमाचंद्रतारकं गुणवत्सर्वकामीयंपितृणामुपतिष्ठतइति तच्चामेनहेम्नावा नतुपक्वेनेत्युक्तं
पूर्वं चंद्रग्रहनिमित्तंचस्नानश्राद्धादिरात्रावपिभवति स्नानंदानंतपःश्राद्धमनंतंराहुदर्शने आसुरीरात्रिरन्य
त्रतस्मात्तांपरिवर्जयेत संध्यारात्र्योर्नकर्तव्यंश्राद्धंखलुविचक्षणैः द्वयोरपिचकर्तव्यंयदिस्याद्राहुदर्शनदित्यादि
शातातपविष्णवादिवचनेभ्यइत्यपिपूर्वमुक्तंकिंचिद्दानंचात्रनित्यं अयनादौसदादेयंद्रव्यमिष्टंग्रहेषुयत षडशी १८०
तिमुखेचैवविमोक्षेचंद्रसूर्ययोरितिशातातपीयसदाशब्दश्रवणात नित्यत्वादेवमलमासेपितद्भवतीत्युक्तंमात्स्ये

चंद्रसूर्यग्रहेचैवमरणेपुत्रजन्मनि मलमासेपिदेयंस्याद्दत्तमक्षय्यकारकमिति अतएवचापात्रेपितद्भवतीत्याहबौधायनः॥
अश्रोत्रियःश्रोत्रियोवापात्रंवापात्रमेववा विप्रब्रुवोपिचाविप्रोग्रहणेदानमर्हतीति काम्यंच भूमिर्भावःसुवर्णंचधान्यं
वायद्दीप्सितं तत्सर्वंग्रहणेदेयंमात्मनःश्रेयइच्छतेतिमहाभारतात तद्विषयमेवेदंतत्रत्यमेवचनं अयनेविषुवेचै
वग्रहणेचंद्रसूर्ययोः पात्रभूतायविप्रायभूमिंदद्यात्सदक्षिणामिति तद्विषयमेवपात्रतारतम्येनफलतारतम्यश्रव
णं दक्षस्मृतौ सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे श्रोत्रियेशतसाहस्रंपात्रेत्वानंत्यमश्नुतइति अब्राह्मणोजा
तिमात्रब्राह्मणःसंस्कारादिरहितः ब्राह्मणब्रुवस्तूक्तश्चतुर्विंशतिमते गर्भाधानादिसंस्कारवेदोपनयनैर्युतः
नाध्यापयतिनाधीतेसभवेद्ब्राह्मणब्रुवइति श्रोत्रियःसर्वसंस्कारपूर्वकंवेदाध्ययनवान पात्रंतूक्तंयाज्ञवल्क्ये
न नविद्ययाकेवलयातपसावापिपात्रता यत्रवृत्तमिमेचोभेतद्धिपात्रंप्रकीर्तितमिति तुलापुरुषदानादिकालप्रक्रमेप्य
चंद्रसूर्यग्रहणंतन्नतेषांतन्निमित्तकत्वात्तयकिंतुतत्कालकत्वाय कालसंदंशात् स्नानंचात्रनित्यं ग्रहणेसंक्रमेचैव
नस्नायाद्यदिमानवः सप्तजन्मानिकुष्ठीस्याद्दुःखभागीचजायतइतिवृद्धवसिष्ठवचनेऽकरणेदोषश्रवणात काम्य
मपि उपस्युपासियत्स्नानंसंध्यायामुदितेरवौ चंद्रसूर्योपरागेच प्राजापत्येनतत्सममितिदक्षवचनात तच्चस्नानं
ग्रहणस्योपक्रमेमुक्तौच ग्रस्यमानइतिवचनात विमुक्तेयदिनस्नायाच्चंद्रसूर्यग्रहेतथा तस्यतावदशौचंस्याद्याव
दन्यःपरोग्रहइतिब्रह्मवैवर्तेमुक्त्यस्नानेपिदोषश्रवणात्च उभयमपिसचैलं ग्रहणेशावमाशौचंविमुक्तौसौतिकं
स्मृतं तयोःसंपत्तिमात्रेण उपस्पृश्यक्रियाक्रमइतिब्रह्मांडपुराणवचनेस्पर्शास्यसपिंडमरणवदाशौचनिमित्तत्वो
क्त्याविमुक्तेश्चप्रसववत्तदुक्त्यायथाजननमरणाशौचयोः सचैलस्नानादेवनिवृत्तिस्तदुत्तरमेवचकर्माधिकार
स्तथात्रापीत्यस्यार्थस्यप्रतिपादनातस्पष्टंचेदंवृद्धवसिष्ठवचने सर्वेषामेववर्णानांसूतकंराहुदर्शने सचैलंचभ
वेत्स्नानंसूतकान्नंचवर्जयेदिति सूतकमाशौचं राहुसूतकमितिपाठेसूतकशब्देनास्पृश्यत्वमुच्यते सूतकान्नंग्र

353
1942

का०त०
१८९

हणाशौचांतरशितं पूर्वपक्षं अतएव षड्त्रिंशन्मते तस्यैव ग्र्वोर्धस्योत्तरार्द्धं स्नात्वाकर्माणि कुर्वीत शृतमन्नं विवर्जयेदि
ति केषुचित्प्रतिप्रसवः अथ नैमित्तिकवर्ज्जनं तत्त्रिविधं तात्कालिकं तद्दिनस्थं तत्पूर्वोत्तरदिनस्थं च आद्यं तावदुपरागं प्र
कृत्य स्मृतिसंग्रहे निद्रायां जायते रोगो मूत्रे दारिद्र्यमाप्नुयात् पुरीषे कृमियोनिः स्यान्मैथुने ग्रामसूकरः अभ्यंगे च भवेत्कुष्ठी
भोजने स्याद् अधोगतिः बंधने च भवेत्सर्पो वधे च नरकं व्रजेदिति नैमित्तिकस्नानानंतरं दानाद्यधिकारसिध्यै स्नानांतरमन्ने
न विधीयत इति केचित् शृतमित्यादिना ग्रहणकालीनमन्नं तदुत्तरकालेप्यभोज्यमिति ज्ञाप्यते अनंतेन तु आरना
लं च तक्रं च पाथेयं घृतपाचितं उदकं बहुपक्वान्नं न दुष्येद्राहुसूतके इति बहुत्वं द्रोणादकान्यतरपरिमाणत्वेन कालकावि
न्यतात तत्स्थानुसारेण आरनालं कांजिकं स्मृत्यंतरे जले तक्रे तथा तैले संधाने गोरसेषु च कुशांतरायं कुर्वीत ग्रहणे चंद्र
सूर्ययोरिति अनेन कुशांतरायं विना पक्वान्नानामप्येषां न दुष्टत्वमिति ज्ञाप्यते आरनालं तथा क्षीरं किलाटं घृतसक्तवः
स्नेहपक्वं च तैलं च न कदाचित्प्रदुष्यतीति तत्र विशेषो वचनांतरे आरनालं च तक्रं च त्याद्येयं घृतपाचितं उदकं च कुशैः
छन्नं न दुष्येद्राहुदर्शने इति ग्रहणकाले जननमरणनिमित्ताशौचसत्वेपि तन्निमित्तस्नानादि भवत्येव तदुक्तं लिंगपु
राणे चंद्रसूर्यग्रहे स्नायात् सूतके मृतके पि वा अस्नायी मृत्युमाप्नोति स्नायी पापं न विंदति सूतके मृतके चैव न दोषो
राहुसूदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति राहुदर्शने दर्शनयोग्यराहुलक्षित चंद्रसूर्योपरागनिमित्ते
स्नानदानादौ स्नानानुष्ठानस्य पूर्ववचनेन सिद्धौ दानश्राद्धादेरपि नैमित्तिकस्याशौचमध्ये नुष्ठानार्थमुत्तरवचनं
स्नानमात्रमुपरागनिमित्तकमाशौचे भवति न तु श्राद्धादीनि जीमूतवाहनादिमते तत्र वानर्थक्यापत्तेरेवायुक्तं त
स्यापि स्नानमात्रविषयत्वे यावत्तावच्छब्दानर्थक्यापत्तेश्च तावत्कालव्यापिकर्मस्कश्रद्धावभिधातव्यायांसा
र्थकौ स्नानमात्रं तु तादृशं अविशेषेणैव जननमरणनिमित्ताशौचप्रयुक्तानधिकाराभावो ग्रहणनिमित्तकर्म
सु स्मर्यते सूतके मृतके चैव यदि स्याद्राहुसूतकं तावत्तत्सूतकं नास्ति यावद्राहुर्न मुंचतीति षट्त्रिंशन्मतेपि स्ना १८९

355
1942

र्तकर्मपरित्यागो राहोरन्यत्र सूतक इति सूतके आशौचे राहोस्तदुपलक्षितोपरागादन्यनिमित्तकानां स्मार्तकर्मणां परि
त्यागो न तु तन्निमित्तकामित्यर्थ इति हेमाद्रिः सूतके यः स्मार्तकर्मपरित्यागः स राहुसूतकादन्यत्र तत्र तु तत्कालप्राप्ता
नां तेषां न त्याग इत्यन्ये न च तत्पूर्वोत्तरवचनादेव स्नानेप्यधिकारसिद्धेश्चंद्रसूर्यग्रहे स्नायादिति पूर्ववचनवैयर्थ्यं शंकनी
यं दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन स्वर्गफलत्वसिद्धे सर्वेभ्यः कामेभ्यो दर्शपौर्णमासावित्यस्य तदितरविषयत्व
वदिहाप्युत्तरस्य स्नानेतरविषयत्वात् नित्यस्य स्नानस्याकरणे निष्टविशेषमात्रप्रतिपादनार्थं पूर्ववचनमिति हेमाद्रिः
तेन स्नानं श्राद्धं किंचिद्दानं चोपरागनिमित्तकमाशौचेप्यवश्यं भवति न स्नानमात्रं संवत्सरप्रदीपादिषु त्विदं स्मृतिवच
नं लिखितं सूतके मृतके चैव न दोषो राहुदर्शने स्नानमात्रं तु कर्तव्यं दानश्राद्धविवर्जितमिति एतानि च ग्रहणनिमित्तका
नि कर्माणि संक्रांतिवच्च ततः पूर्वमुत्तरं वा भवंति उत ग्रहणकाल इत्यपेक्षायां जाबालिः संक्रांतौ पुण्यकालस्तु षोडशोभय
तः कलाः चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति दर्शनशब्दश्चाक्षुषज्ञानवचनो न शास्त्रीयज्ञानवचनः निमित्तस्य
ज्ञातस्यैव नैमित्तिकप्रयोजनत्वेन निमित्तत्वोक्त्यैव तल्लाभात् गोचरशब्दश्च न फलोपधानपरः तत्काले एकस्यापि क
मीतरस्याशक्यत्वात् किमुत बहूनां किंतु योग्यतापरः तेन यश्चंद्रसूर्योपरागो यस्मिन्देशे यावत्कर्मपर्याप्तश्चाक्षुष
ज्ञानयोग्यः स तत्र देशे तावत्कर्मणो निमित्तं तादृशस्य च शास्त्रतो ज्ञानं तदनुष्ठानप्रयोजकं तत्र तत्काल एव न तु संक्रां
ताविव तत्पूर्वापरकालयोः ततश्चाक्षुषज्ञानयोग्येप्यत्यल्पकालीने ग्रहणे स्नानपूर्वकं दानादि स्नानमात्रं वा यावदेव
कर्तुं शक्यं तावदेव कर्तव्यं वर्तमानमेव ग्रहणमाशौचवन्निमित्तं न त्वतीतं भावि वेति पर्यवसितोर्थः देशविशेषणे च
सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति स्मृतिकौस्तुभे नंतदेवकृते ग्रहणनि
र्णयः निमित्तप्रयोज्यत्वान्नैमित्तिकस्य तदादौ निर्णीयते तत्र जाबालिः संक्रांतौ यमः नाड्यः षोडश पूर्वतः परा अत्र दर्श
श्चाक्षुषज्ञानवाचकत्वाच्चाक्षुषादृष्टमेव ग्रहणं निमित्तमिति केचित्तन्न तथा सति यावत्पदेन चाक्षुषसमकालीनपुण्य

कालप्रतिपादनापत्तेः तथा चनैमित्तिकस्नानासंभवेन वैयर्थ्यापत्तेः अंधादेः स्नानाद्यसंभवापत्तेश्च अन्ये तु निमित्तवि
शेषणं दर्शनं द्वाविरुभयत्ववदविवक्षितं अतः केवलं ग्रहणमेव निमित्तं ज्ञातानामेव निमित्तानां नैमित्तिकप्रयोजकत्वादि
ह्यपि ज्ञानमपेक्ष्यते तच्च शास्त्रीयं न लौकिकं संभवति च तत्र दृशेः प्रयोगः यत्प्रोतरश्मिणि पुरुषो दृश्यत इति श्रौतप्रयो
गदर्शनादित्याहुः तदसत् संक्रांतेरपि निमित्तत्वात् ज्ञातैव प्रयोजिकातत् ज्ञानमपि शास्त्रीयमेवेति वैलक्षण्याभावे वचन
स्य निस्तात्पर्यकत्वापत्तेः नच शास्त्रीयज्ञानसमकालीने पुण्यकालेपि स्नानादि संभवति न चेह निमित्तविशेषणत्वेप्य
विवक्षा द्वाविरुभयत्वस्येव त्वापि तयाविवक्षारूपमधिकरणसिद्धांतं वर्णयित्वा तत्त्वाचिंतोद्घाटनसमये तत्रउभयत्व
विवक्षैवोक्तानिमित्ततया पूर्वोपस्थितद्वविरार्त्युपजीवनेनोभयत्वस्य निमित्तांतभावपरेकवाक्ये वाक्यभेदाभावात्
तुल्यं चेदं प्रकृतेपि निमित्तस्याशास्त्रांतरसिद्धोपरागमत्र द्यदर्शनस्य निमित्तांतभावपरे वचसि वाक्यभेदाप्रसक्तेः
वस्तुतस्तु यावद्दर्शनगोचरस्तावत्पुण्यकाल इति कालविशेष उपरागनिमित्तपुण्यकर्मांगत्वेन विधीयते चाक्षुषवि
षयवचनोदर्शनगोचरशब्दस्तद्योग्यतापादिकां समानद्वीपस्थितिलक्षणयाब्रूते ग्रयाग्रस्तास्तस्थलेतत्पूर्वं चाक्षुषं
भवति न भवति च यदस्तो ध्वंतत् ततश्च तादृश स्थिति कालावच्छिन्नोपरागस्य निमित्तत्वमर्थात्संपद्यते ग्निहोत्रं प्रति
सायमाद्यवच्छिन्नस्येव जीवनस्य द्वयांतरस्थस्य निमित्तत्वपर्युदासादवगम्यस्यते अन्यथा पर्यवसिन निमित्तज्ञान
स्यानुष्ठानहेतुतयानुष्ठात्गतत्वनियमावश्यंभावेपि योग्यतामुखेन निमित्तशरीरांतर्गतस्य चाक्षुषज्ञानस्य तथानि
यमेवीज्ञाभावादन्यथानोपरक्तमितिजन्मसप्ताष्टरिष्फांकदशमस्थे निशाकरे दृष्टोरिष्टप्रदो राहुर्जन्मर्क्षे निधने
पि चेति निषेधपरिपालयितॄणामंधानां च मेघाछादने च ग्रहणनिमित्तस्नानाद्यनुष्ठानापत्तेः यावद्दर्शनगोचरं द्युत्ये
तावन्मात्रेण द्वीपांतरस्थचाक्षुषज्ञानयोग्यतयापि निमित्तत्वं स्यात् एतेन चाक्षुषज्ञानयोग्यतायानिमित्तांतर्गत
त्वे रात्रिरविग्रहस्य दिवा चंद्रग्रहस्य वा तथात्वे नानिमित्तत्वादप्रसक्तस्य स्नानादेस्तत्र निषेधः पर्युदासो वानर्थक इत्यप्य १८२

3571/1942

पास्तं द्वीपांतरस्थान्प्रति तयोरपि दर्शनयोग्यत्वात् एतद्वीपावछिन्नतद्योग्यत्वस्य च निषेधबलादेव लाभात् अनादेश्या
नां त्वतिसूक्ष्मकालतया कस्यापि दर्शनायोग्यानां तद्योग्यत्वविशेषणादेव निमित्तत्वपर्युदासः अत एव धर्मशास्त्रेषु
नतेषां पृथक् निषेधः किंतु रात्रौ सूर्यग्रहः स्याच्चेद्दिवा चंद्रग्रहस्तथा नादेश्यमुभयं राज्ञे यच्च सूक्ष्मतमं भवेत् इति ज्यो
तिषवचनमेवमः धर्मशास्त्रगतोपि वा चाक्षुषज्ञानविषयत्वविशेषणस्यैव व्यतिरेकमुखेन प्रपंचः नाड्यः षोडश पूर्वेण
संक्रांतेस्तु परेण च राहोर्दर्शनमात्रेण पुण्यकालः प्रकीर्तित इति यमवचनमपि यावद्दर्शनगोचर इत्येतत्व्याख्यानेनै
व व्याख्यानं केश्चिद्रात्रिदिनगतरविशशिग्रहयोः स्नानादिनिषेधस्य पूर्वोक्तानर्थक्यपरिहारार्थं ग्रस्तोदयग्रस्तास्तम
यविषयत्वमुक्तं तत्रोदयभाविनो ग्रहणभागस्य रात्रिदिनगतत्वात् अस्तमयोत्तरभाविनश्च तथात्वात् तदपि यावद्दर्श
नगोचर इत्यनेनैव तत्तद्भागयोर्निमित्तत्वपर्युदासादानर्थक्यापरिहारादयुक्तं राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं स्ना
नं दानं तपः श्राद्धमनंतं राहुदर्शन इत्यादिषु कर्मविशेषविषयवचनेष्वपि दर्शनपदोपादानात्तद्भागयोर्निमित्तत्वप्रस
क्तिः अत्रापि सकृदभिहितभावत्वेन दर्शनस्य राहुविशेषणत्वात् दृष्टदर्शनयोग्ये राहाविति चाक्षुषज्ञानयोग्यस्यैव ग्रहण
स्य निमित्तत्वं कर्मकालत्वं चावगम्यते अमुमेवार्थं प्रकटीकर्तुं निगमे निषेधः श्रूयते सूर्यग्रहो यदेत्यादि॰ न तु रात्रिसूर्य
ग्रहत्वादिस्वातंत्र्येण निषेधप्रयोजकं श्रुत्यंतरकल्पनगौरवापत्तेः व्यक्तकालावछिन्नोपरागनिमित्तत्वबलादेव ग्र
स्तास्तोर्ध्वं ग्रस्तोदयात्पूर्वं च सत्यपि शास्त्रीयोपरागज्ञाने शिष्टानां नैमित्तिकाननुष्ठानं संगच्छते अत एव ग्रस्तास्तम
यगतनिर्णयार्थत्वेन जाबालिवचनउदाहृतं माधवेन वासरविशेषयुक्तताद‍ृशोपरागप्रयुक्तकर्मणो विशिष्टं फल
माह व्यासः रविग्रह॰ वारेष॰ नैमित्तिकं द्विविधं अनुष्ठेयं वर्जनीयं च आद्यं माधवोदाहृतस्मृतौ ग्रस्यमाने॰ ब्रह्मवैव
र्ते च स्नानं स्या॰ शातातपः स्नानं दान॰ एतेष्वपि वचनेष्वधिकारप्राप्तमुपरागं निमित्तीकृत्य ग्रासोपक्रमादि कालवि
शिष्टस्नानादि विधीयते तदाज्ञातस्नानो ग्रस्तादिकालेपि तत्कुर्यात् यावद्दर्शनगोचर इति सामान्येनापि विधि

का०त० मत्वात्स्नानतत्त्वतारतम्येन प्राशस्त्यमाह मार्कंडेयः । शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् भूमिष्ठ० ३ नदीषु म
१८३ सविशेषेण व्यवस्थादेवीपुराणे कार्तिके ग्रहणं ० देति उपरागविशेषेण नदीविशेषो विहितस्तत्रैव गोदावर्याम० तिते स्नानास
भवेत स्मरणादिनापि पुण्यमुक्तं तत्रैव स्मृत्वा प्रा० रतः क्षेत्रविशेषमाहिमाधिक्यं तत्रैव गंगाक० करेइति स्नानं सचेलं का
र्यं च सर्वेषामे० यदिति षट्त्रिंशद्वचनात् स्त्रीणां विशेषः स्मृत्यर्थसारे प्रयोगपारिजातयोः यत्र पुंसः सचेलं स्यात्स्ना
नं तत्र सुवासिनी कुर्वीतैव शिरःस्नानं शिरोरोगी जटी तथेति शिष्टस्त्रियस्तु ग्रहणे शिरःस्नानमाचरंति आशौचम
ध्ये उपरागनिमित्तं स्नानदानादिकं कार्यं तथा मलमासेपि रात्रावपि सूतके० चंद्रसू० वचोभ्यां० ग्रहणे ० नाद्य द
ष्ट्वा स्नायान्मुक्तिं दृष्ट्वा तु भुंजीत स्नात्वा चैव ततः परमित्यादिषु धातुसंबंधाधिकारविहित समानकर्तृकत्ववाचि क्त्वा
प्रत्ययश्रवणात्स्नानादिकर्तृगतस्यैव दर्शनस्य साक्षादेव स्नानाद्यन्वयो यद्यपि प्रतीयते न तु योग्यता द्वारा निमित्ता
वच्छेदकत्वेन व्यधिकरणस्यापि ततश्च तदेकवाक्यतया राहुदर्शनपदयुक्तेष्वपि दर्शनस्यैव तथैवान्वयो युक्तस्तथा
पि दर्शनस्य तथान्वयासंभवाद्दृश्यापदेनाजहत्स्वार्थलक्षणयोक्तस्य दर्शनयोग्यतया शास्त्रीयज्ञानस्यैव स्ना
नाद्यन्वय उच्यते कथमसंभवः इत्थं स्नानादिकर्तृगतस्य दर्शनस्य साक्षात्स्नानाद्यन्वयः किं विशेष्यतया
विशेषणतया वा निमित्तत्वेन तन्निमित्तज्ञानत्वेनाथवांगत्वेन सकंपीत्वेत्यादिवत् श्रुत्वा पुत्रस्य जन्म चेत्यादिवत्
एतस्यैवं रेवतीषु वारवंतीयमग्निष्टोमसाम कृत्वेत्यादिवच्च न तावदाद्यः विशेषणतया दर्शनस्य निमित्तांतर्भावस्य
हविरुभयत्ववदसंभवात् केवलस्य दृश्यविशेषानालिंगितस्य दर्शनस्याशक्यनिरूपणत्वेन निमित्तत्वासंभवा
दुपरागविशिष्टस्यैव तस्य स्मृष्याम इति न्यायेन पुत्रादिमुखदर्शनस्यैव नांदीमुखेन स्नानादौ निमित्तत्वसंभवेपि
शिष्टानां निषेधपरिपालयितॄणां निमित्ताभावेन स्नानाद्यभावप्रसंगात् उपरागदर्शनस्य नाशुचीराकुतारकाद
ति निषिद्धत्वात् ग्रहणे शावमाशौचमिति ग्रहणोपतनमात्रेणाशुचित्वसंपत्तेः अथ सर्वेषामेव वर्णानां स्तूत १८३

359/194

कं राहुदर्शनमिति वचनादाशौचस्यापि स्नानादिवद्दर्शननिमित्तत्वाद्दर्शनात्पूर्वं तन्निमित्ताशुचित्वाभावान्निषेधो
न प्रवर्तत इत्युच्यते तथापि सपिंडजननादिनिमित्तांतरेणाशुचिनिषेधाद्दर्शनाभावात्स्नानाद्यभावप्रसंगः तत्र चं
द्रसूर्यग्रहे स्नायात्सूतके मृतके पि वेत्येतद्विरोधः नहि सूतके मृतके चैव न दोषो राहुदर्शन इत्यनेनाशौचे उपरागदर्शनं प्रतिप्रसूयते
किंतु तन्निमित्तं स्नानादि तावदेव भवेच्छुद्धिर्यावान्मुक्तिर्न दृश्यत इति वाक्यशेषात् शुद्धिरत्र विहितकर्माधिकारः रविग्रहदर्शनस्य तु
नोपरक्तमित्यनेन सर्वदा निषिद्धत्वाद्रविग्रहे शिष्टानां स्नानाद्यभावप्रसंगः निमित्तस्याविधेयत्वेन निषेधबाधासंभवात् प्रमा
दादिना निषेधातिक्रमेण संजाते दर्शने नैमित्तिकं स्नानादि विधीयतामिति चेत् तथा सति निषेधातिक्रमजनितप्रत्यवायपरि
हारस्योपायापेक्षत्वेन स्नानादेस्तदर्थतया विधानप्रसंगः सुरापानादिनिमित्तप्रायश्चित्तविधानवत् किंच दर्शनस्य निमित्तांतर्भा
वे सदा शौचस्नानाद्यावृत्तिप्रसंगः प्रतिपन्निमित्तं नैमित्तिकमावर्तत इति न्यायात् दर्शनस्याविप्रोष्यत्वेतावन्निमित्तावृत्तिः स्पष्टैव वि
शेषणत्वेप्यावृत्तिर्विशिष्टं हविरिवोपघातादिविशिष्टमग्निं निमित्तीकृत्य श्रुतेषूपघाताद्यावृत्तावि वसा दर्शिगहितेषु बहुषु वच
नेषु दर्शनस्य निमित्तांतर्भावे न सदाध्याहारप्रसंगः सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेदिति न्याय्यामहेह विषविशेषणमि
भाष्ये नैमित्तिकत्वोपन्यासे निमित्तानंतरकाले नैमित्तिकानुष्ठापकविधिमूलकान्येतानि वचांसीति ज्ञापनाद्दानादिविषयविशेषग्रह
णं नैमित्तिकमात्रोपलक्षणार्थं रजस्वलास्नानविधिमाह पराशरः स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरिततोयेन स्ना
नं कृत्वा व्रतं चरेत् सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेदिति पात्रेणैवं वंशपा
त्रेण्यासेज्जलमिति स्मृत्यर्थसारात् उपवासपूर्वकस्नानाद्यनुष्ठाने फलातिशयो हेमाद्रौ लैंगे एकरात्रमु० त्रिरात्रमुपरागादिनात्पूर्वत्र
कृतोपवास इति केचित् ग्रहणसंबद्धाहोरात्रपरित्यागे मानाभावान्नैवमिति हेमाद्रिः पुत्रवद्गृहिणस्तु नोपरागनिमित्तोपवासः सं
क्रां० हीति वचनेन पर्युदासात् यत्तु हेमाद्रौ वृद्धवसिष्ठः त्रिदशाः स्पर्शसमये तृप्यंति पितरस्तथा मनुष्या मध्यकाले तु मोक्षकाले
तु राक्षसा इति तदेव पितृतर्पणविधायकमिति केचित् होमदेवपूजाव्यतिरिक्तविषयमिति हि हेमाद्रिरपि स्नानविषयमेवेति

का०त० युक्तं ग्रस्यमाने भवेत्स्नानमिति वचनसंवादात्. अथ दानं तत्र विशेषो भारते अयने पात्रलक्षणं एतच्च पुण्यातिशयाभिप्रायेण
१८४ यत्तु व्यासः सर्वं गंगा० यच्च बौधायनः श्रोत्रियो वापि ब्राह्मणो ब्राह्मणब्रुवतस्मादशातिशय रहितपुण्योत्पत्तिमात्राभिप्रायं समम० श्लो
क्तेः अब्राह्मणः संस्कारादिरहितः जातिमात्रब्राह्मणः ब्राह्मणब्रुवस्तु गर्भाधा० तौक्तेः श्राद्धं चात्रामेन हेम्ना वा कार्यं तथा च शा
तातपः आपद्यनग्नौ आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति हेमाद्रौ वचनांतराच्च मिताक्षराकारस्तु ग्रहणे भोक्तृदोषादात्मस्त्व
भ्युदयदूत्याह तेन पक्वान्नश्राद्धं मन्यते तत्रापि सूर्योपरागे यदि पक्वान्नश्राद्धं कार्यं तदा तीर्थयात्रांगश्राद्धवद्घृतप्रधानं कार्यं सैंहिके
यो यदा सूर्यं ग्रसते पर्वसंधिषु गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेदित्यनेन भो
जनार्थान्नत्यागो वाक्यद्वयं घृतमिति वसिंडदानवाक्यव्ययं पिंडद्रव्यस्थाने इदं घृतमिति प्रयोज्यमिति प्रतीयते एतन्मते च पाका
भावे आमश्राद्धविधिः पाकाभावे द्विजातीनामामश्राद्धं विधीयत इत्यपरार्कस्मृतं तु वचनात् यद्यप्यपरार्के तुलापुरुषदानं विहितं
तथापि न तन्नैमित्तिकं कालविधिसंदंशपठितत्वेनोपरागकालस्यांगतया निमित्तत्वाभावात् तथा मंत्रदीक्षापि ग्रामार्चनं चंद्रिको
क्तासत्तीर्थे० चंद्र अंगभूतदेशकालसंज्ञादंशमध्य एव ग्रहनिर्देशात् तथा च पुरश्चरणचंद्रिकाद्युक्तं पुरश्चरणमप्यनैमित्तिकं
अथवा० येति किंच नैमित्तिकेषु निमित्तवत एवाधिकारादधिकारिणश्च तदकरणे प्रत्यवायाद्दर्शने सति स्नानाद्यकरणे प्रत्यवा
यप्रसंगात्तदभावे तु तदभावात् प्रत्यवायकष्टकर्मानुष्ठानान्यतरप्रयोजकं दर्शनं बुद्धिपूर्वकारिकोपि न कुर्यादेवेति तन्नियोतक:
स्नानादिविधिर्दुःस्थितः स्यात् नन्वेवमाधानाध्ययनाभ्यामग्निविद्यार्जनमपि कोपि न कुर्यादिति तस्मिन्सत्यग्निहोत्रादि कर्मा
करणे प्रत्यवायस्य तत्परिहारार्थं च कष्टकर्मकरणे स्यापत्तेः आधानाध्ययनयोः कर्मविध्यप्रयोज्यत्वेन सिद्धाग्निविद्यस्य क
र्माधिकाराभ्युपगमात्तस्य संप्राप्तता नाहिताग्नितयोरुपपातकगणपाठादग्निविद्यावत्त्वरूपस्य नित्यकर्माधिकारस्यासंपादनेपि प्र
त्यवायः कल्प्यते पितामहचरणैस्तु संयोगपृथक्त्वेन नित्यतया पुरुषार्थत्वमप्यध्ययनाधानयोरभ्युपगतं कर्मोपकारिणोरपि
द्वितीयकाधानाधिकरणे प्रवृत्तिचिंतामभ्युपगच्छतां नैमित्तिकत्ववादिनान्यायसुधाकारेण च न च तद्वदत्र दर्शनस्यावश्यक १८४

361/1942

त्वे तद्द्योतकं किंचिदस्ति नापि द्वितीयः निमित्तस्योपरागस्याज्ञातस्यानुष्ठानहेतुत्वास्य निमित्तत्वासंभवेनाक्षिप्ततज्ज्ञानमात्रा
नुवादकत्वमेव तदा ह्रशीरापद्यत इति रजस्वोदर्शने नारी त्रिरात्रमशुचिर्भवेत् निर्दृष्टा ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म चेत्यादिवदुपलक्ष
कत्वस्यैव दर्शेरुचितत्वात् निमित्तवच्च तज्ज्ञानस्याप्यनुपादेयत्वेन सामान्ये प्राप्ते विशेषविधानानुपपत्तेः अत एव च निषिद्धत्वे
न नानर्थप्रयोजकत्वेन च बुद्धिपूर्वकारिणो दर्शने प्रवृत्त्यनुपपत्तेराद्यपक्षोक्तदूषणानतिवृत्तिश्चास्मिन्पक्षे अथैतद्दोषपरिहा
राय दर्शनस्य स्नानाद्यंगत्वेन विधेयतैवेति तृतीयः पक्ष आश्रीयते स्पष्टं चोपवाससाहचर्याद्विधेयत्वं तस्य संवत्सरप्रदीपोदा
हृते मार्कंडेयवचने एकरात्रमुपोष्यैव राहुं दृष्ट्वाक्षयं नरः पुण्यमाप्नोति कृत्वा च स्नानं श्राद्धं विधानत इति निमित्तज्ञानत्वे
न च तस्याधिकारसंपादने नोपयोगिताध्ययनाधानवत् प्रमाणाभावात्तु तयोर्नांगत्वं किं तूपकारकतामात्रं दर्शनस्य तु प्रमाण
वशादंगता प्यनेन प्रकारेण अत्र च यद्यप्युपवासदर्शनयोः स्नानश्राद्धयोश्चाक्षय्यं पुण्यमाप्नोतीत्यन्वयेन सर्वेषां तुल्यत्वं भा
सते तथापि बहुषु वचनेषु स्नानश्राद्धयोरेव फलसंबंधश्रवणादत्राप्युपवासदर्शनपूर्वकं स्नानश्राद्धे विधायाक्षय्यं पुण्यमाप्नो
तीति योजनयोपवासदर्शनयोरंगत्वं बोध्यं अंगत्वादेव त्वाप्रत्ययाच्च स्नानादिकर्तृगतमेव दर्शनं तदगे न्यायकर्तृकमिति
यथाधानं मेघाद्यावरणे च दर्शनरूपांगासंभवे नाधिकाभावात् स्नानाद्यभावस्तथा दिनरात्रिगतशशिरविग्रहयोरपीति
तत्र स्नानादिनिषेधकानि वचनानि ग्रस्तास्तमयविषयाणि तत्र पूर्वदर्शनस्यांगस्य ज्ञातत्वादस्तादूर्ध्वमपि यावच्छास्त्रावगत
मुक्तिश्राद्धादिप्रसक्तिर्विद्यमानत्वात् स्नाननिषेधोपि तत्रैव मुक्तिस्नानार्थः तत्र ग्रासस्नानवद्दर्शनापेक्षाभावात् चंद्रसूर्य
ग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति वृद्धगौतमवचने विज्ञायेति सामान्येनाभि
धानात् अत एव गौडनिबंधेषु वचनं मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते आकलय्य तु तं कालं भुंजीत स्नानपूर्वकमिति
न चैवं ग्रस्तास्तमितयोरपि शास्त्रतो मुक्तिं विज्ञायोदयात्पूर्वमपि मुक्तिस्नानभोजनादिप्रसंगः यदैवास्तंगतश्चंद्रो राहो रानन्
गोचरः आकलय्य तु तं कालं क्रिया कार्या विचक्षणैरिति ब्रह्मपुराणादपि तथा प्रतीयत इति वाच्यं ग्रस्तविवास्तमानं तु रवी

का०त० दृष्टप्राप्नुतोयदि तयोः परिग्रह रूढ्ये स्नात्वाभ्यवहरेन्न रदाति भृगुवचने उदयोत्तरं तद्विधानात् अतश्चतं कालमित्यभ्युदयकालपरंख्या
१८५ ख्येयं अतश्चमुक्तिं दृष्ट्वानुभुंजीत तावत्स्याद्शुचिर्विप्रो यावन्मुक्तिर्नदृश्यत इत्यनयोर्दर्शनग्रहणं तद्योग्यतापरमेव ग्रस्तचंद्रा
स्तमये शास्त्रावधारित मुक्त्युत्तरमेवोदयात्पूर्वमपि पाकादिकं कार्यमिति संवत्सरप्रदीपवचनं ग्रस्तेवास्तगतेविंदो ज्ञात्वामुक्त्यव
धारणं स्नात्वा पाकादिकं कर्म भुंजीत हृदयेपुनरिति शिष्टास्त्विदानीमुदयोत्तरमेव सर्वं कुर्वंति ततश्च क्लृप्तं तद्दर्शयुक्तेषु स्नानादि
विधिषु तद्वाच्यवाक्यज्ञानविशिष्टस्य ग्रहणनिमित्तकस्य स्नानादेः फलवतो विधावफलस्य दर्शनस्य तदंगत्वं भवति रेवतीवार
वंतीयाग्निष्टोमसामभावनाविशिष्टयागभावनाविधाविव पूर्वभावनाया उत्तरभावनांगत्वं ततश्च तदेकार्थत्वाय भावलक्षणविहि
तसप्तम्यंतदर्शनपदयुक्तेष्वपि दर्शनस्यांगत्वेन विधानमेवाश्रयणीयं यावद्दर्शनगोचर इत्यत्र तु पूर्ववद्दर्शनयोग्यतैव विवक्षि
तानफलोपधानं तदा स्नानाद्यनुष्ठानासंभवात् दर्शनं चान्यत्र विहितं स्नानादिकर्तृगतमेव तद्योग्यत्वं च प्रयत्नापनेयतत्प्र
तिबंधकराहित्यं तेनांधानां मेघाद्यावरणे च तदभावात् स्नानादि न भवत्येवेति कल्पतरुः विशेषविधिना चाग्नीषोमीयादिहिं
साविधिनेव न हिंस्यादिति निषेधस्य नोपरक्तमित्यादिनिषेधस्य बाधेन रागप्राप्तेक्षणविषयत्वकरणात् सर्वनैमित्तिकार्थं तं
त्रेण सकृद्दर्शनं कृत्वा सर्वं कर्तव्यं एवं जन्मादिराशिस्थोपरागेपि तद्विषयस्यापि तद्दर्शननिषेधस्य रागप्राप्तविषयत्वात् न
च तस्य तद्विषयत्वे सामान्यनिषेधादेव सिद्धेरानर्थक्यप्रसंगाद्वैधविषयत्वमिति वाच्यं चंद्रांशेसार्थक्यात् दर्शनांगत्व
वादिमते उपरागनिमित्तस्याशौचस्यापि दर्शनोत्तरकालत्वेन नाशुचीराहुतारका इति निषेधस्य तत्र प्रवृत्तेः प्रत्यवायाति
शयार्थोरिष्टप्रदर्दृत्वे हि कानिष्टविशेषार्थोवायं भविष्यतीति स्थितत्वे तु प्रकृतवैधदर्शनविषय एवायं निदोन्नीतो निषेधः
स च जन्मादिस्थोपरागवदितरोदृत्वात् स्नायादिति पर्युदासो दर्शनविधिशेष इत्यभिधानाज्जन्मादिस्थोपरागवतां वैधद
र्शनाभावात् स्नानाद्यभाव एवांगीकृतः तन्न यदि तत्प्रमादादिना स्नानादिजन्याभ्युदयकामनया वा रिष्टमंगीकृत्य पश्यं १८५
ति तदा तेषां स्नानादि प्रथमद्वितीयपक्षयोरिव सर्वेषामिष्टं तन्न स्यात् उक्तविधया पर्युदासितत्कर्तृकस्य दर्शनस्यावै

363/1942

धत्वेनाधिकारासंपादकत्वाद्वेधाध्ययनवत् निंदानैमित्तिकशांतिविशेषविधानयोश्चानुपपत्तिः वैधदर्शनशेषपर्युदासातिक्रमे
हि तत्कार्यासंपत्तिमात्रं न तु द्रष्टॄणां कश्चिदनर्थो येन तद्विशेषप्रदर्शनेन निंदा तत्परिहाराय च शांतिविशेषविधिरुपपद्यते न च नैमो
निंदाशांतिकविधी पर्युदासातिक्रमविषयौ किं तर्हि यः सामान्यरूपोपरागप्राप्तदर्शननिषेधस्तदतिक्रमविषयावेव विषयविशेषे
स्तु गमननियमविधौ पर्ववर्जमिति पर्वणः पर्युदासेपि रागप्राप्तगमनसामान्यविषयपर्वप्रतिषेधातिक्रमगोचरप्रायश्चित्तवि
धिवदिति वाच्यं तस्येहासंनिधानात् तेन निंदाशांतिकान्वयसामर्थ्याच्छ्रुतिबलाच्च प्रतिषेध एवायं रागप्राप्तस्यैव पुरुषार्थद
र्शनस्य राशिविशेषोपगतोपरागे विशेषतः पुरुषगतानिष्टविशेषसंकीर्तनरूपनिंदोन्नेयः किंच केनचामीमांसकाभासेने
यं भगवतः प्रतारणात्कृताय न्निषेधातिक्रम एव निंदाप्रायश्चित्तविधिश्च न तु पर्युदासातिक्रम इति तत्रापि वर्जनप्रतीत्य
विशेषात्तदतिक्रमे निष्टविशेषतत्समाधानयोरपेक्षितत्वात् । तत्र क्रत्वर्थपर्युदासातिक्रमे क्रतुगामिवैगुण्यरूपमनिष्टं
तत्समाधानं च क्रत्वर्थं पुरुषार्थतदतिक्रमे पुरुषगतमनिष्टं तत्समाधानं च तदर्थमिति निषेधेष्वपि चैतत्तुल्यं न ह्ययुक्तस्ना
तकव्रतातिक्रमस्तु गताद्यनिशाचतुष्टयगमनादिषु च पर्युदासविषयेष्वपि सह स्वशोनिंदाप्रायश्चित्तविधयो दृश्यंतद
तियत्किंचिदेतत् तेन दर्शनविधिपक्षे जन्मादिराशिस्थोपरागवतामपीतरवत्सकृद्दर्शनेन स्नानादि भवत्येव अंधादीना
मेव तु तदशक्तेरनधिकारात्तन्न भवतीति अत्रोच्यते भवतु दर्शनस्य विधिर्भवतु च तत्फलादेव पूर्वोक्तोपकारेण तस्यांग
त्वं तथापि सोपूर्वविधिस्तावन्न संभवति निमित्तज्ञानतया दर्शनस्य पक्षे प्राप्तत्वात् किं तर्हि निमित्तज्ञानस्याधिका
रसंपादकस्यानेकरूपस्य संभवात् पक्षे प्राप्तस्य दर्शनस्य नियमविधिरयं अवघातादिविधिवत् ततश्च नैमित्तिके
ष्वशक्यांगहानेनाप्यधिकारस्य न्यायसिद्धत्वादंधानां मेघावरणे चाशक्यदर्शननियमरूपांगासंभवेपि स्नानादिषु
क्रमेवेति नेष्टसिद्धिः अधिकारसंपादकमंगं न यथाशक्ति न्यायविषयो यथाग्निविद्यादीति चेत् विषमउपन्या
सः न तेष्वधिकारसंपादकत्वं तत्र प्रयोजकं किं तर्हि कर्मप्रयोगविधिप्रयोज्यत्वं इदमनेनेत्थं कुर्यादिति प्रयोग

का०त०
१८६

विधेर्हि निमित्तानुबंधस्य शेषोयथाशक्तीति सकर्मप्रयोगविधिप्रयोज्येष्वंगेषु भवति यत्वंगमपि स्वतः सिद्धत्वादेव कर्मा
नुरोधेन कर्तुमशक्यत्वान्न प्रयोगविधिप्रयोज्यं देशकालकर्तृकत्वब्राह्मणत्वराजत्वादि यद्वा विध्यंतरसिद्धत्वेनान्यथो
पपत्तेस्तथा यथा वसंतादिब्राह्मणादिविशिष्टात्मनेपदयुक्ताधानविधिसिद्धा अग्नयः अध्यापनविधिसिद्धा वा विद्या
तेषु यथाशक्तीति किंतु तद्वतामेवेतरांगहानेनाधिकारः न चोपरागदर्शननियमस्तथेति प्रयोगविधिप्रयोज्य एव तत्तम
वस्यैव यथाशक्त्युपबंधस्य विषयः न चैवं प्रयुक्तिविरोधः स्नानादिकं दर्शनेप्रयोजकं प्रधानत्वात् अतएतत्तत्प्रयो
ज्यं प्रयोजकं च तत्र स्नानादेर्निमित्तज्ञानत्वात् अतएव न स्नानादितत्प्रयोज्यमिति वाच्यं रूपभेदात् निमित्तज्ञान
त्वेन स्नानादिकं प्रति प्रयोजकत्वात् दर्शनत्वेन विशेषरूपेण च तत्प्रयोज्यत्वात् वस्तुतस्तन्निमित्तमेव शास्त्रीयं प्रयो
जकं तदुपाधीनेमित्तिकानां विधानात् अज्ञातस्य तस्यानुष्ठानकाले प्रयोजकत्वानुपपत्तेरार्थिकं तत् ज्ञानस्य तत्
तत श्चक्षोति शास्त्राद्दर्शनयोग्यं ग्रहणमवगम्य धर्मशास्त्राच्च तन्निमित्तकं महाभ्युदयसाधनं स्नानादिकर्तव्यत्वेना
वगम्य तत्प्रयुक्त्या दर्शने प्रवर्तते अतएव न पुंप्रवृत्तिविरोधोपि पुंप्रवृत्तेः शास्त्रीयायाः शास्त्रावगतोपरागनिमि
त्तत्वात् दर्शनस्य निमित्तेनंतर्भावात् नापि स्नानाद्यधिकारिणः सिद्धस्य दर्शनाधिकारसिद्धिस्तस्य स्नानाद्यंगत्वात्
अंगानां च प्रधानाधिकारिकत्वात् दर्शनाधिकारिणश्च स्नानाद्यधिकारसिद्धिस्तस्य दर्शननिमित्तकत्वादितीतरेतरा
श्रयप्रयुक्तोधिकारविरोधः दर्शनस्य निमित्तत्वाभावात् निमित्ते चाधिकाराभावात् अधिकारो नाम कर्तृत्वपूर्वकं
फलस्वाम्यं विधिगम्यं न च निमित्तेऽविधेये तत्संभवति अंगप्रधानयोस्तु विधेययोस्तद्भवति एकं च एकप्रयोगत्वेन
तदाक्षिप्तायाः कर्तृशक्तेरेकत्वात् सांगस्य करणस्य फलसामग्रीत्वेनैकफलत्वाच्च दर्शनस्य निमित्तानंतर्भावादेव
दर्शनविधौ प्रवृत्ते तन्निमित्तीकृत्य स्नानादिविधिप्रवृत्तिः प्रवृत्ते च तस्मिंस्तदंगतया दर्शनविधिरिति विधिप्रवृत्ति
विरोधोपि न संभवति सर्वेष्वेतेविरोधाद्दर्शनस्य निमित्तानंतर्भावे भावियुः शकद्धंतूपरागं निमित्तीकृत्य स्नानादि १८६

365
194

पु विहितेषु पश्चात्तदंगतया दर्शनविन कोपि विरोधः यत्वेतद्विरोधचतुष्टय प्रसंजनेन प्राच्यमतदूषणं पितृव्यचरणानां तन्मी
मांसकाहि वाक्यार्थविचारिप्रसक्ते सति लोकदृष्टीः प्रतिघ्नंति वचनव्यक्तिं पांसुभिरिति न्यायेन मीमांसकाभिभवमात्रार्थं त
त्प्रसादाधिगतमीमांसान्यायतत्त्वैस्तु सर्वस्य परिहरमेतत् तेन विशिष्टविधिना स्नानाद्यन्नद्यदर्शनरूपगुणमात्रविधिना वा
दर्शनस्यांगत्वे तस्याधिकारसंपादकत्वे च द्रव्यस्य द्रव्यार्जनवत् प्रतिसमाधेयांगविकल्पस्य तेत्राति समाधानवच्च कर्मप्रयोग
विधिप्रयोज्यत्वाद्यथाशक्त्युपबंधविषयत्वेन तदसंभवेप्यंधादेरपि स्नानादिस्यादेवांगत्वपक्षे दूषणं अदृष्टोपकारेण द
र्शनस्यांगत्वे तु सुतरामिदं दूषणा दृष्टकल्पनागौरवं च वस्तुतस्तु दर्शनस्य विधिरेव न संभवति दर्शिरहितेषु तावच्चंद्रसूर्यग्र
हे स्नायादित्यादिषु तद्विधिरनाशक्य एव राहुदर्शनपदयुक्तेष्वपि दृशेः परस्य विधेरश्रवणाद्वाक्येन तद्विधिः स्यात्सोपि भा
वलक्षणाविहितसप्तमीश्रुतेविरोधादशक्यः प्रसिद्धं हि लक्षणं भवति तेन लक्षणसप्तमी हि शाद्धादितुल्यैव तिश्रोतोपि विधि
संबंधीय त्रतत्रैर्विहन्यते किं वक्तव्यं वाक्यीयो विहन्यत इति तत्रोपरागोपलक्षणार्थे राहोसतीत्येव वक्तव्ये यद्दर्शनोपादा
नां तद्दर्शनायोग्योपरागनिमित्तत्वपर्युदासात् ग्रहस्य योग्यतामुखेन तद्विशेषणस्य दर्शनस्य लाभार्थं शक्यते दभिहित
भावत्वेन दर्शनपदात्तथा तल्लब्धमित्युक्तं अथवा प्रवृत्तहविषाः भिन्नाद्वोक्तु चंद्रोदयलक्षणत्वायोगादेव लब्धं प्रवृत्ति
मात्रं यथा यस्य हविनिरुप्तमिति निरुप्तशब्देनोपलक्ष्यते तथा त्रापि यस्य च भावेन भावलक्षणमित्युक्तत्वात् स्नानादिभा
वलक्षणभूतराहुविषयभावांतरापेक्षायां तस्य निमित्तत्वेन लक्षणत्वात्तत्त्वभावलब्धो ज्ञानरूपो भावो दर्शनेनोपल
क्ष्यते न च लक्षणैव तर्हि दोषः प्रधानभूतसप्तमीरूपप्रत्ययार्थानुरोधेन गुणभूते प्रातिपदिके तस्या अदोषत्वात् न च
मुख्यजघन्यविरोधन्यायेन मुख्यप्रातिपदिकस्वार्थात्यागेन जघन्यायाः सप्तम्या एव लक्षणरूपोर्थस्त्यज्यतामिति
वाच्यं तथा सति तस्या असाधुत्वप्रसंगात् दर्शनपदेन स्वार्थात्यागेनैव तद्योग्यत्वेन शास्त्रीयज्ञानलक्षणात्वकत्वां
तद्दशियुक्तेष्वपि वचनेषु दर्शनस्याविधानं कस्तावदविधाकत्वात् स्नात्वादेश्च परस्य लिङादिस्तदर्थविधान एव

व्याप्तत्वात् तत्रयदिक्रांतार्थः कथमपिप्राप्तोनस्यात्ततस्तामकृत्वातदुत्तरक्रियांतरकरणायोगाद्विशिष्टविधिनास्यात्तस्याप्यर्था
द्विधानंरेवतीवारवंतीयाग्निष्टोमसामभावनयाइवतद्विशिष्टयागभावनाविधिना संभवंत्यांतुकथंचिदपिप्राप्तावविधान
मेवतस्यलाघवाय संभवतिचप्रकृतेशास्त्रीयज्ञानरूपस्यदृश्यर्थस्यप्राप्तिः तदपिदृशेरर्थोभवत्येव नचाक्षुषज्ञानमात्रं
पश्यार्थेश्वानालोचनइतिशब्दार्थतत्वाभियुक्तव्यवहारात् षट्दर्शनानियास्तिकानांदर्शनमित्याद्यभियुक्तप्रयोगाञ्च
भवतुवाचाक्षुषज्ञानमेववाच्यं इतरत्रलाक्षणिकत्वं तथाप्यत्रतदाश्रयणेपिनदोषः विधिलाघवार्थमनुवादत्वापेक्ष
णात् तत्रचतस्याअदोषत्वात् श्रुत्वापुत्रस्यजन्मचेत्यादिवत् तेनदर्शनस्यचाक्षुषज्ञानरूपस्यनिमित्तत्वेननिमित्त
ज्ञानत्वेनांगत्वेनवात्रेथापिसाक्षात्स्नानाद्यन्वयासंभावाद्यद्यपितदेवदृशेर्वाच्यं तथापितद्योग्यतामुखेननिमित्ता
वछेदकत्वेनैवस्नानाद्यन्वयिभिन्नकर्तृगतमपि क्रांतदृशियुक्तेषुचतदर्थसमानकर्तृकत्वान्यथार्थशास्त्रीयज्ञान
लक्षणाप्यधिका तेनदेशविशेषावच्छेदेनचाक्षुषज्ञानयोग्यमेवग्रहणंनिमित्तंयोग्यताचस्वरूपेणैव तत्कालएवच
स्नानादिनतुसंक्रांतिवत्तत्पूर्वापरकालयोः भोजनंतुतत्काले तत्पूर्वकाले चग्रस्तास्तमयेचोत्तरकालेपिनिषिद्धं त
थाचब्रह्मपुराणे नाश्नीयादथतत्कालेग्रस्तयोश्चंद्रसूर्ययोः मुक्तयोश्चकृतस्नानःपश्चाद्भुंज्यात्स्ववेश्मनीति त
त्रस्ववेश्मनीतिवाक्यभेदेनतद्दिनेपरान्नभोजननिषेधः शिवरहस्येपि सूर्यग्रहणंयावत्तावत्कुर्याज्जपादिकं नस्व ड
पेन्नचभुंजीतस्नात्वाभुंजीतमुक्तयोरिति विष्णुधर्मोत्तरे चंद्रस्याथदिवाभानोर्यस्मिन्नहनिभार्गव ग्रहणंतुभवेत्तत्र
नपूर्वंभोजनक्रिया नाचरेत्सग्रहेचैवतथैवास्तमुपागते यावत्स्यान्नोदयस्तस्यनाश्नीयात्तावदेवतु मुक्तिंदृष्ट्वातुभुं
जीतस्नानंकृत्वायथाविधीति सग्रहेग्रहणसहिते तद्वर्तमानकाले तथैवग्रस्तएवदृष्टेतिव्याख्यातं अत्रचंद्रग्रह
पियः पूर्वंसमस्तेह्निभोजननिषेधःसग्रस्तोदयविषयः अत्राप्यवेत्युक्त्याग्रहणानपेक्षपूर्वोक्तपुरश्चरणप्रकारेणस
हवक्ष्यमाणसापेक्षप्रकारस्यविकल्पाभिधानात्तत्तुल्यफलत्वेननैमित्तिकत्वंद्योत्यते एषचपुरणप्रकारोग्रस्तास्तेग्रस्तोदये

362/1942

चनसंभवतियावद्दर्शनगोचरदृश्यस्यपूर्वप्रदर्शितार्थवशेनोभयत्रापिस्पर्शप्रभृतिमोक्षपर्यंतपुण्यकालाभावात् स्पर्शप्रभृतिमो
क्षपर्यंतंजपेदितिशास्त्रार्थंचतादृशपुण्यकालसापेक्षत्वात् अत्रविहितोपवासस्यपुरश्चरणांगत्वेनग्रहणनिमित्तकाभावात्
नवक्ष्यमाणनिषेधविषयत्वं नचोक्तविधपुरश्चरणानुष्ठातुःकथंस्नानदानादिनैमित्तिकांतरानुष्ठानमितिशंक्यं काम्यपुरश्च
रणेननैमित्तिकस्यबाधात् वैश्यकर्तृकप्रयोगेसप्तदशास्यकाम्यानुवचनविशेषणतयाविहितेकविंशतिसंख्ययाबाधव
दितिकश्चित् तन्नसंख्याकार्यस्यसामिधेनीपरिच्छेदस्यसंख्यांतरेणसिद्धेर्बाधसंभवात् प्रकृतेचनैमित्तिकस्नानदाना
दिकार्यस्यप्रत्यवायपरिहारस्यकाम्येनपुरश्चरणेसिद्धेमानाभावात् अतःपुरश्चरणोत्तरंअतिक्रांतंनैमित्तिकंकार्य
मित्यन्ये तदप्यसत् दर्शपूर्णमासादीनामिवेहगौणकारणविध्यदर्शनात् यावद्दर्शनगोचरइत्यनेननैमित्तिकांतरेभ्यो
वैलक्षण्यदर्शनात् तस्मान्नित्यैकभक्तयोरेकदिनसंनिपातेस्वयमेकंकार्यंपरंभार्यादिद्वारेणमाधवोक्तरीत्याकर्तव्यंशेष
तिनिधिसंपादनेननैमित्तिकंकारणीयमितियुक्तं पुरश्चरणामकुर्वद्भिरपिस्वस्वेष्टदेवतामंत्रजपोगायत्रीजपश्चयथाश
क्त्यवश्यंकार्यइत्युक्तंकौर्मे ग्रस्तोदयविधौःपूर्वंनाहर्भोजनमाचरेदितिवृद्धवसिष्ठवचनैकवाक्यसत्वात् स्मृत्यंतरेपि
संध्याकालेयदाराहुर्ग्रसतेशशिभास्करौ तदाविवानभोक्तव्यमातुरस्त्रीशिशून्विनेति चंद्रसूर्यग्रहेनाद्यादाद्यंयामचतु
ष्टयं तस्मिन्नहनिनाश्नीयाच्चंद्रसूर्यग्रहोयदा चंद्रसूर्यग्रहेनाद्यात्तस्मिन्नहनिपूर्वतः इत्यादीनिब्रह्मवैवर्तशंखलिखि
तश्लोकगौतमादिवचनान्यपिचंद्रांशग्रस्तोदयविषयाण्येव अतएवशंखलिखितगौतमवचनयोःशेषः मुक्तिंदृष्ट्वा
तुभुंजीतस्नात्वाचैवयथाविधीति राहोर्विमुक्तिंविज्ञायस्नात्वाकुर्वीतभोजनमिति ग्रस्तोदयादन्यत्रपूर्वमपिभोजनका
लालाभात् अन्यत्रतुयामत्रयएव सूर्यग्रहेतुनाश्नीयात्पूर्वंयामचतुष्टयं चंद्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्विनेति
वृद्धगौतमवचनात् यामत्रयंचग्रहणयामावधिकंग्रहणंचभवेदिंदोःप्रथमादधियामतः भुंजीतावर्तनात्पूर्वंप्रथ
मेप्रथमादधइतिमार्कंडेयवचनात् प्रथमयामादधिरात्रिद्वितीयप्रहरेचंद्रग्रहणेतदवधिकोरात्रिप्रथमप्रहरएकः॥

का०त० आवर्तनोत्तरकालीनं च दिनसंबंधितृतीयचतुर्थात्मकं प्रहरद्वयं प्रहरत्रयं न भोक्तव्यं रात्रिप्रथमप्रहरे तस्मिन् दिनसंबंधि
१८८ न्येव द्वितीयतृतीयचतुर्थात्मके प्रहरत्रये न भोक्तव्यमिति निषेधस्यैवावधिसमर्पणार्थमेतत् भुंजीतेति त्वनुवादः स्वदृश
मिति रथंतरे प्रस्तूयमाने संमीलयेदिति विधाय श्रूयते स्वदृशं प्रति वीक्षेतेति अस्ति रथंतरसाम्नि योनावभि त्वा शूर
नोनुमोऽदुग्धा इव धेनव ईशानमस्य जगतः स्वर्दृशमिति तत्र संशयः किं स्वर्दृक्शब्देस्य वीक्ष्यमाणस्य च कालार्थः संयोग उ
तांगांगिसंबंध इति तत्र कालार्थत्वे स्वर्दृक्शब्दस्य लक्षणाप्रसंगादंगांगिसंबंध एव न्याय्यः स्वर्दृक्शब्दो वा वीक्षणां
गं स्वर्दृक्शब्दमुच्चारयन् वीक्षेत नान्यथेति वीक्षणं वा स्वर्दृक्शब्दस्यांगं वीक्षमाणः स्वर्दृक्शब्दं समुच्चारयेन्नान्यथे
ति प्राप्ते ब्रूमः स्वर्दृशं प्रतीत्यनेन कर्मप्रवचनीयेन प्रतिशब्देन स्वर्दृक्शब्दोच्चारणं मीलनकालावधित्वं द्योत्यते तथा स
त्यास्वर्दृक्शब्दोच्चारणात् संमीलयेदित्येकवाक्यं संपद्यते वीक्षणं च प्राप्तत्वान्न विधेयं किं त्वनुवाद्यं तेनायमर्थः र
थंतरे प्रस्तूयमाने संमीलयेदा स्वर्दृक्शब्दोच्चारणात् तस्मिंस्तु काले वीक्षेतेति स्वर्दृशं प्रति वीक्षेतेतिवत् पद्मपुरा
णेपि अधो रात्रादधश्चोर्ध्वं यदा चंद्रग्रहो भवेत् पूर्वे पूर्वत्र भोक्तव्यमुत्तरे चोत्तरेपि चेति अधो द्वितीयप्रहरे ऊर्ध्वं
तृतीये पूर्वत्र पूर्वाह्णे दिनप्रथमद्वितीयप्रहरयोः उत्तरेपि तृतीयप्रहरेपि एवं सति सूर्यग्रहनिमित्तकभोजननिषे
धविषयस्य यामचतुष्टयस्याप्यवधिसापेक्षस्य ग्रहयाम एवावधिः यत्तु अहोरात्रं तु नाश्नीयाच्चंद्रसूर्यग्रहो यदा मुक्तिं
दृष्ट्वा तु भुंजीत स्नानं कृत्वा विधानत इति शातातपवचनं तद्ग्रस्तास्तविषयं तत्र सूर्यग्रस्तास्ते सम्यगेव चंद्रग्रस्तास्ते
तु सा रात्रिरुत्तरं चाहरित्यहोरात्रं द्रष्टव्यं नाद्यात् सूर्यग्रहात् पूर्वमह्नि सायं शशिग्रहात् अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा
परेहनीति वचनात् सायं रात्रौ यच्च चंद्रग्रहे मुक्तौ भोजनं तन्महानिशातः पूर्वं द्रष्टव्यं मुक्ते शशिनि भुंजीत यदि न
स्यान्महानिशेति शातातपवचनात् महानिशा च मार्कंडेयेनोक्ता महानिशा द्वे घटिके रात्रिमध्यमयामयोः नैमित्तिकं
यदा कार्यं काम्यं तु न मनागपीति प्रतियामं घटिकाद्वयं एका वा घटिका तेन मुहूर्तद्वयमेको वा मुहूर्तः सार्द्धप्रहरानंत १८८

369/1447

रं चतुर्मुहूर्तचतुष्टयं महानिशेति कल्पतरुः बालादीनामसमर्थानां तु मुहूर्तत्रयात्मकसायाह्नादि ग्रहणकालात् प्राची
न एकैकस्मिन्नेतादृशे परार्ह्णादौ भोजननिषेधः तथा च मार्कंडेयः सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनं अपराह्णे
न मध्याह्ने मध्याह्ने न तु संगवे भुंजीत संगवे चेत्स्यान्न पूर्वं भोजनक्रियेति सूर्योपरागविषयमेवेदं बालादीनां भोजन
निषेधकालप्रतिपादनं चंद्रग्रहणे रात्रितृतीयचतुर्थप्रहरगते बालादिभिर्यामत्रयमपि निषेधपरिपालनसंभवात्
तेषामप्युत्सर्गतः सर्वस्यामपि रात्रौ भोजनं विनैवावस्थानात् यदा तु तेषां रात्रिप्रथमद्वितीययामगते चंद्रग्रहे दिन
यामत्रयद्वयव्यापि निषेधपरिपालनासंभवस्तदाहोरात्रे रपि पंच भागान् कृत्वा ग्रहणकालभूतभागावधिकत्रिमुहू
र्तात्मकैकभागात्मक एव रविग्रहवद्भोजननिषेधकालो द्रष्टव्यः यत्तु हेमाद्रौ दाल्भ्यवचनांतरं सायाह्ने संगवेश्नी
यादपराह्णे संगवादधः मध्याह्ने परतोश्नीयान्नोपवासो रविग्रह इति ग्रहणकालभागावधिकपूर्वभागद्वये भोजन
निषेधप्रतिपादकं तदपि बालादिविषयमेव ग्रस्तसूर्यास्तमयविषयं नोपवासो रविग्रह इति वाक्यशेषात् तत्रै
व चाहोरात्रव्यापि भोजननिवृत्त्यात्मकोपवासप्रसक्तेः शारदे पराह्णे यदापराह्णोर्ध्वशरदिति श्रुतेः तत्रांतोपरा
गग्रस्तास्तमयः संभवत्येव अत एव मध्याह्ने परतोश्नीयादित्युक्तं तत्रोपरागग्रस्तास्तमयासंभवात् यद्यपि च
तत्र पूर्वकल्पादुपरागात् पूर्वं संगवमात्रं वर्जयित्वा प्रातर्भोजनं संभवति तथापि तत्र भागद्वयवर्जनस्यात्र वाक्ये प्र
तिपादनादन्यत्रापि बालादीनामपि भागद्वयवर्जनं मुख्यः कल्पः एकभागवर्जनं त्वनुकल्प इति सूच्यते ननु पुत्रवद्गृह
स्थविषयमिदं वचनमुक्तं न तु बालादिविषयं नोपवासो रविग्रह इति निषेधानुवादरूपवाक्यशेषबलात् तथा हि
उपवासशब्दस्तावदहोरात्राभोजनगोचरसंकल्परूपे व्रते शक्तः विहितश्च तादृश उपवासो लक्षणार्थो ब्रह्मपुराणे
नित्यं द्वयोरनयोस्तथा विषुवतोर्द्वयोः चंद्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु अहोरात्रोषितः स्नानं श्राद्धं दानं तथा
जपं यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तदिति अयं चोपवासः सत्यामपि निष्ठायामयनग्रहणदर्शादिमत्यहोरात्रे

का०त० व नतु पूर्वस्मिन् अयनादिसमभिव्याहारात्तद्दहोरात्रस्यैव प्रतीतेस्तत्र ग्रहणस्यैव युक्तत्वात्तथैव शिष्टसमाचाराच्च शि
१८९ ष्टाद्यादिकर्मणि एकरात्रमुपोष्यैवं स्नात्वा दद्याच्च शक्तितः कंचुकादिवत्सर्पस्य निवृत्तिः पापकोशतइति लिंगपुराण
गतः क्त्वाप्रत्ययोपि समानकर्तृकत्वमात्रे मुखं व्याादाय स्वपितीतिवत् तत्रैव त्रिरात्रोपवासोप्युक्तः त्रिरात्रं समुपोष्यै
वं ग्रहणे चंद्रसूर्ययोः स्नात्वा दद्याच्च विधिवन्मोदते ब्रह्मणा सहेति अत्रापि तृतीयउपवासस्तद्दिन एव तत्र घटि
तस्यैव त्रिरात्रस्योपरागादिनोपलक्षणात् केचित्तु शिष्टा क्त्वाप्रत्ययबलात्पूर्वदिन एवोपवासं वदंति अतएव ग्रहणा
दौ पारणानिषेधउपपद्यते आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः पारणं चोपवासं च न कुर्यात्पुत्रवान्गृहीति
अयं चोपवासः संक्रांतावुपवासं च कृष्णैकादशिवासरे चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृहीत्यादि नारदादिवच
नेषु पुत्रवत्गृहिभिन्नः संक्रांत्यादिषूपवासं कुर्यादिति पर्युदासेन पुत्रवद्गृहिणां पर्युदस्तः तत्पर्युदासलब्धाया
स्तेषां तन्निवृत्तेरयमनुवादो नोपवासो रविग्रहइति ग्रस्तसूर्यास्ते च निषेधाद्दिवारात्रौ च भोजनस्य कर्तुमशक्य
त्वादुपवासावश्यंभावात्तस्यादुःस्थता शंकायां तत्समर्थनार्थं भागद्वयमात्रे भोजननिषेधस्तत्र तान्प्रत्येव युक्त
इति अत्रोच्यते निषेधपरिपालनापेक्षया नित्यस्याप्युपवासस्यानुष्ठाने विशेषः पारणांतं व्रतं ज्ञेयमित्यादि
रुतएकादशीप्रकरण उक्तः किमुत काम्यस्य फलोद्देशघटितसंकल्पादिपूर्वकमनुष्ठानात् तथा च द्वयोरपि भो
जननिषेधोपवासनिषेधयोर्ग्रस्तसूर्यास्ते परिपालनसंभवान्न काप्युपवासनिषेधपरिपालनस्याशक्यता
येन तत्परिहारार्थं भोजननिषेधस्यावध्यंतरं विधातव्यं बालादीनां सर्वदिनं भोजननिवृत्तेरशक्यत्वात्तत्रा
वध्यंतरापेक्षायां तान्प्रत्येव तद्विधिर्युक्तः एवं सति रविग्रहणमपि विवक्षितमेव भवति नतु शशिग्रहस्याप्यु
पलक्षणं उपवासशब्दस्य तु भोजननिवृत्तिमात्रपरता श्रीयादित्युपक्रमादेव प्रतीयते भुंजीत तेनाभोजनं १८९
नेति भोजनेनाभोजननिषेधस्यैव समर्थनात् एतदर्थमेव भागद्वयव्यापिभोजननिषेध एव तास्वर्येपि भागद्व

371
1942

यं त्यक्त्वा श्रीयादित्युक्तिः तेन बालादिविषयमेवेदमपि वचनं ग्रस्तस्त्यस्ते एवं ग्रस्तचंद्रास्तेपि यावत्तदुदयभोजनेनावस्था
तुमसमर्थानां शास्त्रावगतमुक्तिकाल अथ ग्रहणादिमान्यदिनस्थनैमित्तिकं॥ हेमाद्रौ त्रयोदश्यादिनाबत्यदिनानां नव
कं ध्रुवः मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः स्मृत्यंतरे द्वादश्यादिस्तनीयांतो वेधइंदुग्रहे स्मृतः एकादश्यादिकः
सौरे चतुर्थ्यंतः प्रकीर्तितः खंडग्रहे तु त्र्यहं खंडग्रहे तयोरिति वचनादित्रयं वर्ज्यं ग्रस्तास्ते तु पूर्वदिनत्रयं श्राद्धाहोत्रि
दिनं पूर्वमिति नारग्रस्तोदयत्वत्तरं पश्चात् ग्रस्तोदये तथेति स्मृतिः संध्यायां तु ग्रहणे स एव संध्यायां तु त्रिदिनं निः
शेषे सप्त सप्त चेति बृहस्पतिस्तु पश्चादेवोपरागे तु दोषः स्यान्नैव पूर्वतः ग्रहदादयो दोषाय थास्युर्दहनात्परं इति
अस्यापवादः स्मृत्यन्तरे नैमित्तिके काम्ये होमे यज्ञक्रियासु च उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यतइति ग्रहण
निर्णयः मृताहश्च भागोत्तरं भागद्वयमेकभागं वा त्यक्त्वा भोजनं भवति यदा चैवं कारणांतरप्रयुक्तभोजनाभावमात्रे
ण व्रतरूपोपवासाप्रसक्तिस्तदा ग्रहणनिमित्तश्राद्धाधिकारिणां ग्रस्तास्तविषयेतु भृगुः ग्रस्ताववास्तमानंतु
रवींद्र प्राप्नुतो यदि परेद्युरुदये स्नात्वा शुद्धोभ्यवहरेन्नरः विष्णुधर्मोत्तरेपि अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो
यदा मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति मनुः चंद्रसूर्यग्रहे नाद्यात्स्नात्वा चैव विमुक्तयोरिति वृद्ध
गौतमः सूर्यग्रहपूर्वत्वं ग्रहणप्रहरावधिकं ग्रहण० पश्चिमप्रथमादधरवेस्त्वावर्तनादूर्ध्वमर्वागेव निशीथतः
चतुर्थप्रहरे चेत्स्याच्चतुर्थप्रहरादधइति वृद्धवसिष्ठवचनात् अत्रयद्यपि रात्रौ प्रथमयामोर्ध्वं चंद्रग्रहणे मध्या
ह्नात्पूर्वं भोक्तव्यं रात्रिचतुर्थप्रहरे चंद्रग्रहणे रात्रेः प्रथमप्रहरादर्वाग्भोक्तव्यं सूर्यस्य मध्याह्नादूर्ध्वं ग्रहणे निशी
थात्प्राग्भोक्तव्यमित्येतत्संभवद्युक्तिकं अह्नश्चतुर्थप्रहरे रविग्रहे रात्रेश्चतुर्थप्रहरे रविग्रहे रात्रेश्चतुर्थयामाद
धो भुंजीतेत्येतदसंभवद्युक्तिकं भाति रात्रेर्मध्यप्रहरद्वये भोजननिषेधात्तथापि चंद्रसूर्यग्रहणयोर्ग्रहणप्रह
रादर्वाक् यामत्रयं तच्चतुष्टयं च भोजननिषेधकादित्येतावति तात्पर्यं बोध्यं स्मृतिर्बालादिविषये वेधादिसंको

का॰त॰ चमाह मत्स्यः अपराह्णेतु॰ न पूर्वं भुंजिमाचरेदिति शक्तेन ग्रहणकालेच यदि भुज्यते तत्र क्रमेण प्रायश्चित्तमाह कात्यायनः
१९० चंद्रसूर्यग्रहे कदाचि द्वैधाधिक्यमाह वृद्धवसिष्ठः ग्रस्तो॰ यच्च हेमाद्रौ ब्रह्मवैवर्ते चंद्रसूर्यग्रहे नाद्यादाद्यं याम चतुष्टयमि
तितदपि चंद्रांशग्रस्तोदयविषयमेवेति केचित् अन्येपि चंद्रग्रहेपि मंडलग्रासे ग्रहणप्रहरात्पूर्वं यामचतुष्टयं वेधका
लः उक्त ब्रह्मवैवर्तवचनस्वरसात् एकदेशग्रहे तु यामत्रयमेव वेध इति व्यवस्थामाहुः युक्ताचैषा यदा चंद्रग्रहस्तात
निशीथात्परतो भवेत् भोक्तव्यं तात पूर्वाह्णे नापराह्णे कथंचन पूर्वं निशीथात् ग्रहणं यदा चंद्रस्य वै भवेत् तदा दिवा
न कर्तव्यं भोजनं शिखिवाहनेति हेमाद्रौ स्कांदवचनस्य चंद्रग्रस्तोदये साकल्येननेतुमशक्यस्य पूर्णग्रासे याम चतु
ष्टयवेधाभिप्रायेण कथंचिदपि नेतुं शक्यत्वात् अर्थमात्रावाचित्वांगीकारेण प्रातः संकल्पये द्विद्वानुपवासव्र
तादिकमित्युपवासाद्यनुवादेन प्रातःकालविशिष्टसंकल्पविधिबलादेव सर्वत्र संकल्पसिध्युपगमे लाघवात् ग्रह
णनिमित्तपूर्वोत्तरनिषेधद्वयबलेनाहोरात्रावच्छिन्नाभोजननिवृत्तेरेवं सति ग्रहणनिमित्तोपवासत्वरूपनिषेध्यता
वच्छेदकाग्रांतत्वेन निषेधविषयत्वाया आवश्यकत्वात् हेमाद्युदाहृतषण्मुहूर्तवेधविधायकशास्त्रस्य प्राचीननि
बंधानुक्त व्यवस्थांतरकल्पनाया अन्याय्यत्वाच्चेति दिक् स्मृतिकौस्तुभे प्रारब्धे चाभोजनमापरिसमापनादिति वि
हितश्राद्धांगभोजननिषेधपरिपालनेपि क्षतिः ग्रहणनिमित्तेपि श्राद्धे पूर्वेद्युरेव परेद्युर्वा प्राथमिकं ब्राह्मणनि
वेदनं श्राद्धप्रारंभत्वेन व्याख्यातं संभवत्येव न भुंजते च प्राच्याः श्राद्धाधिकारिणो ग्रहणदिने ततः पूर्वं तस्मात्
ग्रस्तसूर्यास्तेपुत्रवद्गृहिणामपि अहोरात्रं भोजननिषेधः परिपालनीय एव व्रतरूपः काम्य उपवासः परं न कर्तव्यः
ग्रहणतत्पूर्वनिषिद्धपूर्वयोः कालयोर्भोजने प्रायश्चित्तं षट्त्रिंशन्मतेभिहितं चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शु
ध्यति तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यतीति त्रिरात्रेण त्रिरात्रोपवासेन तेन प्राजापत्यार्धमुक्तं भवति प्रा
जापत्यस्य षडुपवासतुल्यत्वात् ग्रस्तास्तोत्तरभि निषिद्धकालभोजनेपि त्रिरात्रमेव तस्मिन्दिन इत्यविशेषाभि १९०

धानात् स्त्रीबालवृद्धादीनां तत्तदर्धं अत्र च ग्रहणे स्नानं यद्यपि वापीकूपतडागेषु गिरिप्रस्रवणेषु च नद्यां नदे देवखा
ते सरसी धूद्धृतांबुनि उष्णोदकेपि वा स्नायात् ग्रहणे चंद्रसूर्ययोरिति शंखवचने सर्वत्रोक्तं स्याम्यं च सर्वजलानां सर्वभू
मिसमं दानं सर्वब्रह्मसमा द्विजाः सर्वं गंगासमं तोयं राहुग्रस्ते दिवाकरे स्वर्धुन्यंभः समानि स्युः सर्वाण्यंभांसि भूतले कु
परस्थान्यपि सोमार्कग्रहणे नात्र संशय इति व्यासवचने उक्तं तथापि तत्तच्छंसामात्रं तारतम्यं त्वावश्यकं अत एव मार्कं
डेये भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं ततोपि सारसं पुण्यं ततः पुण्यं नदीजलं तीर्थतोयं ततः पुण्यं महानद्यं
बु पावनं ततस्ततोपि गंगांबु पुण्यं स्यादंततोंबुधिः शीतमुष्णोदकात्पुण्यमपारक्यं परोदकादिति तत्रापि गंगाकुरुक्षे
त्रं च सर्वकालीने ग्रहणे ग्रहणे स्नानादौ श्रेष्ठतरं तथा च व्यासः चंद्रसूर्यग्रहे चैव यो वगाहेत जाह्नवीं स स्नातः सर्व
तीर्थेषु किमर्थमटते महीमिति वृद्धवसिष्ठः इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः गंगातोये तु संप्राप्ते इंदोः कोटी रवेर्द
श गवां कोटिसहस्रस्य यत्फलं लभते नरः तत्फलं जाह्नवीस्नाने राहुग्रस्ते दिवाकर इति अन्यकालीने तत्र तीर्थस्नाने
यत्पुण्यं तदिंदोर्ग्रहणे तत्र स्नाने लक्षगुणं रवेर्ग्रहणे दशलक्षं एवं कोटिर्दशकोटयः मत्स्यपुराणे गंगा कनखले पुण्या
प्रयागं पुष्करं तथा कुरुक्षेत्रं तथा पुण्यं राहुग्रस्ते दिवाकर इति तत्रैव दशजन्मकृतं पार्थ गंगासागरसंगमे जन्मनां
तु सहस्रेण यत्पापं समुपार्जितं तन्नश्येत्संनिहत्यायां राहुग्रस्ते दिवाकर इति विष्णुधर्मोत्तरेपि कुरुक्षेत्रार्धसंनिहत्या
यं उपक्रम्य तत्र श्राद्धं तु यः कुर्याद्राहुग्रस्ते दिवाकरे अश्वमेधशतं साग्रं फलं विंदति मानव इति गावो नागास्तिला
धान्यं रत्नानि कनकं मही संप्रदायः कुरुक्षेत्रे यत्फलं लभ्यते नरैः यच्च दीपप्रदानेन यच्च छत्रप्रदानतः तदिंदुग्र
हणे भोधौ स्नानाद्भवति षड्गुणमिति समुद्रप्रशंसापर प्रभासखंडवचनादपि दाने कुरुक्षेत्रस्य श्रैष्ठ्यं गम्यते य
था गंगास्नानमित्युक्त्या स्नाने गंगायाः स्कंदपुराणेपि उपरागे कुरुक्षेत्रं पवित्रं मुनयो विदुरिति उष्णोदकेन यत्
ग्रहणे स्नानमुक्तं तदातुरविषयं आदित्यकिरणैः पूतं पुनः पूतं तु वह्निना स्नते व्याधिं तु न स्नायात् ग्रहणे ष्णवा

373
1942

का०नि०
१२१

रिणेतिव्याघ्रवचनात् अतएवानातुराभिप्रायेणैवतन्निषेधोमृतेजन्मनिसंक्रांतौग्रहणेचंद्रसूर्ययोः अस्पृश्यस्पर्शनेचैव
नस्नायादुष्णवारिणेत्यादियमादिवचनेषु मासविशेषग्रहणेतन्निमित्तस्नानादेस्तीर्थविशेषफलसंबंधेफलातिशयउ
क्तोदेवीपुराणे कार्तिकेग्रहणंश्रेष्ठंगंगायमुनसंगमे मार्गेतुग्रहणंपुण्यंदेविकायांमहामुने पौषेतुनर्मदापुण्यामाघेसंनि
हिताशुभा फाल्गुनेवरुणापुण्याचैत्रेचैवसरस्वती वैशाखेतुमहापुण्याचंद्रभागासरिद्वरा ज्येष्ठेतुकौशिकीपुण्याआ
षाढेतापिकानदी श्रावणेसिंधुनामातुभाद्रेपुण्यातुगंडकी आश्विनेसरयूश्रेष्ठाभूयःपुण्यातुनर्मदा गोदावरीमहा
पुण्याचंद्रेराहुसमन्विते सूर्येचराहुणाग्रस्ते तमोभूतेमहामुने नर्मदातोयसंस्पर्शात्कृतकृत्याभवंतिते येसूर्यसैं
हिकेयेनग्रस्तेगंगाजलंनराः स्पृशंतिचावगाहंतिनसाप्रकृतिमानुषी स्मृत्वाशतक्रतुफलंदृष्ट्वागोदानजंफलं
स्पृष्ट्वागोमेधजंपुण्यंपीत्वासौत्रामणिंलभेत् स्नात्वावाजिमुखंपुण्यंप्राप्नुयादविचारतः चंद्रसूर्योपरागेचअय
स्पृष्ट्वागोमेधजंपुण्यं ... नेचोत्तरेतथा एवंद्रष्टव्यागंगापितद्वदेवसरस्वती ब्रह्मवैवर्तेपि मकरेवर्तमानेतुग्रहणेचंद्रसूर्ययोः दुर्लभंत्रिपुलो
केषुगयायांपिंडपातनमिति वारविशेषयोगेनचग्रहणेफलविशेषोव्यासेनोक्तः सूर्यवारेरवेर्ग्रासःसोमेसोमग्र
हस्तथा चूडामणिरितिख्यातस्तत्रानंतफलंलभेत् वारेष्वन्येषुयत्पुण्यंग्रहणेचंद्रसूर्ययोः तत्पुण्यंकोटिगुणितं
ग्रासेचूडामणौस्मृतमिति तथासतीर्थेकविधग्रासेसंतुदामनपर्वणि मंत्रदीक्षाप्रकुर्वाणोमासर्क्षादीन्नशोध
येत् चंद्रसूर्यग्रहेतीर्थेसिद्धक्षेत्रेशिवालये मंत्रमात्रप्रकथनमुपदेशःसउच्यते इतिसारसंग्रहरामार्चनचंद्रिका
द्युक्तामंत्रदीक्षासूर्यग्रहणमात्रेपिभवति अथवान्यप्रकारेणपुरश्चरणमिष्यते ग्रहणेर्कस्यचेंदोर्वाशुचिःपूर्वमु
मुपोषितः नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः यद्वापुण्योदकेस्नात्वाशुचिःपूर्वमुपोषितः ग्रहणादिवि
मोक्षांतंजपेन्मंत्रंसमाहितः अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत् ३ तदंतेमहतींपूजांकुर्याद्ब्राह्मणतर्पणं १२१
ततोमंत्रप्रसिध्यर्थंगुरुंसंपूज्यतोषयेत् ४ एवंचमंत्रसिद्धिःस्याद्देवताचप्रसीदति अथवान्यप्रकारोयंपौरश्च

375
1942

रणिकोविधिः ५ चंद्रसूर्योपरागेचस्नात्वाप्रयतमानसः स्पर्शादिमोक्षपर्यंतंजपेन्मंत्रंसमाहितः ६ जपाद्दशांश
तोहोमंतथाहोमाच्चतर्पणं एवंकृत्वातुमंत्रस्यजायतेसिद्धिरुत्तमा ७ होमाशक्तौजपंकुर्याद्धोमसंख्याचतुर्गुणं ष
ड्गुणंचाष्टगुणितंयथासंख्यंद्विजातयः ८ तेषांस्त्रीणांतुविज्ञेयस्तेषामेवसमोजपः यद्वर्णमाश्रितःशूद्रस्तज्जप
स्तस्यकीर्तितः ९ मूलमंत्रंसमुच्चार्यतदंतेदेवताभिधां द्वितीयांतामहंपश्चात्तर्पयामिनमोंतकः १० तर्पणस्यदशां
शेनमार्जनंकथितंकिल तच्चैवंदेवतारूपंध्यात्वात्मानंप्रपूज्यच ११ नमोंतंमंत्रमुच्चार्यतदंतेदेवताभिधा द्विती
यांतामहंपश्चादभिषिंचाम्यनेनच १२ तोयैरंजलिनाशुद्धैरभिषिंचेत्स्वमूर्द्धनि मार्जनस्यदशांशेनब्राह्मणान्
पिभोजयेत् १३ विप्राराधनमात्रेणव्यंगंसांगंभवेद्यतः जपोचापूर्वतोहोमःतर्पणंचाभिषेचनं १४ भूदेवपूजनं
पंचप्रकारैश्चपुरस्क्रियेत्यादिपुरश्चरणचंद्रिकाद्युक्तंपुरश्चरणंतुग्रस्तोदयेग्रस्तास्तेनभवति स्पर्शाद्विमुक्तिप
र्यंतमित्यभिधानात् तयोश्चयावद्दर्शनगोचरत्वस्यतस्यादर्शनयोग्यतापेक्षणात् जन्मराश्यादावुपरागेपीडाप्र
दत्वमाहमदनरत्नेगार्ग्यः जन्मसप्ताष्टरिष्फांकदशमस्थेनिशाकरे दृष्टोरिष्टप्रदोराहुर्जन्मर्क्षेनिधनेपिचेतिरिष्फं
द्वादश अंकानव निधनंसप्ततारा निशाकरःसूर्यस्याप्युपलक्षणं तत्रशांतिरुक्तानिर्णयामृतेमात्स्येयस्यरा
शिंसमासाद्यभवेद्ग्रहणसंभवः तस्यस्नानंप्रवक्ष्यामिमंत्रौषधिसमन्वितं चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवा
चनं संप्रार्थ्यचतुरोविप्रान्शुक्लमाल्यानुलेपनैः पूर्वमेवोपरागस्यसमानीयौषधादिकं स्थापयेच्चतुरःकुंभानग्रतः
सागरानिव गजाश्वरथ्यवल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् पंचगव्यंपंचरत्नं
पंचत्वक्पंचपल्लवं रोचनंपावकंशंखंकुंकुमंरक्तचंदनं शुक्तिस्फटिकतीर्थांबुसितसर्षपगुग्गुलान् मधूकंदे
वदारुंचविष्णुक्रांतांशतावरीं वचांचसहदेवींचनिशाद्वितयमेवच एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरा
न् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः आयांतुयजमानस्यदुरितक्षयकारकाः योसौवज्रधरोदेवआदि

का०त० स्यानांप्रनर्मतः सहस्रनयनःशक्रो ग्रहपीडांव्यपोहतु नागपाशधरोदेवःसदामकरवाहनः सजलाधिपतिर्देवोग्रंसर्वदे
१९२ वानांसप्तार्चिरमितद्युति चंद्रोपरागसंभूतामग्निपीडां० २ यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः चंद्रोपरागोत्थां
ग्रहपीडां० ३ रक्षोगणाधिपःसाक्षीनीलांजनसमप्रभः खड्गहस्तोनिर्ऋतिश्चग्रहपीडा० ४ प्राणरूपोहिलोकानांसा
क्षात्कृष्णमृगाप्रियः वायुश्चंद्रोपरागोत्थां ग्रहपी०५ योसौनिधिपतिर्देवःखड्गशूलगदाधरः चंद्रोपरागकलुषं
धनदोमेव्यपोहतु नक्षत्रादिस्थितरविशशिग्रहणेशांतिविशेषउक्तोविष्णुधर्मोत्तरे यस्मिन्स्त्रिजन्मनक्षत्रेग्र
स्येतेशशिभास्करौ तज्जातानांभवेत्पीडायेनयेनराःशांतिवर्जिताः क्वचिद्यन्नक्षत्रगतोराहुर्ग्रसतेशशिभास्करा
वितिपाठः सूर्यस्यसंक्रमेवापि ग्रहणंशशिसूर्ययोः यस्यत्रिजन्मनक्षत्रेतस्यरोगोथवामृतिरित्येतद्वचनसंवादीत्
पूर्वपाठः त्रिजन्मजन्मनक्षत्रंतत्पूर्वोत्तरेचेतिकेचित्नक्षत्राणिजन्मदशमैकोनविंशानिहोरायांगृह्यते यस्यनक्ष
त्रेवानिशाकरः प्राणसंदेहमाप्नोतिसवामरणमृच्छति अभिभवतिसैंहिकेयश्चंद्रार्कौयस्यजन्मनक्षत्रे तस्यांतका
दिवभयंविद्याद्दुःखंमनस्तापं तस्यदानंचहोमंचदेवार्चनजपौतथा उपरागाभिषेकंचकुर्याच्छांतिर्भविष्यति
स्वर्णेनवाथपिष्टेनकृत्वासर्पस्यचाकृतिं ब्राह्मणायददेतस्यनरोगादिश्चतत्कृतः सर्पस्यसर्पाकारस्यराहोः मंड
लाधिपदैवत्यैर्मंत्रैर्मृत्युंजयादिभिः होमंकुर्यात्प्रयत्नेनतत्तन्मंत्रान्जपेत्सुधीरिति मंडलानितत्तन्नक्षत्रगणात्मका
न्याग्नेयवारुणवायव्यैंद्राख्यानिगर्गसंहितोक्तानितदधिपाअग्न्यादयःस्तद्दैवत्यैरित्यर्थः राजभिस्तुप्रजाहिता
र्थंतत्तन्मंडलेषुतत्तच्छांतयोथर्ववेदोक्ताःकारणीयाः आग्नेयींकारयेच्छांतिंशांतिंकुर्याच्चवारुणीं वायव्यांच
तथाकुर्यान्महेंद्रींतत्रकारयेदितिकात्यायनवचनात् ग्रंथांतरेप्रकारांतरमुक्तं ग्रहणग्रहपरिपीडितनाडीन
क्षत्रदोषश्चमनाय महशतपुष्पैःस्नायात्पलिनीफलचंदनोशीरैः ताम्रपात्रंतिलैःपूर्णं पूर्णंवागव्यसर्पिषा
भास्करग्रहणेदद्यान्नाडीदोषोपपीडितः घृतकुंभोपरिनिहितंशंखंचनवनीतपूरितंदद्यात् नाड्यादिदोषशां १९२

377/1942

त्यै द्विजायदोषाकरग्रहणेइति नाडीनक्षत्राण्यथदशमषोडशाष्टादशत्रयोविंशपंचविंशानि उपरागाभिषेकश्चय
स्यराशिंसमासाद्यभवेद्ग्रहणसंभवेब्रूत्यादिनाग्रंथेनमत्स्यपुराणेभिहितोग्रंथांतराक्षेपः तदयमत्रसंग्रहः तर्पण
श्राद्धदानानिस्नानंचाद्यंतयोस्तथा सचेलंनित्यान्येतानि ग्रहणेचंद्रसूर्ययोः होमदेवार्चनजपपुरश्चरणकानि
तु मंत्रदीक्षामहादानातिदानप्रमुखाणिच कृतानितत्रातिशयफलदान्युपरक्तयोः चंद्रार्कयोस्तत्तमयेपुरश्चर्यो
दयेपिन श्राद्धंचामेनहेम्नावातत्रचंद्रग्रहेचतत् स्नानादपिचराभावप्येतत्सर्वंपुरोदितं स्नानदानादिकंकार्यमाशौ
चेपिचतत्कृतं ग्रहणांतरितंपक्वंत्याज्यंक्षीरादिकंनतु एतद्दीपस्थमनुजचाक्षुषप्रत्ययेचयत् स्वरूपयोग्यंग्रहणं
तन्निमित्तंस्वकर्मणि योसाविषुधरोदेवःपिनाकीवृषवाहनः चंद्रोपरागपापानिसनाशयतुशंकरः त्रैलोक्येया
निभूतानिस्थावराणिचराणिच ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपातकं एवमावाहयेत्कुंभान्मंत्रैरेभिश्चवारुणैः तान्
वचतथामंत्रान्स्वर्णपत्रेविलेखयेत् ताम्रपत्रेथवालिख्यनववस्त्रेतथैवच मस्तकेयजमानस्यनिबध्युस्तेद्विजो
त्तमाः कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान् गृहीत्वास्नापयेच्छुद्धभद्र आचार्यवरयेत्सश्चात्स्वर्णपदंनि
वेदयेत् आचार्यदक्षिणांदद्यात्गोदानंचविशेषतः अतऊर्ध्वंब्रह्मपूजातदर्धेनविशेषतः मेघाछन्नेपितेन
स्यादंधादेश्चाधिकारिता दिनरात्रोश्चचंद्रार्कंग्रहणेनाधिकारिता यावत्तद्योग्यतातावदेवस्नानादितत्कृतं
नतुसंक्रांतिवत्पूर्वमुत्तरंवाभवेदिदं भोजनंतुरवेर्ग्रासिप्रथमग्रहयामतः चतुर्षुप्रहरेष्विंदोस्त्रिषुनस्यादथोद
ये ग्रस्तस्यशशिनःपूर्वदिनंसर्वंनभोजनं ग्रस्तयोश्चतयोरस्तेपरयोरपिनैवतत् निशादिवसयोस्तेनग्रस्तस्या
स्तमयेरवेः पुत्रवत्गृहिणोपिस्यादहोरात्रमभोजनं श्राद्धकर्तुश्चग्रहणेतस्मिन्नह्निनभोजनं बालवृद्धातुरा
णांतुपूर्वस्मिन्ग्रहभागतः दिवसेपंचधाभक्ते भागिभागद्वयेपिवा अभोजनंरवेर्ग्रासेग्रस्तस्यास्तेविधोरपि
परत्राह्नितथैवस्याद्रात्रिराद्यादिभागगे चंद्रग्रहेपूर्वमपिबालादीनामियंविधा पुत्रवद्गृहिभिन्नानामुपवासो

घनाशनः उपरागदिने प्रोक्तो विष्णुना यनेन पर्ववत् समर्थानां तु तस्मिंश्च पूर्वस्मिंश्च दिनद्वये आचाराद्यति रंगानां नि
त्यस्तास्मिंन्नदिने तु सा ग्रहकाले नु जोक्ता पूर्वोत्तरकालयोः निषिद्धयोस्तद्ध्वंसात् द्वेयं शांत्यादि वान्यत १७
इति ग्रहणकालतत्त्वविवेचनं अथ अहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतकइत्युक्तत्वात् प्रसंगादनध्याया उच्यंते
तत्रानध्याया द्विविधा पूजयेद् गोवस्त्रदानैः ब्राह्मणानपि शक्तितः गंधमाल्यैर्धूपदीपैः पूजयेदिष्टदेवतां होमं चा
पि न कुर्वीत तिलैर्व्याहृतिभिस्तथा निवृत्ते ग्रहणे सर्वं ब्राह्मणेभ्यो विशेषतः दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हि
तमिति ततो यस्य त्रिजन्मनक्षत्र इत्यादि अत्रैव नित्या नैमित्तिकाश्च तात्रनित्यास्तावत् हारीतः प्रतिपत्सु चतुर्दश्या
मष्टम्यां पर्वणोर्द्वयोः श्वोनध्याये च शर्वर्यां नाधीयीत कथंचनेति यत्तु पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके
ऋतुसंधिषु भुक्त्वा वा श्राद्धीकं प्रतिगृह्य चेति याज्ञवल्क्यीयः ऋतुसंधिगतास्वेव प्रतिपत्स्वध्ययननिषेधः स प्रत्य
वायातिशयार्थः न तु ग्रंथांतरगतस्य सामान्यनिषेधस्य तत्रैवोपसंहारः नाधीयीत नरो विद्वानादावंते च पक्षयोः
आदौ च हीयते बुद्धिरंते ब्रह्म प्रहीयत इति पक्षद्वये चतुर्दश्यामष्टमी द्वितये तथा पक्षादावपि पक्षांते ब्रह्म नाधी
यते नरैरिति जाबालिश्लोकगौतमवचनयोः सामान्यनिषेधस्य स्पष्टत्वात् नित्यत्वार्थो वा चैत्रश्रावणमार्गशी
र्षमासादिप्रतिपदो नित्या इति कल्पतरुब्रह्मचारिकांडधृतहारीतवचनात् आदिप्रतिपदः शुक्लप्रतिपदः एवं
च ऋतवोपि ऋतुसंवत्सराभिप्रायेण त्रय एव प्रतिपत्पाठशीलानां विद्येव तनुतां गतेत्यपि हेमाद्रिग्रंथ वशात् प्रामा
यणगतं वचनं तावन्मात्रपरमेव एवं राहुसूतकयुक्तपंचदशीनिषेधः प्रत्यवायातिशयार्थः तादृश प्रतिपन्नि
षेधस्तु तदर्थो नित्यत्वार्थो वा अत्र द्युनिशमिति प्रकृतत्वादहोरात्रं राहुसूतकेनध्याय उक्तः मनुना तु अहं न
कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतक इति अहमनध्याय उक्तः गौतमेनाकालिकनि[illegible]र्घातभूमिकंपराहुदर्शनो १९२
ल्काइत्याकालिकः तत्र अहं ग्रस्तास्तमय विषयमिति मिताक्षरा अन्यत्राहोरात्राकालिकयोर्विकल्पः उप्रा

379/1942

नाः अयने विषुवे चैव शयने बोधने तथा अनध्यायं प्रकुर्वीत मन्वादिषु युगादिष्विति नारदीयेपि अयने विषुवे चैव
शयने बोधने हरेः अनध्यायस्तु कर्तव्यो याश्च सोपपदास्तिथिरिति सोपपदाश्च तत्रैव दर्शिताः सिता ज्येष्ठे द्वितीया तु
आश्विने दशमी सिता चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृता इति अयनविषुवानध्याये विशेषः स्मृत्यंतरे
निशाद्वयं दिवारात्रौ संक्रमे वासरद्वयं अनध्यायं प्रकुर्वीत अयने विषुवे तथेति अयने विषुवे च यदनध्यायं कुर्वीत अ
ध्ययनं न कुर्वीत तद्दिवा तस्मिन् संक्रमे निशाद्वयं तद्दिनोभयपार्श्ववर्ति रात्रिद्वयं तच्च दिनं रात्रौ तस्मिंस्तादृशं वा वा
तां च रात्रिमित्यर्थः नृसिंहपुराणे महानवम्यां द्वादश्यां भरण्यामपि चैव हि तथाक्षयतृतीयायां शिष्यान्नाध्या
पयेद्बुधः माघमासे तु सप्तम्यां रथाख्यायां विवर्जयेत् अध्यापनमथाभ्यक्तः स्नानकाले च वर्जयेदिति म
हानवम्याश्विनशुक्लनवमी द्वादश्याषाढकार्तिकशुक्लपक्षगता श्रवणयुक्ता च भरणी महालयापरपक्षांतरगता
तदंर्गतमघाया अपीदमुपलक्षणं भाद्रपदे मघाभरण्योरनध्यायः शयनोत्थानयोश्च द्वादश्यो राषाढीकार्तिकीफा
ल्गुनीसमीपस्थद्वितीयायां चेति स्मृत्यंतरात् महाभरण्यां विप्रेंद्र श्रवणद्वादशीदिन इति नारदीयाच्च श्रवणद्वादशी
ग्रहणं अनुराधारेवतीयुक्ताषाढकार्तिकशुक्लद्वादश्योरप्युपलक्षणं आभाकासितपक्षेषु मैत्रश्रवणरेवती द्वा
दशीसंस्पृशेयुश्चेत्तत्रानध्ययनं भवेदिति कालादर्शोदाहृतसत्यव्रतवचनात् चातुर्मास्य द्वितीयासु वेदाध्यायं वि
वर्जयेदिति योगयाज्ञवल्क्योक्तद्वितीया अप्याषाढ्यादिसमीपस्था एव शुक्ला चावूर्जेतपस्ये च या द्वितीया विधुक्षये
चातुर्मास्यद्वितीयास्ताः प्रवदंति महर्षय इति गार्ग्यवचनात् बौधायनः महानिशा तु विज्ञेया मध्यमं ध्यमयामयोः
तस्यां स्नानं न कुर्वीत स्वाध्यायं पितृतर्पणमिति मध्यं द्वितीययामस्यांत्यो मुहूर्तस्तृतीयस्याद्य इति मुहूर्तद्वयं महा
निशा तु विज्ञेया चतस्रो घटिकास्तु याः इति तेनैवोक्तत्वात् गौतमः कार्तिकीफाल्गुन्याषाढी पौर्णमासीस्त्रोष्ट
कास्त्रिरात्रमिति पौर्णमासीविशेषनिषेधः प्रत्यवायातिशयार्थः तिस्र इत्युपलक्षणं येषां यावत्स्यस्तावत्योद्र

का०त
१९४

ष्टव्या त्रिरात्रंसप्तम्यादितिथित्रयं अष्टकातुसमाख्याता सप्तम्यादिदिनत्रयमितिब्रह्मांडपुराणात् मत्स्यपुराणे मेधा
कामस्त्रयोदश्यांचतुर्थ्यांचैवसर्वदा सप्तम्यांचप्रदोषेषुनस्मरेन्नचकीर्तयेदिति अत्रयद्यपित्रयोदश्यादियुक्तएवरात्रि
प्रथमयामात्मकप्रदोषेनध्यायः प्रतीयतेतथापि अर्धरात्रात्प्राक्त्रयोदशीसप्तम्योः प्रवेशेचतुर्थ्याश्चरात्रीनवना
डीमध्येप्रवेशेद्वादश्यादियुक्तेपितत्रानध्यायोज्ञेयः रात्रौयामद्वयादर्वाक्सप्तमीस्यात्त्रयोदशी रात्रौनवस्वनाडीषु
चतुर्थीयदिदृश्यते प्रदोषः सतुविज्ञेयः सर्वविद्याविगर्हितइतिगार्ग्यवचनात् एवंचषष्ठीचद्वादशीचैवअर्धरात्रो
ननाडिका प्रदोषेनत्वधीयीततृतीयानवनाडिकेतिब्रह्मांडवचनेपिनवनाडिकेत्यत्र जन्मपदानुषंगेणनवनामिको
नेतिद्रष्टव्यं अयंचपरिभाषिकः प्रदोषोर्धरात्रावर्धिस्तथैवाचारात् तत्रप्रथमयामएवाध्ययननिषेधोपिद्वितीय
यामेपिमहानिशात्वेनैवनिषेधसिद्धेश्च महानिशातुविज्ञेयामध्यमंप्रहरद्वयं मध्यद्वियामयोरात्रौनाधीयीत
कदाचनेतिवचनात् अतएवदक्षेणाप्युक्तं प्रदोषपश्चिमौयामौवेदाभ्यासरतोभवेत् यामद्वयंशयानस्तुब्रह्मभूयाय
कल्पतइति मध्यद्विमुहूर्तात्मिकमहानिशानिषेधस्तुप्रत्यवायातिशयार्थः यस्तु अध्यायानुपाकृत्यमासंप्रदोषेना
धीयीतेत्यापस्तंबीयः प्रदोषनिषेधस्तत्रनास्यपरिभाषिकस्यप्रदोषस्यग्रहणंप्रमाणाभावात्मासस्यात्यंतसंयो
गासंभवाच्चकिंतुप्राधीतस्यचनिशायांचतुर्मुहूर्तमितिगौतमोक्तस्य उपाकृत्याध्येतुप्रवृत्तःप्रधीतः यदानध्यायति
थिःखंडत्वाद्दिनद्वयेपिभवतितदासूर्योदयादुत्तरंसूर्यास्ताच्चपूर्वंकियत्सत्वेनध्यायोभवतीत्यपेक्षायां भविष्यपुरा
णे उदयेस्तमयेवापिमुहूर्तत्रयगामियत् तद्दिनंतदहोरात्रमनध्यायविदोविदुः केचिदाहुःक्वचिद्देशेयावत्तुदिनना
डिकाः तावदेवत्वनध्यायोनतन्मिश्रदिनात्परइति तन्मुहूर्तत्रयगामिदिनं तिथिर्यस्मिन्नहोरात्रेतदहोरात्रमित्यर्थः
दिनांतरेतिथ्यंतरे इदंचतिथेःसाम्ये अत्यंतवृद्धिक्षययोस्तुतत्रैवदिनांतैकमुहूर्तापियातिथिःक्षयगामिनीत्रिमुहूर्ता
धिकाप्याद्यायातिथिर्वृद्धिगामिनीति अत्यवृद्धिक्षययोश्च बोधायनः अद्यनध्ययनदिनमात्रापिस्वाध्यायदि १९४

381/1942

नेद्विमुहूर्तादुपरिदृश्यते निमित्तविषयोपिविशयस्तमनध्यायंप्राहुरिति प्रतिपल्लेशमात्रेणकलामात्रेणचाष्टमी दिनं
दूषयतेसर्वंसरागव्यघटंयथेत्यापिवचनंप्रवंति तथाव्यवहरंतिचकेचितल्लेशादिसत्वंचसूर्योदयोत्तरंनतुसूर्यास्ता
त्पूर्वंतथैवतेषामाचारात् अथनैमित्तिकाः तत्रतात्कालिकास्तावत् याज्ञवल्क्यः श्वक्रोष्टुगर्दभोलूकसामबाणार्त
निःस्वने अमेध्यशवशूद्रांत्यश्मशानपतितांतिके देशेशुचात्मनिविद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रे
निमालते पांसुप्रवर्षेदिक्दाहसंध्यानीहारभीतिषु धावतःपूतिगंधेचशिष्टेचगृहमागते खरोष्ट्रयानहस्त्यश्वनौवृ
क्षेरिणारोहिणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुरिति श्वादिग्रहणंवृकदंतिनोरुपलक्षणमुलूकग्रह
णंचकाकस्यश्वगर्दभनादाःशालावृकदंतिकाकोलूकशब्दाइत्यापस्तंबवचनात् शालावृकश्चैकस्तुकोलूकप्रोद्वाइ
त्युज्ज्वलायांपाठः सर्वत्रदीर्घत्वेनदृष्टोआद्यःखरोह्रस्वःप्रयुक्तः सलावृकीति लिंगंचाविवक्षितंएकस्तुएवचरः
सृगालइतिव्याख्यातं सामशब्देचश्रूयमाणेसत्ययजुषोरनध्यायः सामध्वनावृग्यजुषीनाधीयीतकदाचनेति
मनुवचनात् एवंमृगादिशब्देचसामवेदस्य शाखांतरध्वनौचसाम्नामित्यापस्तंबीयात् एवंसतिसृग्वेदोदेव
देवत्यायजुर्वेदस्तुमानुषः सामवेदःस्मृतःपित्र्यस्तस्मात्तस्याशुचिर्ध्वनिरितियन्मानवं स्मशानिकानांदेवानां
सामवेदेननित्यशः क्रियतेजननंयस्मात्तस्याशुचिर्ध्वनिरिति आंगिरसंचवेदत्वार्थवादमात्रं बाणोवंशः त
तद्ग्रहणंचवादित्रांतराणांनृत्यगीतयोश्चोपलक्षणं तथाबोधायनः नृत्यगीतवादित्ररुतशब्देषुतावंतंकालमि
ति तात्कालिकानध्यायानुवृत्तौ गौतमोपि वेणुवीणाभेरीमृदंगगर्दार्तशब्देष्विति गर्दःशकटं हरदत्तेनतुवीणा
भेरीमृदंगगर्तेतिपठितं आरोहतंवरुणमित्रगर्तमित्यादिदर्शनाच्चगर्तोरथोव्याख्यातः आर्तस्यदुःखितस्यनि
स्वनः आक्रोशोरोदनंच अमेध्यमानुष्यास्थिशवंविष्टारेतोमूत्रार्तवंवसा स्वेदोश्रुदूषिकाश्लेष्मामद्यंचमेध्यमु
च्यतइति देवलप्रतिपादितस्यांतिके अंतिकंचयावदमेध्यंदृष्टिपथमापद्यतेतावत् यूपांतिकवत् अमेध्यत्वं

का॰त॰ चेषांदेहच्युतानामेव मलत्वप्रयुक्तत्वातस्यतथात्वतानामेवचमलत्वात् देहाच्चैवमलाश्च्युताइतिवचनात् शवांत्यांतिके
१९५ अपिताहशैएव तथाचशवचांडालप्रक्रमेआपस्तंबः संदर्शनेचारण्यइति आरण्यपदंचग्रामांतसामायापूर्वमुक्तत्वा
त्ततदतिरिक्तमात्रोपलक्षणं श्मशानपूं शूद्रपतिताांतिकानिशम्याप्रासादर्वाक् श्मशानेसर्वतः शम्याप्रासात्श्मशा
नवत्शूद्रपतिताविति शूद्रायांतुप्रेक्षणप्रतिप्रेक्षणयोरेवेतिचापस्तंबीयात् शम्याक्षिप्ताद्यावतिदेशेपतितावान्
शम्याप्रासः शूद्रपतितयोः पक्षांतरमप्यंतिकस्यतेनैवोक्तंसमानागारइत्येकइति शवांत्यानांग्राममध्यावस्थानेपि
तात्कालंतत्ग्रामस्थानामध्यानेयः अतः शवमंतश्चांडालमित्यापस्तंबवचनात् अतएवांतः शवदिवाकीर्त्यशूद्र
संनिधानइतिगौतमसूत्रेप्यंतःशब्दस्यदिवाकीर्त्यपदेनाप्यन्वयोहरदत्तेनकृतः अंतश्चग्रामस्यैवग्राममध्यगतो
यावच्छवस्तिष्ठतिकर्हिचित् ग्रामस्यतावदाशौचंनिर्गतेशुचितामियादिति मिताक्षरोदाहृतवचनात् तेननगरादौ
नदोषः श्मशानाधिकरणकाध्ययननिषेधोपि श्मशानांतिकनिषेधाद्दंडापूपन्यायसिद्धो गौतमीयेस्पष्टः श्मशा
नग्रामांतमहापथाशौचेष्विति ग्रामांतोग्रामसीमातत्रचावस्थानेसर्वदानध्यायः शवसंनिधानेवा अभिनिर्हृ
तानांतुसीम्न्यनध्यायइत्यापस्तंबीयस्ययदातुशवाः सीम्न्यभिनिर्हृताभवंतितदातत्रानध्यायइतिव्याख्यानात्॥
आत्मनिचाशुचाविति कायस्थानोभयापनोद्यानां जननमरणादिनिमित्तकानां निर्हरणानुगमनादिनिमित्तकानां
चस्नानमात्रापनोद्यानांचचांडालादिस्पर्शनिमित्तानां मूत्रपुरीषोत्सर्गादिनिमित्तकानांचसर्वेषामाशौचानांसंग्रहः
तत्रसर्वत्रयावदाशौचमनध्यायः ब्रह्मचारिणस्तु आशौचाभावेपिसपिंडमरणेत्रिरात्रं तथाचत्र्यहानुवृत्तावा
पस्तंबः तथासंबंधेषु ज्ञातिष्विति संबद्धेषुसंनिकृष्टेषुभ्रात्रादिष्वपीतिहरदत्तः पित्रोराचार्यस्यचोपरमेत्र्य
हादशाहाशौचनिवृत्ताअपिअनध्यायोवचनाद्वादशाहं तथाचगौतमः मातरिपितर्याचार्यइतिद्वादशाहाद्द १९५
ति द्वादशरात्रंवामहागुरुषुदानाध्ययनेवर्जयेरन्नित्याश्वलायनसूत्रेप्येतएवमहागुरवः एवमन्येपिकात्या

383
1942

यनाश्वलायनादिसूत्रेष्वाशौचाभावेपिवाचनिकानिमित्तविशेषप्रयुक्ताअनध्यायाद्रष्टव्याः विद्युत्स्तनयित्नुसंप्लवे
च संप्लवोसकृदुपजननं एतयोश्चसंध्यातिरिक्तकालोपजातयोःप्रत्येकंतात्कालिकोनध्यायः वर्षस्याप्यत्रोपलक्षणं
प्रस्यंदिनीतिगौतमवचनेयावत्प्रकृष्टंस्यंदनंवर्षतावदनध्यायस्योक्तत्वात् संध्ययोश्चप्रत्येकोपजनेअपर्तावाकालिकः
सतौचसज्योतिः तथाचकालिकानुवृत्तौगौतमः स्तनयित्नुवर्षविद्युतश्चप्रादुष्कृताग्निषुत्र्यहसतावितिस्तनयि
त्नुर्मेघगर्जितं प्रादुष्कृतेष्वग्निषुसंध्ययोरित्यावत् परेद्युर्यावत्सएवकालस्तावत्काल अकालंतत्रभवआकालि
कः सतौवर्षतौप्रातःसंध्यायांचेदेतौतदाहर्मात्रं सायंसंध्यायांचेद्रात्रिमात्रमित्यर्थसिद्धं मनोरपिविद्युत्स्तनितव
र्षेषुमहोल्कानांचसंप्लवे आकालिकमनध्यायमेतेषुमनुरब्रवीत् एतांस्त्वभ्युदितान्विद्याद्यदाप्रादुष्कृताग्निष्विति
प्रादुष्कृतेष्वग्निषुतुविद्युत्स्तनितसंप्लवे सज्योतिःस्यादनध्यायइतिवचनंद्वयमपर्तुविषयमेव हारीतेनत्वपर्तावपि
सायंसंध्यास्तनितेरात्रिरेवानध्यायउक्तः सायंसंध्यास्तनितेरात्रिं प्रातःसंध्यायामहोरात्रमिति याज्ञवल्क्यो
क्तमपिसंध्यागर्जितेद्युनिशानध्यायानामभिधानं प्रातःसंध्यापर्तुविषयमेव त्रयमेलकेत्वपर्तौ असंध्यायामपि
त्र्यहं तथाचापस्तंबः विद्युत्स्तनयित्नुवृष्टिश्चापर्तौयत्रसंनिपतेयुस्त्र्यहमनध्यायोयावद्भूमिर्व्युदकेत्येकइति
त्रिरात्रानुवृत्तौसर्ववर्षविद्युत्स्तनयित्नुसंनिपातइतिगौतमवचनमप्येतद्विषयमेव सतौतुत्रयमेलकेपिसंध्याति
रिक्तेतत्कालमेव तथाचरत्नावल्यां अनुराधर्क्षमारभ्यषोडशर्क्षेषुभास्करः यावच्चरतिचैतावदकालंमुनयोविदुः
विद्युद्गर्जितवृष्टीनांसंनिपातोयदाभवेत् सकालवृष्टौतत्कालमकालेतुत्रिरात्रकं अतिमात्राथवावृष्टिर्नाधीयी
तदिनत्रयं द्वयोस्तुद्विदिनंप्रोक्तंवृष्टिमात्रेदिनंस्मृतं अतिवर्षेत्रिरात्रंस्यादल्पवर्षेतुवासरं यदिवर्षेदनध्यायेत
नेवसहगच्छतीति अर्धरात्रेमध्यमप्रहरद्वयेष्टमुहूर्तेवा अतिमारुतश्चापस्तंबोक्तः वायुर्घोषवान् भूमौनात
णसंवाहोवर्षतिवायत्रधाराःप्रवहेदितिघोषवान् कर्णश्रवणशब्दवान् तृणानिसंवाहयन्नुत्क्षिप्यगमयतीति

का०त०
१९६

तृणसंवाहः तृणग्रहणं पांसूनामप्युपलक्षणं प्रवहेद्विक्षिपेत् तस्यव्यवस्थामाह मनुः कर्णश्रावेनिले रात्रौ दिवापांसुसमू
हनमिति गोतमोपि नाधीयीत वायौ दिवा पांसुहरे कर्णश्राविणि नक्तमिति स ध्मयोः धानवोध्येतुः पूतिगंधे दुर्गंधे उ
पलभ्यमाने शिष्टे गृहमागते तदनुज्ञावधिरनध्यायः तथा चापस्तंबः श्रोत्रियाभ्यागमे धिजिगांसमानो धीयानो वा
नुज्ञाप्याधीयीतेति इदं च समानग्रामिणीषु ग्रामांतरादागतेषु तु तदहः कृत्स्नमनध्यायः तथा चापस्तंबस्तदहरागतेषु
च ग्राममिति बाह्येषु निषादादिषु ग्राममागतेषु तन्मध्यावस्थितेषु तदहरनध्याय इत्युक्तातदनुषंगेणाह अपि सति
ति यानं रथादि तत्र पृथक् नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनं न नावं न खरं नोष्ट्रं नेरिणस्थो न यानग इति मनु
वचनात् सप्तत्रिंशद्वचनं च स्वानुक्रमणाभिप्रायेण न तु परिसंख्यार्थं तेन शयानः प्रौढपादश्च कृत्वा चैवावसक्थि
कां नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च न विवादे न कलहे न सेनायां न संगरे न भुक्तमात्रे नाजीर्णे न वमित्वा
न सूतके अतिथिं चाननुज्ञाप्य मारुते चाति वायति शस्त्रेण च क्षतगात्रे रुधिरे च परिस्रुते सर्वकुत्सितगंधे च पारि
स्रावस्के च भास्वतः अभ्यंगस्नानकाले च महाविगीति कंपने गोविप्ररोधने चैव श्वखरोष्ट्रेषु पंक्तिषु शाल्मलस्य मधूक
स्य कोविदारकपित्थयोः श्लेष्मातकस्य छायायां चेत्तितात्कालिकान्विदुः वसित्वा मैथुनं वासः शक्रके चोद्धार इत्या
दयोन्येपि मन्वायुक्ता द्रष्टव्याः पंक्तिः श्वादीनामिव संनिधानात् प्रौढपादः एकपादारोपितद्वितीयपादः प्रसारि
तपादो वा अवसक्थिका वस्त्रादिना कटिसक्थ्यवबंधः अथाकालिकादयो नैमित्तिकाः तत्राकालिकमन
ध्यायं विद्यात्सर्वाद्भुतेषु चेति मनुवचनात्सर्वोत्पातेष्वाकालिकोनध्यायः एवं च महोल्कानां च संप्लवे निर्घाते भू
मिचलने ज्योतिषां चोपसर्जने एतानाकालिकान्विद्यादनध्यायानृतावपि आकालिकानिर्घाता भूमिकंपरा
हुदर्शनोल्काः दिग्दाह पर्वतपातेश्च पलरुधिरपांसुवर्षेष्वाकालिकं सूर्याचंद्रमसोर्ग्रहणे भूमिप्रचले पस्वान
उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालिकमित्यादीनि मनुगोतमवसिष्ठापस्तंबादिव १९६

385/1942

चनानि प्रपंचार्थानि ज्योतिषां सूर्यचंद्रगुरुशुक्राणामुपसर्जनं परिवेषः तथा चैं गोतमः आचार्यपरिवेषणे ज्योति
षोश्चेति आचार्यैर्दिवंदैवत्यानां गुरुशुक्रौ ज्योतिषोः प्रसिद्धयोः सूर्यचंद्रयोः यत्तु संदंशादेतस्मात्कालिकं
गोतमीयात्स्मृती यतेपांसुवर्षे दिशां दाहे गोमायुविरुते तथा श्वखरोष्ट्रे च रुवति पंक्तौ च न पठेद्द्विज इति मनुव
चनात्सांसु प्रवर्षे दिग्दाहे इति योगीश्वरवचनाच्च पांसुवर्षदिग्दाहयोस्तदल्पविषयं द्रष्टव्यं ज्योतिषां ग्रहणा
मुपसर्जनं युक्तमित्यपि केचित् यत्तु पैठीनसिना एकादशाहिमुल्कारात्राविंद्रधनुर्दृष्ट्वा वज्रपतनादाचार्य
मरणात्सूर्याचंद्रमसोरुपप्लवात्केतुदर्शननिर्घातभूमिचलनादिकेकस्मिंस्त्रिरात्रमिति वृद्धमनुना च शक्रध्वज
निपाते च उल्कापाते तथैव च अनध्यायस्त्रिरात्रं स्याद्भूमिकंपे तथैव चेति केषुचिदुत्पातेषु त्रिरात्रमुक्तं तदाध्या
ध्ययनविषयं द्रष्टव्यं उल्कायां तु विद्युत्सहभावे उल्काविद्युत्समासे त्रिरात्रमिति स्मृत्यंतरात् याज्ञवल्क्यः त्र्यहं
प्रेते घनध्यायः शिष्यर्त्विग्गुरुबंधुषु उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते संध्यागर्जननिर्घातभूकंपोल्का
निपातने समाप्य वेदं द्युनिशमारण्यकमधीत्य च पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ऋतुसंधिषु भुक्त्वा
च श्राद्धिकं प्रतिगृह्य च पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रय इति गु
रुराचार्यः गुरोश्चासपिंड इति आश्वलायनसूत्रात् बंधवः आत्मबंधवो मातृबंधवश्च उपाकर्मणि त्रिरात्रं मनु
गोतमापस्तंबादिभिरप्युक्तमेव उत्सर्जने तु मनुना पक्षिण्यहोरात्रे अप्युक्ते यथाशास्त्रं तु कृत्वैवमुत्सर्गं वदसां ब
हिः विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्निशमिति तत्र त्रिरात्रमाद्याध्ययने पक्षिण्यहोरात्रे तु धारणाध्ययने वि
कल्पिते श्रोत्रिये समानग्रामीणे एकाहं सब्रह्मचारिणि समानग्रामीणे च श्रोत्रिय इत्याश्वलायनीयं सुपरशा
खीयश्रोत्रियविषयं द्युनिशमहोरात्रं पुष्पनिहितचंचरीके द्युरामिवद्धाव पापित्त इति विश्वप्रकाशात् द्यु

का०त०
१९७

शवस्याहर्वाचित्वात् श्राद्धिकं प्रेतश्राद्धव्यतिरिक्तेषु पित्राद्युद्देशेन त्यक्तमन्नं प्रेतश्राद्धे तु त्रिरात्रं तथा च मनुः प्रतिगृह्य
द्विजोविद्वानेकोद्दिष्टस्य केतनं त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके इति तत्रैक पक्षांतरमप्युक्तं मनुना यावदेकानुदि
ष्टस्य गंधोलेपश्च तिष्ठति विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेदिति अत्रापि पूर्वावधिर्निमंत्रणापरपर्याय केतनप्रति
ग्रह एव यच्च गोतमेन प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्याय इति वदता त्र्यपरभागे त्रविषये ध्ययनमभ्यनुज्ञातं त
त्रायस्तस्मिन्काले तत्कृतगंधलेपक्षयात् न च श्राद्धभोजने त्वन्नजरणपर्यंतमिति हेमाद्रौ स्मृत्यंतरं ग्रहणत्र्यहस्यवि
षयोग्रस्तास्तमय उक्तः प्रतिगृह्य यत्किंचित् श्राद्धिकं तथा च श्राद्धिकं प्रतिगृह्य चेत्युक्त्वा मनुः प्राणिवा यदि वाप्राणि
यत्किंचित् श्राद्धिकं भवेत् तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृत इति गोतमेनाप्युक्तं मनुष्यान्नश्राद्धिक
संयोगेपीति आकालिकमित्यनुवर्तते आकालिकत्वं च निमंत्रणकालादारभ्य तेन योगीश्वरवचनाविरोधः यत्तु श्वा
द्विनामाकालिकमिति पूर्वसूत्रं तच्छ्राद्धकर्तृविषयतया हरदत्तेन व्याख्यातं विवाहोपनयनाद्युत्सवेष्वपि भोजनाद्दूर्ध्व
मनध्यायो गोतमेनोक्तः ऊर्ध्वं भोजनादुत्सव इति हेमाद्र्युदाहृतस्मृत्यंतरे तु यावदुत्सवाद्यनध्याय उक्तः शोभनगृहे
शोभनदिवसे चानध्यायः उक्तः विवाहमौंजीबंधनप्रतिष्ठोद्यापनादिषु सपिंडसगोत्राणां च यद्वित्वानुरोधात्तद्दर्शि
नामाचार्याणां चेति पशवो गजव्याघ्राजशशव्यतिरिक्ता गोमहिष्यश्वादयः गजव्याघ्राभ्यां त्वंतराये वर्षं अजशशा
भ्यां श्वपाके श्वतदर्धं तथा च कालादर्शे हारीतः गजव्याघ्रांतराये वर्षमनध्यायः स्यादिति तत्रैव श्लोके गोतमः
गुर्वंतेवासिनां वेदमध्येतृणां च मध्यतः अयुः शशाश्वपाकाजा नाधीयीतार्धवत्समिति अरण्यसूकरस्य त्र्य
हं ग्राम्यसूकरस्याहरित्यपि हारीतवचनं तत्रैव श्वमार्जारादीनां पशुत्वादेव प्राप्तौ पुनरुपादानात्पशुशब्दः
स्थूलपशुपरः तेन पुनरुपात्तव्यतिरिक्तसूक्ष्मपशुव्यवायेनानध्यायः एवं विहंगमैर्विडराह ग्रामांस्य भवरासभैः
रुतंतरायेनध्यायमहोरात्रं प्रचक्षत इति विश्वामित्रवचने पक्षिग्रहणादेव सिद्धौ क्वचिदन्यत्र काकोलूकादिग्र १९७

387
1942

हणात् स्थूलत्वग्रहं सादिपरता पक्षिग्रहणस्य तेन क्षुद्रचटकपतंगादिव्यवायेनानध्यायः श्वपाकरजकाद्यंत्यजांतरागमन
एवानध्यायस्मरणान्मनुष्यमात्रांतरागमनेनानध्यायाचारिमूलं मृग्यं अंतरागमनध्यायोत्तरं च प्राथमिकवेदाध्ययनोपक्रमे
यथोपसदनं शिष्यैः कृतं तथा पुनरुपसदनं कृत्वाध्येतव्यं अंतरागमने पुनरुपसदनमिति गोतमवचनात् उपसदनं च
पाणिना सव्यमुपसंगृह्यैत्याधिकारो न्यत्रापीत्येवमंतैः सूत्रैर्विहितायां दक्षिणेन स्वपाणिना गुरोः सव्यमनगुष्ठं पाणिमुप
संगृह्याधीहि भो इत्यामंत्रणं गर्वेकाग्रचक्षुर्मनस्त्वं दर्भैः शिर्षण्यप्राणोपस्पर्शनं पंचदशमात्रास्त्रयः प्राणायामाः अ
ध्ययनाद्यंतयोर्गुरोः पादोपसंग्रहणं गुर्वनुज्ञातस्य प्राङ्मुखस्योदङ्मुखस्य वा गुरोर्दक्षिणतः प्रागग्रेषु दर्भेषूपवेशनं भूर्भु
वः स्वः पुरुषः सव्यामिति पंचव्याहृतीनां प्रत्येकं प्रणवपूर्वाणां सावित्र्याः प्रणवस्य वोच्चारणमित्येषां कर्मकलापः प्रत्य
हं तु तत्र चक्षुर्मनस्त्वं गुरोः पादोपसंग्रहमनुज्ञातोपवेशनमोंकारश्चेत्येतावदेव यच्च गोतमेन श्वनकुलसर्पमंडूकमा
र्जाराणां त्र्यहमुपवासो विप्रवासश्च प्राणायामा घृतप्राशनं चेतरेषामिति श्वाद्यंतरागमने शूद्रस्य त्र्यहमुपवासः श्वा
दिभिन्नानां तस्मिन् घृतप्राशनेन साकं त्रयश्च प्राणायामाः त्र्यहं च गुरोः सकाशाद्धि प्रवासो न ध्ययमुभयत्रापीत्युक्तं
तत्त्र्यहणाध्ययनविषयं मनुयोगीश्वराद्युक्तं तु अहोरात्राध्ययनमात्रं धारणाध्ययनविषयं शक्रध्वजस्य पातेपा
तनादिने उच्छ्रयतस्येवोच्छ्रयदिने तयोर्दिनं देवीपुराणे प्रोष्ठपदे तु अष्टम्यां शुक्लायां शोभनर्क्षके आश्विने वाथ शु
क्लायां श्रावणे वा समुच्छ्रयेत् विहितीत्थानः केतुस्तिष्ठति दिवसाष्टकं यावत् जातेपाते कुर्यादुत्थाने याद्दशी पूजेति
विष्णुधर्मोत्तरे त्वन्यथोक्तं प्रोष्ठपदे सिते पक्षे द्व्युपक्रम्य पौरैरनुगतो राजा स्ववेषैः फलपाणिभिः अष्टम्यां वाथ घोषे
ण तां तु यष्टिं प्रवेशयेत् द्वादश्यां तु शिरस्स्नातो नृपतिः प्रयतस्ततः यत्रेणोत्थापनं कुर्याच्छक्रकेतोः समाहितः प्रय
तः पूजयेद्धाम तदादिन चतुष्टयं पंचमे दिवसे प्राप्ते शक्रकेतुं विसर्जयेदिति एवमन्येप्यनध्यायाः स्मृत्यंतरेभ्यो वगं
तव्याः तदुक्तं गोतमेन प्रतिविद्यं च यत्स्मरंतीति आपस्तंबेनापि यथोक्तमन्यदतः परिषत्स्विति परिषत्क्रमानवादि

का०त०
१९८

धर्मशास्त्रेषु अत्रकेषुचिदनध्यायेषु मनसापिन चिंतयेन्न स्मरेन्नापि कीर्तयेदित्युक्तत्वादन्यत्र मनसाचिंतनेनदोषः
तथाचबौधायनः अन्येषुचाद्भुतोत्पातेष्वनध्यायोन्यत्रमानसात्मानसोपि जननमरणयोः उदके मध्यरात्रे च विण्मूत्रप
रिवर्जने उच्छिष्टश्राद्धभुक्तौचमनसापिनचिंतयेदितियत्तु गोतमीये मनसा चानध्यायइति अनध्यायेषु मनसाध्यय
नविधानं तस्यापि च विद्युत्तिचाभ्यग्रायां स्तनयित्नावप्रायत्ये प्रेतात्रेनीहारे च मानसं परिचक्षते श्राद्धभोजन एवं
कइति केषुचिदनध्यायेषु वर्जनं तान्नित्यप्रश्नाख्यब्रह्मयज्ञाध्ययनविषयं तस्यैव तस्य विधिरकृत प्रातराश उदकांतं
गत्वा प्रयतः शुचौदेशेधीयीतयथाध्यायमुत्सृजन्वा चेति पूर्वसूत्रे उपक्रमात् कमादिवाकृतप्रातराशत्वे सिद्धे पुन
स्तद्ग्रहणात्प्रमादेन ब्रह्मयज्ञमकृत्वा प्रातराशेकृते प्रायश्चित्तमेव नपुनः सकार्यइति सूच्यते एते च सर्वे नध्या
यामेधाविनां दुर्मेधसां विषयेतु हेमाद्र्युदाहृतंस्मृत्यंतरं चतुर्दश्यामष्टमीपर्वप्रतिपत्स्वेव सर्वदा दुर्मेधानामन
ध्यायस्त्वंतरागमनेषु च तत्रविस्मृतिशीलानां बहुवेदप्रपाठिनां चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषु च वेदांगन्या
यमीमांसाधर्मशास्त्राणि वाभ्यसेदिति एते चानध्याया वेदस्यैव धारणग्रहणाध्ययनयोरेव नत्वंगाध्ययने
वेदस्यापि ब्रह्मयज्ञे कर्मोपयोगिनि चोच्चारणे तथाच मनुः वेदोपकरणे चैव स्वाध्याये चैव नैत्यके नानुरोधो
स्त्यनध्याये होममंत्रेषु चैव हीति वेदोपकरणान्यंगानि होमग्रहणं च कर्ममात्रोपलक्षणं तथाच शौनकः नित्यज
पे च काम्ये च क्रतौ पारायणेपि च नानध्यायोस्ति वेदानां ग्रहणे ग्राहणे स्मृतइति अंगग्रहणमपि वेदातिरिक्त
वि[illegible]द्यास्थानोपलक्षणं तथा कूर्मे अनध्यायस्तु नांगेषु नेतिहासपुराणयोः न धर्मशास्त्रेष्वन्येषु पर्वस्येतानि
वर्जयेदिति काम्ये च प्रारब्धे च प्रणवव्याहृतीनां च सावित्र्याः शिरसस्तथा नित्यनैमित्तिके कार्ये व्रते यज्ञे क्र
तौ तथा प्रवृत्ते काम्यकार्ये च नानध्यायः स्मृतस्तथा देवतार्चनमंत्राणां नानध्यायः स्मृतस्तदा नानध्यायेज
पे हेदान् रुद्रांश्चैव विशेषतः पौरुषं पावमानं च गृहीतनियमादृतेइति पर्वस्विति बहुवचनादष्टमी चतुर्दशी १९८

389/1942

प्रतिपदामपि ग्रहणं पूर्वोदाहृतस्मृत्यंतरात् सूर्याचंद्रमसोग्रहणइत्यादि पूर्वोदाहृतापस्तंबवचनाच्च तद्वचनोपात्तग्र
हणादिष्वपि सर्वविद्यानामनध्यायः ब्रह्मयज्ञस्य तु द्वावेवानध्यायो यदाहाश्वलायनः तस्य द्वावनध्यायो यदात्मा
शुचिर्यद्देशइति मनुरपि द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजइ
ति क्वचिच्चानवरतविद्युदादिष्वापस्तंबवचनादस्यापि तात्कालिकोनध्याय उक्तः अनध्यायाध्ययने निष्टमहावि
ष्णुः यस्मादनध्यायाधीतौ वेदो नामुत्र फलदस्तत्राध्ययनेनायुषः परिक्षयो गुरुशिष्ययोश्च तस्मादनध्यायान्वर्ज
येदिति चतुर्दश्यष्टमीदर्शपौर्णमासीषु सर्वदा प्रतिपत्स्वपि सर्वासु चैत्रमार्गनभःकृष्णा १ शुक्लास्तास्वेव वा
नित्यं मन्वादिषु युगादिषु चातुर्मास्यद्वितीयासु तथा सोपपदास्वपि २ वेदानां ग्रहणं दानं धारणं न समाचरेत् वैशा
खे कार्तिके शुक्ला तृतीया नवमी तथा ३ भाद्रे त्रयोदशी कृष्णा माघे पंचदशी सिता कृष्णा चैव युगाद्यश्च तथा मन्वं
तरादयः ४ आश्विने कार्तिके शुक्ला नवमी द्वादशी सिता माघे तृतीया भाद्रे फाल्गुनस्यांतिमा तिथिः ५ शुक्ला मा
घे शुचौ पौषे सप्तमी दशमी भवः चैत्रफाल्गुनशुक्लोर्जगता पंचदशी सिता ६ श्रावणे चाष्टमी कृष्णा तथाषाढपू
र्णिमा ज्येष्ठे तथाश्विने शुक्ला द्वितीया दशमी सिते ७ माघे चतुर्थी द्वादश्या वेताः सोपपदा मताः चातुर्मास्यद्वि
तीयास्तु कार्तिके फाल्गुने शुचौ ८ द्वितीयापौर्णमासीभ्य उत्तरास्तिथयो मताः आषाढभाद्रोर्जगासु सितासु
द्वादशीषु च ९ केवलास्वनुराधादितारात्रययुतासु च आदित्यास्तमयादूर्ध्वमर्धरात्रात्त्रयोदशी सप्तमी च च
तुर्थी च नवनाडीषु चेद्दिशेत् तत्र किंचन नाध्येयं प्रदोषे पारिभाषिके ११ मुहूर्तयोर्यामयोर्वा रात्रिमध्यगतं हि कं
महानिशाख्यं तत्रापि यदा चोत्तरभाव्यहः १२ अनध्यायो भवेत्तत्र पूर्वर्धसंनिशास्वपि अनध्यायतिथेः खंड
भावे चोदयतो रवेः १३ ऊर्ध्वपूर्वं वास्तमयान्मुहूर्तानां त्रयं द्वयं मुहूर्तं चानुवर्तिन्या तिथ्या युक्तं तु तद्दिनं १४
कृत्स्नं भवेदनध्यायः साम्यात्स्वातिक्षयादिषु श्वक्रोष्टृगर्दभरुककाकोलूकार्तनिःस्वने १५ वादित्रगीतन

का॰ त॰
१९९

सानांरथशब्देषुसामस्क श्रूयमाणेचितरयोस्तयोश्चापिससोमस्क १६ अमेध्यशवशूद्रांत्यश्मशानपतितांतिके अ
शुचीनां चसर्वस्मिन्नाशौचे ब्रह्मचारिणां १७ तदभावेपिचमहागुर्वादिमरणादिषु द्वादशीहत्र्यहद्व्यहरित्यादिवच
नोदिते १८ कालेनध्ययनंज्ञेयंदेशेचाशुचिदूषिते विद्युत्स्तनितवर्षाणामेकैकस्यापिलंप्लवे १९ संध्याद्यका
लेसंजातेतत्कालेध्ययनंनहि संध्ययोरनृतौतस्मिन्नाकालिकमृतोदिने २० दिनेरात्रौतुरात्रौस्यात्त्रयाणां
संनिपातके यदाकदाचित्संजातेत्र्यहंकालेतुपूर्ववत् २१ प्रातराकालिकंसायमुदयादतिमारुते कर्णश्राविणि
रात्रौस्याद्दिवापांसुसमूहने २२ संध्ययोर्धातवःपूतिगंधेशिष्टेगृहागते संग्रामेतदनुज्ञानंग्रामांतरगतेखहः २३
खरोष्ट्राश्वेरिणगजवृक्षनौयानरोहिणे शयानःप्रौढपादश्च भीतःकृत्वावसक्थिकः २४ भुक्त्वार्द्रपाणिर्जग्ध्वा
चसूतकान्नंतथामिषं नीहारेबाणशब्देचवाक्शस्त्रकलहेतथा २५ वांतेजीर्णप्रहाणेरे रुधिरेचपरिस्रुते
शाल्मलस्यमधूकस्यकोविदारकपित्थयोः २६ श्लेष्मांतकस्यछायायां गोविप्रायवरोधने खादिपंक्त्यावथोक्षा
रे शुक्रेमैथुनवाससः २७ परिधानेचतत्कालं नाधीयीतेवमादिषु निर्घातभूमिकंपोल्कागिरिप्रपतनादिषु
२८ सर्वोत्पातेष्वनध्याय आकालिकउदाहृतः त्रिरात्रंकेषुचिद्यस्तु तदाद्याधीतिगोचरं २९ उल्कापातेतुत
ड्विद्युत्सहभावनिबंधनं तात्कालिकंयदिग्दाहपांसुवृष्ट्यादिषूदितं ३० तदल्पाविषयंज्ञेयमुपाकर्मणिचत्र्य
हं उत्सर्जनेतुग्रहणेन्यत्रपक्षिण्यहश्चवा ३१ मंत्रब्राह्मणयोरेकं समाप्यारण्यकेतथा अधीत्यतस्मिन्नहनि
नाध्येतव्यंततःपरं ३२ ग्रस्तास्तेसूर्यशशिनोर्ग्रासेसकलयोरपि त्र्यहमन्यत्रतदहराकलिकमथापिवा ३३
प्रेतश्राद्धिकमन्नाद्यं भुक्त्वातत्प्रतिगृह्यवा त्र्यहंभवेदनध्यायोयद्वान्नजरणावधि ३४ तद्गंधलेपयोर्देहय
द्यावत्स्थितिर्भवेत् अन्यश्राद्धेष्वहोरात्रंयत्किंचित्प्रतिगृह्यच ३५ अल्पोत्सवेभुजेरूर्ध्वमुत्सवांतंमहत्सु
च अध्वरोपनयोद्वाहप्रतिष्ठोद्यापनादिषु ३६ व्याघ्रेभाभ्यामंतरायेश्वपाकाजशशैस्तथा क्रमार्द्धर्षंतदर्ध १९९

391/1942

चत्रिरात्रंवनसूकरैः विड्वराहखरोष्ट्रादिश्वादिमार्जारमूषकैः नकुलोलूककाकगृध्रहंसादिपक्षिभिः ३८ कृतेंतराये
होरात्रं प्रथमाध्ययनेत्र्यहं इंद्रध्वजस्योच्छ्रयणपाताहोरात्रयोस्तथा ३९ एवमन्येप्यनध्यायाःसर्वेमेधाविनांमताः इ
र्मेधानांभूरिवेदाध्येतॄणांत्वांतरागमे ४० चतुर्दश्यष्टमीपर्वप्रतिपत्स्विवसर्वदा एतेष्वेवचसर्वेषुमेधावीनाभ्यसेत्ख
लु ४१ वेदान्यविद्यास्थानानिदुर्मेधादर्शएवतु कर्मांगमंत्रवचनेजपपारायणादिषु ४२ ब्रह्मयज्ञेतुनैतेस्युर्गृ
हीतानियमेपिच देशेशुचावात्मनिचब्रह्मयज्ञोपिनैवहि अनध्यायेप्यध्ययने विघ्नोनिर्वार्यतात्थेति संक्षेपः ४३
इत्यनध्यायनिर्णयः अथमासतत्त्वविवेचनं तत्रमासोदिवससंघातात्मकत्वाद्दिवसस्यचचांद्रसौरसावनना
क्षत्रभेदेनचतुर्विधत्वाच्चतुर्विधः दिवसचातुर्विध्यंचोक्तं विष्णुधर्मोत्तरे तिथिनैकेनदिवसश्चांद्रेमानेप्रकीर्तितः
१अहोरात्रेणचैकेनसावनोदिवसस्मृतः आदित्यभागभोगेनसौरोदिवसउच्यते चंद्रनक्षत्रभोगेननाक्षत्रोदि
वसःस्मृतइति तिथिभागयोर्लक्षणंचतत्रैव चंद्रार्कगत्याकालस्यपरिच्छेदोयदाभवेत् तदातयोःप्रवक्ष्यामि
गमिमाश्रित्यभार्गव भगणेनसमग्रेणज्ञेयाद्वादशराशयः त्रिंशांशश्चतथाराशेर्भागइत्यभिधीयते आदि
त्याद्विप्रकृष्टस्तु भागद्वादशकंयदा चंद्रमाःस्यात्तदासमतिथिरित्यभिधीयतइति मासचातुर्विध्यमपितत्रै
वोक्तं चंद्रमाःपौर्णमास्यंतेभास्करादतिरिच्यते राशिषट्कंतदारामभासार्धेननसंशयः भागद्वाशकैनैवतिथ्यां
तिथ्यांक्रमेणतु चंद्रमाःकृष्णपक्षांते सूर्येणसहयुज्यते संनिकर्षादथारभ्यासंनिकर्षमथापरं चंद्रार्कयोर्बु
धैर्मासश्चांद्रइत्यभिधीयते सावनेतुतथामासेत्रिंशत्सूर्योदयाःस्मृताः आदित्यराशिभोगेनसौरोमासःप्रकीर्ति
तः सर्वर्क्षपरिवर्तैस्तु नाक्षत्रोमासउच्यतेइति आरभ्येत्याङ् समाधनार्थकमवधौ उत्तरश्चाङभिविधौ एवं
दर्शाद्दर्शश्चांद्रइतिज्योतिःपितामहवचनेपिपंचमीनिमित्तभूतंलुप्तल्यबंतमारभ्येतितथैतेनपूर्वदर्शावधिकः
शुक्लप्रतिपदारंभइतियावत् उत्तरदर्शावसानश्चांद्रोमासइत्युक्तंभवति तेनचांद्रशुक्लादिदर्शांतइतिब्रह्मसि

का०त० द्धांतवचनेसकललोकप्रसिध्याचाविरोधः सूर्योदयाः सूर्योदयरूपपूर्वोत्तरावध्युपलक्षिताः सावनादिवसाः तेनसावन
त्रिंशतादिनैरितिब्रह्मसिद्धांतेदिनानिसावनान्येव त्रिंशद्दिवसस्तु सावनोमासइतिपितामहवचने दिवसा अपि त
२०० था एतादृशाद्दोरात्रपरदिनादिशब्दप्रयोगदर्शनादेवकेषांचिद्भूमोयत्तेहोरात्रवचनाएवेति सर्वर्क्षपरिवर्तैश्चंद्रस्ये
तिशेषः चतुर्विधस्यापिमासस्यदिनसंख्यातत्रैवोक्ता मानेमासस्तुनाक्षत्रेसप्तविंशतिभिर्दिनैः परिशेषेषुमा
नेषुमासस्त्रिंशद्दिनस्मृतः अत्रसर्वत्रदिनानितत्तन्मानकान्येव चांद्रस्तुमासोद्विविधः प्रतीयते शुक्लप्रतिपदादि
दर्शांतः पूर्वोक्तः कृष्णप्रतिपदादिः पौर्णमास्यांतश्च अमावास्यया हिमासान्संपश्यंति पौर्णमास्याहिमासा
न्संपश्यंतीतिश्रुतेः यस्मिन्मासेदिनेयस्मिन्वियत्तिरूपजायते पर्वांतः सतुविज्ञेयोमासोनैमित्तिकंप्रति ज्यो
तिर्गाग्यवचनगतसामान्योक्तेरपि पूर्णोमासोस्मिन्निति पूर्णमासइति व्याकरणेव्युत्पत्त्यभिधानादपिपौर्णमा
स्यंतप्रतीतिः अतएवत्रिकांडमंडनेनापिदेशभेदव्यवस्थितंचांद्रमासद्वयमुक्तं चांद्रोपिशुक्लपक्षादिः कृष्णा
दिर्वेतिचद्विधा कृष्णमासादिकंमासंनांगीकुर्वंतिकेचन येपीच्छंतिनतेषामपीष्टो विंध्यस्यदक्षिणइति
अतएवकृष्णपक्षगतेषुजन्माष्टमीमहालयादिषुग्रंथभेदेनश्रावणभाद्रपदाश्विनादिगतत्वेन द्विधाव्यवहा
रोपिदृश्यते एवंसत्यपियत्सर्वेषुचांद्रमासलक्षणे शुक्लप्रतिप्रतिपदादिदर्शांतत्वाभिधानं तस्यैवमुख्यचां
द्रत्वमितिदर्शयितुं तथाहि मासशब्दः चातुर्विध्याभिधानस्वरसात्सर्वानुगतैकप्रवृत्तिनिमित्तासंभवेप्यने
कार्थत्वकल्पनयात्रिंशद्गुणितषष्टिनाड्यवच्छिन्नकालरूपत्वेनोगत्सर्गतः सर्वत्रानुस्यूतेनैकेन निमित्तेन
वाजीमूतवाहनोक्तेनचतुर्ष्वपिसौरचांद्रयोरेवान्यतरत्रवा भवतुनाममुख्यः चांद्रमासत्वंतुपंचदशचंद्रक
लावृद्धिक्षयपरिच्छेदपर्याप्तिलक्षणचंद्रसंबंधरूपत्वादेकमेव द्वयोरपिचंद्रयोर्मुख्यंसंभवति पौर्वापर्यमा २००
त्रंतुवृद्धिक्षययोर्भिद्यते अतएवान्यतरपक्षगतायां कांचित्तिथिमारभ्यतत्पक्षगततत्तिथ्यवधिकत्रिंश

393
194

त्तिथिसमुदायात्मकोयश्चांद्रोमासोमासिकपयोयावकव्रतादिशास्त्रीयकर्मसुलोकव्यवहारेचप्रसिद्धस्तत्राप्या
दौकासांचित्वृद्धिस्ततःपंचदशानांक्षयस्ततः पुनःकासांचिद्वृद्धिर्वादौवाकासांचित्क्षयस्ततःपंचदशानांवृ
द्धिःपुनःकासांचित्क्षयइत्येवंपौर्वापर्यमात्रभेदेपि पूर्वोक्तमन्यूनानाधिकपंचदशचंद्रकलाघटितंचांद्रविद्यत
एवेति सोपिमुख्य एवचांद्रः अतएवचचांद्रमासविशेषवचनाश्चैत्रादिशब्दाः पौर्णमास्यंतेपि स्मृतिपुराणादिषु
विंध्योत्तरदेशगतशिष्टलोकव्यवहारेच मुख्यरूपेणैवाविगानेनप्रयुज्यंते द्विविधस्यापिचचांद्रायणस्यकाले
तुल्यवदेवमासशब्दःप्रयुक्तएषचांद्रायणोमासइति चांद्रमानेनचमासकार्तिकादिस्नानं चातुर्मास्यव्रतादी
निचाचरंतः शिष्टामाघकार्तिकादिपौर्णमासीपर्यंतमेव तान्याचरंतो दृश्यंतेयतश्चसर्वदेशगताश्चांद्रत्वंत
त्पक्षोरंपौर्णमास्यामेवाचरंति शुक्लकृष्णाद्योर्गौणमुख्यभावेतुगौणमुख्ययोर्मुख्येकार्यसंप्रत्ययइति शु
क्लादावेवपूर्वोक्तंसर्वमुचितं नतुकृष्णादाविति द्वयोरपिमुख्यमेवचांद्रत्वमितियद्यपिबुद्धिर्भवति तथापिलक्ष
णाधीनत्वाद्गौणमुख्यविवेकस्यलक्षणस्यचसंमुग्धव्यवहारिणिलोकेशास्त्राधीनत्वात्तद्दृशाशुक्लादेरेवतन्मु
ख्यं वेदतदंगस्मृतिपुराणेतिहासाभिधानिकोशशास्त्रकाव्यलोकव्यवहारगताशुक्लकृष्णपक्षगोचरात्पूर्वाप
रत्वव्यवहारादपितथा अन्यथानादौसंसारेकस्यपूर्वत्वंकस्यापरत्वंस्यात् एकमाससंबंधानुपपद्यते क
ल्पयुगादिप्रवृत्तौचसितादावेवमासव्यवहारादविच्छेदेन तदनुवृत्त्येदानीमपितथैवयुक्तं चैत्रसितादेरुदया
द्भानोर्दिनमासवर्षयुगकल्पाः सृष्ट्यादौलंकायांसमप्रवृत्ताःदिनेर्कस्येति ज्योतिःसिद्धांतवचनात् चैत्रमा
सिजगत्ब्रह्मा ससर्जप्रथमेहनि शुक्लपक्षेसमग्रंतु तदासूर्योदयेसति प्रवर्तयामासतदाकालस्यगणना
मपि ग्रहान्नागान्ऋतून्मासान्वत्सरान्वत्सराधिपान् इति ब्रह्मपुराणवचनाच्च इदानीमपिचचैत्रोपक्रमप्र

का०त०
२०१

मवादिसंवत्सरादित्वेन चैत्रशुक्लप्रतिपदेव सांवत्सरादिभिरपिव्यवह्रियते गौणस्यापिचकर्षादेः कृषिकर्मविशेषे पाक्षिकोनि
यतोवाविनियोगोवचनबलात् नास्तिवचनस्यातिभारइतिन्यायात् गौणेपिचतत्र प्रचुरप्रसिद्धापौर्णमास्याहिमासान्
संपश्यतीतिश्रुतिगतहि शब्दद्योतितयामुख्यतुल्यत्वात् चंद्रस्यद्वैविध्याभिधानं वक्ष्यमाणन्यायेन चांद्रस्यैवमुख्यमासत्वे
पितच्चातुर्विध्याभिधानवत् यत्किंचित्त्रिंशत्तिथिसमुदायात्मकतन्मासस्यग्रहेण त्रैविध्याभिधानाभावश्च विशेषवा
चिनांतत्राप्रयोगात् अनादिशिष्टाचाराच्चविंध्योत्तरदेशेगौणस्यापिकृष्णादेः संकल्पादिव्यवहारेषु ग्रहणान्नदेशगते
र्महर्षिभिरपिकेश्चित्स्वस्वग्रंथेषु जन्माष्टमीमहालयादिविषयेसएवोपनिबद्धः व्याकरणगतापूर्णमासशब्दव्युत्पत्ति
स्तु यः सूर्याचंद्रमसोःपरोविकर्षः सापौर्णमासीति गोभिलसूत्रे चंद्रपूर्तेरेवपौर्णमासीशब्दप्रवृत्तिनिमित्तत्वस्व
चनादर्शशब्देच चंद्रघटितस्यैव प्रवृत्तिनिमित्तस्यैवदर्शनात्कलाभिः पूर्णोमासश्चंद्रमा अस्मिन्नित्येवंव्याख्येया प्रथ
मांतमासशब्दस्य शसादिप्रत्ययपरत्वनिमित्तमासशब्दादेशत्वासंभवेन ततः पृथक्शब्दत्वेपितयोः समानार्थत्वा
त् मासशब्दत्वास्यान्मासस्मृतश्चंद्रकालयोरिति विश्वप्रकाशाच्चंद्रमावाचित्वात् अतएवपौर्णमासीशब्दे पक्षां
तरेपूर्णचंद्रयोगएवस्पष्टंनिमित्तत्वेनोक्तः पूर्णश्चासौमासश्च पूर्णमासइतीयंपौर्णमासीति पूर्णमासशब्दात्तास्मि
न्पौर्णमासीतिज्ञापकात्स्वार्थेप्रकरणात्पौर्णमासीशब्दनिष्पत्तिरिति व्युत्पत्तिमात्रभेदस्तु प्रथमपक्षे प्रवृत्तिनिमि
त्तंत्वेकमेवयुक्तं तस्माच्छुक्लादिरेवमुख्यश्चांद्रः कृष्णादिर्यत्किंचित्त्रिंशत्तिथिसमुदायश्चगौणइति यत्तुद्वितीः
यस्यसावनत्वंकेचिदुच्यंतेतदयुक्तं सावनशब्दस्याहस्तृतीयभागवाचित्वेन षट्सवनस्नानस्यापिकेचिद्विधाना
च्च रात्रितृतीयभागेपिवृत्तिः साक्षात्तत्संबंधिनोहोरात्रस्यतद्वारकस्यतत्संबंधिनस्त्रिंशदहोरात्रसमुदायस्यचसा
वनशब्दवाच्यत्वौचित्यात् ननुत्रिंशत्तिथिसमुदायस्य त्रिंशत्तिथिसमुदायत्वसाम्यात्कृष्णचांद्रएवसः अनेनैव
न्यायेनसामान्यवचनोमासशब्दोपिचांद्रएवतत्रापिदर्शांतएवमुख्यः नतुवर्तुष्वपि चांद्रसौरयोरेवसौरएववा २०१

395/1947

तथाचमाससामान्यलक्षणमाहलघुहारीतः इंद्राग्नीयत्रहूयेतेमासादिः प्रकीर्तितः अग्नीषोमौस्मृतौमध्येसमाप्तौपि
तृसोमकाविति अत्रशृंगसाहिकयाआदिमध्यसमाप्तिकीर्तनादेतादृशादिमध्यसमाप्त्युपलक्षितएवकालविशेषोमास
शब्दाभिधेयइतिस्पष्टमवगम्यते तथाचान्यत्रसगौणइत्यप्यर्थतः तथाहि पक्षांताउपस्तव्याः पक्षादयोभियष्टव्या
इतिवचनाच्छुक्लप्रतिपदिक्रियमाणायांदर्शेष्टावसान्नाय्ययाजिनाऐंद्राग्नपुरोडाशयागेइंद्राग्नीइज्येते एवंकृष्णप्र
तिपद्यग्नीषोमीयपुरोडाशयागेग्नीषोमौ अमावास्यायांपिंडपितृयज्ञांगहोमे सोमायपितृमते स्वधानमइति विशे
षणविशेष्यभावापन्नोपितृसोमौ तेनैंद्राग्नयागोपलक्षितशुक्लप्रतिपदुपक्रमोग्नीषोमीययागोपलक्षितकृष्ण
प्रतिपन्मध्यः पितृमत्सोमयागोपलक्षितदर्शावसानस्तिथिविशेषसमुदायोमासशब्दवाच्यइत्युक्तंभवति मस्यं
तेपरिमीयंते स्वकलावृद्धिहानितः मासएतेस्मृतामासास्त्रिंशत्तिथिसमन्विताः इतिसिद्धांतशिरोमणिप्रद
र्शितात्कृत्तद्धितांतत्वरूपव्युत्पत्तिद्वयादपिमासशब्दगोचरास्तथामासपरिमाणइतिस्मृत्यनुसारात्मस्यंतेइत्यस्यव्या
ख्यानंपरिमीयंतेइति तत्रकेनेतिकर्त्राकांक्षायांस्वेत्युक्तत्वादुत्तरार्धोक्तोमास्यदवाच्यश्चंद्रएवकर्तृत्वेनसंबंध्यते
स्वोक्त्याचवृद्धिहानियोग्यसर्वकालालाभादेकादितिथिगोचरप्रवृत्तिनिमित्तानि प्रसंगनिरासः एकद्व्यादितिथी
नामेकद्व्यादितिथिवृद्धिहानिपरिमयत्वेपिसर्वकलावृद्धिहानिपरिमेयत्वाभावात् वृद्धिहानीत्यत्रचेतरेतरयो
गः क्रमविशेषश्चविवक्षितः तेनैकैकस्मिन्पक्षेकृष्णादौच नातिप्रसंगः ततश्चवृद्धिक्षययोग्यानांसर्वासांचं
द्रकलानांयएवंक्रमकेवृद्धिहानीमिलिताभ्यांताभ्यांपरिमेयः कालविशेषोमासशब्दवाच्यइतिद्वादसहकारिणत्रा
द्ययोगार्थः रूढ्यंशलभ्येतानेनैवकलाघटितसंबंधेनमासश्चंद्रस्यसंबंधीकालविशेषोमासइतिद्वितीययोगा
र्थः त्रिंशत्तिथिसमन्वितास्त्रिंशत्तिथिसमुदायरूपाइतिस्वरूपानुवादः नत्वेतस्यापिरूढ्यंशेप्रवेशः अवश्यवि
वक्षणीयात्पूर्वस्मादेवास्यार्थसिद्धत्वात् नन्विदमेवयोगद्वयेपिरूढ्यंशार्थास्तुत्रिंशत्तिथिपरिमेयः कालविशे

षोमासश्चंद्रसंबंधी त्रिंशत्तिथिसमुदायो वा मास इति तथा च शुक्लादेः कृष्णादेर्वा किंचित् त्रिंशत्तिथिसमुदायस्य चत्वारणा
मपि चांद्राणां मासशब्दवाच्यत्वमस्तु न तु शुक्लादेरेव तथात्वमितरयोस्तु गौणत्वं पूर्वमेव त्वनुवादः अत एव क्रमोप्यविव
क्षित इति नेतदुक्तं परिमीयंते इत्यत्र करणाकांक्षायां स्वकलावृद्धिह्रान्योः करणत्वस्य श्रौतस्य त्यागेन त्रिंशत्तिथीनां
करणत्वस्यार्थिकस्य स्वीकर्तुमनुचितत्वात् क्रमाविवक्षायां च कारणाभावात् लक्षणवाक्ये हि यावंति विशेषणानि
श्रुतानि तावद्विशेषणोपलक्षितं विशेषमनूद्य एतादृशो धर्मी अनेन शब्देन व्यवहर्तव्य इति विधातुं शक्यते एव चो
दनालक्षणोर्थो धर्म इतिवत् ननु सत्यपि लक्षणस्योद्देशत्वे प्रयोजनवत् किंचित्तत्राविवक्षितं भवति तथात्वे अव्या
प्त्यादिपरिहारेण लक्षणपदकृत्यवर्णनं सर्वेषामनुपपन्नं स्यात् द्वितीययोगे तदर्थस्य तृत्यंशार्थादनाधिक्यं चाति
थीनां चांद्रत्वात्तत्समुदायत्वाभिधानादेव चंद्रसंबंधलाभात् यत्किंचित्त्रिंशत्तिथिसमुदायरूपस्यापि मासस्य ल
क्ष्मांतर्भावे चैतदिति चेत्राादिपरामर्शिसर्वनामानुपपत्तिः तस्मान्मकृतमेव मस्यंते इति वचनव्याख्यानं साधीय इत्य
नेन वचनेन दर्शीतस्यैव मुख्यमासत्वं किंच मत्स्यपुराणे त्रिंशत्कस्य प्रतिपादनावसरे पंचदशस्य कल्पस्य कौर्मः पंचदशो
ब्रह्मन् पौर्णमासी प्रजापतेरिति ब्रह्मपौर्णमासीत्वमभिधाय त्रिंशत्तमस्य च पितृकल्पस्तथांते तु साकुहूर्ब्रह्मणः स्मृ
तेति ब्रह्मामावास्यत्वमुक्त्वा इत्ययं ब्रह्मणो मासः सर्वप्रणाशन इति दर्शांत एव ब्रह्मपुराणे मासपदसंकेतनादन्येषाम
पि तथैव मासपदसंकेतो युक्तः अन्यदपि दर्शांतमुख्यमासत्वसाधकं शुक्लकृष्णपक्षगोचरपूर्वापरव्यवहारादिकं पूर्वमुक्तं
ननु यद्येकेन केनचिन्मासत्वेनोपाधिना चतुर्णां मासशब्दवाच्यत्वमुच्येत ततो लघुहारीतोक्तस्य मासत्वस्य चतु
र्ष्वनुगमाभावात्तदितो दर्शांतस्यैव मासशब्दवाच्यत्वमिति वक्तुं युज्यते तदसंभवात् यत्तु जीमूतवाहनेन त्रिंश
द्गुणितषष्टिनाड्यवच्छिन्नकालरूपत्वं सर्वत्रानुवृत्तमेकं मासत्वं यद्यपि चैतत्सावन एव नियतं नान्यत्र वृद्धिह्रासदर्श
नात् तथाप्यौत्सर्गिकं तद्रूपमंगीकृत्य तस्य चतुर्ष्वपि प्रवृत्तिनिमित्तत्वमुच्यते अत एव वृद्धिह्रासावित्युच्यते स्थि
रे ह्येकस्मिन् रूपे यदधिकं सा वृद्धिर्यत् न्यूनं तद्ध्रास इत्युच्यते अन्यथा वृद्धिह्रासव्यपदेशानुपपत्तेरित्युक्तं तदयु २०२

397
1942

क्तं सौरे तदधिकस्यैव चांद्रे च तन्न्यूनस्यैव रूपस्यौत्सर्गिकत्वात् नाक्षत्रे च कदाचिदपि तद्रूपस्याभावात् चांद्रसप्त
विंशतिनक्षत्रभोगस्य त्रिंशत्सावनदिनव्यासंगिनः कदाप्यसंभवात् अन्यथा सौरसंवत्सरस्य सावनसंवत्सरापेक्ष
या पंचदिनाधिकत्वस्य चांद्रसंवत्सरस्य च तदपेक्षया षड्दिनन्यूनत्वस्य नाक्षत्रस्य च षट्त्रिंशद्दिनन्यूनत्वस्यासं
भवात् उक्तं च तन्माधवोदाहृते आयुर्वेदवचने सौरबृहस्पतिसावनशशधरनाक्षत्रिकाः क्रमेण स्युः मौतुलैपोतौलौ
तुलैर्विमैलैर्वरा गौणिवत्सराः पंचेति ज्योतिषिकसंप्रदाये मकारः पंचसंख्यार्थां संकेतितः तः षट् त्वे लस्त्रित्वे प एक
त्वे अः शून्ये वश्चतुष्के रोहिले गस्त्रित्वे अंकानां च वामतो गतिः तेन पंचषष्ट्यधिकत्रिशतसावनदिनमितः सौ
रः संवत्सरः एकषष्ट्यधिकत्रिशतादिनमितो बार्हस्पत्यः षष्ट्यधिकत्रिशतादिनमितः सावनः चतुःपंचाशदधिक
त्रिशतदिनःमितश्चांद्रश्चतुर्विंशत्यधिकत्रिशतदिनमितो नाक्षत्रः इत्येतस्यार्थः विष्णुधर्मोत्तरे तु तिथिनैके
न दिवसश्चांद्रेमाने प्रकीर्तितः अहोरात्रेण चैकेन सावनो दिवसः स्मृतः आदित्यशशिभोगेन सौरो दिवस उच्यते
चंद्रनक्षत्रभोगेन नाक्षत्रो दिवसः स्मृत इति दिवसचातुर्विध्यं सलक्षणमुक्त्वा भगणेन समग्रेण ज्ञेया द्वादश राशयः
त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते आदित्याद्विप्रकृष्टस्तु भागद्वादशकं यदा चंद्रमाः स्यात्तदा राम तिथि
रित्यभिधीयत इति तिथिभागयोर्लक्षणं चाभिधायाहस्य चतुर्विधमासादिनसंख्याभिहिता मानेमासस्तु नाक्ष
त्रे सप्तविंशतिभिर्दिनैः परिशेषु मानेषु मासस्त्रिंशाद्दिनः स्मृत इति त्रिंशद्दिन इति तद्दिनग्रहणं यद्यपि चयां
तिथिं समनुप्राप्य तुलां गच्छति भास्करः तथैव सर्वसंक्रांतिर्यावन्मेषं नगच्छतीति ज्योतिषवचनात्तुलादिसौरमास
षट्के तिथयस्त्रिंशास्त्रिंशदेव तथापि सावनदिनानि षष्टिनाडीसंघातरूपाणि प्रायस्त्रिंशतः किंचिदधिकान्य
व क्वचिदेव परात्रिंशत् मेषादिषट्के तु तेषामाधिक्यमेव नियमेन येन तत्रैवैकादशतिथिवृद्धि रधिकमासोपजना
नुकूलात् दुक्तं गृह्य परिशिष्टे मध्येविषुवतो भानुर्यान्यहानि तु वर्धयेत् तैः संभूयाधिको मासः पतत्येषस्त्रयोद

का०त०
२०३
शइति विषुवतोरिति मेषतुलयोरिति द्रष्टव्यं नतुतुलामेषयोरितियांतिथिमितिवचनविरोधात् तेनसौरमासेत्रिंशद्गु
णितषष्टिनाड्यवछिन्नकालादधिकमेवोत्सर्गिकंरूपंचांद्रेवताद्दशसंवत्सरदिनन्यूनतोपपत्तिसिद्धमध्यक्षसिद्धंच
ततोन्यूनमेवनाक्षत्रेतुकदापिनास्त्येवेतिचतुर्ष्वमासेषुतद्रूपानुगमाभिधानंप्रलापएव वृद्धिह्रासव्यवहारस्तुमा
सादिषु स्वेछाकल्पितएवतिथिनक्षत्रयोगेष्वेवतद्दर्शनात् यत्तु सूर्यसिद्धांतेनाक्षत्राहोरात्रमासस्वरूपंप्रतिपा
दितंषड्भिःप्राणैर्विनाड्यर्क्षी तत्षष्ट्यानाडिकास्मृता॥ नाडीषष्ट्यातुनाक्षत्रमहोरात्रंप्रचक्षते तत्त्रिंशताभवे
न्मासइतितत्प्रतिपादनाच्च द्वादशमासात्मकतत्संवत्सरस्वरूपमपिसूचितंतत्सर्वंसावनाहोरात्रादिस्वरूपभेद
स्वरूपमेवकृत्तिकाद्येकैकनक्षत्रोदयद्वयांतरालषष्टितमभागात्मकनाक्षत्रनाडीपूर्वकत्वात्तुनाक्षत्रत्वेनव्यप
दिष्टं अर्कोदयद्वयांतरालषष्टितमभागात्मकसावननाडिपूर्वकश्चसावनोमासस्तदहोरात्रसूचनपूर्वकंसाव
नत्वेनपृथङ्निर्दिष्टःसावनोर्कोदयैस्तथेति अर्कोदयैरुदयादुदयपर्यंतैःकालैः तथेतित्रिंशता अस्तिच
नक्षत्रसूर्योदयद्वयसांतरालयोः किंचिन्न्यूनाधिकत्वंतत्कृतंतत्तन्नाड्या अपितत् तत्तद्दशगुरुवर्णोच्चारण
परिमितप्राणषट्कात्मकपलपर्यायविनाडीषष्टिमितानाक्षत्रनाडीदर्शितैव सावननाडीतुसूर्योदयद्वयांत
रालषष्टितमभागात्मका उदयादुदयांतरंचसूर्यस्यननाक्षत्रषष्टिनाड्यनंतरमेव किंतुरविभुज्यमानलग्नत्रिं
शांशाधिकतदनंतरे तदुक्तंसिद्धांतसंदर्भेसावनंदंडाःषष्टिरहःस्वलग्नखगुणांशाग्रास्तदैनंभवेदिति अ
र्कोदयद्वयांतरालात्मकंसावनमहोरात्रंरविभुज्यमानलग्नत्रिंशांशाधिकपूर्वोक्तषष्टिदंडात्मकं तदेवह्नःसू
र्यस्तदुदयपरिछिन्नत्वेनतत्संबंधित्वाद्दिनमित्यपिव्यवहर्तुंशक्यते नत्विदंरविशशीत्रिंशांशात्मकसौरमासा
रंभकं तेनतत्षष्टितमभागात्मिकासावननाड्यपिनाक्षत्रनाड्यपेक्षयाकिंचिदधिकाभवति अतएवसावन
संवत्सरेणैकदिनाधिकोनाक्षत्रवत्सरोभवत्यभियुक्ताः अल्पांतरत्वाच्चतस्यसावनतुल्यतैवइदंचैकस्यैवक २०३

399
1947

स्यचिन्नक्षत्रस्योदयद्वयांतरालरूपंनाक्षत्रमानमाक्षात्प्रणालीभ्यामहोरात्रादिगतंनाडीविनाडीमुहूर्तादिव्यवहारोपयो
गि तदुक्तंसिद्धांतशिरोमणौ वर्षायनर्तुयुगपूर्वकमत्रसौरान्मासांस्तथैवतिथयस्तुहिनांशुमानात् यत्कृच्छ्रसूतकचिकि
त्सितवासराद्यंतत्सावनाश्चघटिकादिकमार्क्षमानादिति अनेनमानेनयोमासःसावनभेदोवानाक्षत्रस्यैवभेदांतरंवा
सैवतत्त्रिंशद्दिनात्मकत्वंसूर्यसिद्धांतेभिहितं ननुचांद्रैकैकनक्षत्रभोगात्मकैःसप्तविंशत्यानाक्षत्रदिवसैर्यश्चांद्र
सर्वनक्षत्रभोगात्मकोमासोविष्णुधर्मोत्तरादिषूक्तोधर्मशास्त्रकारैराद्दतोयद्वादशकेनचतुर्विंशत्यधिकशतत्रयादि
नात्मकोनाक्षःसंवत्सरोभवति यस्यचनक्षत्रसोमायनादिषूपयोगस्तस्येतित्रिंशद्गुणितषष्टिनाड्यवछिन्नस
पत्वंतावत्कदाचित्तत्तयापिसर्वेष्वनुगतंनमासत्वं अन्यच्च किंचित्ताद्दृशंतन्मासंभवतीतिविष्णुधर्मोत्तराद्युक्तेश्च
तुर्भिरुपाधिभिश्चतुर्षुमासेषुवर्तमानोमासशब्दोनेकार्थएवाक्षपादादिवत् तत्रचांद्रमासप्रवृत्तिनिमित्तभूतंय
न्मासत्वंतत्लघुहारीतादिभिर्निबद्धमितिसौरादिषुतदभावेपिनतेषांमासशब्दवाच्यत्वंभवति नहिबिभीतकप्र
वृत्तिनिमित्तभूतबिभीतत्वापरपर्यायाक्षत्वरहितानामपींद्रियादीनामक्षशब्दवाच्यत्वंभवति कृष्णादेरवाच्य
त्वंपरंतेनस्यात् तेनसर्वेषामपिमासशब्दवाच्यत्वेनलघुहारीतादिवचनविरोधइतिअत्रोच्यते मासशब्दप्र
वृत्तिनिमित्तभूतंयन्मासत्वंतत्किंरूपमित्याकांक्षायांतद्वचनंप्रवृत्तंनतुचांद्रमासप्रवृत्तिनिमित्तभूतोयोमासत्व
विशेषःसकिंरूपइति मासशब्दसामान्यस्मरणात् ततश्चमासशब्दप्रवृत्तिनिमित्तभूतंयन्मासत्वंतदिदमेव
नान्यदितिश्रुत्यर्थाभ्यामितस्माद्वचनादवगतेकृतोन्यस्यतस्यसंभावना नचलघुहारीतवचनवन्मासलक्षण
कथनपरत्वद्योतकस्पष्टलिंगयुक्तमन्यमासानामपिमासशब्दवाच्यत्वद्योतकमन्यत्किंचिद्वचनमस्तियद्बलादि
दंवचनंचांद्रमासपरतयासंकोच्येत तथाहि चातुर्विध्यवचनंतावत्पुनर्द्वादशविधत्वस्फुरत्त्रैविध्यादिवचन
वत्स्वपिगौणमुख्यावांतरविभागेस्मृत्यादिगतंप्रायिकप्रयोगमात्रमाश्रित्योपपन्नं तदपिचांद्रादिचतुष्टय

स्वरूपकथनं तदपि तत्तत्कर्मविशेषेषु तत्तद्वचनैर्विहितानां तेषां स्वरूपजिज्ञासायां तत्परिचायकमेव तावतैव चोपपन्न
त्वान्न गौरवापादकं तावद्धाचरमासपदशक्तिज्ञापनपरं क्षेत्रजादिस्वरूपकथनवत् मासपदं तु तेषु क्षेत्रजादिपुत्रपदवद्गौ
णमेव तत्र पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिण इति वचनात्तत्कार्यपरत्वेन गौणत्वं अत्र तु सौरसावनयोस्ताव
त्रिंशद्दिवसघटितसमुदायत्वेन यद्यपि अहर्दिनदिवसादिशब्दा यथाहोरात्रदिनरात्र्यादिशब्देषु रात्रिशब्दाभिन्ना
र्थत्वावगमात् सूर्योदयास्तमयांतरालकालवचनास्तथा सूर्योदयद्वयांतरालकालरूपसावनमासत्रिंशभागवच
ना अपि अतु चांद्रसौरत्रिंशभागवचनास्तथापि दिनानि दशापं च चेत्यादिषु तेषामपि तत्र प्रयोगस्तावत् भूया
नस्ति अतएव दिवसानामपि चातुर्विध्यमुक्तं तेन दिवसघटितेन पूर्वोक्तधर्मेणानुगतेन संभवत्येव गौणत्वं नच
मासत्रिंशत्तमभागत्वरूपेण मासघटितधर्मेण दिवसगौणत्वं दिवसघटितधर्मेण च मासगौणत्वमित्यन्योन्याश्र
यमिति वाच्यं मासत्रिंशत्तमभागत्वेन दिवसगौणत्वानभ्युपगमात्तस्य नाक्षत्रदिवसेऽभावात् किंतु षष्टिनाड्या
वच्छिन्नत्वमेव सावने नियतं सौरादिषु प्रायिकमपेक्ष्य समानधर्मं तेषु दिवसशब्दस्य गौणत्वाभ्युपगमात् नाक्षत्रे
तु सप्तविंशतिनाक्षत्रदिवससमुदायात्मकेऽयद्यपि न पूर्वोक्तधर्मेण गौणत्वसंभवः दिवससमुदायत्वमात्रं तु प
क्षद्वादशाहादिष्वतिप्रसक्तं तथापि चंद्रकर्तृकैकसमुदायगोचरभोगावच्छेदकत्वेन चांद्रमासधर्मेण तत्र गौण
त्वं तथाहि चंद्रस्त्रिंशत्तिथिसमुदायेन स्वकालवृद्धिहानिसमुदायं भुंक्ते तथा सप्तविंशतिनाक्षत्रदिनसमुदायेन नक्षत्रस
मुदायमिति अतएव सौराद्युपपदसहित एव मासशब्देषु प्रयुज्यते न केवलः यस्तु चांद्रोपि तादृशः प्रयोगस्स स्पष्टनार्थेण
कृत्वौरसपुत्रः पितृस्यवस्कृनः प्रभुरितिवत् कृष्णादौ यत् किंचित् त्रिंशत्तिथिसमुदायात्मकोऽवत्रिंशत्तिथिसमुदाया
त्मकत्वसमानधर्मेण वा मासशब्दस्य गौणता यत्किंचित्त्रिंशत्तिथिसमुदायात्मकस्य च गौणस्यापि मासस्य एकाहे
ननु षण्मासा यदि स्युरपि वा त्रिभिः न्यूना संवत्सरश्चैव स्यातां षाण्मासिके तदा षाण्मासिकाब्दिके श्राद्धे स्यातां पू २०४

बैदेवते मासिकानि स्वकीये तु दिवसे द्वादशेपि वा प्रतिमासं तु वत्सरमित्यादिव्यवहारे भूयप्रयोगः अन्येषां तु वक्ष्यते
तेन लक्षणपरलघुहारीतवचनाद्वयवव्युत्पत्तेश्च चांद्र एव तत्रापि दर्शांत एव मासपदं मुख्यमन्यत्र तु गौणमिति स्थितं
एवं मासविशेषवचनाश्चैत्रादिशब्दा अपि मासविशेषवचनत्वादेव नक्षत्रेण युक्तः कालः सोस्मिन् पौर्णमासीति सं
ज्ञायामिति पाणिनिप्रदर्शितयोगबलाच्च तथाहि सौरचांद्रातिरिक्ते तावच्चैत्रादिशब्दानां प्रयोग एव नास्ति उभय
त्रापि मुख्यता नेकार्थस्यान्याय्यत्वादेकत्र मुख्यस्यापरत्र गौणत्वसंभवाच्चायुक्ता कृत्स्नावयवार्थयोगसंभवे च तत्त्या
गेन समुदायशक्तिकल्पनाया अन्याय्यत्वाद्यत्र पाणिनिप्रदर्शितावयवार्थयोगसंभवस्तत्रैव मुख्यत्वं युक्तं संभवति
च सर्वतश्चांद्रमासगततत्पौर्णमासीषु कदाचित्तत्तन्नक्षत्रयोगः सौरेषु तु आश्विनपौषमाघातिरिक्तेषु नवस्वमासे
षु भवति कदाचित्तथान्वाश्विनपौषमाघेषु कदाचिदपि पौर्णमासीष्वश्विनीपुष्यमघायोगसंभवः सूर्याचंद्रम
सोर्यः परो विप्रकर्षः सा पौर्णमासीति गोभिलवचनाद्धि प्रकर्षस्य चान्योन्यं राशिसप्तकेनावस्थानं विनासंभवात्पौर्ण
मास्यंते सूर्यचंद्रयोरन्योन्यं सप्तमराश्यवस्थानमावश्यकं नचैवं सति कन्याधनुर्मकरस्थरविसंबंधिपौर्णमासीषु
अश्विनीपुष्यमघायोगसंभवः तथासति चंद्रस्य यथाक्रमं मेषकर्कसिंहराशिस्थितत्वेन सूर्यचंद्रयोः पौर्णमास्यं
ते षट्कैकेनावस्थानापत्तेः चांद्रपौर्णमासीष्वपि यद्यपि नियमेन न तत्तन्नक्षत्रयोगः समस्ति तथापि तदत्यंता
भावाभावरूपयात् तद्योग्यतया योगनिमित्तोव्यपदेशः संभवति पाकमकुर्वत्यपि सूपकारे पाचकव्यपदेशवत्
अन्नक्रियामकुर्वत्यपि होमक्रियाविशिष्टरूपे तेनत्वं नं क्रियत इति करणत्वव्यपदेशवत् च ननु लङ्घितानां सर्वानाम
र्थस्मरणात्तद्दैवसन्निहितव्यक्तिवचनत्वं न तु किंचित्सामान्यं ते रुच्यते येन किंचित् व्यक्त्यावच्छिन्ने तत्र योगेनास्यं
तायोगव्यावृत्त्याव्यत्यंतरावच्छिन्नमपि तत्तद्योगवत् स्यात् तेन यथायः परिव्राजकविशेषो दंडत्रयधारी स एव क
दाचित्तदभावेपि त्रिदंडीत्युच्यते न तु यः कदापि दंडत्रयं न धारयति एकदंडी सोपि तथायाचैत्रादिमाससंबंधिनी पौ

401/1942

का०त०
२०५
पौर्णमासीव्यक्तिश्चित्रादियोगरहितासाकथंयोग्यतयापिचैत्रीतद्धितवाच्यायांतत्तद्व्यक्तौवदापितद्योगाभावात्
पौर्णमासीत्वेनैक्यमासांतरपौर्णमास्याअपितद्धत्वाच्यतापत्तिस्तथाचचैत्रवैशाखादिपदानामन्योन्यसंकरप्र
संगः चैत्रादिसंबंधिपौर्णमासीत्वंतु चैत्रादेश्चैत्रादिपूर्वकत्वादन्योन्याश्रयग्रस्तं नच मीनादिस्थेरविशेषामार
भप्रथमक्षणे भवेत्तेचांद्रमासाश्चैत्राद्याद्वादशस्मृताः इतिव्यासवचनोक्तचैत्रादिमासलक्षणानुसरणेन मीना
दिस्थादित्यारब्धशुक्लप्रतिपक्षमाससंबंधिपौर्णमासत्वेनैक्यमादाययोग्यताभविष्यतिइतिवाच्यं तद्धितस्यबु
द्धिस्थवाचित्वाच्चैत्र्यादिशब्दप्रयोगेचैतद्रूपविपरिवृत्तौनियतकारणाभावात् किंचैतदपेक्षयामीनादिस्थादित्या
रब्धत्वमात्रस्यलघुत्वेनतस्यचसौरपि विद्यमानत्वेनतस्यापियोग्यतयाचैत्र्यादियोगाच्चैत्रादिशब्दवाच्यत्वसवि
रुद्धंस्यात् तस्माद्यथाव्याकरणनक्षत्रयोगाच्चैत्र्यादयस्तद्योगाच्चचैत्रादयइत्यस्यकास्तचिद्युक्तिपुकथमपिन
क्षत्रयोगाभावभाविनासंभवात् पूर्वोत्तराषाढाभ्यांहि भक्तत्वात्सर्वदासंभवद्योगमाषाढमेकंविहायसर्वेतावच्चै
त्रादयःस्वतंत्राएवरूढाराजवत् तेचसौरचांद्रयोर्द्वयोरपि प्रयोगविशेषात्सत्यप्यन्यतरत्र किंचित्प्रचुरप्रयोगे
नचाल्पत्वबहुत्वाभ्यांप्रयोगाणांविशिष्यतेवाच्यवाचकभावोयमक्षपादादिशब्दवत् बिभीतकेक्षशब्दोयंय
मप्यल्पैःप्रयुज्यते तथापिवाचकस्तस्यज्ञायतेशकटाक्षवदितिन्यायात् चैत्रादिशब्दाएवतु तद्योगनिमि
त्ताःपरतंत्राः चैत्रस्येयंचैत्रीविशाखस्येयंवैशाखीत्यादि राज्यशब्दवन्ननु नक्षत्रयोगनिमित्ताः व्याकरणस्मृति
स्तु विपर्ययप्रतिपादिकास्वराद्यर्था तदुक्तंवार्तिके यत्रार्थस्यविसंवादःप्रत्यक्षेनोपलक्ष्यते स्वरसंस्कारमात्रा
र्थीतत्रव्याकरणस्मृतिरिति पाणिनिरपि सास्मिन्पौर्णमासीतिसंज्ञायामितिचैत्रादिशब्दानांसंज्ञात्वंवदन्यो
गस्यापारमार्थिकत्वंदर्शयति स्पष्टंचयोगव्यभिचारियोगः प्रत्यख्यातस्तेन योगप्रमाणेचतदभावेदर्शनंस्या २०५
दिति यद्यपीदं लुब्योगाप्रख्यानादितिपूर्वसूत्रेजनपदेलुबित्यादिविहितपंचालादिशब्दगतलुप्प्रत्याख्याना

त्तद्विषयत्वेनैवपंचालादिशब्देजनपदविशेषवाचिनिक्षत्रिययोगस्यप्रमाणवाचकेसतितदभावेअदर्शनप्रयोगःस्यादि
तिव्याख्यातंतथापितुल्यन्यायत्वादन्यविषयमपिभवति माससंबंधादेवपौर्णमासीव्यवहारोमहाभारतमत्स्यपुरा
णादिष्वपिदृश्यते तथापितत्रवचनं आषाढेकार्तिकेवापिमाघवैशाखयोरपि पौर्णमासीषुदातव्यंमाहदानंयुधि
ष्ठिरेति वैशाखपौर्णमास्यांतुग्रहणेचंद्रसूर्ययोः पौर्णमासीतथामाघेतस्यांदानफलंमहदित्यादिच विष्णुरपिन
क्षत्रयोगनिमित्तत्वासंभवंपौर्णमासीनांद्योतयन्मासयोगनिमित्तत्वमेवसूचयति तथाचतत्स्मरणं मार्गशीर्षशु
क्लपंचदश्यांमृगशिरसंयुक्तायांचूर्णितलवणस्यसुवर्णनाभंप्रस्थमेकंचंद्रोदयेब्राह्मणायप्रतिपादयेत् अनेन
कर्मणारूपसौभाग्यवानभिजायते पौषीचेत्पुष्ययुक्तास्यात्तस्यांगौरसर्षपकल्केनोत्सादितशरीरोगव्यघृतपूर्ण
कुंभेनाभिषिक्तः सर्वौषधीभिःसर्वगंधैःसर्वबीजैश्चस्नातोघृतेनभगवंतंवासुदेवंस्नापयित्वापुष्पधूपदीपगं
धनैवेद्यादिभिश्चाभ्यर्च्यवैष्णवैःसूक्तैर्बार्हस्पत्यैश्चमंत्रैः पावकंहुत्वासस्वर्णमधुघृतेनब्राह्मणांस्वस्तिवाचयि
त्वा वासोयुगंचकर्त्रेदद्यात् अनेनकर्मणामुच्यते माघीमघायुक्ताचेत्स्यात्तस्यांतिलैःश्राद्धंकृत्वापूतोभवति
फाल्गुनीफल्गुनीयुक्ताचेत्स्यात्तस्यांब्राह्मणायसंस्कृतंस्वास्तीर्णशयनंनिवेद्यभार्यांमनोज्ञांरूपवतींद्रविण
वतींचाप्नोतिनार्यपिभर्तारं चैत्रीचित्रायुक्ताचेत्स्यात्तस्यांचित्रवस्त्रदानेनसौभाग्यमाप्नोति वैशाख्यांपौर्ण
मास्यांब्राह्मणसप्तकंक्षौद्रयुक्तैस्तिलैःसंतर्प्यधर्मराजानंप्रीणयित्वापापेभ्यःपूतोभवति ज्यैष्ठीज्येष्ठायुक्ताचे
त्स्यात्तस्यांछत्रोपानत्प्रदानेनगवाधिपत्यमाप्नोति आषाढ्यामषाढायुक्तायामन्नपानप्रदानेनतदेवाक्षयमा
प्नोति श्रावण्यांश्रवणयुक्तायांजलधेनुंसवत्सांवासोयुगाच्छादितांदत्वास्वर्गलोकमवाप्नोति प्रौष्ठपद्यांप्रौष्ठ
पदायुक्तायांगोदानेनसर्वपापविनिर्मुक्तोभवति आश्वयुज्यामश्विनीगतेचंद्रमसिघृतपूर्णभाजनंसुवर्णयुतं
विप्रायदत्वादीप्ताग्निर्भवति कार्तिकीचेत्कृत्तिकायुक्तास्यात्तस्यांसितमुक्षाणमन्यवर्णंवाशशांकोदयेसर्वस

403/1942

का०त० स्यरसंगं धोपेतं ब्राह्मणायदत्वा कांतारभयंनपश्यतीति अत्रतत्तन्मासस्संबंधिपौर्णमासीमात्रविवक्षायांचेत्यादि
२०६ वचनैर्नक्षत्रयोगस्यकादाचित्कत्वाभिधानेनतन्निमित्तकत्वाभावद्योतनं तत्तन्नक्षत्रयुक्ततद्विवक्षायांपौष्यादिपदे
रेवतल्लाभात्पुनःपुष्ययुक्ताचेदित्यादीनामनर्थक्यापत्तेस्तद्योतनं पौर्णमासीषुसर्वासुमासर्क्षसहितासुचद
त्तानामिहदानांफलंदशगुणंभवेत् कार्तिक्यांतुयदाभक्षमाग्नेयंभवतिक्वचित् महतीसातिथिर्ज्ञेयास्नानदाना
दिषूत्तमा यदायाम्यंतुभवतिक्वचित्तस्यांनराधिप· तिथिःसापिमहापुण्याऋषिभिःपरिकीर्तिता प्राजापत्यंय
दाऋक्षंतिथौतस्यांनराधिप सामहाकार्तिकीप्रोक्तादेवानामपिदुर्लभेत्यादिविष्णुधर्मोत्तरपद्मपुराणादिवच
नेषुचस्पष्टमेवतत्पौर्णमासीषु तत्तन्नक्षत्रयोगस्यकादाचित्कत्वमवगम्यतेतेनरूढचैत्रादिमासयोगनिमि
त्ताएवचैत्र्यादिशब्दाःपौर्णमासीषु अतएवतिथ्यंतरेपितन्नक्षत्रयोगिनितन्माससंबंधिनिप्रोष्ठपदीशब्दःप्रो
ष्ठपद्यष्टकाभूयःकृष्णपक्षेभविष्यसीतिपुराणेगोभिलेनचप्रयुक्तःप्रोष्ठपदींहस्तेनोपकारणंतेषामुत्सृ
जंतीति हस्तेनयुक्तांप्रोष्ठपदींसिंहभाद्रपदमाससंबंधिनीयांकांचित्तिथिंप्राप्योपकारणंकार्यमित्यर्थः तेषामि
तितुनक्षत्रयोगनिमित्तमेव प्रोष्ठपदीमितिचात्रापिसंबध्यते सिंहेरवाविस्युक्तत्वात् तेनप्रोष्ठपदसंबंधिनीतिष्य
युक्तांतिथिंप्राप्योत्सर्जनमित्यर्थः नचनक्षत्रेणयुक्तःकालइतिविहितःप्रत्ययःपौर्णमास्यामिवभवतीत्यत्रप्रमा
णमस्तिकालमात्रग्रहणात् पौषीरात्रिःपौषमहोमाघीरात्रिर्माघमहरित्यादिनामपितत्रोदाहरणाच्च लोकेचमा
समात्रसंबंधेनभूयान्प्रयोगोदृश्यतेमाघीसप्तमीमाघीद्वादशीकार्तिकीद्वादशीत्यादि अतएवक्षीराब्धौशे
षपर्यंकेआषाढ्यांसंविशेद्धरिः निद्रांत्यजतिकार्तिक्यामित्येतद्वचनगते आषाढीकार्तिकीपदेमासयोगेनै
कादशीपरेव्याख्यातेकल्पतरौ आषाढशुक्लपक्षांत्तइत्यादिवाक्यांतरैकवाक्यतयातुप्रसिद्धपौर्णमासीग्रहण
स्यैवसंभवात्तद्व्याख्यानंमयादूषितं एतेनमुनीनामभियुक्तानांचमाससंबंधनिमित्तकेनतिथिविषयेणप्रोष्ठ २०६

पद्यादिशब्दप्रयोगेणतथात्वेयत्कैश्चित्तद्दूषणमुक्तंतदप्यपाकृतंवेदितव्यं तच्चेत्थंच यदावयवाभ्यांसंबंधिनो
रुपादानेहिअभिधानेनाक्षेपेणवापदंतत्संबंधनिमित्तंभवति यथाकृत्तद्धितसमासेषुपाचकऔपगवोराजपु
रुषइत्यादिषु नचैत्र्यादिशब्देषुपौर्णमासीरूपविशेष्याभिधायकःकश्चिदवयवोविद्यते प्रकृतरु मासाभिधा
यकत्वात्ङीपश्च।स्त्रीलिंगमात्राभिधायत्वात् एवंसतिलिंगानन्वयोपि प्रकृत्यर्थानांमासानांस्त्रीलिंगान्वया
योग्यत्वात् तद्योग्यायाश्चतिथेरनुपादानात् नचतथागोपस्यस्त्रीगोपीत्यादिषु स्त्रीलिंगान्वयार्थङीप्प्रकृ
तिरेवलक्षणयापुंयुक्तायांस्त्रीव्यक्तौवर्ततेतथात्रापिचैत्रादिशब्दाएवमासविशिष्टतिथिस्थितिवाच्यं तत्रहि
पुंयोगादाख्यायामित्यनुशासनबलादागतास्तथाश्रूयते अतएवयापुमाख्यापुंयोगात्स्त्रियांवर्ततेततोङी
प्स्यादितितदनुशासनंव्याख्यातृभिर्व्याख्यातं नचात्रतथातात्पर्यग्राहकंकिंचिदस्तियद्वशादेवंस्यात् अ
थैतद्दोषपरिहारार्थमश्वकर्णादिसमासवदनुशिष्टापारमार्थिकारिद्वयेभ्यश्चैत्रादिशब्देभ्यःपारमार्थिकंत
स्येदमितितिथिविषयमनंतरंकृत्वाङीप्क्रियते तेनमाससंबंधात्तिथिविषयःप्रयोगउपपद्यतइत्युच्यते तन्न
तथासतिसामान्यविहिता बाधकेनकालाञितिकालविशेषवाचिभ्योविहितेनटञाभाव्यं चैत्रिकीवैशाखी
तिमासिकादिवत् तत्रहिशब्दनामर्थपरत्वादर्थेचकार्यासंभवाल्लक्षणयातद्वाचिसर्वशब्दानांग्रहणेप्रस
क्तेस्वरूपग्रहणनियमार्थतयास्वंरूपंशब्दस्याशब्दसंज्ञेतिपरिभाषयाकालशब्दात्स्वरूपभवतीतियद्यपिप्र
सक्तंतथापिसंधिवेलाद्यृतुनक्षत्रेभ्योणितिसूत्रेणसंधिवेलाशब्दात्तद्रूपपठितेभ्यश्चत्रयोदशीचतुर्दशीप्र
तिपच्छब्देभ्योभवार्थेण्विधीयतेसचतत्रभवइतिसामान्यशास्त्रादेवासिद्धस्तस्यपुनर्विधानंकालाट्ठञितिठ
ञ्बाधनार्थं तच्चस्वरूपमात्रग्रहणेनुपपन्नामितिकालवाचिभ्यष्ठञितिसर्वोव्याख्यातोव्याख्यातृभिः तथाच
हरदत्तःअर्थग्रहणात्तेभ्यष्ठञःप्रसंगइतितेभ्यःसंधिवेलादिशब्देभ्यःस्वरूपमात्रग्रहणेचप्राप्तायानुपपत्ते

405
1942

त्तन्नियममात्रबाधनेनशांतेः कालावाचित्वाविशेषाद्विशेषशब्दवत्कालशब्दस्यापितत्रग्रहणंसंभवत्येवतेअकालि
केष्वाकालिकीव्याप्तिस्स्याद्यभियुक्तप्रयोगोप्युपपद्यते अनेनैवाभिप्रायेणाकालिकेष्वास्त्रेइक्त्वपाठेवार्तिकका
रेरुक्तंकालइतिलोकेविप्रकर्षउच्यतेतत्रसंभवंकालाठञिति कालिकंनकालिकमकालिकमिति यद्वाचैत्रादिशब्दा
नांवृद्धिर्यस्याचामादिस्तद्वृद्धमितिवृद्धत्वात् वृद्धाछइतिछप्रत्ययेनभाव्यंचैत्रीयावैशाखीयेति अकृतानामपिचा
दैत्वावृद्धिसंज्ञात्वाद्वृद्धत्वेपिचैत्रादिशब्दानांतदाद्यस्यैकारादेर्वृद्धित्वेसंभवत्येव व्याकरणमर्यादायानुकृतमप्यस्ते
व सर्वथाचैत्रीवैशाखीत्यादितिथिविषयस्याणोनुपपत्तिः अतएववैशाख्याममावास्यायांसप्तदशमानुतीस्त्रि
वत्साअप्रवीताउपाकरोतीत्यादिपंचशारदीयविधिगतस्यामावास्याविषयस्यवैशाखीशब्दस्योक्तन्यायेनमा
सयोगनिमित्तत्वासंभवमभिप्रेत्यनक्षत्रयोगनिमित्तत्वेनव्याख्यानंकृतंनिबंधनपंजिकायांपंचशारदीयाधि
करणेइति इदंचदूषणमन्यातिथिविषयेमासयोगनिमित्तेणंतस्यैवप्रोष्ठपद्यादिशब्दस्यमुन्यभियुक्तप्रयोगे
सतिनलगतिप्रयोगमूलायाव्याकरणस्मृतेस्तद्बाधाक्षमत्वात् नहिक्वचिदपिवैशाखीयेत्यादिःप्रयो
गोदृश्यते सत्यपिवातस्मिन्पूर्वप्रयोगादणपिस्यादेव नचव्याकरणेपिठञ्सूत्रेछसूत्रेचवैशाखिक्यादि
शब्दाउदाहृताः प्रत्युतेतादृशप्रयोगपपत्यर्थमेवक्वचिदपवादविषयेप्युत्सर्गःप्रवर्ततइत्येवाभियुक्तैरुक्तं
छप्रसंगस्तुचैत्रादिशब्दानांव्याकरणेपिसंज्ञात्वाभ्युपगमात्संज्ञानांचवानामधेयस्यवृद्धसंज्ञेतिपक्षेवृ
द्धत्वाभावस्याप्युक्तत्वात्परिहर्तुंशक्यते पंजिकायांगतंपंचशारदीयविधिगतस्यैववैशाखीशब्दस्यनक्ष
त्राणंतयान्याख्यानं चैत्रवैशाखादिशब्दानांनक्षत्रयुक्तपौर्णमासीयोगनिमित्तत्वमेवयथाव्याकरणमण्
दृश्येनासिद्धांतेयदृश्यतेतदाश्रवणेनैवलाघवोपपत्त्याअण्दृश्यालोचनेनहितादृशंमासंप्रतिपद्यपुनरणंत
रेणतत्संबंध्यमावास्याप्रतिपत्तौविलंबितताएकेनैवनक्षत्राणांतत्प्रतिपत्तौतुशीघ्रत्वमिति एवंसत्याश्वयु

407
1942

ज्याममावास्यायामितिराजसूयसंबंधिमानवसूत्रगतमाश्वयुजीपदमप्येवमेवव्याख्येयं अत्रेकश्चिद्दूषणमुक्तं
धनुस्थेवृश्चिकस्थेवासूर्येयामावास्यातस्यांविशाखानक्षत्रंभवति अमावास्यांतेचंद्रार्कयोरेकनक्षत्रावस्थाननियमात् न
चैतादृश्यामावास्याः पंचवर्षाण्यविछेदेनप्राप्यंतइति कथंविशाखायुक्तास्वमावास्यासुपंचभिर्वर्षैःपंचक्रत्वाभवतीति
तत्रकेश्चित्समाहितं अविछेदस्यास्याःशब्दार्थस्योचित्यमात्रादवगतस्यशब्दतोप्रागवगततादृशामावास्याद्रूपकाल
वशेनबाधएवेतियेषुवर्षेषुतादृश्योमावास्यालभ्यतेतैर्विछिन्नैरेवपंचभिर्वर्षैःपंचक्रत्वाभवतीति तत्सर्वंदूषणंभू
षणंचपंचशारदीयप्रयोगस्वरूपाज्ञाननिबंधनं एवंहितत्स्वरूपंयाज्ञिकमते वैशाख्याममावास्यायांपंचशारदीये
नयक्ष्यइतिसंकल्प्यसप्तदशवत्सतरीणांसप्तदशोक्ष्णांचपशुबंधविधिनापर्यग्निकरणपर्यंतंमनुष्य:सहकृत्वाउक्षा
णउत्सृज्यस्थाप्यंते वत्सतरीयागास्त्वांताक्रियंते एवमेवद्वितीयेतृतीयेचतुर्थेचवर्षे प्रतिवर्षंवत्सतर्योन्याःउक्षा
णस्तएववचनबलाद्व तेषांप्रतिवर्षंपर्यग्निकरणांतसंस्कारावृत्तिः ततःपंचमेवर्षेपंचक्रत्वाक्तचतस्रषुत्रयस्त्रयः
पंचम्यांपंचेत्येवंतएवोक्षाणःसवनीयाभवंतीति मीमांसकमतेप्रतिवर्षमुक्षपशुयागाअपिसमाप्यंतएवपरंप
र्यग्निकरणांतांगरीत्या प्रतिवर्षमन्येन्यएवोक्षाणदेवतोद्देशेनत्यक्तानांपुनस्त्यागासंभवात् पंचमेवर्षेत्तुल्या
स्त्वन्यएवोक्षाणःकृत्स्नांगकलापेनसवनीयाभवंतीति तत्रप्रतिवर्षंक्रत्वेत्येतद्दैवतावदयुक्तं किंप्रतिवर्षंपंचप
चक्रत्वाउतैकैका नतावदाद्यःपंचाहत्वव्याघातात् पंचाहाहीनमध्येत्वयंहोत्रध्वर्युछंदोगसूत्रेषुपठितः ना
पिद्वितीयःप्रमाणाभावात् प्रतिवर्षंहिपशुयागाएवंश्रूयंते क्रत्वापंचमेवर्षेवैशाख्यपेक्षावोपक्रमएवनक्रत्वा
स् एवंचोपक्रमवर्षमारभ्यपंचमेवर्षेपियदिविशाखायुक्तामावास्यानभवतितदापिनदोषःक्रत्वाभवंत्येवतत्रत
दनपेक्षणात् तथाचमानवसूत्रेवैशाख्याममावास्यायांयजनीयेहनिपशुंबंधायोपवसतइत्युपक्रम्यपंचमेसो
मास्तस्मिन्यजनीयेदीक्षतेष्टादशदीक्षाद्वादशोपसदविद्दग्निष्टोमःपंचदशउक्थ्यःसप्तदशउक्थःपंचदशउ

का०त० स्थः सप्तदशीतिरात्रेऐंद्राग्नाउताउक्षाणः सवनीयास्त्रयस्त्रय एकैकस्मिन्नहनि पंचोत्तमइति एतत्सूत्रानुसृतश्रुत्यनु
२०८ सारिपार्थसारथिग्रंथानुरोणाचयमेतत्प्रयोग क्लृप्तिरुक्ता तांड्यश्रुतिद्राह्यायणकात्यायनापस्तंबसूत्रेषु पंचवर्षा
णि पशुबंधाः षष्ठवर्षे स्कन्नाः आश्विनशुक्लपक्षे सप्तम्यामष्टम्यां वा पशुबंधोपक्रमः षष्ठवर्षे कार्तिके स्कन्ना
इत्युक्तमिति तेन निरूढचैत्रादिमासयोगानिमित्तत्वे चैत्र्यादिशब्दानां न काप्यनुपपत्तिः प्रत्युत नक्षत्रयोगनिमि
त्तचैत्र्यादिशब्दवाच्यपौर्णमासीयोगनिमित्तत्वं चैत्रादिशब्दानामेव कास्मिंश्चिन्मासव्यक्तिषु अयोगव्यावृत्त्याप्य
संभवान्नसंभवति येन तद्द्वारा चांद्रमासएव ते मुख्या भवेयुः किंतु रूढाः प्रयोगाविशेषात्सौरचांद्रयोरपि मुख्या
इति अत्र ब्रूमः सत्यं पौषी रात्रिर्माघी रात्रिरित्यादिवत्पौर्णमासीविषया अपि चैत्र्यादिशब्दास्तत्तन्नक्षत्रयुक्त
तद्व्यक्तिवचना एव नक्षत्रयुक्तायुक्तपौर्णमास्यनुगतस्य कस्यचित्सामान्यस्यासंभवात् तत्संभवे हि योगा
लभ्यस्यापि तस्य योगरूढत्वस्वकारेण रूढ्यंशलभ्यतामंगीकृत्य तेन रूपेण योग्यतया नक्षत्रायुक्तव्यक्तेर
पि वाच्यता स्यात् कथं तर्हि रूढ्यंशलभ्येन पद्मत्वेन पंकजेन ते पि योग्यतामादाय स्थलपद्मेपि पंकजशब्द
प्रयोगो न भवति भवत्येव सोपपदस्त्विति केचित् वस्तुतस्तु स्थलजलजपद्मयोः पद्मत्वावांतरजातीभिन्ने
एव जलवृत्तिरेव सा जातिः पंकजशब्दे रूढ्यंशवाच्येति न स्थलजे तत्प्रयोगः चैत्रादिशब्दास्तु व्याकरणस्मृतिवशा
त्पौर्णमासीत्वोपाधिकनक्षत्रविशेषयुक्तकालयोगनिमित्तका अपि कदाचित्केनापि तद्योगेन तद्योगरहिता
स्वपि व्यक्तिषु वर्तितुं शक्नुवंति मीनादिस्थादित्यारब्धशुक्लप्रतिपत्त्वस्य युक्तायुक्तमासव्यक्तिवृत्तेः सामान्यस्य
तत्रसंभवात् ननु संभवदप्यसंनिहितं सास्मिन्निति सर्वनामार्थवृत्तिना तद्धितेन कथमुच्यतां तेन त्वामिक्षाधि
करणन्यायेन प्रकृत्यर्थविशिष्टा बुद्धिस्थरूपालिंगिता बुद्धिस्था व्यक्तिर्वा अग्रेप्यधिकरणन्यायेन प्रकृत्यर्थवि
शिष्टमात्रं वोच्यते तत्र च पूर्वोक्तरीत्या योगरहिताव्यक्त्योऽयोगव्यावृत्त्यापि कथमुच्यतामिति चैत्रादिशब्दा २०८

409 / 194

अपि यौगिकत्वे तुल्याएवं चैत्रादिशब्दैः वक्तव्यो वा विशेषः उच्यते चैत्रादिशब्देष्वनुशासनक्लेशाद्यौगिकत्वं संज्ञा
त्वोक्त्या रूढत्वं च पाणिनेरभिमतं तत्र रूढ्यंशेन पूर्वोक्तं सामान्यं पंकजशब्दे पद्मत्ववल्लभ्यते तेषु चैत्रादिशब्दास्त्वित
रतिथिषु नक्षत्रयोगमात्रेण वर्तमानाः पौर्णमासीष्वेव विशेषतोऽनुशिष्टास्तास्वपि च युक्तायुक्तवृत्तेः कस्यचित्सा
मान्यस्यासंभवस्योक्तत्वादितरतिथिसाधारणेन नक्षत्रयोगमात्रेणैव वर्तमानाः केवलयौगिका युक्तं यन्नक्षत्रयु
क्तास्वेव व्यक्तिषु वर्तंतइति न चैतादृशामासाः कदाचित्तत्तन्नक्षत्रयुक्तपौर्णमासीयुक्ताः भवंत्येवेत्यविनाभावादेवत
दुभसंभवात्पुनर्योगांशेन तदभिधानं व्यर्थमिति वाच्यं नहि तल्लाभायापूर्वा काचिच्छक्तिः कल्पनीयास्ति येनान्य
लभ्यत्वात्तस्य सा न कल्प्येत प्रत्युत्तत्तत्प्रकृतिप्रत्ययशक्तिभ्यां नक्षत्रयुक्तपौर्णमासीयुक्ते मासे प्रतीतेः प्रसंगा
तिप्रसंगपरिहारार्थं पूर्वोक्तसामान्ये समुदायशक्तिरेव कल्प्यते योगमात्रनिमित्तत्वे हि तद्रहितासु व्यक्तिषु प्रयो
गो न स्यात् कार्त्स्न्येन पौर्णमासीनां तत्तन्नक्षत्रयोगस्य च प्रायेणादर्शनादेकदेशयोगस्य च नक्षत्रांतरप्रयुक्तमासे
पि नक्षत्रांतरस्य दर्शनात्तत्रापि मासांतरसंज्ञाप्रयोगः स्यात् न च मीनादिस्थ इति वचनेन सापि क्लृप्तैवेति वाच्यं
तस्य गुणाश्रयोद्रव्यमितिवल्लक्षणकथनमात्रार्थत्वेनोपपत्तेस्तद्विषयशक्तिप्रतिपादनपर्यंतत्वाभावात् यत्त
त्रउपीभूत वाहनेनोक्तं मीनस्थादित्यारब्धशुक्लप्रतिपत्त्वापेक्षया मीनस्थादित्यारब्धत्वं तदवच्छिन्नकालत्वं वा
लघु तत्र पूर्वं सौरेप्यस्तीति तेन रूपेणैक्याद्यौगिकानामपि चैत्रादीनां चांद्रवत्सौरेपि प्रवृत्तौ न कोपि विरोधः उत्तरं
त्वावश्यकप्रथमोपस्थितिकं विशेषणत्वात् तच्च सौरस्वरूपमेवेति प्रथमातोपस्थिते तत्रैव तेषां वृत्तिर्मुख्या स्यादिति
तदयुक्तं लघुगुरुधर्मयोरेकविशेषणत्वे हि लाघवगौरवचिंता अत्र तु मीनस्थादित्यारब्धं प्रतिपद्विशेषणं आरंभ
पदेन प्रतिपदुपादानात् अन्यथारंभवाचिनः प्रथमलक्षणपदस्य वैयर्थ्यापत्तेः तेन येषां मासानामारंभभूत प्रति
पदारंभ इत्यर्थः अतएव च शुक्लप्रतिपल्लभ्यते दर्शाद्दर्शश्चांद्रइति दर्शस्यावधिमात्रत्वेन मासस्य तत्रैवारंभात्

इंद्राग्नीयत्रहूयेतेइतिवचनात् मीनादिस्थादित्योप्यन्यविशेषणत्वेनोपस्थितोनवाच्यत्वाहः चैत्रादिशब्दानांहिकेवल
योगिकत्वेप्रसक्तयोरप्रसंगातिप्रसंगयोः परिहारार्थप्रवृत्तिनिमित्तांतरगवेषणायांव्यासवचनाच्चैत्रादिलक्षणत्वेनो
पस्थितंमीनादिस्थादित्येत्यादितथाश्रीयते तत्रवचनाद्यावद्यादर्शनविशेषणविशेष्यभावेनोपस्थितंतावतिताद्दृक्
विशेषणविशेष्यभावापन्नेप्रतिपत्तिनिमित्तत्वेनाश्रीयमाणेलाघवगौरवयोः प्रथमजघन्योपस्थितिविषयत्व
स्यवाविनिगमकस्यकावकाशः यद्यपिचव्याकरणेसास्मिन्पौर्णमासीतिसंज्ञायामितिसूत्रेचैत्रादीनांमासार्द्धमा
ससंवत्सरसंज्ञात्वमुक्तं अतएवशिष्टैरर्धमासादिव्यावृत्त्यर्थं माघेमासीत्यादिमासपदमपिप्रयुज्यतेसंकल्पवाक्येत
थाप्यनेननिमित्तेनमासेष्वेवनितुपपदाद्वृत्तिस्तेषां अतएवाभिधानिकाः पुष्ययुक्तापौर्णमासीपौषीमासेतुयत्र
सा नाम्नासपौषोमाघाद्याश्चैवमेकादशापरइति यत्तुमार्गशीर्ष्योमृगशिरसंयुक्तायांपौषीचेत्पुष्ययुक्ताः
स्यादित्यादिविष्णुवचनंतत्तन्नक्षत्रयुक्तपौर्णमासीव्यक्तिप्राप्त्यर्थं महाकार्तिक्यादिलक्षणवत् नक्षत्रायुक्त
पौर्णमास्यतिरिक्ततिथिविषयस्तुप्रौष्ठपद्यादिशब्दप्रयोगोयौगिकमासनिमित्तकएवततीयेणाव्याख्यातव्यः॥
तेनवृद्धैरपिस्वीकाराच्चैत्रादिशब्दानांपाणिनिपुरस्कारस्कारेणयौगिकत्वेपिनकाप्यनुपपत्तिः यद्वाचैत्रादयोन
चित्राद्येकैकनक्षत्रयोगनिमित्तकाः पौर्णमासीद्वारायेनव्यभिचारःस्यात् किंतुचैत्रवैशाखज्येष्ठाषाढश्रवणा
श्विनाश्चित्रास्वातीविशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाश्रवणधनिष्ठाद्विकान्यतरयोगनिमित्तकाः भाद्रपदा
श्विनौशततारकापूर्वाभाद्रपदोत्तरभाद्रपदारेवत्यश्विनीभरणीकृत्तिकान्यतरयोगनिमित्तकौकार्तिकमार्गशीर्ष
पौषमाघाः कृत्तिकारोहिणीमृगशीर्षार्द्रापुनर्वसुपुष्याश्लेषामघाद्विकान्यतरयोगनिमित्तकाः फाल्गुनश्चपूर्वो
त्तरफल्गुनीहस्तत्रिकान्यतरयोगनिमित्तकः अंत्योपांत्योत्रिभौज्ञेयौफाल्गुनश्चत्रिभोमतः शेषामासाद्विभा
ज्ञेयाः कृत्तिकादिव्यवस्थयेतिच्यवनवचनात् पौर्णमासीद्वारकंचमासानाद्विभत्वादिदृष्टेचित्रादितारणांपू २०९

णपर्वेंदुसंगते मासाश्चैत्राद्योज्ञेयास्त्रिकैःषष्ठांत्यपंचमाइतिसंकर्षणकांडवचनात् पूर्णपर्वेंदुः पौर्णमासीचंद्रःसं
यतेयतस्ततश्चैत्रादयः त्रिकैस्तेनसंगतेःभाद्रफाल्गुनाश्विनाब्रुत्यर्थः द्विकानांत्रिकाणांवान्यतद्विवक्षितंतदपिपौर्ण
मास्यंतेसूर्यराशिव्यवस्थयाव्यवस्थितं सूर्याच्चंद्रस्यसप्तमराशिस्थितिप्रयोजकं तेनकार्तिकीप्रकृत्ययदायाम्यंतु
भवतिक्वचित्तस्यामितिपद्मपुराणंनविरुध्यते आदिभागेयाम्यस्यभरण्याःसंभवात् इदंचद्विभत्रिभत्ववचनंन
रोहिण्यः आर्द्रइत्यादयोपिशब्दामासविषयाभवंतीत्येवमर्थंतेषांकुत्रापिताद्दशानामप्रयोगात् किंतुकार्तिकादि
शब्दाएवनकेवलंकृत्तिकादियोगनिमित्तकाः किंतुरोहिण्यादियोगनिमित्तकाःअपीतिज्ञापनार्थं उपपद्यतेचैत
त्कार्तिकादिप्रकृतिकार्तिक्यादिप्रकृतिभूतेभ्यःकृत्तिकादिशब्देभ्योरोहिण्यादिलक्षणोत्तरंप्रत्ययोत्पत्तेः नचयु
गपद्वृत्तिद्वयविरोधः रोहिण्यादिसाहित्येनस्वार्थस्यैवलक्ष्यत्वात् मन्नोतास्थाग्निशब्दइवसोमसहितस्याग्नेः
युगपद्यदधिकरणवचनतायां द्वंद्वइवचपरस्परसाहित्येनद्वंद्वपदार्थयोः नचेयंसांप्रतिकीलक्षणाकिंतुद्विभ
त्वादिवचननिबद्धाअनादिरितितत्सापेक्षस्याप्यनादिप्रत्ययप्रकृतित्वाविरोधः दृष्टंचप्रकृतिगतलक्षणावृ
त्तिसापेक्षमपिप्रत्ययानुशासनंपुंयोगादाख्यायामितियथा इदंहियापुमाख्यापुंयोगात्स्त्रियांवर्ततेतस्मा
ङीष्स्यादितिव्याख्यातं तेनपुंवाचिप्रातिपदिकमेवतत्संबंधिनिस्त्रीद्रव्येवर्त्तते लिंगमात्रंतुङीपोच्यते तच्च
लक्षणयैववर्ततेनान्यथा नचास्त्रियामितिलिंगविशिष्टंद्रव्यंङीपैवोच्यतांतस्यैवसमभिव्याहारादेवकृत्तद्धित
समासेष्विवप्रकृत्यर्थविशिष्टत्वावगमात्तत्संबंधप्रतीतिरितिवाच्यं तथासतिस्त्रियामित्यधिकारसूत्रेइतरत्र
लिंगमात्राधिकारकत्वादत्रचलिंगविशिष्टद्रव्याधिकारकत्वाद्वैरूप्यापत्तेः प्राधान्यप्रतीतिविरोधाच्च स्त्रीप्राप्त
नांसत्यपिप्रत्ययत्वेप्रधानभूतार्थाभिधायित्वाभावात् तथाप्रतीतिस्तदधीनत्वाच्चगुणप्रधानविवेकस्य प्र
कृतिप्रत्ययांशवाच्यविवेकवत् अतएवप्रकृतिप्रत्ययौप्रत्ययार्थंसहब्रूतस्तयोःप्रत्ययार्थःप्राधान्येनेतिप्रस

411/1942

का०त०
२०१०

यार्थवचनं प्रधान्यवचनं चकेषांचिद्वैयाकरणानां प्रत्याख्यातं पाणिनिना प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वा
दिति अशिष्यमित्यनुवर्तते तथा अयःशूलदंडाजिनाभ्यां ठक्ठञाविति अनेनत्वनुशिष्टावायःशूलिको दंडाजि
निकइति शब्दौ साहसिकदांभिकार्थकौ व्याख्यातौ तेनतत्र प्रकृतिभूताभ्यामयःशूलदंडाजिनशब्दाभ्यां साहसदंभौ
लक्ष्येते पार्श्वेनान्विछतीत्येतत्पूर्वसूत्रगते च पार्श्वेनार्थानन्विछति पार्श्वक इत्युदाहरणे पार्श्वशब्दस्य यदनृजूपा
यार्थत्वेन व्याख्यानं तद्गौण्येव पार्श्वे त्वनृजु भवतीति आहत्य च कालाद्वत्रिति सूत्रे गुणवृत्त्यापि कालेवर्तमाना
त्प्रत्ययइष्यतइत्युक्त्वा कादंबपुष्पिकं व्रैहिपलालिकमित्युदाहृतं इत्यादीनि बहून्युदाहरणानि व्याकरणाभियुक्तैः
शृदर्शितानि तेनयज्जीमूतवाहनेनोक्तं नचप्रकृतिपदस्य गौणलाक्षणिकवृत्त्याश्रयणेनयौगिकत्वं क्वचिदपि
व्युत्पन्नमिति तदेवंविधानुशासनानालोचननिबंधनं तेनतत्तद्विकत्रिकांतर्गतान्यतरनक्षत्रयोगस्त्तत्तन्मासपौ
र्णमासीं भवत्येवेति योगोप्यव्यभिचारी यत्वेतस्यापि व्यभिचारोदाहरणं जीमूतवाहनेनोक्तं वृश्चिकस्थे सूर्ये यापौ
र्णमासी तदंते चंद्रेणावश्यं वृषराशौस्थातव्यं साचमार्गशीर्षसंबंधिनी यदा तदा मृगशिरोर्धसंबंधिनितत्र ए
वं च चतुर्दशोत्तरसहस्रशकाब्दे वृश्चिकस्थे सूर्ये पौर्णमास्यां मृगशिरःसंबंधएव नास्तीति तदतिवेलग्रहणादि
वदानिष्टसूचकमुत्पातरूपमिति बोद्धव्यं प्रकृतेरन्यत्वमुत्पात इति सामान्यलक्षणात् तेनचैत्रादिशब्दायदियो
गरूढास्तदुभयवशाच्चांद्रमासमात्रवचनाः यदि केवलयौगिकास्तदायोगवशादेव भवंतु वा केवलरूढास्तदा
पि चांद्रएव मुख्यात् तथाहि नतावत्सौरचांद्रोभयवचनत्वमेकेननिमित्तेन संभवति तदसंभवात् मीनादिस्थरव्या
रब्धत्वमात्रस्याति प्रसक्तत्वात् भिन्नभिन्ननिमित्तेनोभयवचनत्वे गौरवं एवंसति रवेस्तत्तदेकराववस्थानाव
वच्छेदककालत्वमीनादिस्थादित्यारब्धशृक्लप्रतिपत्कत्वयोर्मध्ये किं चैत्रादिपदप्रवृत्तिनिमित्तं येन सौरवच २०१०
नत्वमेव चांद्रवचनत्वमेव वा स्यादिति वीक्षायां मीनादिस्थवचनावगतमुत्तरमेव प्रवृत्तिनिमित्तयुक्तं नपू

413
1942

र्वं शास्त्रस्थावगतनिमित्तत्वादिति न्यायात् नहि चैत्रादीनां सौरे प्रवृत्तौ निमित्तं पूर्वं कुतश्चिद्वचनादवगतं एक
राशौ रविर्यावत्कालं मासः सभास्करइत्यस्य सौरपदप्रवृत्तिनिमित्तावेदकत्वात् मीनादिस्थवचने च चांद्रमासा
इतिस्वरूपकथनं द्वादशेति च सर्वदा चैत्रत्वादयउपाधयः संज्ञाश्च द्वादशैवेत्येवमर्थं अतएव कादाचित्कस्या
धिकमासस्य स्वरूपतो भिन्नस्यापि तेन रूपेणोत्तरमासेनैक्यमभिप्रेत्य षष्ट्या तु दिवसैर्मासः कथितो बादरायणे
रित्युक्तं नतु वस्तुतऐक्यं अस्ति त्रयोदशो मासइत्यादिश्रुतिविरोधात् यस्मिन्त्वे द्वादशैकश्च वयव्ययइत्या
दिस्मृतिविरोधाच्च संज्ञैव प्रयोजनं च चातुर्मास्यव्रतादीनामधिकमासेप्यनुष्ठानासिद्धिर्वत्सरादेर्मासद्व
यात्मकत्वसिद्धिश्च स्मृत्यंतराच्च चैत्रादीनां चांद्रवाचित्वागमात्तदुपपादकं चांद्रगतमेव पूर्वोक्तं प्रवृत्तिनिमि
त्तं युक्तं तथा च इंद्राग्नीयत्र हूयेते इत्यादिशृक्लादिमात्रवृत्तिमाससामान्यलक्षणमुक्त्वा मासविशेषविहिते
सांवत्सरिकादावपि हेतुपूर्वं शृक्लादि चांद्रस्यैव ग्रहणं वदन् श्चैत्रादिशब्दानामपि तत्रैव मुख्यत्वं सूचयति
लघुहारीतः चक्रवत्परिवर्तेत सूर्यः कालवशाद्यतः अतःसांवत्सरं श्राद्धं कर्तव्यं मासचिह्नितं मासचिह्नं तु कर्त
व्यं पौषमाघद्वयमेव हि यतस्तत्र विधानेन समासः परिकीर्तितइति अस्यार्थः यतः सूर्यः कालवशाच्चक्रवत्क
दाचित्तीव्रतरगत्या कदाचिन्मंदगत्या परिवर्तेत गच्छेत् अतः सांवत्सरश्राद्धादि इंद्राग्नीत्यादिना पूर्वमुक्तो यो मासः शृक्लादिश्चांद्रस्त
च्चिह्नितमेव कर्तव्यं अयं भावः यदि वार्षिकश्राद्धं यद्राशिस्थे सूर्ये यत्पक्षगतायां यस्यां तिथौ निधनं तद्राशिस्थे सूर्ये तत्पक्षग
तायां तस्यां तिथावित्येवं सौरमाने न क्रियते तदा यदि कदाचित्सूर्यस्तुलादिमेषपर्यंतं तीव्रं गच्छंस्तां तिथिं न स्पृशेत्तदा तस्य लो
पः प्रसज्येत तद्राशिस्थे रवौ तस्यास्तिथेरलाभात् यदि वा कदाचिन्मेषादितुलापर्यंतं मंदं गच्छंस्तां तिथिं द्विस्पृशेत्तदा गुणभू
तकालानुरोधेन प्रधानवृत्तेरन्याय्यत्वात्तत्तत्पक्षकर्तव्यस्य श्राद्धस्यापि विनिगमः स्यात्तत्कालावच्छिन्नस्य जीवनस्य निमित्त
त्वाद्वा आवृत्तिः स्यात् चांद्रमानग्रहणे तु तत्र लोपादिकमपि न प्रसज्यत इति हेतुवशाच्च यत्र लोपादिप्रसक्तिः तादृशमन्य

का०त० दपितत्तन्मासंबंधितत्तत्तिथिविशेषविहितं मासिक जन्मतिथिकर्तव्यादिकं सांवत्सरिकग्रहणेनोपक्षते मासासामान्यविहितत्व
२११ न्नमव्यावृत्त्यर्थं पूर्वानुवादेन विशेषविधिः यन्मासचिह्नं कर्म सांवत्सरिकादि कर्तव्यं तत्पौषमाघाद्यं पौषादिविशेषमासचिह्नितं
कर्तव्यं चैत्रादातिवक्तव्ये पौषमाघादित्वोक्तिः सौरयोस्तयोः सर्वथा पुष्यमघायोगासंभवाभिप्रायेण एवमाश्विनेपि तच्चोपपा
दितं प्राक् चैत्रादौ तु सौरेपि चांद्रवत्कदाचित्तत्तन्नक्षत्रयोगः संभवतीति ननु नायं नत्यत्रानुयाज्यसक्षान भवतीतिवत्सरमा
र्थहेतुर्येनान्यविषयेपि साधकस्यात् न्यायाभावात् तत्र हि दर्शपूर्णमासयोः प्रयाजइत्यार्थमनुयाजार्थं च चतुर्गृहीतमिलि
त्वोपभृत्यष्टगृहीतमासीत अष्टावुपभृति गृह्णातीत्यष्टत्वस्य चतुष्टयद्वयलक्षणार्थत्वात् आतिथ्यायां लिङांतायामनुया
जाभावेन तदर्थद्वितीयचतुर्गृहीताभावादुपभृत्यपि प्रयाजार्थमेकं चतुर्गृहीतमेव भवतीति हेत्वर्थः स च न्याय्य एव प्रधानप्र
युक्तत्वादंगमात्तदभावे लोप उचित एवेति तेनान्यत्रापि यत्रानुयाजाभावस्तत्र तदर्थचतुर्गृहीताभावात् सर्वात्मानां चतुर्गृ
हीतत्वं सिद्धं भवतीति अत्र तु यदि केनचित्प्रमाणेन सांवत्सरिकादौ सौरग्रहणं स्यात्तदा प्रमाणवशाद्भवतु कदाचिल्लोपा
दिकं तेन प्रमाणाभाव एव वक्तव्यः इत्युक्तं यतस्तत्र विधाने नेति विधानेन विधायकेन वेदवचनेन यतः स एव शुक्ला
दिश्चांद्रश्चैत्रादिशब्दवाच्यत्वेन द्योतितस्तत्र सांवत्सरिकादावप्यनुक्तसौरादिमानविशेषे गौणमुख्यन्यायावष्टंभेन सत्
वोक्तो भवतीति तच्च वेदवचनं या वैशाखस्यामावास्या रोहिण्या संपद्यते तस्यामादधीतेति सौरे हि वैशाखे मेषस्थः सूर्यः न च
तदमावास्यायां वृषराशिभोग्यरोहिण्यामवस्थानं चंद्रस्य संभवति सूर्याचंद्रमसोः परः संनिकर्षः सामावास्येति गोभिलवचना
दमावास्यांते चंद्रस्य सूर्यराशावावस्थाननियमात् संभवति तु शुक्लादौ चांद्रे मेषादिस्थे सवितरि यो यो मासः प्रवर्तते चांद्रः
चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वे धिमासः स्यादिति वचनाद्वैशाखसमाप्तौ चंद्रस्य वृषराश्यवस्थाननियमात् तेनात्र शुक्लादौ वैशा
खशब्देन शुक्लादिश्चांद्र एव गृह्यत इति वैशाखशब्दस्य तावदेतच्छ्रुतिबलादावश्यकीत्वच्छक्तिः तथा च तत्सामान्यादि
तरेषु तथात्वमिति चैत्रादिशब्दानामपि तत्रैव शक्तिर्युक्ता दैवे कर्मणि पित्र्ये च मासश्चांद्रमसः स्मृत इति सामान्यतः आद्वि २११

के पितृकार्ये च चांद्रो मासः प्रशस्यते प्रतिसंवत्सरः श्राद्धे मासः श्चांद्रमसः स्मृत इत्यादीनि च विशेषतः पितामहगार्ग्यब्रह्मसिद्धां
तादिवचनानि उत्सर्गतः सर्वकार्येषु चांद्रस्य मासस्य विधानानि यत्तु यस्मिन् राशौ गते सूर्ये विपत्तिं याति मानवः तेषां तत्रैव कर्त
व्या पिंडदानोदकक्रियेति व्याघ्रवचनं तस्य विशेषो वक्ष्यते ननु या वैशाखस्येति श्रुतिः साक्षात्तावद्वैशाखशब्दस्यैव चांद्रवाचि
त्वं गमयति चैत्रादिशब्दानां तु तत्सामान्यादुक्तं व्यं तपस्तपस्यौ शैशिरावृतू मधुश्च माधवश्च वासंतिकावृतू शुक्रश्च शुचि
श्च ग्रैष्मावृतू अथैतदुदगयनं देवानां दिनं नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमंति
कावृतू अथैतद्दक्षिणायनं देवानां रात्रिरिति श्रुतिस्तु तपस्तस्यादीनां द्वादशानामपि सौरवाचितां गमयति अयनस्य सौर
त्वेन तद्घटकानां मासानामपि तपस्तपस्यादीनां सौरत्वस्यावश्यकत्वात् तपस्तपस्यादिपर्यायाश्च माघादय इति तेषामपि
सौरवाचितैव पर्यायत्वं चोक्तं छंदे: चैत्रो मासो मधुः प्रोक्तो वैशाखो माधवो भवेत् ज्येष्ठमासस्तु शुक्रः स्यादाषाढः शु
चिरुच्यते नभो मासः श्रावणः स्यान्नभस्यो भाद्र उच्यते इषश्चाश्वयुजो मासः कार्तिकश्चोर्जसंज्ञकः सहो मासो मार्गशी
र्षः सहस्यः पौषनामकः माघमासस्तपाः प्रोक्तस्तपस्यः फाल्गुनः स्मृत इति अतश्च द्वयोरपि चांद्रसौरगोचरप्रसिद्ध्योः
शास्त्रीयत्वाविशेषेपि भूयोविषयत्वात्सौरप्रसिद्धिरेव पुरस्कर्तव्येति सौरवचना एव माघादयो युक्ताः यद्वा पूर्वा श्रुतिर्वैशा
खमुखेनेतरेषां चांद्रवचनत्वं गमयति द्वयं च पर्यायत्वमुखेन माघादीनां सौरवचनत्वमिति द्वयोरपि परोक्षप्रवृत्तित्वेन तुल्यत्वा
दुभयवचनत्वमस्तु न चांद्रमात्रवचनत्वमिति जीमूतवाहनः तदेतत्तपस्तपस्यादिश्रुत्यपेक्षया वैशाखश्रुतेर्बलीयस्त्वं
यल्लघुहारीतवचनगतेन विधानशब्देन सूचितं तदनालोचननिमित्तमभिधानं अवश्यं हि वैशाखशब्दस्य चांद्रे तपस्तप
स्यादिशब्दानां वा सौरे गौणता वक्तव्या सा च न विधौ परशब्दार्थः प्रतीयत इति न्यायाद्विधिवाक्यगते वैशाखशब्देन युक्ता किं
त्वर्थवादगतेषु तप आदिशब्देष्वेव युक्ता विध्यर्थवादत्वप्रयुक्तं हि बलाबलं स्वरूपगतं भूयोल्पत्वकृतं तु अन्यापेक्षत्वादन्यद्वार
कं तस्माच्च स्वरूपगतं तज्ज्यायः यत भूयोऽर्थवादगतपदानुरोधेन यावतोऽश्वान्प्रतिगृह्णीयादिति विध्येकवाक्यतापन्नेपदे प्र

का॰त॰ तियाहृयेदिति जघन्यवृत्त्यापणं तदर्थवादपदानामुपक्रमगतत्वात् नतुभूयस्त्वात् अतएववेदोपक्रमाधिकरणेनैवगतार्थत्वंतत्रोक्तं
२१२ नतुभूयोल्पविरोधन्यायेन तपआदिश्रुतिश्चायनारंभकरणां मासानामनुवादिका अयनारंभकाश्चसौराएवमासास्तत्रततोक्ता
इतितद्वशादेवतेषुतपआदिशब्दागौणाः तथाविष्णुपुराणे सौरमाससमुपक्रम्योक्तं द्वौमासावर्कजावृतुः स्तुद्वयंचाप्ययनंद्वेः
यनेवर्षसंज्ञिते कर्कटावस्थितेभानौदक्षिणायनमुच्यते उत्तरायणमप्युक्तंमकरस्थेदिवाकरइति दक्षिणस्यामयनंतदुपक्रमद
र्थः एवमुत्तरायणंतथाहरिशयनावपिचांद्रस्यैवविधानं शेतेविष्णुःसदाषाढेभाद्रेचपरिवर्तते कार्तिकेपरिबुध्येतशुक्लप
क्षेहरेर्दिनइतिमत्स्यपुराणे सौरपक्षेसंदेह्यनुपपन्नंतत्रकर्कटादावपितत्संगात् यत्तुपंचमासान्हरोस्कृत्देशेतत्रभयंभ
वेत् ब्रह्महाचभवेद्राजा संग्रामेभयमाप्नुयादिति नरसिंहपुराणं चातुर्मास्यमध्येमलमासापाते प्रबोधोत्कर्षनिषेधकंत
त्सौरमासग्रहणार्थमिव शयनादिविषयेभासते तदाषाढस्याधिकत्वे प्रथमाषाढे शयननिषेधकं तत्रतत्करणेपंचमासव्या
पिस्वापप्रसक्तेः युक्तंचतत्रोत्तराषाढएवतदनुष्ठानं तत्रयद्धितंकर्मउत्तरेमासिकारयेदितिवचनात् तस्मात्श्रुतिस्मृति
गतविधानवशाद्दर्शांतचांद्रएवचैत्रादिपदानांशक्तिः अतउत्सर्गतस्तस्यैव सर्वकर्मसु ग्रहणंयुक्तमितिचकवदितिवच
नार्थः विशेषवचनात्तुगौणयोरपिकृष्णादेःसौरस्यक्वचितग्रहणमिति तेनत्रुटाअपिचैत्रादिशब्दा मीनस्थादित्यारब्ध
शुक्लप्रतिपत्कत्वादिनाप्रवृत्तिनिमित्तेन प्रवर्तमानाःशुक्लादिचांद्रमासवचनाएव यत्तुमेष्यारविसंक्रातिःशशिमासेभ
वतियत्रसचैत्रः एवंवैशाखाद्याःवृषादिसंक्रांतियोगेन मेषादिस्थेसवितरियोयोदर्शःप्रपूर्यते चांद्रमासास्तत्तदंताश्चै
त्राद्याद्वादशस्मृताः तेषुयायापौर्णमासी सासाचैत्र्यादिकास्मृता कदाचित्केनयोगेन नक्षत्रस्येतिनिर्णयइतिब्रह्मगुप्त
हरदत्तादिवचनेषुमेषादिस्थादित्यसमाप्तत्वमपिचैत्रत्वादिकं प्रतीयते अतएवसिंहस्थेसवितरियामावास्यातदंतेचांद्र
मासियौपौर्णमासीत्येवमादिश्रावण्यादिशब्दव्याख्यानमभियुक्तानां तथापितस्योत्तरमाससंज्ञकमलमासाव्यापकत्वा
त्तेनमीनादिस्थेत्यादिकमेवोपलक्ष्यते मीनाद्युपक्रांतेष्वेव चांद्रेषुमेषादिसंक्रांतीनांनियतत्वात् एवंमासशब्दस्यचैत्रा २१२

दिशब्दानांचशुक्लादिचांद्रएवमुख्यत्वंइतरत्रगौणत्वमितिस्थितेतद्यथैववचनस्यपक्षशब्दस्यापिचांद्रशुक्लप्रतिपदादिपौर्णमा
स्यंतकृष्णप्रतिपदाद्यमावास्यांतत्तिथिसंघातवचनत्वमेव अतएवप्रतिपत्पक्षतिरिति पक्षमूलेतुशिष्टेनपक्षतिशब्देनोच्यते
तथापौर्णमास्यमावास्ययोःपक्षांतत्वं प्रतिपदश्चपक्षादित्वंगोभिलेनोक्तं पक्षांताउपवस्तव्याः पक्षादयोभियष्टव्याइतिपक्षां
तौपंचदश्यौद्वेइतिचकोशः यस्तुमासांतरार्द्धेपिपक्षपदस्यप्रयोगः यथात्रिंशन्मुहूर्तंकथितमहोरात्रंतुयन्मया तानिपंच
दशब्रह्मन्पक्षइत्याभिधीयतइति विष्णुपुराणे पक्षद्वयंकृत्स्नपूर्वेणदशाहंपश्चिमेनतु जीवत्सुपक्षमपिद्वे कृशिशुर्विवर्ज्यतइति
चज्योतिषिसावनार्धगतेवृद्धितथेसार्धपंचपक्षेदिनद्वये दिवसस्याष्टमेभागेपतत्येकोधिमासकइतिशांडिल्यवचनेसौरार्ध
अत्रसौरसंवत्सरस्यांतेमानेनशशिजेनतु एकादशातिरिच्यंतेदिनानिभृगुनंदनेति विष्णुधर्मोत्तरेसौरवर्षांतएवैकादशदि
नवृत्याधिमासपातस्योक्तत्वात् दृष्टपदंपक्षपदंचसौरपदमेवेति सगौण्यामासत्वस्येवतयोर्गौणत्वात्तस्यापितथात्वोचि
त्यात् एवमृतुशब्दस्तद्विशेषवचनाश्चवसंतादयश्चैत्रादिचांद्रमासद्विकद्विकवाचित्वाच्चांद्रवचनाएव सौरेतुगौणाः
कृष्णादौचचैत्रादिशब्दानामिवतत्रगौणत्वात् मधुश्चमाधवश्चवासंतिकावृत् शुक्रश्चशुचिश्चग्रैष्मावृत् नभश्चन
भस्यश्चवार्षिकावृत् इषश्चोर्जश्चशारदावृत् सहश्चसहस्यश्चहैमंतिकावृत् तपश्चतपस्यश्चशैशिरावृतूइतिश्रुतौ
पूर्वोदाहृतायनाघटिततपस्तपस्यादिश्रुतिवशान्मधुमाधवादिशब्दानांसौरमासवाचित्वभ्रमनिरासार्थंअसंदि
ग्धचांद्रवाचिचैत्रादिशब्दसमानाधिकरणमधुमाधवादिशब्दयुक्ते वसंतश्चैत्रवैशाखौज्येष्ठौतोमधुमाधवौ ज्येष्ठाषाढा
वृतुर्ग्रीष्मस्तौचशुक्रशचीस्मृती प्रावृट्श्रावणभाद्राख्यौनभोनभस्यसंज्ञितौ मासौशरदिषोर्जौचताश्वयुजि
कार्तिकौ सहःसहस्यौहेमंतोमार्गपौषौतुतौमतौ तपस्तपस्यौशिशिरस्तौमाघफाल्गुनाविति भागुरिवचनेचगौणचै
त्रादिग्रहणेप्रमाणाभावात् सतूरन्योविदधज्जायतेपुनः चंद्रमाःषड्ढोतासत्तूनकल्पयातीत्यादिमंत्रवर्णेभ्यश्चचां
द्रत्वमृतूनांस्पष्टंप्रतीयते अतएवत्रिकांडमंडनः सौरर्तुनामनुकल्पत्वंहेतुपूर्वंदर्शयति श्रौतस्मार्तक्रियाःसर्वाःकु

417/1942

का०त०
२९२

यश्चांद्रमसर्तुषु तदलाभेतुसौरर्तुष्विति ज्योतिर्विदांमतं सतो चंद्रनिमित्तत्वं मंत्रवर्णात्प्रतीयते ऋतूनन्यो विदधज्जायते न रिस्य
नः पुनःपुनर्योजायितसएवविदधात्यृतून् चंद्रः पुनःपुनर्जम्भातस्माच्चंद्रवशादृतुः हौत्रप्रकरणे चंद्रं प्रकृत्य प्राहतित्तिरिः सत्तु
तून्कल्पयातीति चंद्रोऋतूकल्पकइति यत्तुद्वौमासावर्कजावृतुरिति विष्णुपुराणे सौरमासद्वयं रामऋतुरित्यभिधीयतइति
विष्णुधर्मोत्तरे ऋतूनां सौरत्वमुक्तं तद्दैविकवर्षयुगादिप्रस्तावगत्वात्तदर्थं मानुषसौरसंवत्सरात्मको हि दैविकोहोरात्रः
दैवेरात्र्यहनी वर्षः प्रविभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनमिति मनुवचनात् अनेनायनद्वयात्म
कमानुषवर्षात्मकता दैवाहोरात्रस्योच्यते अयनं सौरमेव अयतिसूर्यो यावताकालेन दक्षिणामुत्तरांवा तदयनं तदेवद
क्षिणासंबंधाद्दक्षिणायनमुत्तरासंबंधाच्चोत्तरायणमिति योगात् तस्मादादित्यः षण्मासान्दक्षिणेति षडुत्तरेणेतिते
त्तिरीयश्रुतेश्च अतश्चायनारंभकगौणऋतुस्वरूपपरिचायकमेव द्वौमासावर्कजावृतुरिति नतुशक्तिग्राहकं एवंद्वे
यनेवर्षसंज्ञितेइत्येतदपि दैवाहोरात्रपरिचायकगौणसौरवर्षपरिचायकमेव पूर्ववत्तु अहोरात्रपक्षमासानामभिधानं
गौणसावनतत्परंप्रासंगिकं तस्यापि सौरपरत्वे अर्कजावित्यस्यानर्थक्यप्रसंगात् सौरदिवसे त्रिंशन्मुहूर्तत्वनियम
स्य सौरपक्षे च तादृशापंचदशादिनात्मत्वनियमस्यासंभवाच्च प्रायिकतदात्मकत्वाभिप्रायेणाहोरात्रपक्षमासाभिधान
मपि गौणतत्परमेवेत्याचार्यचूडामणिः यच्चयत्किंचित्त्रिंशत्तिसमुदायात्मकचांद्रमासद्वयरूपत्वमपि ऋतोर्मुख्यंश्रा
द्धं मासिमासि अपर्याप्तावृतुंप्रति नवश्राद्धं दशाहानि नवमिश्रंतु षड्ऋतूनिति मरीच्याश्वलायनवचनयोः प्रतीयते
अत्रहि मृततिथिर्मृततिथिं यावच्चांद्रोमासः मुख्यं चांद्रग्रहणमृताहे श्राद्धं नस्यादिति ऋतुरपि तद्द्वयमेवेति तदपि ए
काहिनतु षण्मासा यदास्युरपि वा त्रिभिः न्यूनाःसंवत्सरश्चैव स्यातां षाण्मासिके तदेत्यत्रेवात्रापि मृततिथिर्मृततिथिं
यावद्गौणचांद्रग्रहणे गौणमेव तदारंभकमासस्यैव गौणत्वात् वस्तुतस्तु षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेवते॥ २९३
मासिकानिस्वकीये तु दिवसे द्वादशेपि चेत्येतदेकवाक्यतया मुख्यचांद्रग्रहणे दर्शत्रयोदश्यां चोनषाण्मासिकद्वयापत्तेश्च

419/194

काह्येन त्विति वाक्य एव तादृशगौणचांद्रग्रहणं मासिकेषु तु आब्दिके पितृकार्ये च मासश्चांद्रमसः स्मृतइति वचनाच्च ऋतुरपि व
र्तते हेतुवशाच्च मुख्यचांद्रग्रहणेपि न काचिदनुपपत्तिः मृताहकर्तव्यस्यत्वे मृतेहनितु कर्तव्यं प्रतिमासं तु वत्सरमित्यादिवचनेभ्य
एव सिद्धिसंभवात् तेन वत्सरं यावत्प्रतिशुक्लप्रतिपदादिदर्शांतमासं मृततिथौ श्राद्धं कर्तव्यमित्येवं मासिमासीत्यादेरर्थः तत्तश्च
ऋतुरपि तद्द्वयात्मक एव तत्रग्राह्यः यच्चर्तवे वसंत एवाभ्यारभेत वसंतो वै ब्राह्मणस्यर्तुरिति प्रशंसापूर्वकं यासौ फाल्गुनी पौर्ण
मवतीतस्यै पुरस्तात्षडहे सप्ताहे वा अविज्ञउपसमार्यातिइत्यश्वमेधप्रारंभकालविधायिकायां शतपथश्रुतौ पौर्णमास्यंतमा
ने नापि वसंतः प्रतीयते तत्सामान्यास्त्वान्येपि तदपि प्रशंसार्थमौपचारिकमेव नतावता वसंते ब्राह्मणोग्निमादधीतेत्यादिवि
धिष्वपि गौणस्य वसंतादिग्रहणं किंतु यावैशाखस्येत्यादिविधिमूलकदर्शांतचांद्रघटितस्य मुख्यस्यैवेति एवं संवत्सरोपि द्वा
दशमासाः संवत्सरइति श्रुत्या मासारभ्यत्वेनोक्तो गौणमासग्रहणे प्रमाणाभावान्मुख्यशुक्लादिचांद्रमासारब्धश्चांद्र एव चै
त्रशुक्लप्रतिपदादिः फाल्गुनदर्शांतो मुख्यः औत्सर्गिकशुद्धमासाभिप्रायं च द्वादशमासात्मकत्वाभिधानं कादाचित्कमल
मासाभिप्रायं तु श्रुत्यंतरमस्ति त्रयोदशो मासइति त्रयोदशमासाः संवत्सरइति च तेनैकसंज्ञत्वात्पूर्वार्द्धत्वोक्तेश्च मलमा
सापातेपि षष्टिदिनात्मकमेव मासमभिप्रेत्य द्वादशैव मासाः संवत्सरइति कल्पनायामर्थात्त्रयोदशत्वोक्तिविरुद्धा च सौरादिस्तु
गौणः योपि मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरमिति न्यूनाः संवत्सरश्चैव स्यातां षण्मासिके तदेति च वचनयोर्व्यवहृतश्चै
त्रादिमाससंबंधिमृततिथिमारभ्य तादृशमृततिथिं यावत्स्यध्यधिकत्रिशततिथिसंख्यातात्मकः संवत्सरः सोपि तथा कृष्णादि
मासघटितवत् अतएव चैत्रशुक्लप्रतिपत्संवत्सरादिप्रतिपत्वेन सर्वैर्व्यवह्रियते सच संवत्सरः संवत्सरपरिवत्सरेदावत्सरानु
वत्सरेद्वत्सरभेदेन पंचविधः प्रभवविभवादिभेदेन च षष्टिविधः एवमयनातिरिक्ताः पक्षर्तुसंवत्सराः कालभेदा मासघटित
त्वात्मासानां च शुक्लादिचांद्राणामिव मुख्यत्वात्तेपि चांद्रा एव मुख्याः इतरे तु कृष्णादयो यत्किंचित्तिथिबद्धाः सौरादयश्च मा
साद्वगौणाः स्यादेतत् यदि मासशब्दस्य चैत्रादिशब्दानां च शुक्लादाविव मुख्यत्वं तदा माससामान्यांगकेषु मासमग्निहो

त्रंजुहोतिमासंदर्शपूर्णमासभ्यांयजेतमासंचातुर्मास्यैः यथाकथंचित्पिंडानांतिस्रोशीतिःसमाहितः मासेनाश्नन्हविष्य
स्यचांद्रस्येतिसलोकतां पयसावापिमासेनगोमूत्रयावकाहारोमासंमासार्धमेवचेत्यादिषु प्रत्यक्षेविधिनिषेधेःशुभा
शुभफलकथनोन्नेयेमासविशेषांगकेषुविवाहोपनयनदेवतडागादिप्रतिष्ठामंत्रस्वदीक्षादिषुविवाहाद्युत्तरपिंडदा
नादिनिषेधेषुचसंख्याविशेषावच्छिन्नमासापेक्षेषुव्रतादिषुचैवंविधेषुगर्भाधानादिषुचसाक्षान्मासानपेक्षेष्वपिषो
डशादिनाद्यात्मकसत्वादित्रपस्वकालघटनार्थमासविशेषापेक्षेषुसर्वेषुगौणमुख्यन्यायेनशुक्लादिचांद्रस्यैवग्रह
णापत्तेरव्यवस्थाप्रसक्त्यभावात्सौरोमासोविवाहादौयज्ञादौसावनस्मृतः आब्दिकेपितृकार्येचचांद्रोमासःप्रश
स्यते तिथिकृत्येषुकृष्णादिंव्रतेशुक्लादिमेवच विवाहादौतुसौरादिंमासंकृत्येविनिर्दिशेदित्यादीनिकर्मविशेषव्य
वस्थावचनानिअमावास्यापरिछिन्नोमासःस्याद्ब्राह्मणस्यतु संक्रांतिपौर्णमासीभ्यांतथैवनृपवैश्ययोरितिवर्णवि
शेषव्यवस्थावचनंकृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचन येपीछंतिनतेषामपीष्टोविंध्यस्यदक्षिणइतिवाचारमू
लकंत्रिकांडमंडनीयंदेशविशेषव्यवस्थावचनमित्येतानिकथंसंगछंते तथाहि व्यवस्थाविधिर्नियमविधिरेवनिय
मविधिश्चवाक्यार्थतोविधेयस्यपाक्षिकप्राप्तौसत्यांयथाऋतौभार्यामुपेयादिति योप्यपेक्षस्यश्रुतिकल्पकत्वे
नमंथरत्वात्ततःपूर्वमेवप्रवृत्तोवाक्यार्थतोपूर्वविधिरपिफलतोनियमविधिःव्रीहिभिर्यजेतव्रीहीनवहंतीत्यादिः
सोपिविधेयतुल्यकार्यार्थांतरप्राप्त्यातस्यपाक्षिकप्राप्त्याशंकायां अतएवपुरोडाशविधिमात्रालोचनेअनेनवासोन्या
येनयथासिद्धपुरोडाशोपादानेनैवयागानुष्ठानस्यन्याय्यत्वान्नव्रीहीणामपेक्षेतःपाक्षिकप्राप्त्याशंकेतिव्रीहिभि
र्यजेतेतिनियमविधेस्तत्संस्कारविधीनांचदुःस्थताप्रसक्ता दृष्टार्थेचद्रव्यादौविधेर्विधांतरंचातुर्थन्यायेननसंभ
वत्येवेतिश्रपणविधिप्रवृत्तिपूर्वकाव्रीह्यादिविधिप्रवृत्तिरुक्तातंत्रे तदाहिप्रयोगमध्येपुरोडाशोत्पादनेवगतेतस्यप्रकृ
तिविशेषोपादानंविनाकर्तुमशक्यत्वात्तदाकांक्षायामाक्षेपात्पूर्वमप्राप्यवस्थायामेवप्रवृत्तोपियद्ययंनस्यात्तदातदा

421/1942

तस्याक्षेपःस्यात्सतिचतस्मिन्द्रव्यांतरस्यापिसतिचाक्षेपेद्रव्यांतरस्यव्रीहीणांपक्षेऽप्राप्तिःस्यात् सामाभूदितियुक्तोनि
यमफलोव्रीहिविधिस्तत्संस्कारविधयश्चततश्चविकृतिष्वपियत्रचर्यादौश्रपणविधिरनर्थलोपादतिदिश्यतेतत्रैवव्री
हिनियमोवधातादिनियमश्चेतिचित्रेष्यांतंडुलेषुश्रपणस्यकार्याभावेनानतिदेशान्नव्रीह्यादिनियमस्यापिप्रवृत्तिः इहतु
सर्वदेशगतसर्ववर्णानांसर्वकर्मसुन्यायेनचांद्राणामेवमासर्तुवर्षादीनांप्राप्तेःसौरादिप्रसक्त्यभावात् कथंतद्व्यवस्था
वचनानि चांद्रव्यवस्थावचनंचानर्थकमयुक्तंचनित्यप्राप्तत्वात्तस्य अतएवसामान्यतएवपितामहेनोक्तं दैवेकर्मणि
पित्र्येचमासश्चांद्रमसःस्मृतइति किंच सर्वेषुकर्मविशेषव्यवस्थावचनेष्वादिशब्दःश्रूयतेतत्रतेनकुत्रकानिग्राह्याणी
तिज्ञायते यानितावछीकरादिभिर्दर्शितानिविवाहादावित्यत्रोपनयनचूडाव्रतनियमप्रतिष्ठागृहकरणक्षौरयात्रा
महाषष्ठीमहासप्तमीविजयद्वादशीदशहरायुगादिप्रभृतीनि यज्ञादावित्यत्रदानहोमगर्भाधानसीमंतोन्नयनजात
कर्मलक्षणकर्मविक्रयव्यवहारादीनि सदैवपितृकृत्यादौमासश्चांद्रमसःस्मृतइत्यत्रवृध्यभिषेकसंवत्सरश्राद्धमासिका
ष्टकादेवशयनशक्रोत्सवादीनिइतितत्रतेषामेवनियतानांतत्रतत्रग्रहणेकिंप्रमाणमित्युक्तं तत्तन्मासभिन्नमासप्रा
पकाण्यपिवचनानितत्रतत्रदृश्यंते तथाहिविवाहोपनयनादिषूदगयनविधानंसौरस्यग्रहणेलिंगंतथाशुक्लपक्ष
तिथिविशेषविधानंचांद्रस्यापि तथागर्भादिःसंख्यावर्षाणांगर्भाष्टमेष्टमेवाब्देतृतीयेवर्षेचौलंगोदानंषोडशे
वर्षेअष्टवर्षाभवेद्गौरीनववर्षातुरोहिणीत्यादिषुगर्भग्रहणसंबंधिनोजन्मसंबंधिनोवाहोरात्रात्तिथेर्वाभ्यवर्षमा
सादिगणनायांसावनस्यतिथिबद्धचांद्रस्यवाग्रहणंस्यादितिनैकांतिकोविवाहादौसौरनियमः तथा यज्ञेष्व
पिचांद्रस्यापिप्रापकंयावैशाखस्यामावास्यातस्यामादधीतेति विवाहव्रतयज्ञेषुसौरमानंप्रशस्यतइतिचसौरस्य
तथापितृकृत्येषुसौरस्यापिप्रापकंअनेनविधिनाश्राद्धंत्रिःपैत्रमिहनिर्वपेत् कन्याकुंभवृषस्थेर्कइतिकन्यागतेस
वितरीत्यादिच तथाहरिशयनादावपिसौरप्रापकंभविष्यत्पुराणंमिथुनस्थेसहस्रांशौस्थापयेन्मधुसूदनं तुलारा

धितेतस्मिन्पुनरुत्थापयेत्सुतमिति तथकर्किण्यर्के हरौस्रुप्ते शक्रध्वजक्रियाश्विने तुलायां बोधयेद्देवीं वृश्चिके तु जनार्द
नमित्याद्यपि हरिशयनप्रबोधयोश्च चांद्रमासकर्तव्येषु संग्रहे व्रतशब्देन चातुर्मास्यव्रतानां सौरमासकर्तव्यमध्ये संग्रहो नु
पपन्नः तेषां हरिशयनोत्थानोपक्रमावसानत्वेन तदनुयायित्वात् मासोपवासव्रते तु न सौरो नापि मुख्यश्चांद्रः किंतु तिथिबद्ध
श्चांद्रः तस्याश्विनशुक्लैकादशीमारभ्य कार्तिकशुक्लैकादशीपर्यंतत्वात् तथा कृच्छ्रातिकृच्छ्रपराकादिव्रतेषु यथाकथं
चित्पिंडानां तिस्रोशीतीः समाहितः मासेनाश्नन्नूनित्युक्ते चांद्रायणे च सावनमेव मानं तिथिवृध्या चरेत्पिंडानित्याद्युक्तेत
स्मिंश्चांद्रो मुख्यः कृष्णादिर्वा गोमूत्रयावकाहारो मासार्द्धेन सशुध्यति सब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् पिण्या
कं वा कणान्वापि भक्षयेत्त्रिसमा निशीत्यादिषु च तिथिघटितश्चांद्रः अस्मिंश्चांद्रे योहेमाद्र्यादीनां सावनव्यवहारः सय
त्किंचित् त्रिंशद्दिवसघटितत्वसाम्यात् नतु मुख्योयं सावनस्तस्य त्रिंशत्सूर्योदयाः स्मृताइति लक्षणादेतस्य च मासव
र्षादेस्तिथिघटनया व्यवहारात् तथा कार्तिकमाघवैशाखस्नानादिरूपे नियमे यथा तुलामकरमेषेषु प्रातःस्नायी भवे
न्नरइति वचनात्सौरमानावगमस्तथाश्विनशुक्लैकादशीपौर्णमास्यादावपि तदुपक्रमविधानात्कार्तिकस्य तु यत्स्नानं
माघे मासि विशेषतः कृच्छ्रादिनियामानां च चांद्रमानप्रमाणकमिति पितामहवचनाच्च तिथिबद्धचांद्रावगमोपि उपा
कर्मादिहोमेच श्रावण्यां प्रोष्ठपद्यां वेत्यादिवचनैस्तिथिकर्तव्यत्वावगमाच्चांद्रमासग्रहणं दशहरास्नानोत्कर्षश्च तु र्थेपि
युगादिषु उपाकर्म महाषष्ठ्यो त्थ्येतदिष्टं वृषादित इति वचनाद्धि सौरमासग्रहणं स्यान्न कथंचित्सावनग्रहणं तस्मादादि
पदग्राह्यत्वेन निबंधकारैरुक्तेषु केषुचिच्च सुपात्तेषु च कर्मविशेषेषु परस्परविरोधात्कर्मविशेषव्यवस्थावचनानि न तत्त
न्मासंव्यवस्थापनायालं अपिच देशविशेषव्यवस्थावचनस्य कर्मवर्णविशेषव्यवस्थावचनैः सह तेषां च परस्परं विरोधेका
वगतिः तत्र देशविशेषव्यवस्थावचनस्येदानींतनपुरुषप्रणीतस्याचारमूलस्येतरैः सह विरोधे बाधएवेति वक्तुं शक्य
ते तेषां तु परस्परंविरोधे गत्यंतरासंभवाद्विकल्पः प्रसज्येत नतु तत्रापि कर्मविशेषव्यवस्थावचनैर्वर्णविशेषव्यव २१५

423
1942

स्थावचनस्य बाधएव भविष्यति यद्यपि च नात्र सामान्यविशेषन्यायेन सः उभयोरप्युभयरूपत्वात् कर्मविशेषव्यवस्थावच
नं हि कर्मांशे विशेषरूपमपि वर्णांशे सामान्यरूपं वर्णविशेषव्यवस्थावचनमपि कर्मांशे सामान्यरूपमपि वर्णांशे विशेषरूपं तेन
यदि वर्णविशेषव्यवस्थावचनं कर्मविशेषव्यवस्थावचनाक्रांतविषये तेन बाधितं सदितरस्नानादिविषयं भवति तर्हि कर्मवि
शेषव्यवस्थावचनमेव वर्णविशेषव्यवस्थावचनानाक्रांतविषये तेन बाधात् शूद्रमूर्धावसिक्तादिविषयं किं न स्यात् ब्राह्म
णादिविशेषाविहितवार्हद्विरादिबाधिता भवितं ब्रह्मसामवत् मरणावधिकदशाहाभ्यंतरे प्रोषितेन पुत्रेण मातापित्रम
रणेश्रुते किं प्रोषिते कालशेषः स्यादिति वचनवशाच्छेषात् शुद्धिः स्वीक्रियतामुत पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पु
त्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति वचनाच्छ्रवमदिनप्रभृती दशाहादिति वीक्षायां यच्छेषशुद्धिवचन
पुरस्कारेणैव स्वीक्रियते पितरौ चेदिति वचनं तु निर्दशश्रवणविषयं क्रियते तदतिक्रांताशौचप्रकरणस्थपाठात् ननु
सामान्यविशेषशुद्धिवचनस्यानिर्दशाविशेषविषयस्यापि पुत्रापुत्रसाधारणत्वेन पितरौ चेदित्यस्य च निर्दशानिर्दशसाधा
रणस्यापि पुत्ररूपविशेषविषयत्वेन द्वयोरपीतरेतरानाक्रांतविषयाविषयत्वकरणसंभवात् पितरौ चेदिति वचनं हि मा
सत्रये त्रिरात्रं स्यात् षाण्मासे पक्षिणी तथा अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यतीति एतदपवादत्वेनातिक्रांताशौच
प्रकरणे पद्यत इति मिताक्षरादिभ्योवगम्यते अतएवातिशद्वात्कालांतरस्थेपीति मया आशौचत्रिंशश्लोकीविवरणे व्या
ख्यातं तथापि पांदश्यसाप्तदश्यन्यायेन वर्णविशेषव्यवस्थावचने हि अमावास्यात्वमासविशेषादेर्ब्राह्मणादिभिः स
हनसाक्षात्संबंधः तथासति इंद्रियकामस्येति वत्षष्ठीश्रुत्या तेषां प्राधान्ये सति फलकल्पनापत्तेः किंतु कर्तृभू
तसदुपस्थापितकर्मद्वारा कर्मव्यतिरेकजनितषष्ठ्याश्रयणेन लक्षितकर्मभिरेव वा यथाहीषादिनिधनानां सौभर
संबंधित्वेनावगतप्रत्यभिज्ञायमानवृष्टिकामाद्युपस्थापितसौभरद्वारकोवृष्टिकामादिभिः सौभरव्यतिरेकजनितता
दर्थ्यचतुर्थ्याश्रयणेन तल्लक्षितसौभरेणैव वा सर्वथा ब्राह्मणाद्यधिकारिकेषु कर्मस्वमावास्यायां तादिर्मासइति

का०त०
२१६

श्रुत्यर्थाभ्यां वर्णविशेषव्यवस्थावचनस्यार्थः कर्मविशेषव्यवस्थावचनेषु मासविधानावधित्वेन कर्मविशेषाः श्रुत्यैवोपात्ताः
ततश्च यथाप्रकरणात् कृत्स्नक्रतुसंबंधेन पांचदश्येनानारभ्याधीतं कृत्स्नक्रतुसंबंधसाप्तदश्यं बाध्यते तथा कर्मविशेष
व्यवस्थावचनैर्वर्णविशेषव्यवस्थावचनं बाधिष्यत इति न विकल्पप्रसंगः तदेतदयुक्तं विप्रकर्षसाम्यात् यथा हि वर्णविशे
षव्यवस्थावचने कर्तृद्वारकः कर्मसंबंधो विप्रकृष्टस्तथा कर्मविशेषव्यवस्थावचने कर्मद्वारकः कर्तृविशेषसंबंधः अ
वश्यापेक्षितं च तद्वचनजन्यस्य ज्ञानस्य वर्णविशेषविषयत्वं बाधप्रयोजकविरोधार्थं समानविषयेण हि ज्ञानेन विरो
धिना बलवता दुर्बलस्योत्पत्तिनिरोधो वा प्रामाण्यज्ञापनं वा बाधो भवति न तुल्यविषयेण न हि येन केनचिद्विवाहादौ
यो मासः स सौरादिर्ग्राह्य इति ज्ञानं ब्राह्मणेन स्वकर्मणि दर्शादौ ग्राह्य इति ज्ञानस्य विरोधि किं तु ब्राह्मणेन विवा
हादाविति वादिरूपं तच्च तत्रापि विप्रकृष्टमेवेति बाध्यबाधकाभावासंभवात्स्यादेव विकल्प इति अत्र वदामः यत्ता
वदुक्तं सर्वदेशेषु सर्ववर्णेषु सर्वकर्मसु चन्यायेन श्रुत्यादेरेव नियमेन प्राप्तेः सौरादीनां सर्वमासानामव्यवस्थाप्रस
क्त्या भावात्तदा वस्थावचनान्यनुपपन्नानीति तत्रेदं वक्तव्यं न्यायप्रवृत्तेः पूर्वं तावत्सर्वेषामनियमेन प्राप्तिर्वक्तव्या अ
न्यथा तस्यापि नियामकत्वानुपपत्तेः तथा च तद्दशायामेव मंथरान्यायात्पूर्वं प्रवृत्तस्य शास्त्रस्यैव नियामकत्वं सं
भवति अत एव मुख्यद्रव्योपादानाशक्तिनिर्णये न्यायेन सदृशनियमात्पूर्वमेव प्रधानविधिबोधितप्रधानाव
श्यकर्तव्यतापेक्षा सर्वद्रव्याणां पाक्षिकप्राप्त्यवसरे प्रवृत्तस्य मंदसदृशानामपि पूतीकानां विधेर्नियमविधित्व
मुक्तं जैमिनिना नियमार्थः क्वचिद्विधिरिति तथोपस्थाने करणभूतायाः एकांतिकदृष्टार्थायाः ऐंद्र्या विधिर्नियमविधि
रेवेति विशिष्टविधित्वादेवैंद्र्या यो पस्थानांशद्वयं वाक्यार्थतामंत्रांशेप्यपूर्वविधेरपि तद्विधेर्नियामकत्वे न सा
मान्याय तदभावेपि तस्याः पाक्षिकप्राप्तिः संभावनीया तत्संभावना च न्यायालोचनात्पूर्वमेव गौणसामर्थ्येनापि लोकेशब्द
स्य प्रत्यायकत्वदर्शनात् न्यायेन तु मुख्यसामर्थ्यवत्या आग्नेय्या एव कस्याश्चिन्नियमः स्यात् तेन तत्रापि यावन्न्यायेन मु २१६

सामर्थ्यवती कादाचिदाग्नेयी नियंतुमुपक्रम्यते तावत् शीघ्रं प्रवृत्तेन प्रत्यक्षविधिनैंद्र्या नियम्यत इत्येव वक्तव्यं न तु लिंगमात्रेण
कथमाग्नेय्याः प्राप्तिस्तस्य सामान्यसंबंधापेक्षत्वात् तस्य चात्राभावात् नात्र सामान्यसंबंधापेक्षा व्यभिचाराभावा
त् यस्य हि मंत्रं विनापि ध्यानादिना स्मृतस्यानुष्ठानसंभवस्तत्र व्यभिचारात् लिंगस्य भवति तदपेक्षा इदं तु आत्मनेप
दांतोपपूर्वतिष्ठतिवाच्यं समीपे स्थित्वाभिधानात्मकमुपस्थानं मंत्रैककरणमित्यव्यभिचारात्तत्संभवति तत्र लिंगमा
त्रेणापि मंत्रस्य विनियोगः अनुष्ठेयज्ञानस्यैवानुष्ठाने देहादिभिन्नात्मज्ञानस्येव च पारलौकिककपिंजलकर्मानु
ष्ठाने एकद्वित्वबहुत्वयोर्बहुत्वविशेषाणां च पांचदश्यसाप्तदश्यादीनां नियमविधिरुत्सर्गन्यायकपिंजलन्यायप्रवृ
त्तिपूर्वकालीनामाक्षेपिकैकत्वद्वित्वबहुत्वसर्वबहुत्वाविशेषप्राप्तिकृतां विधेयसंख्याविशेषस्य पाक्षिकीं प्राप्तिमाश्रि
त्यैव वर्णनीयः ताभ्यामेकत्वस्यैव चानियमनात्तत्प्रवृत्तौ तदसंभवात् किं बहुना यत्र निषिद्धं माषादिवचनात् श्रौतेक
र्मणि स्मार्ते वा तिलमाषैश्च सर्षपैरित्यादिना विधीयते तत्र निषेधप्रवृत्तिपूर्वकालीनां तदात्मलाभोपयिकनिषेध्य
प्रसक्तिरूपां पाक्षिकप्राप्तिमपेक्ष्यैव तन्नियमविधित्वोपपादनमित्यादि बहूदाहरणमात्रविषये गुरूपासनाखिल
शास्त्रपरिश्रमासादितमीमांसारहस्यज्ञानाभियोगानां चित्तभित्तौ विचित्रितमपि प्रकृतविक्षेपप्रसंगान्न प्रदर्शितम् इति
द्रव्यदेवतासंबंधकल्पयागविधेश्च द्रव्यांशे मासमग्निहोत्रं जुहोत्यादेश्चात्यंतसंयोगवाचिद्वितीयावगतमासादि
व्याप्तिलभ्याभ्यासविशिष्टापूर्वकर्मविधेर्मासाद्यंशे सर्वदेवताविधेश्च देवतायां नियमविधित्वमतिदुरुपपादं पार्थसा
रथिमिश्रप्रभृतिभिरपि नोपपादितम् अलौकिकानल्पमेधाविभवैरल्पकालजीविते श्रीमच्चरणैः स्वमतिकल्पितप्रका
रेण मीमांसापरिशिष्टे उपपादितं प्रयोजनाभावादत्र न प्रदर्श्यते यत्तु व्रीहिनियमविधेस्तत्संस्कारविधीनां च श्रपण
विधिप्रवृत्तिपूर्वकप्रवृत्तित्वं तंत्रे वर्णितं न तत्पुरोडाशविधिमात्रप्रवृत्तिकाले न्यायेन तथासिद्धपुरोडाशोपादाननिर्ण
यात् व्रीहीणां पक्षेपि प्राप्तिर्न स्यादिति भियात् तथा सति श्रपणस्यापि पाक्षिकप्राप्त्यभावात्तद्विधेरपि दृष्टार्थश्रपणवि

425
194

का०त० पयेकत्वेनैकांतिकनियमविधित्वस्याप्रवृत्त्यापत्तेः किंत्वाकांक्षाक्रमानुसारेण तथाहि व्रीहिभिर्यजेतेत्यत्र यद्यपि यागोद्देशे
२१७ नैवकरणतया व्रीहयो विधीयंते नपुरोडाशोद्देशेन तत्प्रकृतितया अस्माकं च तद्विधेः तद्विषयत्वज्ञानं पश्चादेव तथापि वस्तु
तस्तावत्तृतीयया प्रदेयप्रकृतित्वरूपं यागं प्रति पारंपरिकमेव करणत्वमुच्यते सोमेनेतिवत् तेनैव च रूपेण व्रीहीणां विधेय
ता सर्वत्र शक्तेः सहकारित्वात् पुरोडाशसाधनकेवस्तुतो रससाधनके च यागे व्रीहिसोमयोः साक्षात्करणत्वे सामर्थ्याभावा
त् करणत्वं च क्रियोद्देश्यककर्तृव्यापारविषयत्वं पदानां चान्वय आकांक्षापूर्वकः तेन यजेतकेन क्रियोद्देशेन कुत्र प्रदेय
प्रकृतिविशेषे व्यापारितव्यमित्यस्यामाकांक्षायां व्रीहीणां तथाविधिः न चेयमाकांक्षा पुरोडाशविधिमात्रप्रवृत्तौ भवि
तुमर्हती किंतु तदानीमन्यरूपैवाकांक्षा किं यथासिद्धः पुरोडाश उपादेयो यागार्थमुत श्रपणेन प्रयोगमध्ये उत्पादनीय इ
ति आकांक्षानुरूपेण च विधिप्रवृत्तिरित्येतस्यामाकांक्षायां न्यायलभ्य यथासिद्धोपादाननिर्णयात् पूर्वमेव श्रपणविधि
रेव प्रवर्तते तदुत्तरं कं प्रकृतिविशेषमुपादाय श्रपणेनासावुत्पाद्य इत्याकांक्षा तेनाकांक्षानुरूप्येण तदानीमेव व्रीहिविधिः
प्रवर्तते यद्यजेत तद् व्रीहिभिः व्रीहिस्तत्र करणीकुर्याद्यागोद्देशेन व्रीहिरूपे पुरोडाशप्रकृतिविशेषे व्याप्रियेतेति ततः क
थं कोसौ व्यापार इत्याकांक्षायामवघातपेषणादिविधिप्रवृत्तिरिति वास्तवं तत्तद्विध्यर्थानुरूपाकांक्षाक्रमकृतं तत्तद्वि
धिप्रवृत्तिपौर्वापर्यमतिगहनशब्दप्रमाणतत्त्वविदां सकलमालोचनमिति तेन यद्यपि कृष्णादि सौरादयो गौणा मासास्तथा
पि तेषां तादृशमपि मासत्वं यन्मासचातुर्विध्यादिवचनेष्वभिधीयते तस्येदमेव प्रयोजनं यन्मासशब्दवत्सु शास्त्रेषु संकल्
पाद्युक्तेष्वेवांक्वचित्तेषामपि ग्रहणं भवत्विति यथा क्षेत्रजादिषु गौणपुत्रत्वाभिधानस्य नापुत्रस्य लोकोस्ति पितुः पुत्रेण क
र्तव्या स्वर्या तस्य पुत्रस्येत्यादिषु तेषामपि ग्रहणमिति शुक्लादेरिव तेषामप्यव्यवस्थया ग्रहणे सर्वदेशेषु सर्ववर्णेषु सर्वका
र्येषु प्राप्ते युक्तं तद्व्यवस्थावचनैस्तत्र तत्र व्यवस्थाकरणं यत्तु चांद्रस्य मुख्यत्वादेव सौराद्युक्तविषयातिरिक्तविषये व्यव २१७
स्थासंभवात्तद्विषयाणि व्यवस्थावचनानि सदैव पितृकृत्यादौ मासश्चांद्रमसः स्मृत इत्यादीन्यनर्थकानीत्यत्रोच्यते॥

427/1942

इतरमासव्यवस्थाविधिशेषत्वेन न्यायप्राप्तस्य तस्यानुवादकान्येव तानि वचनानि एतेष्वेतेषु कार्येष्वेत एते मासा ग्राह्यास्तदितरेषु तु
मुख्यत्वाच्चांद्र एवेति तत्प्रयोजनं च यावत्व्यवस्थाप्यविषयोपादाने व्यवस्था समंजसा भवतीति आब्दिके पितृकार्ये चेत्यादे
स्तु योग्यतया तिथिवद् गौणचांद्रविधायकत्वेप्यपि वक्तुं शक्यमित्युक्तं यत्तु देशविशेषव्यवस्थावचनस्य कर्मवर्णविशेषव्य
वस्थावचनाभ्यां तयोश्च परस्परं कर्मविशेषव्यवस्थावचनानां च परस्परं यत्र विरोधस्तत्र देशविशेषव्यवस्थावचनस्याचारमू
लकस्य स्मृतिविरोधे आचारस्य बाध्यत्वादितरविरोधे बाध एव वक्तुं शक्यते पि इतरेषां तु बाधन्यायस्य कस्याप्यसंभवाद्विक
ल्प एव प्रसज्येतेति तत्रोच्यते कर्मविशेषव्यवस्थावचनानामेव केवलमन्योन्यं विरोधे बाधादिपरीक्षा कर्तव्या न तु देशवर्णकर्मवि
शेषव्यवस्थावचनानामन्योन्यविरोधे तेषां भिन्नाभिन्नविषयत्वेन विरोधस्यैवाभावात् तथाहि दर्शांत पूर्णिमांत चांद्रद्वय
विषयं देशविशेषव्यवस्थावचनं तावदाचारमूलकं दृष्टं तीष्व इति च निर्देशात् अत एव शुक्लादेरेव मास इति मतोपन्यासपूर्वमुभ
याभ्युपगंतृमतेपि विंध्यदक्षिणभागेन तदभ्युपगम इति प्रतिपादयद्भिर्विंध्य तदुत्तरभागयोरुभयप्रवृत्तिप्रदर्शकत्वेनाभासमान
मपि विंध्यदक्षिणतः कृष्णादिमासाभ्युपगमनिषेधमात्रपरमितरभागे शुक्लादिप्रवृत्तिरस्ति वा न वेत्यत्रोदासीनमिह कुत्रापि
शिष्टाचारे उल्लिखादौ शुक्लादिप्रवृत्त्यदर्शनादितरत्र तु स एवेत्यष्ट इत्यार्थिकार्थस्वीकारेण विंध्यदक्षिणतः शुक्लादेरेव विंध्य
तदुत्तरयोस्तु कृष्णादेरेवेत्येवं देशव्यवस्थापरमेव सा च व्यवस्था न कर्मवर्णविशेषव्यवस्थावदंगभूतमासविषया किंत्वं
गानंगसाधारणलौकिकाधिकरणमात्रसंकल्पाद्युल्लेख्यमासविषया तत्रैवाचारे व्यवस्थादर्शनात् न चाधिकरणता कर्म
सत्तावच्छेदकसूक्ष्मकालोपाधेरेव न स्थूलस्य मासादेरहरहः स्नानादाविति वाच्यं लौकिक्या अधिकरणताया यथाप्रती
त्याश्रयणीयत्वात् स्थूलस्यापि कालस्यास्मिन्वर्षेस्मिन्मास इदं कर्मकृतमित्यधिकरणत्वप्रतीतेरविशेषात् देशवत् तदुक्तं पा
र्थसारथिमिश्रैः नहि द्विपदे कस्थितो देवदत्तो पचरके गृहे ग्रामजनपदे वावस्थितो न भवतीति न चोल्लेखोपि मासपक्षतिथीनां च
निमित्तानां च सर्वशः उल्लेखनमकुर्वाणो न तत्फलमवाप्नुयादिति वचनविहितांगभूतमासादिविषय एव कुतो न स्यादिति वाच्यं

का०त०
२९८

सर्वविषयत्वात् निमित्तसमभिव्याहाराच्च नहि सर्वकर्मसु मासादीनामंगत्वमस्ति प्रमाणाभावात् सूक्ष्मकालस्यापि कर्मसत्तावच्छेद
कस्यापि तन्नास्ति किंपुनर्मासादीनां नच निमित्तमंगं तत्रैतत्स्यात् मासाद्युल्लेखविधिस्तावत्तदनुसंधानार्थः दृष्टे संभवत्यदृष्टक
ल्पनानवकाशात् अंगभूतस्यैव चानुसंधानं मासादेः प्रयोगविधिरपेक्षते तच्च यद्यपि मनसापि संभवति तथाप्युल्लेखविधिबला
त्तेनैव कर्तव्यं यद्यपि सर्वकर्मसु मासादीनामंगत्वं नास्ति यथाहरहः स्नानादिषु नचानुसंधानार्थोल्लेखविधिबलादेव तेषा
मंगत्वं कल्पयितुं शक्यते विधिं विनांगत्वासंभवात् नच विधिरपि कल्प्यः अन्योन्याश्रयात् सति हि तद्विधौ प्रयोगविध्यपेक्षि
ततदनुसंधानार्थनानोपायप्रसंगे उल्लेखरूपोपायनियमविधिरेतद्बलादेव च मासाद्यंगत्वबोधकविधिकल्पनेति नच वि
धिरपि संभवति यावज्जीवकर्तव्येषु कालविधिर्हि चातुर्थ्यन्यायेन नियमविधिरेव नच संभवति मासादिरहितकालाभावा
न्मासादिसामान्यानां नित्यप्राप्तेः सर्वत्र हि मासादिविधिर्विशेषरूपेणैव भवति चैत्रमासि कर्तव्यं शुक्लपक्षे कर्तव्यमित्या
दि नतु मासे कर्तव्यं पक्षे कर्तव्यमित्यादि न चात्रापि तथाविधिः कल्पयितुं शक्यते यावज्जीवादिकर्तव्येषु विशेषनिर्धारण
हेत्वभावग्रस्तश्च तथापि यस्य यत्रांगत्वं मासादेस्तत्त शक्यते यावज्जीवादिकर्तव्येषु विशेषनिर्धारणहेत्वभावग्रस्त
श्च तथापि यस्य यत्रांगत्वं मासादेस्तत्रैव तस्योल्लेखविधिरस्तु यथा भाषाविशेषणानामनेकेषामभिधानेपि यत्र व्यव
हारे यावतां विशेषणानामुपयोगस्तत्र तावतामेव विशेषणानामावेदनं लेखनं च विधीयते तद्वत् नच निमिगस्यानंगत्वा
त्कथं तस्योल्लेखविधिर्दृष्टानुसंधानार्थः कर्मांगं चेति वाच्यं यतोनंगस्यापि निमित्तस्याज्ञानस्यानुष्ठानप्रयोजकत्वरूपनि
मित्तत्वानुपपत्तेरनुसंधानं प्रयोगविधिरपेक्षत एव कर्मसंबंधित्वाच्च तस्य तद्द्वारोल्लेखस्य कर्मांगत्वं घटत एव द्वारस्य हि
कर्मसंबंधमात्रं द्वारेणांगत्वार्थमपेक्षितं न तु तस्यांगत्वमपि माभूदभ्युदितेष्टाविव्यार्थयोर्दधिपयसोः क्रियमाणानां प्र
णीताधर्माणां प्रणीताकार्यानंगत्वं माभूच्च भोक्तृत्वाश्रयनिवेशिनां वपनादिसंस्काराणां कर्मानंगत्वं तेन संकल्पवाक्य
गतोल्लेखस्यापि अनुसंधानार्थस्य तदह कर्मांगभूतमासादिविषयत्वेन तद्विषयभूतमासगोचरदेशव्यवस्थावचनस्य २१८

429/1941

कर्मांगभूतमासविषयकर्मवर्णविशेषव्यवस्थावचनैः समानविषयत्वादस्त्येव विरोध इति अत्र ब्रूमः चशब्देन सर्वशब्देन च प्रती
यमानस्य सर्वेषां सर्वत्रोल्लेखस्य बाधापत्तेरदृष्टार्थत्वमेवोल्लेखस्य कल्पनीयं नानुसंधानार्थत्वं यथा स्तोत्रशस्त्रयोः स्तोतिशं
सति श्रुतिबाधापत्तेरदृष्टार्थत्वमेव न देवताप्रकाशनार्थत्वं तद्वत् किंचावच्छेद्यकालसामान्यस्याधिकरणत्वेन सर्वत्र प्राप्तत्वा
त्कालविधयः सर्वे तदवच्छेदककालोपाधिपराः तेच कालोपाधयः कर्मप्रयोगाधिकरणकालपरिच्छेदमुखेन कर्मप्रयोगांगं॥
जातिगुणादिवद्द्रव्यपरिच्छेदेन परिच्छेदस्य क्रियासाधनविषये आद्ये कर्तव्यापारेपेक्षितः तेन यथा जातिगुणौ साधनद्रव्यो
पादानकालीने परिच्छेद एवोपयुज्येते पश्चान्न तयोः कश्चिदुपयोगस्तथा कालोपाधयोपि कर्मप्रयोगारंभार्थप्रतीक्षारूपका
लविषयकर्तृव्यापार एवोपयुज्यंते प्रयोगारंभश्च संकल्प एव तेन प्रयोगांगकालस्य संकल्पे उल्लेखार्थे ततः पूर्वमनुसंधा
नमपेक्ष्यते ततश्चोल्लेखपूर्वभाविना मानसेनानुसंधानेन जाते उल्लेखे तेनानुषंगाज्ज्ञायमानमपि पुनरनुसंधानमग्रे
नुपयुज्यमानत्वान्नोल्लेखस्य प्रयोजनं भवितुमर्हति होमस्येव भस्मसाङ्गवः यद्दशेनांगभूतमासादिविषयता तस्य वचन
संकोचश्चस्यात् एवं निमित्तस्यापि ज्ञानस्यानुष्ठानप्रयोजकत्वात्प्रयोगारंभभूतसंकल्पात्पूर्वमेवानुसंधानमपेक्षितं
नोल्लेखस्तेन तदनुसंधानेन कश्चिदर्थः ततश्चादृष्टार्थ एव संकल्पगतो मासाद्युल्लेखो लौकिकाधिकरणमात्रभूतत
द्विषय इति तद्विषयस्याचारमूलकस्यापि देशविशेषव्यवस्थावचनस्य नांगभूतमासविषयैर्वर्णकर्मविशेषव्यवस्थावच
नैर्बाधः भिन्नाभिन्नविषयत्वेन विरोधाभावात् तथा चाधानोपनयनादौ वर्णविशेषव्यवस्थावचनेन दर्शांतादिमासस्य
विवाहादौ च कर्मविशेषव्यवस्थावचनैः सौरादिमासस्यांगत्वेपि विंध्यदक्षिणतो दर्शांत चैत्रादिरेव विंध्यतदुत्तरभागयो
श्च पौर्णमास्यंतस्यैवाधिकरणत्वेन संकल्पउल्लेखः कर्तव्यो वचननिबद्धाच्छिष्टाचारात् वर्णकर्मविशेषव्यवस्थावच
नान्यपि विवाहादिषु तत्तद्वर्णकर्मसु वानंगत्वेन सौरदर्शांतादिमासविशेषान्विदधति येन सर्वकर्मविषयता तेषां स्या
न्मासोपबद्धकर्मविषयतैव किंतु विवाहादिषु विधिनिषेधमुखेन शुभाशुभफलसूचकतया तदुत्तरपिंडदानादिनिषे

धविषयत्वेन वयत्रेषु च मासाग्निहोत्रादिषु चांगत्वेनाहिनगर्भाधानादिष्वंगभूताहोरात्रघटनार्थं ब्राह्मणादीनां चाधानोपनयना
दिकालवसंतादिघटकत्वेन प्राप्ते विशेषमात्रं योविवाहादिषु मासउपादेयः सर्सौरादिरिति यश्चब्राह्मणादिर्मासः सदर्शांतादिरि
तिवचनव्यक्त्या भंगत्वेन मासविशेषविधाने मासपदस्यापि विधेयार्थकत्वेन गौरवात् नचैवं विशिष्टमासानुवादे एक
त्वोभयत्वादि विशिष्टग्रहहविरार्ताद्यनुवादइव वाक्यभेदः श्रुतमासानुवादेन सौरादिविधौ विकल्पातिप्रसंगापत्तेः कर्मवर्ण
विशेषवाचिपदानर्थक्यापत्तेश्चांद्रविधौच नानार्थक्यापत्याधिक्याच्च कर्मवर्णविशेषयोः प्रवेशांविनोद्देश्यस्वरूपापर्य
वसानेनहविरार्तयोरुद्देश्यस्वरूपांतर्गतत्वेन ततविशेषणत्वाभावात् ननुकर्मव्यवस्थावाक्ये मासस्योद्देश्यत्वे श्रुतद्वद्दे
शासंभवेपि श्रुतकर्मानुवादेनैव मासविशेषविधानमस्तु मासपदंतु सामान्यस्य विशेषाविनाभावादेवप्राप्तत्वादनुवाद
एवचांद्रादिपदमेव विधेयथार्थकमिति नगौरवमपि वर्णव्यवस्थावाक्येपि कर्मव्यतिरेकजनितकर्तृषष्ठ्यंगीकारेण ब्राह्म
णादिकर्तृककर्मोद्देशेनैव दर्शांतादि विधिरस्तु मासपदंच पूर्ववदेवानुवादः यद्वातस्यतात्पर्यतो मासोपबद्ध ब्राह्मणादि
संबंधिकर्ममात्रविषयत्वेपि नमासोद्देशेन दर्शांतत्वादि विधिस्तत्र विशिष्टतदुपदेशापत्तेः किंतु षष्ठ्यंतैकपदार्थब्राह्म
णाद्युद्देशेन दर्शांतत्वादि विधिः किंतद्ब्राह्मणसंबंधीत्याकांक्षायां विधीयमानविधीयमानविशेषोपस्थापितस्य मास
स्यैवतत्वावगमात्तत्तद्वर्णविशिष्टमासोद्देशस्यार्थात्सिद्धेर्मासपदंनित्यानुवादएव दशादशैकैकंच मतमनुप्रसर्पतीत्य
त्र संस्कार्यचमसानुवादेन दशत्वविधौ संस्कार्यत्वसंबंधिसंस्कारविशेषापेक्षायां सन्निधानात् भक्षणप्रतीत्याचमस
विशिष्टभक्षणानुवादसिद्धेर्भक्षणलक्षकप्रसर्पतिवत् उच्यते मासपदस्योद्देशकत्वेन संभवविध्यन्वये ऽनर्थकानु
वादांगीकारोनोचितः विशिष्टानुवादनिमित्तवाक्यभेदस्य पूर्वोक्तरीत्यास्त्वपरिहारत्वात् अतएवनप्रसर्पपि साम्यं
तत्र तस्य चमसविशिष्टभक्षणोद्देशकत्वकाव्यभेदस्य परिहर्तुमशक्यत्वात् श्रुतमासव्यतिरेकजनितषष्ठीसंभवेऽश्रु २९९
तकर्मव्यतिरेकजनितषष्ठ्यंगीकारस्यायुक्तत्वाच्च वर्णव्यवस्थावचनगतप्रथमप्रकारस्यायुक्तत्वात् ब्राह्मणादिकर्तृ

431
1942

ककर्ममात्रोद्देशेन दर्शांतादिविधौ पूर्वोक्तरीत्या एतस्य कर्मव्यवस्थावाक्यस्य च बलाबलासंभवनेन विवाहादौ तद्वचनप्राप्तैःसौरादिभिर्विकल्पाप
त्तेश्च इदं चन्याय्यं नस्तु यत्तयुक्तं यद्यपि कर्मवर्णव्यवस्थावचनेषु कर्मानुवादेनैव मासविशेषविधिः स्यान्नतु तद्विशिष्टमासानुवादेन तथा
पि यत्र चैत्रादिमासानां मासमात्रस्य वा अंगतयान्यथावा कथंचित्सामान्यतः प्राप्तिस्तत्रैव तद्विशेषविधिर्न्याय्यो पेक्षितविधित्वलाभात्सामा
न्यप्राप्तिलाघवाच्च नत्वन्यत्र पुरावाचः प्रवदितोर्निर्वपेदिति निर्वापांग प्रातर्विशेषविधिरिव पौर्वाह्णिक प्राधानांगनिर्वापे तत्रांगानांप्र
धानकालत्वेन प्रातःसामान्यस्य प्राप्तत्वात् नतु माध्याह्निकापराह्णिक प्रधानांगनिर्वापे तेन कर्मविशेषव्यवस्थावचनानि तावद्येषु कर्मविशे
षेषु मासीयथाप्रातस्तत्र मुख्यगौणानेक तद्विशेषसंप्लवे तदनुवादेन तथा तथा तन्मासनियामकानि तत्तन्मासोपनवव्रततत्कर्मविशेषवि
षयाण्येव नतु सर्वकर्मविषयाणि चांद्रव्यवस्थावचनस्य तु प्रयोजनमुक्तं वर्णव्यवस्थावचनमपि येषु कर्मसु आधानोपनयनादिषु ब्राह्म
णादिपुरस्कारेण साक्षाद्वत्वादिघटकतया वा मासोपदेशस्तत्कर्मगत ब्राह्मणादिसंबंधिमासोद्देशेन तत्तन्मासनियामकं तत्कर्मविष
यमेव यद्यपि च वसंते ब्राह्मणोग्निमादधीत वसंते ब्राह्मणमुपनयीतेत्यादीनामाधानाधिकरणे विशिष्टविधित्वव्यवस्थापनात्तत्तत्पूर्वप
क्षइव मासविशेषघटितवसंतनिमित्तनैमित्तिकभावरूपः साक्षाद्ब्राह्मणादिसंबंधो ब्राह्मणो यद्यादधीत तदा वसंत इत्यादि तथाप्यरुणैकहा
यनीन्यायेनैकक्रियावशीकारनिमित्तः पश्चात्तनो ब्राह्मणादि वसंतादीनां संबंधोस्त्येवेति तेन संबंधेन संभवत्येव ब्राह्मणादिसंबंधिमासानुवा
दो ब्राह्मणस्य योमासः सदर्शांतइति आग्नेयो ब्राह्मण इतिवत् तदुक्तं भाष्यकारेण याहियागे देवता भवति पुरुषस्यापि यष्टुः सा देवतेति तेन
कर्मविशेषव्यवस्थावचनानां सामान्यतस्तत्तत्कर्मोपबद्धमासविषयत्वाद्वर्णविशेषव्यवस्थावचनानां चाधानादिकर्मद्वारकतत्तद्वर्णविशेषोप
बद्धमासविषयत्वात् भिन्नविषयत्वेन विरोधस्यैवाभावादसत्यपि कस्मिंश्चिद्बाधन्यायेन विकल्पापत्तिः ननूपनयने समानविषयत्वात्
प्रसक्तो विरोधः तत्र हि ब्राह्मणसंबंधेन वसंतोपदेशाद्वर्णव्यवस्थावचनेन ब्राह्मणस्य वसंतघटकौ चैत्रवैशाखौ दर्शांतौ प्राप्तुतः एवं वै
श्यस्य शरत्घटकावाश्विनकार्तिकौ पूर्णिमांतौ कर्मव्यवस्थावचनेन च विवाहादावित्यादिपदगृहीते तत्र सौरौ नैतत् सौरो मासो विवा
हादौ वित्यस्योपनयनांशे वर्णव्यवस्थावचनसंवादेन क्षत्रियमात्रविषयत्वात् नचैवं कर्मव्यवस्थावचनस्योपनयनांशे क्षत्रियमात्रविषय

त्वात् अन्यांशेतुसर्ववर्णविषयत्वाद्वैरूप्यंस्यादितिवाच्यं कर्मविशेषव्यवस्थावचनानांहिकर्मविशेषविषयत्वमेवशाब्दंनवर्णविषय
त्वंतदनुपादानात् आर्थिकंतुतत् तच्चत्रविशेषनियामकंवचनंनास्तितत्राविशेषात्सर्वविषयत्वंयत्रतुतादृशंवचनमस्तितत्रतद्व
शात्तद्विषयत्वमार्थिकंयदिभवतितदाशब्दस्यनकिंचिद्वैरूप्यमिति भ्रातृचरणामयात्तूच्यतेवर्णविशेषव्यवस्थावचनमेवतत्रकर्म
व्यवस्थावचनाद्दुर्बलंतद्विशेषरूपत्वात् यत्तूक्तं यथावर्णव्यवस्थावचनंवर्णांशेविशेषरूपंतथाकर्मव्यवस्थावचनमपिकर्मांशे
यथाचतद्वर्णांशेसामान्यरूपंतथेदमपिकर्मांशइतितदयुक्तं वर्णव्यवस्थावचनेहिउद्देश्यस्यमासस्यषष्ठ्युक्तब्राह्मणादिसंबंधघ
टनार्थमुभयसंबंधविहितकर्मविशेषालोचनस्यहिषादीनांदृष्टिकामादितादर्थ्यसंबंधघटनार्थसौभरालोचनस्येवावश्यकत्वे
नतस्यतद्विषयकत्वस्याप्यवश्यंभावात् एवंहिश्रुत्यर्थाभ्यांतस्यवचनस्यार्थः ब्राह्मणादिपुरस्कारेणकर्मविशेषेविहितोयोमा
सः सदर्शांतादिरेवेति नचैवंकर्मव्यवस्थावचनेवर्णविशेषालोचनमावश्यकं येनतस्यापितद्विषयत्वंस्यात् तदालो
चनंविनापिविवाहादौकर्मणियोमासः ससौरादिरिति सनन्वयोपपत्तेः कर्मणःसाक्षादेवमाससंबंधात् तेनवर्णव्यव
स्थावचनंवर्णांशइवकर्मांशेविशेषरूपंवर्णांशेसामान्यरूपस्यकर्मव्यवस्थावचनस्यस्वविषयेबाधकमेवेत्युपनयनेवर्ण
व्यवस्थैवाश्रयणीया ततश्चविवाहादावित्यादिपदेनोपनयनंनसंग्राह्यमेवयदिकिंचिदुपनयनग्रहणंसौरमासविधौ
स्पष्टंभविष्यतितन्मूर्धावसिक्तादिविषयंव्याख्येयमिति आधानंतुस्वतोयज्ञरूपंसद्योरनिरूप्याणीतिपक्षेपवमानहवि
रूपयज्ञवसंलिखितमपिनसावनग्रहणविषयः तस्यसाक्षान्माससंबंधाभावात् वसंताद्यतुद्वारकोहितस्यतत्संबं
धः नचऋतवःसावननियमविषयत्वयोग्याःतेषांसौरचांद्रान्यतरमात्ररूपत्वात् अपर्याप्ताहृतंप्रतिनवमिश्रंतुष
ट्सत्रूनित्यत्रमासद्वयत्वसामान्याद्दतुशब्दोगौणइत्युक्तं वस्तुतस्तुयज्ञादौसावनःस्मृतद्वत्राहःसंघातरूपाःसत्रा
हीनरूपाःतत्तुल्याश्चपंचाहिकचातुर्मास्यादयएवयज्ञाग्रह्यंते तेषामहोरात्रसमूहसाध्यानांसावनमानग्रहणंविना
कर्तुमशक्यत्वात् अहःशब्दोहिवेदेअहोरात्रसाध्यसोमयागाभ्याससमुदायवाची तादृशाहःसंघातरूपाश्चस

त्राहीनाः अतएवविष्णुधर्मोत्तरे सत्राण्युपास्यान्यथसावनेनेतिसत्रग्रहणमेवकृतं अतएवषट्त्रिंशत्षट्त्रिंशत्वामावेधि
त्यादिविहितनिरूढपशुबंधादिविषयेणविवाहोत्सवयज्ञेषुसौरंमानंप्रशस्यतइतिवचनेनास्यविरोधः याज्ञवल्क्येनाप्यु
क्तंमशः प्रत्ययनंतथेति अयनंचसौरमेवेत्युक्तं तेनवर्णव्यवस्थावचनविषयेष्वाधानोपनयनादिषुमासोब्राह्मणा
दिभिर्दर्शांतादिरेवोपादेयः कर्मव्यवस्थावचनविषयेष्वेतद्भिन्नेषुतेषुससौरादिरितिस्थितं कर्मव्यवस्थावचनेषुचवि
वाहादावित्यादिशब्देनतान्येवप्राह्याणियत्रतत्रद्राशिस्थसूर्यपुरस्कारेणैवविधिनिषेधमुखेनकालोपदेशोवचनांतरे
णयुक्त्यावायत्रसौरमासनियमः तेषामेवकेषांचिच्छृंगग्राहिकयापरिगणनंकृतंश्रीकरादिभिः एवंयज्ञादावित्यादिश
ब्देनापियत्रसावनदिनसंघातस्यैवोपदेशोयथाशूद्राद्याशौचेयत्रवावचनांतरेणोपपत्त्यावासावनमाननियमस्तेषां
ग्रहणं पित्र्यकृत्यादावित्यादिशब्देनतुयत्रकथंचित्सौरादिनियमस्तेषांसर्वेषां अत्रचौलोपनयनविवाहव्रतगोदानादि
षुयागर्भग्रहणादारभ्यजन्मनोवावर्षगणनासातिथिवृद्ध्याचांद्रमासाश्रयणेनयच्चैत्रादिमासस्तत्पक्षगतायांयस्यांतिथौ
गर्भधारणंजन्मवातांतिथिमारभ्यवैशाखादिमासतत्पक्षगततिथिपर्यंतेकक्ष्यादिमासगणनयाद्वितीयचैत्रादिमासत
त्पक्षगततत्तिथिपर्यंतपूर्वगणितद्वादशमासात्मकमेकंवर्षमेवंद्वितीयादीति अनंतव्रतादिष्वेवंजातीयकेषुव्रतेषु
द्वादशाब्दादिव्यापिव्रतचर्यास्वचैवमेव यत्तु आयुर्दायविभागश्चप्रायश्चित्तक्रियातथा सावनेनैवकर्तव्याशत्रूणां
वाप्युपासनेतिज्योतिर्गार्ग्यवचनंतदावृत्त्याक्रियमाणप्राजापत्यादिपरं यद्वावचनवशाद्द्वादशाब्दादावपिसावनमानमेवा
स्तु अतएवजन्मदिनोत्सवोवर्षवृद्धिपर्यायोद्वितीयादितन्मासतत्पक्षगतायांतत्तिथावेवद्वितीयादिवर्षादिपूर्तायां
विहितोब्रह्मपुराणे सर्वैश्चजन्मदिवसेस्नातैर्मंगलपाणिभिः गुरुदेवाग्निविप्राश्चपूजनीयाःप्रयत्नतः स्वनक्षत्रंचपि
तरौतथादेवःप्रजापतिः प्रतिसंवत्सरंचैवकर्तव्यश्चमहोत्सवइति अतएवनतत्रसौरमासग्रहणं तस्मिन्सविचक्र
वत्परिवर्तेतेत्युक्तरीत्यातत्सौरमासेकदाचित्तत्तिथेरप्राप्त्यातल्लोपप्रसंगेप्रातिसांवत्सरिकत्वव्याख्यातप्रसंगात्

433
1942

अधिकमासायते उत्कर्षानुपपत्ते उक्तश्चोत्कर्षः कौमिथुनावर्षवृध्याभिषेकादिकर्तव्यमधिकेनत्विति यस्तुसावनेनैतेषुवर्षगणने
तिकेषांचिद्व्यवहारः सतेषांचांद्रःशुक्लादिःकृष्णादिर्वाद्विविधएव यत्किंचित्त्रिंशत्तिथिसमुदायस्तुसावनइत्यभिमानात् हेमा
माद्रेरप्येतादृशोचांद्रेक्वचित्सावनव्यवहारः वस्तुतस्तु नायंसावनस्त्रिंशत्सूर्योदयनियमाभावादित्युक्तं गर्भजन्मादित्वान्मु
ख्यचांद्रत्वसंभावनाप्यत्रनास्ति एवंपुंसवनादिगर्भसंस्कारेषु निष्क्रमणान्नप्राशनादिषुच यस्तृतीयादिमासः सोपितत्पक्ष
गतांगर्भाग्रहणजन्मसंबंधिनींतिथिमारभ्यतत्पक्षगततत्तिथिपर्यंतश्चांद्रएव अतएवास्यागर्भिण्याः पंचम्यांतृतीयोमा
सोलग्नइत्यादिर्योपिव्यवहारः अत्रापिसावनव्यवहारः पूर्ववत् गर्भाधानकालश्चरजोदर्शनदिवसादारभ्यषोडशदिवसा
त्मकस्तुःसावनदिवसात्मकएव अतएवतत्प्रथमावधिभूतंसावनमहरेवरात्रौरजोदर्शनेतस्याद्वैधात्रेधाविभागादिना
व्यवस्थितं आशौचकालोपिदशाहादिरेवंनामकरणकालश्चैकादशाहादिः जातकर्मणश्चस्वकालातिपन्नस्य अन्यथा
तस्यनिमित्तानंतरकालत्वेनानियतकालत्वात्सावननियमविषयेषुपरिगणनानुपपत्तेः यत्वेतेष्वेवचौलोपनयनादिषु
विशेषनामभिर्विहितानिषिद्धावामासास्तेसौरमानेनग्राह्याः सौरोमासोविवाहादावितिवचनात् अयंत्वादिशब्दः संस्कारत्व
साम्याद्वचनांतरवशाच्चोपनयनादीनिगृह्णाति तेयथावृद्धगार्ग्यः माघादिमासषट्केतुमेखलाबंधनंमतं चूडाकरणमत्रैव
श्रावणादौविवर्जयेदिति अत्रोदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाइत्याद्युदगयनविधिसंवादो
पिसौरग्रहणेबीजंनारदः दृश्यमानेगुरौशुक्रेवैशाखेचोत्तरायणे शरद्ग्रीष्मवसंतेषुव्युत्क्रमात्तुद्विजन्मनां मुख्यंसाधारणंतेषांत
पोमासादिपंचकमिति शाखेशेवेदाधिपेवेदानामधिपाजीवशुक्रभौमबुधाःक्रमादित्युक्तोगर्गः विवाहेमेखलाबंधेजन्ममासं
विवर्जयेत् विशेषाज्जन्मपक्षंतुवसिष्ठाद्यैरुदाहृतं ज्येष्ठेमासिविशेषेणसर्वज्येष्ठस्यचैववहि उपनीतस्यपुत्रस्यजडत्वंमृत्युरेवचेति
व्यासः यश्चैत्रवैशाखसितात्तृतीयामाघस्यसप्तम्यपिफाल्गुनस्य कृष्णेतृतीयोपनयेप्रशस्ताः प्रोक्ताभरद्वाजमुनींद्रमुख्यैरि
ति विवाहमधिकृत्यनारदः माघफाल्गुनवैशाखज्येष्ठमासाःशुभप्रदाः मध्यमःकार्तिकोमार्गशीर्षोवैनिंदितापरेइतिभरद्वा २२९

ज्ः माघफाल्गुनवैशाखज्येष्ठाषाढमृगाह्वयाः षडेतेपूजितामासाश्चातुर्वर्ण्यस्यनित्यशइति आपस्तंबः सर्वर्तवोविवाहस्यशैशिरौ
मासौपरिहाप्योत्तमंचनैदाघमितिव्यासः माघमासेभवेदूढाकन्यासौभाग्यसंयुता फाल्गुनेदाभवेत्साध्वीवैशाखेपुत्रिणीभवेत्
धर्मयुक्ताभवेज्ज्येष्ठेधनिनीकार्तिकेभवेत् देवपूजारतानित्यंमासेस्यात्सौमदैवते सौमदैवतोमार्गशीर्षः उक्तवर्जमथान्येषुमासेषु
प्राप्नुयाद्यदि विवाहंकन्यकासास्यात्कृतशीलार्थवर्जितेति अत्रकैश्चिन्निषिद्धयोराषाढकार्तिकयोःक्वचिद्विधानान्मध्यमत्वं य
नु सार्वकालमेकेविवाहंसर्वर्तवोविवाहस्यदशमासाःप्रशस्यंतेचैत्रपौषविवर्जिताइतिचतदधार्यकन्याविषयं एवमुपनयनेपि
तपोमासादिपंचकमित्युक्त्यानिषिद्धस्याषाढस्यमाघादिमासषट्केत्विति विधानंदैवमानुषप्रतिबंधेनज्येष्ठपर्यंतमजातोपनयन
स्यकालातिपातापत्त्या अधार्यस्यमाणवकस्योपनयनेएवंविनर्तुनावसंतेनकृष्णपक्षेगलग्रहे अपराह्णेचोपनीतःपुनःसंस्का
रमर्हतीतिनारदवचनेनकृष्णपक्षेसर्वस्मिन्निषिद्धेपिपुनःकासांचित्तत्कृतानांतिथीनांयस्तुनर्विधानंकृष्णेचप्रथमाःपूज्याःकद
चित्कुर्गोविधावितिपंचमीपर्यंतानांफाल्गुनस्यकृष्णेतृतीयेत्तिचतथाकृष्णपक्षेचतुर्थीचसप्तम्यादिदिनत्रयं त्रयोदशीचतुष्कं
च अष्टावेतेगलग्रहाइतिपरिभाषितानांगलग्रहाणांसर्वेषांनिषिद्धेपिशुक्लपक्षेद्वितीयाचतृतीयापंचमीतथा त्रयोदशीचदशमीस
प्तमीव्रतबंधने श्रेष्ठास्त्वेकादशीषष्ठीद्वादश्येतास्तुमध्यमाः एकांचतुर्थींसंत्यज्यकृष्णपक्षेतुमध्यमाः आपंचम्यास्तुतिथयःपराः
स्युरितिनिंदिताइतिनारदवचने पुनःसप्तमीत्रयोदश्योर्विधानंतत्सर्वमधार्योपनयनविषयमेव प्रायश्चित्तरूपपुनरुपनयनविषयं
च एवमुदगयनइत्याद्याश्वलायनवचनेनोपनयनेउदगयनआपूर्यमाणपक्षेपुण्याहइतिपारस्करवचनेनउदगयनेपूर्वपक्षेपुण्ये
ह्निप्रागावर्तनादह्नःकालंविंद्याद्यथादेशंचेति गोभिलवचनेनचदैवकर्ममात्रेउत्सर्गतउदगयननियमेपिरात्रिभागःसमाख्यातःख
गाशोर्दक्षिणायनं व्रतबंधादिकंतस्मिन्नश्चूडाकर्मविवर्जयेदितिचदक्षिणायननिषेधेपियत्तुचैत्रेकृष्णाद्वितीयायांतिस्रश्चैवाष्टकास्तु
च मार्गेचफाल्गुनेचैवआषाढेकार्तिकेतथेति भृजबलवचनेकृष्णाद्वितीयायामित्यनुषंगेणकार्तिकमार्गशीर्षयोःकृष्णद्वितीया
मात्रनिषेधेनतयोरुपनयनेभ्यनुज्ञातंतदपितथा वैश्यविषयंच तस्यदक्षिणायनेसर्वस्मिन्नुपनयनविधानात् तथाचगर्गः

435
19

विप्रस्यक्षत्रियस्यापिमौंजीस्यादुत्तरायणे दक्षिणेचविशांकार्यानानध्ययनसंक्रमे अनध्यायेपिकुर्वीतियस्यनैमित्तिकंभवेदिति अपिनादक्षि
णायनकृष्णपक्षयोः समुच्चयः अतएवार्थोपितपूर्वस्येत्यधिकृत्याश्वलायनःकालश्चेति अनिरुक्तइत्यनुषंगः तथामंत्रदीक्षाकारेऽग
स्त्यसंहितायां मधुमासेभवेदुःखंमाधवेधनसंचयः मरणंभवतिज्येष्ठे आषाढेबंधुनाशनं समृद्धिःश्रावणेस्तुनंभवेद्भाद्रपदेक्षयः
प्रजानामाश्विनेमासिसर्वतःशुभमेवहि ज्ञानंस्यात्कार्तिकेसौम्यंमार्गशीर्षेभवत्यपि पौषेज्ञानक्षयोमाघेभवान्मेधाविवर्धनं फा
ल्गुनेपिविवृद्धिःस्यान्मलमासंविवर्जयेदिति अन्यत्रापि आषाढपूर्वमासेच आषाढेमार्गशीर्षके दीक्षानकारयेद्धीमानन्यमासे
षुकारयेदितिमत्स्यपुराणे चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेदिति भविष्योत्तरे त
स्मिन्सलिलसंपूर्णेकार्तिकेचविशेषतः तडागस्यविधिःकार्यःस्थिरनक्षत्रयोगतः मुनयःकेचिदिच्छंतिव्यतीतेचोत्तरायणे
नकालनियमस्तत्रसलिलंतत्रकारणमिति उत्तरायणमकरसंक्रांतौ मत्स्यपुराणे चैत्रेव्याधिमवाप्नोतियोगृहंकारयेन्नरः वैशा
खेधनरत्नानिज्येष्ठेमृत्युंतथैवच आषाढेभृत्यरत्नानिसूक्ष्मंवस्त्रमवाप्नुयात् श्रावणेमित्रलाभंतुहानिंभाद्रपदेतथा पत्नीना
शमाश्वयुजेकार्तिकेधनधान्यकं मार्गशीर्षेतथाभक्तंपौषेतस्करतोभयं लाभंतुबहुशोविंद्यादग्निंमाघेविनिर्दिशेत् कांचनं
फाल्गुनेपुत्रानितिकालफलंस्मृतमितिमनुः मार्गशीर्षेशुभेमासियात्राद्यात्रांमहीपतिः फाल्गुनेवाथचैत्रेवामासेप्रतियथाबलं
अन्येष्वपिचकालेषुयदापश्येत्ध्रुवंजयं तदायायाद्विगृह्यैवव्यसनेचोत्थितेरिपोरिति एवमन्येपि तत्तत्कर्मसु तत्तन्मासविशेष
लाभभितस्तद्विधयोद्रष्टव्याः नभाद्रमासेनचचैत्रपौषेक्षौरंविवाहोनचकर्णवेधइत्यादयश्चनिषेधाः मासविशेषवचनाश्च
चैत्रादिशब्दायद्यपिचांद्रेमुख्यास्तथापिवचनाविशेषबलात्प्रायश्चदैवकर्मणामुद्गाहादीनामुदगयनकालत्वेन तद्घटकानां
सौरमासानामेववृद्धिस्थत्वेनतेषांसौरपरत्वस्ययुक्तत्वान्महासप्तम्यादीनांचतत्तद्राशिस्थसूर्यपुरस्कारेणवयोगानामुपदि
ष्टत्वात्प्रतिपदाद्यंत्येषु परिगणनवशादवगमान्महाषष्ठीदशहरायुगादीनांचदशहरात्तनोत्कर्षइत्यादिना तत्तन्मासेधिके सति
तत्रैवानुष्ठेयत्ववचनेननदृश्यतिवाक्यगतानांज्येष्ठंवैशाखादिशब्दानांसौरपरत्वावगमादनुक्रांतेषुविवाहादिषुसौरमानेनैव

437
194

विधिनिषेधविषयभूताःशुभाशुभफलहेतवश्चमासाउपादेयाः अतएवतडागादिप्रतिष्ठायांसूर्यभोग्यराशिपुरस्कारेणैवशुभाशुभ
फलेकथनंवह्निपुराणेवापीकूपतडागानांतस्मिन्कालेविधिस्मृतः शुदिनेशुभनक्षत्रेप्रतिष्ठाशुभदास्मृता कर्कटेपुत्रलाभश्चसौख्यं
तुमकरेमकरेभवेत् मीनेयशोर्थलाभश्चकुंभेवसुबहूदयं वृषेचमिथुनेवृद्धिर्वृश्चिकेथजलंभवेत् पितृलोकस्थितःकन्यायांतुलायां
शाश्वतीगतिः सिंहामेषाधनुर्नाशंजलस्याद्विजयच्छतीति तथादेवीप्रतिष्ठायांनरसिंहपुराणे तथामहाश्विनोमासउत्तमः
सर्वकामदः देवीतत्रसदाशक्र्यांशुनापिप्रतिष्ठिता भवतेफलदापुंसांकर्कस्थेचवृषस्थिते नतिथिर्नचनक्षत्रंनोपवासोत्रका
रणं मातृभैरववाराहनारसिंहत्रिविक्रमाः महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायनइति तथाकेषुचिन्निषेधोपितत्पुरस्का
रेण वृद्धगार्ग्यः मीनेधनुषिसिंहेचस्थितेसप्ततुरंगमे क्षौरंयात्रांनकुर्वीतविवाहंगृहकर्मचेतियसिष्ठः आर्द्रादिकेस्वाति
विरामकालेनक्षत्रवृंदेदशकेस्थितेर्के विवाहचौलव्रतबंधदीक्षासुरप्रतिष्ठादिनकार्यमेवेति भविष्योत्तरे विवाहव्रतबंधा
दिचूडासंस्कारदीक्षणं यत्नगृहप्रवेशादिदानार्चनप्रतिष्ठनं पुण्यानियानिकर्माणिवर्जयेद्दक्षिणायनइति भोराजः
सुप्तेहरौप्रकटशेषफणापधानेलक्ष्मीकराब्जपरिमार्जितपादपद्मे मीनेरवौधनुषिवास्तमितेचशुक्रेवास्तुक्रियाविधिर
सौमुनिभिर्निषिद्धइति जन्ममासस्तुनसौरः किंतुत्रिंशत्तिथ्यात्मकश्चांद्रएव आरभ्यजन्मदिवसाद्यत्रत्रिंशद्दिनंभवेत्
जन्ममासःसविज्ञेयःसर्वकर्मसुगर्हितइतिवृद्धगार्ग्यवचनात् तथाकेचिद्विवाहाद्यंतरनिमित्तकाविवाहाद्यंतरांगभूताविधि
धिनिषेधाः माससंख्याविशेषानुबद्धाः यथा एकोदरभ्रातृविवाहकृत्यात्स्वसुर्नपाणिग्रहणंविधेयं षण्मासमध्येमुन
यःसमूचुनमुंडनंमंडमतोपिकार्यं एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः नसमानक्रियांकुर्यान्मातृभेदेविधीयते भ्रात्रो
र्युगेयुगेस्वस्त्रोर्भ्रातृस्वस्त्रयुगेतथा विवाहोद्वहलादर्वाक्नैकस्मिन्मंडपेगृहे कुलेभतुत्रयादर्वाङ्मंडनादपिमुंडनं प्रवे
शानिर्गमंचैवनकुर्यान्मंडनत्रयं एकःकर्ताशुभंकुर्यात्तत्सुत्योःपुत्रयोरपि षण्मासेवाचतुर्मासेपूर्णवर्षेशुभावहं विवाह
श्चैकजन्यानांषण्मासाभ्यंतरेयदि अभंशयंत्रिभिर्वर्षैस्तत्रैकाविधवाभवेत् सतुत्रयस्यमध्येचेदन्याद्वस्यप्रवेशनं तदा

स्येकोदरस्यापि विवाहस्तु प्रशस्त इत्यादयः तथा विवाहोत्तरं पिंडदानादि निषेधाश्च तन्निमित्तकास्ताद्दशा एव विवाहव्रतचूडासु कर्म
मर्धं तदर्धकं पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणमित्यादयः तदुभयविषया अपि मासाः सौरा एव ग्राह्याः तेषां विवाहांगत्वेपि
विवाहादिसंबंधस्याविशिष्टत्वादवधिभूतस्य च विवाहाधिकरणमासस्य सौरत्वेन तदवधिकानामन्येषामपि ताद्दशानामेवो
पस्थिते पूर्वोत्तरान्यतर विवाहादिफलवैकल्यपरिहारार्थत्वेन निषेधानां तदुपकारकत्वाच्च नेनयस्मिन्सौरे माघादौ यत्स्य
गतायां यस्यां तिथौ विवाहादि जातं तदवधिकाः सौरा द्ययएव फाल्गुनादयस्तत्तत्पक्षगततत्तिथिपर्यंताः षडादयो मासास्तत्तन्नि
षेधेषु ग्राह्याः ततश्च यत्कर्मविधिगतानां यत्स्वरूपबोधकवचनगतानां वा चैत्रादिशब्दानामुदगयनादिवचनसंवादो
त्कर्षादिलिंगवशात्साक्षादेव अध्यायनं च ग्रहचारकर्म सौरेण मानेन सदाध्यवस्येदित्यादिवचनाद्वा सौरपरत्वमवगम्यते
साक्षादेव वा येषु च तद्राशिस्थसूर्यरूपसौरमासस्यैव विधिनिषेधाभ्यामुपदेशो यथा कथंचित्तत्संबंधिनो ये मासा
स्ते सौरा एव ग्राह्यास्तान्येव च सौरामासौ विवाहादावित्यादिपदेन गृह्यंते व्रतानि नियमाश्च त्रयेसंग्रहीतास्ते पि संक्रां
त्यादि सामान्यविशेषप्रयुक्ता एव ग्राह्याः सौरग्रहणेपि च पक्षतिथिविशेषविधिः संभवत्येव तस्यापि तत्संबंधादाकांक्षा
वशाच्च यत्तादौ सावन इत्यत्रापि यान्यहोरात्रसाध्यत्वात्सावनमानं विना कर्तुं न शक्यंते तानि गृह्यंते अहोरात्रसाध्यत्वं च
सत्राहीनगर्भाधानाशौचादीनां शास्त्रतः मतिवृद्धिग्रहणादीनां लोकतः येव हि मासिकी वृद्धिम्रतिवासे वादिनक्षिणे
न कार्यनिर्वाहार्थं गृह्यमाणा कायिका भवति कायाविरोधिनी शश्वत्स्वणपादादिकायिकेतिवचनात् कार्यनिर्वाहश्चाहो
रात्रकृत्यं न तु तिथिकृत्यमिति यत्तु श्रीकर परिगणितसावनग्रहणविषयमध्ये दानहोमयोः परिगणनं तत्र होमो मासाग्निहो
त्रहोमादिः होमस्य यागपर्यायत्वत्तस्य चाभावात् दानमपि ताद्दशमेव किंचिद्द्रष्टव्यं ग्रहादिसाध्यानि वा महादावयाधि न
प्रतिमादानादीनि सदंतोर्ध्वदंतजननशांत्यादिषु विहितानि सप्ताहादि ब्राह्मणभोजनदानादीनि च यच्च योषिद्व्यवहार
सिद्धतिथिवद्धचांद्रमासाश्रयणानां पुंसवनादीनां तन्मध्ये परिगणनं तत्तत्रैव यत्किंचित् त्रिंशद्दिनघटितत्वेन सावनत्वो

चारात् एवं प्रथममासमारभ्य या गर्भस्य उपनिषदाविष्कृताः जननोत्तरं च दंतजन्म सप्तमे मासी त्याद्यास्तत्संबंधिनोपि मासास्तिथि
वद्धचांद्रा एव यद्यासावनबलात्सर्वेप्येते त्रिंशदहोरात्रात्मकसावना एव भवंतु योषित्व्यवहारस्तु ताद्दशचांद्रविषयोल्यांतरत्वात्
द्वारगणनातस्तिथिगणनायाः सुकरत्वाच्च स्थूलद्दष्ट्या प्रतिमासग्रहणादवस्थितयोर्युगपदेव वर्षगणया गृह्यमाणयोर्मृतिवृ
द्ध्योरिव तत्र हि पक्षाधिकत्रिशततिथिसंघे जाते नंतरमेव पूर्णद्वादशमासोचितामृतिर्वृद्धिश्च गृह्यते न च तदुचितं किंतु षट्
दिनोचितवृद्धिमृतिभाग्न्यूनयोरेव तयोर्ग्रहणमुचितं सावनमासाश्रयत्वात् चांद्रमासस्य च षड्भिर्दिनैः सावनवर्षाद्दूनत्वा
त् स्थूलद्दष्ट्यैव तु तत् विवाहोत्सवयत्तेषु सौरं मानं प्रशस्यत इत्येतद्विषयस्तु यत्तः पशुबंधादिसत्तः चांद्रव्यवस्था वचनेन च
पितृकृत्यादावित्यादिना सौरसावनविषयव्यतिरिक्तानां सर्वेषां ग्रहणमित्युक्तं कन्याकुंभवृषस्थेर्कइतिवचनात्तु वर्षमध्ये ति
सृष्वेवामावास्यासु श्राद्धपक्षे सौरमासस्थानां ग्रहणं तस्य च प्रयोजनं तस्मिन्नपि पक्षे तद्राशिष्वधिमासपाते तत्तद्मावा
स्याश्राद्धस्य तत्रैवानुष्ठानं न तु सूर्यदति प्रत्यमास्यां वां क्रियमाणस्य त्वधिमासेप्यनुष्ठानं भवत्येवेतिवक्ष्यते कन्यागते सवि
तरीति तु न सौरमारविधायकं किंतु प्राशस्त्यार्थमित्युक्तं कृष्णपक्षप्रकरणे हरिशयनादीनि मुख्यचांद्रमासेष्वेव कर्तव्यानि
तत्रोपपत्तिः मिथुनस्थे सहस्रांशावित्यादीनां च विषयो वक्ष्यति मलमासप्रकरणे एवं तिथिवृद्ध्या चरेदित्याद्युक्तं चांद्राय
णमपि दर्शांते पूर्णिमांते वा यथाकथंचिदित्याद्युक्तं तत्रमासोपवासव्रतं चातुर्मास्यव्रतानि द्वादशाब्दादिव्रतचर्यादीनि च
तिथिबद्धान्यतरचांद्रायणेन कर्तव्यानि कार्तिकस्नानादिनियमाश्च पौर्णमास्यंततिथिबद्धान्यतरचांद्राश्रयणेन सौराश्र
यणेन वा विकल्पेन कर्तव्याः सर्वत्र वचनदर्शनात् न च कांडोक्तेषु तु व्रतनियमेषु प्रायः शुक्लादेरेव क्वचित् कृष्णादेरपि
चांद्रस्यैवाश्रयणं यत्राहत्य सूर्यराशिविशेषोपदेशस्तानि संक्रांत्यादिव्रतानि च सौरमासविषय इत्युक्तं उपाकर्मणि साम
गतादितरव्यवस्थया सौरचांद्रमासाश्रयणं अनुकर्षवचनं च सामगविषयमेव तत्र चोपपत्तिर्मलमासप्रस्तावे वक्ष्यते त
दयमत्र संक्षेपः मासशब्दश्चांद्र एव मुख्यस्तत्राप्यमांतके सौरसावननाक्षत्रकृष्णादिषु यतः कुतः त्रिंशत्तिथिसमूहे च

439
1942

गौणोमध्यादयोपिच चैत्रादयश्चतद्भेदवचनत्वात्तथाविधाः मीनादिस्थार्कमारभ्यसितपक्षतिमासगाः यौगिकायोगरूढावायद्वारूढास्त
थापितु गौण्यवसौरकृष्णाद्यास्तेनयचविशेषतः गौणस्यापिसौरस्यग्रहणेज्ञापकंभवेत् सौरंमासमंशाख्यमितिमीनादिस्थैरवावितिसा
क्षाद्विधिर्निषेधौवातत्पुरस्कारतःस्फुटा शुभाशुभफलोक्तिर्वायद्विवायनयोद्वयोः उपदेशोविधिर्मुख्यःप्रतिषेधमुखोपिवा यथा
विवाहचौलाचौप्रतिष्ठादाक्षिणादिषु तत्रयात्व्यःसएवैवंविनासानवमानतः नशक्त्यायत्रघटनावचनंवाविशेषतः यथाशौचा
हीनसत्रस्वतिहद्धिक्रयादिषुकौंडपायिनहोमादौप्राजापत्यमुखेव्रते तत्रसावनएवेषुचौलोपनयनादिषु विवाहद्वादशाद्यादिव्रता
नंतव्रतादिषु तृतीयाष्टमवर्षादिघटनार्थमपेक्षितः गर्भजन्मारंभतिथेस्त्रिंशत्तिथिचयात्मकः मासोयात्व्यश्चांद्रएवसीमंतेपुंस
वेतथा निष्क्रमान्नाशनाद्येषुदंतजन्मादिकेतथा मासोयमेवयोषादिव्यवहारप्रमाणकः सावनत्वेनायमेवक्वचिद्व्यवहृतोन
तु मुख्यःसावनएवायंत्रिंशत्सूर्योदयाःसहि यद्वितेषड्मासादिग्रहणंवचसोबलात् सावनेनैवमानेनव्यवहारस्तुलौकिकः
अल्पांतरत्वात्संवाद्य आधानोपनयादिषु वसंतघटकोमासोदर्शांतोब्राह्मणेमतो शरद्ग्रीष्मगतौतौतुवैश्यस्यक्षत्रियस्य
च पूर्णिमांतौचसौरोवान्यत्राप्येवंविधेतथा माघकार्तिकवैशाखस्नानेषुतुविकल्पतः पौषचैत्रशुक्लैकादशीपर्वाद्यमास
योः सौरस्यमकरादेर्वाग्रहणंवचनाद्भवेत् उक्तेभ्योगौणमासार्हविषयेभ्यःपरेषुतु दैवपित्र्येषुसर्वेषुशुक्लादिर्मुख्यएवसः सर्व
कर्मसुसंकल्पेसर्वैःशुक्लादिरेवसः विंध्याद्दक्षिणउल्लेख्यस्तत्रचोत्तरतस्ततः कृष्णादिरेवनियतादाचारान्मंडितोदितात्
इतिमासतत्वविवेचनं अथमलमासतत्वंविविच्यते सचद्विविधः सूर्यसंक्रांतिरहितस्तद्वययुक्तश्च तथाचकाठकगृ
ह्ये यस्मिन्मासेनसंक्रांतिसंक्रांतिद्वयमेववा मलमासःसविज्ञेयःइति मासश्चांद्रः तथाचब्रह्मसिद्धांते चांद्रोमासो
ह्यसंक्रांतोमलमासःप्रकीर्तितइति सोपिचशुक्लप्रतिपदादिदर्शांतोमुख्यएव तथाचइंद्राग्नीइतिभादितल्लक्षणमुक्त्वा
लघुहारीतः तपतक्रम्यतुरविर्यदिगच्छेत्कथंचन आद्योमलिम्लुचोज्ञेयोद्वितीयःप्राकृतःस्मृतइति तंशुक्लप्रतिपदाद्य
क्षणदर्शांत्यक्षणपरिछिन्नंमासमतिक्रम्यरविःराश्यंतरंगछेत्संक्रमेतन्मध्येनसंक्रमेदितियावत् आद्यद्वितीयशब्दाभ्यां २२५

441
1942

तस्येतरमासापेक्षयाद्वैगुण्यंउत्तरमाससंज्ञत्वंचसूचयति तथाचज्योतिःपितामहः षष्ट्यातुदिवसैर्मासःकथितोबादरायणेः
पूर्वमर्धंपरित्यज्यकर्तव्याउत्तरेक्रियाइति यत्तुत्रयोदशमासाःसंवत्सरइतिश्रुतिवचनंतत्त्रिंशद्दिवसमासाभिप्रायेण द्विराषा
ढादिव्यवहारोपित्रिंशद्दिवसाभिप्रायेणैव नचकथंतस्यचैत्रादिसंज्ञत्वंमेषगरविसंक्रांतिःशशिमासेभवतियत्रतच्चैत्रत्वं ए
वंवैशाखाद्यावृषादिसंक्रांतियोगेनेतिब्रह्मगुप्तोक्तचैत्रादिलक्षणाभावात् अतएववत्सरांतर्गतःपापोयज्ञानांफलनाशकृत्
नैर्ऋतैर्यातुधानाद्यैःसमाक्रांतोविनामतइतिज्योतिःशास्त्रेतस्यचैत्रादिनामशून्यत्वमुक्तमितिवाच्यंवृद्धव्यवहारेमलमासेपिचै
त्रादिसंज्ञाप्रयोगादर्शनान्मेषादिसंक्रांतियोगस्यशुद्धमासलक्षणत्वात् मीनादिस्थेरविर्येषामारंभप्रथमक्षणेभवेत्तेद्वे
चांद्रमासाश्चैत्राद्याद्वादशस्मृताइतिव्यासोक्तमलमासव्यापकचैत्रादिलक्षणस्यैवतेनोपलक्षणाद्वा ताद्दशेषुहिमासेषु
प्रायेणमेषादिसंक्रांतयोभवंत्येवेति नत्वेतल्लक्षणानुरोधेनव्यवहारबाधोयुक्तः तदुक्तमाचार्यैःसिद्धानुगममात्रंहिक
र्तुंयुक्तंपरीक्षकैः नसर्वलोकसिद्धस्यलक्षणेनविवर्तनमिति तस्यचैत्रादिसंज्ञारहितत्वेएकसंज्ञौयदामासौद्विराषाढःस
विज्ञेयस्तत्राधिकंकर्मउत्तरेमासिकारयेत्इत्यादिविरोधश्च तस्यमाससंज्ञाविशेषहितत्वेतत्पुरस्कारविहितकर्मणस्तत्रप्राप्त्यभावात्
विनामकत्वोक्तिस्तुपिकृद्मलिम्लुचादिनामकत्वाद्विद्यमानस्यापिनाम्नस्तत्प्रयुक्तकर्मानर्हत्वेनतस्यासत्कल्पत्वाद्वा मेषादिस्थे
सवितरियोयोमासः प्रपूर्यतेचांद्रः चैत्राद्यःसज्ञेयः पूर्तिद्वित्वेधिमासोंत्यइत्यपिज्योतिःशास्त्रोक्तंचैत्रादिलक्षणमुत्तरमास
संज्ञादिमासाव्यापकंमेषगेत्यनेनव्याख्यातं ननुमीनादिस्थइत्यपिक्षयमासाव्यापकं तथाहि पंचपंचाशदधिकनवशतशका
द्वेतुलासंक्रांतिरमावास्यायांजाता ततोमंदगत्याद्वितीयामावास्यामतिक्रम्यवृश्चिकसंक्रांतिःप्रतिपदि ततःपुनःस्वल्पगत्या
धनुःसंक्रांतिरमावास्यायांतत्रहिसंक्रांतेश्चांद्रात्पूर्वःसंक्रांतिरहितःकार्तिकस्तुलास्थरव्युपक्रांतत्वात् ततःउत्तरःपौषएव
धनुःस्थरव्युपक्रांतत्वात् मध्यस्थोहिसंक्रांतिमार्गशीर्षोभवतिततवृश्चिकस्थरव्युपक्रांतत्वंतल्लक्षणंतत्रास्ति नचमेषगति
लक्षणेनमासद्वयात्मकः सःनवानध्यवसायएवंसतितत्रमृतजातयोःकर्मणिप्रज्यते तिथ्यर्द्धेप्रथमेपूर्वोद्वितीयेर्द्धेत

दुत्तरः मासावितिवृधेश्चिंत्योक्षयमासस्यमध्यगाविति हेमाद्याद्युदाहृतवचनाव्यवस्थासंभवात् पक्षद्वयगताःसर्वास्तिथीर्द्वौधावि
नश्यतत्पूर्वार्द्धे पूर्वसंक्रांतिलक्षितोमासश्चिंत्यःकार्यार्थे उत्तरार्धेउत्तरसंक्रांतिलक्षितइतितस्यार्थः अतएवक्षयःसर्वतिथीनामर्धा
त्मकषष्टितिथित्वेनत्रिंशत्तिथिलोपादितिवाच्यं त्रिंशत्तिथिवृद्धिबीजस्यैवतद्धानिबीजस्यक्वाप्यनुक्तत्वादुपपत्तिसिद्धत्वाभावा
च्च किंचतत्रैकमासलोपेक्षयमासयुताब्दस्य द्वादशमात्रसत्वापत्तिः नचेष्टापत्तिः त्रयोदशांतुश्रुतिराह मासंचतुर्दशः क्वापिनद
ष्टपूर्वइतिवचनेनतस्याब्दस्यत्रयोदशमासत्वोक्तेः इदंहिवचनंनपंचमेवर्षेद्वौमासावधिमासकाविति वचनोक्तासंक्रांतियु
ताब्दपरंतस्यचतुर्दशमासत्वाप्रसक्तेस्तन्निषेधसमभिव्याहारानुपपत्तेः गौडनिबंधेषुतु एतदुत्तरार्धत्वेयद्वर्षेतिलिखितंतदा
स्पष्टमेवक्षययुताब्दविषयत्वमस्य नचवाच्यंध्ययोरसंक्रांतयोः तमतिक्रम्यत्विति वचनेन षष्टिदिनात्मकत्वात्तद्युताब्दे चतु
र्दशामासाःस्युरेवकथंचतुर्दशोनदृश्यतइत्यनुपपत्तिर्यद्वर्षमध्येधिकमासयुग्मंतत्कार्तिकादित्रितयेक्षयाख्यइतिवचनेनै
कमासलोपेनैवद्वयोरधिकात्वांगीकारेणसमाधीयते नचद्वयोरप्यधिकत्वंमासद्वयेद्वमध्येतुसंक्रांतिर्नयदाभवेत् प्राकृतस्त
त्रपूर्वस्यादधिमासस्तथोत्तरः एकत्रमासद्वितयंयदिस्याद्वर्षेधिकंतत्रपरोधिमासइत्यादिवचनविरुद्धं यतोनैतैर्वचनैरेक
वर्षगतयोर्द्वयोरसंक्रांतयोर्मध्ये आद्यषष्टिदिनात्मकत्वद्रूपमधिमासत्वंतमतिक्रम्येत्यादिसामान्यवचनप्राप्तमपोद्यते किं
तुतद्वचनप्राप्तमेव यत्संक्रांतिरहितस्यभागस्योत्तरमासशेषत्वंतत्संज्ञत्वंचतदपवादेनतत्रपूर्वमासशेषत्वंतत्संज्ञत्वंचतस्य
विधीयते पूर्वोभाग उत्तरोभागइतिव्याख्यानेनहेद्रेरात्रनिष्ठायाम्तिथिवृद्धेरिवपूर्वशेषत्वस्यन्याय्यत्वाच्च वचनेनतुन्याय्य
मप्येतदपोद्यते एकासंक्रांतितेनैकमासक्षयेपि द्वयोस्त्रिंशत्तिथिसंघातयोरधिकयोरूपजननात्तद्युतस्याब्दस्यत्रयोदश
मासकत्वंयुक्तमेवेतियत्तःप्रकृतस्यमासद्वयस्यैवपूर्वोत्तरभागाभ्यांसर्वनामभ्यामभिधानौचित्येभागपरतयातद्व्याख्या
नस्यायुक्तत्वात् वचनबलादसंक्रांतयोरपिद्वयोर्मध्ये षष्टिदिनात्मकत्वमधिकत्वमेकस्यैवयुक्तंसामान्यवचनबाधेन
वक्ष्यमाणस्यत्रिंशत्तिथिवृद्धिबीजस्यक्रमसंचयस्यत्रिंशत्तममासादर्वाग्संभवेनैकवर्षमध्येत्रयोदशमासद्वयानुपपत्तेश्च २२५

443
1942

तेनपूर्वोपजातैकासंक्रांत्यापेक्षयात्रिंशत्तममासात्पूर्वोपजातीयःससंक्रांतिश्चान्योपिनाधिकः किंतुतदुत्तरोपजातएवेतिएकस्य
क्षयेतद्युताब्दस्यद्वादशमासत्वमेवस्यादनुपपन्नंत्रयोदशमासत्वं किंचद्विसंक्रांतेर्मासद्वयात्मकत्वेकस्याश्चित्तिथेः सकलस्यपूर्वा
र्धस्योत्तरार्धस्यवाराशिमात्रपातित्वेपूर्वमासप्रयुक्तस्योत्तरमासप्रयुक्तस्यवाष्टक्याःश्राद्धादेर्लोपएवस्यात् कार्तिकआश्विना
दुत्तरएवमार्गशीर्षात्पूर्वएवमार्गशीर्षः कार्तिकादुत्तरएवपौषात्पूर्वएवेत्येवंरूपंयन्मासानांनियतस्थानत्वंतद्भंगश्चस्यात् त
न्मासीयतिथिपूर्वार्द्धेमृतस्यचानाद्यमासिकंतत्तिथिव्याप्तिपूर्वतिथिव्याप्त्युत्तरार्धेद्वितीयमासिकंचतत्तिथिव्यक्तावेवो
त्तरार्धेआद्यमासिकात्पूर्वमेवप्राप्नुयात् तत्रतदकरणेचोत्सर्गिकाणांषोडशानांद्विसंक्रांत्युत्तरंवावश्यकपातमलमासप्रयुक्ता
नांचसप्तदशानांप्रेतश्राद्धानांकथमनुष्ठानंस्यादितिमहत्संकटं नचतिथ्यर्धइतिवचनोक्तमासद्वयात्मकत्वंक्षयमासजा
तमृतसंबंधिवर्धापनादिकमात्रविषयंनतुसर्वविषयंतत्तन्मासप्रयुक्तदानश्राद्धव्रतादिषुतुएकस्मिन्मासिमासोयदिस्या
त्तांतयोर्द्वयोः तावेवपक्षौताएवतिथयस्त्रिंशदेवहीतिवचनात्सर्वतिथीनांसर्वदामासद्वयात्मकत्वंतेनैकमासस्यक्षयत्वे
नकार्तिकमार्गशीर्षोभयरूपत्वे तदुभयप्रयुक्तंश्राद्धव्रतादितत्तत्पक्षगततत्तत्तिथौमध्याह्नादावेवकर्तव्यमितिमदनरत्नो
क्तंयुक्तं प्रमाणाभावात् एकस्मिन्नितिवचनस्यतिथ्यर्धइतिवचनोक्तविधयैवमासद्वयात्मकत्वप्रतिपादकत्वसंभवात् तेनन
तत्रधर्मिणोमासस्यकस्यापिलोपःराशिविशेषस्थरव्युपक्रांतत्वरूपधर्मलोपात्तुक्षयव्यवहारइतिमीनादिस्थइत्यपिलक्षणं
तत्राव्याप्तमितिअत्रोच्यते प्रतिपदिवृश्चिकसंक्रांतौयद्यपिसमासस्तत्कालस्थरव्यारब्धत्वाद्वृश्चिकस्थसूर्यारंभोपहितोनभ
वतितथापिशंखवेलान्यायेनतत्स्वरूपयोग्यत्वाद्भवति मार्गशीर्षत्वंतस्य तथाहि यदातुलासंक्रांतिरमावास्यांजातातदा
वृश्चिकसंक्रांतेरपितदुत्तरामास्यैवस्वाभाविकंस्थानं यांतिथिंसमनुप्राप्यतुलांगच्छतिभास्करः तयैवसर्वसंक्रांतिर्यावन्मेषं
नगच्छतीतिवचनात् अतिचारात्तुप्रतिपदितदुपधानं तदप्युक्तंतत्रैव यदावक्रातिचाराभ्यांसूर्यसंक्रमणंभवेत् क्षत्रिया
णामसृग्धारांतदापिबतिमेदिनीतिस्वस्थानमतीत्यचरणमतिचारयति चारपदादपिवृश्चिकसंक्रांतेरमावास्यैवतस्यंस्था

नमवसीयते रवेश्चवक्रातिचारोशीघ्रमंदगतीएव द्रुतरग्रहवत्तस्यमुख्यत्वेतदभावात्‌ अतएवंप्रायः तुलासंक्रांत्युत्तरंवृश्चिधनुषो
रेवक्षयमासपातः यत्तुक्षयः कार्तिकादित्रयद्गतिकार्तिकस्यापिकदाचितक्षयत्वमुक्तं तत्रवक्ष्यतेयदातुदर्शेकन्यासंक्रांतिर्जा
तातुलासंक्रांतिश्चद्वितीयदर्शमतिक्रम्यप्रतिपदीतिकन्यायामसंक्रांतः ततोवृश्चिकधनुःसंक्रांतीफक्रप्रतिपदोरेवततस्तदनंतरदर्शे
एवमकरसंक्रांतिरितिधनुषिक्षयः ततःकुंभमीनसंक्रांतीदर्शयोरेव ततोद्वितीयदर्शमतिक्रम्यप्रतिपदिमेषसंक्रांत्यामीनेपुनर
संक्रांतस्तत्रक्षयोवृश्चिकस्थरव्युपक्रांतत्वान्मार्गशीर्षएवतदुत्तरस्तुमासोमकरस्थरव्युपक्रांतत्वान्माघोभवितुमर्हतिनतुपौषो
धनुःस्थरवावनुपक्रांतत्वात्‌ एवंतदुत्तरःकुंभस्थेरवावुपक्रांतत्वात्फाल्गुनो नतुमाघोमकरस्थेरवावनुपक्रांतत्वात्‌ तदुत्तरश्चमी
नस्थेरवावनुपक्रांतत्वात्चैत्रोनतुफाल्गुनः कुंभस्थेरवावनुपक्रांतत्वात्प्रतिपदुपजातमेषसंक्रांतियुक्तस्तुचैत्रएवमीनगस्व्यु
पक्रांतत्वात्‌ एवंतदुत्तरेवैशाखादयएवतत्रधनुषिक्षयस्यनपूर्ववद्योग्यतयापौषत्वंसंभवतिप्रतिपदस्तुलासंक्रांतितिथित्वेन
धनुःसंक्रांतेरपिसेवस्वाभाविकंस्थानंयतोनतुतत्पूर्वदर्शःयेनतदुत्तरोमाघफाल्गुनौतदुत्तरश्चद्वौश्चैत्रद्वतिमासक्रमोनबा
ध्येत तत्रश्चनत्रक्षयोत्तरेषामेवासंक्रांतावधिकानांत्रयाणांमासानांपौषत्वंमाघत्वंफाल्गुनत्वंवक्तव्यं तच्चपूर्ववद्धनुर्मकरकुं
भोपक्रमयोग्यत्वैवमकरकुंभमीनसंक्रांतीनांदर्शोपजातानामपियांतिथिंसमनुप्राप्येतिस्वाभाविकतदुत्तरप्रतिपत्स्थान
त्वात्‌ यत्रतुकन्यातुलासंक्रांतीपूर्ववत्‌ ततोनंतरदर्शएववृश्चिकसंक्रांतिरितिकार्तिकःक्षयस्ततोमावास्यास्वेवमेषपर्यंताः
संक्रांतयस्ततोनंतरदर्शमतिक्रम्यप्रतिपदिमकरसंक्रांत्यांवैशाखोसंक्रांतस्तत्रक्षयस्यकार्तिकत्वार्थमपेक्षितंयत्तुलास्थ
व्युपक्रांतत्वंतद्यांतिथिंसमनुप्राप्येत्येतद्वचनमूलिकयायोग्यतयायद्यपिनसंभवतितस्यतुलासंक्रांत्यवछिन्नतिथेर्वृश्चि
कादिस्थानविधायकत्वेनतुलायाःकन्यातिथिस्थानत्वाभावात्‌ तथाप्येकवर्षगतयोर्द्वयोरसंक्रांतयोरन्यतरस्यपूर्वस्यो
त्तरस्यावाधिकत्वमितरस्यचशुद्धत्वंप्राप्तत्वापरपर्यायंवक्ष्यतइतितत्राश्विनस्यशुद्धत्वार्थंतुलासंक्रांतियोगस्यतत्समा
द्दत्वस्यचावश्यंवक्तव्यत्वात्प्रतिपदद्वतत्पूर्वदर्शस्यापिएकशक्तिमत्वेनसाधारणीतुलासंक्रांतिस्थानत्वयोग्यतावनस्तुफलो २२६

445
1942

पहितदंडयोरिवद्दतरदंडत्वेनघटजननयोग्यतावसीयतइत्याश्विनस्ययोग्यतयातुलासंक्रांतिसंबंधाच्छुद्धित्वंद्विसंक्रांतेश्चोत्तर
स्ययोग्यतयैवतुलास्थरव्युपक्रांतत्वात्कार्तिकत्वं तेनैतादृशोत्सर्गिकितत्तद्योग्यतयैवक्षयमासयुतेद्वेक्षयमासस्यतत्पूर्वोत्तरे
षांचतत्तन्मासत्वघटनागसंतराभावान्नतुशीघ्रमंदगतिनिबंधनंतत्कालीनंतत्तत्तिथौतत्तत्संक्रांत्युपधानमाश्रियतथाचवच
नं उत्पातेनभवेद्यस्तुकालस्यातिक्रमःक्वचित्‌ नतस्याद्व्यवहारांगमित्याहभगवान्हरिरिति इदंचसर्वंनियतस्थानमासक्र
मानुरोधादुपपत्तिविशेषसिद्धस्यकालविशेषनियतस्यत्रिंशत्तिथिक्षयोपजनस्यतदाधिक्योपजनस्यैवद्वाप्यनिबंधनाद्द
योरप्यसंक्रांतयोरधिकत्वस्यतद्वतात्वचतुर्दशमासत्वस्यचवनंनैरेवनिर्वर्तितत्वान्मासविशेषाणांचलक्षणांतरस्यमेषगेत्या
दिब्रह्मगुप्तादिवचनोक्तस्यमलमासाव्याप्त्यादिदोषग्रस्तत्वात्पौरुषेयत्वाच्चमीनादिस्थइतिव्यासवचनोक्तस्यार्षस्यैवतेषुसंपा
दनीयत्वात्तत्तद्बलादेवसिद्धं एकैकासंक्रांतियुत्तादस्यतुत्रयोदशमासत्वंश्रुत्यादिसिद्धमेवेतितत्तत्संक्रांत्युपहितत्वात्तत्का
लालोचनेनैवतत्रतल्लक्षणस्यगमयितुंशक्यत्वेनसगतिकत्वान्नतत्रयोग्यतासिद्धोत्सर्गिककालानुसरणंकार्यं यत्तुहेमाद्रिणा
मुक्तकमेकमेवलिखितंतिथ्यर्द्धइतिवचनंक्षयमासस्तत्जातसंबंधिवार्षिकवर्धापनविषयतयाचव्यास्यातं तत्तथास्तुनाम
वस्तुतस्तुएकमासलोपमतानुसारिणःकस्यचिददिदानीतनस्यतद्वचनं तेनराशिविशेषस्थरव्युपक्रांतत्वरूपधर्मोपधानलो
पनिमित्तकंवस्तुतोविद्यमानस्यैवकार्तिकादेर्मासस्यनामैवकेवलंक्षयइतिनतुकस्यचिन्मासस्यलोपइत्येवयद्यपिपरमा
र्थस्तथापितत्रयोग्यतयातद्धर्मसत्वान्मीनादिस्थइत्यादिलक्षणंतत्रनाव्याप्तमितितेनैवलक्षणेनासंक्रांतमलमासस्य
युक्तमुत्तरमाससंज्ञत्वंयद्धारीतवचने आद्यद्वितीयशब्दाभ्यासूचितं ज्योतिषेपि अमावास्याद्वयंयत्ररविसंक्रांतिवर्जितं
मलमासःसविज्ञेयइति अमावास्याशब्देनयःसूर्याचंद्रमसोःपरःसंनिकर्षःसामावास्येतिगोभिलोक्तातिथ्यंतिमलक्षण
रूपामावास्याग्राह्यतेनतुसंपूर्णातिथिः संक्रांतिश्चपूर्वराशिविभागपूर्वकोत्तरराशिसंयोगफलावछिन्नाक्रिया अतएव
धात्वर्थावछेदकफलसमवायित्वादुत्तरराशेस्तांक्रियांप्रतिकर्मत्वंरूपंसंक्रमतइत्यादि तेनपूर्वदर्शांत्यक्षणात्पूर्वमेवराश्यं

का॰त॰
२२६७

तरेसंयोगेउत्तरदर्शांत्यक्षणादुत्तरमेवाक्रियोसत्तोदर्शद्वयांत्यक्षणद्वयस्यसंपूर्णसंक्रांतिवर्जितत्वंभवति नतुपूर्वदर्शांत्यक्षणेराश्यं
तरसंयोगोत्पत्तौ क्रियासत्तोनितरांप्रतिपद्यदाक्षणेसंयोगप्रसक्तेः एवमुत्तरदर्शांत्यक्षणेक्रियासत्तावपिनतत् अतएवतत्रस
मेववचनांतरं अमावास्यापरिछिन्नंरविसंक्रांतिवर्जितं मलमासंविजानीयाद्गर्हितंसर्वकर्मसु तस्यार्कोदर्शकश्चैकराशौद
र्शद्वयातिगइति अत्राप्यमावास्यादर्शश्चांत्यक्षणएव एकराशिस्थेदर्शद्वयांत्यक्षणद्वयमितिक्रम्यराश्यंतरंगछन्नर्कस्तस्य
मलमासस्यदर्शकइत्युक्त्यापूर्वदर्शांत्यक्षणात्पूर्वमेवराश्यंतरसंयोगपर्यंताक्रियागम्यतेयदितुतमतिक्रम्यतुरविः रविणाल
घितोमासश्चांद्रःख्यातोमलिम्लुचः पक्षद्वयेपिसंक्रांतिर्यदिनस्यात्सितासितइत्यादिवचनवशात्प्रतिपदाद्यक्षणदर्शांत्यक्ष
णपूर्वोत्तरावधिपरिछिन्नस्यैवसंक्रांतिवर्जितत्वमपेक्षितंतेनप्रतिपत्प्रवृत्तेःपूर्वंपूर्वदर्शांत्यक्षणेपिराश्यंतरसंयोगेधि
माससंभवोंगीक्रियतेतदापूर्ववचनेसंक्रांतिशब्देनक्रियामात्रमेवग्राह्यंतत्फलपर्यंतंक्रियामात्रेणापिचवर्जनमुत्तर
मासबहिर्भूतस्यापिपूर्वदर्शांत्यक्षणस्यापेक्षितमेवान्यथोत्तरप्रतिपदाद्यक्षणेराश्यंतरसंयोगापत्त्यापूर्वदर्शांत्यक्ष
णेयस्मिन्राशौसूर्यउत्तरदर्शांत्यक्षक्षणेपितद्राश्यवस्थानस्याधिमासापातार्थमपेक्षितस्याभावप्रसंगात् यद्वाद्वेहि
पौर्णमास्यौद्वेअमावास्येइत्यादिश्रुत्यनुसाराछुक्लप्रतिपदेवामावास्यादर्शशब्दाभ्यांतत्रग्राह्या एवंसतियत्प्रथमपक्षे
राश्यंतसंयोगेनापिपूर्वदर्शांत्यक्षणात्पूर्वमेवभाव्यमितिदर्शितंतत्तस्योत्तरमासबहिर्भावेपिवाचनिकं नतुनावता
तंगृहीत्वैवोत्तरदर्शांत्यक्षणपर्यंतश्चांद्रोमासः दर्शादर्शश्चांद्रइत्यप्यंत्यक्षणवाचिदर्शशब्दात्परापंचमीअभिविधावे
वकार्यान्वयलाभात् नचैवमेकस्यदर्शांत्यक्षणस्यपूर्वमाससमापकमात्रत्वादेकस्योत्तरमासारंभकमात्रत्वादुभयलाभेए
वचमासबाहुल्येतदाद्यस्तदंताःषडेवमासाःस्युरितिवाच्यं अगत्याएकस्यैवांत्यक्षणस्योभयत्रपत्तांगीकारादिति भ्रमः
कार्यः चांद्रःशुक्लादिदर्शांतइत्यादिनानावचनविरोधात् एकस्यचांत्यक्षणस्योभयत्रपत्वेतत्रजातमृतयोःकर्मणिमास २२-७
सविशेषानध्यवसायप्रसंगात् यत्रसार्द्धवर्षद्वयादुपरिदर्शांत्यक्षणेसंक्रमस्तत्रपूर्वस्यपरस्यचमासस्यरविलंघितत्वाभा

447
1942

वान्मलमासत्वाभावेपंचमेपंचमेवर्षेद्वौमासावधिमासकाविितिनियमोभज्येत अतएवचपूर्वव्याख्यानमपिनपारमार्थिकं
उत्तरमेवतुत्तादृशंशुक्लप्रतिपदाद्यक्षणादारभ्योत्तरदर्शांत्यक्षणयावत्संक्रमेणनभाव्यमिति एतस्यवाधिकत्वंत्रिंशात्तिथि
वृद्धिवशात् तदुक्तंज्योतिषे असंक्रांतोहियोमासःकदाचित्तिथिवृद्धितः कालांतरात्समायातिसनपुंसकउच्यतइति
नपुंसकत्वंचतस्यपुंसोमंडलाधिष्ठातुःसूर्यस्योपचारिकादभावात् तदप्युक्तंतत्रैव वरुणःसूर्योभानुस्तपनश्चंद्रोरविर्ग
भस्तिश्च अर्यमाहिरण्यरेतादिवाकरोमित्रविष्णूच एतेद्वादशसूर्याभाघाद्येषूदयंतिमासेषु निःसूर्योधिकमासोमलि
म्लुचाख्यस्ततःपापः मासेषुद्वादशादित्यास्तपंतेहियथाक्रमं नपुंसकेधिकेमासिमंडलंतपतेरवेरिति साचत्रिंशत्ति
थिवृद्धिःकियताकालेनभवतीत्यपेक्षायांपंचमेपंचमेवर्षेद्वौमासावधिमासकौ तेषांकालातिरेकेणग्रहाणाम
तिचारतइतिमहाभारतेमासेत्रिंशत्तमेभवेदितिकाठकगृह्येचसार्धवर्षद्वयेनेतिप्रतीयतेतत्रोपपत्तिरुक्ताज्योतिषेदिवसस्यहरत्यर्कः
षष्टिभागमृतौततः करोत्येकमहश्छेदंतथैवेकंचचंद्रमाः एवमर्धतृतीयानामब्दानामधिमासिकं ग्रीष्मेजनयतःपूर्वंपंचाब्दांतेतुप
श्चिममिति अस्यार्थोजीमूतवाहनादिभिर्दर्शितः दिवसशब्दोहःशब्दश्चात्रतिथिपरःमलमासस्यचांद्रत्वात्तद्घटयोरहर्दिवस
योरपितथात्वौचित्यात् चांद्रस्यचदिवसस्यतिथिरूपत्वात् तिथिनैकनदिवसश्चांद्रमानेप्रकीर्तितइत्युक्तत्वात् तेनार्कोदिव
सस्यतिथेरेकंषष्टितमंभागंदंडात्मकमेकेनदिवसेनहरितिछेदयतिउत्तरत्रछेदमित्यभिधानात् ततश्चस्वतोमासद्वयेषष्टिना
डीछेदात्तदात्मकस्याह्नएकस्यास्तिथेश्छेदमाकर्षणंकरोति तथातेनैवप्रकारेणचंद्रमाअमृतावेकमहर्हरिति एवमुक्तप्र
कारेणवर्षद्वाभ्यांद्वादशतिथ्याकर्षादर्द्धंतृतीयंयेषांतादृशामब्दानांसौरवर्षाणामंतेपूर्वमधिमासंचंद्रार्कौजनयतःपंचा
नामब्दानामंतेपश्चिमंजनयतः त्रिंशतासौरमासैरेकत्रिंशच्चांद्रमासाभवंतीतियावत् कस्मिन्मासससमुदायेपूर्वपश्चिम
तेत्यपेक्षायामुक्तं ग्रीष्मइतिग्रीष्मशब्देनात्रवैशाखादयःषड्मासागृह्यंतेतत्रैवतिथिवृध्याधिमासपातस्यौचितत्वात् तुलादि
षट्केमयांतिथिंसमनुप्राप्येतिवचनात्तिथिवृद्धेरभावात् अतएवोक्तंपरिशिष्टे मध्येविषुवतोभानुर्वर्धयेत्त्वान्यहानितु

नेः संभूयाधिकोमासः पतत्येषत्रयोदशइति विषुवतोर्मेषतुलयोः मिहिरेणाप्युक्तं माधवाद्येषु षट्स्वेकमासि दर्शद्वयं तदा द्विराषा
ढःसविज्ञेयः शतेतुश्रावणेच्युतइति अन्यत्रापि वैशाखादितुलांतेषु यदि पूर्णाद्वयं भवेत् द्विराषाढः सविज्ञेयइति पूर्णामावास्या
द्विराषाढोद्विराषाढादिः मुख्यस्तद्विराषाढउक्तो ज्योतिषे मिथुनस्थोयदाभानुरमावास्याद्वयंस्पृशेत् द्विराषाढः सविज्ञेयोविष्णुः
स्वपितिकर्कटइति मिहिरवचनेपिश्रावणःसौरएव तेनवैशाखादिषट्कपूर्वत्रिकेपतितःपश्चिमइति यस्तुविष्णुधर्मोत्तरेसोप
पत्तिकोधिकमासपातकालउक्तः सौरेणाब्दस्तुमानेनयदाभवतिभार्गव सावनेतुतदामानेदिनषट्कंप्रवर्धते सौरसंवत्सरे
दिनषट्काधिकःसावनःसंवत्सरोभवतीत्यर्थः ऊनरात्राश्चतेरामप्रोक्ताःसंवत्सरेणषट् सौरसंवत्सरस्यांतेमानेनशशिजेन
तु एकादशातिरिच्यंतेदिनानिभृगुनंदन सौरसंवत्सरेचांद्रःसंवत्सरएकादशदिनाधिकोभवतीत्यर्थः समाद्वयेसाष्टमासेन
स्यान्मासोतिरिच्यतइति राजमार्तंडेनवगतेष्वद्वितयेसार्द्धेपंचपक्षेदिनद्वये दिवसस्याष्टमेभागेपतत्येकोधिमासकइतिव
सिष्ठेनच द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा घटिकानांचतुष्केनपतत्येकोधिमासकइति सज्योतिःशास्त्रांतरा
भिहितसूक्ष्मगणितप्रकारांतरसिद्धोज्योतिषव्यवहारमात्रोपयोगीनतुधर्मशास्त्रेनुष्ठानेवोपयुज्यतेतत्रतुस्फुटमानाप
तितः प्रतिपदादिरेवसंक्रांतिरहितउपयुज्यते तदुक्तं ज्योतिषएव असंक्रांतिमासोधिमासःस्फुटःस्यादिति तदप्यर्धवृती
यानामब्दानामंतइत्युक्तं तदपिसूक्ष्मगणितक्रमोचित्यापातमेवनतुतत्रापितत्तोर्वाङ्नभवतिएवतत्र वा अनंतरमेवभवती
तिनियमःपूर्वाधिमासावधिकत्रिंशत्तममासादर्वागपिदर्शनात्तद्व्यवधानेनापिचदर्शनात् एतावत्तुनियतंपूर्वाधिमासा
त्तृतीयएववर्षेभवतितत्रचावश्यंभवतीति अयामपिनियमः षष्टिदिनात्मकाधिकमासएव असंक्रांतमात्रंत्ववागपिभवति
अतएवक्षयमासयुताब्दमध्यएवासंक्रांतद्वयं अधिकःपुनस्तत्रैकएवयत्रत्रिंशत्तिथीनांक्रमसंचयसंभवः सएवचम
लमासः मलंवदंतिकालस्यमासंकालविदोधिकमितिवचनात् उक्तंचाधिकत्वंतत्रैकस्यैव मासद्वयेद्वमध्येतुसंक्रां
तिर्नयदाभवेत् प्राकृतस्तत्रपूर्वस्याधिमासस्तथोत्तरइत्यादिपूर्वलिखितवचनैः प्राकृतस्त्रिंशद्दिनत्वरूपस्वभावापरप २२८

449
1942

र्यायप्रकृतियुक्तः अधिमासइत्यत्राधिराधिक्यार्थः हेमाद्रिस्तु यथावनिष्ठमस्यमाराविष्टारुकंमन्यमानाइत्यत्रोरुशब्द
समानाधिकरणःकशब्दोवपारव्यंविस्तीर्णमांसंमांसवाचकशब्दैकदेशत्वादुदतितथाधिकशब्दोधिकशब्दैकदेशत्वादाधिक्यमि
त्याह द्विसंक्रांतिमासःक्षयाख्यःकदाचित् क्षयःकार्तिकादित्रयेनास्त्यत्यतःस्यात्तदावर्षमध्येधिमासद्वयंचेति ज्योतिषवच
नगतस्त्वधिमासशब्दोसंक्रांतिमात्रपरः पूर्वोत्तरशब्दोचनमासपौर्वापर्यविवक्षयाकिंतुत्रिंशत्तिथिक्रमसंचयकालापेक्ष
याउपपत्तिसिद्धंचैतत् इदमप्याश्विनादिषट्कएवक्षयमासोभयपार्श्वयोर्यदाऽसंक्रांतद्वयंभवतितदाद्रष्टव्यं यदातुपूर्व
आश्विनादिषट्कउत्तरस्तुचैत्रादिषट्केतदाक्रमसंचयकालादूर्ध्वमपिजातःपूर्वोनाधिकःकिंतूत्तरएववचनात् एवंसतिपू
र्ववचनादत्रापिप्राप्तस्यानियमस्यापवादकत्वेनतत्सार्थकंभवति तथाचब्रह्मसिद्धांतेचैत्रादर्वाङ्नाधिमासःपरतस्त्व
धिकोभवेत् दृष्टाहिसर्वशास्त्रेषुतस्मिन्मूर्तिस्त्रयोदशीतिहियस्मात्तस्मिन्परस्मिंस्तावत्त्रयोदशीमूर्तिरधिकता
आवश्यकत्वेनसर्वशास्त्रेषुदृष्टातस्मात्पूर्वत्रसानसंभवतितस्यतथात्वेउत्तरत्रक्रमसंचयाभावाच्चतुर्दशत्वापत्तेश्चतदनुपप
त्तिप्रसंगादित्यर्थः चैत्रादर्वागित्याश्विनादारभ्येतिद्रष्टव्यं घटकन्यागतेसूर्येवृश्चिकेवाथधन्विनि मकरेवाथकुंभेवाना
धिमासोविधीयतइतिज्योतिःसिद्धांतवचनैकवाक्यत्वात् अत्रपूर्वतावद्वचनमेकवर्षोपजातासंक्रांतद्वयाविषयमेचैत्राद
र्वाग्योजातःसनाधिमासः किंतुततःपरएवजातस्तादृशइत्यर्थकत्वात्हेतोरपि तदनुसारेणपूर्वोक्तविधयाव्या
ख्येयत्वात् तदेकवाक्यत्वार्थमुत्तरमपितथा वचनांतरविरोधात् एकासंक्रांतविषयत्वासंभवाच्च तथाज्योतिःपिता
महः मासःकन्यागतेभानावसंक्रांतोभवेद्यदि दैवंपित्र्यंतदाकर्मतुलास्थेकर्तुरक्षयमिति कन्यायामधिमासंदर्श
यति शांडिल्योपिप्रायशोनभोनभस्यौज्येष्ठश्चाषाढकस्तथा मध्यमौचैत्रवैशाखावधिकोन्यःस्मृतःक्वचिदिति
ज्योतिषेपिदशानांप्रायोमाघस्यतुक्वचित् नपुंसकत्वंभवतीत्येषशास्त्रविनिश्चयइति नपुंसकश्चाधिकएवतथा
च असंक्रांतोहियोमासइतिप्राग्लिखितंवचनं घटादिषण्येकाधिमासस्यबहुशोदर्शनाच्च यत्तुयांतिथिंसमनु

का०त०
२२९

प्राप्येतिवचनात्तुलादिषट्के दर्शद्वयमतिक्रम्य संक्रांतेरसंभवान्मध्येविषुवतो भानुरित्यादिपरिशिष्टादिवचनेभ्यश्चैका
संक्रांतोपिमेषादिषट्क एव भवतीत्युक्तं तत्स्वाभाविकमनुगत्याभिप्रायेण एतैर्वचनोक्तोऽन्यत्रापितत्संभवस्तु कादाचित्क
शीघ्रमंदगतिभ्यां तदुक्तं यदावक्रातिचाराभ्यामित्यादि चैत्रादिषट्कएवत्वसंक्रांतद्वयंनसंभवत्येव पूर्वासंक्रांत्यस्य
क्षयमासपूर्वभावित्वनियमात् क्षयस्य कार्तिकादित्रयान्यतरपतित्वनियमात् तदुक्तं क्षयः कार्तिकादित्रयेनान्य
तः स्यात्तदावर्षमध्येधिमासद्वयं चेति नान्यतः अन्यतरपार्श्वतः उभयपार्श्वतइतियावत् तेनासंक्रांतद्वयस्याश्वि
नादिचैत्रादिषट्कद्वयमध्यपाते क्रमसंचयकालादूर्ध्वमपि भवन्पूर्वोनाधिकः किंतूत्तरएव आश्विनादिषट्कएवतत्पाते
पूर्वोवोत्तरोवायएवक्रमसंचयकालादुत्तरइति गणकाग्रणीर्हेमाद्रिः एवंसति कार्तिकादिषुमासेषु यदिस्यातांमलि
म्लुचौसर्वकर्मह्रः प्रोक्तौ पूर्वस्तत्रमलिम्लुचइति ज्योतिःपराशरवचनं अमावास्याद्वयंयत्रमासिमासिप्रवर्तते उत्तर
श्चोत्तमोज्ञेयः पूर्वस्तत्रमलिम्लुचइति राजमार्तंडवचनं च गौडनिबंधलिखितं कदाचित्पूर्वस्याप्याधिकत्वात्तद्विषयंभव
ति अन्यथाद्वयोरसंक्रांतयोः परस्परापेक्षस्यैव पौर्वापर्यस्य विवक्षया सर्वदोत्तरस्यैवाधिकत्वे तयोर्निर्विषयतास्यादिति
ममाभात्यते एकस्मिन्नपिवर्षेचेदित्यादिवचनेषु पूर्वोत्तरासंक्रांतप्राप्तत्वाधिकत्वविधायकेषु क्रमसंचयकालस्याबुद्धि
स्थत्वान्नतदपेक्षं मासयोः पौर्वापर्यं किंतु परस्परापेक्षमेव तेनतद्वचनवशात्सर्वदोत्तरस्यैवाधिकत्वं न कदाचिपिपूर्व
स्य नचैवं चैत्रादिषट्कपतितस्यापि पूर्वषट्कपतितस्येवोत्तरस्यैतैरेववचनैरधिकत्वसिद्धौ चैत्रादर्वागित्यादिवचना
नामानर्थक्यंशंकनीयं तेषांमध्येविषुवतोभानुः माधवाद्येषुषट्सु ग्रीष्मेजनयतद्इत्यादिवचनसमानार्थतयान्वय
व्यतिरेकाभ्यामेकासंक्रांतसंबंधिस्वाभाविककालविधायकत्वात् चैत्रात्परतएवमेषादिष्वधिकोभवेन्नतु चैत्रपर्यंत
मित्युक्त्या चैत्रादर्वागित्यत्र चैत्राभिविधेरेवप्रतीतिः अतऊर्ध्वपतंत्येतद्दृश्येतद्दशादाषोडशादित्यादिष्वभिविधिप्रतीतिवत् २२९
धटकन्यागतद्वयत्रचमीनस्याप्युपलक्षणात् कन्याग्रहणस्य चक्षयपूर्वभाव्यसंक्रांतसंग्रहार्थत्वात् कार्तिकादि

457/1942

स्थस्याहितस्य मध्येविषुवतोरितिवचनादेकाधिमासवन्निषेधः सिद्धएव आश्विनस्थस्यतु माधवादिषट्कपतितत्वादधिमा
सत्वंस्यादिति युक्तं च सर्वदोत्तरस्यैवाधिकत्वं तथाहि पंचमेपंचमेवर्षेद्वौमासावधिमासकाविसुक्तः प्रवाहपतितस्तद्वर्षा
त्तृतीयवर्षेयोधिमासोभविष्यतितत्तिथिक्रमसंचयावधिः सएवनतुपूर्वः यदुत्तरंत्त्वुत्तरासंक्रांतपर्यंतं मेषराशिगरविसं
क्रांतिरित्युक्ततत्तन्मासचिह्नभूतैकैकसंक्रांतियुक्तास्तिथिक्रमसंचयोपयोगिनोमासाभवंति सएवाधिमासः नचपूर्वोत्त
रंतथा मध्येद्विसंक्रांतासंक्रांतयोरवश्यंपातात् किंचपूर्वासंक्रांतः प्रवाहपतितपूर्वासंक्रांतापेक्षया क्रमसंचयकाला
त्पूर्वमेवप्रायोभवति उत्तरस्तु तदुत्तरमेवनियमेनेति तस्यैवाधिकत्वंयुक्तं अतएवद्वितीयासंक्रांतिपूर्वयस्यप्रथमाद्विकं
तस्यप्रथमाद्वमध्येपूर्वासंक्रांतपातेपिनाधिकंमासिकं किंतुक्षयेतदुत्तरंचोत्तरासंक्रांतेः पूर्वमृतस्यैव एवंसति ज्योतिः
पराशरवचनमप्येवंव्याख्येयं एकवर्षमध्ये ऽसंक्रांतद्वयपातेपूर्वस्यविवाहाद्यनावश्यककर्महरत्वेपिसर्वकर्महरत्वेनो
क्तोयउत्तरोधिमलिम्लुचः सएवप्रवाहपतितस्योत्तरासंक्रांतेः पूर्वावधिरिति राजमार्तंडवचनंत्वेकासंक्रांतस्यैवपूर्वो
त्तरभागयोः मलिनत्वशुद्धत्वविदधातीति पूर्वमर्धंपरित्यज्यकर्तव्याउत्तरेक्रियाइत्येतत्समानार्थं अतएवैकवर्षेपि
तासंक्रांतिद्वयमध्येसर्वोपिपूर्वासंक्रांतिसम्यक्संक्रांतियुक्ते तरमासवदेवसर्पतीत्यन्वर्थयासंसर्पसमाख्यायाज्यो
तिर्बृहस्पतिनाव्यवहृतः यस्मिन्मासेनसंक्रांतिः संक्रांतिद्वयमेववा संसार्पांहस्पतीमासावधिमासश्चनिंदिताइ
ति अत्र चैकमासिप्राप्तित्वादंहसः पापस्यपतिरितिव्युत्पत्त्या क्षयमासवाचिनोंहस्पतिशब्दात्पूर्वमुच्चारितेन संसर्पशब्देन
तत्पूर्वभाव्यसंक्रांतएवोच्यते तदुत्तरश्चाधिकत्वादधिमासशब्देन अतएवचान्यत्रापितयोरसंक्रांतयोर्भानुलंघिताधि
मासशब्दाभ्यांभेदेनोपादानं यथाकाठकगृह्ये चूडामौंजीबंधनं च अग्न्याधेयंमहालयं राजाभिषेकं काम्यं च न कुर्याद्भा
नुलंघिते चूडामौंजीबंधनं च अग्न्याधेयं महालयं राजाभिषेकं काम्यं च मलमासेविवर्जयेदिति मलमासशब्दोधिक
मासपरः मलंवदंतिकालस्यमासंकालविदोधिकमिति वचनात् भीमपराक्रमेपि आधिमासेदिनपतिधनुषिरवोपि

का० त०
२३०

लंघितेमासिचक्रिणिस्फेहेकुर्यान्नोमंगल्यंविवाहंचेति दिनपातेदिनक्षयेद्वौतिथ्यंतावेकवारे अवमस्स्याद्दिनक्षयइति एकस्मिन्मा
बनेत्वह्नितिथीनांत्रितयंयदा तदादिनक्षयःप्रोक्तस्तत्रसाहस्रिकंफलमितिकूर्मपुराणवाक्यमिष्ठाद्धक्ते साहस्रिकंफलंदानादो
शतमिंदुक्षयेदानंसहस्रंतुदिनक्षयइतिमत्स्यपुराणात् तदेवाहविधोशुद्धोमासःशुक्लप्रतिपदाद्यक्षणमारभ्यदर्शांत्यक्षण
पर्यंतरविसंक्रांतिरहितएकःतत्रैवतद्वययुक्तश्च आद्योपिद्विविधः एकराशिस्थरव्यारब्धत्वेनैकस्यषष्टिदिनात्मकस्यमासस्य
पूर्वात्मकेर्धाएकःत्रिंशाद्दिनात्मकत्वेनप्राकृतएवापरः तत्रानयोराद्यस्ताद्दशात्पूर्वस्माच्चतीयेद्वेवश्यंभवतितत्तोर्वाक्नापि
तदुल्लंघ्य सचप्रायःस्वाभाविकगत्यामाधवादिषट्कमध्यएवभवतिकदाचिच्छीघ्रमंदगतिभ्यामन्यत्रापियुद्धाद्यनिष्टस्त्व
चकः द्वितीयस्तुकार्तिकादित्रयमध्यएवनियतपातादिसंक्रांतियुक्तात्क्षयमासात्पूर्वभावीतेनाव्यवहितोव्यवहितोवा
सचात्पूर्वंनभवति प्रायश्चसपूर्वस्मादसंक्रांतात्रिंशत्तिथिक्रमसंचयकालात्पूर्वमेवभवति यद्यपिकदाचिदुत्तरंजायतेत
थापिवचनात्त्रिंशाद्दिनात्मकएव यस्तुक्षयमासादुत्तरंतस्मिन्नेववर्षेचैत्रात्पूर्वमेवचैत्रादिषट्केवाजायतेसएवषष्टिदिना
त्मकत्वादधिकःमलमासश्च॥मलंवदंतीत्यादिवचनात् यत्वसंक्रांतिमासस्यद्विसंक्रांतेश्चमलत्वमुक्तंयस्मिन्मासइति
कावकगृह्येतत्केषुचित्कर्मस्वशुद्धत्वमात्राभिप्रायेणतथाचबार्हस्पत्यज्योतिर्ग्रंथे एकत्रवर्षेधिकमासयुग्मंयत्कार्ति
कादित्रितयेक्षयाख्यः तद्वर्जनीयंत्रितयंप्रयत्नाद्विवाहयज्ञोत्सवमंगलेषुयस्मिन्मासेनसंक्रांतिःसंक्रांतिद्वयमेवच
संसार्पांहस्पतीमासावधिकमासश्चनिंदितावति मलमासगोचरचूडादिनिषेधसमभिव्याहृते भानुलंघितविषयस्तन्नि
षेधःपरिशेषात्साद्धतक्षयपूर्वभाव्यसंक्रांतिविषयोयश्चूडामौंजीबंधनंचेत्यादिस्तत्रोपात्तानांमंगलशब्देनोपादानं
तदंशेसमानविषयत्वात् भानुलंघितेचमौंजीबंधनिषेधोवेश्यविषयः भानुलंघितस्यदक्षिणायनमात्रांतःपातित्वे
नब्राह्मणक्षत्रियोपनयनस्यतत्राप्यप्रसक्तेः महालयनिषेधश्चस्वकालातिपन्नतद्विषयः तेनयानिमासिविशेषनि
यमसहितत्वादुत्तरायणविशेषमात्रापेक्षाणिसंसार्पांहस्पत्यतिक्रमेणापिकृतानिस्वकालएवकृतानिभवंतिचौलोपनयन २३०

453
194

विवाहप्रतिष्ठामंत्रदीक्षादीनिमासविशेषनियमापेक्षाण्यपि वायान्यनावश्यकत्वाद्वत्सरांतरीयतन्मासादावपिकर्तुंशक्यानि
व्रतविशेषतदुद्यापनादीनितानितानितयोरपिनकर्तव्यान्येव यानितुमासविशेषेष्ववश्यकतयाप्राप्तानिप्रत्याब्दिकादीनिम
लमासेशुद्धभागेपिकर्तुंशक्यत्वान्नक्रियंते॥अनयोस्तुयथायथंकर्तव्यान्येव भागद्वयाभावात् यत्तुएकएवयदामासःसंक्रां
तिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेपिशस्यतइतिवचनबलात् क्षयमासानांतरपूर्वभाव्यसंक्रांतप्रयुक्तंवार्षिकंतत्र
शुद्धत्वादनुष्ठितमपिक्षयमासेपिकर्तव्यमित्युक्तंहेमाद्रिणातद्यदीदंवचनंप्रामाणिकंतर्हिवनबलादस्तु तिथ्यर्द्धइतिवच
नंतुक्षयमासोसत्वमतवर्धापनप्रत्याब्दिकविषयमितितेनैवोक्तं ततश्चभागद्वययुक्ताधिकमासपूर्वभागएववर्ज्यावर्ज्य
विवेकःकर्तव्यःसक्रियते तत्रपरिशिष्टेमलिम्लुचस्तुमासोवैमलिनःपापसंभवः गर्हितःपितृदेवेभ्यःसर्वकर्मसुतंत्यजे
दिति भृगुः एकराशिस्थेसूर्येयदादर्शद्वयंभवेत् हव्यकव्यक्रियाहंतातदाज्ञेयोधिमासकइति पैठीनसिः श्रौतस्मार्तक्रि
याःसर्वाःद्वादशेमासिकीर्तिताः त्रयोदशेतुसर्वास्तानिःफलाइतिकीर्तिताः तस्मात्त्रयोदशेमासिकुर्याद्दानकथंचन
कुर्वन्ननर्थएवाशुकुर्यादात्मविनाशनमिति त्रयोदशत्वंचसंक्रांतिप्रयुक्तप्राकृतद्वादशमासापेक्षया द्वादशत्वंचएकादशेत
रमासापेक्षयातादृशस्य यद्यपिचैतेषुवचनेषुसर्वकर्मण्यामकर्तव्यतामलमासेप्रतीयते तथापिनकुर्यादधिकेमासिका
म्यंकर्मकदाचनइत्यादिसर्वकाम्यंतुमलमासेविवर्जयेदित्यादिविशेषवचनेभ्योनित्यंनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लु
चइत्यादिप्रतिप्रसववचनेभ्यश्चकाम्यानामेवसानित्यनैमित्तिकानांतुतत्रकरणमेवतेषामेवचागतिकानामेव तदुक्तंकाठ
कगृह्येमलेनन्यगतिंकुर्यान्नित्यनैमित्तिकींक्रियामिति तादृशानिनित्यानिकानिचित्परिशिष्टेउपलक्षणतयादर्शितानि
अवषट्कारहोमाश्चपर्वचाग्रयणंतथा मलमासेपिकर्तव्यंकाम्याइष्टीर्विवर्जयेदिति अवषट्कारहोमाअग्निहोत्रौपास
नवैश्वदेवादयः पर्वदर्शपौर्णमासौपार्वणस्थालीपाकश्च आग्रयणकर्तव्यताचपुराणान्नालाभे नैमित्तिकान्यपिका
निचित्तादृशानियमादिभिर्दर्शितानि चंद्रसूर्यग्रहेस्नानंश्राद्धदानजपादिकं कार्याणिस्मृत्यंतरे अनन्यगतित्वन्निसंकुर्या

नैमित्तिकं तथेति तस्य नित्यस्य मुख्यकालातिक्रमे जघन्यस्य कालांतरस्याभ्यनुज्ञानत्वादतं तल्लोपः प्रायश्चित्तं च प्रसज्येते तस्मा
नगतिः तन्मलमासेपि कुर्यात् गृह्यपरिशिष्टमपि मलंवदंति कालस्य मासं कालविरोधिकं तेहं ताात्रविशेषे ज्यामन्यत्रावश्यकादि
धेः आवश्यकात्तु दर्शपौर्णमासादि विधिशेषे मलमासे नेहेत नाचरेत् यस्यां क्रमानायां नास्ति विधिलोपः सा विशेषेज्या यथा
वसंते ज्योतिषा यजेतेति वसंतविहितस्य ज्योतिष्टोमस्य मलमासे वैशाखपरित्यागेन शुद्धवैशाखे क्रियमाणस्य वसंत एव बद्धत्वा
न्नास्ति विधिलोपः अनेनावश्यकोवाधिकमासेनुष्ठेयइत्यर्थादुक्तं भावे च नावश्यकत्वान्न कर्तव्यं अत एव पैठीनसिः संक्रांति
रहिते मासि कुर्यादाग्रयणं नवेति विकल्पमाह आग्रयणमाग्रयणेष्टिः यद्यथाग्रयणं वर्षासु श्यामाकैर्यजेतेति मासद्वयात्मक
वर्षाख्यकालविहितं शुद्धमासेपि स्वकालसंभवादनन्यगतिकं न भवति तथापि दुर्भिक्षेण श्यामाकभिन्नधान्यासत्त्वे जीवना
य कर्तव्यः मलमासेपीति चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि मलमासेपि देयं स्याद्दत्तमक्षयतां व्रजेदिति चंद्रसूर्यग्रहणं कपि
लषष्ठ्याद्यलभ्ययोगानामप्युपलक्षणं एवमन्यान्यप्येतदुभयप्रपंचवचनानि प्रदर्शयिष्यंते सगतिकानि तु नित्यनैमित्तिकान्यपि
तत्रत्न कार्याणि तान्यपि कानिचिद्दर्शितानि काठकगृह्यपरिशिष्टे सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे पुत्रेष्ट्याग्रयणाधानचा
तुर्मास्यादि कान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत्स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलइति पुत्रेष्टिः पुत्रगतपूतत्वा
दिफलार्थादिष्टिर्जातेष्टिरेव तस्या नैमित्तिकत्वेन नित्यत्वात् शेषिविरोधान्निमित्तानंतर्यबाधेन शेषो च कालत्वरूपांगोपसंग्रहव्य
वस्थापनेन सगतिकत्वाच्च पुष्टीति पाठेपि पुत्रपुष्ट्यर्थत्वात्सैव अन्यस्यास्तादृशादृष्टेरदर्शनात् स्पष्टमासविशेषाख्याविहि
तमिति समगतिकत्वं सूचितं काम्यान्यपि यानि शेषिबाधापत्तेः कालविलंबासहत्वादगतिकानि कारिराक्ष्योघ्न्यभिचारप्रत्य
भिचारज्वरादिरोगशांतिग्रहदोस्थादि निमित्तं शांत्यादीनि तानि मलमालेपि कार्याण्येव न्यायाद्रोगे चालभ्ययोगे च सीमंते पुंस
वेपि च यद्दानादिसमुद्दिष्टं पूर्वत्रापि न दुष्यतीति मरीचिवचनान्नैमित्तिकानि काम्यानि निपतंति यथायथा तथा तथैव कार्याणि
न कालस्तु विधीयतइति दक्षवचनान्नेहेतानविशेषे ज्यामन्यत्रावश्यकादिधेरिति गृह्यपरिशिष्टाच्च सगतिकानां च काम्य २३९

455
1942

कर्मणां यो निषेधः सोप्यारंभसमाप्तिविषय एव असूर्यानामयेमासा नतेषु ममसंमताः व्रतानां चैव यज्ञानामारंभाश्च समाप्तयइति
वचनेन तयोरेव तत्र प्रतिषेधात् अनुवृत्तिस्तु तत्र कर्तव्यैव प्रारब्धं कर्म यत्किंचित्तत्तु कार्यं मलिम्लुचइति ब्रह्मसिद्धांतवचनात् अ
त एव चातुर्मास्यापक्रमसमाप्तिकालमध्येधिमासापाते तस्याविच्छेदेनानुष्ठानमुक्तं अधिमासनिपाते पित्र्य एव विधिक्रमइति य
च्चप्रवृत्तं मलमासात्प्राग्यत्काम्यमसमापितं आगते मलमासेपि तत्समाप्यमसंशयमिति मलमासेपि काम्यकर्मणः समाप्तिप्रतिपा
दकं काठकगृह्यं तत्सावनमानोपजीविकृच्छ्रचांद्रायणादीनसत्रादिविषयं हेमाद्रिस्तु इदं समाप्त्यभ्यनुज्ञानं मलमासात्प्राक्प्रवृ
त्तस्यानियमककालस्यापि पूर्वस्तु समाप्तिनिषेधो मोहात्तत्रैव प्रक्रांतस्य काम्यस्य समापने दोषातिशयद्योतनार्थमित्याह तदस्तु
तं प्राक्प्रवृत्तस्याप्यनियतकालस्य समाप्तेरगतिकत्वेन मलमासे सूचितत्वात् प्रतिप्रसवस्य सर्वस्याप्यगतिनिमित्तत्वात् म
लमासेप्यनुवर्तते न च प्रयोगप्राशुभाव गाभावात् वचनस्य च नियतकालकर्मतत्पविषयांतरसत्वात्तदेवमावश्यकानि काम्या
न्यपि नित्यनैमित्तिकानि चागतिकानि मलमासे आरंभणीयानि समाप्यानि सावनमानसाध्यानि च काम्यान्यपि प्रागारब्धानि
समापनीयानि तदितरेषां त्वारंभः समाप्तिश्च न कर्तव्या अनुवर्तनमात्रं तु कर्तव्यमिति सामान्यतो मलमासे वर्ज्यावर्ज्यविवेकः
संपन्नः एतस्यैव प्रपंचार्थान्यृष्यादिवचनानि तत्र मलमासकर्तव्यवचनानि तावत् यमः गर्भे वार्धुषिके भृत्ये श्राद्धकर्मणि मा
मासिके सपिंडीकरणे नित्ये नाधिमासं विवर्जयेत् तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः जातकर्मांत्यकर्माणि नवश्रा
द्धं तथैव च मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं कार्याणि मलमासेपि नित्यं नै
मित्तिकं तथेति गर्भे गर्भसंस्कारे पुंसवनादौ तथा च संग्रहे जातकर्मणि पुंसूतिः सीमंतोन्नयनं व्रतं मलिम्लुचेपि कर्तव्यं निमि
त्तं यदि जायतइति वार्धुषिके तत्सूत्यैवृद्धिग्रहणे भृत्येत त्सूत्यैभृतिग्रहणे मासिकं श्राद्धकर्मामावास्याश्राद्धं षोडशश्राद्धा
नां पृथगुपादानात् नित्यदाने तथा चोभयविषयं मत्स्यपुराणं दर्शे वाहरहः श्राद्धं दानं च प्रतिवासरं गोभूतिलहिरण्यानां मा
सेपि स्यान्मलिम्लुचइति दर्शश्राद्धमहरहः श्राद्धं चेत्यन्वयः व्यासोपि जातकर्मणि यत् श्राद्धं दर्शश्राद्धं तथैव च मलमासे

का०त०
२३२

मलमासेपितत्कार्यं व्यासस्यवचनंयथेति यत्तुसंवत्सरातिरेकेणमासोयःस्यान्मलिम्लुच तस्मिंस्त्रयोदशेश्राद्धं नकुर्यादिंदुसंक्षयइ
त्युष्यशृंगवचनंगौडग्रंथेषुलिखितंतत्कार्तिकादिमासविशेषसंबंध्यमावास्याविहितफलविशेषार्थश्राद्धपरंस्पष्टमासविशेषा
ख्याविहितंवर्जयेन्मलइत्येतदेकवाक्यत्वात् सर्वकामार्थविहितकाम्यश्राद्धविषयंच नकुर्यादधिकेमासिकाम्यंकर्मकदाच
नेतिसामान्यवचनेनतस्यापिनिषेधात् मत्स्यपुराणवचनेवर्षंचाहरहःश्राद्धमितिमाधवीयपाठात्तत्रप्रेतोद्देशेनप्रथमंवर्ष
हरहर्विहितमुदकुंभश्राद्धमित्यर्थः तथाचमैथुनिः अब्दमंबुघटंदद्याद्दत्तंवापिस्फसंचितं संवत्सरेविवृद्धेपिप्रतिमासंच
मासिकमिति तथाचत्रिंशत्सोदकुंभान्नदानानि एकंमासिकंचतदाधिकंभवतीत्यर्थः अतएववसिष्ठः संवत्सरमध्येयद्य २
धिमासोभवेन्मासिकार्थदिनमेकंवृद्धिंनयेदिति अमावास्यामृतस्यतुमासिकंतदधिकरणंकंमासवृद्धौनवर्धनीयंसंव
त्सरातिरेकेणेतिवचनात् नह्ययंदर्शपार्वणस्यनिषेधः पुरुषभेदेनतस्यानियतसंख्यात्वाद्वात्रयोदशत्वानुपपत्तेरिति
यज्ञीभूतवाहनेनोक्तंतत्तत्रवचनेमासिकानुपादानादुक्तयुक्त्यादर्शपार्वणविशेषविषयत्वस्यैवतस्ययुक्तत्वादयुक्तं ॥
होमोयवादिभिःकर्मतुव्रीहियवतिलैरित्यादिभिर्विहितऔपासनहोमः अंत्यकर्माणिदाहास्थिसंचयनोदकावयवपिंड
दानानि अन्यदपिनित्यंनैमित्तिकंचरक्षोभयग्रहदोषाद्यादिनिमित्तकमिष्टिशांत्यादिकं अलभ्ययोगादिनिमित्तंच व्रतादि
विधिनिषेधातिक्रमनिमित्तकंकृच्छ्रचांद्रायणादिचस्मृत्यंतरेपि श्राद्धजातकनामानियेचसंस्कारसव्रताः मलिम्लुचे
पिकर्तव्याः काम्याइष्टीर्विवर्जयेदितिश्राद्धंदर्शमेवप्रकृतिभूतं जातकसाहचर्याज्जननिमित्तकमेववा तस्यजातक
र्मानंगत्वेननतत्प्रतिप्रसवेनतस्याप्रतिप्रसवात् जातदंजातकर्मसंस्कारा अन्येपिनिष्क्रमणान्नप्राशनादयोमासविशेषनियताः
सव्रताव्रतन्त्रपाश्चातुर्मास्यव्रतादयः यत्तुनामान्नप्राशनेश्चौलंविवाहंमौंजीबंधनं निष्क्रमणंजातकर्मकाम्यंवृषविवर्जि
तं अस्तगेचगुरौशुक्रेबालेवृद्धेमलिम्लुचे उद्यापनमुपारंभंव्रतानांनैवकारयेदितिगार्ग्यवचनेनामप्रकरणान्नप्राशननि २३२

457
1942

ष्क्रमणजातकर्मणांमलमासनिषेधः सस्वकालातिक्रांततद्विषयः अतएववचनांतरंनामकर्मचजातेष्टिंयथाकालंसमाचरेत् अति
पातेतुकुर्वंतप्रशस्तेमासिपुण्यतइतिमलमासव्यतिरेकेणापिषष्ठमासादिसंबंधिकतिचिद्दिनलाभेच अगतिकत्वनिमित्तक
त्वात्प्रतिप्रसववचनस्य अतएवकाठकगृह्ये प्रेतमालादिमारभ्यश्राद्धपिंडोदकक्रियाः सपिंडीकरणांताश्चयथाकालमु
पस्थिताः यवव्रीहितिलैर्होमोजातकर्मादिकाःक्रियाः मघात्रयोदशीश्राद्धंप्रत्युपस्थितहेतुकं अनन्यगतिकत्वेनकर्तव्यंस्यान्मलि
म्लुचइति प्रत्युपस्थितहेतुगर्भविशेषणेनान्यदपितीर्थश्राद्धादिनाद्दर्शसंगृह्यते अतएवबृहस्पतिः नित्यनैमित्तिकेकुर्यात्प्रयतः
सन्मलिम्लुचे तीर्थश्राद्धंगजच्छायांप्रेतश्राद्धंतथैवचेति अत्रगजच्छाया परमान्नंतुयोदद्यात्पितृणांमधुनासह छायायांतु
गजेंद्रस्यपूर्वस्यांदक्षिणामुखइतिविश्वामित्रोक्तायौगिकीनतुयदेंदुःपितृदैवत्येहंसश्चैवकरेस्थितः याम्यातिथिर्भवेत्सापिगज
छायाप्रकीर्तितेतितेनैवोक्तापारिभाषिकी तस्यामलमाससंभवात् मघात्रयोदश्यांकृष्णपक्षनियतायाममावास्याप्रत्यास
न्नायांसूर्यस्यहस्तेवस्थानेतत्संबंधिनिश्चिंत्य तीर्थश्राद्धंगजछायाश्राद्धंचननित्यं अकरणेप्रत्यवायाभावात् नापिनैमित्तिकं
तीर्थसंबंधस्यगजछायासंबंधस्यचनिमित्तस्यपुरुषप्रयत्नसाध्यत्वात् अतस्तयोःपृथग्ग्रहणंप्रेतश्राद्धस्यानित्यत्वेनमलमासे
प्राप्तावपितत्संवत्सरमध्यपतितमलमासेएकमासिकंकृत्वाद्वितीयमासिशुद्धेप्यन्यदधिकंकुर्यादित्येतदर्थं यथाहवसिष्ठः सं
वत्सरमध्येयद्यधिमासोभवेन्मासिकार्थंदिनमेकंचाह्निनयेत् वृद्धवसिष्ठः श्राश्वा[illegible]सूर्यःहस्तेमासिकार्थेचेदधिकमास
पातोमासिकार्थंदिनमेकंचवर्धयेदिति वर्धयेत्तवर्धयेदिति तुव्याख्यानंवसिष्ठवचनादर्शननिबंधनमुपेक्ष्यंस्मृत्यंतरेपिसंव
त्सरेविवृद्धेपिप्रतिमासंचमासिकं इदंसपिंडीकरणात् अब्दमंबुघटंदद्यादन्नंचापिस्फसंसितं संवत्सरेविवृद्धेपिप्रतिमासं
चमासिकं गभस्तिः नकुर्यान्मलमासेपिकाम्यंकर्मकदाचन मुक्त्वानैमित्तिकंश्राद्धंतद्धितत्रैवकीर्तितं एकोद्दिष्टंतुयच्छ्रा
द्धंतन्नैमित्तिकमुच्यते तत्कार्यंपूर्वमासेपिकालाधिक्येपिधर्मतः दिव्यांद्रेक्रम्यासंक्रांतिरवश्यंभावेनतस्यमलमासत्वासं
भवात् मासद्वयेपियद्येकराशिसंक्रमेतादित्यस्तत्राद्योमलिम्लुचः शुद्धोन्यः पार्वणेष्टिरग्निहोत्रहोमआग्रयणंसंध्या

पासनं पार्वणस्थालीपाकश्च यान्यन्यानि नित्यानि तानि ह्रापयन्नेव स्त्री जायतइति मैत्र्यसूत्रे अवषट्कारहोमाश्चेति पूर्वसिवि
नपमिशिष्टे च यदाग्रयणकर्तव्यतावचनं तत्तु त्रिष्वाग्रयणेति तन्निषेधककाण्वपरिशिष्टविरोधात् पुराणान्नालाभविषयमित्युक्तं त
ह्लाभे तु न कर्तव्यमेव ईदृशीमेवाधिनिषेधयोर्व्यवस्थामभिप्रेत्योक्तं पैठीनसिना संक्रांतिरहिते मासि कुर्यादाग्रयणं न चेति अथव
र्ज्यवचनानि तत्र वृद्धमनुपैठीनसिज्योतिःपराशराः अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च वेदव्रतवृषोत्सर्गचूडाकरणमेख
लाः मांगल्यमभिषेकं च मलमासे विवर्जयेत् बाले वा यदि वा शक्रे वृद्धे चास्तमुपागते मलमासइवैतानि वर्जयेद्देवदर्शनमि
ति अग्न्याधेयमपूर्वं प्रतिष्ठापि तादृशी अग्न्यनुगमनादिनिमित्तं तु पुनराधानं चंडालादिस्पर्शप्रयुक्तप्रतिमासंस्कारनाशनिमि
त्ता पुनःप्रतिष्ठा च नैमित्तिकत्वात् कर्तव्येति एवं यज्ञदानानि नित्यनैमित्तिकव्यतिरिक्तानि सर्वाण्यपि अतएव तयोरेव प्रतिप्रसवो
भविष्ये कुर्यात्प्रात्यहिकं कर्म प्रयत्नेन मलिम्लुचे नैमित्तिकं च कुर्वीत सावकाशं न यद्भवेदिति यस्तु वापीकूपतडागादिप्रतिष्ठा
यज्ञकर्म च न कुर्यान्मलमासे तु महादानव्रतानि चेति महादानानां पृथक्कु निषेधः सप्रत्यवायातिशयार्थः न तु तेषामेवेति जीमू
तवाहनोक्तं सगतिकत्वेन तरेषामपि निषेधस्योचितत्वात् भृगावस्ते गुरौ सिंहे गुर्वादित्ये मलिम्लुचे त्यजेद्दानं महादानं व्रतं दे
वविलोकनं अस्ते संध्यागते बाले भृगौ मासि मलिम्लुचे देवतादर्शनं दानं महादानं विवर्जयेदित्यादिषु तच्छिखितेष्वेकवाक्ये
षु उभयोपादानेनोपसंहारासंभवाच्च महादानानि च आद्यं तु सर्वदानानां तुलापुरुषसंज्ञितं हिरण्यगर्भदानं च ब्रह्मांडं त
दनंतरं कल्पपादपदानं च गोसहस्रं च पंचमं हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च हिरण्याश्वरथस्तद्वद्धेमहस्तिर
थस्तथा पंचलांगलकं तद्वद्धरादानं तथैव च द्वादशं विश्वचक्रं च ततः कल्पलतात्मकं सप्तसागरदानं च रत्नधेनुस्तथै
व च महाभूतघटस्तद्वत्षोडशः परिकीर्तित इत्युक्तानि कनकाश्वतिलानागा दासीरथमहीगृहाः कन्या च कपिला धेनु
र्महादानानि वै दशेति कूर्मपुराणोक्तानि च केचित्तु कुंडमंडपादीनि कर्तव्यताविशेषत्वस्यैकस्य प्रवृत्तिनिमित्तस्य सद्भावा
त्तुलापुरुषादिष्वेव महादानशब्दो मुख्यः कनकादिदानेषु तु स्तुत्यर्थं गौण इति तेषामत्राग्रहणमित्याहुः वेदव्रतानि महाव्र २३३

459
1942

तादीनि वृषोत्सर्गः काम्यः मांगल्यमन्यदपि विवाहादि अभिषेकोपि राज्ञः प्रथमः राज्ञाभिषेकः प्रथमः शक्रकालं प्रतीक्षते प्रत्या
ब्दिकस्तु नित्यत्वात्कालमात्रेपि वा भवेदिति मदनरत्नोदाहृतवचनात् देवदर्शनमपि पुराणादिप्रसिद्धानादिदेवतानां प्रथममे
व अनादिदेवतां वृद्धे बाले शुक्रे चः स्युनष्टे भार्गवे मलमासेप्यनावृत्तं तीर्थस्नानमपि त्यजेदिति स्कंदपुराणवचनात् अत्र पूर्वार्धगत
निंदाया अपेक्षितो दर्शनवर्जनविधिर्न स्वतंत्रः कल्प्यते येनानावृत्तमिति तद्दर्शनेनान्वीयेत किं तूत्तरार्धगतत्यजेदिति वर्जन
विधौ तीर्थस्नानमपीत्यपि नादर्शनसमुच्चयमात्रं तेन त्यागकर्मविशेषणमनावृत्तमिति तीर्थस्नानेनैव दर्शनेनाथ त्वेति यौगिक
स्य तस्य सांनिहितगामित्वात् दर्शनस्यापि शब्देन संनिध्यविशेषात् यत्तु जीमूतवाहनेनावृत्तमिति द्वितीयालंकारकपदं चतुरोरू
णयेत्यत्र इव निर्वपति क्रीणाति भ्यां त्यजतिं नैवान्वीयते स्नानान्वयस्तु तस्य पश्चादेकस्य जातिक्रियान्वयात् तथा तयोरेकचतु
रोरूणयेत्यनयोरेकनिर्वपतिक्रीणात्यन्वयान्मुष्ट्येकहायन्यन्वयः संचेकक्रियान्वयो नादिदेवतादर्शनस्याप्यविशिष्टः पूर्वा
र्धगतनिंदापेक्षितनिषेधाय त्यजेदित्यस्य तत्राप्यनुषंगादध्याहारापेक्षया तस्यान्याय्यत्वादित्युक्तं तत्रापि नासमुच्चयेन द
र्शनस्यापि तंत्रेणैव त्यजेदित्याख्यातान्वये संभवत्यनुषंगस्तावदयुक्तः अनावृत्तपदस्यापि दात्वप्रदात्वशिपिविष्टपदवद्यौ
गिकत्वाद्विशेष्यपदान्वयपूर्वकस्यैवाख्यातपदान्वयस्य तद्वदेवयुक्तत्वाच्चतुरोरूणयेत्यादिपदगतन्यायसंचारणमपि तत्रा
युक्तं तेन मदुक्तविधयैवानावृत्तपदस्य दर्शनेनाप्यन्वय इति दर्शनमपि प्रथममेव निषिध्यते किंच दर्शनमात्रनिषेधे तावत्का
लमपूज्यताप्यनादिदेवतानामापद्येत दर्शनं विना पूजासंभवात् तच्चायुक्तं अतएव ज्योतिःपराशरः अनादिदेवतार्चा
स्तु कालदोषो न विद्यते नित्याभ्यासयोगेन तथैवैकादशीव्रतइति अनेनैवाभिप्रायेण वृद्धैरुक्तं प्राथमिकानादिदेव
तादर्शननिषेधो युक्तमिति दृष्टांतव्याजेन च यावतां मलमासे निषेधस्तावंति शक्रास्तादावपि निषिध्यंते तत्र च निषिद्धा
नि मलमासेऽपीति च सूच्यते तथा च ज्योतिषे रविणा संयुते जीवे सिंहसंस्थे गुरौ तथा अस्तंगते तथा शुक्रे बाले वृद्धे तथैव
च व्रतं यात्रां विवाहं च विद्यां पार्थिवदर्शनं कूपवापीतडागानि देवतानां च मंदिरं देवादीनां प्रतिष्ठां च वेकर्णवेधनं सर्व

थानेवकुर्वीतकरणेमरणंध्रुवमित्यादि अत्रचशुक्रग्रहणंगुरोरप्युपलक्षणमस्तादिग्रहणंचगुरुसिंहस्थित्यातिचारादेरपि बालेशुक्रे
वृद्धेशुक्रेनष्टेजीवेबालेजीवेसिंहादिस्थेगुर्वादित्ये तथामलिम्लुचेमासिस्फगर्चायेतिचारगे वापीकूपतडागादिक्रियाःप्रागुदिता
स्मृतेदित्यादिज्योतिषवचनेभ्यः अत्रचैकपुरस्कारेणापियानिनिषिद्धानितानिसर्वत्रनिषिद्धानिविज्ञेयानि बहुनामेकधर्मो
णामेकस्यापियदुच्यते सर्वेषांतद्भवेत्कार्यमेकरूपाहितेस्मृताइतिवचनात शुक्रस्यबालवार्धकदिनसंख्यामाहज्योतिः
पराशरः पक्षंवृद्धस्तुपूर्वेणदशाहंपश्चिमेनतु प्रत्यग्बालोदशाहंतुपूर्वेणतुदिनत्रयं पक्षंवृद्धोमहास्तेतुबालश्चात्रदशा
हिकः पादास्तेतुदशाहानिवृद्धोबालोदिनत्रयमिति महास्तपादास्तयोःशुक्रस्यगुर्वस्यचदिनसंख्योक्ताज्योतिषे द्वात्रिं
द्दिवसाश्चास्तेजीवस्यभार्गवस्यतु द्वासप्ततिर्महस्यस्ते पादास्तेद्वादशक्रमादिति गुरुशुक्रयोर्द्वयोरपिबालवार्धककालोर
त्नमालायांप्रागुक्तः शिशुरहस्त्रितयंसितःस्यात्सश्चादशाहमिहपंचदिनानिवृद्धः प्राक्पक्षमेवकथितोत्रिवासिष्ठगर्गे
र्जीवस्तुपक्षमपिवृद्धशिशुविवर्ज्यइति राजमार्तंडेत्वन्येषांवार्धकांतर्भूतत्वेनाभिमतः संध्याकालोपिपृथगुक्तः भवेत्संध्या
गतःपश्चादंतमेष्यन्दिनत्रयं दिनानिपंचपूर्वेणतत्त्यजेत्कर्मवर्जयेत बालेवृद्धेचसंध्यांशेचतुःपंचत्रिवासरान् जीवेचभा
र्गवेचैवविवाहादिषुवर्जयेत बालेवृद्धेचसंध्यायांनष्टेचभृगुनंदने दुर्गतावासतीवध्यामृत्युयुक्ताफलंक्रमात बालेच
दुर्भगानारीवृद्धेनष्टप्रज्ञाभवेत नष्टेचमृत्युमाप्नोतिसर्वमेतद्गुरावपीति अत्रचतुःपंचाद्यल्पकालकथनमापद्विषयं यस्तु
दक्षिणायनेचातुर्मास्येचकर्मनिषेधः सयधृदगयननियमस्तद्विषयःपरिगणितविषयःकाम्ययज्ञादिविषयश्च तथाविष्णुधर्मोत्तरे
शेतेत्रचतुरोमासान्यावद्भवतिकार्तिकः विशिष्टानप्रवर्त्तंतेतदायज्ञादिकाःक्रियाः नाभिषेक्योनृपश्चैवंत्रनाधि
मासेकदाचन नसुप्तेचतथाकृष्णेविशेषात्प्रावृषिद्विजैरिति भविष्योत्तरेपि सुप्तेपिचजगन्नाथेकेशवेगरुडध्वजे निव
र्तंतेक्रियाःसर्वाश्चातुर्वर्ण्यस्यभारत विवाहव्रतबंधादिचूडासंस्कारदीक्षणं यज्ञगृहप्रवेशादिदानार्चनप्रतिष्ठनं पुण्या
नियानिकर्माणिवर्जयेद्दक्षिणायनइति सर्वास्तत्रतत्रपरिगणताः एवंपुण्यान्यपिभोजराजीये सुप्तेहरौप्रकटशेषफ २३४

461
1942

णोपधानेलक्ष्मीकराज्यपरिमार्जितपादपद्मे मीनेरवौधनुषिचास्तमितेचशुक्रेवास्तुक्रियाविधिरसौमुनिभिर्निषिद्धइति ए
वंगुर्वतिचारसिंहमकरस्थगुरुकेत्वाद्युद्भुतोत्तरसप्ताहादिषु संवेशुभानावश्यकर्मणांअकालिकत्वंव्यत्तरेकाहादिषुचपरिगणि
तानामेवयात्रादीनांनिषेधस्तत्रज्योतिःशास्त्रवचनेभ्योज्ञेयइत्यस्तुप्रासंगिकं प्रकृतमनुसरामः यदुक्तमनावृत्तंतीर्थस्ना
नमनादिदेवतार्चनंचमलमासादौनकर्तव्यमितितस्यगयायांप्रतिप्रसवोवायुपुराणे गयायांसर्वकालेषुपिंडंदद्याद्विचक्षणः
अधिमासेजन्मदिने अस्तेवगुरुशुक्रयोः नत्यक्तव्यंगयाश्राद्धंसिंहस्थेपिवृहस्पताविति त्रयोदशींजन्मदिनंचनंदाजन्मर्क्ष
तारांसितवासरंच त्यक्त्वादरीजेंदुकरांत्यमेत्रध्रुवेषुचश्राद्धविधानमिष्टमितिदीपिकायांजन्मादिनेप्रधानश्राद्धनिषेधात्त
त्रतत्प्रतिप्रसवार्थश्राद्धपिंडदानग्रहणंउपलक्षणंतु तत्स्नानार्चनयात्रादेरपिसत्यव्रतः वर्षेवर्षेतुयत्श्राद्धंमातापित्रोर्मृते
हनि मलमासेनकर्तव्यंव्याघ्रस्यवचनंयथेति मातापित्रोरित्यविवक्षितं वर्षेवर्षेमृताहनियत्श्राद्धंतत्मलमासेनक
र्तव्यमित्येतावत्तुविवक्षितं अत्रसोरमासद्वःपक्षपातिनाजीमूतवाहनेन मलमासेपीतिपाठःकल्पितः वार्षिकस्यमा
सपक्षतिथिस्पष्टइतिवचनेनतत्तन्मासीयतत्तिथौविधानात्स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइत्यनेनापिनिषे
धः यानिप्रतिसंवत्सरश्राद्धेनाधिमासंविवर्जयेत जातकर्मणियत्श्राद्धंनवश्राद्धंतथैवच प्रतिसंवत्सरश्राद्धंमलमा
सेपितत्स्मृतं तस्मिन्नराशिगतेभानौविपत्तिंयातिमानवः तेभ्यस्तत्रैकर्तव्यापिंडदानोदकक्रियेत्यादीनिशातातपादिवच
नानिमलमासमृतप्रत्याब्दिकविषयाणि वर्षेवर्षेतुयत्श्राद्धंमृताहेतन्मलिम्लुचे कुर्यात्तत्रप्रमीतानामन्येषामुत्तरत्रतु
इतिशातातपेनैवतेषांविषयदानात यस्मिन्राशाविति व्यासवचनस्यपूर्वोत्तरश्लोकावपिहेमाद्रुदाहृतौस्पष्टंतस्यमल
मासविषयत्वंवदतः मलमासेतुसंप्राप्तेब्राह्मणोम्रियतेयदि कुनाभिधेयोमासोसौकथंकुर्यादथाब्दिकं अधिमासेविप
न्नानांसौरमानंसमाश्रयेत सएवदिवसस्तस्यश्राद्धपिंडोदकादिष्विति तथायदामरणमासात्त्रयोदशोयःप्रथमाब्दिक
मासः सएवमलमासोभवतितदातदपितत्रैवकर्तव्यंनतदतिक्रमेणशुद्धे तथाचवृद्धवसिष्ठः असंक्रांतेपिकर्तव्यमाब्दि

का०न०
२३५

कंप्रथमद्विजैः नैवमासिकंश्राद्धंसपिंडीकरणंतथेति त्रयोदशस्यासंक्रांतत्वेवर्षेपूर्णमृतिदिनेविहितंसपिंडीकरणंकृत्वाप्रथमाः
ब्दिकंचतत्रैवकर्तव्यंयत्किंचिन्मासिकंमासस्यासंक्रांतत्वेमासिकार्थंदिनमेकंवृद्धिंनयेदित्युक्तत्वान्मासिकंतत्रापिकर्तव्यंनतुश्राद्धएवत
त्रेत्यर्थः यमोपि आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे त्रयोदशेतुसंप्राप्तेकुर्वीतपुनराब्दिकमिति आद्याब्दिकंमृतिमासेमलिम्लु
चेसतिद्वादशेपूर्णेसतित्रयोदशादावेवकुर्वीतपुनराब्दिकंद्वितीयाद्याब्दिकंतुतत्रत्रयोदशेसंप्राप्तेसंपूर्णेसतिचतुर्दशावेशादिनेकुर्वीत
त्यर्थः लघुहारीतोपि प्रत्यब्दंद्वादशेमासिकार्यापिंडक्रियासुतैः क्वचित्त्रयोदशेपिस्यादाद्यमुक्त्वातुवत्सरमिति द्वादशेमास्यतीते
नेनंतरदिने क्वचिन्मृतिमासेमलिने त्रयोदशेतीतेनंतरदिनेपिस्यात् किंत्वाद्यंवत्सरंमुक्त्वा आद्यवत्सरानंतरमृतिमासएवमलिने
तुद्वादशेतीतेनंतरदिनएवेत्यर्थः प्रत्यब्दंद्वादशेमासीत्येतच्चांतराधिमासपाताभावे तत्सद्भावेतुत्रयोदशेतीतएवसंवत्सरस्यम
ध्येतुयदिस्यादधिमासकः तदात्रयोदशेमासिक्रियाप्रेतस्यवार्षिकीति विष्णुधर्मोत्तरात् त्रयोदशेतीतेवार्षिकीऊनाब्दिकप्रथमा
ब्दिकसपिंडीकरणरूपा मासपक्षतिथिस्पृष्टेइतिवचनाच्च अन्यथाकार्तिकमृतस्याश्विनेप्रत्याब्दिकप्रसंगात् प्रथमवर्षेधिकमासपा
तेधिकमासिकविधानाच्च यद्वाषष्ठ्यातुदिवसैर्मासइतिवचनाच्छुद्धाशुद्धभागयोरेकमासत्वमभिप्रेत्यत्रापिद्वादशेतीतएवाब्दिकं
एतादृशव्यवहारोपपादनार्थमेवैकमासत्वाभिधानात् तेनमलमासमृतानांकालक्रमेणयदाचिन्मृतिमासएवमलमासस्तदात
दानींतनमाब्दिकं यदाचमृतिमासात्त्रयोदशएवमलमासस्तदाप्रथमाब्दिकंचाशुद्धभागएवकर्तव्यंशुद्धमासमृतानांद्वितीया
द्याब्दिकंतुतन्मासेधिकेसतिशुद्धभागएवकर्तव्यमितिस्थितेवर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि मासद्वयेपितत्कार्यंव्याघ्रस्यवच
नंयथेत्येवमादीनियानिगालवादिवचनानितानिप्रथमाब्दिकंमलमासमृताब्दिकंचमलमासएव अन्यच्छुद्धभागएवेत्येवमाब्दि
कसामान्यस्यव्यवस्थयोभयत्रकर्तव्यतापराणिनत्वेकस्याब्दिकव्यक्तेरावृत्तिविधायकानिनान्येषांतुकदाचनेत्यादिविरोधा २३५
त् यानितुश्राद्धीयाहनिसंप्राप्तेत्वधिमासोभवेद्यदि श्राद्धयंप्रकुर्वीतएवंकुर्वन्नमुह्यतीत्येवंरूपाणिवृद्धमनुप्रभृतिवचनानिता

463/1942

निमासिकविषयाणि यानिचद्वौमासावेकनामानावेकस्मिन्वत्सरेयदि उत्तरेदेवकार्याणिपितृकार्याणिचोभयोरित्या
दीनिसामान्यविषयाणिश्लोकगौतमादिवचनानितान्यावश्यकदर्शश्राद्धादिविषयाणि एवंसतियद्दाक्षिणात्यशिष्ट
मन्यानांवार्षिकश्राद्धस्यमलमासेपिसंक्षेपेणस्वयमनुष्ठानमज्ञान्प्रतिथोपदेशेनचतथाचारप्रवर्तनंतन्महत्सा
हसं अतएवकौथुमिः अधिमासेनकर्तव्यंश्राद्धंसांवत्सरादिकं वर्षवृद्ध्यभिषेकादिकृतमधिकेनतु इति आदिपदे
नचौलोपनयनादिनिमित्तमाभ्युदयिकंश्राद्धंकाम्यंच तथाचहारीतः अधिमासेनकर्तव्यंश्राद्धमाभ्युदयंतथा तथैवका
म्यंयत्कर्मवत्सरात्प्रथमादृतइति अत्रचाभ्युदयश्राद्धनिषेधद्वारातदंगकस्यचौलोपनयनादेरेवनिषेधोद्रष्टव्यः त
दनिषेधेतदंगतयाप्राप्तस्यश्राद्धस्यनिषेद्धुमशक्यत्वात् यन्मासविशेषनामानिरपेक्षमेवविहितंयस्याकरणेकालात्ययनि
मित्तंप्रायश्चित्तमाम्नायतेयथा अग्नयेपथिकृतेपुरोडाशमष्टाकपालंनिर्वपेद्योदर्शपूर्णमासाग्नियाजीसन्नमा
वास्यांवापौर्णमासींवाप्रतीपादयेदितितथाभूतस्यनित्यस्यग्रहणंनतुनित्यमात्रस्यतेनदर्शपूर्णमाग्निहोत्रपंच
महायज्ञादेरनिष्ठानंमलिम्लुचेकर्तव्यंस्वकालातिक्रमेपिवसंतादिकालस्यसोमयागांगभूतस्यानतिक्रांतत्वेनात्र
प्रायश्चित्तप्राप्तेरसंभवात् एवंयस्यनैमित्तिकस्यगृहदाहेष्ट्यादेर्निमित्तानंतरकालेकर्तव्यस्यनांतरेविहितकाल
लाभः तथाभूतावश्यकक्रियाविषयएवमलिम्लुचेमासिकुर्यादितिविधानं जातेष्ट्यादेर्नैमित्तिकस्यापिशिशुर
क्षणार्थंनिमित्तानंतरककालमपहायकालांतरेकर्तव्यस्ययथादशरात्रादिसूतककालमध्येनुष्ठानमन्याय्यं तथा
मलिम्लुचमध्येपिनानुष्ठानंमशक्यत्वात् वत्सरात्प्रथमादृतइतिचाभ्युदयएवान्वेति तेनप्राणिनांप्रथमोयःसंवत्स
रोगर्भसंबंधीजन्मसंबंधीचतत्संबंधीतदाभ्युदयंपुंसवनसीमंतोन्नयनादिप्रयुक्तंजननतामकरणान्नप्राशनादि
प्रयुक्तंचतन्मलमासेपिकर्तव्यंतदगतिरिक्तंनकर्तव्यमित्यर्थः सपिंडीकरणादूर्ध्वंयत्किंचिच्छ्राद्धिकंभवेत् इष्टंवा
प्यथवापूर्तंतन्नकुर्यान्मलिम्लुचइत्युत्तरवाक्यशेषोवेदं तथाचसपिंडीकरणाद्द्वादशाहादौकृतादूर्ध्वंप्रथमसंवत्सर

संबंधीनियानिपुनर्मासिकानिक्रियंते प्रथमसांवत्सरिकंचतानिमलमासेपिकर्तव्यानितद्भिन्नानितुसपिंडनोत्तरमा
वीनिसर्वाणित्रैपुरुषाणिद्वितीयायाब्दिककाम्याष्टकायुगादिमन्वादिमहालयादिश्राद्धानितानिमलमासेनकर्तव्या
नीत्यर्थः मलमासेपियुगमन्वादिश्राद्धकर्तव्यत्वप्रतिपादकानांतुवचनानांविषयोवक्ष्यते केचित्तुभ्रातावाभ्रातृपुत्रो
वासपिंडःशिष्यएववा सहपिंडक्रियांकृत्वाकुर्यादभ्युदयंततइतिवचनस्यसपिंडनोत्तरदिनेपूर्वंप्रधानभूताभ्युद
यिकश्राद्धविधायकत्वंविश्वरूपाचार्येणकिलाभिहितमितिप्रथमसंवत्सरसंबंधितदाभ्युदयिकातिरिक्तमभ्युद
यंमृतभ्रातादिस्ततसपिंडनंकृत्वातदैवत्याभ्युदयिकश्राद्धपूर्वकंकुर्यादित्येतदर्थकत्वेनभ्रातावेत्यादिवचनस्यपूर्वं
सोपपत्तिकंव्याख्यानादयुक्तं मुख्याधिकारिपुत्रानुपादानस्यतदानिरभिप्रायकत्वादभ्युदयशब्देनश्राद्धानभिधाना
च्चकौथुमिवचनेवर्षवृद्धिः प्रतिवर्षंक्रियमाणवर्द्धापनं अभिषेकोराजाभिषेकः तुशब्दश्चवार्थे माधवीये अधिमा
सेतुकर्तव्यंश्राद्धंसंवराब्दिकमितिपाठस्तदासंवत्सरः प्रथमसंवत्सरस्तत्संबंधाब्दिकमित्यर्थः जीमूतवाहनेनतुप्रचेतो
वचनत्वेनलिखितेस्मिन्वचने अधिमासेनकर्तव्यः श्राद्धसांवत्सरादिकइतिपूर्वार्द्धंस्वदुराग्रहसिध्यर्थंपठितं अधिमा
सस्यकर्तव्यत्वंवर्जनीयमेव तथाचसांवत्सरिकेश्राद्धेआदिशब्दगृहीतेषुचपुत्रजन्मादिनिमित्तकवृद्धिश्राद्धेषुनवश्रा
द्धेषुमनकर्तव्योनवर्जनीयइतिचव्याख्यातं वर्षवृद्धिपदंचराजाभिषेकसाहचर्याद्राजवृद्धिपरंसापरस्मिन्मासिकर्तव्या
नतुजन्मदिनोत्सवपरं सतुसौरएवनियतइतिचोत्तरार्द्धंव्याख्यायननुतस्याप्युत्कर्षः श्रूयतेउपाकर्मतथोत्सर्गः प्रस
वाहाष्टकादयः मासवृद्धौपराःकार्यावर्जयित्वातुपैत्रकमितिपरिचोद्यउपाकर्मोत्सर्गस्योस्तावद्दशाहरासुनोत्कर्षश्च
तुर्ष्वपिचकगादिषु उपाकर्मणिचोत्सर्गेतत्कर्तव्यंवृषादितइतिवचनाद्वृषएवदशाहरायाइवतुलामकरमेषसिंहेष्वेवयु
गादीनामिवकर्कसिंहयोरेवकर्तव्यत्वात्तत्सहचरितस्यप्रसवाहस्यासौरएवकर्तुमुचितत्वात्सौरमासस्यैववृद्धौत्रिंशत्ति
थ्यपेक्षयाधिकत्वेकदाचिदुपाकर्मजन्मादितिथिद्वैधेतेषांपरतिथौकर्तव्यतोपाकर्मेतिवचनेनोच्यतेनतुमलमासे २३६

465
1942

उत्कर्षइतिचतत्रोद्यंपरिहृत्यवर्षवृद्धिपदस्यप्रसवाहपरत्वेपितुशब्दमप्यर्थमंगीकृत्यमधिकेनेतिचतृतीयांतवर्षवृद्ध्याभिषेकाद्यपि
अधिकेनोपलक्षितंतस्मिन्नवकर्तव्यमितिव्याख्यातं अभिषेकश्चपौर्णविहितोमलमासेपिकार्यइत्युक्तं एतदेकवाक्यतयाचयस्मि
न्राशाविति जातकर्मणीतिवचनयोः सांवत्सरिकसामान्यविषयत्वमेवाभ्युपगतंसत्यव्रतवचनेचमलिम्लुचेपिकर्तव्यमितिपा
ठःकल्पितः तत्सर्वमयुक्तं वार्षिकश्राद्धोत्कर्षविधायकानांशुद्धमासमृतप्रथमाब्दिकमलमासमृताब्दिकविशेषयोश्चवि
शेषतोनुत्कर्षविधायकानांनान्येषांकदाचनेत्यस्यचतच्छेषस्यसर्वेषांतिरस्यआब्दिकविशेषविषयत्वेनसंभवतामेवचसामा
न्यविषयत्वाभ्युपगमनस्वाभिप्रेतपाठकल्पनचपुरस्कारस्यानुचितत्वात् किंचाधिमासेनकर्तव्यइतिपाठेपिसांवत्सरिकादे
सोधिकरणत्वेननकर्तव्यइतिव्याख्यानमेवोचितंकालस्योत्सर्गतोधिकरणत्वेनैवकर्तव्यत्वादिन्युर्षविधायकत्वमेवास्यतुशब्दश्चो
त्तरार्द्धगतश्चार्थे काचासौराजवृद्धिर्नामयोत्तरेमासिकर्तव्या नत्वुत्तरमासकर्तव्येषुराजवृद्धिर्नामकाचित्स्मर्यते राजकर्तृको
पजन्मदिनोत्सवएवसाचेन्नि:प्रमाणकोयंविशेषःराजकर्तृकःसपरत्रअन्यकर्तृकस्तुसौरएवेति किंच जन्ममासस्यप्रारभ्य
जन्मदिवसाद्यावत्त्रिंशद्दिनंभवेत् जन्ममासःसविज्ञेयःसर्वकर्मसुगर्हितइतिवृद्धगार्ग्यवचनेनत्रिंशत्तिथ्यात्मकचांद्रत्वाच्चां
द्रमासकर्तव्यानांचोत्तरत्रैवकर्तव्यत्वात्सौरेपूर्वत्रकर्तव्यत्वाभिधानंविनावचनंप्रलापएव अधिकेनेत्यस्यतृतीयांततयाव्या
ख्यानंत्वसंतायुक्तमेवतदाराजाभिषेकस्याप्यधिकेकर्तव्यत्वापत्तेः तत्रचराजाभिषेकंकाम्यंचेत्यादिबहुवाक्यविरोधात् यत्रो
पाकर्मेतिवचनेमासवृद्धिपदस्यतिथिद्वैधपरतयाव्याख्यानंतद्यदिमासवृद्धिपदेनसौरमासस्यत्रिंशद्दिनसंघातापेक्षयाधिक्य
मुच्यतेततस्तस्यकिंचित्तिथिद्वैधाविनाभूतत्वाल्लक्षणयायुज्यतेनतुतन्नोच्यते यस्यहिमासस्ययदौत्सर्गिकंरूपंतदपेक्षया
धिक्यंतस्यवृद्धिः सौरस्यचरव्येकराश्यवस्थानपरिछिन्नत्वंतत्रएकराशौरविर्यावत्कालंमासः सभास्करइतिवचनात् नचत
स्यकदापितत्राधिकत्वंत्रिंशत्तिथिसंघातात्मकत्वंतुनतस्यरूपंकिंतुचांद्रस्य तेनतस्यैवषष्टितिथिसंघातरूपत्वंकदाचित्कर्मा

का०तं०
२३६७

धिक्यंमासवृद्धिपदेनवक्तुंयुज्यते युक्तंचैतत् रविणालंघितोमासश्चांद्रः स्यातोमलिम्लुचः तत्रयद्विहितंकर्मउत्तरेमासिकार
येत् पक्षद्वयेर्कसंक्रांतिर्यदानस्यात्सितासिते तदातन्मासिकंकार्यमुत्तरेमासिकारयेत् स्पष्टमासविशेषाख्याविहितंवर्जये
न्मलइत्यादिभिः सामान्यवचनैरुपाकर्मवद्दव्यंवक्तव्यंपवित्रोत्सवंतथा उत्तरेनियतंकुर्यात्पूर्वे।तन्निःफलंभवेदित्यादिभिश्चा
धिमासप्रकरणपठितेर्विशेषवचनैरुपाकर्माष्टकादीनामधिकमासेउत्तरत्रैवकर्तव्यत्वात् यच्चमासिसंवत्सरेचैवतिथिद्वैधंय
दाभवेत् तत्रोत्तरोभमाज्ञेयापूर्वातुस्यान्मलिम्लुचेतिसत्यव्रतवचनंतदपिपूर्ववद्धः संपूर्णोत्तरदिनवृद्धतिथिविषयत्वेयथा
द्वादशभिर्मासैर्मासोवृद्धोमलिम्लुचः तथातिथिस्त्वहोरात्राद्वृद्धोप्रोक्तामलिम्लुचा षष्टिदंडात्मिकायास्तुतिथेर्निष्क्रमणे
परे अकर्मण्यांतिथिमलंज्ञेयमेकादशींविनेत्यादिभिरुत्तराधृद्धत्वप्रतिपादकैर्वचनैर्विरोधापत्तेर्मलमासापत्तेश्चप्रकरणबा
धापत्तेश्चैकस्मिन्मासिषष्टितिथ्यात्मकत्वेनतिथिद्वैधंसंवत्सरेचमासद्वैधादेवातिथिद्वैधंयदाभवेत्तदातत्तन्मासीयतति
थिप्रयुक्तेसंवत्सरसाध्यव्रताद्यंत्यतिथिप्रयुक्तेचकर्मण्युत्तराधःभाज्ञेयापूर्वातुदुष्टस्यतत्तद्ज्ञागांतर्गतत्वादित्येवंमलमास
विषयतयैवव्याख्येयं हेमाद्रिरप्येवमेवतद्वचनव्याख्यानमभिमतं किंचैकराशिस्थितेनसूर्येणकस्याश्चित्तिथ्योः द्विस्पर्शा
स्पर्शयोःप्रधानभूतस्यकर्मण आवृत्तिलोपान्यतरप्रसंगद्वयंसौरमासाग्रहणे उत्सर्गतःकारणंचरूवत्सरिवर्त्ततेतिलघु
हारीतवचनउक्तंतस्यातिथिप्रयुक्तेषुसर्वकार्येषुतुल्यत्वात्सांवत्सरिकस्यचतत्रोपादानादेव आह्निकेपितृकार्येचेत्यादिवचने
ष्यश्चमासतिथिप्रयुक्तेषुसर्वकार्येषुउत्सर्गतश्चांद्रमासग्रहणस्यैवयुक्तत्वाद्वार्षिकाष्टकादिश्राद्धोपाकर्मजन्मादिनोत्स
वादिषुसौरमासोपादानाभिधानंमहत्साहसं यत्तुदशहरासुनोत्कर्षइतिवचनंउपाकर्मोत्सर्जनयोरनुत्कर्षाभिधानंतच्छंदोगवि
षयं एतदिष्टंष्वपादितर्हितैसौरमासग्रहणस्यतत्रानुत्कर्षहेतुत्वाभिधानात् सिद्धस्यैवचतथाभिधानौचित्यात् नचछंदोगा
तिरिक्तानामुपाकर्मोत्सर्जनयोस्तत्सिद्धं नहितत्संबंध्युपाकर्मादिविधिगतस्यश्रावणादिशब्दस्यसौरद्योतकंकिंचिदः २३०

467
1942

स्तिवचनं नन्विदमेतद्धेतुकानुत्कर्षवचनमेवयथादशहरायुगादिविधिगतानांज्यैष्ठवैशाखादिशब्दानांसौरपरत्वद्योतकत्वेनहेमाद्रिणा
यद्यपिवैशाखादिशब्दाश्चांद्रमासवचनाएवेतिनिरूपितंतथापियुगाद्युत्कर्षनिषेधकवचनपर्यालोचनयाप्रसिध्यानुगुण्यात्तदनुष्ठा
नादरार्थंसौरमासगतैवयुगादित्याभिव्यक्तिग्रंथेनोक्तं प्रसिद्धिश्चवदर्शितातैनैवनहि मिथुनादित्येशुक्लदशमीदशहराकुंभादित्येचअ
सितपंचदशी अमावास्यायुगादिरित्येवमभिधीयमानमपिश्रद्दधानइति तथोपाकर्मोत्सर्जनविधिगतयोःश्रावणपौषशब्दयो
रपिसौरपरत्वद्योतकमिदमेवास्तु नचैवंवेदोपाकरणेप्राप्तेकुलीरेसंस्थितेरवौ उपाकर्मनकर्तव्यंसिंहयुक्तइति नर्मदोत्तरभागेतु
कर्तव्यंसिंहयुक्तके कर्कटेसंस्थितेभानावुपाकुर्यात्तुदक्षिणइतिवचनद्वयंनिरवकाशंस्यात् सौरश्रावणग्रहणेकर्कस्थरवावेवोपाक
र्मविधानात्सिंहेतदप्रसक्तेरितिवाच्यं एतस्यानाकरत्वात् कालादर्शादिलिनाद्यासाकरत्वेपिमीनमेषयोर्मेषवृषभयोर्वावसंतइति
वचनात्सर्वेषांचैत्रवैशाखादीनांमीनमेषवृषाद्यन्यतरूपत्वेनवैकल्पिकोभयरूपत्वात्श्रावणस्यापिकर्कसिंहान्यतररूपस्याव्यव
स्थयाप्राप्तस्यव्यवस्थापकत्वेनसार्थकत्वसंभवात् नचैवमुत्कर्षःकालवृद्धोस्यादुपाकर्मादिकर्मणां अभिषेकादिवृद्धीनांनतूत्क
र्षोयुगादिष्वितिवचनमुपाकर्मोत्कर्षविधायकंनिर्विषयंस्यात्सामगातिरिक्तानामपिसौरमानेनोपाकर्मविधाविति वाच्यं सत्य
पिचैत्रादीनांवैकल्पिकमीनमेषादिरूपत्वेतुलामकरमेषेषुप्रातःस्नायीभवेन्नरइत्यस्यकार्तिकमाघवैशाखशब्दघटितस्नानविध्येक
वाक्यतया अन्यस्माच्चभूयसःस्मार्तपौराणव्यवहाराच्चैत्रादीनांमीनादिरूपत्वस्यौत्सर्गिकत्वावगमादधिकमासेपिकर्कश्रावणएवो
पाकर्मप्राप्तौतत्रसिंहश्रावणविधानार्थत्वेनतस्यापिसार्थक्यसंभवात् यदासौरमासमुख्यत्ववादीनामंतेकन्यास्थेरवौकर्तव्यम
हालयश्राद्धस्यतत्राधिमासपातेपिसौरमानोपजीवित्वात्तत्रैवप्राप्तस्यतत्राकर्तव्यत्वार्थंतुलायांकर्तव्यत्वार्थंचयावच्चकन्यात
त्वयोरित्यादितुलाविधानंतद्वत् तत्राप्येवमेववक्तव्येयज्ञीसूतवाक्यमनेकालवृद्धिपदंतिथिह्रासवृध्यपेक्षमित्युक्तंतद्वथामासवृ
द्धिपरत्वस्ययुक्तंच श्रावण्यांप्रौष्ठपद्यांचेतिमनुवचनेपिश्रावणीसौरश्रावणमास्येव यथाचतस्याग्रहसंक्रांतिदूषितत्वेआशो

का०त०
२३८

दिनाअसंभवेतत्रौषधिप्रादुर्भावाभावेवाप्रोष्ठपदीविधानंतथातस्यामलमासांतःपातेपि प्रोष्ठपद्यपिसौरमासपौर्णमास्येवतेनसम्य
गुर्वंदिभिरपिसौरश्रावणपौर्णमास्योरेवोपाकर्मकर्तव्यं कर्केधिमासेतुसौरभाद्रपदश्रावणपौर्णमास्योरेवमुत्सर्जनमपिसौरपौष
रोहिण्यष्टकाद्योरेवतत्राधिकमासेतुमाघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेहनीतिवचनात्सौरमाघे नचैवमधिमासे उत्कर्षोतात
एवेतियद्वचनबलादुपाकर्मादौसौरमासग्रहणंतदेवदशहरास्वित्यनुत्कर्षवचनंस्पष्टहृतमिति वाच्यं तस्योपाकर्मोत्सर्जनां
शेन्यायलभ्यानुत्कर्षानुवादकत्वात् प्राच्यमतेविधेःप्राथमिकादस्माद्द्वितीयेद्विगुणंचरेत् तृतीयेत्रिगुणंप्रोक्तमित्यस्यप्रति
निमित्तंनैमित्तिकशास्त्राहस्यनुवादकत्ववत् ततश्चवचनवशादुत्कर्षेपिक्षत्यभावात् अत्रोच्यतेमासशब्दस्यचैत्रादिशब्दा
नांचचांद्रेमुख्यत्वात्तद्ग्रहणमेवतावत्सर्वत्रप्रसक्तं इदंचसौरमानोपजीवनप्रयुक्तानुत्कर्षवचनंतदासर्वान्प्रतितदपवादकंसौ
रमासग्रहणमुपाकर्मोत्सर्गयोर्द्योतयेद्यदिकांश्चिदपिस्पष्टंसौरमासविधानंतत्रनस्यात् अस्तितुछंदोगान्प्रतिस्पष्टंतत्
सिंहेरवौतुपुष्यर्क्षेपूर्वाह्णेविधिवद्द्विजैः छंदोगामिलिताःकुर्युरुत्सर्गंसर्वछंदसांशुक्लपक्षेचहस्तेन उपाकर्मपराह्णिकमिति
तस्मिंस्तुसतितद्विषयतयैवोपपन्नोन्यायमूलकोनुत्कर्षविधिरन्यान्प्रतिनश्रावणस्यसौरमासमासपरत्वंद्योतयतीति द
शहरादिषुतुस्पष्टसौरमासविधेरदर्शनाज्ज्येष्ठादिशब्दानामेवगौणेपितत्रतात्पर्यद्योतनमेतद्विधिमूलकंहेमाद्र्युक्तंभवतु
नाम वस्तुतस्तुतदप्ययुक्तमेव तथाहिज्येष्ठमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ द
शयोगेनरःस्नात्वासर्वपापैःप्रमुच्यतइत्यत्रवचनेज्येष्ठवृषस्थसूर्ययोःपृथगुपादानानुपपत्तेर्दशसंख्यापूर्त्यनुपपत्तेश्च न
चबुधहस्तयोगस्यैवानंदत्वेपिहस्तरूपदिननक्षत्रेस्यचकन्याचंद्राविनाभावेपियथानंदकन्याचंद्रयोस्ततःपृथगुपादानंत
थात्रापिभविष्यतीतिवाच्यं तत्रप्रवृत्तिनिमित्तभेदेनपदार्थभेदात्तदुपपत्तेः वारनक्षत्रैकैकमात्रवृत्तिर्हिबुधहस्तपदयोः
प्रवृत्तिनिमित्तंउभययोगश्चानंदस्यएवंहस्तकन्याचंद्रयोरप्यविनाभावमात्रंप्रवृत्तिनिमित्तंतुभिन्नमेव अत्रतुसौरेज्येष्ठप २३८

469
1942

दस्यप्रवृत्तौवृषस्थरविरेवप्रवृत्तिनिमित्तमितिनपदार्थभेदः एवंहस्तनक्षत्रंज्येष्ठदशम्यांशुक्लपक्षगतायामेवभवतीतितस्याहस्तत्वशुक्लाया
स्तयोपिशुक्लपक्षाविनाभावेपदार्थभेदादेवपृथगुपादानंतस्य तेनतद्वाक्यगतोज्येष्ठशब्दश्चांद्रमासवचनएव तदुपजीव्येवदशहरा
स्वरूपं वृषस्थरवियोगेतुबुधहस्तादियोगेनेवपुण्यतमत्वं एवंयुगादिष्वपिवैशाखेसितेपक्षेतुतृतीयारोहिणीयुता दुर्लभाबुधवा
रेणसोमेनापिविशेषतइति नक्षत्रवारविशेषयोगादिवतत्तद्राशिस्थरवियोगाद्यपिपुण्यतमत्वप्रतिपादकानिवचनान्यन्वेष्याणि
एवंमन्वादिष्वपितेनयुगादिमन्वादिविधिगताकार्तिकादिशब्दाश्चांद्रमासवचनाएव नतत्तद्राशिस्थरवियोगेनतुपुण्यतमत्वमात्रं
भद्रपदापरपक्षस्यैवकन्यास्थरवियोगेन कातर्हिदशहराद्यनुत्कर्षाभिधानस्यतत्रचैतद्विष्टं वृषादिलइतिहेत्वभिधानस्यगतिः
श्रूयतामवधानेनमदुपज्ञानयोर्गतिः नेदमनुत्कर्षाभिधानंदशहरादिस्वरूपसौरमासघटितमित्यनेनहेतुनाकिंतुतासां
पुण्यतमत्वंफलातिशयहेतुत्वलक्षणंनक्षत्रवारयोगविशेषयोगेनेवराशिविशेषस्थरवियोगेनेत्यनेनहेतुना तथाचज्येष्ठा
द्यधिमासांतर्गतास्तुदशहरादिषुवारनक्षत्रादिविशेषयोगस्येवराशिविशेषस्थरवियोगस्यलाभात्फलविशेषलिप्सयातत्रै
वदशहरादिप्रयुक्तंकार्यंकर्तव्यंनतुचांद्रमानप्रयुक्तत्वाच्छुद्धमासप्रतीक्षयेतितद्वचनार्थः अतएवानेकसमुदायाभिप्रायेण
दशहरास्वितिबहुवचनंसंगच्छते अन्यथादशहराख्यदशम्याएकत्वात्बहुवचनंसंगच्छते अन्यथादशहराख्यदशम्याएकत्वा
त्बहुवचनानुपपत्तिः अतएवचोपाकर्ममहाषष्ठ्योरितिपाठेमहाषष्ठीग्रहणंराशिविशेषस्थरवियोगघटिततरालभ्ययो
गानामप्युपलक्षणंयुगादिग्रहणंचमन्वादीनामपि तथाचमरीचिः रोगेचालभ्ययोगेचसीमंतेपुंसवेपिच यद्दानादिसमुद्दि
ष्टंपूर्वत्रापिनदुष्यतीति प्रतिमासंमृताहेचश्राद्धंयत्प्रतिवत्सरं मन्वादौचयुगादौचतन्मासोरुभयोरपीतिचेति स्मृतिसंग्र
हे योगादिकमासिकंचश्राद्धंचापरपक्षिकं मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेति अतएवयुगाद्यादिश्राद्धस्यमासद्वये
प्यनुष्ठानाभिधानंयुज्यते राशिविशेषस्थरवियोगप्रयोगप्रयुक्तफलविशेषलिप्सयामधिमासमध्येनुष्ठितस्यापितस्यशु

डुमासीयतत्तत्तिथिविशेषावच्छिन्नजीवनरूपनिमित्तप्रयुक्तयापुनरनुष्ठातुमुचितत्वात् आपरपक्षिकं कृष्णपक्षमासान्यप्रयुक्तं
महालयेतुवक्ष्यते प्रतिवत्सरमृताहश्राद्धस्यत्त्रभयत्रकर्तव्यताव्यवस्थापूर्वमुक्त्वा एवंतैर्थिकस्यापिनिमित्तवशात् यात्वहेमाद्रि
णादशहरायुगादिषुसौरमासप्रसिद्धिरुक्तासेदानींतनशिष्टव्यवहारेतावद्विपरीतादृश्यते तथाहि द्विचत्वारिंशदधिकपंचदशशतत
शकाब्देज्येष्ठशुक्लनवम्यांमिथुनसंक्रांतिः तदनंतरदशम्यांचदशहराकृत्यंसर्वैःशिष्टैःकृतंतत्रैवभाद्रपदशुक्लचतुर्दश्यांकन्यासं
क्रांतिस्तदनंतरकृष्णपदंक्षत्रयोदश्यांचयुगादिकृत्यं तत्रैवशुक्लादिमाघकृष्णप्रतिपदिकुंभसंक्रांतिस्तदनंतरममावास्यायांच
युगादिकृत्यमिति किंचप्रायःशुक्लादिमाघामावास्यातिथिःसमस्तेवकुंभादित्येभवतितत्रांतस्त्ववश्यमेवतत्रकुंभादित्यसमा
प्तस्यैवमुख्यमाघत्वात् अस्यत्वयंदमुदाहरणंबहुधाएकमेवदृश्यतइति तेनदशहरायुगादिष्वपिदशहरास्त्वितिवचनबलात्सौर
मासग्रहणाभावात्तदृष्टांतेनोपाकर्मोत्सर्गयोस्तत्र ग्रहणस्यदूरापास्तत्वात् कृत्स्नसौरमानोपजीवनछंदोगोपाकर्मोत्सर्जनविष
यमेवतत्तद्धेतुकोपाकर्मोत्सर्गानुत्कर्षाभिधानीयदपिजीमूतवाहनेन उपाकर्मचकर्तव्यंकर्कटस्थेदिवाकरे हस्तेनशुक्लपंचम्यां
श्रावण्यांश्रवणेनवेदितिस्मृतिसमुच्चयवचनमुपाकर्मविधिगतश्रावणशब्देनसौरमासपरिग्रहेस्पष्टमेवद्योतकत्वेनोक्तंतस्योत्त
रार्धतोबदनन्वितार्थं तथाहिश्रावणीशब्दस्तत्रत्योननक्षत्राणांतत्तिथिमात्रपरःश्रवणेनचेदित्यनुपपत्तेः किंतुश्रावणस्येयंश्राव
णीतिकर्कटीयपौर्णमासीपरइतितावत्तेनैवोक्तं पौर्णमासीचयजुर्वेदीनामेवोपाकर्मकालत्वेनोक्ता नचतान्प्रतितस्याःश्रवणयु
क्तायाएवविधानंक्वाचिदुपलभ्यते श्रावण्यांप्रोष्ठपद्यांचेतिमनुवचनेतावच्छ्रावणीशब्दोनंतेषीमुत्सृजंतीतिवन्नक्षत्रयुक्ततिथि
परःपौर्णमास्यलाभप्रसंगात्प्रोष्ठपदीशब्देपितथापत्तेस्तेनापिसौरश्रावणप्रोष्ठपदसंबंधितिथिपरत्वेनतयोर्व्याख्यानाच्च सा
चतिथिःश्रावणीतावत्पौर्णमास्येवश्रावण्यांपौर्णमास्यामितिकातीयसूत्रैकवाक्यत्वात् अतएवतत्समभिव्याहृतस्यप्रोष्ठप
दीशब्दस्यापितत्परत्वस्यैवोचितत्वाद्यप्रोष्ठपदीशब्दस्यसिंहसंबंधितिथिमात्रपरत्वमभिप्रेत्यछंदोगविषयत्वकरणंतस्यैवत २३९

दप्ययुक्तं नचसकलाध्येतृप्रसिद्धवाशाहस्त्युक्तपाठत्यागेनस्वाभिमतसिध्यर्थंजीमूतवाहनेनैवकेवलमध्यायानामुपाकर्मश्रावण्यांश्र
वणेनक्षितिपवित्तायोगीश्वरवचनात्श्रवणयुक्ता याएवश्रावण्याविधानं यतोनक्षत्रेचलुपीत्यधिकरणतृतीयांतत्वेनश्रावणीश
ब्दसामानाधिकरण्येनतावन्नतद्विशेषणंश्रवणशब्दः तथासतिविशेषस्यैवविवक्षितत्वापत्तेरविशेषविहितस्यलुपएवासंभवात्
नापिसामान्यतृतीयांतएवयुक्तयामित्यध्याहारेणतथा अध्याहारादेवदोषात् पंचम्यांहस्तेनवेत्यादौतुतथाव्याख्यानंयुक्तंवा
क्यांतरादर्शनात् अतएवेतरेतरनिरपेक्षहस्तपंचमीघटितवाक्यांतरदर्शनात्शुक्लहस्तशुक्लपंचमीरूपकालद्वयपरत्वेनाप्ये
वंजातीयकानिकाक्यानिव्याख्यातानिनिबंधृभिः तेनसत्यपितुशब्देनक्षत्रेचलुपीतितृतीयांतःनिपातानामनेकार्थत्वेपक्षांतर
मेवप्रतिपादयतिश्रवणशब्दःश्रवणेनश्रावणस्येति आदिशास्त्रांतरैकवाक्यतयेतिव्यर्थमेवतद्युक्तपाठकल्पनं औषधिभावश
ब्दस्यापिदृध्यपरपर्यायौषधीशभावीपलक्षितशुक्लपक्षपरतयाव्याख्यानमयुक्तं औषधीनांप्रादुर्भावइतिस्पष्टंशास्त्रांतरे
भिधानात् अर्थात्शुक्लपक्षलाभः नहिश्रावणपंचमीसितातिरिक्ताहस्तयुक्ताभवति श्रवणंवादर्शातएवश्रावणकृष्णपक्षे श्रावण्याः
श्रवणधनिष्ठाद्विकेनद्विभत्वात् तेनश्रावणपौर्णमास्याःश्रावणशुक्लायाएवोपाकर्मकालत्वेनविधानस्यक्वाप्यदर्शनात्पौर्णमा
स्युपाकर्मविशिष्टानांकेषांचिदपितथानुष्ठानादर्शनाच्चतन्मात्रलिखितमेवैतद्वचनमनन्वितार्थमनाकरमेव साकरमपिवाश्रवणो
पाकर्मविषयत्वेनैवव्याख्येयंश्रवणीग्रहसंक्रांतिदुष्टत्वेनसूतकादिसंभावनयावाचेदुपाकर्मयोग्यानतदाचांद्रश्रावणसंबंधि
न्यांहस्तयुक्तपंचम्यांतत्स्वत्रोक्तायामुपाकर्मकर्तव्यंतच्चतदायदिसाकर्कटस्थेसूर्येभवति प्रायश्चसाताद‍ृशीभवत्येव यदिप्र
त्यासन्नपूर्वभाविअधिमासवशात्कदाचित्सिंहयुक्तेभवतितदातत्रनकर्तव्यंकिंतुप्रोष्ठपदश्रवणइति ह्येपरवावितिपुनरभिधाना
द्यथा ज्येष्ठेमासीत्यस्यदशहरावाक्यगतस्यचांद्रपरत्वमेवतथात्रापिकर्कटस्थेदिवाकरइत्युक्तत्वात्श्रावण्यामितिश्रावणशब्दस्यचां
द्रपरत्वमेवेति तेनदशहरास्वितिहेतूक्तिपूर्वकोत्कर्षनिषेधकवचनबलाद्दशहरायुगादि विधिगतानांज्येष्ठवैशाखादिशब्दानां

471
1942

सौरमासपरत्वाभिधानंहेमाद्रिरूपाकर्मोत्सर्जनविधिगतयोश्चश्रावणपौषशब्दयोस्तज्जीमूतवाहनस्यतदयुक्तमित्यलंबहुना यच्चकृष्णपक्ष
सामान्यप्राप्तमपिमहालयसंज्ञकेप्रोष्ठपद्यूर्ध्वकृष्णपक्षेत्यावश्यकत्वार्थंफलातिशयार्थंवासर्वस्मृतिपुराणेषुपुनर्विहितंश्राद्धंतद्यदास
पक्षावश्यकन्यासमाप्यः कन्योपक्रमोभवतितदासम्यगेव येनकेनापिपक्षेणकर्तव्यं यदातुससिंहोपक्रमः कन्यासमाप्यस्तदनंतरकृ
ष्णपक्षश्चकन्योपक्रमस्तुलासमाप्यस्तदाद्वयोरपितयोः कृष्णपक्षयोः कन्यायुक्तनागपंचम्याद्यन्यतमपक्षेणपूर्वत्रसकृत्सक्षेण
चोत्तरत्रयेषांमहालयापरपक्षेसकृत्पक्षोनास्तितेषामुत्तरत्रत्रिभागहीनादिपक्षसंभवात्पूर्वत्रैवकन्याभागेश्राद्धंतत्कर्तव्यं यदापि
दर्शांतभागेकन्यासंक्रमात्तदनंतरदर्शातिक्रमेणचप्रतिपदितुलासंक्रमात्कन्यायामधिमासपातेनदर्शश्राद्धवेलांयावत्सिंहव्याप्त
एवसपक्षस्तदानतत्रपक्षेमहालयश्राद्धंकर्तव्यंकिंतूत्तरत्रैवाधिमासमध्यएवयेनकेनापिसक्षेणेतिप्रतिभाति तथाहिहंसेवर्षा
सुकंन्यास्थेशाकेनापिगृहेवसन् पंचम्याउत्तरेदद्यादुभयोर्वंशयोर्भृशं स्वर्येकन्यास्थितेश्राद्धंयोनकुर्याद्गृहाश्रमी कुतस्तस्य
धनंपुत्राःपितृनिश्वासपीडनात् कन्यागतेसवितरिपितृराजानुशासनात् तावत्प्रेतपुरीशून्यायावद्वृश्चिकदर्शनं ततोवृश्चि
कआयातिनिराशाःपितरोनृप पुनःस्वभवनंयांतिशापंदत्वासुदारुणं यावच्चकन्यातुलयोःक्रमादास्तेदिवाकरः तावच्छ्रा
द्धस्यकालस्स्यात्शून्यंप्रेतपुरंतदा हस्तर्क्षस्थेदिनकरेपितृराजानुशासनात् तावत्प्रेतपुरीशून्यायावद्वृश्चिकदर्शनं वृश्चि
केसमतिक्रांतेपितरोदैवतैःसह निश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणं हस्तग्रहणंकन्याराशिसंबद्धनक्षत्रत्रयोपलक्षणं
उत्तराहस्तचित्रर्क्षगतेतीक्ष्णांशुमालिनि उत्तराहस्तचित्रासुकन्यायांभास्वतिस्थितइतिचमात्स्यकौर्मयोस्तथाभिधानात्
समतिक्रांतेपिसमाक्रांते तुलाग्रहणंचकन्यायामसंभवेतत्रकर्तव्यत्वार्थंनतुतत्तुल्यकल्पनयाक्रमादित्युक्तत्वात् कन्यारा
शौमहाराजयावत्तिष्ठेद्दिभावसुः तस्मात्कालाद्भवेद्देयंवृश्चिकंवायदागतइतिवचनात् बहुषुवचनेषुकन्यायामकरणेप्र
त्यवायश्रवणाच्च एवमादिषुवचनेषुकन्योपजीवनेनैवश्राद्धंविधीयते आश्विनपदयुक्तेष्वपितत्पदस्यसौराश्विनपरत्वे
नचैत्रादीनांचमीनादित्वस्यौत्सर्गिकत्वेनकन्यापरत्वान्नभस्यादिपदयुक्तेष्वपिनभस्यप्रोष्ठपदादिशब्दानांचैत्रादीनांमेषा २४०

473
1942

दित्वपक्षपक्षेणतत्परत्वसंभवादविरोधात् सौरमानोपजीविनांत्वानुत्कर्षस्यन्याय्यसिद्धत्वात् अतएवकालादर्शेमलमासकर्तव्येषु
महालयश्राद्धंसंगृहीतं अष्टोदकुंभमहालययुगादिष्विति अत्रमहालयश्राद्धस्यसौरमानोपजीवित्वमभ्युपेत्यैवतावज्जीवनजी
मूतवाहनप्रभृतयएवंवदंति यदातावत्कृष्णपक्षद्वयस्यकेनापिपक्षेणश्राद्धप्रयोगयोग्यंकन्यास्पर्शित्वंतदाप्रथमकृष्णपक्ष
संबंधिन्येवकन्याभागेश्राद्धंनित्यंकर्तव्यं तस्याआषाढ्याःपंचमपक्षत्वात् तस्यचाषाढीमवधिंकृत्वाय‍ःस्यात्पक्षस्तुपंचमः
तत्रश्राद्धंप्रकुर्वीतकन्यांगच्छतुवानवा आगतेपिरवौकन्यांश्राद्धंकुर्वीतयत्नतः आषाढ्याःपंचमःपक्षःप्रशस्तःपितृकर्मसु
इतिजातूकर्ण्यजाबालवचनाभ्यांश्राद्धेप्रशस्तत्वाभिधानात् कन्यांगच्छतुवानवा आगतेपिरवौकन्यामितिचकृत्स्नपक्षाभि
प्रायंपंचमपक्षप्रशंसार्थंकन्याऽस्पृष्टोपिपंचमपक्षभागःश्राद्धार्हःकिमुतकन्यास्पृष्टइति कन्यास्पृष्टभागेश्राद्धप्राप्त्यभावा
त् यदापिशक्रध्वजनिपातांकोयःस्यात्पक्षस्तुपंचमः सविज्ञेयोपरःपक्षःश्राद्धंतत्रविधीयते पुत्रमायुर्धनंधान्यमारोग्यं
भूतिमेवच प्राप्नोतिपंचमेदत्वाश्राद्धंकन्यास्तथापरान् एतान्यपिहिहिंसंतिपंचमंयोन्यतिक्रमेत् तस्मान्नातिक्रमेद्विद्वा
न्पंचमेपैतृकंविधिमितिकार्ष्णाजिनिवचनात्पुण्यःकन्यागतोभास्वान्पुण्यःपक्षश्चपंचमः कन्यागतंपंचमंचपुण्यात्पुण्य
तमंस्मृतमितिजीमूतवाहनोदाहृतवचनाच्चप्राप्तएवनित्येकन्यागतेश्राद्धेपंचमपक्षरूपोगुणःफलविशेषार्थंविशेषार्थंवि
धीयतेनित्यश्राद्धस्यवाकन्याभागएवयेनकेनचित्पक्षेणानुष्ठानेनसिद्धावपितदर्थमेवपंचमपक्षसंबंधिनिसिंहभागेपिश्रा
द्धावृत्तिर्विधीयतेतदापिकंटागतमध्यास्वादन्यायेनतत्रैवकर्तव्यं यदापिकन्यायामधिमासस्तदान्यायात्तत्रैवप्राप्तमपिम
हालयश्राद्धंवचनादुत्कृष्यतुलापरपक्षेविधीयते तथाचज्योतिःपितामहःमासःकन्यागतेभानावसंक्रांतोभवेद्यदिदैवं
पित्र्यंतदाकर्मतुलास्थेकर्तुरक्षयमिति ज्योतिःपराशरोपि यातुधानप्रियोमासःकन्यार्केजायतेयदा पित्र्यंदैवंतदाकर्म
उत्तरेमासियुज्यतइति एतद्वचनवशाच्चमहालयश्राद्धविधायकवचनगतस्याश्विनपदस्यसौरकन्याश्विनपरत्वंस्पष्टमवगा

म्यतेपौर्णमास्यंतश्चांद्रपरत्वेहितस्यकर्कटस्थेरवावधिमासेकर्कोपक्रमसिंहसमाप्यश्रद्धश्रावणापरपक्षेसिंहस्थेरवावधिमासेसिंहो
पक्रमसिंहसमाप्याधिकभाद्रपदापरपक्षे आषाढ्याःपंचमेपिकन्याःसंस्पर्शित्वान्नभोवाथनभस्योवामलमासोयदाभवेत् सप्तमः
पितृपक्षःस्यादन्यत्रैवातुपंचमः अर्केनभस्येकन्यास्थेश्राद्धपक्षःप्रकीर्तितः सिनीवालीमतिक्रम्ययदाकन्यांव्रजेद्रविः तदा
कालस्यबहुत्वादर्तीतेवपितृक्रियेतिनागरखंडदेवलवचनाभ्यांचमहालयश्राद्धानुष्ठानासंभवेपिकन्यायामधिमासेतत्पूर्व
भाविनिदर्शोपजातकन्यासंक्रांतियुक्तेभाद्रपदापरपक्षएवतदनुष्ठानंयुक्तं नभोनभस्ययोरेवाधिमासेपंचमपक्षातिक्रमवि
धानादन्यत्रपंचमएवेत्युक्त्याचतदतिक्रमकारणाभावादंतेवायदिवामध्येयत्रकन्यांरविर्व्रजेत् सपक्षःसकलःपूज्यःश्राद्धं
तत्रविधीयतइतिकार्ष्णाजिनिवचनाच्च नभस्यदर्शोतेकन्यास्थेर्केतत्पक्षमध्येयदाकदाचित् सिनीवालीममावास्यामतिक्रम्य
रविर्यदाकन्यांव्रजेत् सिंहस्थेरवावधिमासइतियावत् अतीतापंचमंपक्षमतीत्यसप्तमंगतेत्यर्थः हेमाद्रिस्तु अधिकमा
सेमहालयश्राद्धोत्कर्षेप्रमाणत्वेनमासःकन्यागतेभानौयातुधानप्रियोमासइतिवचनद्वयंलिखितं असंक्रांतिकोभाद्रपरमासो
ज्ञायतइत्यर्थःइतिचतदभिप्रेतंतस्यार्थंव्याचक्षाणाःप्रयोगपारिजातकारादयोभ्रांताएव तेनाश्विनपदस्यचांद्रपरत्वेकन्याधि
मासेतुलायांमहालयश्राद्धोत्कर्षकमिदंवचनद्वयमसंगतमेवेतिसौरपरमेवतत्तत्थात्वेपिचकन्यांगच्छतुवानवाआगतेपिरवौक
न्यांअंतेवायदिवामध्येइतिवचनानिपंचमपक्षप्रशंसार्थानिपंचमपक्षेकेनापिपक्षेणनित्यश्राद्धयोग्यकन्याभागत्वाभेपंचमप
क्षरूपगुणफलसंबंधार्थानिफलविशेषार्थंवानित्यश्राद्धसाहित्येनपंचमपक्षीयसिंहभागेपिश्राद्धाभ्यासविधानार्थानीत्युक्तमेवं
तितद्वचनविरोधः तेनाशीचादिनामलमासत्वेनवाकन्यायामकरणेतुलापरपक्षेमहालयश्राद्धमन्यदाकन्यायुक्तापरपक्षाभा
गएवेति अत्रवदामिसंतितावत्कन्यामनुपजीव्यैवकेवलचांद्रमानाश्रयणेनमहालयश्राद्धविधायकानिमहालयप्रकरणेदर्शिता
नियुत्तरादयनातश्राद्धइत्यादीनिविष्णुधर्मोत्तरगतानि अश्वयुक्कृष्णपक्षइत्यादीनिचब्रह्मपुराणगतानिअन्यान्यपिबहूनि २४९
वचनानि कन्यायुक्तवचनोक्तस्यचकन्यायोगस्यानादरप्रतिपादकानिवचनान्येवाषाढीमवधिंकृत्वेत्यादीनिकन्यायुक्तपंचमप

475
1942

क्षादिनानांचप्राशस्त्यातिशयप्रतिपादकानिपक्षांतरेपिकन्यास्थेरवौश्राद्धंप्रशस्यते कन्यागतेपंचमेतुविशेषेणैवकारयेदित्यान्यादिपु
राणानिवचनानितेषुचांद्रमानाश्रयणद्योतकानिबहूनिकन्यासंस्थेरवाविषेपूजाकार्यायथाविधि भोजंगीतिथिमासाद्ययावच्चंद्रा
र्कसंगममितिदेवीपुराणेस्पष्टमेवेषपदेनचांद्रमासग्रहणंज्येष्ठेमास्मिवृषेरवावितिवत् अन्यथातस्यानर्थक्यापत्तेः एवंसतिकन्यायुक्त
वचनेषुयत्कन्याग्रहणंतन्नसौरमासग्रहणार्थंकिंतुप्राशस्त्यातिशयमात्रार्थमिति यदाकन्यानादरप्रतिपादकैरेभिर्वचनैरेवोक्तंतदा
तद्वशादाश्विनपदानांसौरपक्षत्वंदूरापेतंश्रावणभाद्रपदयोरेवमसमासत्वेसप्तमपक्षेश्राद्धं अन्यत्रपंचमएवेत्युक्त्याचाश्विनस्या
धिकत्वेसप्तमपक्षेतत्पूर्वभाविन्येकदेशवर्तिकन्यासंक्रांतियुक्तेकृष्णपक्षएवश्राद्धंयुक्तं नकन्यारवियुक्तेमलमासीयेतस्मिन्नाप्यु
त्तरमासीयेतुलारवियुक्तेतस्मिन् केवलंमासःकन्यागतेयातुधानप्रियइतिवचनयोर्गतिर्वक्तव्या तत्रमाधवेनतद्वातिद्वयमुक्तं
नात्रमहालयपदंश्रूयतेकिंतुपित्र्यमित्येतावत् तेनमहालयश्राद्धातिरिक्तव्रीहिपाकादिश्राद्धविषयमिदं तत्रव्रीहिपाककाले
शरदिविहितमाश्विनेप्राप्नोत्येव चातुर्मास्यंचतत्रापीतिचवचनात्कार्तिकंसकलंवापीवत्काम्यमपि यद्वामहालयापरपक्षेकर्तव्यंवि
तश्राद्धासंभवे कन्याराशौमहाराजपक्षांतरेपिकन्यास्थइत्यादिवचनवशादनुकल्पत्वेनकन्यायामधिमासेपिप्राप्तस्यतस्योत्क
र्षार्थमिति मयातूच्यतेतदाप्येतस्यवचनस्यमहालयश्राद्धविषयत्वंतदापिकन्यागतेकन्यार्कइतिचसामीप्येसप्तमी तुलास्थ
इतिच तेनभाद्रपदेधिमासे पंचमपक्ष [illegible]

सिनीवालीमतिक्रम्येत्यतत्समानविषयंइदंवचनद्वयं एवंसतिभ्रांतिमूलकमेवहेमाद्रिरपिलिखनकथंचित्संभवद्गुक्तिकभाती
ति यत्तुकन्यांगच्छतुवानवेत्येवमादीनामनादरार्थत्वंजीमूतवाहनेनदूषितं अनादरोह्यनादरःकर्तव्यःआदरवानकर्तव्यइतिवि
धिनिषेधविधयाचोच्यतेसिद्धवद्वा नाद्यःपंचमपक्षविधावनादरस्यापिविधानेवाक्यभेदापत्तेः नद्वितीयःअप्रामाण्यापत्तेः
कार्यैकनियतत्वाद्धवप्रमाणभावस्य आम्नायस्यक्रियार्थत्वात् उक्तंकार्यमर्थंप्रतिपादयतोवेदस्यप्रामाण्यमित्यादिवृद्धवचनात्
तस्मात्प्रशंसार्थमेवैतत्कन्यारहितोपिपंचमपक्षभागःश्राद्धार्हः किमुतकन्यायुक्तइतितदेतदयुक्तं सत्यंप्रशंसार्थमेतत्सातु

का०त०
२४२

विधेयस्यकर्तव्यानाविधेयस्यनचात्रकन्यायुक्तपंचमभागविधिः प्रतीयतेकिंतुशुद्धस्यपंचमपक्षस्य तेनतस्यैवैवंप्रशंसास्वतएवेतर
सर्वश्राद्धकालापेक्षयाश्राद्धेतिप्रशस्तस्यपंचमपक्षस्यकिंकन्यायोगेनरंभाया: किमाभरणैरिति अनथाचप्रशंसयाकन्यायामा
नादरोद्योत्यतेनचैवंकन्यारहितेपिपंचमेश्राद्धापत्तिः नभोनभस्यान्यतरस्याधिकत्वाभावेतत्रैकदेशेकन्यायोगस्यनियतत्वात् क
न्यासमाप्यत्वंविनाभाद्रपदत्वाभावात् तयोरन्यतरस्याधिकत्वेनसासिंहप्राप्तत्वेनकन्यायोगाभावेपितदासप्तमपक्षविधानादे
वतदप्रसक्तेः तस्मान्महालयापरपक्षश्राद्धेकेषुचिद्वचनेषूपात्तोनभस्योदर्शांतोमुख्यएव चांद्रः केषुचिपात्तआश्विनोपि
पौर्णमास्यंतश्चंद्रएवेतिभाद्रपदेधिमासेततश्राद्धंतदीयकृष्णपक्षावछिन्नजीवननिमित्तकमपिसगतिकत्वाद्वचनाद्योत्
यते आश्विनेधिकमासेतत्पूर्वभाविनिभाद्रपदापरपक्षएवानुष्ठेयमिति कालादर्शगतमधिमासेपितदनुत्कर्षाभिधानंतुत
स्यसौरमानोपजीवित्वमतेननेतव्यं महालयपदंतद्गतंतीर्थविशेषपरमितिमाधवः एवंसतियत्कन्योपलक्षितापरपक्ष
निमित्तकमेवमहालयदर्शोत्तरप्रतिपदिजीवत्पितृकैः क्रियतेमातामहश्राद्धंतस्यापिकन्यायामधिमासापातेतमतिलंघ्यतद
नंतरप्रतिपद्येवकन्यायुक्तायांअपरपक्षव्यवधानेनैवकरणमुचितमाशौचादिनातिपन्नस्यमहालयनिमित्तस्यपित्रादिश्राद्ध
स्यैवेति यत्तुननांदीमुखानांप्रत्यब्दंकन्याराशिगतेरवौ पौर्णमास्यांचकर्तव्यंवराहवचनंयथेति ब्रह्मपुराणेतदनंतरमेवो
पितापितामहश्चैवतथैवप्रपितामहः त्रयोह्यश्रुमुखाह्येतेपितरः संप्रकीर्तिताः तेभ्यःपरेत्रयोयेतुतेतुनांदीमुखास्त्रयः
इत्युक्तानांनांदीमुखसंज्ञकानांप्रपितामहस्यपितृपितामहप्रपितामहानामेतैरेवशब्दैः श्राद्धमुक्तंतत्रापियश्चांद्रभाद्रग्रह
णंभाद्रपदमासांतर्गतेयत्रक्वचनादिनेकन्यासंक्रमणेजातेतन्मासमध्यगतायांपौर्णमास्यांनांदीमुखानांपितॄणांश्राद्धंकर्त
व्यमितिव्याचक्षाणेनहेमाद्रिणोक्तंतत्रप्रमाणमन्वेष्यं यथाचोत्सर्गतआषाढ्याःपंचमपक्षएवमहालयश्राद्धंनभसिन
भस्येवाधिकमासेतुसप्तमपक्षविधिद्रूपोत्कर्षविधिबलात्तधीर्द्विगतयोर्नभस्याश्विनपदयोश्चांद्रपरत्वमेवकन्यागतवच २४२
नानिचकन्यासमाप्यमुख्यभाद्रपराणिनतुसत्यपिकन्याग्रहणेतत्रसौरमासग्रहणं तथाहरिशयनादावपिमिथुनस्थे

477
1942

सहस्रांशौस्वापयेन्मधुसूदनं तुलाराशिगतेराशिगतेतस्मिन्पुनरुत्थापयेत्तुतमित्यादिषुसौरमासग्रहणेपिशयनपरिवर्तनाद्योत्स
र्गिककालांतरालकालेधिकमासापातेनान्यथासिद्धोत्कर्षवचनबलाच्चांद्राषाढादिपरत्वमेवामाकादिपदानांसौरमासमुख्यत्वा
दिमतेपिद्रष्टव्यं तथागौडनिबंधोदाहृतवचनं शक्रध्वजोत्थापनंचविष्णोश्चपरिवर्तनं मासद्वयेननिर्दिष्टंशयनादाद्यकोविदैः
दुर्गायाश्चत्रिभिर्मासैराधिमासंविनैवतु अधिमासनिपातेतुक्रमादिंद्राविकाहरीन् कन्यातुलावृश्चिकेषुनृपउत्थापयेध्रुवमि
ति एतदुक्तंभवति अंतराधिमासाभावेशक्रध्वजोछ्रयणहरिपार्श्वपरिवर्तनेहरिशयनान्मासद्वयेनैवकर्तव्येदुर्गोत्थापनंचमास
त्रयेणैव उपलक्षणंचैतत्हरिप्रबोधोपिमासचतुष्टयेनैव अधिमासनिपातेपुनरन्यथाकन्यायांशक्रोत्सवपरिवर्तनेतुलायांदु
र्गोत्सवोवृश्चिकेदेवोत्थापनमिति तेनशयनात्त्रिभिर्मासैः शक्रोत्सवपरिवर्तनेचतुर्भिर्दुर्गोत्सवः पंचभिर्देवोत्थापनम
त्युत्कर्षोंतराधिमासेएषामुक्तोभवति अतएवयदापूर्वमेवमिथुनेधिकमासस्तदाकर्केहरिशयनाद्यादिमासैरेवपरिवर्तना
दीनितदुक्तंज्योतिषे संपूर्णेमिथुनेधिकोयदिभवेन्मासस्तदाकर्कटेशेतेबुध्यतिवृश्चिकेसभगवान्मासैश्चतुर्भिर्हरिः कन्या
यांतुशचीपतिःस्मरगणैर्वंद्यस्तदोत्तिष्ठति दुर्गाचैवतुलागमेसमधिकेशेषास्तदान्येस्मराइतिपरिशिष्टेपि द्विराषाढेसमुत्प
न्नेकर्कटेशायितेहरौ आश्वंल्लस्तुकन्यायांतुलायांपार्वतीतथा अनंतोवृश्चिकेचैवकुंभेचैवहुताशनइति समुत्पन्नेसम्यगुत्प
न्नेमिथुनस्थेयदाभानुरमावास्याद्वयंस्पृशेत् द्विराषाढःसविज्ञेयोविष्णुस्वपितिकर्कटेइत्युक्तेमुख्योद्विराषाढे माधवाद्यु
पपदस्वैकमासिदर्शद्वयंयदा द्विराषाढःसविज्ञेयोविष्णुःस्वपितिकर्कटेइत्युक्तेद्विराषाढोगौणः कन्यातुलावृश्चिकेष्विति
चकन्यादिसमाप्यचांद्रभाद्रपदादिपरं क्रमादितिचनयथासंख्यक्रमपरंतस्यसमसंख्यसमासनिर्देशादेवसिद्धेः किंतु
क्रमादधिमासनिपातइत्यन्वयेनयदिकर्कटेसिंहेवाधिकोभवतितदाकन्यातुलावृश्चिकेंद्राविकाहरीन् यदिकन्यायांतदातु
लावृश्चिकयोरंबिकाहरी तुलायांचेद्वृश्चिकेहरिमुत्थापयेदित्येवमधिमासनिपातक्रमात्क्रमेणेंद्रादीनामुत्थापनमित्येत
दर्थंतत्रैवचांद्रमासलाभादित्यभिप्रायगतेनोत्कर्षविधिबलाच्छयनादिषुचांद्राणामेवाषाढादीनांग्रहणंमिथुनस्थेसहस्रां

शीस्वापयेन्मधुसूदनं तुलाराशिगतेतस्मिन्पुनरुत्थापयन्तुतं अधिमासेपिपतितएषएवविधिः स्मृतइतिभविष्यपुराणंतुपु
मिथुनस्थेरवावुपक्रांतेदर्शांतेस्वापयेततुलास्थेसूर्येप्रारब्धेतस्मिन्नेवउत्थापयेत् अधिमासेपिपतितेयद्यपितदाकर्कवृश्चि
कयोः शयनोत्थाने तथापिमिथुनतुलोपक्रांतयोरेवचांद्राषाढकार्तिकयोस्तेक्रियेतेइतिसर्वदाएषविधिरेवनकदाप्येतस्य
व्यभिचारइतिव्याख्येयं अतएवशेतेविष्णुःसदाषाढेभाद्रेचपरिवर्तते कार्तिकेप्रतिबुध्येतशुक्लपक्षेहरेर्दिनेइतिमत्स्यपुरा
णेसदेत्युक्तमित्यलंभूयसा तदर्थमत्रसंग्रहः शुक्लायाःपक्षतेराद्यंक्षणंदर्शस्यचांतिमं यावद्भूयोर्कसंक्रांत्यातत्रतद्वययु
क्क्षयः अशुद्धोद्विविधोमासस्तत्राद्योपिद्विधोमतः षष्टितिथ्यात्मकःशुद्धाशुद्धभागयुगेककः शुद्धाशुद्धःकर्मभेदा
तत्रिंशत्तिथ्यात्मकोपरः पूर्वस्मानादृशाद्यस्तृतीयेद्वेभियोगतः भवत्येवततोनार्वाक्तद्दुष्ट्यापिनोभवेत् माधवादिषु
षट्स्वेवप्रायःसचभवेत्क्वचित् ४ पौषान्येष्वपिमासेषुस्यादनिष्टाप्तिसूचकः द्वितीयोवश्यमूर्जादित्रिकमध्यभवात्क्षया
त् अनंतरःसांतरोवाभवेत्पूर्वमिषादिषु त्रिंशन्मासात्मकात्रिंशत्तिथिसंचयकालतः ऊर्ध्वमप्युपजातःसप्राक्तोनाधिको
मतः भानुलंघितसंसर्पशब्दाभ्यामुच्यतेचसः तृतीयेद्वेतृतीयेद्वेएकैकोयःप्रजायते सएवचक्षयासश्चात्तचैत्रात्पूर्वःपरोपि
वा इषात्पूर्वंजायमानःषष्टितिथ्यात्मकोधिकः मलश्चक्षयसंसर्पावप्युक्तोयत्तथाक्वचित् तद्विशिष्टविवाहादिक्रियानर्हत्वसाः
म्यतः क्षयाद्यतिक्रमेणापित्रियमाणानियानिहि स्वकालएवत्वयनविशेषेषुकृतानितु स्युर्मासभेदानियमात्प्रायःसगतिकत्व
तः नकर्तव्यान्येवतानिक्षयसंसर्पयोरपि विवाहोपनयादीनिमहादानादिकानिच आद्यभागेधिकस्यैवक्रियतेतेननिर्ण
यः कर्तव्याकार्ययोस्तत्रागतिकान्यखिलानितु कारीर्यादीनियान्येवनित्यनैमित्तिकानिच नित्यहोमेष्टिपक्षादिग्रहस्नानमु
खानिच आरभ्याणिसमाप्यानिनियताहानियानिच कृच्छ्रचांद्रायणादीनितानिप्राङ्मलमासतः आरभ्यानिसमाप्यानि
मलमासेप्यसंशयं अन्येषांसगतीनांतुनारंभोनसमापनं अनुवर्तनमात्रंतुदीर्घकालव्रतांभवेत् पुराणादिप्रसिद्धानां २४२
देवानामाद्यदर्शनं आद्यस्नानंचतीर्थेषुनकर्यमधिमासके कार्याकार्यतयोक्तानियानीहास्तादिकेभृगौ गुरौचसिंहा

479
1942

तीचारगतेप्येतानितत्तथा ज्ञेयानितत्रचोक्तानीहाप्यन्यासोपलक्षणात् महालयोपाकरणाष्टकादशहरादिकं शुक्रास्तादोका
र्यमिवविषमंकेवलंत्विदं गर्भाधानंपुंसवनजातकर्मादिकानितु कार्याण्यन्नाशनांतानिस्वस्वकालेधिकेपिचेत् २१ अति
क्रांतस्वकालानिजातकर्मादिकान्यपि नकार्याणिप्राप्तकालंकिंचित्त्वेत्यत्रपतितंपत्रमेकंतत्सहतेनतु २२ कार्याणिसोदकुंभा
न्नदानमब्दंचमासिकं वर्धनीयंतेनमृतप्रथमाब्दांतराधिके तत्तन्मासेवार्षिकंस्यान्नत्ववर्वाकृमृतिमासतः २३ त्रयोदशेतुम
लिनेतत्रैवस्यान्नशुद्धके अधिमासमृतस्यैतज्ज्ञातुतस्मिन्मलिम्लुचे २४ कर्तव्यंमलमासेस्याद्द्वितीयाद्यपरस्यतु शुद्ध
एवविधेयंतन्मालिनेपिसमासतः शिष्टंमन्याःकुर्वतेयेतेज्ञेयाधर्मनाशकाः आपद्याग्रहणंकार्यमधिकेनत्वनापदि उ
पाकर्मोत्सर्जनंचछंदोगानांमलेभवेत् अन्येषांशुद्धएवस्यादिवंदशहरातिथिः युगमन्वादयश्चैवचांद्रमासाश्रयाअपि
असंक्रांतेराशिभेदगतमार्तंडयोगवत् सक्षवारादियोगेनफलातिशयहेतुना युक्ताश्चेत्तस्यलाभायश्राद्धदानाकुवादि
कं तत्प्रयुक्तंतत्रकार्यंशुद्धेतुभवितेवतत् महालयेप्रोष्ठपदपौर्णमास्यूर्ध्वपक्षके कृष्णेयद्विहितंश्राद्धंनित्यंस्यात्कर्कसिंहयोः
अतिपातेधिमासस्याषाढ्याःपंचमपक्षके तत्रत्तस्याह्निपातेतुकार्यंसप्तमपक्षके कन्यायांतन्निपतितुकन्यायुक्तांस्यद
र्शके ३२ कार्यंपंचमएवैतद्यथाशौचादिनात्रतु नहृतंतत्तदाकन्यालोभात्तन्मलिम्लुचे ३३ कार्यंकिंतुतमुद्धुध्यदीपा
मायांघटेपिवा तत्कार्यमित्यतदर्थंतुलोत्कर्षवचोर्थवत् एवंसतिचयज्जीवस्तित्वकेःप्रतिपत्तिथौ महालयोत्तरेमातामह
श्राद्धंविधीयते कन्याचिह्नितत्तल्लक्ष्मनिमित्तत्वात्तदप्यतः कन्यायामधिमासस्यनिपातेपूर्वतस्ततः अनुष्ठितेनाभिम
हालयश्राद्धेनसांतरं तमुद्धुध्यतदूर्ध्वाद्यप्रतिपद्येवतद्भवेत् महालयात्पूर्वभाविपौर्णमास्यांचयत्कृतं नांदीमुखा
स्यापित्रादित्रयोर्ध्वत्रयदैवतं कन्यायांकर्तुमर्हेतच्छ्राद्धंहेमाद्रिसूरिणा चांद्रएवप्रोष्ठपदेयदुक्तंचिंत्यमेवतत् शुचिभा
द्रपदोर्जेषुशयनंपरिवर्तनं प्रबोधनंचदैत्यारेर्यानिकर्माणितान्यपि वाक्यांतरेषुकर्कादिपुरस्कारेणयद्यपि श्रुतान्यप्य
न्यथासिद्धात्कर्षकारीवचोबलात् तत्राशावसंक्रांतेकर्तव्यान्युत्तरानितु कर्कादिषदमेवंचतत्तत्संक्रांतिचिह्निते मु

स्यचांद्रेप्रवर्तेतविरोधस्तेननास्त्यतः जीमूतवाहनादीनांमोराग्रहवतामपि एतत्संमतमित्यस्तुसमस्तानांशिवंशिवं अस्तस्य
शोकमग्नस्यकृत्येस्मिन्नतिदुःशके यत्पारगमनंतत्रहेतुगुरुकृपैवमे १ सप्तसप्तरसभूमिमितेब्देकार्तिकासितमुनौसविवारे
ग्रंथपूर्तिमकृतरघुनाथोराघवायपरमर्पयतिस्म २ चतुःसमुद्रीपरिवाधरित्रीशिष्यप्रशिष्यैर्गृहिभिक्षुवर्यैः यस्या
र्चिताब्रह्महरीशकल्पैः स्वस्तनिभिर्यश्चतुरीयनृपः ३ नारायणश्रीधरमाधवाख्यैसमेश्वरःसोजनिगाधिवंशे तस्यां
त्यसूनोरथमाधवस्यषड्दर्शनीसागरपारगस्य ४ वर्णाश्रमाचारसमूलसंवित्तत्पूर्वकानुष्ठितिविश्रुतस्य मध्यःसु
तोभ्रायतविश्वनाथप्रभाकराभ्यांजनुषांगुणेश्च ५ सम्राट्स्थपतियज्ञीयोरघुनाथइतिश्रुतः तेनेदंनिर्मितंसम्यक्
कालतत्वविवेचनं ६ तत्संतोद्रष्टुमर्हंतिसदसद्व्यक्तिहेतवः मीमांसाधर्मशास्त्रेषुसम्यकृतपरिश्रमाः ७ धर्मज्ञ
मन्यमूर्खायबोद्धव्यंतैरिदंनहि अबुद्ध्वैवभवंतश्चयत्किंचिद्ब्रुवदेवहि ८ उपेक्षणीयाःकृतिभिःकृत्राप्यनधिका
रिणः अतोनायमयोग्यार्थंमयाकारिपरिश्रमः ९ अनंतावर्तिमत्तुल्याधिक्यार्थस्तुभविष्यति प्रीयतांजानकी
जानिरनेनमकृतेनमे १० सर्वांतरात्मासर्वज्ञोरामोनःकुलदैवतं ११ इतिश्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीभ
ट्टमाधवविद्वद्वर्यात्मजसम्राट्स्थपतिभट्टरघुनाथकृतंकालतत्वविवेचनंसंपूर्णं ॥ ॥ ॥ ॥

481
1942

हरेरामहरेरामरामरामहरेहरे हरेकृष्णहरेकृष्णकृष्णकृष्णहरेहरे १ गोविंदमाधवमुकुंदहरेमुरारेशंभोशिवेशशशि
शेखरशूलपाणे दामोदराच्युतजनार्दनवासुदेवत्याज्याभटायइतिसंततमामनंति २ इतिश्रीमत्पदवाक्यप्रमाणा
भिज्ञश्रीभट्टमाधवविद्वद्वर्यात्मजसम्राट्स्थपतिभट्टरघुनाथकृतंकालतत्वविवेचनंसंपूर्णं ॥ ॥ ॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिकालतत्वविवेचनंसंपूर्णं॥ पत्रें २४५